श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

पञ्चमस्कन्धः

॥ अथ प्रथमोऽध्यायः ॥

ॐ नमो भगवते वासुदेवाय

राजोवाच–

प्रियव्रतो भागवत आत्मारामः कथं मुने ।
गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः ॥ १ ॥

श्रीमद् आनन्दतीर्थभगवत्पादाचार्यविरचितः श्रीमद्भागवततात्पर्यनिर्णयः

विहितो यस्य यो धर्मो विष्णुना प्रभविष्णुना ।
तेन मुक्तिर्भवेत्तस्य तं गुरुर्वेद सर्ववित् ॥ इति प्रवृत्तसंहितायाम् ।

श्री यादवार्यविरचिता भागवतप्रकाशिका

वेदव्यासं प्रणम्याथ मध्वं वेदेशसद्गुरून् ॥
पञ्चमस्कंधतात्पर्यं व्याकरिष्ये यथामति ॥ १ ॥

प्रकाशिका– यो नारदादात्मविद्यामधिगम्य पुनर्महीं भुक्त्वेति चतुर्थस्कंधान्तोक्तं नारदोपदेशानन्तरमपि प्रियव्रतकृतं महीभोगं श्रुत्वा राजा पृच्छति ॥ प्रियव्रत इति । भागवतः स्वतो भगवद्भक्तो नारदोपदेशादात्मारामश्च भूत्वा कथं गृहेऽरमत । आत्मरमणगृहरमणयोः परस्परविरुद्धत्वेनेदमसंभावितमित्याशयः । ननु गृहासक्तेः कामोपभोगहेतुत्वात् आत्मारामत्वं परित्यज्य गृहासक्तिरेव तेन कृताऽतो न विरोधः इत्यत आह । यन्मूल इति । यद्गृहं मूलं यस्य सो यन्मूलः कर्मबन्धः पुनः पुनः संसारापादककर्मार्जनं, तेन च पराभवः पुनः पुनर्दुःखानुभवः । तथा च तदर्थमात्मारामत्वं न त्याज्यमित्याशयः ॥ १ ॥

न नूनं मुक्तसङ्गानां तादृशानां महामुने ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥ २ ॥
महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ।
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहा मतिः ॥ ३ ॥

प्रकाशिका– प्रत्युतात्मारामा गृहासक्तिं न कुर्वन्तीत्याह ॥ न नूनमिति द्वाभ्याम् । तादृशानां भवद्भिरुपदिष्टानामत एव मुक्तसङ्गानां न भवितुमर्हति । छायानिर्वृतचित्तानां हरिचरणध्यानाविर्भूत-सुखानुभविनामित्यर्थः । स्पृहेच्छा मतिरभिमतिः ॥ २,३ ॥

संशयोऽयं महान् ब्रह्मन् दारागारसुतादिषु ।
सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥

प्रकाशिका– यच्चोक्तं भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदमिति तदप्यसंभावित-मिवाभातीत्याशयेनाह ॥ संशय इति । सिद्धिर्मुक्तिरभूदिति यत्तत्रायं संशयः । असंभावनाशङ्का भवतीति शेषः । दारादिसक्तेः सिद्धिप्रतिबन्धकत्वादित्याशयः ॥ ४ ॥

श्रीशुक उवाच–

बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्दरस आदित आवेशित-चेतसो भागवतपारमहंस्यदयितः कथञ्चिदन्तरायविहतां स्वां शिवतमां पदवीं न प्रायेण हि हिन्वन् आस्ते ॥ ५ ॥

प्रकाशिका– प्रश्नद्वयस्य क्रमेणोत्तरं वक्तुमादौ तावद्राज्ञोक्तमङ्गीकरोति ॥ बाढमिति । आत्मारामस्य गृहे रमणमसंभावितमिति यदुक्तं तद्बाढं सत्यमित्यर्थः । कुत इत्यतोऽयमर्थः प्रमाणप्रसिद्ध इत्याह ॥ भगवत इत्यादिना । चरणारविंदस्य मकरंदरसमाहात्म्यरूपमधुश्रेष्ठे आदित आवेशितेऽनादि-कालमारभ्यावेशितचेतसे । उत्तमभक्तस्य सकाशात् । तदनुग्रहादिति यावत् । यो भागवत-पारमहंस्यदयितो भागवतानां परमहंसाश्रमसंबन्धिनां प्रियः सः स्वां शिवतमां शुभतमां निर्वृतं पदवीं मार्गं कथंचित्केनापि प्रकारेणान्तरायै रागद्वेषादिरूपैर्विघ्नैरविहतामनपगताम् । अन्तरायवितामिति पाठेऽपि वि शब्दस्य निषेधार्थत्वादुक्त एवार्थो द्रष्टव्यः । प्रायेण न हिन्वन्नपरित्यजन्नास्ते । हि प्रसिद्धमेतत् । उत्तमभक्तसंगत्या निर्वृतमार्गाभिज्ञस्तं मार्गं गृहाश्रमरत्यर्थं कदाऽपि न परित्यजतीत्येत्प्रमाणप्रसिद्धमित्याशयः । अस्मादादिव्यावृत्त्यर्थं प्रायेणेत्युक्तम् ॥ ५ ॥

यर्हि वाव स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाञ्जसाऽवगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दत् ॥ यदपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतो यदा पराभवमन्वीक्षमाणः ॥ ६ ॥

प्रकाशिका– इदानीं प्रथमप्रश्नस्यात्मारामः प्रियव्रतो गृहेषु नैवारमतेत्युत्तरमाह ॥ यर्हीति । यर्हि यदा राजपुत्रः प्रियव्रतोऽवनितलपरिपालनाय भूतलरक्षणार्थमाम्नाता वेदेषूक्ता ये शौर्यादयः क्षत्रियगुणास्तेषां गणस्य समूहस्यैकान्तेन नियमेन भाजनतया नियमेन तादृशगुणसमूहाश्रयत्वेन निमित्तेन स्वपित्रा स्वायंभुवमनुनोपामन्त्रित आज्ञप्तस्तदा तदाज्ञां नाभ्यनन्दत्कर्तुं नैच्छत् । कुत इत्यत उक्तम् ॥ ब्रह्मसत्रेण संन्यासेन दीक्षिष्यमाण इति । संन्यासं गृहीष्यामीति संकल्पवान्यत इत्यर्थः । तदपि कुत इत्यत उक्तम् ॥ परमभागवत इत्यादि सत्तत्व इत्यन्तम् । अवगतं परमार्थमुत्तमं ज्ञेयं स तु निर्दुष्टं तत्त्वमनारोपितं स्वरूपं येन स तथा । किञ्च भगवति वासुदेव एव समावेशितः समर्पितः सकलकारकाणामिन्द्रियाणां कलापो ज्ञानकर्मरूपः कार्यसमूहो येन स तथा । तत्रापि निमित्तमाह ॥ वासुदेव एवाव्यवधानसमाधियोगेनेति । निरन्तरचित्तैकाग्र्यलक्षणोपायेनेत्यर्थः । नन्वज्ञवत्कथं पित्रादेशमुल्लंघितवानित्यत आह ॥ यदपीति । यद्यपि तद्राज्यं कुर्विति पितृवचनमप्रत्याम्नातव्यं न प्रत्याख्येयमिति । जानातीति शेषः । तथाऽपि तदधिकरणे राज्यरक्षणाधिकरणे क्रियमाणेऽऽसतोऽमङ्गलादन्यस्माद्विषयजातादात्मनो मनसः पराभवं तिरस्कारं हरिं विहायान्यत्र गमनरूपमन्वीक्षमाणः पुनः पुनरालोचयन्नाभ्यनन्ददित्यन्वयः । गुरूणां वचनमपि मोक्षमार्गविरोधि चेत्तन्न ग्राह्यमिति शास्त्रार्थमालोच्येति पूरणीयम् ॥ ६ ॥

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानेन व्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजजनपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥

प्रकाशिका– तर्हि महीं भुक्त्वेति कथं स्कन्धान्त उक्तमित्याशङ्कायां प्रियव्रतस्वरूपयोग्यताऽभिज्ञेन ब्रह्मणा तव गृहाश्रम एव हरिपूजात्मकं विविधभोगान् भुंजानस्य पश्चाद्विरक्त्या परमहंसाश्रमं प्राप्तस्य मुक्तिरित्युपदिष्टं श्रुत्वा महीं भुंजत इत्युत्तरं वक्तुमत्र ब्रह्मण आगमनं तावद्वक्ति ॥ अथेति । अथ पित्रादेशोल्लङ्घनानन्तरं गुणैः सत्त्वादिभिर्विविधः सर्गो यस्य स तथा तस्यैतस्य जगतः परिबृंहणं वृद्धिस्तस्यानुकूलं ध्यानमालोचनं तेन व्यवसितो निश्चितः सकलजगदभिप्रायो येन स तथा । आत्मयोनिर्ब्रह्मा । अखिलनिगमैर्मूर्तिमद्भिर्वेदैर्निजजनैर्मरीच्यादिभिश्च स्वभवनात्सत्यलोकात् ॥ ७ ॥

तत्र तत्र गगनतल उडुपतिरिव विमनावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानो गन्धमादन-द्रोणीमवभासयन्नुपससर्प ॥ ८ ॥

प्रकाशिका– उडुपतिरिव चन्द्र इवावभासयन्नित्यन्वयः । अमरपरिवृढैर्देवश्रेष्ठैर्गन्धमादनस्य पर्वतस्य द्रोर्णीं दरीं प्रियव्रततपःस्थानमवभासयन्प्रकाशयन् उपससर्प प्राप । यदा ब्रह्मा प्राप तदा तस्यां द्रोण्यां प्रियव्रतं नारद उपदिशति । मनुरपि तन्नेतुमागतस्तत्र तिष्ठतीति ग्राह्यम् । अत्र सर्वत्र ह वावेत्यादयो निपाताः श्रद्धातिशयजननायास्वादनार्था इति ज्ञातव्यम् ॥ ८ ॥

तत्र ह वा एनं देवर्षिः हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभ्यमानः ॥ सहसैव सह पितापुत्राभ्यां अवहिताञ्जलिरुपतस्थे ॥ ९ ॥

प्रकाशिका– तत्र तस्यामवस्थायामेनं ब्रह्माणं हंसयानेन तल्लक्षणभूतेन स्वपितरं पितापुत्राभ्यां मनुप्रियव्रताभ्यां सहावहितांजलिः सन् सहसैवोपतस्थे प्रत्युत्थानमकरोत् ॥ ९ ॥

भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुविजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥

प्रकाशिका– भगवानादिपुरुषो ब्रह्मा । हे भारत । तेन समनुना प्रियव्रतेनोपनीतं कृतमर्हण-मर्घ्यपाद्यादि पूजनं यस्मै स तथा । हिरण्यगर्भः समवर्तताग्र इत्यादि सूक्तवाकेनातितरामतिशयेनोदितः प्रकाशितो गुणगणावतारो गुणविस्तारः शोभनो विजयश्च यस्य स तथा दयया सहितः सदयः स चासौ हासश्च तेन युक्तोऽवलोको यस्य स तथा इति वक्ष्यमाणप्रकारेण ॥ १० ॥

ब्रह्मोवाच–

निबोध तातेदमृतं ब्रवीमि माऽसूयितुं देवमर्हस्यमेयम् ।
अहं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥

प्रकाशिका– यस्याधिकारिणो येन कर्मणा मुक्तिस्तं प्रति तदेव कर्म हरिणा विहितं तद्विहितमेव सर्वे वयं कुर्मोऽतस्त्वमपि त्वद्योग्यतानुसारेण हरिणा विहिते गृहाश्रम एव स्थित्वा तत्र हरिपूजात्मकानुपभोगान् भुंक्त्वाऽमुत्र विरक्त्या संन्यस्य मुक्तिं गमिष्यसि नान्यथेत्याह ॥ निबोधेति नवभिः । ऋतं शास्त्रे हरिणा प्रतिपादितम् । विहितमिति यावत् । देवं त्वादृशानां राज्ञां गृहाश्रमेणापि मुक्तिरिति प्रतिपादयन्तं हरिं प्रत्यसूययितुम् । किमर्थमस्माकमयं चित्तविक्षेपकराश्रमो विहित इति रोषं

कर्तुं नार्हसि कुत इत्यत आह ॥ अहमिति । ते तव ततस्तातो मनुर्विवशा अस्वतन्त्राः सन्तो यस्य येन दिष्टं विहितं सर्वं वहामः कुर्मः सर्वेशस्याज्ञाऽनुल्लंघ्येत्याशयः ॥ ११ ॥

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ।
नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥

प्रकाशिका– ननु तपआदिसामर्थ्योपेतैस्तदाज्ञोल्लङ्घनं कर्तुं शक्यमित्यत आह ॥ न तस्येति । तस्य कृतं तेन विहितं विहन्तुमन्यथा कर्तुं तनुभृज्जीवो न विभूयात्समर्थो न भवेत् । परतः सहायभूतैः स्वतः सामर्थ्येनैव । अत्र त्रयाणां नञां श्रवणाद्विभूयादित्यस्यावृत्त्या प्रत्येकं तत्संबन्धेन वाक्यत्रयमेतदिति ज्ञातव्यम् ॥ १२ ॥

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाभयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताऽङ्ग धत्ते ॥ १३ ॥

प्रकाशिका– कुत इत्यतः सर्वेषां तद्वशत्वादित्याशयेन तद्वशत्वमुपपादयति ॥ भवायेति त्रिभिः । तत्र तावद्देहयोगेन तद्वशत्वं दर्शयति ॥ भवायेति । भवो जन्म । तस्मै । हे अङ्ग प्रियव्रत । जनता जनसमूहः । अव्यक्तेनेश्वरेण दत्तं दिष्टं देहयोगं सदा धत्ते नत्वन्यथा कर्तुं शक्नोति ॥ १३ ॥

यद्वाचि तन्त्यां गुणकर्मनामभिः स्वदामभिर्वत्स वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥

प्रकाशिका– कर्मकरणेऽपि तद्वशत्वमाह ॥ यद्वाचि तंत्यामिति । यस्य हरेर्वाचि वेदाख्यायां तंत्यां वृषभबन्धनदीर्घरज्वां ब्राह्मणादियोग्यगुणैस्तद्योग्यकर्मभिर्ब्राह्मणक्षत्रियादिनामभिस्तल्लक्षणैः स्वदामभिः स्वबन्धकह्रस्वपाशैः सुष्ठु योजिता बद्धाः सन्तः हे वत्स वयं सर्वेश्वरायास्मत्स्वामिने बलिं वहामः । वेदे ईश्वरेण विहितं स्वस्वयोग्यकर्म तत्पूजात्वेन कुर्म इत्याशयः । कर्मकरणसमयेऽपि तदधीनत्वे दृष्टान्तो नसि नासिकायां प्रोताश्चतुष्पदो बलीवर्दा द्विपदे मनुष्यरूपाय स्वस्वामिने गोण्यादिकं यथा वहन्ति तथैवेति ॥ १४ ॥

ईशावसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय यत्तद्यदयुक्तनाथ चक्षुष्मताऽन्धा इव नीयमानाः ॥ १५ ॥

प्रकाशिका– कर्मफलभोगेऽपि तद्वशत्वमाह ॥ ईशावसृष्टमिति । ईशेनावसृष्टं दत्तमेव । हे अङ्ग प्रियव्रत । अवरुन्ध्महे स्वीकुर्मः । नन्वेवमीश्वरवैषम्यादिप्रसङ्ग इत्यत उक्तम् । गुणकर्मसङ्गाद्गुणः

प्राग्भवीयः प्रयत्नः प्राग्भवीयमेव कर्म तयोः संगात्संबंधात् । नाथो हरिर्यद्यदेव तिर्यगादिलक्षणं शरीरं न्ययुंक्त योजितवान् तत्तदास्थायेति । अत्र दृष्टान्तमाह ॥ चक्षुष्मतेति । यथा चक्षुष्मता नीयमाना अन्धास्तद्दर्शितं ग्राममुपेत्य तत्र दत्तमेव भुंजते तथैवेत्यर्थः ॥ १५ ॥

मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथोपयातं प्रतियातनिद्रः किन्त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ १६ ॥

प्रकाशिका– नन्वेतत्सर्वमज्ञानिन एव न जीवन्मुक्तस्येत्यपेक्षायामाह ॥ मुक्तोऽपीति । अपरोक्षज्ञानेन कर्मक्षयरूपमुक्तिं प्राप्तोऽपीत्यर्थः । यथोपयातं दैवतः प्राप्तं स्वदेहं यावदारब्धं प्रारब्धं कर्म तावत्प्रतियातनिद्रो निवृत्ताज्ञानोऽत एवाभिमानशून्य आरब्धं प्रारब्धं कर्मफलं सुखादिकमश्नन् बिभृयात् । तर्हि विद्वदविदुषोः को विशेष इत्यत आह ॥ किं त्विति । अन्यदेहाय प्रारब्धकर्म-निमित्तकदेहारंभाय गुणान्सत्त्वादीन्न वृंक्ते न संभजते । अयमेवाज्ञान्यपेक्षया ज्ञानिनो विशेषः । कर्मानुसारेणेश्वरदत्तदेहेषु कर्मफलभोगस्तूभयोरविशेष एवेत्याशयः ॥ १६ ॥

भयं प्रमत्तस्य वनेष्वपि स्याद्यतो वसन्ते सह षट्सपत्नाः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य ग्रहाश्रमः किन्नु करोत्यवद्यम् ॥ १७ ॥

प्रकाशिका– ननु गृहाश्रमे विद्यमानस्य तन्निमित्तं भयमापद्यत एव । अतः कथं मया तत्स्वीकारः कार्य इत्यत आह ॥ भयमिति । प्रमत्तस्याजितेन्द्रियस्य । वनेष्विति बहुवचनमाद्यर्थे । वानप्रस्थाद्या-श्रमेष्वित्यर्थः । षट् कामक्रोधलोभमोहमदमत्सराख्याः सपत्ना वैरिणः । ननु वानप्रस्थाद्या-श्रमेष्विन्द्रियजये सति भगवज्ज्ञानिनः परमात्मन्येव रतौ सत्यां कामादिसपत्नानुदये भयं न भवतीत्यत आह ॥ जितेन्द्रियस्येति । गृहाश्रमः किं न्ववद्यं भयं करोति न किमपीत्यर्थः । जितेन्द्रियत्वादिकं गृहाश्रमिणोऽप्यस्ति चेत्तर्हि कामाद्यनुदयेनाभयप्राप्तिस्तस्यापि भविष्यत्येवेत्याशयः ॥ १७ ॥

यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ।
युध्येत दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥

प्रकाशिका– इन्द्रियजयेनैव कामादिसपत्नजयस्तेन च भयाभाव इत्येतदुपपादयति ॥ य इति । षट् सपत्नान् कामादीन् गृहेषु इन्द्रियविषयेषु पूर्वं निर्विश्य अलं बुद्धिं संपाद्य मनोबुद्ध्यादीन्द्रियजयं संपाद्येति यावत् । तान् जेतुं यतेत । तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं प्रजहि ह्येनं इति वचनादिन्द्रियजयेनापि कथं कामादिजय इत्यतो भगवद्भक्तिद्वारेणेत्याशयेनाह ॥ युद्ध्येतेति । इन्द्रियजयसाध्यभगवद्भक्तिरूपदुर्गाश्रित ऊर्जितारीन् कामादीन्युद्ध्येत । पुनर्यथा तेषामुदयो न स्यात्तथा

कुर्यादित्यर्थः । तेषु क्षीणेषु कामान्विचरेत् । गृहाश्रमे वाऽन्यत्राश्रमे स्वेच्छानुसारेण विचरेत्तथा सति तस्य न कुत्रापि भयमस्तीति भावः ।। १८ ।।

त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान् पुरुषातिसृष्टान् विमुक्तसङ्गः प्रकृतिं भजस्व ।। १९ ।।

तात्पर्यम् – ।। हरिः ॐ ।। 'विहितो यस्य यो धर्मो विष्णुना प्रभविष्णुना । तेन मुक्तिर्भवेत्तस्य तं गुरुर्वेद सर्वविदि'ति प्रवृत्तसंहितायाम् ।। १९ ।।

प्रकाशिका– अस्त्वेवं तथाऽपि मद्योग्यं कर्तव्यं ब्रूहीत्यपेक्षायामाह ।। त्वं त्विति । तुशब्देन त्वमेतादृश एवाधिकारीति सूचयति । कोशे रतिलक्षणदुर्गाश्रितो निर्जितषट्सपत्नः सन् इह गृहाश्रमे पुरुषेण हरिणाऽतिसृष्टान् दत्तान् भोगान् भुंक्ष्व । नन्वेवं तर्हि तत्रासक्त्या मुक्तिरसंभावितेति द्वितीयप्रश्नस्योत्तरमाह ।। विमुक्तसंग इति । विषयेषु विमुक्तस्नेहः । हरिपूजात्मनैव भोगान् भुंजान इति यावत् । पश्चाद्विरक्त्या संन्यस्त इति यावदिति वा । प्रकृतिं स्वभावमाविर्भूतस्वरूपम् । अप्रतिपत्तिविप्रतिपत्तिनिरासायैतत्प्रकरणतात्पर्यं प्रमाणेनैव दर्शयति ।। विहितो यस्येति । यस्याधिकारिणो यो धर्मो गृहाश्रमादिसंबन्धी विहितः । मुक्तिसाधनतयेति शेषः । तेन तदाश्रमोचितधर्मेण । नन्वेवं मोक्षमार्गे न कस्यापि निःशङ्कप्रवृत्तिः स्यात् । स्वमुक्तिसाधनतया विष्णुविहिताश्रमधर्मस्य पूर्वमज्ञानादित्यत आह ।। तमिति । सर्ववित्सर्वयोग्यताऽभिज्ञो गुरुस्तं वेद । तदुपदेशेनाधिकारिणस्तज्ज्ञानं सुलभमिति वाक्यशेषः । तथा च तदनन्तरं निःशङ्कप्रवृत्त्युपपत्तिरित्याशयः । प्रकृते च प्रियव्रतस्य योग्यताऽभिज्ञो गुरुर्ब्रह्मैव । तेन गृहाश्रमे स्थित्वा तत्र भोगान् भुंजानः पश्चाद्विमुक्तसंगः प्रकृतिं भजस्वेत्युपदिष्टम् । प्रकृते च प्रियव्रतस्य तथाऽनुष्ठानेनैव मुक्तिर्जायत इत्याशयः ।। १९ ।।

श्रीशुक उवाच–

इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह ।। २० ।।

प्रकाशिका– प्रियव्रतस्य विरिंचाज्ञास्वीकारप्रकारं दर्शयति ।। इतीति । समभिहितोऽनुग्रहपूर्वकमुक्तो महाभागवतः प्रियव्रतस्त्रिभुवनगुरोर्ब्रह्मण आत्मनः स्वस्य विरिंचापेक्षया लघुतयाऽतीव नीचतयाऽवनतशिरोधरः प्रणतकण्ठः सन् बाढमिति तथा करिष्यामीत्युवाह जग्राह ।। २० ।।

भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरनिमिषमभिसमीक्षमाणयोरात्मसमवस्थानं वाङ्मनसोः क्षयमव्यवहितमगमत् ।। २१ ।।

प्रकाशिका— ब्रह्मणः स्वधामगमनप्रकारमाह ।। भगवान् ब्रह्मेति । मनुना । सन्तुष्टेनेति शेषः । उपकल्पितापचितिः पूजा यस्य । अनिमिषमिति क्रियाविशेषणम् । पक्ष्मविवृत्यात्मसमवस्थानं सत्यलोकं मनसो वाचो मनसश्च क्षयं विषयीकर्तुमशक्यम् । तदुभयदेवतायाः सरस्वत्याः क्षयं निवासस्थानमिति वा अव्यवहितमविलंबितं यथा भवति तथा शीघ्रमेवागमदित्यर्थः ।। २१ ।।

मनुरपि परेणैवेत्थं समभिसन्धितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरा-मण्डलस्थितिगुप्तय आस्थायातिविषयविषमविषजलाशयादुपरराम ।। २२ ।।

प्रकाशिका— मनोरपि राज्यत्यागप्रकारमाह ।। मनुरपीति । परेण विरिञ्चेनाभिसंधितः संपादितो मनोरथः पुत्रं राज्येऽभिषिच्य वनं यास्यामीत्येवं रूपो यस्य स तथा । सुरर्षिवरो नारदस्तस्यानुमतेन धरामण्डलस्थितिगुप्तये भूमण्डलगतमर्यादारक्षणायातिविषमो दुस्तरः स चासौ विषयश्च स एव विषमनर्थहेतुत्वात्तत्पूर्णो यो जलाशयो ह्रदस्तत्स्थानीयः संसारस्तस्मादुपरराम उपरतोऽभूत् ।। २२ ।।

इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वं-सनपरानुभावस्य भगवतः आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धित-कषायाशयावदातोऽपि मानवर्धनो महतां महीतलमनुशशास ।। २३ ।।

प्रकाशिका— प्रश्नद्वयोत्तरमुपसंहरति ।। इति ह वावेति । अधिनिवेशितः प्रापितः कर्माधिकारो गृहाश्रमविहितराज्यपालनादिरूपकर्माधिकारो यस्य स तथा । अखिलस्याधिकारिणो बंधध्वंसने परानुभाव उत्तमं सामर्थ्यं यस्य स तथा । भगवतः पदमङ्घ्रियुगलं तस्यानवरतध्यानं तदनुभावेन तत्सामर्थ्येन परिरंधितकषायो दग्धरागादिमल आशयोऽन्तःकरणं यस्यावदातोऽपि जीवन्मुक्तोऽपि महतां नारदादीनां सकाशान्मानवर्धनो स्वज्ञानवृद्धिकरो महतां स्वपूर्वेषां ब्रह्मादीनामाज्ञापरिपालनेन मानवर्धन इति वा ।। २३ ।।

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम । तस्यामु हवा आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान् दश भावयाम्बभूव । कन्यां यवीय-सीमूर्जस्वतीं नाम ।। २४ ।।

प्रकाशिका— अथ चानंतरमेव । तस्यामु तस्यामेव । हवेति निपातकृत्यं पूर्वोक्तम् । भावयांबभूवोत्पादयामास ।। २४ ।।

आग्नीध्रेध्मजिह्वयज्विबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ।। २५ ।।

प्रकाशिका– तानाह । आग्नीध्रेति । आग्नीध्र इध्मजिव्हो यज्विबाहुर्महावीरो हिरण्यरेतो घृतपृष्ठः सवनो मेघातिथिर्वीतिहोत्रः कविश्चेत्यग्नीनां नामानि येषां ते ॥ २५ ॥

एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसः । त आत्मविद्यायामर्भकभावादारभ्य कृतपरिचया॰ पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥

प्रकाशिका– अर्भकभावाद्बाल्यादारभ्यात्मविद्यायां ब्रह्मविद्यायां कृतपरिचयाः पूर्णाभ्यासाः ॥२६॥

तस्मिन्नु हवा उपशमशीलाः परमऋषयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य संसारभीताना शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मृतिविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येव तादात्म्यमविशेषेण समीयुः ॥ २७ ॥

प्रकाशिका– तस्मिन्नाश्रमे वर्तमानास्तदुपासनायोग्यगुणान् दर्शयितुं सकलेत्यादि वासुदेव विशेषणानि । अविरतस्मृत्याऽविगलितस्य तैलधारवदखण्डस्य भक्तियोगस्यानुभावेन सामर्थ्येन परिभाविते शोधितेऽन्तर्हृदयेऽधिगते ज्ञाते आत्मभूते स्वामिभूते प्रत्यगात्मनि बिंबभूतेऽन्तर्यामिणि सर्वप्राणिनामन्तर्यामिरूपेष्वित्यर्थः । तादात्म्यमेव तदत्यन्ताभेद एव विशेषेण तद्गुणानां तारतम्याभावेन निमित्तेन समीयुः सम्यग्ज्ञातवन्तः । यद्वा अविशेषेणैव साम्येनैव । न तु परापेक्षया स्वेषां विशेषेणेत्यर्थः । २७ ॥

अन्यस्यामपि भार्यायां त्रयः पुत्रा आसन् । उत्तमस्तापसो रैवत इति मन्वन्तराधिपतय॰ ॥ २८ ॥

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकारसारभूतदोर्दण्डयुगलापीडितकोदण्डमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्यां चानुदिनमेधमानप्रमोदप्रसरणपोषणव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेलनादिभि॰ पराभूयमानविवेकोऽनवबुध्यमान इव महामना बुभुजे ॥ २९ ॥

प्रकाशिका– उपशमायनेषु संन्यासाश्रमिषु सत्सु दशकोटिभिरेकमर्बुदम् । एतादृशानि परिवत्सराणां वर्षाणामेकदशार्बुदानि जगतीं बुभुज इत्यन्वयः । राज्ञो धर्मपालनविषयभोगप्रभावैर्भाव्यम् । तत्र धर्मपरिपालनमस्यानायासेनास्तीत्याह ॥ अव्याहतेति । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि । येषां सारभूतः श्रेष्ठः पुरुषकारो ययोस्तौ दोर्दण्डौ तयोर्युगलेनापीडित आकृष्टो मौर्वीगुणो ज्या रज्जुः

तस्याः स्तनितं झंकारस्तेनैव । युद्धं विनेति यावत् । विरमिता निरस्ता धर्मे प्रतिपक्षा येन स तथा । विषयभोगमाह ॥ बर्हिष्मत्यामिति । स्वभार्यायामनुदिनमेधमानैः प्रमोदप्रसरणमानन्दप्रवाहस्तस्य पोषणं प्रवर्धनं तेन च व्रीडया च प्रमुषितः संकोचितो हासो हसनं तेन युक्तोऽवलोकस्तेन रुचिरा च क्ष्वेलना परिहासवाक् तदादिभिः पराभूयमानविवेकः किंचित्तिरस्कृततत्त्वज्ञानोऽनवबुध्यमानोऽज्ञानी स इव न त्वज्ञानीत्यर्थः । महामना महत् हरिनिष्ठतया पूज्यं मनो यस्य ॥ २९ ॥

यावदवभासयति सुरगिरिमनुपर्याक्रमन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपति अर्धेनैवाच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्याक्रामत्स द्वितीय इव पतङ्गः ॥ ३० ॥

प्रकाशिका– प्रभावमप्याह ॥ यावदिति । सुराणां गिरिं मेरुमनुपर्याक्रामत्प्रदक्षिणीकुर्वन्नादित्यो यावल्लोकालोकपर्वतपर्यन्तमवभासयति । तावदपि वसुधातलमर्धेनैवोपलक्षितं प्रतपति प्रकाशयति । अर्धेन चाच्छादयति । तमसाऽऽवृतं करोति । हि यस्मात्तस्मात्तदा स्वभूपतित्वकाले तदर्धेन तमसाऽऽच्छादनमनभिनन्दन् समजवेन सूर्यरथसदृशवेगवता रथेन तरणिं सूर्यमनु पश्चाद्द्वितीयः पतंगः सूर्य इव पर्याक्रामत् । मेरुं प्रदक्षिणीकृत्यागमत् । केनाभिप्रायेणेत्यत उक्तं रजनीमपि तमसाऽऽवृतं कालमपि दिनं प्रकाशवन्तं करिष्यामीति मत्वेति । अस्यैतादृशं सामर्थ्यं कुत इत्यत उक्तं भगवदुपासनेनोपचितः संपादितोऽतिपुरुषः पुरुषानतिक्रम्य वर्तमानः प्रभावः सामर्थ्यं यस्येति ॥३०॥

या वा इह तद्रथचरणनेमिकृतपरिखास्ताः सप्तसिन्धव आसन् यत एवंकृता सप्तभुवो द्वीपाः ॥ ३१ ॥

प्रकाशिका– इह भूतले तस्य प्रियव्रतस्य रथचरणस्य रथचक्रस्य नेमयः प्रान्तधारास्ताभिः कृताः परिखा दीर्घिकास्ताः सप्तसिंधव आसन् । या भुवो भूतेभ्यः समुद्रेभ्यः एव समाभूतेभ्यो भुवः संबन्धिनः सप्त द्वीपाः कृताः ते सप्त सिंधव इत्यन्वयः ॥ ३१ ॥

जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञाः तेषां परिमाणं पूर्वस्मात् पूर्वस्मादुत्तरोत्तरे यथासङ्ख्यं द्विगुणेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥

प्रकाशिका– द्वीपानां नामान्याह ॥ जंब्वित्यादिना । तेषां परिमाणम् । शृण्विति शेषः । पूर्वं पूर्वं द्वीपविस्तारमानादुत्तरोत्तरद्वीपविस्तारमानं यथासङ्ख्यं द्विगुणमित्येव मानेन परिमाणेन सिन्धुभ्यो बहिः समंततः उपक्लृप्ता रचिताः ॥ ३२ ॥

लवणोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदनाः सप्तजलधयः सप्तद्वीपपरिखाः अभ्यन्तरद्वीपसमानाः एकैकशो यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् पृथक् परित उपकल्पिताः । तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुवृत्तानात्मजानाग्नीध्रेध्मजिह्वयज्विबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसञ्ज्ञान् यथासङ्ख्यमेकैकस्मिन्नेकमेकमेवाधिपतिं विदधे ॥ ३३ ॥

प्रकाशिका– यथा सिंधुभ्यो बहिरेकैकशो द्वीपा एवं द्वीपानामपि बहिः सिंधव इत्याह ॥ लवणोदेति। दधिमण्डो मथितं दधि । अभ्यन्तरद्वीपसमाना इति । जंबुद्वीपसमानो लवणोदधिः प्लक्षद्वीपसमान इक्षुरसोदधिरित्यादिरूपेण स्वस्वाभ्यन्तरद्वीपसमानविस्तारमाना इत्यर्थः बहिर्द्वीपेषु सिंधुभ्यो बहिर्विद्यमानेषु द्वीपेषु ॥ ३३ ॥

दुहितरमूर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानीनामकाव्यसुता ॥ ३४ ॥

प्रकाशिका– काव्यसुता शुक्रसुता तद्दुहितर्यपि राजकुलाभिवृद्धिर्जातेति सूचनायेदमुक्तमिति ज्ञातव्यम् ॥ ३४ ॥

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् ।
चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥ ३५ ॥

प्रकाशिका– प्रियव्रतस्योक्तं सामर्थ्यमाश्चर्यमहो इति राज्ञोऽभिप्रायं ज्ञात्वा हरिभक्तानां नैतदाश्चर्यमित्याह शुकः ॥ नैवंविध इति । पुरुषकारः पुरुषसामर्थ्यविशेषः पुसां भक्तानाम् । तदङ्घ्रिरजसा निषेवितेनेति शेषः । षड्गुणाः कामादयः । चित्रमाश्चर्यं नेत्यर्थः । कुत इत्यतोऽत्र कैमुत्यमभिप्रेत्योरुक्रमसामर्थ्यमाह ॥ विदूरेति । विप्रविवक्षया विदूरः शूद्रस्तस्मादपि विगतो विदूरगतश्चण्डालो यस्योरुक्रमस्य नारायणादिनामधेयं सकृदाददीत भक्तिश्रद्धाद्यतिशयपूर्वकमुच्चारयेद्यः सोऽधुना तत्क्षणमेव बन्धनं बन्धकं पापं जहाति । तथा च यस्य नामोच्चारणसामर्थ्येन हीनजातीनामेतादृशं फलं तदा तद्भक्तानामुत्तमजातीनां तच्चरणरजःसेवकानामुक्तसामर्थ्यं भवतीति किं वाच्यमित्याशयः ॥ ३५ ॥

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुसेवयानुपतितगुणविसर्गसंसर्गेणानिवृत्तमिवात्मानं मन्यमानः आत्तनिर्वेद इदमाह ॥ ३६ ॥

प्रकाशिका– तस्य पूर्वोक्तं पराक्रममनुवदन् ससारान्निर्वृतिरूपमाह ॥ स एवमिति । देवर्षिचरणानुसेवयाऽऽत्तनिर्वेद इत्यन्वयः । अनुपतित ईश्वराज्ञया प्राप्तो गुणविसर्गः सत्त्वादिकार्य-वनितादिस्तस्य सर्गेण ॥ ३६ ॥

अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्याविरचितविषमविषयान्धकूपे तदलमलं मनुष्यवनिताविनोदमृगं मां धिग्धिगिति गर्हयाश्चकार ॥ ३७ ॥

प्रकाशिका– अहो आश्चर्यम् । मयाऽनुष्ठितं यत्तदसाधु यतो यस्मादविद्यारचिते भगवदिच्छानुगृहीते प्रकृतिविनिर्मिते विषयलक्षणान्धकूपे इन्द्रियैरहमभिनिवेशितोऽभिमानं प्रापितस्तत्तस्मात्तदसाध्वनुष्ठानम् । अलमलं विनोदमृगं मर्कटम् ॥ ३७ ॥

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शनपरिनिर्वृतः स्वपुत्रेभ्य इमां गां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतरुचिरहरिविहारानुभावो भगवतो नारदस्य पदवीमनुससार ॥ ३८ ॥

प्रकाशिका– परदेवता नारायणस्तस्य प्रसादेनाधिगतं प्राप्तमात्मप्रत्यवमर्शनं परमात्मज्ञानं तेन परिनिर्वृतः सम्यगाविर्भूतानन्दपूर्ण इमां गां भूमिं यथादायं यो यावतः पितृधनस्य योग्यस्तस्य तावद्यथा स्यात्तथा महाविभूतिः साम्राज्यसंपत्तत्सहितां महिषीं मृतकमिव शवमिवापहाय परित्यज्य हृदि गृहीतौ हरेर्विहारानुभावौ क्रीडासामर्थ्ये येन स तथा । नारदस्य पदवीं निवृत्तमार्गं संन्यासम् ॥ ३८ ॥

तस्य ह वा एते श्लोकाः । प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् । यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्तवारिधीन् ॥ ३९ ॥

प्रकाशिका– तस्य प्रियव्रतस्य महिमोपनिबन्धनश्लोकाः पूर्वप्रसिद्धाः । कथ्यन्त इति शेषः । यथा वेदे तदप्येषः श्लोको भवतीति कथ्यते तथैवेति ज्ञातव्यम् । को नु कुर्यान्न कोऽपि । नेमिनिम्नै रथनेमिकृतनिम्नप्रदेशैः । छायां घ्नन् तमो निरस्यन् ॥ ३९ ॥

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥ ४० ॥

प्रकाशिका– भूसंस्थानं द्वीपैः कृतं सरिद्गिरिवनादिभिः सीमा च येन कृता भूतानां निर्वृत्यै सुखाय । अन्यथा परस्परविवादेन दुःखमेव स्यादिति ज्ञातव्यम् ॥ ४० ॥

भौमं दिव्यं मानुषं च महित्वं योगकर्मजम् ।
यश्चक्रे निरयोपम्यं पौरुषं तु जनप्रियम् ॥ ४१ ॥

तात्पर्यम् – 'पूर्वसृष्टान् रथावृत्त्या स्थूलांश्चक्रे प्रियव्रतः । समुद्रांस्तेन तत्कर्तेत्याहुरेनं प्रियव्रतमि'ति गारुडे ॥ ४१ ॥

प्रकाशिका– महित्वं माहात्म्यं योगकर्मजं योगसामर्थ्यजातं निरयोपम्यं निरयसुखतुल्यं पुरुषानुजना विष्णुभक्तास्त एव प्रिया यस्य । अत्र यो नेमिनिम्नैः सप्त वारिधीनकरोदित्युक्त्या पूर्वं समुद्रसृष्ट्यभावः प्रतीयते स च प्रमाणविरुद्धः । अतोऽत्राभिप्रायं प्रमाणेनैवाह ॥ पूर्वसृष्टानिति । पद्मकल्पे सृष्टान्समुद्रान् तत्प्रलये खातपूरणेन संकुचितान्पुनर्वाराहकल्पे सप्तकृत्वः स्वरथपरिभ्रमणेन प्रियव्रतः पूर्ववत्स्थूलांश्चक्रेऽतः समुद्रकर्तेत्युच्यत इत्यर्थः ॥ ४१ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां प्रथमोऽध्यायः ॥ ५-१ ॥

॥ अथ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच–

एवं पितरि सन्निवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बुद्वीपौकसः प्रजा औरसवद्धर्मानवेक्षमाणः पर्यगोपायत् ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ जंबुद्वीपमोको यासां ताः प्रजा औरसवत्पुत्रवद्धर्ममवेक्षमाण इत्यर्थः । पर्यगोपायत्सम्यगरक्षत् ॥ १ ॥

स तु कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाहृतपरिचर्योपकरण आत्मैकाग्र्येण तपसाऽऽराधयाम्बभूव ॥ २ ॥

प्रकाशिका– पितृलोककामस्तल्लोकप्राप्तिहेतुपुत्रकामः सुपुत्रेण पितुः पितृलोकप्राप्तेः श्रुत्यादावुक्तत्वात् । आक्रीडा क्रीडास्थानभूता या अचलद्रोणी मन्दरपर्वतदरी तस्यां विश्वसृजां प्रजापतीनां पतिं ब्रह्माणम् । आहृतपरिचर्योपकरण आनीतपूजासाधनपुष्पादिः। आत्मनोऽन्तःकरणस्यैकाग्र्यं यस्मिंस्तेन ।

एतदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥

प्रकाशिका– एतदुपलभ्य ज्ञात्वाऽभियापयामास भोगार्थं प्रेरयामास ॥ ३ ॥

सा च तदाश्रमोपवनमतिरमणीयविविधनिबिडविटपिविटपनिकटपुटलताकुटिलरूढस्थलविहङ्गमिथुनैः प्लाव्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥ ४ ॥

प्रकाशिका– सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः । अतिरमणीया विविधाश्च निबिडाः परस्परसंबद्धाश्च विटपिनो वृक्षास्तेषां विटपाः शाखास्तेषां निकटपुटेषु समीपभागेषु या लतास्तासां कुटिलेषु वक्रभागेषु रूढा आरूढाः स्थलविहंगमा, मयूरकोकिलादयस्तेषां मिथुनैः प्लाव्यमानाः प्लुतयोच्चार्यमाणाः श्रुतयो ध्वनिविशेषास्ताभिः प्रबोध्यमानैर्जलकुक्कुटादिभिर्विचित्रं यथा भवति तथोपकूजिता नादिता ये निर्मलजलाशयास्तेषु कमलानि तेषामाकरं तदाश्रमोपवनमित्यन्वयः ॥ ४ ॥

तस्याः सुललितपदविन्यासगतिविलासेनानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकास्याचष्ट ॥ ५ ॥

प्रकाशिका– तस्याः सुललितः कोमलः पदन्यासः पादविक्षेपो यया च सा गतिर्गमनं तस्या विलासेन शोभाविशेषेणानुपदं प्रतिचरणविक्षेपं खणखणायमाने खणखणेति ध्वनिं कुर्वाणे रुचिरे मनोहरे चरणाभरणे नूपुरे तयोः स्वनं शब्दं समाधियोगेन निमित्तेन मीलिते नयने एव नलिनमुकुले तयोर्युगलमीषदल्पं विकास्य विकसितं कृत्वाऽविदूरेऽवस्थितामेवाचष्टाद्राक्षीत् ॥ ५ ॥

तामेवाविदूरे विलोक्य मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारविनयविलोकनसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरम् ॥ ६ ॥

प्रकाशिका– कथंभूताम् । सुमनसः पुष्पाण्युपजिघ्रन्तीम् । पुनः कथंभूताम् । दिविजानां मनुष्याणां च मनोनयनाह्लादं दुहन्तीति मनोनयनाह्लाददुघास्तैर्गतिश्च विहारश्च विनयश्च विलोकनं च सुस्वराक्षराणि वाक्यानि च स्तनाद्यवयवाश्च ते तथा तैः कुसुमायुधस्य कामस्य विवरमवकाशं विदधतीम् ॥ ६ ॥

निजमुखविगलितमदासवामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासवल्गुस्पन्दनस्तनकलशकबरहाररशनां देवीं तदवलोकनेन विधृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥ ७ ॥

प्रकाशिका– पुनः कथंभूताम् । निजमुखाद्विगलितः स्रुतो मदासवो मदजनकासवो मद्यविशेषस्तस्यामोदो गन्धः तेन मदांधा मधुकरनिकरा भ्रमरसमूहास्तैरुपरोध आवरणं तेन तत्परिजिहीर्षया द्रुतपदन्यासः शीघ्रपदन्यासस्तेन वल्गु शोभनं स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरे हारे रशनायां काञ्चीकलापे च यस्यास्तां देवीं द्योतमानाम् । ततः किमित्यत आह ॥ तदवलोकनेनेति । तस्या अवलोकनेन विधृतावसरस्य दत्तावकाशस्य मकरध्वजस्य कामस्य जडवद्विचारशून्यपुरुष इव ॥ ७ ॥

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि किं भगवतः परदेवतायाः ।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान्मृगयसे विपिने प्रमत्तान् ॥ ८ ॥

प्रकाशिका– जाड्यकार्यमेव दर्शयति ॥ का त्वमिति । मुनिवर्येति पुल्लिङ्गेन संबोध्य का त्वमिति वचनादिकं जाड्यकार्यमेव । हे मुनिवर्य । शैले गिरौ । किं चिकीर्षसि किं कर्तुमिच्छसि । भगवतः परदेवतायाः परदेवताभूतस्य मायाऽसि किम् । भ्रुवावालक्ष्याह ॥ विज्येति । हे सुहृत् सखे । मौर्वीशून्ये धनुषी बिभर्षि । किमात्मनः स्वस्यैव परिपालनाय किंवा प्रमत्तानजितेन्द्रियान् मृगतुल्यानस्मदादीन् मृगयसे वशीकर्तुं धनुषी धारयसीत्यर्थः ॥ ८ ॥

बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ ।
कस्मै प्रयुङ्क्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ ९ ॥

प्रकाशिका– कटाक्षावालक्ष्याह ॥ बाणाविति । शतपत्रलक्षणे कमले त एव पत्रे पिच्छस्थानीये ययोः शान्तौ मनोहरौ अपुंखरुचिरौ पुंखाभ्यां विनाऽपि शोभमानौ नेत्रस्थानीयनेत्राधोभागस्य दर्शनादतितिग्मौ तीक्ष्णौ दन्तावग्रभागौ ययोस्तयोस्तौ कस्मै प्रयुंक्षसि प्रयोक्तुमिच्छसीति न विद्मः । अस्मासु न प्रयोक्तव्यमित्याशयेनाह ॥ क्षेमायेति । नोऽस्माकं क्षेमाय ॥ ९ ॥

शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीश ।
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥१०॥

प्रकाशिका– तन्मुखासवगन्धलोभेनानुगच्छन्तौ भ्रमरावालक्ष्याह ॥ शिष्या इति । अजस्रं सन्ततम् । सुमनोभिवृष्टीः पुष्पवृष्टीः । सर्वे शिष्या भजन्ति । त्वत्कबरीविगलितानि पुष्पाणि सेवन्त इत्यर्थः । भजनीयरसवत्त्वेनोपमा वेदशाखा इवेति ॥ १० ॥

वाचं परं चरणपङ्कजतित्तिरीणां ब्रह्मन्नरूपमुखरीं शृणुमोऽद्य तुभ्यम् ।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कला ते ॥ ११ ॥

प्रकाशिका– नूपुरस्वनमाकर्ण्याह ॥ वाचमिति । हे ब्रह्मन् । तुभ्यं तव चरणपंकजतित्तिरीणां पद्मे नूपुरान्तर्गतरत्नाख्योपलानां परं केवलं वाचं श्रुणुमः । न तु तस्या व्यक्तमर्थम् । कथंभूतां वाचम् । अरूपमुखरीं रूपं विनाऽप्यदृष्टवक्त्रकाऽपि मुखरीं प्रकटताम् । नितंबप्रदेशे विद्यमानं पीतं वस्त्रं कदंबपुष्पकान्तिमत्वेन प्रकल्प्य पृच्छति ॥ लब्धेति । अंकविटंकबिंबेऽङ्कयोरलंकारभूतमण्डले नितंब-प्रदेशे विद्यमानकदंबकुसुमस्य रुचिर्दीप्तिः । क्व लब्धा । रुचिरांकेति पाठे आ समन्ताद्विद्यमानरुचिरिति व्याख्येयम् । काञ्चीमलातत्वेन प्रकल्प्याह ॥ यस्यामिति । यस्यां रुचावलातेन परिधिः परिवेषितो वर्तते । नितंबे विद्यमानवस्त्रस्य कान्तित्वेन कल्पितत्वाद्वस्त्रं नास्तीति मत्वा पृच्छति । ते तव वल्कला च क्व वर्तते । च शब्द प्रश्नसमुच्चये । वल्कं वल्कलमस्त्रियामित्यभिधानात् । स्त्रीलिङ्गप्रयोगो जाड्यादिति ज्ञातव्य· । मुनिवर्येति पूर्वमुक्तत्वाद्वल्कलरूपवस्त्रं पृष्टम् ॥ ११ ॥

किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशी श्रिते मे ।
पङ्कोरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग मे सुरभीकरोषि ॥ १२ ॥

प्रकाशिका– स्तनौ शृङ्गत्वेन प्रकल्प्याह ॥ किं संभृतमिति । हे द्विज शृङ्गयोः स्तनयोः किं संभृतं कि वस्तु पूरितमस्ति । तत्र किंचिदपूर्वमेव वस्तु संभृतमिति जानामि । यतो मध्येकृशोऽपि । अलुक् समासः । त्वं कृच्छ्रेण वहसि । यत्र च मे दृशी लोचने श्रिते संलग्नेऽन्यथाऽय न घटत इति भावः । स्तनगतं कुकुमगन्धं पङ्कत्वेन प्रकल्प्य पृच्छति ॥ पङ्क इति । आत्मनस्ते विषाणे स्तनेऽरुणे ईदृगतिसुन्दरे ॥ १२ ॥

लोक प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ।
अस्मद्विधस्य मन उन्नयनौ बिभर्षि बह्वद्भुतं सरसहाससुधां च वक्त्रे ॥१३॥

प्रकाशिका– हे सुहृत्तम । मे तावकं लोकं स्थानं प्रदर्शय । यत्रत्यो यस्मिंल्लोके विद्यमानस्त्वमुरसा इत्थमपूर्वावयवौ बिभर्षि मनस उन्नयनौ क्षोभकौ । वक्त्रे च बह्वद्भुतं बिभर्षि । तत्किमित्यपेक्षायामाह ॥ सरसेति । रसेन मधुरालापेन सह वर्तमानो हासस्तेन च युक्तां सुधामधरामृतं च बिभर्षि तं लोकं प्रदर्शयेत्यन्वयः ॥ १३ ॥

का वात्मवृत्तिरदनाद्धविरङ्ग भाति विष्णोः कलास्यनिमिषन्मकरौ च कर्णौ ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोभि चासन्नभृङ्गनिकरं सर उन्मुखं ते ॥१४॥

प्रकाशिका– हे अङ्ग । तवात्मवृत्तिर्देहस्थितिहेतुः का । अन्नं न भवतीत्याह । अदनादन्नाद्धविर्विनेति भाति । दौर्गन्ध्याद्यभावादिति भावः । अन्नादनाभावेऽपि वृत्तौ हेत्वन्तरमाह । यतस्त्वं विष्णोः

कलाऽसीति । विष्णुश्च नाश्नातीति भावः । मकरकुण्डलवत्त्वाच्च त्वं विष्णोः कलाऽसीत्याह ॥ तव कर्णौ चानिमिषन्मकराविति । अनिमिषंतावुन्मीलन्तौ मकरौ तदाकारे कुण्डले ययोस्तौ । भवतोऽतोऽपि त्वं विष्णुकलाऽसि । लोकविलक्षण एव त्वमित्यत्र युक्त्यन्तरमाह ॥ उद्विग्नेति । ते तव मुखमुत्सर उत्कृष्टं सर इव भाति । कथम् । उद्विग्नं चञ्चलम् । मीनयोर्मीनवद्विद्यमानयोर्नेत्रयोर्युगलं यस्मिंस्तत्तथा । द्विजाः शुभ्रतया राजहंसपक्षिस्थानीयाः दन्ताः तेषां पंक्त्या शोभि । आसन्नः प्राप्तः भृङ्गनिकरः तत्स्थानीयः केशसमूहो यस्मिन् तत् । परिमललुब्धभृङ्गनिकरो यस्मिन्निति वा ॥ १४ ॥

योऽसौ त्वया करसरोजहतःपतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी ते ।
युक्तं न ते स्म वरवक्रजटावरूथः कृष्णोऽनिलो हरति लम्पट एष नीवीम् ॥१५॥

प्रकाशिका– पतङ्गः कन्दुको दिक्षु भ्रमन् भ्रमतस्तवाक्षिणी एजयते चालयति । लंपटो रागी अत एव कृष्णस्तामसः । कृष्ट इत्यपि क्वचित्पाठः । वर उत्तमो जटावरूथो वक्रो येन स वरवक्रजटावरूथ एषोऽनिलस्ते तव नीवीं वरवस्त्रबन्धं हरति । स्मेत्याश्चर्ये । एतन्न युक्तमित्यर्थः ॥ १५ ॥

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतेह लब्धम् ।
चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदसि स वै भवभावनो मे ॥१६॥

प्रकाशिका– हे तपोधन । तव रूपं तपश्चरतां तपः कुर्वाणानां पुंसां तपोघ्नं तपोविघ्नकरमेतद्रूपमिह भूमौ केन तपसा भवता लब्धं प्राप्तम् । हे मित्र । मया सह तपश्चर्तुं कर्तुमर्हसि । किंवा तपो विहाय मह्यं मे प्रसीदसि भोगानुकूलो भवसि स त्वं मे भवभावनः शुभाभिवृद्धिकरः संसाराभिवृद्धिकरो वा वै प्रसिद्धम् ॥ १६ ॥

न त्वां त्यजामि दयितां द्विज दैवदत्तं यस्मिन्मनो दृगपि वा न वियाति लग्नम् ।
मां चारुशृङ्गार्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥१७॥

प्रकाशिका– हे द्विज । दैवेन विधिना दत्तं त्वां यस्मिंस्त्वयि लग्नं मनो लग्ना दृगपि न वियात्यन्यत्र न गच्छति । हे चारुशृङ्ग सुन्दरस्तन । त्वं मां नेतुमर्हसि । कुतो यतो मम चित्तं ते तवानुव्रतमनुगतमरण्ये सचिव्यः सहचर्यः शिवाः शृगालस्त्रियः । प्रतिसरन्तु प्रदक्षिणं गच्छंत्विति स्वकार्यसिद्धये शकुनं प्रार्थयते । अथवा । शिवाः सचिव्यो दासीवद्वर्तमाना मधुकर्यः प्रतिसरन्तु दूरं गच्छन्तु । ततश्च त्वया सह भोगं करिष्यामीत्याशयः ॥ १७ ॥

श्रीशुक उवाच–

इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूमिति स भाजयामास ॥ १८ ॥

तात्पर्यम् – 'परिहासप्रलापादिष्वनर्था वाग्भवेत्कचिदि'ति शब्दनिर्णये ॥ १८ ॥

प्रकाशिका– नन्वाग्नीध्रस्य राज्ञः प्रेक्षावतः कथं का त्वं चिकीर्षसि वने मुनिवर्येत्याद्यर्थशून्यं वाक्यमित्यतोऽत्र संभावकं प्रमाणेनैवाह ॥ परिहासेति । आदिपदेन कामादिकृतचित्तभ्रंशोऽपि ग्राह्यः । अनर्थाऽर्थशून्या वाक् वाक्यं क्वचित् भवेत् । तथा चाग्नीध्रस्य कामावेशेन चित्तभ्रंशादेतादृग्वचनं नासंभावितमित्याशयः । अत एव पूर्वं मकरध्वजस्य वशमुपनीतो जडवदिति होवाचेत्युक्तम् । ग्राम्ये विषयभोगकथायां वैदग्ध्यं कौशलं यस्याः सा तथा तया परिभाषया स्वकल्पितार्थकवाण्या ॥ १८ ॥

सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपविद्यावयःश्रियौदार्यैः पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बुद्वीपपतिना भोगान् बुभुजे ॥ १९ ॥

प्रकाशिका– बुद्ध्यादीनां द्वन्द्वैक्यम् ॥ १९ ॥

तस्यामु ह वा आत्मजान्स राजवर्य आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यक-हिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव भावयांबभूव सा सूत्वा तु पुत्रान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥

प्रकाशिका– अजं ब्रह्माणमुपतस्थेऽभजत् ॥ २० ॥

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्तात्म-तुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥

प्रकाशिका– औत्पत्तिकेनैव स्वभावेनैव संहननं दृढांगत्वमात्मतुल्यनामानि स्वात्मना तुल्यनामकानि वर्षाणि खण्डान्यभिमन्यमानः ॥ २१ ॥

आग्नीध्रो राजपुत्रस्तामप्सरसमेवानुदिनमभिमन्यमानस्तस्याः सलोकतां श्रुति-भिरवरुन्धन् ईजे यत्र पितरो मोदयन्ते ॥ २२ ॥

प्रकाशिका– तया सह भोगं चिन्तयन् श्रुतिभिः श्रुतिसाधनैरवरुंधन् प्राप्तुकाम ईजे । हरिमिति शेषः। यत्र लोके मोदयन्ते मोदन्ते ॥ २२ ॥

सम्परेते पितरि नवभ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रामां श्यामां नारीं भद्रां देवीमिति संज्ञा नवोदवहन् ॥ २३ ॥

प्रकाशिका– संपरेते मृते मेरोर्दुहितॄः पुत्रीरुदवहन् परिणीतवन्तः ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां द्वितीयोऽध्यायः ॥ ५-२ ॥

॥ अथ तृतीयोऽध्यायः ॥

श्रीशुक उवाच–

नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत ॥ १ ॥

तस्य हवाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकाल-मन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवत्सलतया प्रतीत आत्मानमपराजितं निजजनाभिप्रायार्थविधित्सया गृहीतहृदयो हृदयङ्गमं मनोनयनानन्दनाभिरामावयवमाविश्चकार ॥ २ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ नाभिराग्निध्रसुतोऽप्रजयाऽपुत्रया मेरुदेव्या भार्यया सह शुद्धभावेन प्रवर्ग्येषु कर्मविशेषेषु प्रचरत्सु प्रवर्तमानेषु सत्सु द्रव्यादयः सप्तयोगा उपायास्तेषामुपपत्त्या संपत्त्या दुरधिगमो दुष्प्रापोऽपि प्रतीतः प्रसिद्धः । सुप्रतीत इत्यपि क्वचित्पाठः । आत्मानमाविश्चकार । कथं भूतम् । अपराजितं स्वतन्त्रं हृदयंगमं मनोहरं मनोनयने आनन्दयतीति मनोनयनानन्दना अभिरामाश्चारुतरा अवयवा यस्य तम् । किं कार्ये भगवानित्यत उक्तम् ॥ निजेति । निजभक्तानामभिप्रायो यस्मिंस्तादृशार्थविवित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य स तथा ॥ २ ॥

अथ हतमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालास्फूर्जामृतमणिगणप्रवरादिभिरुपलक्षितम् ॥ ३ ॥

स्फुटकिरणप्रवरमणिमयमुकुटकिरीटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितं ऋत्विक्सदस्यगृहपतयोऽधना इवोत्तमं धनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ४ ॥

प्रकाशिका– आविष्कृतं भुजानां युगलं द्वयं चतुष्टयं येन । पुरुषेषु विशिष्यत इति तथा पुरुषोत्तमं इत्यर्थः । अर्हणेन पूजासाधनेनार्घ्यादिनोपतस्थुरभजन् । कथंभूतम् । कौशेयं कृमिकोशोत्थं लसत् श्रीवत्साख्यम् । ललामं चिन्हं यस्य । दरवरः शङ्खो वनरुहं पद्मं स्फूर्जाः शाणोल्लीढा न विद्यते मृतं मरणं येभ्यस्तेऽमृता अमृतत्वप्रदा मणयस्तेषां गणे प्रवरः श्रेष्ठः कौस्तुभः । आदिपदाच्चक्रगदे ग्राह्ये । तैरुपलक्षितमितरव्यावृत्ततया ज्ञातं स्फुटकिरणा ये प्रवरा मणयस्तन्मयानि मुकुटादीन्यङ्गानां भूषणानि तैर्भूषितं मुकुटं शिरस्त्राणं किरीटं मौलिः ॥ ३,४ ॥

अर्हसि मुहुरर्हत्तमार्हणमस्माकं अनुपथानां नमो नम इत्येतावदेव सदुपशिक्षितं कोऽर्हति पुमान्प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य प्रकृतिपुरुषयोः परस्यार्वाक्त-नमतिर्नामरूपाकृतिभिर्निरूपणम् ॥ ५ ॥

प्रकाशिका– अर्हसीत्यादिना निगदेन स्तुवन्ति । हे अर्हत्तम अतिशयेन पूजार्ह । अनुपथानां भृत्यानामर्हणमर्हसि । गृहीतुमिति शेषः । न वयं त्वां स्तोतुं शक्ता इत्याशयेनाहुः ॥ नमो नम इति । नमो नम इत्येतावदेव वचनमस्माकं त्वद्विषये कर्तव्यतया सद्भिरुपशिक्षितम् । कुत इत्यतस्तत्स्वरूपस्य केनापि निरूपयितुमशक्यत्वादित्याह ॥ कोऽर्हतीति । प्रकृतिगुणानां व्यतिकरो वैषम्यं यस्मिन्स प्रपञ्चस्तस्मिन्नेव मतिर्यस्य । अत एवानीशः । तत एवार्वाक्तनास्त्वां न स्पृशन्तीति मतिर्यस्य स पुमान् कः प्रकृतिपुरुषयोः परस्यात एवेश्वरस्य तव नाम्नां रूपाणां धर्माणामाकृतीनामाकाराणां च निरूपणं कर्तुमर्हति न कोऽपि ॥ ५ ॥

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ६ ॥

प्रकाशिका– तर्हि तत्र मूकीभावः किमित्यत आह ॥ सकलेति । वृजिनं दुःखं निरस्यन्तीति वृजिननिरसनास्ते च ते शिवतमा मङ्गलतमाः प्रवराश्च ये गुणाः । उपलक्षणमेतत् । नामान्याकृतयश्च ग्राह्याः । तेषामेकदेशकथनादृते कोऽर्हतीत्यन्वयः । निरूपयति चैकदेशमेव निरूपयन्ति न साकल्येनेति भावः । स्वयोग्यकिञ्चिन्निरूपणस्यावश्यकत्वप्रदर्शनाय वृजिननिरसनत्वादिकमुक्तम् ॥ ६ ॥

परिजनानुरागविरचितस्तव लवसंशब्दसलिलकिसलयतुलसीदूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम परितुष्यसि ॥ ७ ॥

प्रकाशिका– एवं साकल्येन निरूपयितुमशक्योऽपि त्वं भक्तिमतां सुखाराध्य इत्याहुः ॥ परिजनेति । हे परम । परिजनैर्भृत्यजनैरनुरागेण भक्त्या विरचितस्तव लवस्य स्तोत्रलेशस्य संशब्दः

कथनं सलिलं जलं किसलयः पल्लवस्तुलसी च दूर्वांकुरश्च ते तथा तैरपि । अपिशब्दस्तेषां सुलभत्वज्ञापनाय । संभृतया संपादितया सपर्यया पूजया परितुष्यसि परितोषं यास्यसि किल ॥ ७ ॥

अथानयापि भगवत इज्ययोरुसम्भारभरया न समुचितमर्थमिहोपलभामहे ॥ ८ ॥

प्रकाशिका– एवं श्रुत्यादौ श्रूयते । अथशब्दः प्रकारान्तरार्थः । भक्त्यभाव इत्यर्थः । उरुसंभारा उत्कृष्टसाधनानि तेषां भारः समूहो यस्याः सा तथा तादृश्याऽप्यनया वेदोक्तयेज्यया पूजया भगवतः समुचितमर्थं प्राप्तुं योग्यं सुखं नोपलभामहे । श्रुत्यादिनेति शेषः । भक्त्यभावेऽपि तादृश्याऽपि पूजया न परितुष्यसीति जानीम इत्यर्थः ॥ ८ ॥

आत्मत एवानुसवनमञ्जसा व्यतिरेकेणानुबोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ९ ॥

प्रकाशिका– भक्तिमदाराधनेनापि न तव प्रयोजनमस्तीत्याशयेन भगवत इत्युक्तं विशिनष्टि ॥ आत्मत एवेति । आत्मत एव स्वत एवानुसवनं सर्वदांऽजसा मुख्यतोऽव्यतिरेकेणा-भेदेनानुबोभूयमानोऽत्यन्तमनुभूयमानोऽशेषः पूर्णः पुरुषार्थः सुखं स एव स्वरूपं यस्य स तथा तस्य भगवत इत्यन्वयः । तर्हि तदाराधनं किं व्यर्थमिति पृच्छति ॥ किं त्विति । उत्तरमाह ॥ नाथेति । अवधारणार्थस्य मात्रशब्दस्य बुद्ध्या विवेकेनाशासानामित्यनेनान्वयः । तथा च हे नाथ आशिषः पुरुषार्थान् आशासानां कामयमानानामेवैतद्भक्तिमदभिसंराधनं पुरुषार्थसाधनं भवितुमर्हति । न तवेत्यर्थः ॥ ९ ॥

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुषप्रबलतरकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन्स्वयत्नोपचित एवेतरवदिहोपलक्षितः ॥१०॥

प्रकाशिका– इममेवार्थं दृष्टान्तेनोपपादयति ॥ तद्यथेति । हे परमपुरुष । तत्पूर्वोक्तं प्रमेयं यथा वक्ष्यमाणं निदर्शनं तथा ज्ञेयम् । स्वयमितरापेक्षां विनाऽऽत्मनः स्वस्य परं श्रेयोऽविदुषामजानतामत एव बालिशानां मूर्खाणां प्रबलतरकरुणयाऽत्युत्कृष्टकृपयाऽपवर्गाख्यं स्वमहिमानं स्वरूपानन्दानुभवरूपं माहात्म्यं चकार । इतरपुरुषार्थमप्युपकल्पयिष्यन् स्वयत्नोपचित एव स्वप्रेरणयैव पूजितः सन् इतर-वत्सापेक्ष इवेहास्मद्यज्ञभूमावुपलक्षितः । भक्तिमदाराधनं सफलमित्येतदत्रैवोपलब्धमित्याशयः ॥ १० ॥

अथार्हयामः परं ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्शभो भगवान् निजपुरुषे-क्षणविषय आसीत् ॥ ११ ॥

प्रकाशिका– अथ तस्मात्। हे अर्हत्तम परं सर्वोत्तमं त्वां परं श्रेयमुद्दिश्यार्हयामः। अथेत्युक्तमेव हेतुं दर्शयति ॥ यर्हीति । यर्हि यस्माद्राजर्षेर्बर्हिषि यज्ञे निजपुरुषेक्षणविषयो भक्तजनप्रत्यक्षविषयो भवानासीत्तस्मादित्यर्थः ॥ ११ ॥

असङ्गनिशितज्ञानानलविधूताशेषमलानां भगवत्स्वभावानां आत्मारामाणां मुनीनामनवरतपरिगणितगुणगण परममङ्गलायतनकथनोऽसि ॥ १२ ॥

अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुःखस्थानादिषु विवशानां नः श्रीमच्चरणारविन्दस्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥ १३ ॥

प्रकाशिका– इदानीं यज्ञकरणरूपाराधनेन प्रसन्नः सन्स्वात्मदर्शनफलं यतो दत्तमतो विश्वस्ताः त्वामभीष्टसिध्यै वयमर्हयाम इत्याशयः । अथ सर्वदा त्वच्चरणारविन्दस्मरणाय त्वन्नामोच्चारणमापत्कालेऽप्यस्त्विति प्रार्थयितुमादौ तन्नामोच्चारणमाहात्म्यं दर्शयति ॥ असङ्गेति । असङ्गेन वैराग्येण निशितं स्वकार्यकरणोन्मुखीकृतं यज्ज्ञानं स एवानलस्तेन विधूतान्यशेषमलानि रागादीनि येषां ते तथा तेषामत एव भगवति स्वयोग्यो भावो भक्तिर्येषामेतादृशैर्मुनिभिरनवरतं परिगणिता गुणा यस्येति संबोधनम्। त्वं तेषां मङ्गलायतनं सर्वश्रेयःसंपादकं कथनं नामोच्चारणं यस्य स भवसि। त्वं भक्तानां नामोच्चारणेन सर्वं श्रेयो ददासीति भावः । अतो वयं तदेव प्रार्थयाम इत्याशयेनापत्कालेऽपि तन्नामोच्चारणं प्रार्थयते ॥ अथेति । अथ नामोच्चारणस्यैतादृशमाहात्म्यवत्त्वात्तव गुणकृतनामधेयानि गुणकर्मणोः प्रतिपादकनामानि नोऽस्माकं कथंचित्सम्यगसम्यग्वा वचनगोचराणि भवन्तु । कथं भूतानां नः श्रीमच्चरणारविंन्दस्मरणाय विवशानां त्वां स्मर्तुमशक्यानामित्यर्थः । दुःखस्थानेषु पुत्रादिशोकेनावस्थानम्। अवस्थान्तरमप्याह ॥ ज्वरेति । पूर्वमनुक्तमनिष्टनिवर्तकत्वरूपमाहात्म्यमपि दर्शयन्त आहुः ॥ सकलेति । भक्तानामिति शेषः ॥ १२,१३ ॥

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासन ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणं को वा ईहते ॥ १४ ॥

प्रकाशिका– अन्यच्च प्रार्थनीयमप्यस्तीत्यप्याहुः ॥ किञ्चेति । आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं दाने समर्थं त्वामुपधावति शरणमाप्नोति। ननु पुरुषार्थान्विहाय प्रजालक्षणं तुच्छं फलं कथं तेन कामितमित्यत उक्तम्। प्रजायामेवार्थः पुरुषार्थ इति प्रत्ययो यस्येति। इदं तस्य नोचितमिति

सदृष्टान्तमाहुः ।। धनदमिति । अधनः को वा धनदं प्राप्य फलीकरणं तुषकणादिकमीहते इच्छति न कोऽपीत्यर्थः । यदीहते तदयं मूर्ख इत्याशयः ।। १४ ।।

अपराजितापराजितया माययाऽनवसितपदध्यानाव्यापृतमतिर्विषमविषयावृत-प्रकृतिरनुपासितमहच्चरणः ।। १५ ।।

प्रकाशिका– कुत एवं तुच्छफलमीहत इत्यत आहुः ।। अपराजितेति । हे अपराजित अपराजितया त्वत्प्रसादं विना वशीकर्तुमशक्यया मायया बन्धकशक्त्याऽनवसितपदध्यानाव्यापृतमतिः । अनवसित-मनश्चित्तं पदं तत्स्वरूपं तस्य ध्यानेऽव्यापृता मतिर्यस्य स तथा । अपराजितमायित्वे हेतुरनु-पासितावसेवितौ महतां चरणौ येनेति । तत्रापि कारणमाहुः ।। विषमेति । विषमेषु दुःखादिषु विषये-ष्वावृता प्रकृतिस्तत्कार्यमन्तःकरणं यस्य स तथा । अतः प्रजालक्षणं फलमीहत इति वाक्यशेषः ।।१५।।

यदु हवाव पुनरदभ्रकर्तरिह समाहूतः तदर्थधियां मन्दानां नस्तद्देवहेलनं देवार्हसि साम्येन सर्वात्मना प्रतिवोद्धुमविदुषाम् ।। १६ ।।

प्रकाशिका– मुनयोऽल्पप्रयोजनाय महतामाह्वानं तदपराध इति मत्वा भगवत्क्षमां प्रार्थयन्ते ।। यदु हेति । हे अदभ्रकर्तोऽनल्पकर्तः । राज्ञः पुत्रार्थमेवेह समाहुत इति यत्तदर्थधियां तत्प्रयोजनबुद्धीनामत एव मन्दानां विषयाविष्टचित्तानां नोऽस्माकं तदेव हेलनं देवस्य तवावज्ञानम् । हे देव । साम्येन योग्यतानुसारिदर्शनरूपेण निमित्तेन प्रतिवोढुं क्षन्तुमर्हसि । मन्दत्वोपपादनायोक्तम् ।। अविदुषामिति । महच्चरणसेवालब्धज्ञानशून्यानामित्यर्थः ।। १६ ।।

इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवन्दितचरणः सदय-मिदमाह ।। १७ ।।

तात्पर्यम् – 'नास्ति विष्णोः सम इति जानन्तोऽप्यृषयः सदा । तज्ज्ञापनाय लोकानामन्येषां प्रार्थयन्सममि' ति ब्रह्माण्डे ।। १८ ।।

प्रकाशिका– तत्र हरिसदृशोऽन्यो नास्तीति जानद्भिर्मुनिभिः कथं भवादृशीं प्रजामाशासान इति भगवत्समप्रजाप्रार्थनं कृतमित्याशङ्कां प्रामाणेनैव परिहरति ।। नास्तीति । नास्ति विष्णोः सम इति जानन्तोऽप्यृषयः सदा तदित्यादि तात्पर्यम् । विष्णोः समं प्रार्थयन्नित्यन्वयः । अन्ये चात्र्यादयो दशरथादयो वा तज्ज्ञापनाय भगवत्समो नास्तीति ज्ञापनाय भगवत्समपुत्रे ऋषिभिर्याचिते । यदा भगवानेवावतीर्णस्तदा स्वसमाभावात्स्वयमेवावतीर्ण इति लोके ज्ञापयितुमित्याशयः । निगदेना

छन्दोबद्धवाक्येन । गद्यात्मकेनेति यावत् । अनिमिषर्षभो देवश्रेष्ठो वर्षधरो भरतखण्डाधिपतिर्नाभिस्तेनाभिवन्दितपादः ॥ १७ ॥

श्रीभगवानुवाच–

अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्य आत्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १८ ॥

प्रकाशिका– कुतोऽसुलभत्वमित्यतो मत्सदृशस्यान्यस्याभावादित्याह ॥ ममाहमेवाभिरूप इति । अभिरूपः सदृश इति । सदृशः कैवल्यात्सर्वोत्तमत्वात् । न हि सर्वोत्तमं वस्तुद्वयं भवतीत्याशयः । हि यस्माद्द्विजेषु त्रिवर्णेषु श्रेष्ठा ब्राह्मणास्तेषां कुलं ममैव मुखं मुखाज्जातं तस्मान्न मृषा भवितुमर्हति ॥१८॥

तत आग्नीध्रीये क्षेत्रेऽहं कलयावतरिष्यामि आत्मतुल्यमनुपलभ्यमानः ॥ १९ ॥

प्रकाशिका– आग्नीध्रो नाभिस्तत्संबन्धिनि क्षेत्रे भार्यायाम् ॥ १९ ॥

इति निशामयन्त्या मेरुदेव्याः पतिं समभिधायान्तर्दधे भगवान् ॥ २० ॥

प्रकाशिका– निशामयंत्याः पश्यंत्याः पतिं नाभिम् ॥ २० ॥

बर्हिषि तस्मिन् एवं विष्णुरात भगवन्परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधजने मेरुदेव्यां च धर्मान् दर्शयितुकामो वातरशनानां श्रमणानां ऋषीणामूर्ध्वमन्थिनां शुक्लया तन्वाऽवततार ॥ २१ ॥

प्रकाशिका– बर्हिषि यज्ञे । हे विष्णुरात विष्णुदत्तराजन् । तस्य नाभेरवरोधजने भार्याजने वातरशनानां वायुवस्त्राणाम् । दिगंबराणामिति यावत् । श्रमणानां परमहंसाश्रमिणामूर्ध्वमंथिनामूर्ध्वरेतसामृषीणां ज्ञानिनां धर्मान् दर्शयितुकामो हरिः शुक्लया शुद्धया तन्वा । शुक्लशोणितसंबन्धविदूरयेति यावत् । देहेनावततार ॥ २१ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां तृतीयोऽध्यायः ॥ ५-३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

श्रीशुक उवाच–

अथ तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणाः प्रकृतयो देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ अभिव्यज्यमानानि भगवल्लक्षणादिषु पादतलादिषु वज्रांकुशादीनि यस्य महाविभूतिः सर्वसंपत्तिरेधमानो वर्धमानः प्रभावो यस्य तम् । प्रकृतयोऽमात्यादयो जगृधुराकांक्षितवन्तः ॥ १ ॥

तस्य हवा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन ओजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदृक् नाम चकार ॥ २ ॥

प्रकाशिका– पिता तस्य नाम चकारेत्याह ॥ तस्येति । वर्ष्मणा देहेन । तस्य विशेषणद्वयम् । वरीयसा श्रेष्ठतमेन । बृहन्तः श्लोकाः पद्यानि कवीनां यस्मिंस्तेन चेति । ओजोऽवष्टंभनशक्तिर्वीर्यः प्रभावः शौर्यं शत्रुविजयाद्युत्साहः । ऋषभ इतीति । ऋषभशब्दो हि रूढ्या श्रेष्ठवाचकः । केन श्रैष्ठ्यमित्यपेक्षायामुक्तं ॥ वर्ष्मादिनेति । योग्यताबललब्धार्थप्रदर्शनायैव देहादिकमुक्तम् । न तच्छब्दान्तर्गततयेति ज्ञातव्यम् ॥ २ ॥

यस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवान् ऋषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमाञ्जनाभं नामाभ्यवर्षीत् ॥ ३ ॥

तात्पर्यम् – 'दुष्टानां मोहनार्थाय यज्ञ इन्द्रपदे स्थितः । पस्पर्ध ऋषभेणैव स्वरूपेण हरिः स्वयमि'ति वाराहे ॥ ३ ॥

प्रकाशिका– तस्य ऋषभस्य वर्षे खण्डे । नन्वत्रेन्द्रः स्पर्धमान इत्ययुक्तम् । स्वायंभुवमन्वन्तरे हि ऋषभावतारः । तत्र यज्ञनामा हरिरेवेन्द्रः । न हि स्वस्य स्वेन स्पर्धा संभवतीत्याशङ्कां प्रमाणेनैव परिहरति ॥ दुष्टानामिति । यज्ञो यज्ञनामा स्वयं साक्षाद्धरिरेवेत्यन्वयः । अनेन भगवानित्येतदुक्तार्थम् । पस्पर्ध स्पर्धां प्रदर्शितवानित्यर्थः । तथा चेन्द्रो यज्ञनामा भगवान्हरिः स्वस्वरूपेण ऋषभेण स्पर्धमानः स्पर्धां प्रदर्शयन् । तस्य ऋषभस्य वर्षे न ववर्षेति मूलार्थ इति भावः । अंजनवदाभातीत्यंजनाभो नीलवर्णो ऋषभस्तस्येदमांजनाभमित्यर्थः । आत्मयोगमायया स्वरूपसामर्थ्येनाभ्यवर्षीद्वृष्टियुक्तमकार्षीत् ॥ ३ ॥

नाभिस्तु यथाभिलषितं सुप्रजास्त्वमवरुद्ध्य प्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसमानधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन्परां निर्वृतिमुपगतो विदितानुरागः पौरप्रकृतिजनपदानां राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ४ ॥

प्रकाशिका– अवरुद्ध्य प्राप्य । अवबुध्येति पाठे आत्मन इति शेषः । स्वैरं स्वेच्छया गृहीतो नरलोकसमानधर्मो मनुष्याकारसदृशाकारादि येन तमत एव मायया मोहकशक्त्या स्वपुत्र इति विलसिता जाता मतिर्यस्य पौरादीनां पुत्रे योऽनुरागः स विदितो येन स तथा । समयसेतवः स्वसिद्धान्त-मार्गास्तेषां रक्षायां रक्षणार्थं विशालायां बदरिकाश्रमे । प्रसन्नं सर्वेन्द्रियजयोपेतमत एव निपुणं स्वकार्यकरणे दक्षं यत्तपस्तेन सहितेन समाधिलक्षणयोगेन तस्य हरेर्महिमानं जननमरणादि-राहित्यलक्षणमाहात्म्यम् अवाप प्राप ॥ ४ ॥

यत्र ह पाण्डवेय श्लोकावुदाहरन्ति ॥
कोऽनु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ।
अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ५ ॥

ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः ।
यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ६ ॥

प्रकाशिका– यत्र यस्मिन्विषये । हे पाण्डवेय । नाभेस्तत्प्रसिद्धं कर्मानु तदनन्तरं को नु पुमानाचरेत् । न कोऽपीत्यर्थः । मङ्गलैर्दक्षिणादिभिः पूजिताः सन्त ओजसा मन्त्रबलेन ॥ ५,६ ॥

अथ स भगवान् ऋषभः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवास उप-लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभय-लक्षणं धर्मं समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास ॥७॥

प्रकाशिका– अन्येषां शिक्षणाय प्रदर्शितो गुरुकुलवासो येनोपलब्धः प्रदक्षिणाख्यो वरो वरणीयोऽर्थो यैरुभयलक्षणं प्रवृत्तिनिवृत्तिरूपम् । समाम्नाया निर्दोषा वेदास्तेष्वाम्नातं विहितमभियुंजन् अनुतिष्ठन् जयंत्यां तन्नामिकायां भार्यायामात्मजानां शतं जनयामास ॥ ७ ॥

येषां खलु स महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥ ८ ॥

तमनु कुशावर्त इलावर्तो ब्रह्मावर्त आर्यावर्तो मलयकेतुर्भद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवतिप्रधानाः ॥ ९ ॥

प्रकाशिका– तं भरतमन्वनन्तरं कुशावर्तादयो नव पुत्रा नवतिप्रधाना नवतिसंख्याकेभ्यः श्रेष्ठा इत्यर्थः ॥ ९ ॥

कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः । आविर्होत्रोथद्रुमिलश्चमसः करभाजन इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेव-नारदसंवादरूपं उपशमायमानमुपरिष्टाद्वर्णयिष्यामः ॥ १० ॥

प्रकाशिका– कविप्रमुखानां नव भागवतधर्मान् दर्शयन्तीति भागवतधर्मदर्शनाः । उपबृंहितं पूर्णम् । वसुदेवनारदसंवादेन रूप्यते निरूप्यते इति वसुदेवसंवादरूपम् । उपशमायमानं भगवन्निष्ठा-प्रकारप्रदर्शकमुपरिष्टादेकादशस्कन्धे ॥ १० ॥

यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञ-शीलाः कर्मश्रद्धाः ब्राह्मणा बभूवुः ॥ ११ ॥

प्रकाशिका– जायन्तेया जयन्तीपुत्रा महाशालीना महाशालाः । प्रत्यब्दयज्ञकृदिति यावत् । अत एव यज्ञशीला यज्ञकरणस्वभावाः कर्मश्रद्धाश्च ब्राह्मणा विश्वामित्रवद्ब्रह्माणत्वजातिमन्तो बभूवुरित्यर्थः ॥

भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एवं विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचारेणोपशिक्षयन् अत-द्विद्वांसमुपशान्तो मैत्रः कारुणिको धर्मार्थयशः प्रजानन्दामृताविरोधेन गृहेषु लोकान्नियमयत् ॥ १२ ॥

प्रकाशिका– विपरीतवत्प्राकृतजनवदाचारेण स्वयमनुष्ठानेन । अतद्विद्वांसं धर्माज्ञानिनम् । लोकमिति शेषः । उपशिक्षयन् धर्मादीनामविरोधेनानुकूल्येनानन्दो भोगोऽमृतं मोक्षो नियम-यन्नियमितवान् । अरमयदित्यपि क्वचित्पाठः ॥ १२ ॥

यच्छीर्षण्याचरितं तदनुवर्तते लोकः ॥ १३ ॥

प्रकाशिका– ननु स्वयमनुष्ठानेन कथं लोकशिक्षेत्यतस्तदुपादयति ।। यच्छीर्षण्येति । शीर्षण्यः श्रेष्ठस्तेनाचरितं तदनुवर्तते । यत इति शेषः । यद्यदाचरति श्रेष्ठ इति स्मृतेः ।। १३ ।।

यदपि स्वविदितं सकलं धर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायै-र्जनतामनुशशास ।। १४ ।।

प्रकाशिका–यदपि यद्यपि । सकलधर्मस्वरूपं ब्राह्मं वेदसंबन्धि गुह्यं रहस्यं स्वेन विदितम् । विहितमिति कचित्पाठः । तथाऽपि ब्राह्मणैर्दर्शितमार्गेण प्रकारेणानुशशास ब्राह्मणान्पृष्ट्वैव शिक्षितवानित्यर्थः ।। १४ ।।

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ।। १५ ।।

भगवता ऋषभेण परिरक्षमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमान-मिवात्मनोऽन्यस्मात्कथञ्चन किमपि कर्हिचिदपेक्षते भर्तर्यनुसवनविजृम्भितस्नेहाति-शयमन्तरेण ।। १६ ।।

स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तं गतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनःप्रश्रयप्रणयभरं सुयन्त्रितानप्युपशिक्षयन्निति होवाच ।। १७ ।।

प्रकाशिका– द्रव्यदेशादिभिरुपचितैर्युक्तैः ।। वयो यौवनम् । युवैव धर्ममन्विच्छेदिति वचनात् । विविधोद्देशो नानादेवतोद्देशो यथोपदेशं यथाविधि । अविद्यमानमिवेति व्यतिरेकदृष्टान्तः । यथा कश्चित्पुरुषः स्वात्मनोऽविद्यमानमसिद्धं वाञ्छति । सिद्धे इच्छाविरहात्तथाऽस्मिन्वर्षे ऋषभेण परिरक्षमाणः पुरुषोऽन्यस्मात्पुरुषात्किमपि नापेक्षते । ऋषभानुग्रहेणैव सर्वस्याप्यपेक्षितस्य सिद्धत्वादित्याशयः । तर्हि किमपेक्ष्यत इत्यत उक्तम् ।। भर्तरीति । स्वामिनि ऋषभेऽनुसवनं प्रतिक्षणं विजृंभितः वर्धितः स्नेहातिशयो भक्त्युत्कर्षः तं विनाऽन्यत्किमपि नापेक्षत इत्यर्थः । निशामयन्तीनां शृण्वन्तीनामवहितात्मन उक्तग्रहणविरतमनसः प्रश्रयादि गुणैः सुयंत्रितान् । सुष्ठु वशीकृतान् उपशिक्षयन् । प्रजार्थमिति शेषः । इति वक्ष्यमाणप्रकारेण ।। १५-१७ ।।

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां चतुर्थोऽध्यायः ।। ५-४ ।।

।। अथ पञ्चमोऽध्यायः ।।

ऋषभ उवाच–

नायं देहो देहभाजां नृलोके कस्तत्कामानर्हति विड्भुजां ये ।
तपो दिव्यं ह्यर्हथ येन सत्त्वं शुध्येद्यस्माद्ब्रह्मसुखं ह्यनन्तम् ।। १ ।।

प्रकाशिका– ।। हरिः ॐ ।। तत्रादौ प्रेक्षावता विषयसेवात्यागपूर्वकं तप एव कार्यमित्याशयेनाह ।। नायमिति । अयं देहो देहभाजां शरीरधारिणामधीनो न तदिच्छानुसारेण चिरं न तिष्ठतीति यावत् । अतः को विवेकी तत्कामयंस्तत्पोषणोपयुक्तविषयानर्हति । भोक्तुमिति शेषः । ननु विषयभोगस्यापि पुरुषार्थत्वात्कथं नार्हतीत्युक्तमित्यतस्ते तुच्छा अन्तवन्तश्चेत्याशयेनाह ।। ये कामा विड्भुजां श्वसूकरादीनामपि भवन्तीति । तथा चातितुच्छा अन्तवन्तश्चेत्याशयः । तर्हि किं कार्यमित्यपेक्षायामाह ।। तप इति । तपः कायक्लेशात्मकं शास्त्रविमर्शात्मकं च दिव्यं वैकुण्ठादिद्युलोकसाधनमर्हथ । कर्तुमिति शेषः । हिशब्दः प्रमाणप्रसिद्धिद्योतकः । येन तपसा सत्त्वमन्तःकरणं यस्माच्छुद्धान्तःकरणाद्ब्रह्म योग्यतानुसारेण पूर्णम् । अनन्तमक्षयं सुखमाविर्भूतस्वरूपसुखं भवति । हिशब्देनात्र प्रमाणप्रसिद्धिं द्योतयति । तपोऽर्हथ इत्यन्वयः । अनन्तमन्तत्रयशून्यं सुखं पूर्णसुखात्मकं ब्रह्म परं ब्रह्माप्नोतीति व्याख्येयम् ।। १ ।।

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ।। २ ।।

प्रकाशिका– ननु संसारासक्तानामुक्तरूपतपःकरणे कथं प्रवृत्तिरित्यतस्तत्र कारणं दर्शयन् अनर्थफलवत्त्वाच्च विषयभोगो वर्जनीय इत्याशयेनाह ।। महत्सेवामिति । द्वारमुक्तरूपतपः-करणादिद्वारकारणमित्यर्थः । योषितामिति स्वविषयोपलक्षणम् । सर्वविषयस्नेहवत्सु संगं स्नेहं तमोद्वारमधोलोकसाधनं विषयवत्स्नेहसंगो यदाऽनर्थफलस्तदा किं वाच्यं विषयस्नेहोऽनर्थफल इति कैमुत्यन्यायेनोक्तमिति ज्ञातव्यम् । के महान्ता इत्यपेक्षायां तल्लक्षणमाह ।। महान्ता इति सार्धश्लोकेन । समे ब्रह्मणि चित्तं येषामिति वा समं तत्तद्योग्यतानुचित्तं सकलचेतनज्ञानं येषामिति वाऽर्थः । परस्परं सुहृदो न मत्सरयुक्ता इत्यर्थः । साधवो रागादिदोषरहिता विहितानुष्ठानादिना सद्गुणयुक्ताः ।। २ ।।

ये वा मयीशे कृतसौहृदार्था जनेषु देहं भरवार्तिकेषु ।
गृहेषु जायात्मजरातिरासु न प्रीतियुक्ता यावदर्थाश्च लोके ।। ३ ।।

प्रकाशिका– वाशब्दश्चशब्दार्थः । ये चेशे मयि कृतं सौहृदमेवार्थः प्रयोजनं यैस्ते तथा । देहं बिभ्रन्तीति देहंभरा विषयास्तेषामेव वार्तिकं वार्ता न हरिविषया येषु तेषु जनेषु गृहेषु जाया चात्मजाश्च रातिर्मित्रं च रा अर्थश्च तेषु च येन प्रीतियुक्ता ये च लोके उक्तरूपे जने यावान् शरीरयात्रोपयुक्तस्तावानेवार्थो धनादिरूपो येषां ते तथा ॥ ३ ॥

नूनं प्रमत्तः कुरुते कर्मदीनो यदिन्द्रियप्रीतय आवृणोति ।
न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥

प्रकाशिका– कस्तत्कामानर्हतीति विषयभोगत्याग उक्तस्तमेवोपपादयति ॥ नूनमिति । यद्यदेन्द्रियप्रीतये शब्दादिविषयभोगाय । तत्संपादनायेति यावत् । कर्म कुरुते तदाऽऽत्मानं तेन कर्मणा आवृणोतीति । पुनर्बद्धं करोतीत्यर्थः । कथमित्यत आह ॥ यत इति । यतः कर्मण आत्मनः स्वस्य स्वाभाविकतयाऽसन्नप्ययं देहः क्लेशद आस । इदानीं कर्मकरणेऽपि पुनस्तादृशदेहप्राप्तौ तत्रापि पुनः कर्मकरणे स्वात्मनो बन्ध एव संपादितः स्यादित्याशयः । अत इन्द्रियप्रीणनं साधु न मन्य इत्यर्थः ॥ ४ ॥

पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ।
तावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥

तात्पर्यम् – क्रियाफलं तावदेव । कर्मात्मकं कर्मवशम् ॥ ५ ॥

प्रकाशिका– नन्वेवं देहादिना बन्धोऽधिकारिणः कियत्पर्यन्तमित्यपेक्षायां तपो दिव्यं ह[illegible]थेत्युक्तमुपपादयति ॥ पराभव इति । पराभवोऽस्वाभाविकेन देहादिना बन्ध आत्मतत्त्वं परमात्मस्वरूपं न जिज्ञासते न श्रवणादिरूपजिज्ञासया पश्यति । तावदेव तावत्पर्यन्तमेव । ततः परं न पराभव इत्यर्थः । नन्वपरोक्षज्ञानानन्तरमपि काम्यानां निषिद्धानां च क्रियाणां तदधीनस्य मनसश्च सत्वे कथं तत्फलरूपबन्धाभाव इत्यत आह ॥ तावत्क्रिया इति । अत्रापरोक्षज्ञानानन्तरं क्रिया एव न सन्तीति भाति । तच्च प्रत्यक्षादिबाधितमतोऽत्र विवक्षितमर्थं दर्शयति ॥ क्रियाफलं तावदेवेति । तथा च मूले क्रियाशब्दस्तत्फललक्षक इत्याशयः । कर्मात्मकमित्यस्य कर्माभिन्नमिति प्रतीतिवारणायार्थमाह ॥ कर्मात्मकमिति । अत्रात्मशब्दः स्वामिपरः । तथा च कर्मस्वामिकं कर्मवशमिति यावदिति लब्धार्थप्रदर्शनमेतदिति ज्ञातव्यम् ॥ ततश्चायं मूलार्थः ॥ क्रिया निषिद्धादिक्रियाफलं तावदेव येन शरीरबन्धस्तदिदं मनोऽपि कर्मात्मकं कर्मवशं कर्मानुसारेण फलजनकं तावदेव यावदात्मतत्त्वज्ञानं न जिज्ञासते । ज्ञानोत्तरं निषिद्धादिक्रियाणां तदधीनस्य मनसश्च सत्वेऽपि न तेभ्यः फलम् । तद्यथा पुष्करपलाश इति उत्तराघस्याश्लेषोक्तेरित्याशयः ॥ ५ ॥

एवं मनः कर्मवशं प्रयुङ्क्त अविद्ययात्मन्व्यवधीयमाने ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥

तात्पर्यम् – अविद्यया प्रयुङ्क्ते ॥ ६ ॥

प्रकाशिका– संसारे मोक्षे च मूलभूतं कारणान्तरं दर्शयन्नुपसंहरति ॥ एवमिति । अत्राविद्येत्यस्यात्मन्यवधीयमान इत्यनेनान्वयभ्रान्तिवारणाय विवक्षितमन्वयं दर्शयति ॥ अविद्यया प्रयुंक्त इति । तथा चायमर्थः ॥ एवं पूर्वोक्तरीत्या पुरुषोऽविद्यया भगवत्स्वातन्त्र्याज्ञानादिरूपया मनः कर्मवशं यथा स्यात्तथा प्रयुंक्ते संसारासक्तं करोति । तथा च संसारे मूलकारणमविद्यैवेति भावः । व्यवधीयमानेऽव्यक्तस्वभावत्त्वेन व्यवहितवद्व्रियमाने आत्मन् अन्तर्यामिणि मयि वासुदेवे यावन्न प्रीतिर्भक्तिस्तावन्न विमुच्यत इत्यनेन भक्तिरेव मूलकारणमुक्तं भवति । आत्मन्यवधीयमान इति पाठे । आत्मनि मनस्यवधीयमाने स्थाप्यमाने ध्यायमाने सति यावदिति व्याख्येयम् । व्यवधीयमान इति पाठे उक्तरूपव्यवधानस्य भगवतोऽव्यक्तत्वेनैवोपपत्तौ नाविद्यायास्तत्र निमित्तत्वम् । आच्छादनरूपे व्यवधाने विवक्षितेऽविद्याच्छादितत्वस्यानादित्वेन वर्तमानार्थकशानच्प्रयोगानुपपत्तिः । अवधीयमान इति पाठे ध्यानरूपावधानेनाविद्यायाः कथमप्युपयोगोऽतोऽविद्ययेत्यस्य यथाश्रुतान्वयप्रतीतिर्भ्रान्तिरिति ज्ञातव्यम्॥

यदानुपश्यत्ययथागुणेहां स्वार्थे प्रमत्तः सहसाऽविपश्चित् ।
गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमागारमज्ञः ॥ ७ ॥

प्रकाशिका– अविद्यया मनः कर्मवशं प्रयुंक्त इत्युक्तमेव विशदयति ॥ यदेति । यदाऽविपश्चिदविवेकी । स्वार्थे मोक्षरूपप्रयोजनाय गुणेहां सत्त्वादिगुणानामीहां चेष्टां शब्दादिविषयेच्छां वा वस्तुतो यथाभूतां विपरीतमनुपश्यत्यानुकूल्येन स्वविहितसाधनतया पश्यति । तदा सहसा गतस्मृतिर्विनष्टशास्त्रार्थस्मरणोऽत एव स्वार्थे प्रमत्तोऽत एवाज्ञो भाव्यनर्थाज्ञानी पुरुषो मैथुन्यं स्त्रीपुरुषसंबन्धयोग्यमागारं गृहमासाद्य तत्र गृहे तापान्विन्दतीत्यन्वयः ॥ ७ ॥

पुंसः स्त्रिया मिथुनीभाव एष तयोर्मिथो हृदयग्रन्थिमाहुः ।
यतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ॥ ८ ॥

तात्पर्यम् – 'ब्रह्माद्या याज्ञवल्क्याद्या मुच्यन्ते स्त्रीसहायिनः । बध्यन्ते केचनैतेषां विशेषं च विदो विदुरि'ति सत्यसंहितायाम् ॥ ८ ॥

प्रकाशिका– ननूक्तरूपगृहप्राप्तिमात्रेण कथं तापलाभ इत्यतस्तत्प्रकारं दर्शयति ॥ पुंस इति । एष मिथुनीभावस्तम् । तयोः स्त्रीपुरुषयोर्हृदयग्रन्थिमन्योन्यस्मिन्मनोबन्धपाशमाहुरित्यर्थः ।

मिथुनीभावमेनमिति पाठे तु नाध्याहारप्रसक्तिः । अन्योन्यस्मिन्मनोबन्धेनापि किमित्यपेक्षायामाह ।। यत इति । गृहादिभिर्निमित्तैरहंममेत्ययं मोहस्तेन च तापान्विंदतीत्याशयः । अत्र पुंसस्त्रियोर्मिथुनीभावस्य तापजनकत्वोक्त्या स सर्वैरधिकारिभिर्न कर्तव्य इति भाति । न चेदं युक्तम् । कुटुम्बी शुचौ देश इत्यादिना गृहस्थानामपि मोक्षप्रतिपादनात् । अतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति । ब्रह्माद्या इति ।। केचनेति । येषां स्त्रिया सह न मुक्तिस्त इत्यर्थः । बध्यन्ते मोक्षयोग्याश्चेत्सत्समागमाभावे बद्ध्यन्ते न चेत्स्वभावेनैव बद्ध्यन्त इत्यर्थः । नन्वेवं संन्यासार्थमधिकारिणां प्रवृत्तिर्न स्यात् । स्त्रीसहायेनैवास्माकं मुक्तिरन्यथा नेति स्वस्वरूपनिर्णयस्य पूर्वमसंभवादित्यत उक्तम् ।। तेषामिति । चस्त्वर्थः । तेषां तु विशेषं विदो सर्वज्ञा गुरवस्तथा च तदुक्तप्रकारेण स्वरूपनिर्णये प्रवृत्तिः संभवतीत्याशयः । तथा च मूले पुंसः स्त्रिया सह मिथुनीभावस्य बन्धकत्वोक्तिर्येषां स्त्रिया सह न मुक्तिस्तत्परैवेत्याशयः ।। ८ ।।

यदात्मनो हृदयग्रन्थिरस्य कर्मानुबन्धो दृढमाश्लथेत ।
तदा जनः सम्परिवर्तमानो मुक्तः परं यात्यतिहाय हेतुम् ।। ९ ।।

प्रकाशिका– एवंविधपरितापनिवृत्तौ किं कारणमित्यपेक्षायामाह ।। यदेति । आत्मनः स्वस्य हृदयग्रन्थिर्मनोरूपपाशस्य ग्रथनं यस्मिन्स लिङ्गदेहः कर्मणामनुबन्धः परंपरा यस्मात्स तथा । दृढं यथा स्यात्तथाऽऽश्लथेत । शिथिलो भवेत् । संपरिवर्तमानः । संसार इति शेषः । मुक्तः सर्वतापाद्विनिर्मुक्तः परं परमात्मानं हेतुमहंममाभिमानहेतुं संसारहेतुम् ।। ९ ।।

हरौ गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ।। १० ।।

तात्पर्यम् – 'आत्मनो विहितं कर्म वर्जयित्वाऽन्यकर्मणः । कामस्य च परित्यागो निरीहेत्याहुरुत्तमा' इति च ।। १० ।।

प्रकाशिका– ननु ग्रन्थिशैथिल्यमेव कथं भवेदित्यपेक्षायां तपो दिव्यं ह्यर्हथेत्यादिनोक्तमनुक्तमन्यदपि मोक्षसाधनं सर्वं संकलय्याह ।। हराविति चतुर्भिः । गुरौ स्थिते हरौ मय्यनुवृत्त्या निरन्तरसेवया सर्वत्रेहामुत्र च व्यसनावगत्या क्लेशोऽस्तीति विचारेण तपसा कायक्लेशरूपेण । ईहानिवृत्त्येत्यस्य सर्वथा कर्मपरित्यागेनेति प्रतीतिवारणाय विवक्षितमर्थं प्रमाणेनैवाह ।। आत्मनेति । अन्यकर्मणोऽविहितकर्मणः परित्याग इत्यन्वयः । कामस्येच्छया वा यः परित्यागस्तम् । तथा चेहाशब्दस्य चेष्टारूपकर्मार्थत्वे स्वाविहितकर्मनिवृत्त्येति । इच्छारूपकर्मार्थत्वे निषिद्धकामनिवृत्त्येति च मूलं व्याख्येयमिति भावः ।।१०।।

मत्कर्मभिर्मत्कथया च नित्यं मत्पादसङ्गाद्गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ।। ११ ।।

प्रकाशिका– मत्कर्मभिर्मदाराधनलक्षणैः कर्मभिर्मम पादः सेव्यो येषां ते मत्पादा महान्तस्तेषां संगात्केशवनारायणेत्यादीनि यानि गुणप्रतिपादकनामानि तेषां कीर्तनाद्भूतेषु निर्वैरेण साम्येनोपशमेन क्षांत्या च। हे पुत्राः। देहगेहयोरात्मबुद्धेरहं ममेति स्वातंत्र्याभिमानस्य जिहासया हानेच्छया ॥ ११ ॥

अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सम्यक् ।
सच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन जयेन वाचाम् ॥ १२ ॥

प्रकाशिका– अध्यात्मयोगेनाध्यात्मशास्त्राभ्यासेन । प्राणश्चेन्द्रियाणामात्मनो मनसश्चाभिजयेन वशीकरणेनासंप्रमादेन इतिकर्तव्यतानामविस्मृत्या। वाचां जयेन मौनधारणेन ॥ १२ ॥

सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युद्यमसत्वयुक्तो लिङ्गं व्यपोहेत्कुशलोहमाख्यम् ॥ १३ ॥

तात्पर्यम् – 'सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतम्। प्रतिजीवं येन मुक्तिस्तद्विज्ञानं विदां मतमि'ति च । 'ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिपूरुषम् । विशेषेण तु विज्ञानं तच्च जानाति सर्ववित्। द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णदंष्ट्रश्च सौम्यदृक् । घोरदृक्चेति पुरुषः स सर्वज्ञ उदाहृत' इत्यध्यात्मे॥ 'षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः। सप्तपादश्चतुर्हस्तः स देवैरपि पूज्यत' इति वायुप्रोक्ते॥ न्यग्रोधमण्डलो व्यामो बाहू न्यग्रोध उच्यत' इति॥ १३ ॥

प्रकाशिका– मद्भावो मम स्थितिर्व्याप्तिस्तद्विचक्षणं तदनुसंधानं तेन ज्ञानेन। विज्ञानविराजितेनेत्यत्र ज्ञानविज्ञानशब्दयोर्विवक्षितमर्थं प्रमाणेनैव दर्शयति ॥ सर्वस्मादिति। सर्वस्मादुत्तमो विष्णुरिति। येन ज्ञानेन। नन्वेवं विज्ञाने सर्वोत्तमत्वं न भातीत्यवगतम्। तथात्वे कथं तस्य मोक्षजनकत्वम्। तमेवं विद्वानित्यादिना सर्वोत्तमत्वज्ञानस्यैव मोक्षजनकतयोक्तत्वादित्याशङ्कायां प्रमाणान्तरेण परिहरति ॥ ज्ञानमिति। विष्णोरुत्तमत्वविषये यज्ज्ञानं तदेव। तुशब्देन विशेषाणां तत्तद्योग्यमोक्षानुकूलत्वं द्योत्यते। प्रतिपूरुषं तु विशेषेण प्रतिपुरुषयोग्यमोक्षानुकूलं भगवद्गुणविशेषविषयेण सहितं चेद्विज्ञानं भवतीत्यर्थः। तथा च सर्वोत्तमत्वज्ञानस्यैवोक्तविशेषविषयकस्य विज्ञानस्योक्तत्वान्नोक्तशङ्काऽवकाश इति भावः। ननु प्रतिपुरुषमुपास्यभगवद्गुणविशेषाणां पूर्वं ज्ञातुमशक्यत्वात्कथमुपासनायां प्रवृत्तिरित्यत उक्तम् ॥ तच्चेति। चशब्दोऽनुक्ततदुपदेशसंग्राहकः। सर्ववित्सर्वज्ञो गुरुः। तदुपदेशेनाधिकारिणः पूर्वं तज्ज्ञानं सुलभमित्यर्थः।

ननु गुरुसार्वज्ञमेव कथं ज्ञेय इत्यतस्तदनुमापकलक्षणानि प्रमाणेन दर्शयति ॥ द्वात्रिंशदिति। तीक्ष्णदंष्ट्रः तीक्ष्णदन्तो भक्तानां सौम्यदृक्। अभक्तानां घोरदृक्। ननु द्वात्रिंशल्लक्षणान्येव कथं

ज्ञेयानीत्यपेक्षायां तदनुमापकानि प्रसिद्धलक्षणान्याह ॥ षण्णवत्यंगुल इति । षडुत्तरनवतिसंख्याकस्वांगुलिपरिमितदैर्घ्यः सप्तपादः सप्तसंख्यातस्वपादपरिमितदैर्घ्यः चतुर्हस्तश्चतुःसंख्याकस्वहस्तपरिमितदैर्घ्यः । स द्वात्रिंशल्लक्षणैर्युत इति शेषः । अत एव स देवैः पूज्यत इत्यर्थः । अत एव भारततात्पर्यनिर्णये ॥ सप्तपादश्चतुर्हस्तो द्वात्रिंशल्लक्षणैर्युत इति पाठः । मिलितानामेवैषां द्वात्रिंशल्लक्षणानुमापकत्वमतो न व्यभिचारशङ्केति ध्येयम् । न्यग्रोधपरिमण्डल इत्यस्य प्रकृतोपयोगमर्थं प्रमाणेन दर्शयति ॥ न्यग्रोधपरिमण्डल इति । व्यामो व्यामपरिमितदैर्घ्यः । ननु न्यग्रोधशब्दस्य व्यामार्थकत्वं कुत इत्यतस्तदुपपादयति ॥ बाहू इति । बाहुद्वयं न्यग्रोधशब्देनोच्यते । बाहुद्वयमेव व्यामोऽत उक्तमुपपन्नमित्यर्थः । ततश्च ज्ञानेन सर्वस्मादुत्तम इति ज्ञानेन । कथंभूतेन । विज्ञानविराजितेन । इदमेव तत्तदधिकारियोग्यमोक्षानुकूलभगवद्गुणविशेषकं सद्विज्ञानमिति प्रतीतेनेति मूलं व्याख्येयमिति भावः । योगेन ध्यानेन धृतिर्वैष्णवसिद्धान्तादचलनं उत् भवो यस्य तदुद्भवम् । उद्भूतमिति यावत् । सत्त्वं सत्त्वगुणस्ताभ्यां युक्तो लिङ्गं लिङ्गशरीरमहमाख्यमहङ्कारकार्यभूतेन्द्रियोपचितत्वादहङ्कारशब्दवाच्यमहमित्यभिमानेन मूलकारणतया व्याख्यायत इत्यहमाख्यमिति वा ॥ १३ ॥

कर्माशयं हृदयग्रन्थिबन्धमविद्यासादितमप्रमत्तः ।
अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ।
पुत्रांश्च शिष्यांश्च पिता गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥ १४ ॥

प्रकाशिका– हेयत्वप्रदर्शनाय लिङ्गदेहस्य विशेषान्तराणि वदन् लिङ्गदेहत्यागानन्तरं स्वरूपानन्दमनुभवतीत्याह ॥ कर्माशयमिति । कर्माशयं कर्मपरंपरासंपादकं स्त्रीपुरुषयोरन्योन्यस्मिन् हृदययोर्ग्रन्थिबन्धाविद्यया भगवदज्ञानेन तदिच्छया वा आसादितमनादितः प्राप्तमप्रमत्तः सन् व्यपोह्य त्यक्त्वा योगादपरोक्षज्ञानानन्तरमनुष्ठिताद्ध्यानादिरूपादुपायादुप भगवत्समीपे रमते । स्वस्वरूपसुखानुभववान् भवतीत्यर्थः । योगिना मत्प्रीत्यर्थं सज्जनशिक्षाऽपि कार्येत्याह ॥ पुत्रांश्चेति । मल्लोककाम इति मध्यमाधिकार्यपेक्षया । उत्तमाधिकार्यपेक्षया त्वाह ॥ मदनुग्रहार्थ इति । ममानुग्रह एवार्थः प्रयोजनं यस्य स तथा ॥ १४ ॥

इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ।
कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥ १५ ॥

प्रकाशिका– विमन्युरुपदिष्टोऽपि पुनरज्ञातांशप्रश्ने कोपशून्योऽतज्ज्ञान्मोक्षोपायज्ञानशून्यान् कर्मसु काम्येषु कर्ममूढान् कर्मैवोत्तमं श्रेयःसाधनमिति भ्रान्तान् । योजने बाधकमप्याह ॥ कमिति । मनुजो ज्ञानी । अर्थं पुरुषार्थं कं लभेत न कमपि ॥ १५ ॥

लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः ।
अन्योन्यवैरं सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥ १६ ॥

प्रकाशिका– न योजयेदित्युक्तमेवोपपादयति ॥ लोक इति त्रिभिः । नष्टदृष्टित्वे हेतुः ॥ य इति । अर्थेतरान्मोक्षेतरान् पुरुषार्थान्निकाममतिशयेन कामो यस्य स तथा । नन्वर्थेहायाः सुखहेतुत्वात्कथं तं कुर्वतो नष्टदृष्टित्वमित्यत उक्तम् ॥ अन्योन्येति । सुखं स्वल्पं बलवदनिष्ठानुबन्धि चेति न वेद । अतो मूढो नष्टदृष्टिरिति निगमनम् ॥ १६ ॥

कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ।
दृष्ट्वा पुनस्तं स घृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥ १७ ॥

प्रकाशिका– तमीदृशं कुबुद्धिं दृष्ट्वा सघृणः कृपालुः कोऽभिज्ञः को विपश्चित्स्वयं तादृशानर्थाभिज्ञः सन् पुनस्तं तत्रैव प्रयोजयेत्प्रवर्तयेन्न कोऽपि । यथोत्पथगमुन्मार्गेण गच्छन्तमन्धं कृपालुर्मार्गाभिज्ञः कस्तेनैव पथा गच्छेति ब्रूयान्न कोऽपि तथैवेति ॥ १७ ॥

गुरुर्न सः स्यात्स्वजनो न सः स्यात्पिता न सः स्याज्जननी न सा स्यात् ।
दैवं न तत्स्यान्नपतिश्च सः स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥ १८ ॥

प्रकाशिका– ननु काम्यकर्मणो मयि गुर्वादिभिरुपदिष्टत्वादिन्द्रादिदेवतोद्देश्यकत्वाच्च कथं निषिध्यते इत्यपेक्षायां न ते गुर्वादय इत्याह ॥ गुरुरिति । दैवं कर्मण्युद्देश्यं समुपेतमज्ञानादिप्राप्तं मृत्युं संसारं यो निवृत्तमार्गोपदेशादिना न मोचयेत् । प्रत्युत प्रवृत्तिमार्गमेवोपदिशेत्स गुर्वादिर्गुर्वादित्वेन पूज्यो न स्यादित्यर्थः ॥ १८ ॥

इदं शरीरं मम दुर्विभाव्यं सत्वं हि मे हृदयं यत्र धर्मः ।
पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ॥ १९ ॥

प्रकाशिका– एवं सर्वाधिकारिसाधारणं मोक्षसाधनं निरूप्येदानीं स्वपुत्राणामेव स्पर्धानिवृत्तये ज्येष्ठभ्रातृशुश्रूषणमपि मोक्षसाधनतया विधातुं तदुपयुक्ततयाऽऽदौ तावत्स्वशरीरस्थितिं तेषां जन्म चाह ॥ इदं शरीरमित्यादिना । इदं मनुष्यवद्दृश्यमानं दुर्विभाव्यमप्राकृतत्वात्प्राकृतैर्ज्ञातुमशक्यम् । न लोकसाधारणमिति यावत् । कुत इत्यत आह । हि यस्मात्सत्त्वं सत्त्वगुणमेव मे हृदयं प्रति विषयं न तु रजआदिः । अत्र ज्ञापकमाह ॥ यत्रेति । यत्र मदीये शरीरे सति धर्मः प्रवृद्धोऽधर्म आराद्दूरादेव पृष्टे कृत उत्सारितः । अत्रापि ज्ञापकमाह ॥ अत इति । हिशब्दोऽवधारणे । अत एव मामृषभं श्रेष्ठमाहुः । अन्यथा तन्न स्यादित्याशयः ॥ १९ ॥

तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सुनाभम् ।
अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥

तात्पर्यम् – 'नाभिरित्यथ नाम स्याद्धरेः सर्वाश्रयो यत' इति कौर्मे। तत्तस्य मम शुश्रूषणम् ॥२०॥

प्रकाशिका– तस्माद्धर्माभिवृद्धिजनकान्मच्छरीराद्भवन्तो हृदयेन मत्प्रीतिविषयेण सत्त्वेन सर्वे जाताः । अनेन राजपुत्रत्वादस्माकमपि कुतो न राज्यमिति स्पर्धा भवतां नोचितेति सूचितम् । यदर्थं स्वशरीरस्थित्यादिकमुक्तं तदिदानीं विधत्ते ॥ महीयांसमिति । महीयांसं महत्तमम् । अमुं भवद्भ्योऽपि ज्येष्ठं सु शोभमानो नाभिर्जनको यस्य सुनाभस्तं भरतमक्लिष्टबुद्ध्या स्पर्धारहितया बुद्ध्या भजध्वम् । अत्र ऋषभतातो नाभिरिति प्रतीतिवारणाय नाभिशब्दवाच्यत्वं हरेः प्रमाणेनैवाह ॥ नाभिरिति । अथशब्दोऽप्यर्थः । नाभिरित्यपि नाम स्यादित्यर्थः । अत एव मूले सुशब्देनायं विशेषितः । तथा च सर्वाश्रयत्वाच्छोभनो नाभिशब्दवाच्योऽहं जनको यस्य तम् । मत्पुत्रमिति यावदिति मूलं व्याख्येयमिति भावः । सर्वाश्रयस्य मम पुत्रोऽपि सर्वाश्रयो भविष्यतीति ज्ञापनायेदमुक्तमिति ज्ञातव्यम् । तदित्येतत्प्रथमान्तत्वेऽनन्वितमित्यालोच्य षष्ठ्यन्ततया व्याख्याति ॥ तत्तस्येति । तथा च तदित्यव्ययमिति भावः । तेन भरतपरामर्शप्रतीतिवारणायाह ॥ ममेति । अस्य भरणमित्यनेनान्वयप्रतीति-वारणायान्वयमाह ॥ शुश्रूषणमिति । ततश्चायमर्थः ॥ प्रजानां भरणं भरतकर्तृकं तत्तस्य भवज्जनकस्य मम शुश्रूषणं सेवारूपम् । अक्लिष्टबुध्या भरतभजने भवद्भिरपि राष्ट्रभेदाभावेन प्रजाभरणलक्षणं मच्छुश्रूषणं कृतं स्यादतोऽक्लिष्टबुध्या भरतं भजध्वमित्यर्थः ॥ २० ॥

भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सुबोधनिष्ठाः ।
ततो मनुष्याः प्रवरास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये ॥ २१ ॥

प्रकाशिका– इदानीं मोक्षार्थं जीवेषु तारतम्यमप्यवश्यं ज्ञातव्यमित्याशयेन तन्निरूपयन्ज्ञान-विज्ञानविषयीभूतं सर्वोत्तमत्वं विशदयति ॥ भूतेष्वित्यादिना । भूतेषु प्राणिषु मध्ये वीरुद्भ्यः स्थावरेभ्यः सरीसृपा जंगमा उदुत्तमा उत् उच्चैरतिशयेनोत्तमास्तेषु मध्ये सुबोधा ज्ञानयुक्ता निष्ठा स्थितिर्येषां पश्वादीनामुत्तमास्तेभ्योऽपि देवाः प्रवराः ॥ २१ ॥

देवा सुरेभ्यो मघवान् प्रधानो दक्षादयो ब्रह्मसुताश्च तेषाम् ।
भवः परः सोथ विरिञ्चिवीर्यः स मत्परोहं द्विजदेवदेवः ॥ २२ ॥

तात्पर्यम् – द्विजदेवानां देवः ॥ २२ ॥

प्रकाशिका– सुरेभ्यो देवेभ्यो मघवानिन्द्र प्रधानः । देवा सुरेभ्य इति पाठे विसर्गलोपश्छान्दसः । ये दक्षादयो ब्रह्मसुतास्तेषां सकाशान्मघवान्प्रधानः । अथेन्द्रानन्तरं भवो रुद्रः परः स रुद्रो विरिञ्चवीर्यो विरिञ्चपुत्रो विरिञ्चस्तस्मादुत्तम इत्यर्थः । स विरिञ्चोऽहं परो यस्य स मत्परः । तदपेक्षयाऽहं पर इत्यर्थः । एवं तारतम्यांगत्वेन सर्वोत्तमत्वमुक्त्वेदानीं क्षत्रियैर्भवद्भिर्ब्राह्मणा अवश्यं पूज्या इत्याशयेन तं स्तौति ॥ अहं द्विजदेव इत्यादिना । अत्र बहुव्रीहित्वं बाधितमतः षष्ठीतत्पुरुष एवेत्याशयेन विग्रहं दर्शयति ॥ द्विजदेवानामिति । द्विजदेवानां देवः । ब्राह्मणश्रेष्ठानां देवः । तथा च ब्राह्मणानां मत्पूजकत्वात्तत्पूजाऽवश्यं भवद्भिः कार्येत्याशयः ॥ २२ ॥

न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्रात्किमतः परं नु ।
यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥ २३ ॥

प्रकाशिका– इदानीं ब्राह्मणानां मत्पूजाधिष्ठानत्वाच्च तेऽवश्यं पूज्या इत्याशयेनाह ॥ न ब्राह्मणैरिति । अन्यद्भूतं प्राणिम् । ब्राह्मणैर्न तुलये न समं पश्यामि । ब्राह्मणसमं मत्पूजाधिष्ठानमन्यन्नैवास्तीत्यर्थः । अतो विप्रात्परं मत्पूजाधिष्ठानं किं नु पश्यामि न किमपि । समस्यैवाभावादधिकं कुतस्त्यमित्याशयः । कुत इत्यतस्तदुपपादयति ॥ यस्मिन्निति । यस्मिन् ब्राह्मणे प्रकर्षेण हुतं कामं यथा स्यात्तथाऽश्नामि । अतो विप्रादिति संबन्धः । अनेन मत्तृप्तिजनकहोमाधिष्ठानत्वादिति युक्तिरुक्तेति ज्ञेयम् । नन्वग्निरपि तादृशोऽस्तीत्यपेक्षायामाह ॥ न तथेति । अग्निहोत्रे अग्निरूपहोमाधिकरणे तथा नाश्नामीत्यन्वयः । अग्निहोत्राख्ये कर्मण्यग्नौ हुतमिति वा ॥ २३ ॥

धृतास्तनूरुशतीर्मे पुराणीर्येनेह सत्वं परमं पवित्रम् ।
शमो दमः सत्वमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २४ ॥

प्रकाशिका– अग्न्याद्यपेक्षया ब्राह्मणानां श्रैष्ठ्योपपादकगुणानाह ॥ धृता इत्यादिना । तनूस्तनवो वेदरूपा मत्स्यादिरूपा वोशतीरुशत्यो निर्मलाः पुराण्यनादिनित्या इह लोके येन ब्राह्मणेन धृता यत्र च ब्राह्मणे सत्त्वादयोऽष्टौ गुणाः सन्ति । अनुभवो ब्रह्मज्ञानं तस्मात्परमुत्तमं न किमपीत्यन्वयः ॥ २४ ॥

मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित् ।
येषां किमु स्यादितरेण तेषामकिञ्चनानां मयि भक्तिभाजाम् ॥ २५ ॥

प्रकाशिका– ब्राह्मणेष्वपि ये निस्पृहा मद्भक्ताश्च तेऽतिशयेन पूज्या इत्याशयेनाह ॥ मत्तोऽपीति । अनन्तादित्यादिविशेषणत्रयेण स्वस्य सर्वदा सर्वत्रानन्याधीनतया प्रार्थितप्रधानसामर्थ्यमुक्तमिति ज्ञातव्यम् । न किञ्चित्प्रार्थनीयमस्तीति शेषः । तेषामितरेणोक्तविपरीतेन राजादिना किमु प्रार्थनीयं

स्यान्न किमपि। अत्र हेतुकथनायोक्तम् ॥ अकिञ्चनानामिति। अः परमात्मैव किञ्चनं द्रव्यवत्प्रार्थनीयो येषां तेषामित्यर्थः। तदपि कुत इत्यत उक्तम् ॥ मयि भक्तिभाजामिति ॥ २५ ॥

सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि।
सम्भावितव्यानि पदेपदे वो विविक्तदृष्टिस्तदुताहर्णं मे ॥ २६ ॥

तात्पर्यम् – विविक्तदृष्टिर्जीवानां धिष्ण्यतया परमेश्वरस्य भेददृष्टिः। 'उपपादयेत्परात्मानं जीवेभ्यो यः पदेपदे। भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चने'ति पाद्मे ॥ 'यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रिय' इति च ॥ २६ ॥

प्रकाशिका– एवं ब्राह्मणानां विशेषतः स्वाधिष्ठानतया संभाव्यतामुक्त्वेदानीं सर्वाण्यपि भूतानि मदधिष्ठानतया यथायोग्यं संभावितव्यानीत्याह ॥ सर्वाणीति ॥ हे सुताः भवद्भिश्चराणि जङ्गमानि ध्रुवाणि स्थावराणि सर्वाणि भूतानि मद्धिष्ण्यतया मन्निवासस्थानत्वेन संभावितव्यानि यथायोग्यं संमाननीयानि। ननु ब्राह्मणसंभावनयैवालम्। किं सर्वभूतसंभावनयेत्यपेक्षायामाह ॥ पदे पद इति। अत्र विविक्तदृष्टिरित्यस्य प्रकृतसंगतमर्थं दर्शयति ॥ जीवानामिति। परमेश्वरस्य धिष्ण्यतयेति संबन्धः। इदमुपलक्षणम्। परमेश्वरस्याधिष्ठानतया जीवानां सकाशाद्भेददृष्टिरपि ग्राह्या। अत्र दृष्टिशब्देन युक्त्योपपादनमेव विवक्षितम् ॥ ततश्चायं मूलार्थः ॥ पदे पदे प्रतिस्थानं वो युष्माकं विविक्तदृष्टिर्मद्धिष्ण्यत्वादिलिङ्गेन जीवेश्वरयोः परस्परं भेदोपपादनम्। तत्तदेव मेऽर्हणं मत्प्रीतिजनकम्। अतः सर्वाण्यपि भूतानि मत्तो भिन्नतया ज्ञात्वा माननीयानीति। पदे पदे भेदोपपादनं हरिप्रीतिजनकमित्यत्र प्रमाणद्वयं पठति ॥ उपपादयेदिति। युक्त्या निश्चयं कुर्यादित्यर्थः। पदे पदे प्रतिस्थानम्। तदुतार्हणमित्यस्य तात्पर्यम् ॥ न चैतस्मादिति। आद्येन प्रमाणेनेश्वरधर्मिकभेदोपपादनं प्रीतिजनकमित्युक्तम्। द्वितीयेन जीवधर्मिकभेदोपपादनतया युक्तमिति ज्ञातव्यम्। वक्तोपपादकः ॥ २६ ॥

मनोवचोदृक्करणैर्हितस्य साक्षात्कृतं मे परिबर्हणं हि।
विना पुमान्येन महाविमोहकृतान्तपाशान्न विमोक्तुमीशः ॥ २७ ॥

प्रकाशिका– ननु भगवत्प्रीतिसंपादनेनापि किं फलमित्यपेक्षायां तत्साक्षात्कारपरमप्रीतिद्वारा मुक्तिरेवेत्याह ॥ मनोवचोदृक्करणैरिति। मनोवचःशब्दाभ्यां तद्व्यापारो लक्षणीयः। तथा च मनोवचोभिर्मनोवाग्व्यापारभूतैर्दृक्करणैरपरोक्षज्ञानसाधनैः श्रवणादिभिर्हितस्य परमप्रेमास्पदस्य मे साक्षात्कृतं साक्षात्कारः परिबर्हणं परमप्रीतिजनकं हि प्रसिद्धम्। येन साक्षात्कारेण विना पुमानधिकार्यहंममेत्यादिरूपो यो मोहो विमोहः। तल्लक्षणात्कृतांतपाशाद्धरिकर्तृकसंसारबन्धपाशस्थानीयादात्मानं मोक्तुं मोचयितुं नेशो न समर्थस्तत्साक्षात्कर्तुमित्यन्वयः ॥ २७ ॥

श्रीशुक उवाच–

स एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयं शतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणीतलपरिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात् प्रवव्राज ॥ २८ ॥

प्रकाशिका– स्वयं स्वत एवानुशिष्टानपि शिक्षितानपि निमीत्तीकृत्य लोकानुशासनार्थमनुशशास। ऋषभ इत्यपदेशो नाम यस्य स तथा। उपशिक्षमाण उपशिक्षयिष्यन्। उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहः शरीरमात्रस्वीकारो यस्य स तथा। सर्वं परित्यज्य शरीरमात्रसहितो भूत्वेत्याशयः। गगनमेव परिधानं वस्त्रं यस्य स तथा। दिगंबर इत्यर्थः। ब्रह्मावर्तात्तन्नामकदेशात्तं देशं परित्यज्य प्रवव्राज संन्यासाश्रमं गृहीतवानित्यर्थः ॥ २८ ॥

जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥

तत्रतत्र पुरग्रामदुर्गाकरखेटखर्पटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपदमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहननिष्ठीवनग्रावशकृद्रजःप्रक्षेपणपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन् देहोपलक्षणेऽसदपदेश अभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमवरोपिताहंममाभिमानत्वादखण्डितः पृथिवीमेकचरः परिबभ्राम ॥ ३० ॥

प्रकाशिका– संन्यस्तस्योत्तरावस्थां दर्शयति ॥ जडेति। जनानां जनैरभिभाष्यमाणोऽपि जडादिवद्वर्तमानस्तूष्णीं बभूव। अवधूताः परित्यक्ता येषां तेषामिव वेषो यस्य सोऽवधूतवेषः। तत्र पुरादिष्वनुपथं मार्गेऽवनिचरापसदैर्भूमिचरेषु दुर्वृत्तैस्तर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः। तत्र पुरं राजराजेश्वरस्थानम्। ग्रामा बहुजनाकीर्णा अट्टादिशून्या दुर्गं जलादिना गन्तुमशक्यमाकरः खनिः खेटो मृगयूनामास्थानं खर्पटो वस्त्रविक्रियस्थानं शिबिरं सेनानिवासस्थानं घोषो गवां निवासस्थानं व्रजो गोपालानां सार्थवणिजानामावासस्थानमाश्रमो ऋषीणाम्। तर्जनं भयशब्दोच्चारणं ताडनं प्रहारो मेहनमुपरिमूत्रपुरीषोत्सर्जनम्। निष्ठीवनं

मुखगतश्लेष्माद्युत्सर्जनं ग्रावण: शकृतोऽमेध्यस्य रजसश्च प्रक्षेप: । पूतिवातोऽधोवायुर्दुरुक्तं निन्दनम् । एतैरसताममङ्गलानां मूत्रपुरीषादीनां संस्थानं यस्मिंस्तस्मिन्नेतस्मिन् जडदेहरूपे । उपलक्षणे काकादिवत्कादाचित्केऽसदपदेशोऽसन्नविद्यमान इत्यपदेशो व्यवहारो यस्य जडदेहेऽयमविद्यमान इति लोकैर्व्यवन्हीयमाण इत्यर्थ: । कुत: । समवरोपित: सम्यक् परित्यक्तोऽहंममाभिमानो येन स तथा तस्य भावस्तत्वं तस्मात् । परमहंसमार्गशिक्षणाय ऋषभप्रदर्शितस्थित्यनुवादोऽयं वस्तुतो ऋषभे जडदेहप्रसक्तेरेवाभावादिति ज्ञातव्यम् । अहंममाभिमानपरित्यागोऽपि कुत इत्यपेक्षायामाह ।। अभयेति । स्वमहिम्न्यवस्थानं विषयीकरणं यस्य तत्तथा तेन । अभयानुभवस्वरूपेण भयशून्यस्वरूपानुभवेनाखण्डितो यत इत्यन्वय: । निरन्तरमनुभूयमानस्वमाहात्म्यवत्वादित्यर्थ: ।। २९,३० ।।

अतिसुकुमारकरचरणोर:स्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यास: प्रकृतिसुन्दर: स्वभावहासमुखो नवनलिनदलायमानशिशिरतरचार्वरुणायतनयनसदृशसुभगकपोल-कर्णकण्ठनासोविगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरमुपदधान: । परागवलम्बमानकुटिलजटिलालककपिलकेशभूरिभारोवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ।। ३१ ।।

प्रकाशिका– अतिसुकुमाराणां करादिरूपावयवानां विन्यासो विशिष्टसंनिवेशो यस्य स तथा प्रकृत्यैव सुंदर: स्वभावसिद्धो हासस्तेन सु शोभनं मुखं यस्य स तथा । नवनलिनदलवदाचरतीति नवनलिनदलायमाने शिशिरे तापहारिणी तारे कनीनिके ययोस्ते शिशिरतारे चार्वरुणे आयते नयने ताभ्यां रुचिरा असदृशा अन्यूनानधिका: सुभगाश्च कपोलकर्णकंठनासा यस्य स तथा विगूढमीषत्स्पष्टं स्मितं यस्य तस्य वदनस्य महोत्सवेन विभ्रमेण कुसुमशरं काममुपदधान उद्दीपयन् । एवंभूतोऽपि ग्रहगृहीत इवादृश्यतेत्यन्वय: । अत्र कारणमाह ।। परागिति । पराक् पुरतो लंबमानाश्च ते कुटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य स तथा । अवधूतमनादृतमत एव मलिनं मलिनवद्दृश्यमानं निजशरीरम् तेन ।। ३१ ।।

यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थित: शयान एवाश्नाति पिबति खादत्यवमेहति हसति स चेष्टमान उच्चरितादिग्धोद्देशस्तस्य ह य: पुरीषसुरभिसौगन्ध्यो वायुस्तं देशं दशयोजनं समन्तात्सुरभीचकार । एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीन: शयान: काकमृगगोवच्चरति पिबति खादत्यववमेहति स्म ।। ३२ ।।

प्रकाशिका– लोकं जनं प्रतीपं प्रतिकूलमिवशब्दादप्रतीतमप्याचक्षमाणो योगस्य ध्यानादेः प्रतिकूलो जनः कश्चिदेवाप्रतिकूल इति पश्यन्नित्यर्थः । ततः किमित्यत आह ।। तत्प्रतिक्रियेति । तस्य योगप्रतिकूलजनस्य प्रतिक्रियाकर्म प्रतीकारकरणं बीभत्सितम् परमहंसानां निन्दितमिति पश्यन् स ऋषभो यर्हि यदाऽऽजगरव्रतमास्थितस्तदा शयान एवाश्नातीत्यादि । अनेनैतादृशमाजगरव्रतमित्यपि दर्शितमिति ज्ञातव्यम् । चेष्टमानस्तत्रैव विलुंठन् उच्चरितेन पुरीषेण दिग्धा आलिप्ता उद्देशा देहप्रदेशा यस्य स तथा । जुगुप्सितमिदमिति शङ्कावारणायाह ।। तस्येति । पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स वायुः । लोकशिक्षार्थं व्रतान्तरमपि प्रदर्शितमित्याह ।। एवमिति । गोमृगकाकचर्ययेत्यस्य विवरणम् ।। काकमृगगोवदिति । विवरणे विपरीतक्रमोक्त्या पूर्वक्रमो न विवक्षितमिति सूचयति ।।३२।।

इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेवे आत्मनोऽव्यवधानेनानन्तरोदर-भावेन सिद्धसमस्तार्थैः परिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकाय-प्रवेशदूरग्रहणादिति यदृच्छयोपगतानि नाञ्जसा हृदयेनाभ्यनन्दत् ।। ३३ ।।

प्रकाशिका– योगचर्या योगस्थितिस्तामाचरतीति तथा । भगवानित्यादि विशेषणानि तस्य योगचर्याचरणं लोकशिक्षणायैवेति ज्ञापनाय । आत्मन्यादानादिकर्तर्यात्मभूतेऽन्तर्यामिभूते वासुदेवे आत्मनः स्वस्य । अव्यवधानानन्तरोदरभावेन । अव्यवधानेन न विद्यते व्यवधानं विच्छेदो यस्य तेन । अखण्डितेनेति यावत् । निरन्तरं भेदशून्यमुदरमुद्गतारं दोषरहितमिति भावेन मनसा । अनुभवेनेति यावत् । स्वभावत एव सिद्धा ये समस्तार्थास्तैः परिपूर्णो यतो वैहायसादीनि योगैश्वर्याण्यंजसा दर्शयितुं नाभ्यनन्दत् । तत्प्रदर्शनेन मनसस्तत्रासक्त्या विकर्मकरणेनानर्थप्राप्तिप्रसङ्गादित्याशयः । वैहाय-समाकाशगमनम् । मनोजवं मनस इव देहस्य वेगम् । दूरग्रहणं दूरस्थदर्शनं यदृच्छया स्वेच्छया सहसा वा ।। ३३ ।।

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां पञ्चमोऽध्यायः ।। ५-५ ।।

।। अथ षष्ठोऽध्यायः ।।

राजोवाच–

न नूनं भगवन्नात्मरामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ।। १ ।।

प्रकाशिका– ।। हरिः ॐ ।। योगैश्वर्याणि नाभिनन्ददित्युक्तम् । तत्र राजा शङ्कते ।। न नूनमिति । हे भगवन् । योगेन हरिध्यानरूपेण समीरितं समुत्पन्नं यज्ज्ञानं तेनावभर्जितानि दग्धानि कर्मबीजानि रागादीनि यैस्तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नूनं निश्चितं नार्हंति । ज्ञानोत्तरं विकर्मकरणमसंभावितमित्यर्थः । अतः कथं तानि नाभ्यनन्ददिति वाक्यशेषः ।। १ ।।

शुक उवाच–

सत्यमुक्तं किन्त्विह वा एके मनसो विस्रम्भमनवस्थानस्य घटकिराट इव न सङ्गच्छन्ति ।। २ ।।

प्रकाशिका– अर्धाङ्गीकारेण परिहरति ।। सत्यमिति । तर्हि किमिति नाभ्यनन्ददिति पृच्छति ।। किंत्विति । उत्तरमाह ।। इह वा इति । एके ज्ञानिनो घटकिराटे नूतनघटे स्थितस्य जलस्यैवेह नूतनविषये मनसोऽनवस्थानस्यावस्थानाभावस्य । आसक्त्यभावस्येति यावत् । विस्रंभं विश्वासं न संगच्छन्ति न सम्यक् प्राप्नुवन्ति । अतो योगैश्वर्यप्रदर्शने मनसः पुनस्तत्रासक्तौ विकर्मकरणं स्यादेवातो नाभ्यनन्ददित्यर्थः ।। २ ।।

तथा चोक्तम्–

न कुर्यात्कस्यचित्सख्यं मनसि ह्यनवस्थिते ।
यद्विस्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ।। ३ ।।

प्रकाशिका– ज्ञानिमनसो विषयासक्त्यभावे विश्वासो नास्तीत्यत्र पूर्वाचार्यसंमतिमाह ।। तथा चोक्तमिति । ।। न कुर्यादिति । कस्यचिदर्थस्य विषये मनसि सख्यं विश्वासम् । कथंभूते । अनवस्थिते एकत्र निष्ठाशून्ये । यद्विस्रंभाद्यस्य मनसो विश्वासादैश्वरं योगेश्वराणां सौभर्यादीनां संबन्धि ।। ३ ।।

नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः ।
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ।। ४ ।।

प्रकाशिका— न कुर्यादित्येतदुपपादयति ।। नित्यमिति । कृतमैत्रस्य कृतविश्वासस्य योगिनः । मन इति शेषः । कामस्य तमनु येऽरयस्तेषां यच्छिद्रमवकाशं नित्यं ददाति । यथा कृतविश्वासस्य पत्युः पुंश्चली जाया तदरीणां जाराणामवकाशं दत्वा तैः पतिं घातयति । तथा मनोऽपि कामादीनामवकाशं दत्वा तैर्योगिनं भ्रंशयतीत्यर्थः ।। ४ ।।

कामो मन्युर्मदो लोभः शोकमोहभयादयः ।
कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ।। ५ ।।

तात्पर्यम् – 'महैश्वर्यस्वरूपो हि भगवानृषभो स्वराट् । नैश्वर्याणि स्वकीयानि ख्यापयामास सर्ववित् । उत्तमानां ज्ञापनार्थं धर्मतत्त्वस्य केशवः । तेषामैश्वर्यभोगे हि मनः सक्तिं व्रजेद्यदि । आनन्दो मुक्तिगो ह्रासं विकर्मकरणाद्व्रजेत् । धर्माधर्मविहीनोऽपि भगवानृषभस्ततः । तेषां धर्मस्थापनार्थं नाविश्चक्रे परां स्थितिम् । देवानां नाशुभाद्ध्रासः शुभात्काचित्सुखोन्नतिः । आधिकारिकजीवानामेवमन्येषु तद्द्वयम् । अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम् । अशुभाभावजोन्नाहो महाधीकारिणामपि । अशुभे कृते न भवति तारतम्याच्च स स्मृतः । प्रजापाश्च तथा देवा महाधीकारिणः स्मृताः । ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम् । गन्धर्वाणां तथा राज्ञां विंशदन्यासु जातिषु । अल्पाधिकारिणः प्रोक्ता अनधीकरिणः पर' इति ब्रह्माण्डे ।। ५ ।।

प्रकाशिका— अरय इत्युक्तारीन् दर्शयन्नुपसंहरति ।। काम इति । यन्मूलो यन्निमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यादिदं स्वाधीनमिति विश्वासं कुर्यान्न कोऽपीत्यर्थः । नन्वत्र नाभ्यनन्ददिति पूर्वाध्यायान्ते ऋषभो विकर्मप्रसक्तिशङ्कया योगैश्वर्याणि न प्रदर्शितवानित्युक्ते ज्ञानिनो विकर्मकरणमसंभावितमिति राज्ञा पृष्टे ज्ञानिनोऽपि विकर्मकरणं संभावितमिति मुनिनोपपादितं न चेदं सर्वं ऋषभस्य संभवति । तस्य भगवदवतारत्वेन विकर्मप्रसक्तिशङ्काया एवाभावात् । ज्ञानिनामपि विकर्म संभावितमित्युपपादनमपि व्यर्थम् । तेषां विकर्मसंभवेऽपि तल्लेपाभाववचनादिति शङ्काद्वय-निरासायैतत्प्रकरणतात्पर्यं प्रमाणेनैवाह ।। महैश्वर्यस्वरूप इति । अनेन वासुदेवे सिद्धसमस्तार्थे परिपूर्णे इत्येतत्प्रमापितमिति ज्ञेयम् ।

नाभ्यनन्ददित्यस्यार्थमाह ।। नैश्वर्याणीति । तत्राद्यशङ्कानिरासायाभिप्रायमाह ।। उत्तमानामिति । उत्तमानां ज्ञानिनां धर्मतत्त्वस्य सिद्धमपि योगैश्वर्यं न प्रदर्शनीयमित्येवंरूपस्य ज्ञापनार्थम् । न त्वस्य पापशङ्कया । ज्ञानिभिरेवं भाव्यमिति शिक्षणायैव भगवता योगचर्याचरणे प्रवृत्तत्वादित्याशयः । ज्ञानिनां योगैश्वर्यप्रदर्शनेऽनिष्टमुपपादयन् द्वितीयशङ्कां परिहरति ।। तेषामिति । तेषां मनः कर्त्रैश्वर्यभोगे । प्रदर्शिते सतीति शेषः । तर्हि विकर्म प्रसक्तं स्यात् । विकर्मकरणान्मुक्तिग आनन्दो ह्रासं व्रजेत् । ततश्च ज्ञानिनां

विकर्मकरणेनाशुचित्वादिरूपफलाभावाभिप्रायेणैवालेपोक्तिः शास्त्रे न सर्वथा लेपो मौक्तानन्दह्रास-रूपतया सद्भावादित्युक्तं भवति । शङ्काद्वयपरिहारमुपसंहरति ॥ धर्माधर्मेति । ततस्तेषां ज्ञानिनां विकर्मकरणेनानर्थसद्भावात् । परां स्थितिं योगैश्वर्यरूपाम् । ननु ज्ञानिनां विकर्मकरणेन मौक्तानंदह्रासे देवानामपि ज्ञानित्वात्तत्संभवे श्रुत्युक्ततारतम्यभङ्गप्रसङ्ग इत्यत आह ॥ देवानामिति । ह्रासः । क्लृप्तसुखस्येति शेषः । देवानां शुभमपि व्यर्थं किं नेत्याह ॥ शुभादिति । शुभोन्नतिः क्लृप्तस्य सर्वस्याप्यभिव्यक्तिः । देवानामित्युपलक्षणेनोक्तम् । अन्येषामप्येवमित्याह ॥ आधिकारिकेति । एवं शुभाशुभफलाभ्यां क्लृप्तस्य वृद्धि-ह्रासाभावः । अन्येष्वाधिकारिकजीवभिन्नेषु विशेषणद्वयम् ।

अशुभः क्लृप्तसुखह्रासः शुभात् । स्वसमानापेक्षयाऽऽधिक्येन क्लृप्तसुखाविर्भावः इति द्वयं भवतीत्यर्थः। आधिकारिकजीवानामित्युक्तस्यापवादमाह ॥ अल्पेति ॥ तत्राधिकारिजीवेषु मध्ये येऽल्पाधिकारिणस्तेषामशुभकरणेन क्लृप्तसुखस्यापि ह्रासः । अपिशब्दात्समानापेक्षयाऽऽधिक्येन क्लृप्त-सुखाभिव्यक्तिः । यथा हरिश्चन्द्रस्य राजसूययागकरणेन वृद्धिः । अतस्त्रिशंकुपुत्रको नृपानतीत्य वर्तत इति वचनात् । आधिकारिकेषु ये महाधिकारिणस्तेषामपि विकर्मकरणात् क्लृप्तह्रासाभावेऽपि किञ्चिदनिष्टं भवतीत्याह ॥ अशुभेति । अशुभाभावजोऽशुभकरणात्पूर्वं य उन्नाह उत्कर्षः समुद्रतरंगोपमः सोऽशुभे कृते न भवति । क्लृप्ते सुखे तरङ्गवदभिवृद्धिस्तदभावः प्राप्तो भवतीत्यर्थः । यथाऽर्जुनादीनामतिमानादिना मुक्तावुक्तरूपोन्नाहाभावः । कदाचिदतिमानोऽपि त्रयाणामेषु जायते । तथाऽपि तत्फलं नैतत्तारतम्यं विमुक्तगमिति भारततात्पर्यनिर्णयेऽभिहितत्वात् । अशुभकरणप्राप्तोन्नाहाभावस्तारतम्यादेव स्मृत इत्यर्थः।

आधिकारिकेषु के महाधिकारिणः के वाऽल्पाधिकारिणः के च तदन्या इत्यपेक्षायां तान्दर्शयति ॥ प्रजापाश्चेति । प्रजापा मरीच्यादयोऽन्यासु जातिषु सिद्धचारणादिषु विंशद्विंशतिः परे उक्तातिरिक्ता अनधिकारिणः । आधिकारिका न भवन्तीत्यर्थः । एतादृशप्रमाणप्रसिद्धिद्योतनायैव मूले वा इत्युक्तम् । तथा चोक्तरीत्या ज्ञानिशिक्षणाय ऋषभो नाभ्यनन्ददित्युक्ते ज्ञानिनोऽपि कुत एवं शिक्षणीयास्तेषां विकर्मकरणप्रसक्तेरेवाभावादित्यभिप्रायेणैव राज्ञा पृष्टे ज्ञानिनामप्युक्तरीत्या सर्वेषां विकर्मकरणादि-नाऽनिष्टप्रसक्तेः प्रामाणिकत्वात्ते शिक्षणीया एवेत्याशयेन शुकेन परिहार उक्तः । तदेतत्प्रकरण-तात्पर्यमित्याशयः ॥ ५ ॥

अथैवमखिललोकपाललामो विलक्षणो जडवदवधूतवेषभाषाचरितैरविलक्षित-भगवत्प्रभावो योगिनां साम्परायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानम-संव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥

तात्पर्यम् – 'विष्णोः कलेवरत्यागो भूत्यागोऽन्यो न विद्यते । कलेवरत्यागोऽन्येषां पञ्चत्वं समुदीरितमि'ति कौर्मे ॥ अनर्थान्तरभावेन अर्थान्तरमिति मनसा ॥ ६ ॥

प्रकाशिका– प्रासंगिकं समाप्येदानीं प्रकृतमाह ॥ अथेति । अखिलानां लोकपालानां ललामोऽलकारभूतोऽत एव लोकविलक्षणः । कथं तर्हि तत्प्रभावो लक्ष्यत इत्यत उक्तम् ॥ जडवदिति । जडे यथा भगवत्प्रभावो न लक्ष्यते तथाऽवधूतवेषादिभिरविलक्षितो भगवत्प्रभावो यस्मिन्स तथा । सांपरायविधिं मोक्षसाधनप्रकारम् ॥ कलेवरं जिहासुरिति । अत्र विवक्षितं कलेवरत्यागं प्रमाणेनैव दर्शयति ॥ विष्णोरिति । विष्णोस्तदवतारस्य कलेवरत्यागो यत्रोच्यते तत्र भूत्यागो व्याख्येयः । कुत इत्यत उक्तम् । अन्यः शरीरत्यागो न विद्यते यत इत्यर्थः । शरीरत्यागपरतया व्याख्यानेन तद्वाक्यं बाधितार्थकं स्यादिति भावः । अन्येषां कलेवरत्यागो यत्रोच्यते तत्र पञ्चत्वं शरीरत्यागरूपं मरणमेव सम्यगबाधितं यथा स्यात्तथोदीरितम् । तथा च यस्य पृथिवी शरीरमित्यादिना स्वकलेवरत्वेन प्रसिद्धां भूमिं जिहासुरित्येव मूलं व्याख्येयमिति भावः । शरीरत्यागोऽर्थो न भवतीति सूचनायैवाखिललोकेत्यादि विशेषणानि । अनुशिक्षणप्रकारमेवाह ॥ आत्मनीति । अत्रानर्थान्तरभावेनेत्यस्य प्रकृतसङ्गतमर्थं दर्शयति ॥ अनर्थान्तरेति । अर्थान्तरं भिन्नोऽर्थो नास्तीति नञोऽर्थः । नास्तीति पाठे न भवतीत्यर्थः । मध्यमपदलोपी समास इत्यभिप्रेत्य प्रकारार्थकेतिशब्दः । भावेनेत्यस्यार्थः ॥ मनसेति । तथा चात्मनि परमात्मनि । आत्मानं स्वात्मानमनर्थान्तरभावेनार्थान्तरो भिन्नार्थको नास्तीत्येवंप्रकारको यो भावो मनस्तेनासंव्यवहितं व्यवधानरहितम् । अनवरतमिति यावत् । अन्वीक्षमाणः पश्यन् । अनेन योगिनां परमात्मन्यवताराभेदो मरणकालेऽनुसंधेय इति शिक्षणं कृतमिति ज्ञातव्यम् । पुनः शिक्षणीयं दर्शयति ॥ उपरतानुवृत्तिरिति । परित्यक्तविषयानुभव इत्यर्थः । उपरराम समीपस्थमूलरूपस्मरणं कृतवानित्यर्थः ॥

तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावसानो देह इमां जगतीमभिमानाभासेन चङ्क्रममाणः ॥ ७ ॥

एकदा तु काङ्कटकर्णाटकाद्दक्षिणकर्णाटकान् देशान् यदृच्छयोपगतः कुटचाचलोपवने आस्यकृताश्मकवल उन्माद इव मुक्तमूर्द्धजोऽसंवीत एव विचचार ॥ ८ ॥

तात्पर्यम् – अभिमानाभासेन अभितो ज्ञानप्रकाशेन ॥ ७ ॥

प्रकाशिका– इदानीं तस्य देशान्तरगमनप्रकारं वक्ति ॥ तस्य हवेति । एकदा ऋषभस्य देहो इमां जगतीं विचचारेत्यन्वयः । देहस्य कर्तृत्वोक्त्या तद्देहश्चेतनात्मक इति दर्शयति । अत एवाह ॥ मुक्तलिङ्गस्येति । दूरीकृतजडदेहस्येत्यर्थः । परित्यक्तवर्णाश्रमचिन्हस्येति वा । योगमाया योगसामर्थ्यं

तस्यावसानमुत्कर्षकाष्ठा यस्य स तथा । अनेनापि देहस्य ऋषभाभेद उक्त इति ज्ञातव्यम् । अभिमानाभासेनेत्यस्य योग्यमर्थं दर्शयति ॥ अभिमानेति । अभीत्यस्यार्थोऽभित इति । मानेत्यस्यार्थो ज्ञानेति । आभासेनेत्यस्यार्थः प्रकाशेनेति । तथा च अभि अभितोऽडान्तर्बहिश्च ज्ञानप्रकाशात्मकेन । मनसेति शेषः । अनेन मनोऽपि न जडरूपमिति दर्शितम् । चंक्रममाणः पुनः पुनः पादविक्षेपं कुर्वाणः ॥

कांकटकर्नाटकाद्भीमरथीप्रान्तप्रदेशाद्दक्षिणकर्नाटकान् सौराष्ट्रादिदेशान् यदृच्छया स्वेच्छयोपगतः प्राप्तः । तत्र कुटचाचलस्य कुटकपर्वतस्योपवने मौनभङ्गभियाऽऽस्ये कृतोऽश्मकवलो येन स तथा । असंवीतो नग्न उन्माद इवोन्मादे सति पुमान्यथा चेष्टते तथेत्यर्थः ॥ ७,८ ॥

अथ समीरवेगविधुतवेणुनिर्घर्षणजातो दावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ ९ ॥

तात्पर्यम् – 'ज्ञानानन्दात्मको देहो ऋषभस्य महात्मनः । तादृशेनैव मनसा क्रमंस्तु कुटचाचले । दावाग्निमनुविश्याथ तत्रस्थः प्रादहज्जगत् । एवमग्नेरभिव्यक्तस्तत्स्थो विष्णुः सनातनः । ऋषभत्वेन सङ्गोप्य धर्मानद्यापि तत्रगः । आस्ते स वासुदेवात्मा वासुदेवोऽहमित्यजः ॥ सदा स्थितः स्थितिं तां तु शुश्रावार्हो दुरात्मवान् । पूर्वं तु पौण्ड्रको नाम वासुदेवः सुदुर्मतिः । जातिस्मरो द्विधा शास्त्रं पाषण्डं निर्ममे नृपः । एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि । कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः । लोकार्थं चापरमपि चकारार्हतनामकम् ॥ 'तत्प्रशिष्यः क्रमुर्नाम न जानंस्तन्मतं परम् । वासुदेवात्मतां सर्वजीवानामवदत्कुधीः । क्रम्वाख्यं शास्त्रमकरोद-भेदप्रतिपादकम् । कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयम् । तद्दृष्ट्वाऽद्यापि वर्तन्ते वर्तिष्यन्ति कलौ तथा । अशौचा अव्रताचारा वासुदेवोऽहमित्यपी'ति ब्राह्मे ॥ ९ ॥

प्रकाशिका– इदानीं तस्यांतर्धानेन स्थितिमाह ॥ अथेति । अत्र ऋषभदेहस्य दावानलस्तेन सह ददाहेत्यग्निदग्धत्वमुच्यते । तत्पूर्ववाक्यविरुद्धम् । तत्रोक्तरीत्या तद्देहस्य ऋषभाभेदावगमात् । अत एतत्प्रकरणतात्पर्यं प्रमाणेनैव दर्शयति ॥ ज्ञानानन्देति । अनेन मुक्तलिङ्गस्य योगमायावसान इत्यनयोस्तात्पर्यमुक्तमिति ज्ञातव्यम् । तादृशेनैव ज्ञानानन्दात्मकेनैव । मनसेत्यनेनाभिमाना-भासेनेत्यस्यार्थकथनम् । मानाभ्यासाभ्यामानन्दोप्युपलक्ष्यो मनसेत्यध्याहार्यमिति सूचयति । क्रमंस्तु कुटचाचल इत्यनेन कुटचाचलोपवने विचचारेत्युक्ततात्पर्यम् । दावाग्निमनुविश्याथेत्यनेनाथ समीरवेगेत्यादिकमुक्तार्थम् । अथ दावाग्निमनुविश्येत्यन्वयः । अनेन मूलेऽथेत्यनन्तरं दावाग्नौ प्रविष्टो बभूवेति शेषं सूचयति । तत्रस्थोऽग्नौ विद्यमानस्तत्रत्यं जगत्प्रादहत् । अनेन दावानलस्तेन स्वाविष्टेन

ऋषभेण सह ददाह । न तु स्वयमेवेति मूलार्थं सूचयति । एवमुक्तरीत्या तत्स्थोऽग्निस्थो विष्णुरग्नेः सकाशादजो यतोऽतः पुनरभिव्यक्तः सन् ऋषभत्वेन स्वात्मानं सङ्गोप्याहं ऋषभो न भवामीति प्रतिपादयन्नित्यर्थः । अद्यापि तत्रगः कुटचाचलोपवनगो धर्मानाचरन्नास्ते । किं प्रतिपादयन्नास्त इत्यपेक्षायामुक्तम् । अहं वासुदेवोऽस्मीति यत्सन्निर्दुष्टं मतं तदास्थित आश्रितः । तत्प्रतिपादक इति यावत् । ननु वासुदेवोऽहमिति मतं कथं सदित्यत उक्तम् । यतो वासुदेवात्मा स्वयं वासुदेवस्वरूप इत्यर्थः । दुरात्मवान् दुष्टमना अर्हो नाम राजा । तुशब्दोऽवधारणे । तामेव स्थितिम् । कश्चनाग्नेरभिव्यक्तोऽलौकिकः पुरुषोऽहमेव वासुदेव इति प्रतिपादयतीति स्थितिं शुश्राव । तदुपदिष्टर्षिमुखादिति शेषः । दुरात्मत्वोपपादनायाह ।। पूर्वं त्विति । वराहकल्पात्पूर्वं पद्मकल्प इत्यर्थः । जातिस्मरोहं वसुदेवजातत्वाद्वासुदेवो भवामीति पूर्वजन्मस्मरणवानित्यर्थः । वासुदेवो भगवान् जीवाभिन्नतयाऽऽख्यायतेऽनेनेति वासुदेवाख्यम् । एतदेवाह ।। वासुदेवोऽहमिति । अपिशब्दो गर्हायाम् । वासुदेवोऽहमिति आत्मनोऽप्यतदर्हस्यापि स्वस्यैकस्यैव जीवस्य वासुदेवत्वप्रतिपादकमत एव कुपथं लोकार्थे परमर्हतनामकमहिंसादिकं धर्मप्रतिपादकं चकार इति द्विधा शास्त्रं निर्मम इत्यन्वयः । तन्मतमेकस्यैव जीवस्य वासुदेवत्वप्रतिपादकं मतं परमुत्तमं नेति जानन्नित्यर्थः । तामसालयं तामसाग्रहविषयम् । अनेन यस्य किलेत्यारभ्य प्रवर्तयिष्यत इत्यन्तमुक्तार्थम् । वर्तन्ते तन्मतमनुवर्तन्ते । कलावप्यनुवर्तयिष्यन्ति । वासुदेवोऽहमिति । मतमिति शेषः । अनेन येन ह वै कलावित्यादिकमुक्तार्थम् । ततश्चायमथ समीरवेगेत्यादेरर्थः । अथ दावानले प्रविष्टे । बभूवेति शेषः । समीरो वायुस्तद्वेगेनावधूतानां प्रकंपितानां वेणूनां निर्घर्षणान्नितरामन्योन्यं सङ्घर्षणाज्जातो यो दावानल आलेलिहानो ज्वालया सर्वतो ग्रसंस्तेन स्वप्रविष्टेन ऋषभेण सह न तु स्वयमेवेत्यर्थः । ददाह तत्रत्यं जगदिति शेषः ।। ९ ।।

यस्य किलानुचरितमुपाकर्ण्य काङ्कटकर्णाटकानां दक्षिणकर्णाटकानां राजार्हनामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथं पाषण्डमसमञ्जसं निजमनीषया मन्दः सम्प्रवर्त्तयिष्यते ।। १० ।।

प्रकाशिका– यस्य पुनरग्नेरभिव्यक्तस्यानुचरितं स्थितिमुपाकर्ण्य श्रुत्वा जनानुपशिक्ष्य शिक्षयित्वोत्कृष्यमाणे वर्धमाने भवितव्येन तत्रत्यासुरजनपापफलदेन हरिणा पाषण्डमुक्तरीत्या द्विविधं शास्त्रम् । निजमनीषयेत्यनेन नायं ऋषभाभिप्राय इति सूचयति ।। १० ।।

येन ह वा कलौ मनुजापसदा देवमायाविमोहिताः स्वविधिनियोगशौचाचारविहीना देवहेलनादीन्यपव्रतानि निजेच्छया गृह्णाना अस्नानानाचमनाशौच

केशोल्लुञ्चनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥ ११ ॥

प्रकाशिका– येन द्विविधेन शास्त्रेण मनुजापसदा मनुष्याधमास्तत्प्रशिष्यक्रमुकृतशास्त्रानुसारिणः स्वविधिः स्ववर्णाश्रमोचितधर्मविधायको वेदस्तस्य नियोगो नियोजनं विधानं यस्य शौचाचारस्य तेन विहीना देवहेलनादीनि देवद्रोहकरादीनि । अपव्रतानि वेदविरुद्धव्रतानि निजेच्छया प्रमाणं विना । अपव्रतानि दर्शयति ॥ अस्नानेति । देवहेलनादीनीत्यत्रादि पदोपात्तानि दर्शयति ॥ ब्रह्मेति । ब्रह्म वेदो यज्ञ इज्यमानः पुरुषो लोकाः सज्जनाः ॥ ११ ॥

तैरपि ह्यर्वाक्तनया निजलोकयात्रयान्धपरम्परया त एवानाश्वस्थास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥ १२ ॥

प्रकाशिका– तेषां फलमाह ॥ तैरपीति । तैर्देवहेलनादिभिः । अपिशब्दादहं वासुदेवोऽस्मीत्युपासनाग्रहणम् । अर्वाक्तनयाऽवेदमूलकतया निजलोकानामज्ञानिलोकानां यात्रा गमनं यस्यां सा तथा तयांऽधपरंपरयाऽनाश्वस्था इतरशास्त्रेषु निष्ठाशून्याः । स्वमत एव विश्वासवन्त इति यावत् । स्वयमेव । स्वस्वबुद्धिदोषेणैव ॥ १२ ॥

अयमवतारो रजसोपप्लुतकैवल्यशिक्षणार्थः तस्यानुगुणान् श्लोकान्गायन्ति ॥१३॥

प्रकाशिका– न केवलमेवं ऋषभचरितमसुरमोहकं किन्तु साधुजनमुक्तिदं चेत्याह ॥ अयमवतार इति । रजसा रजोगुणेन तत्कार्येण संसारेणोपप्लुतस्योपद्रुतस्य साधुजनस्य कैवल्यं मोक्षसाधनं तदुपशिक्षणमर्थः प्रयोजनं यस्य स तथा । तस्य ऋषभस्यानुगुणान् अनुसारिणः ॥ १३ ॥

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥ १४ ॥

तात्पर्यम् – 'विशेषाद्भारते पुण्यं चरेयुः पापमप्यथ । तथैव भगवद्भक्तिं पृथिव्यां नान्यवर्षगा' इति ब्रह्माण्डे ॥ १४ ॥

प्रकाशिका– सप्तसु द्वीपेषु नवसु वर्षेष्वेतद्भारताख्यं वर्षमधिपुण्यमधिकपुण्यसाधनम् । इदमुपलक्षणमित्याशयेनात्राभिप्रेतमर्थं प्रमाणेनैवाह ॥ विशेषादिति । तथा चाधिपापमित्युपलक्षणया ग्राह्यमित्याशयः । अवतारवन्ति ऋषभाद्यावतारयुक्तानि ॥ १४ ॥

अहोऽनुवंशो यशसावदातः प्रैयव्रतो यत्र पुमान् पुराणः ।
कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १५ ॥

प्रकाशिका– अकर्महेतुं मोक्षकारणम् । धर्मं यद्यस्माच्चचार तस्मादवदात इत्यन्वयः ॥ १५ ॥

को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवाय योगी ।
यद्योगमायां स्पृहयन्त्युदस्तां महत्तमा येन कृतप्रयत्नाः ॥ १६ ॥

तात्पर्यम् – योगमायां योगमायाफलं बाह्यम् । 'नित्योदस्ता योगशक्तिरनपेक्ष्यं फलं यतः । नित्यस्वरूपभूताऽपि बहिःफलविवर्जनात् । अकर्मेत्युच्यते यद्वन्मोक्षः फलविवर्जनादि' ति पाद्मे ॥

प्रकाशिका– अपरः को नु योग्यभवाय मुक्तयेऽस्य ऋषभस्य काष्ठां योगस्थितिं मनोरथेनाप्यनुगच्छेन्न कोऽपीत्यर्थः । कुत इत्यत आह ॥ यद्योगमायेति । अत्र येन उदस्तां परित्यक्तां योगमायां योगशक्तिमिति योगशक्तेर्भगवता त्यक्तत्वमुच्यते । न हि तत्संभवति । शक्तेः स्वरूपत्वेन नित्यायास्त्यागायोगादित्याशङ्कापरिहाराय योगमायाशब्दार्थमाह ॥ योगमायामिति । फलमणिमाद्यैश्वर्यं तथा च कारणवाचकशब्देन कार्यं लक्ष्यमित्याशयः । ननु तस्यापि भगवत्स्वरूपस्य कथं त्याग इत्यत आह ॥ बाह्यमिति । तथा च स्वरूपाद्बाह्यं योगसाध्यं यदणिमादिकं तद्व्युदस्तमित्यर्थः । नन्वथाऽपि व्युदस्तेत्युक्त्या तत्प्रसक्तिः प्राप्तेत्याशङ्कां परिहरन्नुक्तार्थे प्रमाणमाह ॥ नित्येति । यद्यपि नित्य-स्वरूपभूता योगशक्तिस्तथाऽपि नित्योदस्ता नित्यमुदस्तेत्युच्यते । अनेन मूले नित्यमित्यध्याहार्यमिति सूचयति । कुत इत्यत उक्तम् । यतो यस्मात्फलमणिमादिकमनपेक्ष्यमपेक्षणीयं न भवति ।

ननु स्वरूपभूताणिमादेर्भगवदपेक्ष्यत्वात्कथमेतदित्यतोऽस्याभिप्रायमाह ॥ बहिरिति । तथा च स्वरूपभूतस्याणिमादेः फलस्यापेक्ष्यस्य सत्वेऽपि बहिः फलवर्जनाद्बाह्ययोगसाध्यफलविवर्जनादपेक्ष्य फलं नेत्युक्तमित्यर्थः । तत्र दृष्टान्तमाह ॥ अकर्मेति । यद्वद्यथा निवृत्तकर्मसाध्योऽपि मोक्षोऽकर्मेत्युच्यते फलविवर्जनात्प्रवृत्तकर्मसाध्यनश्वरफलाभावात्तथैवेत्यर्थः । अनेनाकर्महेतुमित्यत्राकर्मपदं मोक्षपर-मित्युपपादितमिति ज्ञातव्यम् ॥ ततश्चायं मूलार्थः ॥ यद्यस्मात्कृतः प्रयत्नः श्रवणादिरूपो यैस्ते तथा । अत एव महत्तमा अतिशयेन महान्तो योगिनो येन ऋषभेणोदस्तां नित्यं परित्यक्तां योगमायां स्वरूपाद्बहिर्भूतं योगशक्तिसाध्यमणिमादिकं स्पृहयन्ति तस्मात्कोऽनुगच्छेदित्यन्वयः ॥ १६ ॥

इति ह स्म सकललोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्या-श्रावयत्यवहितो भगवति तस्मिन्वासुदेवे एकान्ततो भक्तिरनयोरपि समनुवर्तते ॥१७॥

प्रकाशिका– उपसंहरन् ऋषभचरितश्रवणादेः फलमाह ।। इतीति । दुश्चरिताभिहरणं पापकर्मनाशनमुपचितयाऽनुदिनमेधमानया श्रद्धयाऽवहितः सन् अनयोरपि श्रोतृश्रावयित्रोरपि समनुवर्तते सम्यगनुवृत्ता भवतीत्यर्थः ।। १७ ।।

यस्यामेव कवय आत्मानमविरतविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया निर्वृत्या ह्यापवर्गिकमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नैवाद्रियन्ते भागवतत्वेनैव परिसमाप्तसर्वार्थाः ।। १८ ।।

तात्पर्यम् – 'नाद्रियन्ते तु ये मोक्षं पूर्वं तेषां परं सुखम् । स्वयोग्यं व्यज्यते मुक्तौ तच्चोक्तं तारतम्ययुगि'ति व्योमसंहितायाम् ।। १८ ।।

प्रकाशिका– उत्कृष्टभक्तिमतामपवर्गोऽपि न परमपुरुषार्थतयाऽऽदरणीय इत्याह ।। यस्यामेवेति । अत्रापवर्गिकं पुरुषार्थमपि नैवाद्रियन्त इति स्वयोग्ये मोक्षेऽनादर उच्यते । स किमर्थम् । न हि प्रयोजनशून्यः प्रेक्षावतां व्यापारः संभवतीत्यतस्तदनादरफलं प्रमाणेनैवाह ।। नाद्रियन्त इति । ये पूर्वन्तु पूर्वमेव साधनानुष्ठानकाल एव मोक्षं स्वयोग्यां मुक्तिं नाद्रियन्ते । तेषां परं सुखं स्वरूपसुखम् । तच्च तदपि तारतम्ययुक्तमेवोक्तं श्रुत्यादौ नैकप्रकारकमित्यर्थः ।। ततश्चायं मूलार्थः ।। यस्यां भक्तावेवात्मानं मनः स्नापयन्तः । स्नापने निमित्ततया मनोविशेषणमाह ।। अविरतेति । अविरतानि निरन्तराणि विविधानि वृजिनानि पापानि तैः संपादितो यः संसारपरितापस्तेनोपतप्यमानं तयैव भक्त्यभिव्यक्तया परमोत्कृष्टतया निर्वृत्या स्वरूपसुखेनात्यन्तिकं चरमप्रसादलभ्यमापवर्गिकं मुक्त्यवस्थानगतं परमपुरुषार्थं स्वयोग्यस्वरूपसुखानुभवं स्वयमासादितमप्रार्थितं नैवाद्रियन्ते आदरवन्तो न भवन्ति । कुत इत्यत आह ।। भागवतत्वेनेति । भगवद्भक्तत्वेनैव परिसमाप्ताः सम्यगभिव्यक्ताः सर्वार्थाः स्वयोग्यपूर्णसुखानि येषां ते तथा ।। १८ ।।

राजन्पतिर्गुरुलं भवतां यदूनां देवप्रियः कुलपतिः क्व च किङ्करो वः ।
अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ।।

तात्पर्यम् – 'ब्रह्मणोऽन्यस्य नो पूर्णां दद्याद्भक्तिं जनार्दनः । मुक्तिं ददाति सर्वेषां मुक्तानां को ह्यधीशिते'ति ब्रह्मतर्के ।। १९ ।।

प्रकाशिका– संपूर्णभक्तियोग उत्तमाधिकारिणामपि दुर्लभ इत्याह ।। राजन्निति । भवतां पाण्डवानाम् । अस्त्वेवं पतित्वादिकं तथाऽपि भजतां सर्वेषां मुक्तिं ददाति । कर्हिचित्कदाचिदपि भक्तियोगं संपूर्णभक्तिलक्षणमुपायं न कस्यापि ददाति । अत्र संपूर्णभक्तियोगं न कस्यापि

ददातीत्युक्त्या स निरधिकारिक इत्यतोऽधिकारिणं दर्शयन् श्लोकतात्पर्यं प्रमाणेनैवाह ॥ ब्रह्मणोऽन्यस्येति । तेन ब्रह्मैव तत्राधिकारीति सूचयति । ननु कुतो ब्रह्मैव तत्राधिकारीत्यत उक्तम् । उच्चानामुत्तमाधिकारिणां को ब्रह्माऽधीशिताऽधिकप्रेरको हीति ॥ १९ ॥

नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ।
लोकस्य यः करुणया भयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ २० ॥

प्रकाशिका– संक्षेपतो ऋषभावतारकृत्यमनुवदन् ऋषभं प्रणमति ॥ नित्येति । नित्यमनुभूतोऽपरोक्षीकृतो निजलाभः स्वरूपानन्दो यस्तेन निवृत्ता दूरीकृता विषयतृष्णा यस्य स तथा । अनेन स्वप्रयोजनमवतारे नास्तीति सूचयति । श्रेयसि मोक्षसाधनेऽतद्रचनया मोक्षविरुद्धकर्मणा चिरसुप्तबुद्धेरनादित आवृताज्ञानस्य लोकस्य साधुजनस्याभयं न विद्यते भयं यस्मात्तमात्मा परमात्मा लोक्यतेऽपरोक्षीकृतो येन साधनसंदर्भेण तमाख्यादाचख्यौ ॥ २० ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां षष्ठोऽध्यायः ॥ ५-६ ॥

॥ अथ सप्तमोऽध्यायः ॥

श्रीशुक उवाच–

भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय सञ्चिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ इदानीं भरतकथां वक्तुमुपाक्रमते ॥ भरतस्त्विति । तुशब्दो भरतस्येतरराजभ्यो विशेषसूचकः । तमेवाह ॥ महाभागवत इति । भगवता इति । भगवता ऋषभेण संचिन्तितः संमन्त्र्याभिषिक्तः ॥ १ ॥

तस्यामु ह वा आत्मजान् कार्त्स्न्येनानुरूपानात्मनः
पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥

प्रकाशिका– भूतादिस्तामसाहङ्कार इव भूतसूक्ष्माणीति सन्ततिवृद्धौ दृष्टान्तः ॥ २ ॥

सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति आजनाभं नामैतद्वर्षं
भारतमिति यत आरभ्य व्यपदिशन्ति ॥ ३ ॥

प्रकाशिका– अञ्जनस्याभेवाभा यस्येत्यंजनाभो ऋषभोऽजनवन्नीलत्वात्तस्येदमाञ्जनाभ इत्यर्थः ।।३।।

स हि बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः पर्यपालयत् ।। ४ ।।

ईजे च भगवन्तं यज्ञपुरुषं क्रतुभिरुच्चावचैः श्रद्धयाऽऽहिताग्निरग्निहोत्रदर्शपूर्णमास-चातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ।। ५ ।।

प्रकाशिका– यतो भारतादारभ्य बहुवित्सर्वज्ञः । आहितः प्रतिष्ठितोऽग्निर्येन स आहिताग्निः। पशुभिरेव क्रियमाणाः पशुसंज्ञाः सोमरसेनैव क्रियमाणाः सोमनामानोऽग्निहोत्रादयो द्विविधाः सकलांगविधानयुक्ताः प्रकृतयोऽतादृशाः विकृतय इति तैर्द्विविधैरपीष्टवानित्यर्थः । चत्वारो होतारो यत्र चातुर्होत्रं तद्रूपविधानेन ।। ५ ।।

सम्प्रचरत्सु नानायोगेषु विरचिताङ्गक्रियेषु अपूर्वं यत्तत्क्रियाफलं धर्माख्यं परब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयानः आत्मनैपुण्यमृदितकषायो हविष्वध्व-र्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवास्तान्पुरुषावयवेष्वध्यभावयत् ।। ६ ।।

प्रकाशिका– संप्रचरत्सु सम्यक् प्रवर्तमानेषु नानायोगेषु नानाविधोपायसाध्येषु विरचिता अनुष्ठिता अङ्गक्रिया येषां तेषु । योगेष्विति शेषः । कचिन्नानायोगेष्वित्येव पाठः । यदपूर्वं तद्वासुदेव एव भावयानो यजमानऋत्विग्द्रव्यप्रेरकं वासुदेवकर्तृकमिति चिन्तयन् । ननु यजमानादिप्रेरका देवा एव मन्त्रेषु प्रसिद्धाः । अतः कथं वासुदेवस्य कर्तृत्वमित्यत उक्तम् ।। सर्वदेवतेत्यादि । सर्वदेवताप्रकाशकलिङ्गयुक्तानां मन्त्राणामर्थभूता एव वज्रधरत्वादयस्तेषां नियामकतया साक्षान्मुख्यत एव कर्तर्यत एव परदेवतायाम् । तथा चेन्द्रादयो देवा न मुख्यकर्तार इत्याशयः । नन्वेवं यज्ञभागभाजो ये देवास्ते च पूज्यतया न चिन्तिता अतः कथं यज्ञस्य साङ्गत्वमित्यतो तेऽपि हर्यवयवाश्रितयैव चिन्तिता इत्याह ।। आत्मनैपुण्येति । आत्मनैपुण्येनोक्तानुसन्धानरूपेण स्वकौशलेन मृदिता नाशिताः कषायाः पापानि यस्य स तथा । अध्वर्युभिरिति बहुवचनं नानायज्ञाभिप्रायेण । गृह्यमाणेषु सत्सु यज्ञभाजो यज्ञांगभाजोऽवयवेष्वधिश्रिता न स्वतन्त्रा इत्यभावयदचिन्तयत् ।। ६ ।।

एवं कर्मविशुद्धिविशुद्धसत्त्वस्यान्तर्हृदय आकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषोपलक्षणैः श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुष

हृदुल्लिखितेनात्मनात्मनि पुरुषरूपेण विरोचमाने उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ॥ ७ ॥

प्रकाशिका– उक्तकर्मभिः शुद्धान्तःकरणस्य भगवति भक्तिरुपपन्नेत्याह ॥ एवमिति । एवमुक्तानुसंधानेन कर्मणां या शुद्धिस्तया शुद्धं सत्त्वमन्तःकरणं यस्य स तथा तस्योच्चैस्तरामतिशयेनोत्कृष्टा भक्तिरजायतेत्यन्वयः । कुत्रान्तर्हृदये हृदयान्तस्थे आ समन्तात्काशमाने शरीरे महापुरुषं नारायणमुपलक्षयन्तीतरव्यावृत्ततया ज्ञापयन्तीत्युपलक्षणास्तैः श्रीवत्सादिभिरुपलक्षिते इतरव्यावृत्ततया ज्ञाते निजपुरुषा भक्तास्तैर्हृदि । उल्लिखितेनोत्कृष्टतया ध्यातेनात्मना स्वरूपेणात्मनि स्वस्मिन्विद्यमानपुरुषरूपेण विरोचमाने यादृशं पुरुषरूपं भक्तैर्ध्यातं तादृशेन स्वस्मिन्विद्यमानरूपेण भासमान इत्यर्थः। अनेन तेषामुपासनं न मिथ्योपासनमित्युक्तं भवति । कथंभूता भक्तिः । अनुदिनमेधमानो वर्धमानो रयो वेगो यस्याः सा तथा ॥ ७ ॥

एवं वर्षायुतसहस्रपर्यन्तावसानावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसम्पन्निकेतात्स्वनिकेतनात्पुलहाश्रमं प्रवव्राज । यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन सन्निधाप्यते इच्छारूपेण ॥ ८ ॥

प्रकाशिका– इदानीं तस्य वैराग्येणारण्यगमनप्रकारमाह ॥ एवमिति । वर्षाणामयुतं तेषां सहस्रं तत्पर्यन्तं तदवसानकाले अवसितो निश्चितः कर्मनिर्वाणावसरो राज्यभोगकरः प्रारब्धनाशो येन स तथा। अधिकृत्य भुज्यमानं रिक्थं राज्याख्यं धनम् । सकलसंपन्निकेतात्सकलसमृद्ध्याश्रयान्निकेतनाद्गृहात्पुलहाश्रमं सालग्रामक्षेत्रम् । वात्सल्येन कर्तृभूतेन संन्निधाप्यते सन्निहितः क्रियते । केन रूपेणेत्यपेक्षायामाह ॥ इच्छारूपेणेति । भक्तानामपेक्षितेन रूपेणेत्यर्थः ॥ ८ ॥

यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदीनाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥ ९ ॥

तस्मिन्वाव किल स एकः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपहृतोपशमः परां निर्वृतिमवाप ॥ १० ॥

प्रकाशिका– यत्राश्रमे आश्रमपदान्याश्रमस्थानान्युभयत उपर्यधश्च नाभयोंऽतःस्थितचक्रनिरीक्षणद्वारोत्पत्तिस्थानानि येषां तैर्दृषच्चक्रैः शिलासमूहैश्चक्रनदी गण्डकीनाम प्रसिद्धा

तस्मिन्नाश्रमोपवने परां निर्वृतिमापेत्यन्वयः । एक एकल आराधनं समीहमानः कुर्वाणो विविक्तदेशे उपहृतः संपादित उपशमो भगवन्निष्ठा यस्य स तथा ॥ १० ॥

तथैवमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभारहृतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलकः औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयनोऽभिरेमे । एवं निजरमणारुणचरणारविन्दानुध्यानेनोपचितभक्तियोगपरिप्लुतपरमाह्लादगभीरहृदयावगाढधिषणस्तां विक्रियमाणां भगवत्सपर्यां न सस्मार ॥११॥

प्रकाशिका– प्रवृद्धमानानुरागभारेण हृतमपहृतं हृदयशैथिल्यं मनश्चाञ्चल्यं यस्य स तथा । आत्मनि देहे उद्भिद्यमानानां रोमपुलकानां रोमांकुराणां कुलं समूहो यस्य स उद्भिद्यमानरोमपुलकुलकः । कप्रत्ययः समासान्तः । औत्कण्ठया प्रवृत्तेन प्रणयबाष्पेणानन्दाश्रुणा निरुद्धोऽवलोको ययोस्ते नयने यस्य स तथा । निजरमणस्य स्वप्रीतिदातुर्येऽरुणे चरणारविन्दे तयोरनुध्यानेनोपचितः समृद्धो यो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परमाल्हादो यस्य स चासौ गंभीरहृदयावगाढधिषणश्च गंभीरहृदये विष्णाववगाढा मग्ना धिषणा बुद्धिर्यस्य स तथा ॥ ११ ॥

इत्थं धृतभगवद्व्रत ऐणाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्य इव भगवन्तं हिरण्मयं पुरुषं ददर्श सूर्यमण्डलेऽप्युपतिष्ठन्नेतदुहोवाच ॥ १२ ॥

प्रकाशिका– धृतानि भगवद्व्रतानि येन सः । ऐणाजिनवाससा कृष्णाजिनाख्यवस्त्रेणानुसवनाभिषेकेन त्रिषवणस्नानेनार्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन च सूर्य इव विरोचमानः । सूर्यमण्डलेऽपीत्यपिशब्दो हृदयसमुच्चयार्थः । एतद्वक्ष्यमाणमेव ॥ १२ ॥

परो रजाः सवितर्जातवेदो वेदस्य गर्भो मनसेदं जजान ।
स्वरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणामृषभं सङ्गृणीमः ॥ १३ ॥

तात्पर्यम् – 'परोरजाऽरजस्कत्वात्त्रयीड्यत्वात्त्रयीसुतः । गुणात्ययात्तुरीयश्च जातवेदाश्च सर्ववित् । हंसो दुःखादिहानेन जीवेशत्वाच्च गृध्रराट् । कालः सर्वनियन्तृत्वात्परमात्मा प्रकीर्तित' इति तन्त्रनिरुक्ते ॥ १३ ॥

प्रकाशिका– मन्त्रार्थसंग्राहकं पद्यम् ॥ परोरजा इति । इदं दुर्गमार्थत्वात्प्रमाणेनैव विवृणोति ॥ परोरजा इति । अरजस्कत्वान्निर्दोषत्वात् अरजस्कत्वादिति च्छेदः छान्दसत्वेनोपपन्न इति ध्येयम् ।

वेदस्य गर्भ इत्यस्य तात्पर्यम् ॥ त्रयीड्यत्वादिति । वेदतात्पर्यविषयत्वादित्यर्थः । सुतो गर्भो गुणात्ययाद्गुणत्रय संबन्धशून्यत्वादित्यर्थः । तुरीय इत्यन्यत्र विद्यमानं तुरीयशब्दार्थकथनम् । सर्वं वेत्तीति सर्ववित् । अनेन जातं विद्यमानं सर्वं वेत्तीति जातवेदा इति निरुक्तिः सूचितेति ज्ञातव्यम् । अनेन जातवेद इत्येतदुक्तार्थम् ॥ दुःखादिहानेनेति । हानेनेत्यर्थः । आदिशब्देनेतरेषां दोषाणां ग्रहणम् । तथा च भक्तदोषहंतृत्वेन हंस इत्युच्यते इत्यर्थः । यद्वा हानेन परित्यागेनेत्यर्थः । तदाऽरजस्कत्वादित्यस्य रजोगुणशून्यत्वादित्यर्थः । अतो न पौनरुक्तिशङ्केति ध्येयम् ॥ जीवेशत्वादिति । अनेन गृध्रशब्दो विषयाकांक्षिजीवपरो राट्शब्द ईशवाचीत्युक्तं भवति । अनेन गृध्राणामृषभ इत्येतदुक्ततात्पर्यम् । काल इत्यन्यत्र विद्यमानकालशब्दव्याख्यानम् ॥ ततश्चायं मूलार्थः ॥ परोरजा रजसो रजोगुणाद्दोषाद्वा परो विदूर इत्यर्थः । हे सवितः जगत्प्रसवितः जातं सर्वं विद्यमानं वेत्तीति जातवेदास्तत्संबुद्धिः जातवेदः हे सर्वज्ञ वेदस्य वेदानां गर्भो गर्भ इवांतस्थस्तात्पर्यविषय इत्यर्थः । जगत्प्रसवितृत्वं न क्लेशेनेत्याह । मनसेति । इच्छामात्रेणेत्यर्थः । इदं ब्रह्मादिकं जगत्स्वरेतसा जजानोत्पादितवान् । अदो जगत्पुनरुत्पत्त्यनन्तरमाविश्य चष्टे पालयतीत्यर्थः । हंसं भक्तदोषहंतारं निर्दोषं वा गृध्राणां विषयाकांक्षावतां जीवानामीशं ऋषभं सङ्गृणीमः स्तुमः । हे सवितर्जातवेदः यः परोरज इत्यादिविशेषणविशिष्टः त्वं तं हंसं गृध्राणामृषभं त्वां गृणीम इति योज्यम् ॥ १३ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां सप्तमोऽध्यायः ॥ ५-७ ॥

॥ अथ अष्टमोऽध्यायः ॥

श्रीशुक उवाच–

एकदा तु महानद्यां कृताभिषेकनैगमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकान्त उपविवेश । तत्र तदा राजन्हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम । तया पेपीयमाने उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकत्रयभयङ्कर उदपतत् ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ सर्वथा हरेरन्यत्र कृपयाऽपि संगोऽनर्थकरो योगिन इति सूचयितुं भरतस्यैणशावसंगेन जातमनर्थं वक्तुमुपक्रमते ॥ एकदा त्विति । अभिषेकः स्नानम् । नैगमिकानि वेदविहितानि च तान्यावश्यकानि नित्यनैमित्तिकानि कर्माणि कृतान्यभिषेकादीनि येन स तथा । अक्षरं देहनाशशून्यं ब्रह्माभिगृणानो गायत्र्यादिमन्त्रैः संस्तुवन्नुदकान्ते नदीतीरे जलाशयाभ्याशं नदीह्रदसमीपं पेपीयमानेऽत्यासक्त्या पीयमाने सति तावत्तदाऽविदूरेण समीपेन मृगपतेः सिंहस्य ॥ १ ॥

तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषातिभयात्सहसोच्चक्राम ॥ २ ॥

प्रकाशिका– प्रकृत्या स्वभावेनैव विक्लवा व्याकुलाऽत एव चकितं भयग्रस्तं निरीक्षणं अवलोकनं यस्याः सा तथा । चलितावलोकनेति पाठे चञ्चलनिरीक्षणेत्यर्थः । सुतरां हरिभयाऽभिनिवेशः सिंहकृतभयोद्वेगस्तेन व्यग्रं व्याकुलं हृदयं यस्याः सा तथा । अत एव पारिप्लवदृष्टिरस्थिरनेत्रा । न गता तृट् यस्याः सा तथा । अगततृषा टाबन्तः । उच्चक्राम नदीपरतीरमुत्पपात ॥ २ ॥

तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिगतो गर्भः स्रोतसि निपपात। तत्प्रसवणोत्सर्पणभयखेदातुरा स्वगणैर्वियुज्यमाना कस्याञ्चिद्दर्यां कृष्णसारसती निपपात चाथ ममार ॥ ३ ॥

प्रकाशिका– अन्तर्वत्न्या गर्भिण्या उरुणा भयेन विगलितः स्थानाच्चलितो योनिगतो निर्गतः । योनिनिर्गत इत्येव क्वचित्पाठः । स्रोतसि प्रवाहे तत्प्रस्रवणं गर्भपतनमुत्सर्पणमुत्पतनं सिंहभयं खेदश्चैतैरातुरा पीडिता दर्यां गिरिगुहायां कृष्णसारसती कृष्णसाराख्यमृगप्रिया ॥ ३ ॥

तं त्वेणकुणकं कृपणं स्रोतसा चोह्यमानमभिवीक्ष्यापविद्धबन्धुं बन्धुरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमेणमाश्रमपदमानयत् ॥ ४ ॥

प्रकाशिका– एणकुणकं हरिणबालकमपविद्धबन्धुं त्यक्तबन्धुजनप्रियम् । मृता माता यस्य स तथा तम् ॥ ५ ॥

तस्य हवा कुणक उच्चैस्तरां तस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोषणपालनप्रीणनलालनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ५ ॥

प्रकाशिका– कृतो निजः स्वीय इत्यभिमानो येन पोषणं तृणादिदानेन पालनं वृकादिभ्यो रक्षणं प्रीणनं कंडूयनादिना लालनमंकारोपणादिना । एतैर्यदनुध्यानमासक्तिस्तेनात्मना स्वस्य नियमाः स्नानादयो यमा अहिंसादयस्तत्सहिताः पुरुषपरिचर्यादयश्चेश्वरपूजादयश्च प्रत्यहमेकैकशो वियुज्यमानाः संत उदवसन्नुत्सन्ना बभूवुः ॥ ५ ॥

अथेदमाह अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातृपितृभ्रातृज्ञातिभ्योऽधिकं

गोपायनं मन्यमानो नान्यं कञ्चन वेद मय्येवातिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमप्यनसूयेनानुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ६ ॥

प्रकाशिका– तत्रैव तादृशासक्तौ निमित्तमाह ॥ अहो इत्यादिना । ईश्वररथचरणस्य कालचक्रस्य परिभ्रमणरयेन गमनागमनवेगेन मा मां गोपायनं गोप्तारं रक्षितारं शरण्यम् । प्राप्तस्योपेक्षायां दोषो भवतीति विदुषा ॥ ६ ॥

नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थान् गुरुतरानुपेक्षन्ते ॥ ७ ॥

इति कृतानुषङ्ग आसनस्नानाशनशयनाटनस्थानादिषु सहमृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ८ ॥

प्रकाशिका– नन्वेवं भगवत उपासनारूपस्वार्थभङ्गमित्यत आह ॥ नूनमिति । इत्येवं बुद्ध्या कृतानुषंग आसक्तिर्येन । मृगजहुना मृगबालकेन ॥ ८ ॥

कुसुमकुशसमित्पलाशफलमूलोदकादीन्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशङ्कमानः सह हरिणकुणकेन वनमाविशति ॥ ९ ॥

पथि पथि च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभारहृदयः कार्पण्यात् स्कन्धेनोद्वहति एवमुत्सङ्गे उरसि चावधायोपलालयन् परमामवाप मुदम् ॥ १० ॥

क्रियायां निर्वर्त्यमानायामन्तराल उत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मै ह्याशिष आशास्ते स्वस्ति स्याद्वत्स ते सर्वत इति ॥ ११ ॥

प्रकाशिका– वर्षपतिर्भरतखण्डनाथः । प्रकृतिस्थेन स्वभावस्थेन ॥ ११ ॥

अन्यदा तु भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतिरतितर्षेण हरिणकुणकविरहविह्वलहृदयसन्तापस्तमनुशोचन् किल कश्मलं महदभिरम्भित इति होवाच ॥ १२ ॥

प्रकाशिका– अन्यदाऽदर्शनेऽतितर्षेणात्युत्कण्ठया कश्मलं विषादमभिरंभितः प्रापितः सन् ॥१२॥

अपि बत स वै कृपणैणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकितवमतेर-कृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् स्वजन इवागमिष्यति ॥१३॥

प्रकाशिका– अपिः संभावनायां बतेति खेदे । अहो इत्यनुकंपायाम् । शठस्येव कितवा वंचनपरा मतिर्यस्यात्मप्रत्ययेन ममायं पोषक इति बुद्ध्या । तन्मदीयानार्यत्वादिकं स्वजनः पुत्र इव ॥ १३ ॥

अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि ॥ १४ ॥

प्रकाशिका– क्षेमेण सुखेन । शष्पाणि कोमलतृणानि ॥ १४ ॥

अपि न वृकः सालावृकोऽन्यतमो वा नैकचरो जक्षयति ॥ १५ ॥

प्रकाशिका– नैकचरो यूथचरः सूकरादिरष्टपान्मृगविशेषो वा न जक्षति । अपि किम् ॥ १५ ॥

निम्लोचति भगवान्सकलजगत्क्षेमोदयः सूर्यात्माद्यापि न मम मृगवधून्यास आगच्छति ॥ १६ ॥

प्रकाशिका– निम्लोचत्यस्तं गच्छति । जगतः क्षेमो यस्मात्स उदयो यस्य त्रय्यात्मवेदप्रतिपाद्यः सूर्यो मृगवधून्यासो मृगीनिक्षेपलक्षणोऽर्थः ॥ १६ ॥

अपिस्विदकृतसुकृतं मामागत्य सुखयिष्यति । हरिणराजकुमारो विविधरुचिर-दर्शनीयनिजमृगदारकविनोदैरसन्तोषं स्वानामपनुदत् ॥ १७ ॥

प्रकाशिका– अपिस्वित्किंस्वित् । हरिणराजस्य हरिणश्रेष्ठस्य कुमार आगत्य सुखयिष्यतीत्यन्वयः। किं कुर्वन् । विविधा रुचिरा दर्शनीयाश्च निजाः स्वजातिप्रयुक्ताश्च मृगदारकाणां मृगबालकानां ये विनोदा लीलाविशेषाः । तैः ॥ १७ ॥

क्ष्वेलिकया मां मुधा समाधिना मीलितदृशं प्रेमसंरम्भेण चकितमागत्य पृषत् अपरुषविषाणाग्रेण लुठति ॥ १८ ॥

प्रकाशिका– क्ष्वेलिकया नादविशेषक्रियया । प्रेमसंरंभेण प्रणयकोपेन । चकितं सभयम् । पृषत्कृष्णमृगो यद्वा पृषज्जलबिन्दुस्तद्वदपरुषेण मृदुना विषाग्रेण लुठति संघट्टयति ॥ १८ ॥

आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरभस ऋषि-कुमारवदवहितकरणकलाप आस्ते ॥ १९ ॥

प्रकाशिका– आसादितमवरोपितं हविर्यस्मिंस्तस्मिन् बर्हिषि दर्भसमूहे । भक्षणादिना दूषिते सत्युपालब्धो भर्त्सित उपरतरभसः शान्तोत्साहोऽत एवावहितकरणकलापः संवृतेन्द्रियसमूहो निश्चल इति यावत् ॥ १९ ॥

किं वा अरे आचरितं तपस्तपस्विन्यानया यदियमवनिः सविनयकृष्णसारतनय-तनुतरसुभगशिवतमखरखुरपदपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥

प्रकाशिका– एवं बहुधा प्रलप्योत्थाय बर्हिर्गत्वा तत्पदपङ्क्तिमुपलभ्याह ॥ किं वेति । अनया भूम्या किं वा तप आचरितम् । यद्यस्मादियं भूमिः सविनयस्य कृष्णसारतनयस्य तनुतरा अतिशयेन सूक्ष्माः सुंदराश्चात एव शिवतमा अतिशयेन मङ्गलरूपाश्च खुरा येषु तेषां पदानां लक्षणतया तन्निक्षेपचिन्हानां पङ्क्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयन्ती सती आत्मानं स्वात्मानं ताभिः कृतकौतुकं कृतपावित्र्यं देवा इज्यन्तेऽस्मिन्निति देवयजनं यज्ञभूमिं करोति । यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति स्मृतेः ॥ २० ॥

अपिस्विदसौ भगवानुडुप एनं मृगपतिभयान्मृतमातरं मम मृगबालकं स्वाश्रम-परिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपालयति ॥ २१ ॥

प्रकाशिका– अधुना चन्द्रोदयेऽप्यनागतं दृष्ट्वा भ्रान्तस्य प्रलापप्रकारमाह ॥ अपिस्विदिति ॥२१॥

एष ते हरिणकुणकोपनिधिर्मया गुप्त इति । किं वा आत्मजविश्लेषज्वरदावदहन-शिखाभिरुपतप्यमानहृदयस्थलनलिनं मामुपसृतमृगीतनयः शिशिरशान्तानुराग-गुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयति ॥ २२ ॥

प्रकाशिका– रक्षित्वा च मह्यं प्रयच्छत्यापिस्विदित्याह ॥ एष इति । उपनिधिर्निक्षेप इत्युक्त्वा दास्यत्यपिस्विदिति शेषः । पुनः प्रलापान्तरमाह ॥ किं वा इति । मामुपसृतः प्राप्तो मृगीतनयः । मामुपसृत्येत्यपि क्वचित्पाठः । स्वधयति सुखयति । कैः शिशिरं हिमं तद्वत् शान्तानि शीतलानि मय्यनुरागेण गुणितान्यावर्तितानि पुनः पुनः स्रवन्ति निजवदनसलिलानि तान्येवामृत-गभस्तयश्चन्द्ररश्मयस्तैः । कथंभूतं माम् । आत्मजवदात्मजो मृगीतनयस्तस्य विश्लेषनिमित्तो यो ज्वरः संतापः स एव दावदहनो वनवन्हिस्तस्य शिखाभिरुपतप्यमानहृदयलक्षणं स्थलनलिनं यस्य स तथा । तं स्थलपद्मं सन्तापं सोढुं क्षममिति सूचनाय स्थलेत्युक्तम् । इति चोवाचेत्यन्वयः ॥ २२ ॥

इति चैवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणके आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक् परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥ २३ ॥

प्रकाशिका– ज्ञानिनः कथमेतादृश्यासक्तिरित्याशङ्कां परिहरन्नासक्तिफलमाह ॥ एवमिति । अनेन प्रकारेण मनुष्यस्य अघटमानो मृगे मनोरथः स्नेहस्तेनाकुलं हृदयं यस्य मृगदारकाभासेन मृगदारकवदवभासमानेन स्वप्रारब्धकर्मणा मृगदारकप्रापकप्रारब्धकर्मणेति यावत् । योगतापसो भरतो भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः परिमोचितः । इतरथा प्रारब्धकर्माभावे जात्यन्तरेऽमनुष्ये साक्षादासङ्गः पुत्रवदासक्तिर्निःश्रेयसस्य प्रतिपक्षतया विघ्नरूपत्वेन हेतुना पूर्वपरित्यक्ता दुस्त्यजा त्यक्तुमशक्या हृदयाभिजाताः औरसाः पुत्रा येन स तथा । तस्यान्तरायेन विघ्नेन विहतं योगारंभणं ध्यानोपक्रमो यस्य स तथा । तस्य पोषणादिषु सुतानुषङ्गेन स्नेहविशेषेणात्मानं हरिं स्वं वाऽविगणयतोऽविचिंतयतः करालरभसः क्रूरवेगः कालो मरणसमयस्तावत्तदानीमेवापद्यत ॥ २३ ॥

तदानीमपि पार्श्ववर्तिनमात्मजं बन्धुमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरमनुस्मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥ २४ ॥

प्रकाशिका– इमं लोकं भूलोकं मृगेण सह वर्तमानं कलेवरं शरीरं च विसृज्यानुस्मृतजन्मानुस्मृतिरनुस्मृतं जन्म पूर्वं जन्म तदनुविद्यमानस्यार्थस्यापि स्मृतिर्यस्य स तथा । इतरवदज्ञानिवत् ॥ २४ ॥

तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्यभृशमनुतप्यमान आह ॥ २५ ॥

प्रकाशिका– समीहा सम्यगनुष्ठानयत्नः इच्छा वा तदनुभावः सामर्थ्यं तेन । आह स्वचित्ते ॥ २५ ॥

अहो कष्टं भ्रष्टोऽहमात्मवत्तानुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवतः आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमनन

सङ्कीर्तनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कात्स्न्र्येन मनस्तत्तु पुनर्ममाबुधस्य रागान्मृगसुतमनुपरिसुस्राव ॥ २६ ॥

प्रकाशिका– किं कष्टमित्यपेक्षायां तदाह ॥ भ्रष्टोऽहमिति । आत्मा परमात्मा ज्ञेयतया येषामस्तीत्यात्मवन्तो ज्ञानिनस्तेषां भावो ध्यानादिरूप आत्मवत्ता तामनुसृत्य विद्यमानो यः पंथास्तस्माद् भ्रष्टः । कुत इत्यतोऽत्र हेतुमाह ॥ यदित्यादिना । यद्यस्माद्विविक्तं पुण्यकरमरण्यं शरणं यस्यात्मवतो वशीकृतमनसः । आत्मन्यन्तर्यामिणि वासुदेवे कात्स्न्र्येन समग्रांगेन समावेशितम् । निश्चलं यन्मम मनस्तत्पुनरबुधस्य मम रागान्मृगसुतमनुसुस्रावानुद्रुतमभूत् । तस्मात् । वासुदेवे किं कदाचिदेव समावेशितं नेत्याह । अशून्या अविनाशभूताः सकला यामा यस्मिंस्तेन कालेनेति । केनाशून्या इत्यपेक्षायामुक्तम् ॥ तदनुश्रवणेति । तस्य वासुदेवस्यानुश्रवणादावभियोग आग्रहस्तेनेत्यर्थः ॥ २६ ॥

एवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥ २७ ॥

प्रकाशिका– निगूढनिर्वेदो दृढतरवैराग्यः शालग्रामत्वात् शालग्रामाख्यम् । कालंजराद्यस्मिन्स्वयं मृगो जातस्तस्मात्पर्वतादात्मैव सहचरो यस्य । एकाकीत्यर्थः ॥ २७ ॥

तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृण-वीरुधा वर्त्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ २८ ॥

प्रकाशिका– शुष्केणैव पर्णादिना वर्तमानः शरीरयात्रां कुर्वन् । मृगत्वनिमित्तप्रारब्धपापं तस्यावसानं नाशो यस्मिंस्तं कालं गणयंश्चिन्तयन् संख्यां कुर्वन्निति वा । तीर्थोदकेन क्लिन्नमार्द्रमित्यर्थः॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायामष्टमोऽध्यायः ॥ ५-८ ॥

॥ अथ नवमोऽध्यायः ॥

श्रीशुक उवाच–

अथ कस्यचिद् द्विजवरस्याङ्गिरसप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सौदर्या अङ्गजा बभूवुः मिथुनं च यवीयस्यां भार्यायाम् ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ अथ भरतस्य कथान्तरमारभ्यत इत्यर्थः । आङ्गिरस प्रवरस्याङ्गिरसगोत्रोत्पन्नानां श्रेष्ठस्य । त्यागो द्रव्यादिदानं सन्तोषोऽलंबुद्धिः । विद्याकर्मादिज्ञानमात्मज्ञानं परमात्मज्ञानमैतैर्य आनन्दस्तेन युक्तस्यात्मनः स्वगुणानां सदृशाः श्रुतादिगुणा येषां ते तथा सौदर्याः समानोदरा अङ्गजाः पुत्राः । यवीयस्यां कनिष्ठायां मिथुनं स्त्रीपुरुषरूपयुग्मम् ॥ १ ॥

यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥

तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणेन चरणारविन्दयुगलं मनसा विदधतः आत्मनः प्रतिघातमाशंसमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडबधिररूपेण दर्शयामास लोकस्य ॥ ३ ॥

प्रकाशिका– उत्सृष्टं मृगशरीरं येन तम् ॥ तत्रापि विप्रजन्मन्यपि । उद्विजमानो योगमार्गाद्भ्रष्टो भविष्यामीति बिभ्यत् । लोकस्यात्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः । कथंभूतः । भगवतश्चरणारविन्दयुगलं मनसा विदधतो ध्यायत आत्मनः स्वस्य प्रतिघातं विघ्नमाशङ्कमाशंसमानः शंकमानः । स्तत्रापि हेतुः अनुस्मृता स्वीयपूर्वजन्मनामावलिर्येन स तथा । कीदृशेन मनसा । कर्मबन्धविध्वंसनानि श्रवणादीनि यस्य तत्तथा तेन गुणविवरणं व्याख्यानम् ॥ २,३ ॥

तस्यापि हवात्मजस्य स विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन् कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेत्यसदाग्रहः ॥ ४ ॥

प्रकाशिका– स विप्रः पिता तस्यापि जडवत्स्थितस्यापि पुत्रस्नेहेनानुबद्धं मनो यस्य । जडस्य विवाहासंभवादासमावर्तनात्समावर्तनपर्यन्तं विद्यमानान् संस्कारान् यथोपदेशं विधिमनतिक्रम्य विदधान

उपनीयोपनीतस्य चानभिप्रेतांस्ताननभीष्टानपि समशिक्षयत् । अनभिप्रेतशिक्षणे हेतुः ॥ पितुः सकाशादनुशिष्टेनेति ॥ ४ ॥

स चापि तदुह पितृसन्निधावेव सध्रीचिनमिव करोति । छन्दांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान्मासानधीयमानमप्यसमवेतरूपं ग्राहयामास ॥ ५ ॥

प्रकाशिका– सध्रीचीनमिव समीचीनमिव । मनसस्तत्राभिनिवेशाभावेनासमीचीनतासूचनायेवशब्दः। सर्वदा हरावेवाभिनिवेशितचित्तत्वान्मत्तादिवत्प्रवर्तमानस्य बाह्यकर्मलोपो न दोषावह इति ज्ञातव्यम् । उपाकरणवेदव्रताद्यनन्तरं श्रावणादिमासेषु छन्दांसि वेदानध्यापयिष्यन् आदौ तावद्व्याहृतिभिः सह प्रणवलक्षणशिरसा सहिता त्रिपदी सप्रणवशिरस्त्रिपदी तां ग्रैष्मवासन्तिकान् मासान् चैत्रादिचतुरो मासान् अधीयमानमप्यसमवेतरूपमसंबद्धस्वरवर्णाद्यपेतं यथा भवति तथा ग्राहयामास । तावता कालेन स्वरवर्णादियुक्तं व्याहृत्यादिकं तेन सम्यङ्नोच्चारितमित्यर्थः । उन्मत्तवदन्यमनस्कत्वादित्याशयः ॥ ५ ॥

एवं स्वतनुजे आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणकानि कर्माण्यतदभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशशास । पिता स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृहे प्रमत्त उपसंहृतः ॥ ६ ॥

प्रकाशिका– आत्मा वै पुत्रनामासीदिति श्रुतेरात्मनि स्वात्मभूते स्वतनुजे स्वपुत्रेऽनुरागेणावेशितं चित्तं यस्य स तथा । औपकुर्वाणकान्युपकुर्वाणयोग्यान्युपकुर्वाणो गृहाश्रमाकांक्षी अतदभियुक्तानि तदनपेक्षितान्यनधिगतमनोरथोऽप्राप्तपुत्रपाण्डित्यरूपमनोरथः । उपसंहृतो मृतः । उपसंवृत इति पाठे विनाशित इत्यर्थः ॥ ६ ॥

अथ यवीयसी द्विजसती स्वगर्भजातमिथुनं सपत्न्यामुपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् । पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातरमनुशासननिर्बन्धान्न्यवृत्सन्त ॥ ७ ॥

प्रकाशिका– अनुसंस्थयाऽनुमरणेन । त्रय्यां विद्यायां कर्मप्रतिपादकायां पर्यवसितमतयः कर्मसाध्यस्वर्गाद्यपेक्षयाऽन्यदुत्तमं श्रेयो नास्तीति बुद्धयोऽनुशासननिर्बन्धाच्छिक्षालक्षणगृहान्न्यवृत्संत निवर्तितुमैच्छन्निवर्ता इत्यर्थः ॥ ७ ॥

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च स कार्यमाणः परेच्छया करोति । विष्टितो वेतनतो वा याञ्चया यदृच्छया चोपसादितमल्पं बहु मृष्टं कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम् ॥ ८ ॥

प्रकाशिका– प्राकृतैरित्युक्तमेव विवृणोति ॥ द्विपदपशुभिरिति । चतुष्पदस्यपशोर्द्विपदत्वमेव विशेषो न तु कृतित इति भावः । तादृशैर्मनुष्यैर्यदा ह्युन्मत्तजडेत्यादिनामभिरभिभाष्यमाणो भवति तदा तदनुरूपाण्युन्मत्तादिवचनानुकूलवचनानि भाष्यते । मौल्यमन्तरा बलाद्यत्कर्म कार्यते सा विष्टिर्वेतनतो मौल्येन कर्मानुकूलद्रव्यक्लृप्तेत्यर्थः । अभ्यवहरति भुंक्ते । परं केवलम् ॥ ८ ॥

नित्यनिवृत्तदुःखस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगतः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसम्भावितदेहाभिमानः ॥ ९ ॥

प्रकाशिका– अत्र हेतुगर्भविशेषणद्वयमाह ॥ नित्येति । नित्यनिवृत्तदुःखादिरूपो यः स्वात्मा स्वतन्त्रः परमात्मा स्वस्वरूपं वा । तस्य लाभोऽनुभवस्तस्याधिगमः प्राप्तिर्यस्य स तथा । द्वन्द्वानि मानादीनि तान्येव निमित्तानि ययोस्ते तथा तयोः सुखदुःखयोरसंभावितोऽनुत्पादितो देहाभिमानो येन स तथा । अत एव शीतादिष्वनावृताङ्गो विचचारेत्यन्वयः ॥ ९ ॥

शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनानुन्मज्जनेन रजसा महामणिरिवानभिव्यक्तब्रह्मवर्चाः कर्पटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽज्ञजनावगतो विचचार ॥ १० ॥

प्रकाशिका– पीनः पुष्टः । संहननानि दृढान्यङ्गानि यस्य स तथा । स्थण्डिलसंवेशनमुपलिप्तभूमौ शयनमनुन्मर्दनं देहमर्दनाभावोऽनुन्मज्जनं स्नानाभावस्तैर्यद्रजस्तेन कर्पटेन जीर्णवस्त्रखण्डेनावृता कटिर्यस्योरुमषिणाऽतिमलिनेनोपवीतेन निमित्तेन ॥ १० ॥

यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति । किन्तु न समं विषमन्यूनमधिकमिति वेद । कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदारोचयति ॥ ११ ॥

प्रकाशिका– यदा तु परतः परेभ्यः कर्मवेतनतः कर्ममौल्येनाहारमीहमानोऽपेक्षमाणो भवति । तदा केदारकर्मणि शालीक्षेत्रसंरक्षणादिरूपे कर्मणि । आहारप्रलोभेन भ्रातृभिर्निरूपितो नियुक्तः सन् । तदपि तत्कर्मापि । किं त्वस्य कर्मण इदं मौल्यं सममिदं अधिकमिदं न्यूनमिति न वेद । कणाश्चूर्णतण्डुलाः

पिण्याकं नीरसतिलपिष्टं फलीकरणं तण्डुलतुषः कुल्माषाः कुत्सिताः कीटग्रस्तमाषाः स्थालीपुरीषं स्थालीलग्नदग्धान्नम् । आदिशब्दाद्यावनालादीन्यारोचयति मधुरीकरोति ॥ ११ ॥

अथ कदाचिद् वृषलीपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥ १२ ॥

प्रकाशिका– एवं रागराहित्यरूपं तस्य माहात्म्यमुक्त्वेदानीं मरणे प्राप्तेऽप्यसंभ्रमरूपं माहात्म्यं वक्तुमुपक्रमते ॥ अथेति । अथ माहात्म्यन्तरमारभ्यत इत्यर्थः । वृषलीपतिः शूद्रश्चासौ पती राजा च कश्चिच्छूद्रराजेत्यर्थः । आलभत लब्धुं प्रवृत्तः ॥ १२ ॥

तस्य ह दैवविमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसावृतायामनधिगतपशव आकस्मिकेन विधिना केदारान्वीरासनेन मृगवराहादिभ्यः संरक्ष्यमाणमाङ्गिरसप्रवरसुतमपश्यन् ॥ १३ ॥

प्रकाशिका– दैवात्तददृष्टप्रेरकेश्वरात् । तद्विमुक्तस्य बन्धनाद्विमुक्तस्य पशोः पदवीं मार्गम् । तमसाऽऽवृतायां व्याप्तायां तत्रापि निशीथे समयेऽर्धरात्रावसानेऽनधिगतपशवोऽप्राप्तस्वसंकल्पित-पुरुषलक्षणपशवो वीरासनेन स्थित्वा केदारान् शालिक्षेत्राणि संरक्ष्यमाणं पालयन्तम् । हरिणा पाल्यमानमिति चार्थः । आकस्मिको हरीच्छाधीनो विधिः प्रकारस्तेनापश्यन् ॥ १३ ॥

अथ त एनमनवद्यलक्षणमवमृश्य तेन भर्तुः कर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥ १४ ॥

प्रकाशिका– अथ दर्शनानन्तरमेनं द्विजकुमारं रशनया पाशेन बद्ध्वा ॥ १४ ॥

अथ पणयस्तं स्वविधिनाभिषिच्याहतेन वाससाऽऽच्छाद्य भूषणानुलेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च तं पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ १५ ॥

प्रकाशिका– पणयः शूद्राश्चोरा वा । स्वविधिना स्वागमोक्तप्रकारेणाहतेन छिन्नेन । आहतेनेति छेदे धौतेनेत्यर्थः । उपस्कृतमलंकृतम् । किसलयः पल्लवोंऽकुरो यवाद्यंकुरो वैशससंस्थया हिंसाविधानेन गीतादिघोषेण च सह ॥ १५ ॥

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालं निशितमुपाददे ॥ १६ ॥

प्रकाशिका– वृषलराजपणिर्वृषलराजलक्षणश्चोरोऽसृगासवेन रक्तलक्षणेनासुतृप्तिकरद्रव्येण । तदभिमन्त्रितं तस्या भद्रकाल्या मन्त्रेणाभिमन्त्रितं जप्तमसिं खड्गम् ।। १६ ।।

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजसोत्सिक्तमनसां भगवत्कलाङ्गिरसकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यनभिमतस्यालम्भनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाल सैव देवी भद्रकाली ।। १७ ।।

प्रकाशिका– धनमदेनजातं रजोरागस्तेनोत्सिक्तं त्यक्तमर्यादं मनो येषां ते तथा । भगवतः कला यस्मिन् तदांगिरसकुलं कदर्थीकृत्य तुच्छीकृत्य स्वैरं यथेच्छमुत्पथेन विहरतां वृषलानां यद्ब्रह्मर्षिसुतस्यालंभनं हिंसनं तद्रूपं कर्म तदुपलभ्य देवी भद्रकाल्युच्चचाल प्रतिमां त्यक्त्वा बहिर्निर्गतेत्यन्वयः । कथंभूतस्य ब्रह्मर्षिसुतस्य । सूनायां हिंसायामनभिमतस्यापि देवानामनभिप्रेतस्यापि । ब्राह्मणहिंसा कस्या अपि देवताया नाभिमतेत्याशयः । पुनः कथंभूतस्य ब्रह्मभूतस्य । ब्रह्मणि स्वमनसा स्थितस्य । कथंभूता देवी । दुर्विषहेन सोढुमशक्येन ब्रह्मतेजसा विप्रकुमारगतहरिसामर्थ्येन दह्यमानेन वपुषा निमित्तेनोच्चचालेति वा । या यष्टुमाकांक्षिता सैवेत्येवकारार्थः ।। १७ ।।

भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं सहाट्टहासमतिसंरम्भेण विमुञ्चती तत उत्पत्त्य पापीयसां दुर्भावानां तेनैवासिना वृक्णशीर्ष्णां गलात्स्रवन्तमसृगासवमत्युष्णं सह गणैर्निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त विजहार च शिरःकन्दुकलीलया ।।१८।।

प्रकाशिका– सैव देवी भद्रकालीत्यन्तं गद्यम् दह्यमानशरीरायास्तस्याः कृत्यमाह ।। अमर्षोऽपराधासहनं रोषः स्वदेहदाहप्रयुक्तः कोपस्तयोरावेशः समावेशस्तस्य रभसेन वेगेन विलसित उत्तंभितो भ्रुकुटीलक्षणविटपः शाखा कुटिलदंष्ट्राश्चारुणानीक्षणानि च तेषामाटोपः संभ्रमस्तेनाति भयानकं वदनं यस्या इदं जगद्धन्तुकामेव हन्तुमिच्छतेव सहाट्टहासं ससिंहनादं हासं विमुंचती कुर्वन्ती ततः स्थानाद्विवृक्णानि छिन्नानि शीर्षाणि येषां गणेन परिवारेण सह शिरांस्येव कंदुकानि तेषां लीलया विजहार चिक्रीडे च ।। १८ ।।

एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ।। १९ ।।

प्रकाशिका– तस्मान्महतामतिक्रमः केनापि न कार्य इत्याह शुकः ।। एवमेवेति । महत्स्वभिचाररूपोऽतिक्रमोऽपराधः ।। १९ ।।

न वा एतद्विष्णुराताद्भुतं यदसम्भ्रमः स्वशिरच्छेदन आपतितेपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्वसुहृदात्मनां निर्वैराणां साक्षाद्भागवत अनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैरभिरक्ष्यमाणानां तत्पादमूलमकुतोभयमाश्रितानां भागवतपरमहंसानाम् ।। २० ।।

प्रकाशिका– नन्वसंभावितमिदं यन्मरणे प्राप्तेऽप्यव्याकुलत्वं मारकेषु क्रोधाभाव इत्यादिकमित्यपेक्षायामाह ।। न वा इति । हे विष्णुरात परीक्षित् । स्वशिरच्छेदन आपतितेऽप्यसंभ्रम इत्येतद्भागवतपरमहंसानामद्भुतं नैवेत्यन्वयः । कुत इत्यतोऽत्र हेतुगर्भविशेषणान्याह ।। विमुक्तेत्यादिना । विमुक्तो देहादावात्मभावोऽहं कर्तेत्यादिरूपः स्वातन्त्र्याभिमानस्तल्लक्षणः सुदृढहृदयग्रन्थिर्यैस्ते तथा तेषां सर्वसत्त्वेषु सुहृद इत्यात्मा मनो येषाम् । अत एव निर्वैराणाम् । साक्षाद्भगवतोऽनुपचारेण भगवच्छब्दवाच्यस्यानिमिषारिवरायुधेन कालचक्ररूपश्रेष्ठायुधेन तैस्तैर्भावैः संसारे कर्मवशात्प्राप्तैरनिष्टकारिभिः पदार्थैः परितो रक्ष्यमाणानाम् ।। २० ।।

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां नवमोऽध्यायः ।। ५-९ ।।

।। अथ दशमोऽध्यायः ।।

श्रीशुक उवाच–

अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे नद्या भगवन्तं कपिलऋषिं द्रष्टुं कस्मिंश्चिदाश्रमे स्थितं तत्कुलपतिना शिबिकावाहकपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः एष पीवा युवा संहननाङ्गः खरवत् धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स हि महानुभावः ।। १ ।।

प्रकाशिका– ।। हरिः ॐ ।। अथ तस्य महिमान्तरमारभ्यते । स द्विजवर इक्षुमत्या नद्यास्तटे कस्मिंश्चिदाश्रमे स्थितं कपिलमुनिं द्रष्टुं व्रजतः सिन्धुसौवीराधिपतेः सिंधुसौवीरदेशयो राज्ञो नाम्ना रहूगणस्य शिबिकामुवाहेत्यन्वयः । कथंभूतः । तत्कुलपतिना तत्कुलप्रधानपुरुषेण कर्त्रा शिबिकावाहकपुरुषान्वेषणसमये दैवेनादृष्टप्रेरकेणोपसादितः प्रापितः सन्नुपलब्धः । एष पीवा पुष्टः

खरवद्गर्दभ इव धुरं भारं वोढुमलं समर्थ इति धिया पूर्वं ये विष्टिगृहीताः पुरुषास्तैः सह प्रसभं बलाद्गृहीतः सन् यतो महानुभावोऽतदर्हो वाहनायोग्यः । तथाऽप्युवाहेत्यर्थः ॥ १ ॥

यदा हि द्विजवरस्य युगमात्रावलोकानुगतेर्न समा पुरुषगतिस्तदा विषमगतायां स्वशिबिकायां रहूगण उपधार्य पुरुषानधिवहत आह । हे वोढारः साध्वतिक्रमत किमिति विषममूह्यते यानमिति ॥ २ ॥

प्रकाशिका– मार्गगतपिपीलिकादिहिंसापरिहारार्थं युगमात्रप्रदेशस्यावलोको दर्शनं युगमात्रावलोकस्तदनु तत्पश्चाद्या गतिस्तस्या यदा पुरुषगतिरन्येषां पुरुषाणां गतिर्न समाऽभूत् । तदा विषमं यथा स्यात्तथा गतायां सत्यामुपधार्य वाहकानां विषमगमननिमित्तमेवेदं शिबिकागतिवैषम्यमिति निश्चित्य वहतो वाहकान्पुरुषानधिकृत्याह । अतिक्रमत पदं निक्षिपत ॥ २ ॥

अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्य तुर्याच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः॥३॥

प्रकाशिका– सोपालंभं साक्षेपमीश्वरस्य राज्ञो वचस्तुर्यात्सामाद्युपायानां मध्ये चतुर्थाद्दण्डात् ॥३॥

न वयं नरदेवप्रमत्ताः भवन्नियमानुपथाः साध्वेव वहामः अयमधुनैव नियुक्तोपि न द्रुतं व्रजति नानेन सह वोढुमिह वयं पारयाम इति ॥ ४ ॥

प्रकाशिका– भवन्नियमानुपथा भवदाज्ञानुसारिणः। अधुनैव नियुक्तोऽपीत्यनेनास्मद्वदस्य श्रमो नेति सूचयति । द्रुतमस्मद्गमनानुगुणं न व्रजति । न पारयामः पारं न गच्छामः । न शक्नुम इति यावत् ॥४॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां संसर्गिणां भवितुमर्हतीति निशम्य कृपणं वचो राजा रहूगण उपासितवृद्धोपि निसर्गेण बलात्कृत ईषदुत्थितमन्युर-विस्पष्टब्रह्मतेजसञ्जातवेदसमिव रजसा तमसावृतमतिराह ॥ ५ ॥

प्रकाशिका– नूनं निश्चितम् । एकस्य सांसर्गिकसंबधात्प्राप्तो दोषः सर्वेषामपि तत्सहचारिणां भवतीति नूनं निश्चितमिदानीमनुभवसिद्धं जातमित्यर्थः । निसर्गेण राज्ञां स्वभावेन बलात्कृतः परवशीकृतः सन् ॥ ५ ॥

अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहितवान् सुचिरं नाति-पीवा नातिसंहननाङ्गो जरसोपद्रुतो भवान्सखेनो एवापर एते सङ्घट्टिनः ॥ ६ ॥

प्रकाशिका– अहो कष्टमित्याक्षेपः । लक्षणतया विपरीतार्था ज्ञातव्याः । भ्रातरित्याक्षेपे संबोधनम् । व्यक्तं निश्चितम् । संघट्टिनः सहवाहकाः ॥ ६ ॥

इति बहुविप्रलब्धोप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवर अवस्तुनि संस्थानविशेषे अहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूर्ष्णीं शिबिकामुवाह ॥७॥

प्रकाशिका– विप्रलब्धोऽपि विपरीतलक्षणया तिरस्कृतोऽपि तूर्ष्णीं शिबिकामुवाहेत्यन्वयः । तूर्ष्णींभावे कारणमाह ॥ ब्रह्मभूत इति । ब्रह्मणि मनसा स्थित इत्यर्थः । कारणान्तरमप्याह ॥ अविद्ययेति । अविद्ययेश्वरेच्छया प्रकृत्या च विहिता रचिता द्रव्यादयो यस्मिंस्तस्मिन्स्वस्य चरमे कलेवरे विषयेऽहंममेति यदात्मन्यध्यारोपितं कर्तृत्वं तद्विषयको मिथ्याप्रत्ययो यस्य नास्ति स तथा । द्रव्याणि पञ्चभूतानि गुणाः शब्दादयः सत्त्वादयो वा । कर्माणि पुण्यपापरूपाण्याशयोऽन्तःकरणम् । कथं भूते कलेवरे । अवस्तुन्यनित्ये संस्थानविशेषेऽवयवविन्यासविशेषवति अनित्यत्वोपपादकमिदम् ॥ ७ ॥

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमरे त्वं जीवन्मृतोसि मां कदर्थीकृत्य भर्तृशासनमतिचरसि । प्रमत्तस्य ते करोमि चिकित्सां दण्डपाणिरिव जनतायाः यथा प्रकृतिं स्वां भजिष्यसीति ॥ ८ ॥

प्रकाशिका– कदर्थीकृत्यानादृत्य भर्तुः स्वामिनो ममातिचरस्यतिक्रम्य चरसि । चिकित्सां दण्डं दण्डपाणिर्यमः । चिकित्साफलमाह ॥ यथेति । येन दण्डेनेत्यर्थः । स्वां स्वीयां प्रकृतिं स्वभावं अप्रमत्ततारूपाम् ॥ ८ ॥

एवं बह्वबद्धमभिभाषमाणं नरदेवाभिमानिनं रजसा तमसानुवृद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूत-सुहृदात्मायोगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ९ ॥

तात्पर्यम् – अशेषभगवत्प्रियाणां निकेतः स एव भरतो मानुषापेक्षया । 'तत्कालस्थितभक्तेषु मानुषेष्वृषभात्मजः । वरोऽपि धिक्कृतो राज्ञा सुहृदा वैष्णवेष्वपी'ति गारुडे ॥ ९ ॥

प्रकाशिका– अबद्धमनन्वितम् । नरदेवोऽहमित्यभिमानो यस्य तमनुवृद्धेनाभिवृद्धेनाशेषाश्च ते भगवत्प्रियाश्च तेषां निकेत आश्रयो भरतस्तिरस्कृतोधिक्कृतोऽशेषभगवत्प्रियनिकेतो येन स तथा तं सर्वभूतसुहृत् विष्णुस्तत्रात्मा मनो यस्य स तथा योगेश्वराणां चर्यायामभिमानत्यागेनाचरणरूपायां नातिव्युत्पन्नमतिमनभ्यस्तबुद्धिम् । स्मयमान इवेतीवशब्दो मन्दहासाभावेऽपि तत्कार्यमुख-विकासोऽस्तीति सूचनाय । विगतस्मयो गताहङ्कारः । इदं राज्ञ आक्षेपवचनानामुत्तरम् । अत्र विप्रजन्मनो भरतस्याशेषभगवत्प्रियनिकेतत्वं कथमुच्यते । न हि विप्रजन्मनि स कस्यचिदाश्रय

इत्याशङ्कापरिहाराय विवक्षितमर्थं दर्शयति ॥ अशेषेति । स एव ब्राह्मणजन्मैव यदा भरतोऽभूत्तदाऽशेषभगवत्प्रियाणां निकेतोऽभूदित्यर्थः । तथा चैतद्विशेषणमस्य नैतज्जन्माभिप्रायेणेत्याशयः । नन्विदमपि बाधितम् । भरतस्यापि भगवत्प्रियदेवाद्याश्रयत्वाभावादित्यत उक्तम् ॥ मानुषापेक्षयेति । तत्कालस्थितभगवत्प्रियमानुषापेक्षयेत्यर्थः । एवं भरतपरतया संकोचेनैवेदं व्याख्येयमित्यत्र नियामकं समाख्यारूपं प्रमाणं पठति ॥ तत्काल इति । भगवत्प्रियशब्दार्थकथनम् ॥ भक्तेष्विति । ऋषभात्मजो भरतः । निकेतशब्दतात्पर्यम् ॥ वरोऽपीति । तिरस्कृतशब्दार्थकथनम् ॥ धिक्कृत इति । ब्राह्मणजन्मनीति शेषः। राज्ञा रहूगणेन । योगेश्वरचर्यायां नातिव्युत्पन्नमित्यस्य तात्पर्यम् । वैष्णवेषु सुहृदाऽपीत्यर्थः । तथाचाज्ञानादेव धिक्कार इत्याशयः । ततश्च तिरस्कृतो भरतजन्मनि । तत्कालभाव्यशेषमानुषभगवत्प्रिया भगवद्भक्तास्तेषां आश्रयो येनेति मूलं व्याख्येयमिति भावः ॥ ९ ॥

ब्राह्मण उवाच–

त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः ।
गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति चासौ न विदां प्रवादः ॥ १० ॥

तात्पर्यम् – 'भरणादिकृद्धरिरिति चिन्तयन्नृपमब्रवीदि'ति च ॥ १० ॥

प्रकाशिका– दीर्घमध्वानमेक ऊहितवान्सुचिरमिति विपरीतलक्षणया राज्ञा भरणकर्तृत्वाभावो दीर्घेऽध्वनि गमनकर्तृत्वाभावश्चोक्तः । तत्रोत्तरमाह ॥ त्वयेति । त्वयोदितं त्वदभिप्रेतं यन्मम भरणकर्तृत्वं गमनकर्तृत्वं नास्तीति तद्व्यक्तं स्पष्टमविप्रलब्धं विप्रलब्धं न भवति । सत्यमेवेत्यर्थः । कथमित्यतः तत्र क्रमेणोपपादयति ॥ भर्तुरिति । अत्र भर्तुर्मम भारो भरणं यदि स्यात्स एव नास्ति गन्तुरध्वाध्वगमनं यदि स्यात्स एव नास्तीति व्याहतमुच्यते । अतोऽत्राभिप्रेतं तात्पर्यं प्रमाणेनैवाह ॥ भरणादिकृदिति । हरिरिति चिन्तयन् हरिरेवेति ध्यायन् अब्रवीत् । विप्रजन्मा । भरत इति शेषः ॥ ततश्चायं मूलार्थः ॥ स भरतस्तद्भरणं भर्तृतया दृश्यमानस्य मम मत्कर्तृको यदि स्यात् । शिबिकाभरणं यदि मत्कर्तृकं स्यादिति यावत् । तर्ह्येवार्थाभावादूहितवानिति त्वदीयमाक्षेपवचनमसत्यं स्यात् । न हि तथा हरेरेव भरणकर्तृत्वात् । अतस्त्वयोदितं सत्यमेव । नाक्षेपरूपमित्यर्थः । एवं गन्तुर्गन्तृतया दृश्यमानस्य मम किञ्चिद्गम्यमधिकृत्याध्वाध्वगमनं यदि स्यात् । अध्वगमनं यदि मत्कृर्तृकं स्यादिति यावत् । तर्ह्येवार्थाभावात्त्वदीयमाक्षेपवचनमसत्यं स्यात् । न च तथा हरेरेव गमनकर्तृत्वात् । अतस्त्वयोदितं सत्यमेव नाक्षेपरूपमिति योज्यम् । यदुक्तं नातिपीवेत्यनेनाहं पीवेति तदपि चेतनविवक्षया चेद्बाधितार्थकमित्याशयेनाह ॥ पीवेति चेति । विदां ज्ञानिनां प्रवादो न भवति । चेतने स्थौल्यादिविकाराभावादित्याशयः ॥ १० ॥

स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ।
निद्राऽरतिर्मन्युरहंमदश्च देहेन जातस्य हि मे न सन्ति ॥ ११ ॥

तात्पर्यम् – देहेन जातस्य देहाभिमानिनः । 'देहमानी देहजातो विदेहो मानवर्जित' इति च ॥

प्रकाशिका– देहविवक्षया चेत्तत्राह ॥ स्थौल्यमिति । कलिः कलहः । अरतिर्दुःखमहमहङ्कारः । हिशब्द एवार्थः । अत्र स्थौल्यादयो देहेन जातस्यैव सन्ति । मे मम न सन्तीत्युक्त्या स्वस्य देहेन जातत्वाभावमुच्यते । न चासौ संभवति । स्वस्यापि देहेन जातत्वादतोऽत्र योग्यं देहशब्दार्थं दर्शयति ॥ देहेन जातस्येति । देहजातशब्दस्य देहमानिपरत्वे प्रमाणं पठति ॥ देहमानीति । देहजातो देहजातशब्दवाच्यो विदेहो विदेहशब्दवाच्यः । तथा च देहेन जातस्यैव देहाभिमानिन एवैते स्थौल्यादयो देहविकारा आक्षेपाभिप्रायेणोक्ताश्चित्तविक्षेपका भवन्ति । मे मम देहाभिमानशून्यस्य न सन्ति तथाविधा न भवन्तीति मूलार्थ इत्याशयः ॥ ११ ॥

जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम् ।
स्वस्वामिभावो ध्रुव एष यत्र तर्ह्यच्युतेऽसाविति कृत्ययोगः ॥ १२ ॥

तात्पर्यम् – 'प्राणयुक्तेररत्या च जडं जीवन्मृतं स्मृतमि'ति च । 'स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यता । देवेषु तन्नियत्या च त्वदादेर्व्यावहारिकम् । मानुषेषु विशेषः को व्यवहारमृते वद । व्यत्यासान्न हि देवेषु व्यत्यासः स्वामितां गत' इति च ॥ १२ ॥

प्रकाशिका– यदुक्तं जीवन्मृतोऽसीति तस्योत्तरमाह ॥ जीवन्मृतत्वमिति । जीवन्मृतत्वं जीवन्मृत शब्दवाच्यत्वं यदाद्यन्तवत्प्रतिक्षणं विकृतं जडं तस्य नियमेनाव्यभिचारेण दृष्टम् । यदाद्यन्तवद्विकृतं जडं तत्सर्वं जीवन्मृतशब्दवाच्यमित्यर्थः । अत्र घटादौ व्यभिचारादिदमयुक्तमिवाभाति । न च शरीररूप-जडाभिप्रायेणैवायं नियमः । तत्रापि जीवतो मृतत्वासंभवेन व्याहतिप्रसक्तेरतोऽत्र यथा न व्याहतिस्तथा जीवन्मृतशब्दार्थं प्रमाणेनैव दर्शयति ॥ प्राणयुक्तेरिति । जडं शरीररूपं प्राणयुक्तेः प्राणयोगाज्जीववदित्युच्यते । अरत्या बहुतरदुःखयोगेन मृतं मरणावस्थामिव स्मृतम् । तथा च मृत शब्दः शरीरे गौणोऽतो न व्याहतिरिति भावः । ततश्च यदाद्यन्तवदत एव प्रतिक्षणं विकृतं जडं शरीरं तस्य नियमेन सर्वस्यापि जीवन्मृतत्वं प्राणयोगेन दुःखबाहुल्येन च जीवन्मृतशब्दप्रतिपाद्यत्वं दृष्टम् । तथा चात्रापि चेतनविवक्षया चेद्बाधितार्थत्वं शरीरविवक्षया चेत्सर्वसाधारणं कथमाक्षेपरूपं स्यादिति मूलार्थ इत्याशयः। यदुक्तं भर्तृशासनमतिचरसीति तत्राप्युत्तरमाह ॥ स्वस्वामिभाव इति । अत्राप्रतिपत्ति-विप्रतिपत्तिनिरासाय स्वस्वामिभाव इत्यादेः सार्धश्लोकस्य तात्पर्यं प्रमाणेनैव दर्शयति ॥

स्वामित्वमिति। तुशब्दोऽन्यानधीनत्वरूपविशेषार्थः । अत एव मुख्यम् । अन्यत्र चेतने भृत्यता मुख्या। अनेनाच्युते स्वस्वामिभावो ध्रुव इत्येतदुक्तार्थम्।

ननु कथं स्वामित्वं हरेरेव मुख्यं नियतं च। यतो देवानामपि वेदादिषु तदुच्यत इत्यत आह ॥ देवेष्विति। चशब्दोऽवधारणे। तस्य हरेर्नियमेनैव नियतमस्तीति भावः। अतो न मुख्यमित्यर्थः। ननु तर्ह्यस्मदादिषु नियतस्वामित्वव्यवहारस्य का गतिरित्यतस्तत्र व्यवहारमात्रं नार्थ इत्याह ॥ त्वदादेरिति। व्यावहारिकं व्यवहारमात्रविषय इत्यर्थः । अनेन मूले देवेषु त्वन्नियत्यैव त्वदादेर्व्यावहारिक-मित्यध्याहार्यमिति सूचयति । नन्वेतद्देशाधिपतिर्नियत इति प्रतीतिसद्भावात्कथं व्यवहारमात्र-मित्युक्तमित्यत उक्तं विशदयति ॥ मानुषेष्विति। मानुषेषु। राजस्विति शेषः। व्यवहारमृते विशेषो नियतोऽमुख्यो वा स्वामित्वरूपोऽर्थः को न कोऽपि। यदर्थं प्रतीतिरङ्गीकार्या स्यादित्याशयः। कुत इत्यत उक्तम् ॥ व्यत्यासादिति। अनेन विशेषबुद्धेरित्येतदुक्तार्थम्। नन्वेवं देवेष्वपि नामुख्यं स्वामित्वं नियतं किन्तु व्यवहारमात्रमिति किं न स्यादित्यत आह ॥ नहीति। स्वामितां गतः स्वामितानिष्ठः। तथा च देवेषु स्वामित्वममुख्यं नियतमस्ति। व्यत्यासाभावात्। मानुषेषु तु कर्मवशात्स्वाम्येव भृत्यो भवति। भृत्यश्च स्वामी। अतो व्यत्यासान्नामुख्यमपि नियतं स्वामित्वमस्तीत्यर्थः। अनेन क ईश्वर इत्यादिकमुक्ततात्पर्यम् ॥

ततश्चायं स्वस्वामिभाव इत्यादेः सार्धश्लोकस्यायमर्थः ॥ एषः प्रमाणप्रसिद्धः स्वस्वामिभावो यत्र यर्हि ध्रुवो मुख्यो नियतश्च विवक्षितस्तर्ह्यसावच्युते हरावन्यत्र चाङ्गीकार्यः। अच्युते स्वामिता। अन्यत्र भृत्यतारूपा स्वतो मुख्या नियता चाङ्गीकार्येत्यर्थः। यर्ह्यध्रुवोऽमुख्यस्तर्हि देवेषु तन्नियत्याऽङ्गीकार्य-स्तदादिषु च व्यवहारमात्रं नामुख्योऽप्यसौ नियतः स्वस्वामिभाव इति शेषः। इति तस्मात्त्वदादिषु कृतेः शासनरूपाया अयोगो योग्यता नेत्यर्थः। यो मुख्यस्वामी हरिर्ये चामुख्यस्वामिनो देवास्त एवास्मच्छासनयोग्या न त्वदादिरित्याशयः ॥ १२ ॥

विशेषबुद्धेर्विवरं मनाक् क पश्यामि यत्र व्यवहारतोऽन्यत्।
क ईश्वरस्तत्र किमीशितव्यमथापि राजन्करवाम किं ते ॥ १३ ॥

प्रकाशिका– नन्वेवमयमेतद्देशस्वामी नियत इत्यादिबुद्धेः का गतिरित्याशङ्कायां व्यवहार-मात्रमित्येतद्विवृणोति ॥ विशेषबुद्धेरिति । मानुषेष्विति शेषः । विशेषबुद्धेः कस्यचित्स्वामित्वं कस्यचिद्भृत्यत्वमिति बुद्धेर्यद्विवरम्। अवकाशविषयमिति यावत्। तन्मनागीषदपि व्यवहारतोऽन्यन्न पश्यामि व्यवहारमात्रमेतत्। न ज्ञानं तद्विषयो वाऽस्तीत्यर्थः। कुत इत्यत आह ॥ क इति। को मनुष्यो नियमेनेश्वरः। न कोऽपि। तत्र तस्मिन्नीश्वरे सति किं नियमेनेशितव्यमस्ति न किमपि। कर्मवशेन

व्यत्यासस्यापि संभवादित्याशयः । मास्तु नियतमस्मदादिषु स्वामित्वं मुख्यममुख्यं वा कादाचित्कं परिदृश्यमानं किञ्चिदङ्गीकार्यमित्यत आह ।। अथाऽपीति । अथाऽपि नियतस्वामित्वाभावेऽपि यद्यनियतं स्वामित्वमवलंब्य ब्रवीषि तर्हि राजन् किं ते शासनं करवाम तद्वद । तद्यथाशक्ति कुर्म इत्यर्थः । एतादृशस्वामित्वं कर्मवशाद्यदि मम भविष्यति तर्हि त्वमपि मच्छासनं करिष्यसीत्याशयः ।। १३ ।।

उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ।
अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ।। १४ ।।

प्रकाशिका— यदुक्तं प्रमत्तस्य चिकित्सां करोमीति तत्राप्युत्तरमाह ।। उन्मत्तेति । जडवदित्यनन्तरं वर्तमानस्येति शेषः । देहाभिमानशून्यस्येति यावत् । अत एव स्वसंस्थां मनसा स्वस्वरूपस्थितिं स्वतन्त्रे हरौ स्थितिं वा गतस्य मे भवता कृतेन चिकित्सितेन दण्डेन शिक्षितेन निष्ठुरवचनादिरूपाक्षेपेण वा कियानर्थः किं प्रयोजनम् । न किमपि । देहाभिमानाभावेन मम तत्कृतव्यथाद्यभावादित्याशयः । अथ न त्वं देहाभिमानशून्यः किन्तु स्वभावेनैव स्तब्धः प्रमत्तश्च भवस्यतो मच्छिक्षादिकं सार्थकमित्याशङ्कायां तथाऽपि तद्व्यर्थमित्याह ।। स्तब्ध इति । यः स्वभावतः स्तब्धः प्रमत्तश्च तस्य प्रति शिक्षादिकं पिष्टपेषः पिष्टपेषवद्व्यर्थमित्यर्थः । स्वभावभूतस्य स्तब्धादेः शिक्षादिनाऽनपगमादित्याशयः ।। १४ ।।

श्रीशुक उवाच—

एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्तमुपभोगेन कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह ।। १५ ।।

प्रकाशिका— अनुवादपरिभाषयाऽनुवादपूर्वकपरिभाषणेन प्रत्युदीर्य प्रत्युत्तरं दत्वा । अनात्मा देहः । तत्संबन्धि सुखदुःखादि अनात्म्यमुपरतमभिमानाभावेनापगतमनात्म्यं यस्मिन्देहे तस्य निमित्तमात्रमारब्धं प्रारब्धं कर्मभोगेनापनयन्नाशयन् राजयानं शिबिकां यथापूर्वं तथोवाह ।। १५ ।।

स चापि पाण्डवेय सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्श्रद्धयाऽधिकृताधिकारः तद्धृदयग्रन्थिविमोचनं द्विजवच आश्रुत्य बहुयोगग्रन्थमतं त्वरयाऽवरुह्य शिरसा पादमूलमुपगतः क्षमापयन्विगतनरदेवस्मय उवाच रहूगणः ।। १६ ।।

प्रकाशिका— हे पाण्डवेय । तत्त्वजिज्ञासायां सम्यक् श्रद्धयाऽधिकृतः प्रकटीकृतोऽधिकारस्तत्त्वज्ञानयोग्यतालक्षणो यस्य हृदयग्रन्थिरहंममाभिमानस्तद्विमोचनं यस्माद्बहवो योगप्रतिपादकग्रन्थास्तेषां मतमभिप्रेतं यस्मिंस्तत् द्विजवच आश्रुत्य विगतो नरदेवो राजाऽहमिति स्मयो गर्वो यस्य ।।

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ।
कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ॥ १७ ॥

प्रकाशिका– द्विजनां मध्ये कतमो यतः सूत्रमुपवीतं बिभर्षि । अथवा द्विजानामवधूतानां योगिनां मध्ये कतमोऽवधूतः कस्य पुत्रोऽसि । कुत्रत्यः कस्मिन्विद्यमानः । इहाप्यस्मिन्देशेऽपि कस्मात्कारणात्प्राप्तो नोऽस्माकं क्षेमाय चेत्प्राप्तस्तर्हि शुक्लः शुद्धः कपिलो मुनिर्न भवस्युत किमिति वितर्क इत्याशयः ॥ १७ ॥

नाहं विशङ्के सुरराजवज्रान्नत्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ १८ ॥

प्रकाशिका– त्वं ब्राह्मणश्चेत्त्वदवमानेन ममातीवानर्थप्राप्तिर्भविष्यतीत्याशयेनाह ॥ नाहमिति । वित्तपः कुबेरोऽवमानादपराधादस्माद्भृशं शङ्के ॥ १८ ॥

तद्ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ।
वचांसि योगग्रथितानि साधो न नः क्षमन्ते मनसा विभेत्तुम् ॥ १९ ॥

प्रकाशिका– तत्तस्मात्कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहीत्यर्थः । अहं कश्चिदुन्मत्तो जडवच्चरामीति शङ्कायां न त्वमुन्मत्तः किन्तु योगेश्वर एवेति निश्चित्याह ॥ असङ्ग इति । निगूढं नितरां गूहितं विज्ञानरूपवीर्यं प्रभावो येनापारोऽपरिमितमहिमा । तत्र हेतुः । हे साधो । योगःग्रथितो येषु तानि ते वचांसि नोऽस्माकं मनसा विभेत्तुं विविच्य ज्ञातुं न क्षमन्ते । न शक्यानीत्यर्थः । अतस्त्वं नोन्मत्त इत्याशयः ॥ १९ ॥

अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां कपिलं गुरुं वै ।
प्रष्टुं प्रवृत्तः किमिहारणं यत्साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥ २० ॥

प्रकाशिका– किं तव देशान्तरगमनासक्तस्यास्मत्स्वरूपनिश्चयेनेत्यपेक्षायां नाहं वृथा देशान्तर-गमनासक्तः किन्तु तत्त्वजिज्ञासायैवेत्याह ॥ अहं चेति । चशब्दः प्रकृतत्वानुसन्धानार्थः । इह संसारेऽरणं रक्षकं यत्तत्किमिति कपिलं प्रष्टुम् । वैशब्दोऽवधारणे प्रष्टुमेव प्रवृत्तः । नान्यस्मै प्रयोजनाय । कथंभूतं कपिलं साक्षाद्धरिमावेशो न भवतीति प्रदर्शनाय साक्षादित्युक्तम् । कल विस्तार इति धातोः कलशब्दोऽत्र विस्तारपरः । तथा च ज्ञानविस्तारायवतीर्णमित्यर्थः । ज्ञानकलया ज्ञानरूपांशे-नावतीर्णमिति वा विज्ञानार्थं स्वरूपांशेनावतीर्णमिति वा । तथा चायमवतारो ज्ञानकार्यतत्त्वोपदेशाद्यर्थ इत्यर्थः । अत एव तत्त्वविदां मुनीनां गुरुमित्युक्तम् ॥ २० ॥

स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपिस्वित् ।
योगेश्वराणां गतिमल्पबुद्धिः कथं विचक्षीत गृहानुबद्धः ॥ २१ ॥

प्रकाशिका– असि नोत शुक्क इत्युक्तमेव तर्कं विशदयति ॥ स इति । स एव कपिल एव भगवान् लोकनिरीक्षणार्थं साध्वसाधुजनपरीक्षणार्थमव्यक्तलिङ्गो भूत्वा विचरति । अपिस्वित्किमित्यर्थः । गतिं स्थितिं विचक्षीत जानीयात् । अल्पबुद्धित्वे हेतुः ॥ गृहानुबद्ध इति । एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तराण्याक्षिपत्युत्तरग्रन्थेन ॥ २१ ॥

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चाद्यमन्ये ।
यथा श्रुतोदानयनादिभावाः समूलदृष्टो व्यवहारमार्गः ॥ २२ ॥

प्रकाशिका– तत्र यदुक्तं हरिरेव जन्मादिकर्ता नाहमिति तद्दूषयति ॥ दृष्ट इति । यथाऽऽत्मनो मम कर्मतो बुध्यादिकरणरूपाद्गमनादिरूपाच्च श्रमः दृष्टः । तथा भर्तुर्गन्तुश्च भवतः भरणादिना श्रमोऽस्तीति मन्येऽनुमिनोमि । तथा चानुमितश्रमान्यथानुपपत्या भवतोऽपि भरणादिकर्तृत्व-मस्तीत्यङ्गीकार्यम् । अतः कथं हरिरेव भरणादिकर्ता नाहमित्युक्तमित्याशयः । किञ्च वेदोदितकर्म-करणान्यथाऽनुपपत्त्याऽपि जीवानां कर्तृत्वमङ्गीकार्यमित्याह ॥ श्रुतेति । श्रुतानि श्रुतिविहितान्युदानि कर्माणि तेषामानयनं सम्यक् समापनं तदादयो भावाः पदार्थाः । अङ्गीकार्या इति शेषः । अन्यथा वेदाप्रामाण्यप्रसङ्गादित्याशयः । उपसंहरति ॥ समूलदृष्ट इति । तस्मादित्यादौ ग्राह्यम् । व्यवहारमार्गो लौकिकवैदिकव्यवहारविषयो जीवकर्तृत्वादिरूपोऽर्थः समूलदृष्टो युक्तिसहितप्रत्यक्षादिसिद्धः । अतोऽङ्गीकार्य इत्यर्थः ॥ २२ ॥

स्थाल्यग्नितापात्पयसो हि तापस्तत्तापतस्तण्डुलगर्भरन्धिः ।
देहेन्द्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २३ ॥

प्रकाशिका– यदुक्तं देहाभिमानशून्यस्य मम देहधर्मभूताः स्थौल्यादयो न चित्तविक्षेपकरा भवन्तीति तद्दूषयति ॥ स्थाल्याग्नीति । स्थाल्याः पात्रस्याग्नितापात्तन्मध्यवर्तिनः पयसो जलस्य तापस्तस्य तापात्तण्डुलगर्भस्य तण्डुलान्तस्थसारभागस्य रंधिः पाको यथाऽऽश्रयस्य तापेनाश्रिततापो भवतीति यावत् । तथा देहश्चेन्द्रियाण्यसवश्च प्राणाश्चाशयोंऽतःकरणं च ते तथा तेषां सन्निकर्षा-त्तत्तैर्देहेन्द्रियादिधर्मैः स्थौल्यादिभिः पुरुषस्य देहेन्द्रियादिप्रविष्टस्य संसृतिश्चित्ततोदादिरूपा भवति । अनुरोधाद्योग्यताकर्माद्यनुसारात् । तत्र स्थौल्यकार्श्यव्याधिजरा देहधर्मा नेन्द्रियधर्मा इन्द्रियोपरमस्येव निद्रात्वात् क्षुत्तृषोः प्राणधर्मत्वमाधयः संकल्पादयश्च शिष्टा आशयधर्मास्ते सर्वे स्वाश्रयदेहादिसंबन्धेन

जीवे दुःखादिरूपसंसृत्यापादका भवंत्येवेत्यर्थः । आध्यात्मिकादितापेन देहे तप्ते इन्द्रियाणां तापस्ततः प्राणमनसोस्तेन जीवस्येति परंपरया तापो दार्ष्टान्तिकेऽपि विवक्षित इत्यप्याहुः । यद्यभिमानवत एव संसृत्यापादका न ममाभिमानशून्यस्येत्युक्तम्। तथाऽपि देहेन जातस्य हि मे न सन्तीति वाक्यस्योक्ताभिप्रायमजानताऽऽपातप्रतीतार्थमेवानुसृत्य तवापि देहेन्द्रियादिसंनिकर्षात्संसृतिरपरिहार्ये-त्युक्तमिति ज्ञातव्यम् ॥ २३ ॥

शास्ताऽधिगोप्ता नृपतिः प्रजानां यः किङ्करो वै न पिनष्टि पिष्टम् ।
स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २४ ॥

प्रकाशिका– यदुक्तं स्वस्वामिभावो मानुषेषु न नियत इति । स्तब्धादीनां शिक्षणं पिष्टपेष इति च तत्रोत्तरमाह ॥ शास्तेति । यो नृपतिर्मनुष्यराजो यदि स्वकालस्तब्धानां प्रजानां शास्ता सज्जनानां गोप्ता किंकरश्च भवति । तर्हि स पिष्टं न पिनष्टि । तदीयशासनादिकं न व्यर्थमित्यर्थः । कुतो यद्यस्मात्कारणादच्युतस्याराधानरूपं स्वधर्ममीहमानश्चेष्टमानोऽघौघं शासनाभावप्रयुक्तं पापसमूहं विजहाति । तस्मादनियतस्वामित्वेनापि राज्ञः स्तब्धतादिस्वभावानां शासनादिना न पापेऽपि स्वविहितं हर्याराधनरूपप्रजाशिक्षणादिकं प्रत्यवायपरिहारार्थमवश्यं कार्यमित्याशयः ॥ २४ ॥

तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ।
कृषीष्ट मैत्रीं दृशमार्तबन्धो यया तरेयं सदवध्यानमंहः ॥ २५ ॥

प्रकाशिका– तस्मादेवं मम त्वदुक्तं विपरीतं प्रतिभाति त्वं त्वगाधाभिप्रायो ज्ञानी न बाधितवक्ता तत्तस्मान्नरदेवोऽहमित्यभिमानजातेन मदेन तुच्छीकृतस्तिरस्कृतः सत्तमः सज्जनश्रेष्ठो भवान् येन तस्य मे तादृशे मयि मैत्रीं मित्रभावम् । स्नेहमिति यावत् । कृषीष्ट करोतु । हे आर्तबन्धो । सतामवध्यानमज्ञानं तिरस्कारस्तन्निमित्तमंहः पापं यया दृष्ट्या तरेयं तरिष्यामि । तादृशं हरिज्ञानं कृषीष्ट । ज्ञानजनकमुपदेशं च करोत्वित्यर्थः ॥ २५ ॥

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात्स्वकृताद्धिमादृग्धक्षत्यदूरादपि शूलपाणिः ॥ २६ ॥

तात्पर्यम् – (ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथञ्चन । न पुनः सदवज्ञाने कल्पकोटिशतैरपि) । स्वतो महदवज्ञानाद्रुद्रोऽप्यात्मानमादहेदि' ति च ॥ २६ ॥

प्रकाशिका– ननु ममावज्ञाकृतविकाराभावात्कुतस्तव पापप्रसक्तिर्यत्परिहाराय मैत्र्यादिप्रार्थन-मित्यपेक्षायामाह ॥ न विक्रियेति । अपि यद्यपि विश्वसुहृद्धरिः स एव सखा यस्य तस्य तव साम्येन

मानापमानयोस्तुल्यत्वेन वीताभिमतेर्विगताभिमानस्य तव विक्रिया चित्ततोदोऽवज्ञया नास्ति । तथाऽपि हरेरवज्ञया चित्तविकाराभावेपि तदवज्ञाकर्तुः पापेन दाहो भवति । तथाऽहमपि त्वदवज्ञानेन पापी दग्धश्च स्यामिति मध्येऽध्याहार्यम् । कुत इत्यतोऽत्र कैमुत्यन्यायमाह ॥ महद्विमानादिति । शूलपाणिरपि सर्वसंहर्ता रुद्रोऽपि स्वकृतान्महद्विमानाददूराच्छीघ्रं हि यस्माद्धक्ष्यति तदा मादृङ् मादृशोऽल्पकस्तस्माद्धक्ष्यतीति किं वाच्यमीत्यर्थः । अत्र शूलपाणिर्महद्विमानात्प्रकृतजडभरत-विमानादित्यन्यथाप्रतीतिवारणाय विवक्षितमर्थं प्रमाणेनैवाह ॥ स्वत इति । तथा च मूलं स्वतो महद्विमानादिति व्याख्येयमिति भावः ॥ २६ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां दशमोऽध्यायः ॥ ५-१० ॥

॥ अथ एकादशोऽध्यायः ॥

ब्राह्मण उवाच–

अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः ।
न सूरयो हि व्यवहारमेनं तत्वावमर्शेन सहामनन्ति ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ राज्ञः कृपया तत्त्वमुपदेष्टुं तावदुक्तं दूषयति ॥ अकोविद इति । त्वमकोविदो न पण्डितः । कोविदानां वादवदवभासमानान्वादान्वदसि । अथो तस्मादतिशयेन विदां मध्ये वरिष्ठः श्रेष्ठो नासि । न ह्याभासं वदन्विदुषां मध्ये श्रेष्ठो भवतीत्याशयः । कुतो ममाकोविदत्वादिकमित्यत आह ॥ न सूरय इति । हि यस्मात्सूरयो हरिस्वरूपसाक्षात्कारिणः । एनं व्यवहारं लौकिकव्यवहारादिसिद्धं हर्यधीनं जीवे भरणादिकर्तृत्वं हरिरेव सर्वस्य स्वतन्त्रकर्त्रेत्यादिरूप तत्वावमर्शेन सह नामनन्ति । तद्विचारसमये जीवोऽपि तदधीनोऽल्पकर्तेति न व्यवहरन्ति । पराधीनस्य चाल्पस्याविद्यमानतुल्यात्वात्त्वया तु तथा व्यवहृतमतो न कोविद इत्यर्थः ॥ १ ॥

तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ।
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधु ॥ २ ॥

तात्पर्यम् – 'न वेदेष्वल्पबुद्धीनां ब्रह्मतत्त्वं समीक्ष्यते । महाबुद्धिस्तु वेदेषु पश्येद् ब्रह्मैव केवलमि'ति च ॥ २ ॥

प्रकाशिका– यदुक्तं श्रुतोदानयनादिभावा अङ्गीकार्या इति तत्रोत्तरमाह ॥ तथैवेति । उरवो गार्हा गृहसंबन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विषया विद्याः कल्पसूत्रादयस्ताभिर्विजृंभितेषु

कर्मपरतयोद्दीपितेषु वेदवादेषु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवेदानां मुखतो वचनेषु तत्त्ववादो, हरिरेव सर्वयज्ञानां भोक्ता यजमानादिषु स्थित्वा कारयिता जीवास्तु तद्वशगा न स्वातन्त्र्येण कर्तारस्तद्दत्तफलभाजस्तत्प्रीत्यर्थमेव कर्मादिकं वेदैरुच्यत इत्यादिरूपः सिद्धः सत्संप्रदायागतः । नु निश्चितम् । साधूपक्रमाद्यानुगुण्येन पदसमन्वयरूपः वाक्यसमन्वयरूपश्च प्रायेण चकास्ति प्रकाशते । तथा श्रौतकर्मकरणाद्यन्यथाऽनुपपत्तिसिद्धं न जीवानां स्वातन्त्र्येण कर्तृत्वं बाधितत्वात् । हर्यधीनं त्वविद्यमानकल्पमेवेत्याशयः । अत्र प्रायेणेत्युक्त्या केषाञ्चिद्वेदोक्तकर्मकर्तॄणां तत्त्ववादश्चकास्तीति प्रतिपादितं ते क इत्यपेक्षायां प्रमाणेनैव तान्दर्शयति ।। न वेदेष्विति । वेदेषु वेदवादेष्वल्पबुद्धीनामिति सत्संप्रदायानभिज्ञगुरुशिक्षितानामित्यर्थः । कर्तरि षष्ठी । महाबुद्धिस्तु सत्संप्रदायाभिज्ञशिक्षितबुद्धिरेव पश्येज्जानीयात् । वाक्यसमन्वयेन पदसमन्वयेन चेति शेषः ।। २ ।।

न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ।। ३ ।।

प्रकाशिका– नन्वपौरुषेयवेदवाचां सर्वान्प्रत्यविशिष्टत्वेन केषाञ्चित्सत्संप्रदायेन केषाञ्चिन्नेत्यत्रैव किं कारणमित्यत आह ।। न तस्येति । वरीयसीः वरीयस्योऽपौरुषेयत्वेनानाशङ्कितदोषा वाचो वेदवाचस्तस्य तत्त्वग्रहणाय साक्षात्कैवल्यमन्यानपेक्षया तत्त्वग्रहणाय स्वाभिप्रेतयथार्थज्ञानजननाय न समासन् सम्यगभवन् । तस्य कस्य । यस्य गृहमेधसौख्यं स्वप्नेनिरुक्त्या स्वप्ने विद्यमानसुख-दृष्टान्तेनास्थिरत्वादिहेतुना स्वयमेव स्वबुध्यैव न तु बलात्कारेण हेयत्वेनानुमितं न स्यात् । अनेन वैराग्याभावान्न सर्वेषां सत्संप्रदायेन वेदार्थज्ञानमित्युक्तं भवति ।। ३ ।।

यावन्मनो रजसा पुरुषस्य सत्वेन वा तमसा वानुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरङ्कुशः (शं) कुशलं चेतरं वा ।। ४ ।।

प्रकाशिका– ननु हेयत्वेनाननुमितावपि किं निमित्तमित्यपेक्षायां दुष्टं मन एवेत्याशयेन संसारस्य मनोनिमित्तकतां दर्शयति ।। यावदित्यादिना । मनो यावद्रजआदिभिर्गुणैरनुरुद्धं वशीकृतं सच्चेतोभिर्बुद्ध्यादिरूपस्ववृत्तिभिराकूतिभिर्विषयेच्छाभिर्निरंकुशं विधिनिषेधरूपांकुशरहितं कुशलं धर्ममितरमधर्ममातनोति करोति । करणे कर्तृत्वोपचारः । तावानिति वक्ष्यमाणेनान्वयः । निरंकुश इति पाठे पुंस्त्वं वक्ष्यमाणान्तरात्मशब्दापेक्षया ।। ४ ।।

स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
चित्रं पृथङ्नामभी रूपभेदमन्तर्बहिष्ठः स्वपुरैस्तनोति ।। ५ ।।

तात्पर्यम् – स मायारचित अन्तरात्मा मनः ॥ ५ ॥

प्रकाशिका– कुशलाकुशलाभ्यां किमापादयतीत्यपेक्षायामाह ॥ स वासनात्मेति । अत्र स इति तच्छब्दो न प्रकृतमनःपरामर्शकः पुंलिङ्गत्वात् । किन्तु वक्ष्यमाणतया बुद्धिस्थस्य मायारचितान्तरात्मेत्यस्य परामर्शक इत्याह ॥ स मायेति । स मायारचितोऽन्तरात्मा मनः । तत्र षष्ठीतत्पुरुषप्रतीतिवारणाय मायारचित इति च्छेदप्रदर्शनम् ॥ ततश्चायं श्लोकार्थः ॥ स मायारचित ईश्वरेच्छया प्रकृतिविकृतोऽन्तरात्मा मनोवासनात्मा नानाविधविषयसंस्कारोपादानभूतो गुणानां सत्त्वादीनां प्रवाहः कार्यपरंपरा यस्मिन्स तथा । अत एव विकृतः षोडशात्मा लिङ्गशरीरे प्रधानतया प्रविष्टः पृथङ्नामभिः सह चित्रं रूपभेदं देवासुरमनुष्यादिजातिविशेषं स्वपुरैः धर्माधर्मद्वारा स्वसंपादितैः शरीरैस्तनोति । स्वप्नावस्थायां जाग्रदावस्थायां चेति शेषः । कथंभूतः । अन्तर्बहिष्ठः स्वप्नावस्थायामन्तःस्थितः । एतदुपपादनायोक्तम् वासनात्मेति । तथा च वासनारूपेणान्तःस्थितः स्वाप्नैः शरीरैः स्वप्ने नानाविधनामरूपे तनोतीत्यर्थः । बहिष्ठत्वोपपादनाय विषयात्मेत्युक्तम् । चक्षुरादीन्द्रियद्वारा बाह्यविषयासक्तोऽतो बहिष्ठो जाग्रदवस्थायां नानाविधनामरूपे तनोतीत्यर्थः । अवस्थाद्वये धर्माधर्मसहकृत् सच्छरीराणि सृष्ट्वा जीवानां नामजातिभेदं संपादयतीत्याशयः ॥ ५ ॥

दुःखं सुखं व्यतिमिश्रं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटम् ॥ ६ ॥

प्रकाशिका– तेनापि किं फलमित्यत आह ॥ दुःखमिति । दुःखं दुःखरूपं सुखं सुखरूपं व्यतिमिश्रं सुखदुःखमिश्ररूपं फलं तीव्रकालोपपन्नं तीव्रो दुर्निवारो यः कालस्तेन प्राप्तं फलमाव्यनक्ति सृजति मुक्तिगतसुखादिविवक्षया व्यनक्तीत्युक्तम् । ननु जडस्य मनसः कथमेतादृशफलदत्वमित्यत आह ॥ आलिङ्ग्येति । स्वदेहिनं स्वप्रारब्धदेहवंतं जीवमालिङ्ग्य लिङ्गशरीररूपेण संबध्य । कथंभूतं देहिनम् संसृतिचक्रकूटं चक्रवत्परिभ्रमणशीलो यः कूटो राशिर्यस्य तम् ॥ ६ ॥

तावानयं व्यवहारः सदा वै क्षेत्रज्ञसाक्ष्योर्भवति स्थूलसूक्ष्मः ।
तस्मान्मनोलिङ्गमदो वदन्ति गुणागुणस्यास्य परावरस्य ॥ ७ ॥

तात्पर्यम् – 'क्षेत्रवित्तु हरिः प्राणः साक्षी ताभ्यां पुमान्सरेदि'ति च ॥ ७ ॥

प्रकाशिका– तावांस्तावत्पर्यन्तमयं व्यवहारोऽहंममेत्यादिरूपो वैषयिकसुखेऽहेयत्वादिरूपो वा । क्षेत्रज्ञसाक्ष्योः सकाशाद्भवति । कथंभूतः । स्थूलसूक्ष्मो जाग्रत्स्वाप्नपदार्थविषयः । अत्र क्षेत्रज्ञसाक्षिशब्दयोः प्रकृतसंगतमर्थं प्रमाणेन दर्शयति ॥ क्षेत्रविदिति । तुशब्दोऽवधारणे । हरिरेवेति

संबन्धः । ताभ्यामित्यनेन मूले सकाशादित्यध्याहारं सूचयति । चरेत् । जाग्रत्स्वप्नयोरिति शेषः । एवं मनसः संसारहेतुत्वं किं सर्वदा न किन्तु सत्संगतिमतो मोक्षयोग्यजीवस्य गृहमेधसौख्यस्य हेयत्वानुमितितत्वग्रहणादिजननद्वारा तदेव मोक्षस्यापि कारणमित्याशयेनाह ॥ तस्मादिति । तस्मात्क्षेत्रज्ञसाक्ष्यधीनत्वाददो मनः परावरस्योत्तमानुत्तमजीवसमुदायस्य गुणागुणस्य गुणेन गुणसंबंधेन रहितोऽगुणो मोक्षस्तस्य लिङ्गं हेतुं वदन्ति । मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्याद्यागमादिति शेषः । अत्रायं विवेकः । यः परो मोक्षयोग्यो जीवस्तस्य मनः सत्संगत्यभावेनोक्तरीत्या संसारकारणं तत्संगतौ मोक्षस्य । अवरा अपि द्विविधाः । नित्यसंसारिणस्तमोयोग्याश्च । आद्यानां सर्वदा संसारे कारणं द्वितीयानां दुष्टसङ्गत्या हरिद्वेषाभिवृद्धौ तमोरूपमोक्षस्येति ॥ ७ ॥

गुणानुरक्तं व्यसनाय जन्तोःक्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमास्थितो स्थितिं स धूमां भजति ह्यन्यदा स्वम् ॥ ८ ॥

प्रकाशिका– एकस्यैव कथं विरुद्धोभयकार्यजनकत्वमित्याशङ्कापरिहारायोक्तं विशदयति ॥ गुणेति । गुणानुरक्तं शब्दादिविषयासक्तं व्यसनाय भवति । क्षेमाय मोक्षाय नैर्गुण्यं निर्गुणं भगवत्कथामृतपानादिना विषयासक्तिरहितं मनः निमित्तमिति शेषः । अथ शब्दोऽप्यर्थः । क्षेमायापीति संबन्धः । अवस्थाभेदेनैकस्योभयरूपत्वं दृष्टान्तेनोपपादयति ॥ यथेति । घृतेन सह वर्तमानां वर्तिकामन्यदा घृतवर्त्यभावे स्वां निर्धूमां शुक्लभास्वरप्रभारूपां स्वाभाविकीं स्थितिं भजति ॥ ८ ॥

पदं तथा गुणकर्मानुबद्धं बहिर्मनः श्रयतेऽन्यत्र तत्त्वम् ।
एकादशासन्मनसोऽस्य वृत्तीराकूतयः पञ्च धियोऽभिमानाः ॥ ९ ॥

तात्पर्यम् – पदं विषयम् । 'एकादशेन्द्रियद्वारा स्युरेकादशवृत्तयः । शब्दाद्यास्तदभीमानास्तदिच्छाश्चैव पञ्चशः । स्पर्शान्तर्भावतः कर्मखानां नैव पृथग्गतिः ॥ ९ ॥

प्रकाशिका– तथा गुणकर्मानुबद्धं सत्त्वादिगुणान् कर्माणि चानुसृत्य विद्यमानैः कामादिभिर्बद्धं युक्तं मनो बहिःपदं श्रयते । अन्यत्रान्यदा रागादिदोषाद्यपगमेन तत्त्वं सर्वदैकप्रकारं परं ब्रह्म श्रयते । अत्र पदमित्यस्य प्रकृतसंगतमर्थं दर्शयति ॥ पदमिति । तथा च बहिःपदं बाह्यशब्दादिरूपं विषयं श्रयते तद्विषयकवृत्तीर्जनयतीति मूलार्थ इत्याशयः । इयमेव मनसः सधूमत्वस्थानीयस्थितिः तत्त्वविषयकवृत्तिजनकत्वरूपा तु स्वाभाविकस्थितिस्थानीयेति ज्ञातव्यम् । बहिःपदं श्रयत इत्युक्तं विशदयति ॥ एकादशेति । अप्रतिपत्तिविप्रतिपत्तिनिरासायैतच्छ्लोकद्वयतात्पर्यं प्रमाणेनैव दर्शयति ॥ एकादशेति ।

श्रोत्रादीनि दशेन्द्रियाणि मनश्चैकमित्येकादशेन्द्रियाणि । तद्वारा साक्षाच्चैकादशवृतयः । कार्याणि ज्ञानकर्मरूपाणि स्युः । अयमत्र विवेकः । मनः साक्षादेव ममाहमित्यभिमानरूपां वृत्तिं करोति । श्रोत्रादिदशेन्द्रियप्रवेशेन तद्वारा शब्दादिज्ञानादिदशवृत्तीरपि जनयति । अतः शब्दाद्यनुभवरूपाः पञ्चवृत्तयो व्यवहरणादिकर्मरूपाः पञ्चाभिमानरूपा चैका वृत्तिरिति साक्षात्परंपरया मनस एव जायमाना वृत्तय एकादशेति मूलार्थ इत्याशयः । दशानामेव द्वारत्वेऽपि छत्रिन्यायेनैकादशेन्द्रियवृत्तिद्वारेत्युक्तिरिति ज्ञातव्यम् । साक्षादपि मनोवृत्तीनामेकादशत्वमस्तीत्यभिप्रेत्य प्रवृत्तं मूलमाकूतयः पञ्चधियोऽभिमाना इति । तत्तात्पर्यमाह ।। शब्दाद्या इति । पञ्चशः पञ्चतया विद्यमाना ये शब्दाद्यास्तेषु पञ्चशोऽहंममाभिमानास्तदनन्तरं तेषां पञ्च इच्छाः । चशब्दान्मनोविषयेऽर्थेऽभिमानादिसङ्ग्रहः । अनेन मूले चशब्दोऽध्याहार्य इति सूचयति ।

नन्वेवं कर्मेन्द्रियविषयेष्वप्यभिमानादिसत्वादाधिक्यं प्राप्तमित्यत आह ।। स्पर्शांतर्भावित इति । स्पृशत्यनेनेति स्पर्शस्त्वगिन्द्रियं तत्रान्तर्भावितोऽन्तर्भावविवक्षातः कर्मखानां कर्मेन्द्रियाणां पृथग्गतिः स्थितिर्नात्र विवक्षिताऽतस्तद्विषयेष्वभिमानादिकं न पृथग्वाच्यमिति शेषः । तथा चाभिमानाः पञ्चसु शब्दादिबाह्येन्द्रियविषयेष्वहंममेति स्वातन्त्र्याभिमानाः पञ्च ततस्तेषु जायमाना आकूतय इच्छाश्च पञ्च धियो मनसश्च विषये स्मृत्यादिरूपे जायमानोऽभिमानादिरेक इति । अस्य मनसः साक्षादेवैकादशवृत्तीर्वृत्तय इति मूलं व्याख्येयमिति भावः ।। ९ ।।

मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमिम् ।। १० ।।

तात्पर्यम्– एकादशैव चेष्टाः स्युरिन्द्रियाणां पृथक् पृथक् । गोलकास्तदधिष्ठानं चैकादश निगद्यते ।

प्रकाशिका– एवमेकादशमनोवृत्तीर्द्वेधा प्रदर्श्यैकादशेन्द्रियद्वारेत्युक्ते प्रथमपक्षे एकादशवृत्तिविषयप्रदर्शनाय प्रकृतस्य मात्राणीत्यर्धस्य तात्पर्यमाह ।। एकादशैव चेति । इन्द्रियाणां तज्जनितवृत्तीनां पृथक् पृथक् विद्यमाना इच्छाविषयाश्चैकादशैव स्युरित्यन्वयः । तथा च मीयन्त इति मात्राणि पञ्च शब्दादीनि कर्माणि व्यवहरणादिक्रियाकर्मतया प्रसिद्धानि वक्तव्यादीनि पञ्च पुरमभिमानविषयीभूतं शरीरं चैकमिति तासामिन्द्रियवृत्तीनाम् हे वीर एकादशसंख्याकां भूमिं विषयं वदन्ति प्राज्ञा इति मूलं व्याख्येयमित्याशयः । एकादशभूमिं वदन्तीत्येतावन्मात्रस्यार्थान्तरमप्याह ।। गोलका इति । गोलकाःकर्णादयो दशगोलकाः । तच्छब्दो बुद्धिस्थमनसः परामर्शकः । तथा च तस्य मनसोऽधिष्ठानं शरीरान्तस्थितहृदयादिरूपमेकमित्येकादशसंख्याका निगद्यन्ते । इन्द्रियाणां भूमिरिति शेषः । ततश्च भूमिमिन्द्रियाणामाश्रयमेकादशैकादशसंख्याकां वदन्तीति मूलार्थ उक्तो भवतीति ज्ञातव्यम् ।। १० ।।

गन्धाकृतिस्पर्शरसश्रवांसि विसर्गगत्यार्त्यभिजल्पशिल्पाः ।
एकादशं स्वीकरणं ममेति मायामहं द्वादशमेकमाहुः ॥ ११ ॥

तात्पर्यम् – 'एष संसृतिसंभारो द्वादशैवाथवा भवेत् । दशकं विषयाणां च ममाहमिति च द्वयम् । द्वयमेव ममाहं वा संसृतिस्त्वहमेव वे'ति च । आर्तिरुपस्थविषयः ॥ ११ ॥

प्रकाशिका– उक्तमनोवृत्तिसाध्यसंसृत्यन्तरंगकारणसंख्यां मतभेदेन दर्शयितुं गन्धेत्यादिश्लोकः प्रवृत्तः । तत्तात्पर्यमाह ॥ एष इति । संसृतिः सम्यक् श्रयतेऽनेनेति संसृतिः संसारः । संसारान्तरङ्ग-कारणमित्यर्थः । अनेन मायामित्येतदुक्तार्थम् । एषः पूर्वोक्तमनोवृत्तिविषयादिरूपो द्वादशसंख्याकः कथमित्यतस्तं प्रकारं दर्शयति ॥ दशकमिति । बाह्येन्द्रियविषयाणां शब्दादीनां दशकं तेषु ममैतेऽहमेतेषां कर्तेत्यभिमानद्वयं चेति द्वादशैव भवेदिति । पक्षान्तरमाह ॥ द्वयमेवेति । अहंममेति वृत्तिद्वयमेव संसृतिः संसृतिकारणमिति वाऽस्त्वित्यर्थोऽयमपि मूले उपलक्ष्य इत्याशयः । एकमाहुरित्यस्य तात्पर्यम् ॥ संसृतिस्त्वहमेवेति । अहमेव कर्तेति जीवस्य स्वातन्त्र्येण कर्तृत्वभ्रमरूपा मनोवृत्तिरेकैव । तु विशेषेण संसृतिकारणमिति वा भवेदित्यर्थः । विषयदशकस्याभिमानं विना बंधकत्वाभावादभिमानद्वयमेवेति पक्ष उक्तः । ममेत्यभिमानस्याहमेव कर्तेत्यभिमानेऽन्तर्भावादेकमेव संसृतिकारणमिति तृतीयपक्षः उक्त इति ज्ञातव्यम् । मूले आर्तिशब्देन कस्य कर्मेन्द्रियस्य विषयः कथ्यत इति न प्रतीयतेऽतस्तदर्थमाह ॥ आर्तिरूपस्थविषय इति । गुह्येन्द्रिय विषय इत्यर्थः ।

अत्राद्यश्लोक उदाहृतप्रमाणेनैव सम्यग्व्याख्यातो द्वितीयस्येयं योजना । आकृतिः रूपं श्रवः शब्दो विसर्गादयो गुदादिकर्मेन्द्रियसाध्यचेष्टाविशेषविषया आर्तिः आरतिः संभोगः । रेफगताकारलोपश्छान्दसः । शिल्पा हस्तवृत्तिविषयाः । शिल्प इत्यनन्तरं दशेति शेषः । इदं विषयदशकं मम मदधीनमिति स्वीकरणमभिमानमेकादशं एकादशत्वसंख्यापूरकमाहुर्ज्ञानिनः । अहमेषां कर्तेति स्वीकरणं द्वादशं द्वादशत्वसंख्यापूरकमाहुः । तथा माया संसृत्यन्तरङ्गकारणं द्वादशं द्वाद्वशत्वसंख्याकमिति केचिज्ज्ञानिन आहुरित्यर्थः । अहं ममेति स्वीकरणद्वयमेव मायां केचिदाहुरित्यपि ग्राह्यम् । अथवा अहमेवेति स्वीकरणमेकमेव मायामाहुरित्यर्थः ॥ ११ ॥

द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ १२ ॥

तात्पर्यम् – द्रव्यं देहादिः स्वभावो योग्यता । जीवस्य क्षेत्रज्ञतः स्युः । मिथः स्वतश्च न स्युः ॥

प्रकाशिका– नन्वेकादशेन्द्रियैर्जायमाना एकादशवृत्तयः कैर्निमित्तैः केनोपादानेन च केन कर्त्रा कस्य प्रत्यायकं कतिधा जायन्त इत्यपेक्षायामाह ॥ द्रव्येति । अत्र द्रव्यस्वभावशब्दयोः प्रकृतसंगतमर्थमाह ॥

द्रव्यं देहादिरिति । आदिशब्दादिन्द्रियग्रहणम् । जीवस्येति शेषोक्तिः । क्षेत्रज्ञ इत्यस्याव्यवहितेन नञा संबंधे क्षेत्रज्ञतो न स्युर्मिथोऽपि न स्युः किन्तु स्वत एवेति प्रतीतिवारणाय स्युरित्यनेनान्वयमाह ॥ क्षेत्रज्ञतः स्युरिति । क्षेत्रज्ञशब्दः परमात्मवाचीति पूर्वमेवोक्तम् । क्षेत्रज्ञत इत्यनन्तरं श्रुतस्य नञो मिथः इत्यनेनान्यस्य च नञः स्वत इत्यनेनैव संबन्ध इत्यभिप्रेत्याह ॥ मिथः स्वतश्च न स्युरिति । चशब्देन स्युरित्यस्य प्रत्येकं संबन्ध इति सूचयति ॥ ततश्चायं श्लोकार्थः ॥ द्रव्यं देहादि स्वभावो योग्यताऽऽशयोऽन्तःकरणं कर्माण्यदृष्टानि कालः फलानुकूलस्तैः । अत्राशय उपादानमन्यन्निमित्तमिति ज्ञातव्यम् । विकारा इत्यनन्तरं जीवस्येत्यध्याहार्यम् । प्रत्येकं सहस्रश इत्यादि । चशब्दात्कोटि-संख्यातोऽप्यधिकां संख्यां सूचयति । क्षेत्रज्ञतो हरेः सकाशात्स्युः । कुत इत्यतः परिशेष-प्रमाणादित्याह ॥ न मिथो न स्वत इति । तथा चोक्तवृत्तीनां कार्यत्वेन कर्तरि सिद्धे वृत्तिमज्जीवस्य जीवान्तरस्य वा न स्वातन्त्र्येण कर्तृत्वं तदिच्छानुसारेण वृत्तिजननाभावादन्यत्र चाप्रसङ्गाद्धरिरेव स्वातन्त्र्येण कर्तेति कल्पनीयमित्याशयः ॥ १२ ॥

क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचिता अनित्याः ।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १३ ॥

प्रकाशिका– एवं श्लोकत्रयेण गुणकर्मानुबद्धं मनो बहिःपदं श्रयत इत्युक्तमुपपाद्येदानीं हरेरेव स्वातन्त्र्येण तत्कर्तृत्वमुपपादयन् अन्यत्र तत्त्वं श्रयत इत्युक्तं तत्त्वमुपदिशति ॥ क्षेत्रज्ञ इति ॥ विभूतीर्विविधभवनरूपा एता वृत्तीर्मायारचिताः स्वेच्छानिर्मिता अनित्या अस्थिरास्त्रिक्षणावस्थायिन्यः क्वापि हेये उपादेये च विषये जाता आविर्हिता इदमहं जानामीत्यनुव्यवसिताः क्वापि तृणादौ विषये जायमानास्तिरोहिता न तथा प्रायेणानुव्यवसिता जाग्रत्स्वप्नयोराविर्हिताः सुप्तौ तिरोहिता इत्यप्याहुः । शुद्धस्तद्दर्शनेन विकारशून्यो विचष्टे पश्यति । अविशुद्धकर्तुर्वृत्तिसंबन्धेन विकारवतः कर्तुर्जीवस्य मनसो विभूतीरित्यन्वयः । अनेन जीवभिन्न एव क्षेत्रज्ञस्तत्वमित्युपपादितम् ॥ १३ ॥

क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयं ज्योतिरजः परेशः ।
नारायणो भगवान्वासुदेवः स्वमाययाऽऽत्मन्यवधीयमानः ॥ १४ ॥

तात्पर्यम् – स्वमाययाऽऽत्मन्यवधीयमानः स्वेच्छया स्वस्मिन्नेव तिरोहितत्वेन स्थितः । 'स्वात्माधारः स्वेच्छयैव जीवदृष्टेस्तिरोहितः । क्षेत्रज्ञेत्युच्यते विष्णुर्जीवस्थः पुरुषोत्तम' इति च ॥

प्रकाशिका– ततश्चैवमित्याह ॥ क्षेत्रज्ञ इति । आत्मा जीवान्तर्याम्यत एव पुरि शेत इति पुरुषो जीववन्नाज्ञ इत्याह ॥ पुराण्यतीतानागतानि साक्षादणतीति । साक्षादनन्याधीनतया । स्वयंज्योतिः

स्वप्रकाशः । ज्ञातृत्वादिविशिष्टमिदमेव शुद्धं तत्त्वं न निर्गुणमिति प्रदर्शनायैतानि विशेषणानि । ननु भगवतो जीवान्तर्यामित्वे जीवस्य तदाश्रयत्वं स्यात् । जीवदृष्टिविषयत्वं च स्यादित्याशङ्काद्वयं परिहर्तुमाह ॥ स्वमाययेति । अत्र स्वमाययाऽनिर्वचनीययाऽविद्ययाऽऽत्मन् स्वस्य व्यवधीयमानो व्यवहित इति प्रतीतिवारणाय योग्यमर्थं दर्शयति स्वमाययेति । स्वमाययेत्यस्यार्थः ॥ स्वेच्छयेति । आत्मन्नित्यस्यार्थः ॥ स्वस्मिन्निति । अध्याहृतेनैवकारेण जीवस्य नाश्रयत्वमिति सूचयति । आश्रयः सन्निति शेषः । व्यवधीयमान इत्यस्यार्थः तिरोहितत्वेनेति । जीवं प्रतीति शेषः । स्थित इति शानचोऽर्थकथनम् । वर्तमाने क्तः । अत्र प्रमाणसंवादमाह ॥ स्वात्मेति । आत्मन्नित्यस्यार्थकथनम् आत्माधार इति । अनेनाश्रित इति अध्याहार इति सूचयति । स्वमाययेत्यस्य व्याख्यानम् स्वेच्छयेति ॥ मूलेऽध्याहृतस्यैवकारस्य स्वमाययेत्यनेनापि संबन्ध इति दर्शयितुं स्वेच्छयैवेत्युक्तम् । व्यवधीयमान इत्यस्यार्थः जीवदृष्टेरिति । अनेन जीवं प्रतीति शेषं सूचयति । तिरोहित इति वर्तमाने क्तः । क्षेत्रज्ञ इत्यस्यार्थः क्षेत्रज्ञेति । आत्मेत्यस्यार्थः जीवस्थ इति । परेश इत्यस्यार्थः पुरुषोत्तम इति । तथा च स्वमायया स्वेच्छयैवात्मन् स्वस्मिन्नेवाश्रितो जीवस्थत्वेऽपि तं विना स्थातुमशक्तो नेत्यर्थः । जीवदृष्टिं प्रति व्यवधीयमानस्तिरोहिततया वर्तत इति मूलार्थो ज्ञातव्यः ॥ १४ ॥

यथानिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईष्टे ।
एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १५ ॥

प्रकाशिका– ननु भगवतो जीवान्तर्यामित्वे तद्गतपापादिसंबन्धःस्यादित्याशङ्कां दृष्टान्तमुखेनापाकरोति ॥ यथेति । अनिलो मुख्यवायुरात्मस्वरूपेण प्राणरूपेण प्रविष्टः सन् ईष्टे प्रेरयति । न हि तावता तस्य तद्गतदुःखादिलेप इति भावः । स्थावरजङ्गमानामिति षष्ठी द्वितीयार्थे । अधीगर्थदयेशां कर्मणीति विधानात् । एवं तथाऽऽत्मान्तर्यामी सन् इदं स्थावरजङ्गमात्मकं जगदनुप्रविष्ट ईष्टे । हर्यवरस्यापि वायोर्न लेपः किमु हरेरित्याशयः ॥ १५ ॥

न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गोजित षट् सपत्नो वेदार्थतत्त्वं भ्रमतीह तावत् ॥ १६ ॥

प्रकाशिका– एवं संसारकारणं हरेस्तत्त्वं चोपदिश्योक्तरूपे संसारे जीवस्य कियत्पर्यन्तं भ्रमणमित्यपेक्षायां तदवधिमाह ॥ न यावदिति । तनुभृत् मोक्षयोग्यो देहधारी मायां विषयेष्वहंममेत्यभिमतिम् । वयुनं ज्ञानं परोक्षं तस्योदयेन । विमुक्तसङ्गः स्त्रीपुत्रादिस्नेहरहितो जिताः षट् सपत्नाः कामक्रोधादिरूपा वा षडिन्द्रियरूपा वा शत्रवो येन स तथा । अर्थतत्त्वं वेदार्थसारभूतं परं ब्रह्मापरोक्षतो न वेद तावदिह संसारे भ्रमति ॥ १६ ॥

न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ।
यच्छोकमोहामयसङ्गलोभवैरानुबन्धं ममतां विधत्ते ॥ १७ ॥

प्रकाशिका– नन्वपरोक्षज्ञानानन्तरमपि संसारदर्शनात्कथमेतदित्यतो जीवन्मुक्तानां मनसि ममताऽनुत्पत्तिरूपं चरमावधिमाह ॥ न यावदिति । यदात्मलिङ्गं जीवस्वरूपयोग्यताज्ञापकं संसारताप उप्यतेऽस्मिन्निति संसारतापावपनम् । तापावपनत्वं कथमित्यतस्तदुपपादयति ॥ शोकेति । शोकादीनामनुबन्धं निमित्तभूतं तदेतन्मनो यावन्ममतां सर्वथा न विधत्ते तावदिह भ्रमति कर्मफलरूपं संसारमनुभवति ॥ १७ ॥

भ्रातृव्यमेनं त्वमदभ्रवीर्यमुपेक्षयाऽप्येधितमप्रमत्तः ।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोहम् ॥ १८ ॥

तात्पर्यम् – अभिमानादेव संसारोऽन्यथा नेति परिहारः ॥ १८ ॥

प्रकाशिका– वयुनोदयेन मायां विधूयेत्युक्तं विशदयन् त्वमपि संसारनिवृत्तिसाधनं ज्ञानं संपादयेत्याह ॥ भ्रातृव्यमिति । शत्रुभूतमित्यर्थः । स्वयं स्वत एवादभ्रवीर्यमनल्पसामर्थ्यं पुनरधिकारिकृतोपेक्षयाऽप्येधितं प्रतिदिनमभिवृद्धं व्यलीकमनृतार्थविषयकमात्ममोहमहं ममेति स्वकीयमभिमानमप्रमत्तः सावधानः सन् जहि नाशय । ननु वैरिहननेऽस्त्रेण भाव्यमित्यतोऽस्त्र-स्थानीयमाह ॥ गुरोरिति । उपासनेत्यनेन वयुनेत्यस्य जहीत्यनेन विधूननस्यात्ममोहमित्यनेन मायामित्यस्य विवरणं कृतमिति ज्ञातव्यम् । हन्तव्यत्वोपपादनाय भ्रातृव्यमित्यादीनि विशेषणानि । नन्वत्र देहेन जातस्य हि मे न सन्तीति विप्रेणोक्ते तदभिप्रायमबुद्ध्वाऽऽपातप्रतीतार्थमेवादाय स्थाल्यग्नितापादित्यादिना राज्ञा तवापि देहेन्द्रियसंनिकर्षात् संसारतापोऽवर्जनीय इत्युक्तस्य परिहारोऽनेन प्रकरणेन नोक्तमित्यपेक्षायामुक्त एवेत्याह ॥ अभिमानादेवेति । परिहारः उक्तः इति शेषः। अयमिहाभिप्रायः । देहेन जातस्य हि मे न सन्तीति विप्रेणोक्ते तदभिप्रायममबुद्ध्वा राज्ञा तवापि देहेन्द्रियसंनिकर्षात्संसारतापोऽवर्जनीय इत्युक्ते देहेन जातस्येति स्ववाक्यस्याभिमानादेव संसारोऽन्यथा नेति योऽभिप्रायस्तत्प्रकटनार्थमेव प्रवृत्तेनानेन प्रकरणेन परिहार उक्त एवेति ॥ १८ ॥

इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायामेकादशोऽध्यायः ॥ ५-११ ॥

॥ अथ द्वादशोऽध्यायः ॥

रहूगण उवाच–

नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय ।
नमोऽवधूतद्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥

प्रकाशिका– ॥ हरिः ॐ ॥ करिष्यमाणस्य स्वप्रश्नस्योत्तरदानाय ब्राह्मणं स्तुवन्नमति ॥ नम इति । त्रिरुक्तिरादरार्था । प्रारब्धकर्मरूपेणैव कारणेन विग्रहो देहो यस्य तस्मै जीवन्मुक्तायेत्यर्थः । स्वरूपेण परमानन्दानुभवेन तुच्छीकृतः विग्रहो येन तस्मै स्वरूपभूतानन्दानुभवेन त्यक्तदेहाभिमानायेत्यर्थः । हे अवधूत । द्विजबन्धुलिङ्गं ब्राह्मणाभासचिह्नम् । नित्यः परमात्मा तस्यानुभवो द्विजबन्धुलिङ्गेन गूढो नित्यानुभवो येन तस्मै ॥ १ ॥

ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमाम्भः ।
कुदेहमानाहिविनष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ॥ २ ॥

प्रकाशिका– तद्वाक्स्तुतिव्याजेन पुनः स्तौति ॥ ज्वरेति । ज्वरलक्षणरोगार्तस्येत्यर्थः । सत् स्वादु निर्दुष्टमिति वा । अगदमौषधम् । निदाघेन सूर्यकिरणौष्ण्येन दग्धस्य तप्तस्य हिमांभः शीतलमुदकम् । कुदेहे कुत्सितदेहे मानोऽभिमानः स एवाहिः सर्पस्तेन विशेषेण नष्टा नाशिता दृष्टिस्तत्त्वज्ञानं यस्य तस्य मे ते वचोऽमृतममृततुल्यमौषधं ज्ञानोज्जीवनकरमित्यर्थः ॥ २ ॥

तस्माद्भवन्तं मम संशयार्थं पृच्छामि पश्चादधुना सुबोधम् ।
अध्यात्मयोगग्रथितं पुरोक्तमाख्याहि कौतुहलचेतसो मे ॥ ३ ॥

प्रकाशिका– तस्मात्त्वद्वचनस्यामृतौषधत्वात्संशयार्थम् । अर्थशब्द आवर्तनीयः । तत्राद्यो निवृत्तिवचनः संशयनिवृत्त्यर्थमित्यर्थः । अधुना पूर्वमहं पृच्छामि । पश्चात्सुबोधं यथा स्यात्तथाऽऽख्याहीत्यन्वयः । किं पृच्छसीत्यपेक्षायामाह । अध्यात्मेति । अध्यात्मनः परमात्मनो योगो ध्यानादिलक्षणो येषु ग्रन्थेषु तथा तेषु ग्रन्थेषु प्रतिपादितं पुरोक्तं पूर्वप्रतिपादितं प्रमेयं पृच्छामीत्यन्वयः । कौतूहलं चेतो यस्य तस्य मे ॥ ३ ॥

यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलम् ।
न ह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे ॥ ४ ॥

प्रकाशिका– पूर्वोक्तमनूद्य तस्य संदिग्धतां दर्शयति ॥ यदाहेति ॥ हे योगेश्वर भवान् । प्रत्यक्षादिना दृश्यमानक्रियायाः भरणगमनादिरूपायाः फलं श्रमादिकं सद्व्यवहारादिमूलमबाधितार्थक्रियाकारणम् । अंजसा तत्त्वविमर्शनाय न हीत्यर्थकं यन्न तत्त्वावमर्शेन सहामनन्तीति वचनमाह अमुष्मिन्वचने मे मनो भ्रमते संदिग्धं भवति । हरिरेव मुख्यतो भरणादिकर्ता न जीव इत्येवं रूपं तदभिप्रेतमर्थम् न निश्चिनोमि । अतः सुबोधमाख्याहीत्यन्वयः ॥ ४ ॥

ब्राह्मण उवाच–

अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः ।
तस्यापि चाङ्घ्र्योरधि गुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥

तात्पर्यम्– यस्मान्मूलकारणभूतो विष्णुरेव । अतो मुख्यं सर्वकारणत्वं तस्यैव । मूलाश्रयविवक्षा यदि न स्यात्कुतः पृथिव्यां चलतीति व्यवहारः ? यतोऽवान्तराश्रया बहवः सन्त्यङ्घ्र्याद्याः ॥ ५ ॥

प्रकाशिका– नन्वत्र प्रकरणे वक्ष्यमाणरीत्या प्रकृतिः पृथिव्यादेः सर्वस्य कारणं तस्याश्च विष्णुरिति सर्वस्य मूलकारणं विष्णुरित्येवोच्यते । न तु तस्य मुख्यतो भरणादिकर्तृत्वमुपपद्यतेऽतोऽसङ्गतमेतदित्याशंकायां विष्णोरेव भरणादिकर्तृत्वं मुख्यमिति प्रकृतप्रमेयसमर्थनायैव विष्णोर्मूलकारणत्वमत्रोक्तमतो नासंगतमित्याशयेनैतत्प्रकरणाभिप्रायमाह ॥ यस्मादिति ॥ विष्णुरेव । वक्ष्यमाणरीत्येति शेषः । सर्वकारणत्वं भरणगमनादिसर्वकर्तृत्वम् । तस्यैवेत्यनन्तरमित्यत्राभिप्राय इति शेषः॥ ''अयं जन'' इति श्लोके मुख्यतश्चलनादिकर्तृत्वापरपर्यायमाश्रयत्वं विष्णोरेवोपपादितमित्याशयेन तं श्लोकं कस्य हेतोरित्यस्य प्रश्नार्थत्वासंभवादाक्षेपार्थत्वमभिप्रेत्य विपक्षे बाधकतर्कपरतया योजयति ॥ मूलाश्रयेति । परंपरया मुख्याश्रयविवक्षयेत्यर्थः । इदमापादकं मूलेऽध्याहार्यमित्याशयः । कस्य हेतोरित्यस्यार्थः कुत इति । न कुतोऽपीत्यर्थः । तर्ह्ययं व्यवहारो न स्यादिति यावत् । चलन्नामेत्यस्यार्थः चलतीति व्यवहार इति । साक्षादाश्रयत्वं पृथिव्या नेत्युपपादनाय तस्यापीति श्लोकः प्राप्तः । तत्तात्पर्यमाह ॥ यतोऽवान्तराश्रया इति । पृथिवीराजयोर्मध्ये विद्यमाना इत्यर्थः । आद्यशब्देन गुल्फजङ्घादेर्ग्रहणम् ॥ ततश्चायं जन इत्यादेः सार्धश्लोकस्यायमर्थः ॥ हे पार्थिव पृथिवीपते । यदि परंपरया मुख्याश्रयविवक्षा न स्यात्तर्हि पार्थिवः पृथिव्यादिभूतविकारोऽयं जन्यत इति जनो वाहकदेहः कस्य हेतोः पृथिव्यां चलन्नाम चलतीति व्यवहारविषयः स्यात् न कस्यापि । पृथिव्यां चलतीति व्यवहारविषयो न स्यादित्यर्थः । भवति च तथा । तस्मादस्ति परंपरया मुख्याश्रयविवक्षेति । ननु कुतः परंपरया पृथिव्या मुख्याश्रयत्वं साक्षादेव किं न स्यादित्यत उक्तम् ॥ तस्यापीति । पृथिवीस्थत्वेन व्यवह्रीयमाणस्यापि वाहकदेहस्येत्यर्थः । चशब्दोऽङ्घ्रीत्यस्य समुच्चायकः । अङ्घ्र्योरधि उपर्युपरि

गुल्फादयः सन्ति । उरःशब्दस्य सकारलोप आर्षः । गुल्फौ च जङ्घे च जानुनी चोरु च मध्यं चोरश्च शिरोधरा चांसौ च ते तथा ॥ ५ ॥

अंसे च दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ।
यस्मिन्भवान् रूढनिजाभिमानो राजास्मि सिन्धुष्विति दुर्मदान्धः ॥ ६ ॥

प्रकाशिका– एवं पृथिव्यां राजा गच्छतीति व्यवहारोऽपि मूलाश्रयविवक्षयैवोपपादनीय इत्याशयेनाह ॥ अंसेति ॥ दार्वी दारुनिर्मिता सौवीरराजेत्यपदेशः शब्दमात्रं यस्य देहस्यास्ते । तेन तस्य राजत्वममुख्यमित्याशयः । अस्मिन्देहे भवान्वर्तते । कथंभूतो भवान् । अस्मिन्देहे रूढो बद्धमूलो निजत्वेनाभिमानो यस्य स तथा ॥ ६ ॥

शोच्यानिमांस्तानधिकस्तवार्धिर्विष्टया निगृह्णन्निरनुग्रहोऽसि ।
जनस्य गोप्तेति विकत्थमानो न शोभसे वृद्धसभासु दुष्टः ॥ ७ ॥

तात्पर्यम् – एवं मूलगोप्तृत्वं च विष्णोरेव ॥ ७ ॥

प्रकाशिका– दुर्मदांधत्वेन तवानर्थप्राप्तिरित्याह ॥ शोच्यानिति । शोच्यांस्तानिमान्वाहकान् विष्ट्या निगृह्णन्निरनुग्रहोऽसि यतोऽतस्तवाधिरधिको भविष्यतीत्यर्थः । गोप्तेति विकत्थमान इत्यनेन राज्ञि गोप्तृत्वं मुख्यतो नास्तीत्युक्तम् । तर्हि तत्कुत्र मुख्यमित्यपेक्षायां भरणगमनादिकर्तृत्वे उक्तन्याय-मन्यत्राप्यतिदिशति ॥ एवमिति । विष्णोरेव मुख्यमिति शेषः । तथा च यथा वाहको मदादिर्न मुख्यो भर्ता गन्ता च किन्तु मदन्तर्यामी विष्णुरेवातो भर्तादिशब्दस्तत्रैव मुख्यः । एवं त्वं मुख्यतो न गोप्ता किन्तु त्वदन्तर्यामी विष्णुरेवातस्तस्मिन्नेव गोप्तृशब्दो राजशब्दश्च मुख्यत इति मूलाशय इत्यर्थः ॥ ७ ॥

यदि क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ।
तन्नामतोऽन्यद्व्यवहारमात्रं निरूप्यतां तत्क्रिययानु(मेयम्)तिष्ठन् ॥ ८ ॥

तात्पर्यम्– आश्रयत्वात्क्षितिरिति निर्वचने क्षितिशब्दोऽपि तस्मिन्नेव ॥ ८ ॥

प्रकाशिका– ननूक्ततर्के विपर्ययेपर्यवसानेन पृथिव्या एव मूलाश्रयत्वं प्राप्तम् न विष्णोरतो न प्रकृतसङ्गतमेतदित्याशङ्कायां पृथिवीशब्दोऽपि विष्णावेव मुख्यो भूतेषु व्यवहारमात्रमतो नासङ्गतिरित्याह ॥ यदि क्षिताविति । पृथिव्यामिति वक्तव्ये क्षिताविति वचनं पृथिवीवाचकाः सर्वेऽपि शब्दा विष्णावेव मुख्या इति प्रदर्शनाय । दुर्गमार्थत्वादेतच्छ्लोकतात्पर्यं दर्शयति ॥ आश्रयत्वादिति । तत्क्रिययेत्यस्यार्थः आश्रयत्वादिति । क्षि निवासगत्योरिति धातोरिति भावः । तस्मिन्विष्णावेव । मुख्यत इति शेषः ।

एवशब्दाद्भूते न मुख्य इति सूचयति । तेन व्यवहारमात्रमित्येतदुक्तार्थम् ।। ततश्चायं श्लोकार्थः ।। क्षितावेव चराचरस्य प्रकृतवाहकशिबिकादेर्निष्ठां स्थितिं तदुपपादकं मूलकारणत्वं च नित्यं नियमेन प्रवाहतो विद्यमानमिति वा । विदामो विद्मः । न विष्णावतो न प्रकृतसंगतिरिति यद्युच्यते तर्हि तन्नामतः क्षितिशब्दात्प्रसिद्धभूतादन्यद्विष्ण्वाख्यं वस्तु निरूप्यताम् । अतो नासङ्गतिरिति शेषः । ननु कथं रूढिपरित्यागेनान्यस्य निरूपणमित्यत उक्तम् ।। तत्क्रिययाऽनुमेयमिति । तस्य क्षितिशब्दस्य क्रियया निर्वचनेन । योगेनेति यावत् । अनु विद्वद्रूढीमनुसृत्य मेयं ज्ञेयम् । तथा च महायोगो विद्वद्रूढिश्चास्तीति भावः । तर्ह्यन्यत्र रूढेः का गतिरित्यपेक्षायामाह ।। व्यवहारमात्रमिति । क्षिताविति वर्तते । व्यवहार-मात्रम् न विष्णाविव परममुख्यव्यवहार इत्यर्थः । अज्ञरूढिरेवेत्याशयः । एवं प्रथितत्वात्पृथिवीति निर्वचनेन पृथिवीनामतोऽन्यन्निरूप्यतामित्यपि ग्राह्यम् ।। ८ ।।

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानं परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ।। ९ ।।

तात्पर्यम्– परमाणुमात्रायाः पृथिव्या अयुक्तत्वात्परमाणवोऽप्यस्याविद्ययैवाधारत्वेन कल्पिताः।।

प्रकाशिका– नन्वेवं यद्युक्तनिर्वचनेन मूलाश्रयविवक्षया पृथिव्यां चलतीति व्यवहारस्तर्हि पृथिव्याः कारणतया प्रतीयमानानां परमाणूनामेव तत्प्राप्तं न विष्णोरित्यत आह ।। एवं निरुक्तमिति । निरुक्तं निर्वचनलभ्यम् ।। क्षितिशब्दस्य वृत्तं वृत्तिर्यस्मिंस्तत् । उक्तनिर्वचनेन क्षितिशब्दवाच्यमिति यावत् । संनिधानं मूलाश्रयरूपं वस्तु ये परमाणवस्तेऽनेनेत्यर्थः । कुत इत्यतोऽत्राभिप्रेतं हेतुमाह भगवांस्तात्पर्यकारः ।। परमाणुमात्राया इति । परमाणुमात्रायाः पृथिव्या अयुक्तत्वादिति । परमाणुपुञ्जरूपाया इत्यर्थः । अयुक्तत्वात्समुदाय उभयहेतुकेऽपि तदप्राप्तिरित्युक्तन्यायैरयुक्तत्वादित्यर्थः। ननु परमाणुपुंजवादिमतेनोक्तशङ्काऽनुदयेऽपि परमाण्वारंभवादिमतेनोक्तशङ्का स्यादेवेत्याशङ्कायां तत्रापि न परमाणूनां मूलकारणत्वं मुख्याश्रयत्वं वेत्याह ।। अविद्येति । अत्रानिर्वाच्याविद्यया कल्पिताऽऽरोपितेत्यन्यथाप्रतीतिवारणाय विवक्षितमर्थमाह ।। परमाणवोऽप्यस्येति । परमाणव इत्यस्यानुवृत्तिः । अपि शब्दस्याध्याहार इति भावः । अविद्येत्यस्य व्याख्यानम् । अस्य अकारवाच्यस्य हरेर्विद्ययेति । प्रकृतसङ्गत्यर्थं आधारत्वेनेत्यध्याहृतम् ।। ततश्चायं मूलार्थः ।। येषां समूहेन विशेषः पृथिवीकृत उत्पादितस्ते परमाणवोऽप्यस्याकारवाच्यस्य विष्णोर्विद्यया प्रज्ञया मनसेच्छामात्रेणैव धारकत्वेन मूलकारणत्वेन च कल्पिताः संकल्पिताः । तथा च परमाण्वारंभवादिमतेऽपि परमाणूनां मूलाश्रयत्वं मूलकारणत्वं च हर्यधीनं न स्वतोऽतो हरिरेव मूलाश्रयादिरित्याशयः ।। ९ ।।

एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवैहि कृतं द्वितीयम् ।। १० ।।

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं न बहिर्ब्रह्म सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दवाच्यं यद्वासुदेवं कवयो वदन्ति ॥ ११ ॥

तात्पर्यम् – एवं सर्वं तथा प्रकृत्यैव कल्पितं विष्णोरन्यत् । एवं प्रकृत्याधारः स्वयमनन्याधारो विष्णुरेव । अतः सर्वशब्दाश्च तस्मिन्नेव ।

राजा गोप्ताऽऽश्रयो भूमिः शरणं चेति लौकिकः । व्यवहारो न तत्सत्यं तयोर्ब्रह्माश्रयो विभुः । गोप्ता च तस्य प्रकृतिस्तस्या विष्णुः स्वयं प्रभुः । तव गोप्त्री तु पृथिवी न त्वं गोप्ता क्षितेः स्मृतः। अतः सर्वाश्रयश्चैव गोप्ता च हरिरीश्वरः । सर्वशब्दाभिधेयश्च शब्दवृत्तेर्हि कारणम् । सर्वान्तरः सर्वबहिरेक एव जनार्दनः । शिर आधारता यद्वद्ग्रीवायास्तद्वदेव तु । आश्रयत्वं च गोप्तृत्वमन्येषामुपचारत' इति च ॥ १०,११ ॥

प्रकाशिका– ननु तथाऽपि वाद्यन्तरोक्तरीत्या मूलाश्रयत्वादिकं मूलकारणत्वं ब्रह्मणः प्रकृतेर्वा स्यादित्याशङ्कायां तयोरपि मूलाश्रयत्वादिकं हरिणैव कल्पितं न स्वत इत्याह ॥ एवमिति श्लोकद्वयेन । अप्रतीतेरेतच्छ्लोकतात्पर्यं दर्शयति ॥ एवमिति । एवमित्यनूद्य तथेति व्याख्यातम् । यथा परमाणूनां मूलकारणत्वादिकं न स्वतस्तथेत्यर्थः । कृशमित्यादेरर्थः सर्वमिति । अजयेत्यस्यार्थः प्रकृत्यैवेति । अवधारणस्य चशब्दार्थकस्य ब्रह्मणा चेत्यर्थः । अन्यदित्यत्राजाया अवधित्वे विष्णोरपि कार्यकोटौ निक्षेपः स्यादतोऽत्रावधिं दर्शयन्व्याख्याति ॥ विष्णोरन्यदिति ॥ ज्ञानं विशुद्धमित्युत्तरश्लोकस्यापि तात्पर्यं दर्शयंस्तस्यान्वयं दर्शयति ॥ एवमिति । प्रकृत्याधार इत्यनेन यद्वासुदेवं वदन्ति तेन कृतामजामवैहीत्यन्वयः सूचित इति ज्ञातव्यम् ॥ स्वयमनन्याधार इति परमार्थमेकमित्यस्य तात्पर्यम् । ततः किमित्यपेक्षायामुक्तं सिद्धमित्याह ॥ अत इति । मूलाश्रयादिविवक्षायाः समर्थितत्वादित्यर्थः । सर्वशब्दा राजा गोप्ता पृथिवी आश्रय इत्यादयः शब्दास्तस्मिन्विष्णावेव मूलकारणत्वादिविवक्षया प्रयुज्यन्त इति सिद्धमिति शेषः । अनेनेदं वाक्यमन्तेऽध्याहार्यमिति सूचयति ।

एवमेतत्प्रकरणं तात्पर्यतो व्याख्याय तद्दाढर्याय प्रमाणसंवादं दर्शयति ॥ राजेति । यो लौकिको व्यवहारस्तत्तस्य राजादिकं सत्यं यथार्थवाच्यम् । मुख्यवाच्यमिति यावत् न भवति । कुत इत्यत आह ॥ तयोरिति । राजभूम्योरित्यर्थः । विभुर्ब्रह्माऽश्रयो गोप्ता च तस्य ब्रह्मणः प्रकृतिर्गोप्त्री आश्रया च स्वयं साक्षाद्गोप्ताऽऽश्रयो विष्णुः । गोप्तेति विकत्थमान इत्यस्य तात्पर्यम् ॥ तव गोप्त्रीति । आश्रया चेत्यपि ग्राह्यम् । पृथिवीतलमूलगोप्तृविवक्षया पृथिवीशब्दवाच्यो विष्णुरतस्तव गोप्तृत्वाद्यभावाद्राजादि-सर्वशब्दाभिधेयश्चेत्यर्थः । कुत इत्यतः सर्वाश्रयश्चेत्यादिना तच्छब्दप्रवृत्तिनिमित्तधर्मवत्वादित्येका युक्तिरुक्ता । अपरामप्याह ॥ शब्दवृत्तेरिति । हि यस्मादन्यगतशब्दवृत्तेः शब्दप्रवृत्तिनिमित्तधर्मवत्त्वस्य कारणं तस्मादित्यर्थः ॥ अनेन तदधीनत्वादिति सूत्रोक्तन्यायो दर्शित इति ध्येयम् । न बहिरित्यस्य

तात्पर्यम् सर्वान्तर इति । ब्रह्मेत्यस्यार्थः सर्वबहिरिति । अपरिच्छिन्नपरिमाणमित्यर्थः । एकमित्यस्यार्थः एक एवेति । अन्यत्र व्यवहारो न मुख्य इत्युक्तमुपपादयति ॥ शिर आधारतेति । अनेन तस्यापि चांघ्र्योरधीत्युक्तस्य तात्पर्यमुक्तमिति ज्ञेयम् ॥

ततश्चायं श्लोकद्वयार्थः ॥ एवं यथा परमाणूनां मूलकारणादिकं न स्वतस्तथा । बृहन्महदसदमूर्त्तं सन्मूर्तं जीवं चेतनमजीवं जडं किंबहुनाऽन्यद्विष्णोरन्यत् द्वितीयं वस्तु द्रव्यस्वभावाशयकालकर्मनाम्न्या द्रव्याणि पञ्चभूतान्याशयोऽन्तःकरणं द्रव्याद्यभिमानत्वेन तन्नाम्न्याऽजया प्रकृत्या कृतमस्य विद्ययैव कृतमवैहि न स्वतः । अनेन सर्वकर्ता ब्रह्माऽपि हर्यधीनप्रकृत्या कृत इत्युक्तमिति ज्ञातव्यम् ।

प्रकृत्याश्रयस्याकारवाच्यस्य विष्णोरपि किमन्याश्रयेण प्रवृत्तिरित्यपेक्षायां नेत्याशयेन तन्माहात्म्यं वक्ति ॥ ज्ञानमिति । ज्ञानं ज्ञानात्मकं शरीरं विशुद्धं जडामिश्रं परमार्थमुत्तमार्थरूपमेकमेकमेव । अनेनानन्याधारत्वं तस्योक्तमिति ज्ञातव्यम् । अनन्तरं स्वगतभेदरहितं न बहिः सर्वदेहान्तर्गतं ब्रह्म बृहत्सर्वस्य बहिः सदमृतं मुक्तजातमत्तीत्यन्नं मर्त्यं ते उभे यच्छतीति सत्यम् । प्रत्यक् सर्वजीवान्तःस्थं प्रशान्तमुत्कृष्टसुखपूर्णं वासुदेवं ज्ञानरूपप्राणपूज्यं वदन्ति वेदाः । अत्र ज्ञानमित्यादिविशेषणानि तस्यानन्याधारत्वोपादकतयोक्तानीति ज्ञातव्यम् ॥ ११ ॥

रहूगणैतत्तपसा न याति न विद्यया निर्व्यसनाद्गृहाद्वा ।
न छन्दसा नोतजलाग्निसूर्यैर्विना महत्पादरजोभिषेकम् ॥ १२ ॥

प्रकाशिका– एतदुक्तरूपं ज्ञानं महत्सेवां विनाऽन्यसाधनैर्न भवतीत्याह ॥ रहूगणेति । एतज्ज्ञानादिरूपं ब्रह्म न याति न जानाति पुरुषः विद्यया संप्रदायाभिज्ञव्याख्यातृशून्यपौरुषोयया । निर्व्यसनात्संन्यासात् । छन्दसा संप्रदायानभिज्ञव्याख्यातेन वेदेन । जलाग्निसूर्यैः सेवितैरिति शेषः ॥१२॥

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतीं सतिं यच्छति वासुदेवे ॥ १३ ॥

प्रकाशिका– महतां सेवयैतल्लभ्यत इत्युक्तमुपपादयति ॥ यत्रेति । यत्र यैर्महद्भिः प्रस्तूयते प्रकर्षेण स्तूयते । ग्राम्यकथानां विघातो यस्मात् । ततः किमित्यत आह ॥ निषेव्यमाण इति । प्रस्तूयमान इत्यर्थः॥

अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ।
आराधनं भगवत ईहमानो मृगो भवं मृगसङ्गाद्धतार्थः ॥ १४ ॥
सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ।
अथो अहं जनसङ्गाद्विमुक्तो विशङ्कमानोऽविकृतश्चरामि ॥ १५ ॥

प्रकाशिका– विषयसङ्गः सर्वथा मुमुक्षुणा वर्जनीय इति सूचयन् स्वस्याप्तत्वप्रदर्शनाय कस्त्वं निगूढश्चरसीति प्रश्नस्योत्तरमाह ॥ अहं पुरेति द्वाभ्याम् । दृष्टेषु द्रव्यादिषु श्रुतेषु स्वर्गादिषु संगबन्धः स्नेहसंबन्धः स मुक्तो येन स तथा । हतोऽर्थो नष्टयोगलक्षणप्रयोजनः । अथो तस्मात् । जनसङ्गाद्विशङ्कमानः पुनर्योगनाशमाशङ्कमानोऽभिमानाद्विमुक्तोऽविकृतो विषयलाभनिमित्तकनीचोच्चता-लक्षणविकारशून्यः । अवधूत इति पाठेऽवधूतवेष इत्यर्थः ॥ १४-१५ ॥

तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनैवेह विवृक्णसङ्गः ।
हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥

प्रकाशिका– तस्मात्कृष्णार्चनफलस्य ममानुभवसिद्धत्वान्नरोऽधिकार्यसङ्गो वैराग्यं सुसङ्गः सत्सङ्गस्ताभ्यां जातो निशितो यो ज्ञानाख्योऽसिस्तेनेह संसारे विशेषेण वृक्णः छिन्नः सङ्गः स्नेहो येन स तथा हरिं याति । कथंभूतम् । अध्वनः संसारमार्गस्यातिपारं चरमावधिभूतम् । केन साधनेनेत्यपेक्षायामुक्तम् । तस्य हरेरीहाश्चरित्राणि तेषां कथनश्रुतिभ्यां लब्धा स्मृतिर्ध्यानं यस्य ॥ १६ ॥

इति श्रीभागवतटिप्पण्यां प्रकाशिकायां द्वादशोऽध्यायः ॥ ५-१२ ॥

॥ त्रयोदशोऽध्यायः ॥

ब्राह्मण उवाच–

दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमः सत्वविभक्तकर्मदृक् ।
स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म विन्दति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ वैराग्यदाढर्याय हेयतया संसारस्वरूपमरण्यसाम्येन निरूपयति ॥ दुरत्यय इति । दुरत्यये हरिकृपामन्तरेणात्येतुमशक्येऽध्वनि पुनः पुनः काम्यनिषिद्धादिकर्मकरणरूपे परिभ्रमन्नहमेवकर्तेति भ्रान्तो रजस्तमःसत्त्वैर्विभक्तानि यानि कर्माणि तानि तत्फलभूतानि शरीराणि पश्यतीति रजस्तमःसत्त्वविभक्तकर्मदृक् । स एष प्रसिद्धो जीवसमुदायः सार्थो वणिक्स्थानीयोऽर्थो धनं परमुद्देश्यं यस्येत्यर्थपरः । भवः संसारस्तल्लक्षणमटवीं वनं याति । यथा वणिक् अर्थपरः सन् अध्वनि मार्गे परिभ्रमन् भ्रान्तोऽटवीं याति तद्वत् । ततश्च न शर्म मोक्षसाधनम् । अन्यत्र स्पष्टम् ॥ १ ॥

यस्यामिमे षण्णरदेव दस्यवः स्वार्थं विलुंपन्ति कुनायकं बलात् ।
गोमायवो यत्र हरन्ति सार्थकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥

प्रकाशिका – तदलाभे निमित्तमाह ॥ यस्यामिति । यस्यां भवाटव्याम् । हे नरदेव । इमे षट् षडिन्द्रियाणि दस्यवश्चोरस्थानीयाः स्वार्थं जीवपक्षे संचितं धर्मं वणिक्पक्षे धनम् ॥ कुत्सितो नाथो नायको यस्य स तथा तस्य । द्वितीया षष्ठयर्थ इति वक्ष्यति । गोमायवो वृकाश्च तत्तुल्याः पुत्रकलत्रादयः सार्थकमर्थेन सहितम् । अत एव प्रमत्तं आविश्य त्वं मम पिता भर्त्रेत्यादिमंजुभाषणेन तत्समीपं प्राप्योरणमाविम् । तथा तस्य धनं हरन्तीत्यर्थः । मंजुभाषणेन समीपप्राप्तौ गोमायुदृष्टान्तः । हरणे वृकदृष्टान्त इति ज्ञेयम् ॥ २ ॥

प्रभूतवीरुत्तृणगुल्मगव्हरे कठोरदंशैर्मशकैरुपद्रुतः ।
क्वचिच्च गन्धर्वपुरं प्रविश्य क्वचित्क्वचिच्चासुहरोल्मुकं ग्रहम् ॥ ३ ॥

प्रकाशिका – प्रभूताः पुनः पुनः जायमाना वीरुधो लताश्च तृणानि च गुल्मानि लताजालानि च तैःतत्स्थानीयैः कामकर्मादिभिर्गव्हरे गन्तुमशक्यक्षेत्रस्थानीये गृहाश्रमे वर्तमानः कठोरदंशकैस्तत्स्थानीयैश्चोरमूषकादिभिरुपद्रुतोऽपहृतधनधान्यादिको भवति । क्वचित्संसारारण्ये कर्मनिर्मितं मनुष्यदेवगन्धर्वपुरं तद्वदस्थिरं स्थिरतया प्रपश्यति । क्वचित्क्वचित् तत्र तत्र प्रदेशेऽसुहरः प्राणहर उल्मुको ग्रह उल्मुकवर्णः पिशाचस्तं प्रपश्यति । यथाऽग्निकाम उक्तरूपं पिशाचं प्राप्याग्निमुपादित्सति । तथाऽयमपि प्राणहरं कुत्सितं धनिकं प्राप्य धनमुपादित्सतीत्यर्थः ॥ ३ ॥

निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्याम् ।
क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥

प्रकाशिका – निवासो गृहं तोयं सलिलं द्रविणं च । आत्मपदमात्मीयपरम् । निवासादिरूपेषु सोपजीव्येषु बुद्धिरभिनिवेशो यस्य स तथा । अटव्यां संसाररूपायाम् । इदमुभयत्र समम् । वात्या चक्रः वात्या उत्थिताः पांसवः तैः धूम्रा अन्धकारव्याप्तप्रदेशस्थवद्धियमाना दिशो रजस्वले रजोव्याप्तेऽक्षिणी यस्य स तथा । स यथा न जानाति । तथा वात्येव भ्रमयती या स्त्री तयोत्थितै रागादिभिरप्रकाशमानाः कर्मसाक्षिभूता दिग्देवताः । रजोगुणांधदृष्टिर्न पश्यतीत्यर्थः ॥ ४ ॥

अदृश्यझिल्लीस्वनकर्णमूल उलूकवाग्भिर्व्यथितान्तरात्मा ।
अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥

प्रकाशिका – शब्द एव श्रूयते न तत् स्वरूपं दृश्येत इत्यदृश्याः झिल्लयः कीटविशेषास्तत्स्वनवद्दुःसहा ये परोक्षमप्रियवादिशब्दास्तैः पूरितकर्णमूल उलूकवाग्भिस्तत्तुल्यैः प्रत्यक्षमप्रियवादिनां निष्ठुरशब्दैर्व्यथितोऽन्तरात्मा मनो यस्य स तथा । कदाचित्क्षुधार्दितो धनतृष्णयाऽर्दितो येषां छायाऽपि

पापहेतुस्तेऽपुण्यवृक्षास्तत्तुल्यान् दानभोगहीनधनिनः सेवन्ते । मरीचितोयानि तद्वत्सदाविद्यमानत्वेन ज्ञातानपि विषयान् विस्मृतमतिरभियाति ॥ ५ ॥

क्वचिद्वितोयाः सरितोऽभियाति परस्परं खादयते निरन्नः ।
आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥

प्रकाशिका – वितोया विगतोदकाः सरितो नदीरुद्दिश्य याति । तद्‌गमनवदिहामुत्र च दुःखादान् पाषण्डान् अभियाति । निरन्नोऽन्नादिशून्यः परस्परं पिता पुत्रं पुत्रः पितरं खादयते पीडयति । दावं दुःखदत्वेन दावाग्नितुल्यं गृहमासाद्य शोकाग्नितप्तो निर्विद्यते विषीदति । क्वचित्कदाचिद्यक्षै राक्षससमैर्दुष्टराजकुलैर्हृतोऽसुः असुवत्प्रियतमं धनं यस्य स तथा । मृतक इवास्त इति शेषः ॥ ६ ॥

परैर्हृतस्वः क्व च निर्विण्णचित्तः शोचन्विमुह्यन्नुपयाति कश्मलम् ।
क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥ ७ ॥

प्रकाशिका – क्च कदाचित्परैरन्यैरपहृतं स्वं द्रव्यं यस्य स तथा । कश्मलं मूर्च्छाम् । गन्धर्वपुरं गन्धर्वपुरवद्बहिष्ठतयाऽविद्यमानं वासनामयं पितृपितामहादिसमाजं प्रविष्टः सन्प्रमोदते । स्वप्ने वासनामयान् पित्रादीन् पश्यन् प्रमोदं लभत इत्यर्थः । अत्र दृष्टान्तमाह ॥ निर्वृतवदिति । जाग्रदवस्थायां पित्रादिदर्शनेन निर्वृतो रोमांचादिमान्यथा तथैवेत्यर्थः ॥ ७ ॥

चलन्क्वचित्कण्टकशर्करांघ्रिर्नगारुरुक्षुर्विमना इवास्ते ।
पदे पदेऽभ्यन्तरवह्निनाऽर्दितः कौटुंबिकः क्रुध्यति वै जनाय ॥ ८ ॥

प्रकाशिका – नगान् अत्युच्चत्वेन गन्तुमशक्यतया पर्वतस्थानीयान् गृहाश्रमोचितकर्मविशेषान् आरुरुक्षुरारोढुमिच्छुः शर्कराः क्षुद्रपाषाणाः कण्टकादिभिर्लग्नांघ्रिरिव विमना आस्ते । यथाऽध्वनि गच्छन् सार्थः कण्टकादिविद्धपादोऽत्युच्छ्रितं गिरिमारोढुमशक्तो विमनास्तिष्ठति । तथाऽयमप्यशक्त्या आरोहपर्वतसदृशातिविस्तृतानेकगृहाश्रमोचितकर्मसंपादनेच्छुर्नानाव्यसनैः कण्टकादिस्थानीयैरभिभूत-स्तानि कर्तुमशक्तः पदे पदे दृष्टान्ते प्रतिपदं दार्ष्टान्तिके प्रतिकर्म विमना आस्त इत्यर्थः । पदे पदे प्रतिदिनमभ्यन्तरवन्हिना जाठराग्निना जनाय स्वकुटुंबाय । इदमुभयत्र समम् ॥ ८ ॥

क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किञ्चिद्विपिनेऽपविद्धः ।
दष्टः स्म शेते क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे ॥ ९ ॥

प्रकाशिका – अजगराहिना सर्पस्थानीयया निद्रया निगीर्णो गिलितो गृहीत इति यावत् । किञ्चिदपि नावैति । विपिनेऽरण्ये अपविद्धस्त्यक्तः शव इव शेते दंदशूकैस्तत्स्थानीयैर्दुर्जनैर्दष्टोऽधिक्षिप्तोऽधो

विवेकज्ञानशून्योऽधकूपेऽन्ध इव तमिस्रे दुःखसमूहे पतितो भवतीत्यर्थः । शेत इत्यस्य पूर्ववाक्येनान्वय उक्तः ॥ ९ ॥

कर्हिस्मचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्मथितो विमानः ।
तत्रापि कृच्छ्रात्प्रतिलब्धमन्ये बलाद्विलुंपंत्यथ तं ततोऽन्ये ॥ १० ॥

प्रकाशिका – क्षुद्ररसान्परदारादिकामलवान्विचिन्वन् गवेषयन् तन्मक्षिकाभिस्तत्स्वामिभिर्विमानो विगतमानः गर्हित इति यावत् । नरके पततीति शेषः । तत्रापि परदारपरद्रव्यमध्येऽपि किञ्चित्कृच्छादिदं मदीयमिति शपथकरणरूपाद्यदि बन्धाद्विमुक्तेन प्रतिलब्धं पुनः प्राप्तं तर्हि तदन्ये बलाद्विलुंपंत्यपहरन्ति। अथ तं तद्गतं दारादिरूपमर्थं ततोऽन्ये ततोऽपि बलिष्ठाः लुंपन्ति इति परदारादिरूपविषयस्यानवस्थितिरित्यर्थः ॥ १० ॥

क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ।
क्वचिन्मिथोविपणन्यच्च किञ्चिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥ ११ ॥

प्रकाशिका – प्रतिक्रियां परिहारम् । अनीशो स्वातन्त्र्याद्यभावादिति भावः । आस्ते । दुरन्तचिन्तायुक्त इति शेषः । विपणन् क्रयविक्रयलक्षणव्यवहारं कुर्वन् यत्किञ्चिद्विक्रियमल्पं महद्वा धान्यादिकं ऋच्छति प्राप्नोति । वित्तशाठ्याद्वित्तविषयेऽहं धनाढ्यस्तुभ्यं श्वो दास्यामीत्यादिरूपं वचनं विधाय ततस्तद्विद्वेषमृच्छतीत्यर्थः ॥ ११ ॥

क्वचित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः ।
यावत्परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥ १२ ॥

प्रकाशिका – तस्मिन्नध्वनि आसनं कंबलादिस्थानं गृहम् । विहरंत्यनेनेति विहारो यानादि । याचमानोऽपीति यावत् । यदा परात्परस्मादप्रतिलब्धोऽप्राप्तः कामो यस्य स तथा । तदा पारक्यदृष्टिः परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति ॥ १२ ॥

प्रसज्जति क्वापि लताभुजाश्रयस्तदाऽऽश्रयोऽव्यक्तपदं द्विजस्य ह ।
क्वचित्कदाचिद्धरिचक्रतस्त्रसन् सख्यं विधत्ते बककंकगृध्रैः ॥ १३ ॥

प्रकाशिका – लताभुजा लतानां शाखास्तदाश्रयो द्विजस्य पक्षिसमूहस्य यदव्यक्तपदं कलभाषितं तदाश्रयस्तत्रैवासक्तचित्तः सन् प्रसज्जति प्रकर्षेण सक्तो भवतीति वणिक्पक्षे योज्यम् । दार्ष्टान्तिकेतु लतावत् कोमलायाः स्त्रियो यौभुजौ तदाश्रयस्ताभ्यामालिङ्गितो द्विजस्य लताश्रितपक्षितुल्यस्य

स्त्र्याश्रितापत्यादेर्यदव्यक्तपदं कलभाषितं तदाश्रयः प्रकर्षेण सज्जति । इह तत्पोषणादौ सक्तो भवति । परत्रचान्धे तमसि सक्तो भवतीति योज्यम् । हरिचक्रं सिंहसमूहस्तत्स्थानीयात्कालचक्रात्त्रसन् बिभ्यन् । बकभक्षणे, कंकिलौल्ये गृधृ अभिकांक्षायाम् । बकादिवद्भक्षणादिशीलैः पाषण्डिपूज्यैर्देवैः सख्यं तत्सेवारूपम् ॥ १३ ॥

तैर्वञ्चितो हंसकुलं समाविशन्न रोचयंच्छीलमुपैति वानरम् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परान्वीक्षणविस्मृतावधिः ॥ १४ ॥

प्रकाशिका – तैर्वञ्चितः सेवायामपि फलाभावात् हंसकुलं शुद्धान्तःकरणत्वेन राजहंसस्थानीयं ब्राह्मणकुलं प्रविशन् तच्छीलमुपनयनादिसंस्कारं प्राप्य भगवदाराधनरूपं न रोचयन् अनिष्टसाधनं पश्यन् वानरं वैदिकशुद्धिराहित्येन वानरस्थानीयं शूद्रस्वभावमुपैति । तद्वृत्तिमुपजीवयतीत्यर्थः । तज्जातिरासेन वानरजातिक्रीडया स्त्रियां मिथुनीभूय कुटुंबपोषणादिरूपया सुष्टु निर्वृतानि प्रीतानीन्द्रियाणि यस्य स तथा । परस्परान्वीक्षणं स्त्रीपुरुषयोः परस्परमुखनिरीक्षणं तेन विस्मृतोऽवधिर्जीवनावधिर्येन स तथा ॥ १४ ॥

द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशश्चरन्वने ।
क्वचित्प्रमादाद्गिरिकन्दरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १५ ॥

प्रकाशिका – द्रुमेषु द्रुमवद्दैहिकार्थेषु गृहेषु वानरवद्रंस्यन्रतिं कुर्वन्सुतदारेषु स्निग्धः । व्यवायदीनः मैथुनक्रियया शोच्यां दशामापन्नोऽत एव विवशो वने संसाराख्ये चरन् भवति । ततः क्वचित्कदाचिद्वानरवदेव गिरिकन्दरवदतिभयङ्करे नरकादिदुःखे पतन्कन्दरस्थगजतुल्यान्मृत्योर्भीतः सन् स्थितो भवति ॥ १५ ॥

ततः कथञ्चित्प्रतिमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिन्दम ।
अध्वन्यमुष्मिन्नजया निवेशितो भ्रमञ्जनोऽद्यापि न वेद कश्चन ॥ १६ ॥

प्रकाशिका – ततो नरकभोगानन्तरं वल्लीं गृहीत्वा वल्लीतुल्यं कर्मावलंब्यापदो नरकात्प्रतिमुक्तः उत्थितः पुनः सार्थं वणिक्समूहस्थानीयं नरलोकं प्रविशति । हे अरिंदम । हरिचक्रतस्त्रसन् इत्यादि । वणिक्पक्षे यथा श्रुतमेव योज्यं । एतादृशसंसाराध्वनि मूलकारणं भगवदज्ञानमेवेत्याह ॥ अध्वनीति । अजया लिङ्गशरीरादिरूपया निवेशितः । येन भगवतेति शेषः । तं न वेद ॥ १६ ॥

अन्योन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धोऽधिवहन्मिथश्च ।
अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः ॥ १७ ॥

प्रकाशिका – अजया कृतं संसाराध्वनि निवेशनमेव विशदयति ॥ अन्योन्येति । अन्योन्य-वित्तव्यतिषङ्गः परस्परद्रव्यदानादानसंबन्धस्तेन वृद्धो वैरानुबन्धो वैरपरंपरा यस्य स तथा । एवं विधोऽपि मिथोऽधिवहन्परस्परं कुटुंबपोषणादिकं कुर्वन्नस्मिन्नध्वनि विहरन् उरु कृच्छ्राणि च वित्तबाधाश्चोपसर्गा वक्ष्यमाणा द्वेषादयश्च तैर्विपन्नो मृतप्रायो भवति ॥ १७ ॥

तांस्तान्विपन्नान् स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः ।
आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १८ ॥

प्रकाशिका – स सार्थो वणिक् तत्र तत्र देशविशेषे विपन्नान्विनष्टांस्तांस्तानर्थान्वस्त्रालङ्कारादीन्विहाय जातं नूतनतया संपादितमर्थं परिगृह्याद्याप्यावर्तते । शुद्धमार्गापरिज्ञानेनासाधुवन एव परिभ्रमतीत्याशयः । स सार्थस्तत्स्थानीयः संसारी तत्र तत्र मनुष्यादिजन्मनि तांस्तान्विपन्नान्रोगाद्यापदं गतान्स्वदेहान्विहाय जातमभिनवदेहं परिगृह्याद्याप्यवर्तत इति दार्ष्टान्तिके योज्यम् । ततः किमित्यत आह ॥ न कश्चिदत्रेति । हे वीर । अत्र संसाराटव्यां भ्रमन् कश्चिदप्यध्वनः संसारमार्गस्य पारं चरमावधिप्रापकं योगमुपायम् । दार्ष्टान्तिके योगानुशासनविषयं परमात्मानं नापैति ॥ १८ ॥

मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ।
मृधे शयीरन्न तु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥ १९ ॥

प्रकाशिका – नन्वेतादृशं योगं शक्तश्चेत्स्वपराक्रमेण प्राप्स्यसीत्यत आह ॥ मनस्विन इति । मनस्विनो दानशूरा धैर्यवन्तो वा । निर्जिता दिग्गजेन्द्रा यैर्ममेयं भूर्ममेयमिति भूविषयभूतायां बद्धो वैरो यैरेतादृशा मृधे युद्धे शयीरन् शत्रुभिर्हता मृता एव भवन्ति न तु तत्तं योगं व्रजन्ति । न्यस्तदण्डो व्यर्थहिंसाशून्यो गतवैरो विष्णुवैष्णवद्वेषरहितो वैराग्यादिमानिति यावत् । अभियाति प्राप्नोति ॥ १९ ॥

रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः ।
असज्जितात्मा हरिसेवयाऽशितज्ञानासिमादाय तरातिपारम् ॥ २० ॥

प्रकाशिका – संसाराध्वगतस्य मम कथं तत्तरणमित्यपेक्षायामाह ॥ रहूगणेति । हि यस्मात्केनचिदेव साध्यं ज्ञानं तस्मात्त्वमपि संसाराध्वनि निवेशितो हरिगुरुकृपापात्रभूतश्च । कृता सज्जनभूतेषु मैत्री येन स तथा । असज्जितात्मा विषयेष्वनभिवेशितचित्तो हरिसेवया श्रवणादिरूपयाऽशितं तीक्ष्णीकृतं ज्ञानाख्यमसिमादायास्याध्वनोऽतिपारं चरमावधिरूपं मोक्षमुद्दिश्य संसाराटवीं तरेत्यर्थः ॥ २० ॥

राजोवाच–

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद्धृषीकेशयशः कृतात्मनां महात्मानां वः प्रचुरः समागमः ।। २१ ।।

प्रकाशिका – अखिलजन्मसु शोभनं नृजन्मैवामुष्मिन्नपि स्वर्गेऽप्यपरैर्भोगार्थं प्राप्तैर्जन्मभिः किं, न किमपि प्रयोजनम् । यद्यत्र हृषीकेशस्य हरेर्यशसि कृतः स्थापित आत्मा मनो येषां तेषां वः प्रचुरः समागमो न तैः किमित्यर्थः ।। २१ ।।

न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ।। २२ ।।

प्रकाशिका – अस्मत्समागमेनापि किं फलमित्यपेक्षायां हरिभक्त्यादिकमेव फलमित्याशयेन नित्यं भगवच्चरणनिषेवया हरिभक्त्यादिकं भविष्यतीति नाश्चर्यं यस्मान्मुहूर्तमात्रसेवयाऽपि ममाज्ञानादिनाशो जात इत्याह ।। न हीति । नित्यमुपासितैस्तच्चरणाब्जरेणुभिर्हतमंहो यस्य तस्याधोक्षजेऽमला भक्तिर्भविष्यतीत्यद्भुतमाश्चर्यं न हि । यस्मादस्य मौहूर्तिकान्मुहूर्तमात्रं भवत्समागमादपि दुस्तर्कमूलः श्रमादिकार्यान्यथाऽनुपपत्त्या जीवानामेव भरणगमनादिकर्तृत्वं वाच्यम् । अन्यथा तन्न स्यादिति तर्कमूलोऽविवेको जीवा एव स्वातन्त्र्येण कर्तार इत्येवंरूपोऽपहतो नाशितः ।। २२ ।।

नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ।
ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ।। २३ ।।

प्रकाशिका – स्वदृष्टान्तेनेतरेषामपि राज्ञामेतादृशावधूततावज्ञानोद्भवमपराधं संभाव्य तत्परिहारार्थं तान्सर्वान्नमति ।। नमो महद्भ्य इति । आवटुभ्यो वटूनभिव्याप्य ये ब्राह्मणा अवधूतवेषा गां भूमिं चरन्ति तेभ्यः सर्वेभ्यो नम इत्यर्थः । राज्ञां तदवज्ञानोत्थापराधवतां शिवमस्तु । मत्कृतनमनेनेति शेषः ।। २३ ।।

श्रीशुक उवाच–

इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिन्धुपतेः परमात्मसतत्त्वमविगणितपरमानुभावः ।। परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरणकमलः पूर्णार्णव इव निभृतकरणोर्म्याशियो धरणीमिमां विचचार ।।२४।।

प्रकाशिका – उत्तरा माता यस्य तस्य संबोधनं हे उत्तरामातः । आत्मनः परमात्मनः सत्तत्त्वं निर्दोषस्वरूपमविगणितोऽसंख्यातः परमानुभावोऽयस्य स तथा । निभृता वशीकृताः करणोर्मय इन्द्रियाख्यतरंगा आशयोऽन्तःकरणं च येन स तथा ।। २४ ।।

सौवीरपतिरपि सुजनसमवगतपरमात्मसत्तत्वः आत्मन्यविद्याऽध्यारोपितां च देहात्ममतिं विससर्ज एवं नृप भगवदाश्रितानुभावः ।। २५ ।।

प्रकाशिका – आत्मनि स्वात्मनि देहात्ममतिं देहेऽहंममेत्यभिमानम् ।। २५ ।।

तस्येमान् श्लोकान् गायन्ति ।। आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः ।। नानुवर्त्माहर्ति नृपो मक्षिकेव गरुत्मतः ।। २६ ।।

तात्पर्यम् – 'ऋते हैहयवैन्यादीनार्षभस्येह कः समः । यस्योपदेशात्सिन्ध्वीशो ददर्श कपिलं प्रभुमि'ति च ।। २६ ।।

प्रकाशिका – तस्य भरतस्यार्षभस्य ऋषभपुत्रस्यानुवर्त्मानुसृत्य विद्यमानं मार्गम् । अत्रार्षभस्येह राजर्षेरिति श्लोके भरतस्य समः कोऽपि राजा नास्तीत्युच्यत इति प्रतीतिवारणाय विवक्षितं तात्पर्यं प्रमाणेनैवाह ।। ऋते हैहय इति । हैहयः कार्तवीर्यार्जुनो वैन्यः पृथुः । आदिशब्दात्प्रियव्रतादयोऽपि ग्राह्याः । तथा च कर्मदेवसमानान् राज्ञो ऋते को नृप आर्षभस्य समो न कोऽपीत्यर्थः । एवं मूले नृपपदं सर्वराजपरमिति भावः ।। २६ ।।

यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदि स्पृशम् ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ।। २७ ।।

प्रकाशिका – हृदिस्पृशं हृदयंगमं मलवद्विष्ठावत् ।। २७ ।।

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकैः ।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ।। २८ ।।

प्रकाशिका – प्रार्थ्यां श्लाघनीयाम् । अत एव सदयावलोकैरित्युक्तं नैच्छदिति यत्तदुचितम् । तस्मादभवो मोक्षोऽपि फल्गुस्तुच्छ आदरणीयो न भवतीत्यर्थः ।। २८ ।।

यज्ञाय धर्मपतये विधिनैपुणाय योगाय साङ्ख्यशिरसे प्रकृतीश्वराय ।
नारायणाय हरये नम इत्युदारं गायन्मृगत्वमपि यः समुदाजहार ।। २९ ।।

तात्पर्यम् – युज्यते अनेनेति योगो हरिः । साङ्ख्यशिरसे उत्तमज्ञानस्वरूपाय ॥ २९ ॥

प्रकाशिका – यज्ञायेज्याय धर्मपतये पुण्यस्वामिने । विधौ विहितकर्मानुष्ठाने नैपुणं कुशलं यस्मात्तस्मै । योगाय सांख्यशिरस इति पदद्वयस्य प्रकृतसंगतमर्थं दर्शयति ॥ युज्यतेऽनेनेति । मन आदीन्द्रियं युज्यते स्वविषये संबध्यतेऽनेनेत्यर्थः । मन आदीन्द्रियं यथा स्वविषयकं स्यात्तथा प्रेरकायेत्यर्थः । शिरःपदमुत्तमार्थकम् । तस्य कर्मधारयसमासे परनिपातः । सांख्यपदं ज्ञानवाचकमित्यभिप्रेत्योक्तमुत्तमज्ञानस्वरूपायेति । कर्मधारयसूचनाय स्वरूपायेत्युक्तम् । प्रकृतीश्वराय लक्ष्मीपतये उदारं यथा स्यात्तथा गायन्मृगत्वमपि मृगजन्मापि समुदाजहार सम्यगुत्कृष्टतया स्वीकृतवानित्यर्थः ॥

इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यमापवर्ग्यं चानुशृणोत्याख्यास्यत्यभिनन्दति च सर्वा ह्येवाशिष आत्मत आशास्ते न काश्चन परत इति ॥ ३० ॥

प्रकाशिका – भागवतैः सभाजितानि पूजितान्यवदातानि निर्मलानि गुणकर्माणि यस्यायुष्यमायुष्यवर्धकं धन्यं धन्यताप्रदमात्मतः परमात्मत एव सर्वाशिष आशास्ते प्राप्तुमिच्छति । हरेः स्वातन्त्र्यं सम्यगवगच्छतीत्याशयः । हिशब्देन श्रवणादिमतामिदमनुभवसिद्धमिति सूचयति ॥ इतिशब्दो भरताख्यानसमाप्त्यर्थकः ॥ ३० ॥

इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

॥ चतुर्दशोऽध्यायः ॥

राजोवाच–

यो ह वा इह बहुविदा महाभागवत त्वयाऽभिहितः पारोक्ष्येण वचसा जीवलोकस्य भवाध्वा स ह्यार्यमनीषया कल्पितविषयो नांजसाऽव्युत्पन्नलोकसमधिगतः अथ तदेव दुरवगमं समवेतानुकूल्येन निर्दिश्यताम् ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ पूर्वाध्यायोक्तं स्पष्टतया वाच्यमिति राजा प्रार्थयते ॥ यो ह वा इति । पारोक्ष्येण वणिगध्वकथनव्याजेन । बहुविदा सर्वज्ञेन । आर्यमनीषया कल्पितविषयः पण्डितबुद्ध्या निर्णीतार्थः । अथ तस्मात् । अनेन दृष्टान्तेन युक्तं यद्दार्ष्टान्तिकं तदानुकूल्येन तज्ज्ञानोपयुक्तत्वेन ॥ १ ॥

सूत उवाच–

स होवाच य एष देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशल-समवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन् दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक् सार्थोऽर्थपरः स्वदेहनिष्पादित-कर्मानुभवन् श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुयोग-सहस्रहृत्तापोपशमनीं हरिगुरुचरणारविन्दमधुकरानुपदवीमवरुंधे ॥ २ ॥

प्रकाशिका – सूत उवाचेति वचनं परीक्षिच्छुकसंवादः शौनकसूतसंवादान्तर्गत इति स्मरणाय स शुक उवाचेति। सूतवचनं राज्ञा पृष्टस्योत्तरतया पूर्वोक्तविवरणरूपमुवाचेत्यर्थः। दुरत्ययेऽध्वनीत्येतत्प्रपञ्चयति ॥ य एष इति। य एष इत्यस्यार्थो य एष जीवलोकोऽयमिति। अजयेत्यस्यार्थः माययेति। तस्याः स्वातन्त्र्यशङ्कापरिहाराय विष्णोर्वशवर्तिन्येति। अजयाऽध्वनि निवेशितो भवाटवीं यातीति पुनः पुनः कर्मकरणरूपाध्वपतनस्य भवाटवीप्राप्तिसाधनत्वमुक्तम्। तद्भवाटवीस्वरूपं दर्शयन्विशदयति ॥ देहात्ममानिनामित्यादिना। देहे ममाहमित्यभिमानवतामित्यर्थः। अनेन परिभ्रमन्नित्येतदुक्ततात्पर्यम्। रजस्तमःसत्त्वविभक्तकर्मदृगित्यस्य तात्पर्यमाह ॥ सत्त्वादीति। सत्त्वादिगुणविशेषैः कल्पितानि सात्विकादितया विभक्तानि कुशलान्यकुशलानि समवहाराणि मिश्राणि च कर्माणि तैर्विनिर्मिता विविधदेहावलयस्ताभिर्वियोगसंयोगादिके सति योऽनादिसंसारो दुःखादिपरंपरा तदनुभवस्य कारणभूतेन षडिन्द्रियवर्गेण श्रोत्रादिपञ्चकेन मनसा चेत्यर्थः। तस्मिन्पुनः कर्मकरणरूपेऽध्वन्यापतित इत्यन्वयः।

दुरत्यय इत्यस्यार्थः दुर्गाध्ववदसुगम इति। तथा चाजया देहादावहं ममाभिमानस्तेन सात्विकादिकर्मकरणं तेनोत्तरपूर्वदेहसंयोगवियोगप्राप्तौ षडिन्द्रियवर्गेण दुःखाद्यनुभवरूपभवाटवी-प्राप्तिस्तत्र च पुनरुक्तरीत्या षडिन्द्रियवर्गेण पुनः कर्मकरणरूपाध्वनि पात इति विशदनं ज्ञातव्यम्। सार्थ इत्यनूद्य वणिगिति व्याख्यातम्। अर्थपर इत्यनूद्य दार्ष्टान्तिके तस्य विवक्षितार्थमाह ॥ स्वदेहेति। कर्मपदं तत्साध्यफलोपलक्षकम्। तथा च स्वकृतफलभूतधर्माद्यर्थकामरूपप्रयोजनपर इत्यर्थपर इत्यस्य व्याख्यानं सूचितमिति ज्ञातव्यम्। अटवी द्विविधा। एका दुःखप्रदा यथा कंटकाद्यधिष्ठिता। सुखप्रदा चापरा यथा नन्दनादिका। कात्रोपमानतया विवक्षितेति शङ्कापरिहाराय भवाटवीं यातीत्यस्य तात्पर्यमाह ॥ स्मशानवदिति। स्मशानवदशिवतमायां संसाराटव्यां गत इति। अशिवतमायामित्यनेन दुःखप्रदतां दर्शयति। न शर्म विन्दतीत्यस्य तात्पर्यमाह ॥ नाद्यापीति। हरिगुरुचरणारविन्द-योर्मधुकरायिता ये साधवः। तेषामनुपदवीमनुगमनमार्गः। सेवेति यावत्। तां नाद्याप्यवरुंधे न

प्राप्नोति । कथंभूताम् । विफलबहवो योगा उपायास्तेषां सहस्रं येषां ते । विफलबहुयोगसहस्रास्ते च ते हृत्तापाश्च तेषां शमनीमात्यन्तिकदुःखोपशमनरूपमोक्षसाधनीभूतां साधुसेवां नाद्यापि करोतीत्यर्थः । अनेन शर्मपदं मुक्तिसाधनीभूतसाधुसेवोपलक्षकमिति ज्ञातव्यम् ॥ २ ॥

यस्यामु ह वा एते षडिन्द्रियनामानः कर्मणा दस्यव इव तद्यथा पुरुषस्य धनं किञ्चित्साक्षाद्धर्मोपयिकं बहुकृच्छ्राधिगतं यत्परमपुरुषाराधनलक्षणं सांपरायिकमुदाहरन्ति ॥ तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पसमवायेन गृहे ग्राम्योपभोगेन कुनाथस्याजितात्मनो विलुंपन्ति ॥ ३ ॥

प्रकाशिका – यस्यामिमे षडित्युक्तस्य दार्ष्टान्तिके विवक्षितमर्थं दर्शयति ॥ यस्यामिति । भवाटव्यामित्यर्थः । उ ह वेति निपातसमुदायः प्रसिद्ध्यर्थः । कर्मणा व्यापारेण दस्यवश्चोरा इव । दस्युव्यापारतुल्यव्यापारवत्तामिन्द्रियाणां दर्शयति ॥ तद्यथेति । तन्निदर्शनं यथा तथा प्रकृत उच्यत इत्यर्थः। पुरुषस्याधिकारिणो धनं धनस्थानीयं साक्षाद्धर्मोपयिकं साक्षाद्धर्मो मुख्यधर्मो मोक्षसाधनपरमापूर्वरूपस्तस्य निमित्तं बहुकृच्छ्राधिगतम् । पूर्वजन्मन्यस्मिन्वा जन्मनीति शेषः । परमपुरुष आराध्यतेऽनेनेति परमपुरुषाराधनं तदेव लक्षणं यस्य तत्तथा । परमपुरुषप्रसादजनकत्वरूपलक्षणोपेतमित्यर्थः । सांपरायकं मोक्षकारणम् । तद्धर्म्यं धर्मादनपेतं धर्म्यम् । अवान्तरापूर्वसहितमिति यावत् । विलुंपन्ति । कुनायक इति द्वितीया षष्ठ्यर्थ इत्यभिप्रेत्य कुनाथस्येत्युक्तम् । कुत्सितो नाथो वणिकूपक्षे पालको दार्ष्टान्तिके गुरुर्यस्येत्यर्थः । अत एवाजितात्मनोऽविजितमनसः । कथं विलुंपन्तीत्यपेक्षायां तद्व्यापारप्रदर्शनायोक्तम् । गृहे ग्राम्योपभोगेनेति । गृहे विद्यमाना ये ग्राम्या ऐहिकसुखमात्रजनका विषयास्तेषामुपभोगरूपव्यापारेणेत्यर्थः। तमेवोपभोगं विशदयति ॥ दर्शनेत्यादिना । दर्शनाद्याः पञ्च चक्षुरादिबाह्येन्द्रियाणां वृत्तयः संकल्पोऽन्तःकरणस्य । एतेषां समवायेन मेलनेन तद्रूपेणेत्यर्थः। अनेन बलादित्येतत्स्वसाध्यव्यापारबलादिति व्याख्यातमिति ज्ञातव्यम् ॥ ३ ॥

अथ च यत्र कौटुंबिकस्य दारापत्यादयो नाम्ना कर्मणा वृकसृगाला इवानिच्छतोऽपि कदर्यस्य कुटुंबिन उरणकवत्संरक्ष्यमाणं मिषतोऽपहरन्ति ॥ ४ ॥

प्रकाशिका – गोमायवो यत्रेत्यस्य प्रकृते विवक्षितमर्थमाह ॥ अथ चेति । अथ चेति निपातसमुदायः प्रकारान्तरेण दुःखदत्वनिरूपणसमुच्चायकः । यत्र भवाटव्याम् । नाम्ना नाम्नैव दारापत्यादयः कर्मणा व्यापारेण । हरणस्य दुःखसाधनत्वप्रदर्शनायानिच्छतोऽपीत्युक्तम् । संरक्ष्यमाणम् । धनमिति शेषः । मिषतः पश्यतः सतः ॥ ४ ॥

यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजक्षेत्रं पुनरवपनकाले गुल्मतृणवीरुद्भिर्गह्वरमेव भवति ॥ ५ ॥

प्रकाशिका – प्रभूतवीरुत्तृणेत्यस्याभिप्रायमाह ॥ यथा हीति । आवपनकाले बीजप्रक्षेपकाले गह्वरमेव गन्तुमशक्यमेव भवतीत्यत्र हेतुगर्भविशेषणम् । न दग्धानि बीजानि यस्मिंस्तददग्धबीजमिति ॥ ५ ॥

एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदन्ति ॥ ६ ॥

प्रकाशिका – न हि उत्सीदन्ति । तृणादिवत्पुनः पुनर्भवन्तीत्यर्थः ।

यदपक्वकामकरण्ड एष आवसथस्तत्र रतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्त मनसाऽनुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ७ ॥

प्रकाशिका – कुत इत्यतोऽत्राप्यदग्धबीजस्थानीयमाह ॥ यदिति । अपक्वोऽदग्धः काम ऐहिकामुष्मिकफलरागस्तस्य करण्ड इव । करण्डः पात्रविशेषरूपः । एष आवसथो गृहाश्रमः । तथा चात्रापि कर्ममूलफलरागानामदग्धत्वात्पुनः पुनः कर्माणि भवन्तीत्याशयः । एवमाद्यपादार्थमुक्त्वा द्वितीयपादार्थमाह ॥ तत्रेति । तत्रावसथे दंशमशकसमैरपसदैर्नीचमनुजैः शलभादिभिश्चोपरुद्ध्यमानः पीड्यमानो बहिः प्राणो वित्तं यस्य स तथा । क्वचिच्च गन्धर्वपुरमित्यस्यार्थमाह क्वचित्परिवर्तमान इति । मिथ्यादृष्टौ कारणीभूतदोषप्रदर्शनायाविद्यादिकमुक्तम् । मनसाऽनुपश्यतीत्यन्वयः । मिथ्यादृष्टित्वमुपपादयति ॥ अनुपपन्नार्थमिति । अत्रोपपन्नशब्दः स्थिरतया घटमानपरस्तथा चोपपन्नः स्थिरतया घटमानोऽर्थः पदार्थो न भवतीत्यनुपपन्नार्थस्तमित्यर्थः । नरलोकं मनुष्यदेहादिकमत एव गन्धर्वनगरं तत्तुल्यमुपपन्नं स्थिरतया घटमानमिति प्रकारेण मिथ्यादृष्टिरित्यर्थः ॥ ७ ॥

क्वचिच्चाशेषदोषनिषदनं पुरुषविशेषमुपेत्य तद्वर्णगुणनिहितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥ ८ ॥

प्रकाशिका – क्वचित्कचिच्चासुहरोल्मुकग्रहमित्यस्यार्थमाह ॥ क्वचिच्चाशेषेति । अशेषदोषाणां निषदनं स्थानमिति पिशाचसाम्योपपादनायोक्तम् । तस्य वर्णः कान्तिः गुणा ऐश्वर्यादयस्तैर्निहिता मतिरयं पापीति बुद्धिर्यस्य । सुवर्णं द्रव्यं यथा अग्निकामकातरो वन्हीच्छया कातरः कश्चिच्छीतभीत उल्मुकवर्णं पिशाचमुपेत्य तद्वर्णलक्षणेन विहितमतिः सन् सुवर्णं शोभनवर्णं वन्हिमुपादित्सति तथैवेत्यर्थः ॥ ८ ॥

अथ कदाचिद्गृहपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्या मितस्ततः परिधावति ॥ ९ ॥

प्रकाशिका – निवासतो येत्यादेरर्थमाह ॥ अथ कदाचिद्गृहपानीयेति । गृहेति निवासशब्दार्थकथनं तोयशब्दार्थकथनं पानीयेति । आत्मनः स्वस्योपजीवनेषु उपजीव्येषु अभिनिवेश अहं ममाभिमानो यस्य सः तथा ॥ ९ ॥

क्वचिच्च वात्योपमया प्रमदाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूतं कुजन इव-साधुमर्यादां रजस्वलाक्षो दिग्देवतादिरजस्वलमतिर्न विजानाति ॥ १० ॥

प्रकाशिका – क्वचिच्चवात्योत्थित इत्त्यस्यार्थमाह क्वचिच्च वात्येति । भ्रामकत्वाद्वात्योपमा । आरोहमंकमारोपित इत्यनेन दृष्टान्ते सार्थोऽपि वात्यया किञ्चिदूर्ध्वनीत इत्यभिप्रेतमिति सूचयति । तत्कालरजसा तद्भोगकालोत्थरागेण रजनीभूत इवांधकारव्याप्तप्रदेशे विद्यमान इव । अनेन धूम्रा इत्येतदुक्ततात्पर्यम् । साधुमर्यादादिकं न विजानातीत्यर्थः । साधुमर्यादां दिग्देवतादीत्यनेन दिश इत्येतदुपलक्षणं सूचयति । रजस्वलाक्ष इत्यनूद्य रजस्वला रजोगुणव्याप्ता मतिर्बुद्धिर्यस्येति व्याख्यातम् । तथा च दार्ष्टान्तिकेऽक्षशब्दो बुद्धिपर इति भावः ॥ १० ॥

क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भत्सिते-नातिव्यथितकर्णमूलहृदयः ॥ ११ ॥

प्रकाशिका – अदृश्यझिल्लीत्यस्यार्थमाह ॥ क्वचिदुलूकेति । अतिपरुषोऽतिक्रूरो रभस उत्साहस्ते-नाटोपोऽभिनिवेशो यथा भवति तथा रिपूणां राजकुलस्य च निर्भर्त्सितेनातिव्यथितं कर्णमूलं हृदयं च यस्य । अत्र प्रत्यक्षमुलूकस्वनवत्तत्तुल्येन भर्त्सितेन व्यथितं हृदयं यस्य परोक्षं झिल्लीस्वनवत्तत्तुल्येन भर्त्सितेन व्यथितं कर्णमूलं यस्येति विवेको द्रष्टव्यः ॥ ११ ॥

स यदा दग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थ-द्रविणशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन्म्रियमाण उपधावति ॥ १२ ॥

प्रकाशिका – अपुण्यवृक्षां श्रयत इत्यस्यार्थमाह ॥ स यदेति । दग्धमुपभुक्तं पूर्वसुकृतं येन निर्भाग्य इत्यर्थः । कारस्करप्रमुखा ये पुण्यद्रुमास्तथाविधा लताश्च विषोदपाना विषकूपाश्च तद्वदुभयार्थ-शून्यद्रविणान् दृष्टादृष्टप्रयोजनेन शून्यधनवतोऽत एव जीवन्मृतान् । क्षुधार्दित इत्यस्य तात्पर्यम् स्वयं जीवन्म्रियमाण इति ॥ १२ ॥

क्वचित्सकृदवगतविषयवैतथ्यः स्वयं विषयाभिध्यानेन विभ्रंशितस्मृतिरत एव मरीचितोयप्रायांस्तानेवाभिधावति ॥ १३ ॥

प्रकाशिका – मरीचितोयानभिधावतीत्यस्याभिप्रायमाह ॥ क्वचित्सकृदिति । महतां सङ्गत्या सकृदवगतं विषयवैतथ्यं सर्वदाऽविद्यमानत्वं येन स तथा । स्वयं स्वयमेव । महत्संगतिशून्य इति यावत् । पुनर्विषयाभिध्यानेन विषयाणां स्थिरत्वादिध्यानेन विभ्रंशिता विनाशिता स्मृतिर्विषय-वैतथ्यस्मृतिर्यस्य मरीचितोयप्रायान् मरीचोदकवत्सर्वदाऽविद्यमानान् तानेव विषयानुद्दिश्याभिधावति । क्वचिच्च गन्धर्वपुरमित्यनेनेदं गतार्थमिति प्रदर्शनाय सकृदवगतविषयवैतथ्य इत्युक्तम् । तत्र तु सर्वथा ज्ञानशून्य एव विवक्षितोऽत एवाविद्याकामकर्मभिरिति तत्रोक्तम् ॥ १३ ॥

एकदा त्वसत्प्रसंगान्निकृतमतिर्व्युदस्रोतश्चलनवदुभयतोऽपि दुःखदं पाषण्ड-मभियाति ॥ १४ ॥

प्रकाशिका – क्वचिद्वितोया इत्यस्याभिप्रायमाह ॥ एकदेति । असत्प्रसंगादसतां संगत्या निकृता वञ्चिता मतिर्यस्य सः व्युदस्रोतश्चलनवदुदकशून्यनदीमुद्दिश्य गमनवत् । उभयत इह परत्र च ॥ १४ ॥

यदा तु परबाधयाऽन्नमात्मनो नोपनमति तदा हि पितृपुत्रान् बालान् खलु भक्षयति ॥

प्रकाशिका – परस्परं खादयत इत्यस्याभिप्रायमाह यदा त्विति ॥ परबाधया परपीडयाऽन्नं नोपनमति नोपतिष्ठति । अनेन निरन्न इत्यस्याभिप्राय उक्त इति ज्ञातव्यम् । पितृपुत्रान्स्वकीयानेवेत्यर्थः । पिता पुत्रं पुत्रः पितरमिति यावत् । अनेन परस्परमित्येतदुक्तमभिप्रायम् । भक्षयति पीडयति । अन्नार्थमिति शेषः ॥ १५ ॥

क्वचिदासाद्य गृहं दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥ १६ ॥

प्रकाशिका – आसाद्य दावमित्यस्यार्थमाह ॥ क्वचिदासाद्येति । निर्वेदं विषादम् ॥ १६ ॥

क्वचित्कालविषमितराजकुलयक्षापहृतप्रियतमधनासुर्मृतक इव विगतजीवलक्षण आस्ते ॥ १७ ॥

प्रकाशिका – क्व च यक्षैर्हृतासुरित्यस्यार्थमाह ॥ क्वचित्कालविषमितेति । कालेन कलिकालादिबलेन विषमितं प्रतिकूलतां प्राप्तं यद्राजकुलं तदेव यक्षस्तेनापहृतः प्रियतमधनरूपोऽसुर्यस्य धनेऽसुसाम्यं

प्रियतमत्वेनेति दर्शनाय प्रियतमेत्युक्तम् । विगतानि जीवलक्षणानि चेष्टादीनि यस्य । अत्रापहारकर्तृभेदाद्दंशमशकसमापसदैरित्यनेन न पौनरुक्त्यम् । परैर्हृतस्व इत्येतदप्यनेनैव व्याख्यातम् ॥ १७ ॥

कदाचिन्मनोरथावगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिमनुभवति ॥१८॥

प्रकाशिका – क्वचिच्च गन्धर्वपुरमित्येतद्व्याख्याति ॥ कदाचिन्मनोरथेति । मनोरथा मनसि विद्यमाना वासनास्तैरवगतं प्राप्तं ज्ञानं यत्पित्रादि बहिष्ठतयाऽसत्तत्सत् बहिष्ठमिति जानन्निति शेषः । स्वप्नावस्थायां निर्वृतिमनुभवतीत्यर्थः ॥ १८ ॥

क्वचिद्गृहाश्रमचोदितकर्मातिभारगिरीनारुरुक्षमाणो लौकिकव्यसनकर्षितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १९ ॥

प्रकाशिका – चलन् क्वचिदित्यस्यार्थमाह । क्वचिद्गृहाश्रमे । कर्माण्येव स्थूलतयाऽतिभारा गिरयस्तानारुरुक्षमाण आरोढुमिच्छन्निति यावत् ॥ १९ ॥

क्वचिद्दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुंबाय क्रुध्यति ॥ २० ॥

प्रकाशिका – पदे पदेऽभ्यन्तर्वन्हिनेत्येतद्व्याख्याति ॥ क्वचिद्दुःसहेनेति । गृहीतसारोऽपहृतबलः ॥

स एव पुनर्निद्राऽजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किञ्चन वेद शव इवापविद्धः ॥ क्वचिद्भग्नमना दष्टो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेन क्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ॥ २१ ॥

प्रकाशिका – क्वचिन्निगीर्ण इत्येतद्व्याचष्टे ॥ स एवेत्यादिना । निद्रालक्षणेनाजगरेण गृहीतो ग्रस्तोऽन्धे तमसि मग्न इवान्यत्स्वात्मकालाविद्याव्यतिरिक्तं बाह्यं किञ्चन न वेद । शून्यारण्येऽपविद्धस्त्यक्तः शव इव शेत इत्यन्वयः । शेत इत्यनेनोत्तरार्धस्थं शेत इति पदमत्रान्वितमिति सूचयति । दष्टः स्म शेत इत्येतद्व्याख्याति ॥ कदाचिदिति । दुर्जनलक्षणैर्दंदशूकैर्दष्टोऽधिक्षिप्तो भग्नमनास्तेषु विगतस्वकीयत्वबुद्धिः । अत एवालब्धो निद्राक्षणो निद्रावसरो येन । अंध इत्यस्यार्थः क्षीयमाणविज्ञान इति । क्षीयमाणविवेक इत्यर्थः । व्यथितहृदयेनेत्यनेन तमिस्र इत्येतद्दुःखसमूह इति व्याख्यातमिति ज्ञातव्यम् । अन्धवदित्यनेनांधपदं लुप्तोपमतया प्रसिद्धान्धपरमित्यपि सूचयति ॥ २१ ॥

कर्हिस्मचित्कामसुखलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुंधानो राज्ञा स्वामिभिर्निहतः पतत्यपारे निरये ॥ २२ ॥

प्रकाशिका – कर्हि स्म चित् क्षुद्ररसानित्येतस्यार्थमाह। कर्हि स्म चिदिति। काममधुलवानिति पाठे काम्यन्त इति कामा विषयास्त एव मधुलवा मकरन्दलेशास्तानित्यर्थः। विचिन्वन्नन्वेषयन् अवरुंधानोऽपहरन्यदा निहतो भवति। तदा निरये पततीत्यर्थः। अनेन विमान इत्येतदुक्तार्थम्। एवमेव गृहाश्रमः कर्मक्षेत्रमिति काम्यस्य कर्मणः संसारहेतुत्वमुक्तम्। कर्हि स्म चिदित्यनेन च निषिद्धस्य ॥२२॥

अथ च तस्मादुभयथापि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥ २३ ॥

प्रकाशिका – तदुभयमुपसंहरन् तत्र स्मशब्दसूचितां प्रमाणप्रसिद्धिं दर्शयति ॥ अथ चेति। अथास्मदव्यवधानेनोक्तात्तस्माच्चैवमेव गृहाश्रम इत्युक्ताच्च हेतोरस्मिन् भारते वर्षे। उभयथापि विहितत्वेन निषिद्धत्वेन च विद्यमानं कर्म संसारावपनं संसारकारणमुदाहरन्ति ज्ञानिन इति शेषः। अथ च तस्याशुभप्रक्षालनं कर्म संसारावपनमुदाहरन्ति इति पाठमेव। तत्र नन्वत्र कृतस्य पापस्य प्रायश्चित्तेन नाशे कथं निरये पात इत्यवतार्याशुभप्रक्षालनं प्रायश्चित्तरूपमपि कर्म संसारावपनमुदाहरन्ति। सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति वचनेन तत्रापि दोषसंभवादित्याशय इति व्याख्येयम् ॥ २३ ॥

यदि च मुक्तस्ततो वधाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः॥

प्रकाशिका – तत्रापि कृच्छ्रादित्यस्यार्थमाह ॥ यदि चेति। वधाद्यदि मुक्तः। नाहं परद्रव्यापहर्ता मदीयमेव तद्द्रव्यमित्यादिवचनैः प्रभून्वंचयित्वा यदि द्रव्यं पुनः प्राप्तवानिति शेषः। तर्हि ततस्तद्द्रव्यं देवदत्तस्ततोऽपि प्रबल उपाच्छिनत्ति बलाद्गृण्हाति विष्णुमित्रो देवदत्तादपि प्रबलोऽनवस्थितिस्तस्य द्रव्यस्यैकत्र भोज्यतयाऽवस्थितिर्नेत्यर्थः। बन्धाद्विमुक्त इति पाठे प्रभुभिः कृताद्बन्धादित्यर्थः ॥ २४ ॥

क्वचिच्च शीतातपवातवर्षाद्यनेकाधिदैविकभौतिकात्मीयानां दुःखानां वारणायाकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥ २५ ॥

प्रकाशिका – क्वचिच्च शीतातपेत्येतद्व्याख्याति ॥ क्वचिच्च शीतेति। वर्षाद्यनेकेत्यादिना शीतातपवातवर्षेत्युक्तमुपलक्षणमिति दर्शयति। आत्मीयानामाध्यात्मिकानामित्यर्थः। अकल्पोऽसमर्थः। वस्त्राद्यभावादिति भावः ॥ २५ ॥

क्वचिन्मिथोऽभ्येत्य विपणिकः काकणिकामात्रमप्यपहरति किञ्चिद्धि विद्वेषमुपयाति वित्तशाठ्येन ॥ २६ ॥

प्रकाशिका – क्वचिन्मिथो विपणन्नित्येतद्विवृणोति ॥ क्वचिन्मिथ इति। विपणिको वणिक् वित्तशाठ्येन वित्तवंचनेन श्वो दास्यामीत्यादिरूपेण काकणिकामात्रमल्पमात्रमपि यत्किञ्चिद्वाऽधिकं वा धनधान्यादिकमपहरति गृण्हाति। तर्हि विद्वेषं तद्द्वेषविषयतामुपयातीत्यर्थः ॥ २६ ॥

क्वचिच्च क्षीणधनः शय्यासनाद्युपभोगहीनो यावदप्रतिलब्धमनोरथः परस्वादाने व्यवसितमतिस्ततोऽवमानादीनि लभते ॥ २७ ॥

प्रकाशिका – क्वचित्क्षीणधन इत्यस्यार्थमाह ॥ क्वचिच्च क्षीणधन इति ॥ २७ ॥

एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहतां स एवोद्वहति ॥

प्रकाशिका – एवमपि तस्य तत्र न वैराग्यमित्याह ॥ एवमिति । वित्तव्यतिषङ्गो विनिमयस्तदर्थमभिवृद्धो वैरो विद्वेषस्तस्यानुबन्धो निमित्तभूतं वित्तशाठ्यं यस्य स तथा । एवंविधोऽपि मिथ उद्वहतां व्यवहारं कुर्वतां मध्ये स एव यो वित्तशाठ्येन विद्वेषविषयः स एवोद्वहति । पुनर्धान्यादिग्रहणरूपव्यवहारं करोतीत्यर्थः ॥ २८ ॥

यत आरब्ध एष नरलोकसार्थस्तमध्वनः पारमुपदिशन्ति ॥ २९ ॥

यदिदं योगानुशासनमेतदेव शन्तमं ते उपशमशीला उपरतात्मान उपतिष्ठन्ति ॥३०॥

क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकज्ञानस्तद्विहारगृहारंभान् कुर्वंस्तदाश्रयोऽसक्तः सुतदुहितृकलभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धतमसि प्राहिणोति ॥ ३१ ॥

प्रकाशिका – प्रसज्जतीत्यस्यार्थमाह ॥ क्वापि देवमाययेति । देवस्य हरेर्मायया बन्धकशक्त्याऽधिष्ठानभूतया प्रस्कन्नेत्यादिकं प्रसज्जतीत्यस्य व्याख्यानम् । प्रस्कन्नं विनष्टं विवेकज्ञानं यस्य स तथा । तस्याः स्त्रियो विहारार्थं गृहोपक्रमान् । द्विजस्य यदव्यक्तपदं तदाश्रय इत्यस्याभिप्रायमाह ॥ सुतदुहितृकलभाषितेति । सुतादीनां कलभाषितैरवलोकैर्विचेष्टितैश्चापहृतं हृदयं यस्य स तथा । द्विजशब्देन सूचितार्थप्रदर्शनम् ॥ सुतदुहित्रिति । कलभाषितमित्यनेनाव्यक्तपदमित्येतद्विवृतम् । तदुपलक्षणमित्याशयेनावलोकविचेष्टितग्रहणम् । प्रसज्जतीत्यस्यैवार्थान्तरमाह ॥ आत्मानमिति । प्राहिणोति गमयति । हि गताविति धातोः ॥ ३१ ॥

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्द्धापवर्गकालोपलक्षणपरिवर्तनेन वयस्तरसा हरत आब्रह्मस्तंभादीनां मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाषण्डदेवताः कंकगृध्रबकप्राया आर्यहंससमयपरिभूताः सांकेत्येनाभिधत्ते ॥ ३२ ॥

प्रकाशिका – क्वचित्कदाचिद्धरिचक्रत इत्येतद्व्याख्याति ॥ कदाचिदिति । सुदर्शनव्यावृत्तये विष्णोश्चक्रं विशिनष्टि ॥ परमाण्वादीति । परमाणुरादिर्द्विपरार्धोऽपवर्गोऽन्तो यस्य स तथा । स चासौ कालश्च तस्योपलक्षणं ज्ञापकम् । तच्च तत्परिवर्तनं परिभ्रमणं च तेन आब्रह्मस्तंभादीनां ब्रह्माणमुपक्रम्य स्तंभादिपर्यन्तं विद्यमानानां मिषतां प्राणिनामायुर्हरतः । तथा च प्रवाहतोऽनाद्यन्तं कालाख्यमेव विष्णोश्चक्रमत्र विवक्षितमिति भावः । एतादृशाद्विष्णोश्चक्राद्वित्रस्तहृदयो परमभीतियुत इत्यर्थः । अनेन त्रसन्नित्येतदुक्तार्थम् । कालाख्यचक्रं निजायुधं यस्य तमनादृत्यायं दुराराध्य इत्युपेक्ष्य पाषण्डदेवताः पाषण्डैर्देवतात्वेन कल्पिता अपभ्रष्टा कंकगृध्रबकप्रायास्तादृशस्वभावा आर्यसमयपरिहृता ज्ञानिसिद्धान्ते निषिद्धाः सांकेत्येन संकेतमात्रनिमित्तेन । मूलप्रमाणरहितेनेति यावत् । अभिधत्ते । शीघ्रं दृष्टफलत्वादेता एव देवता इति प्रतिपादयतीत्यर्थः । तत्सेवामेव करोतीति यावत् । प्राणिनामायुर्हरतः कालचक्रान्मरणं तावदवश्यंभावि । अतो मरणात्पूर्वमेव विषयभोगार्थं शीघ्रं फलप्रदा अन्यदेवता एव सेव्या इत्याशयेन ता भजतीत्याशयः ॥ ३२ ॥

यदा तु ताभिः पाषण्डदेवताभिरात्मवंचकैरुरुवंचितो ब्रह्मकुलं समाविशंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव पुनस्तदरोचयंच्छूद्रकुलं भजत्यनिगमपरिशुद्धं यस्य हि मिथुनीभावः कुटुम्बभरणं यथा वानरजातेस्तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिग्राम्यकर्मणैव विस्मृतकालावधिः ॥ ३३ ॥

प्रकाशिका – तैर्वञ्चित इत्येतद्व्याचष्टे ॥ यदा त्विति । आत्मवंचकैरात्मा स्वयं वञ्चकः सम्यगपूजको येषां तैः स्वात्मनां सम्यगपूजितैरित्यर्थः । आत्मवञ्चितैरिति पाठः सुगमः । वञ्चितः फलादानात् । ब्रह्मकुलं ब्राह्मणजातिम् । अनेन हंसकुलमित्येतदुक्तार्थम् । तेषां ब्राह्मणानां यद्यज्ञपुरुषस्य हरेराराधनरूपं शीलं स्वभावस्तदरोचयन् इदमिष्टसाधनमित्यजानन् । शूद्रकुलमित्यनेन वानरमित्येतद्व्याख्यातम् । अनिगमपरिशुद्धमुपनयनादिवेदोक्तसंस्कारपरिशुद्धिरहितम् । एतदेव विशदयति ॥ यस्य हीति । कुटुंबभरणं चेत्येतावदेव नान्यदित्यर्थः । तज्जातिरासेनेत्येतद्व्याचष्टे ॥ तत्रापीति । निरवरोधो विधिनिषेधादिरूपप्रतिबन्धरहितः स्वैरण स्वेच्छया विहरन् क्रीडन् । विस्मृतः कालावधिर्जीवितावधिः । मृत्युरिति यावत् येन स तथा । भवतीति शेषः ॥ ३३ ॥

क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन्यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥३४॥

प्रकाशिका – क्वचिद्द्रुमेषु रंस्यन्नित्यस्यार्थमाह ॥ क्वचिद्द्रुमवदिति । ऐहिकार्थेष्वैहिकार्थसाधनेषु । व्यवायो मैथुनं तदर्थमेव क्षणः कालो यस्य सः ॥ ३४ ॥

एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये पतन् कर्मवल्लीमवलंब्य तत आपदः कथञ्चिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोक-सार्थमुपयाति ॥ ३५ ॥

प्रकाशिका – क्वचित्प्रमादादित्येतद्व्याकरोति ॥ एवमध्वनीति । ततः कथञ्चिदित्येतद्विवृणोति ॥ कर्मवल्लीमिति । अनेन वल्लीं गृहीत्वा ततः कथञ्चित्प्रतिमुक्त इत्यन्वयं सूचयति । आपद इत्यनूद्य नरकादिति व्याख्यातम् । नरलोकसार्थं मनुष्यदेहलक्षणं सार्थमित्यर्थः ॥ ३५ ॥

एतस्मिन्संराराध्वनि नानाक्लेशोपसर्गवितते बाधित आपन्नांस्तत्र तत्र विसृज्य जातं जातमुपादाय शोचन् मुह्यन् खिद्यन् बिभ्यन् हृष्यन् रुदन् गायन् साधुवर्जितोऽसाधुवन एवावर्ततेऽद्यापि ॥ ३६ ॥

प्रकाशिका – अध्वन्यमुष्मिन्नजयेति श्लोकस्य संसारकारणाज्ञानप्रदर्शनार्थं प्रवृत्तस्य परोक्षार्थोक्ति-रूपत्त्वाभावात्तं विहायाध्वन्यमुष्मिन्नुरुकृच्छ्रेत्यादि व्याचष्टे ॥ एतस्मिन्निति । उरुकृच्छ्रेत्यस्यार्थः ॥ नानाक्लेशेनेति । नानाक्लेशानेवाह ॥ शोचन्नित्यादिना । शोको दुःखम् । खेदो नालंबुद्धि र्दुःखानुषंगाद्धर्षोऽपि क्लेशप्रभेदतयोक्तस्तथा गायन्नपि साधुवर्जितः साधुमार्गप्रदर्शकशून्यः । असाधुवन एवाद्यापि आवर्तते पुनः पुनर्भ्रमतीत्यर्थः ॥ ३६ ॥

यत आरब्ध एष नरलोकसार्थः यमध्वनः पारमुपदिशन्ति यदिदं योगानुशासनं नाम शंतमं न वा एतदनुरुन्धे न्यस्तदण्डा शान्तिमन्त उपशमशीला उपरतात्मान उपतिष्ठन्ति यदपि दिग्विजयिनो यज्वानो राजर्षयो नैवैतद्व्रजन्ति किन्तु मृधे शयीरन् यस्यामेव ममैवेयं महीति कृतवैरानुबन्धाः यां विसृज्य स्वयमुपसंहृताः । यस्यामिम उपसर्गाः सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहमात्सर्त्ये-र्षावमानक्षुत्पिपासाधिव्याधिजराजन्ममरणादयः ॥ ३७ ॥

प्रकाशिका – न कश्चिदत्रेत्यादि विवृणोति ॥ यत आरब्ध इत्यादिना । यत आरब्ध एष नरलोकसार्थो यं चाध्वनः पारमुपदिशन्ति ज्ञानिनो यद्यस्मिन्विषये इदं योगानुशासनं योगशास्त्रं प्रवृत्तमेतत्परं ब्रह्म न वाऽनुरुंधे नैव प्राप्नोति । अत्र यत आरब्ध इत्यनेनाजया निवेशित इत्युक्तानुवादः कृतः । पारमित्यनन्तरम् उपदिशन्तीति शेषोक्तिः । योगमित्यस्यार्थः यदिदमिति । अनेन युज्यतेऽस्मिन्निति योग इति योगशब्दार्थो दर्शित इति ज्ञातव्यम् । नोपैतीत्यस्यार्थः । न वानुरुन्ध इति ।

न्यस्तदण्ड इत्येतद्व्याख्याति ॥ न्यस्तदण्डा इति । मनस्विन इत्यादि व्याचष्टे ॥ यदपीति । स्वयं स्वयमेवोपसंहृताः शत्रुभिर्हताः सन्तः शयीरन्न तु तद्भजन्तीत्यर्थः । बाधोपसर्गैरित्युक्तानुपसर्गानाह ॥ यस्यामिति । भवाटव्यामित्यर्थः ॥ ३७ ॥

इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां चतुर्दशोऽध्यायः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच–

भरतस्यात्मजः सुमतिर्नामाऽभिहितो यमु ह वाव केचित्पाषण्डिनो विलोक्य ऋषभपदवीमनुवर्तमानमनार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयसीं कलौ कल्पयिष्यन्ति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ ऋषभपदवीमनुवर्तमानमवधूतमार्गानुवर्तिनं यं सुमतिमवेदसमाम्नातां वेदविरुद्धबौद्धागमप्रतिपादितां कल्पयिष्यन्ति । बुद्धोऽयं साक्षादवतीर्ण इति मंस्यन्त इत्यर्थः ॥ १ ॥

तस्माद्वृध्रसेनायां देवपादिर्नाम पुत्रोऽभवत् ॥ २ ॥

अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः य आत्मविद्यायां स्वयमखिलायां संसिद्धो महापुरुषमनुसस्मार ॥ ३ ॥

प्रकाशिका – तत्तनयो देवपादितनयः ॥ ३ ॥

प्रतीहात्सुवर्चलायां प्रतिहर्तादयस्त्रय आसन् इज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यां व्योमभूमानावजनिषाताम् ॥ ४ ॥

प्रकाशिका – प्रतिहर्त्तादयः प्रतिहर्त्ता प्रस्तोतोद्गातेति नामान इत्यर्थः ॥ अजनिषातां जातौ ॥ ४ ॥

व्योम्न ऋषिकुल्यायामुद्गीथः ततः प्रस्तोता देवकुल्यायां प्रस्तोतुर्विरुरुत्सायां हृदयज आसीद्विभुः विभोरत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगदभिरक्षया गृहीतसत्वस्य कलात्मवत्ताभिलक्षणेन महापुरुषतां प्राप्तः ॥ ५ ॥

प्रकाशिका – हृदयज औरसपुत्रः । जगदभिरक्षया निमित्तभूतया । तदर्थमिति यावत् । गृहीतसत्त्वगुणस्य विष्णोः कलायाः अंशस्यात्मवत्ता मूर्तिमत्ता । विशेषावेश इति यावत् । तस्याभिलक्षणेन करचरणादिषु चक्रादिचिन्हेन महापुरुषतां महापुरुषेषु प्रियव्रतादिषु गणनीयताम् । सोऽवनिमजुगुपद्वै इत्यन्वयः ॥ ५ ॥

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परब्रह्मणि सर्वात्मनाऽर्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयाऽऽपादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितविशुद्धसत्व उपरतानात्म्ये स्वात्मनि स्वयमुपलभ्यमानब्रह्मानुभावोऽपि निरभिमान एवावनिमजुगुपत् ॥ ६ ॥

प्रकाशिका – प्रजापालनादिलक्षणेनेज्यादिना च स्वधर्मेण परिभावितविशुद्धसत्त्व इत्यन्वयः । कथंभूतेन स्वधर्मेण । परब्रह्मणि सर्वात्मना सर्वप्रकारेणार्पितमर्पणं तेन परमार्थ उत्तमपुरुषार्थो मोक्षस्तस्य लक्षणेन लिङ्गतयाऽनुमापकेन परिभावितं वशीकृतं विशुद्धं सत्त्वमन्तःकरणं यस्य स तथा । उपरतं निवृत्तमनात्म्यं विषयसंबन्धेन जायमानविकारलक्षणं यस्मिंस्तस्मिन्नात्मनि मनस्युपलभ्यमानोऽपरोक्षीक्रियमाणो ब्रह्मानुभावो ब्रह्मसामर्थ्यं यस्य स तथा । निरभिमान एवाहंममाभिमानशून्य एव ॥६॥

तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति ॥
गयं नृपं कः प्रतियाति कर्म-भिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ॥
सदागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ७ ॥

तात्पर्यम् – 'प्रियव्रतो गयश्चैव कर्मदेवसमो गुणैरि'ति षाड्गुण्ये ॥ ६ ॥

प्रकाशिका – तस्येमां गाथामित्यनेनैव गीयमानत्वाद्गाथेति निरुक्तिं सूचयति । पुराविदः पुराणज्ञाः । अन्यः कः कर्मभिर्गयं नृपं प्रतियाति तत्सदृशो भवति । न कोपीत्यर्थः । कीदृशो अन्य इत्यतस्तं विशिनष्टि ॥ यज्वेत्यादिना । अभिमान्यभितः सन्मानवान् । सदाऽगता श्रीर्यस्य सः । सतां सदसः सभायाः पतिः । नन्वेतादृशो रामकृष्णादिरेवास्तीत्यत उक्तम् ॥ भगवत्कलां साक्षादंशमृत इति । नन्वथाऽपीदं बाधितम् । गयसमानानां प्रियव्रतादीनां सत्वादित्यतोऽत्र भगवत्कलामित्येतदुपलक्षणमित्याशयेन प्रमाणं पठति ॥ प्रियव्रत इति । कर्मदेवसमावेवेत्यन्वयः । तथा च भगवत्कलां रामकृष्णादिरूपां ब्रह्मादीन्देवांश्च्यवनोचथ्यादिकर्मदेवांस्तत्समं प्रियव्रतं च ऋतेऽन्यः कः प्रतियातीति मूलार्थ इति भावः ॥ ७ ॥

यमभ्यषिञ्चन्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ।
यस्य प्रजानां दुदुहे धराऽऽशिषो यथेप्सिता वै गुणवत्स्नुतोधाः ॥ ८ ॥

प्रकाशिका – सतीः सत्यः । सत्या आशिषो यासां ता दक्षकन्याः । कान्तिः श्रीर्वाक् स्मृतिर्मेधा धृतिः क्षमेत्याद्या यस्य गयस्य राज्ञः संबन्धिभूतानां प्रजानां धरा यथेप्सिता आशिषो दुदुहे । वा इत्यनेनात्रागमादिप्रसिद्धिं दर्शयति । गुणवान् गयो वत्सस्थानीयस्तेन स्नुतमोधो यस्याः सा तथा । गुणवसत्स्नुतोधा इति पाठे गुण एव वत्सस्तेन स्नुतमोधो यस्या इति व्याख्येयम् ॥ ८ ॥

छन्दांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः ।
प्रत्याहृता युधि धर्मे च विप्रा यस्याशिषः षष्ठमंशं प्रजाश्च ॥ ९ ॥

प्रकाशिका – वेदा अपि आपाततः प्रतीतकर्मफलानिच्छुत्वेऽपि तस्य कामान्दुदुहुरित्याह ॥ छन्दांसीति । अथोऽन्यच्च तस्य माहात्म्यं कथ्यत इत्यर्थः । कथंभूता नृपाः । युधि धर्मे च प्रत्याहृताः अमुखीकृता विप्रा आशिषः प्रजाश्च स्वसंपादितद्रव्यादेः षष्ठमंशमाजह्रुरित्यन्वयः ॥ ९ ॥

यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ।
श्रद्धा विशुद्धा चलभक्तियोगसमर्पितेज्या फलमाजहार ॥ १० ॥

प्रकाशिका – उरुसोमपीथे बहुसोमपानवति अध्वरमाप्नोतीत्यध्वर आत्मा यज्ञभोक्ता भगवान्हरिर्मघोनि देवेन्द्रे । इदमुपलक्षणम् । ब्रह्मादिके प्राणिजाते यज्ञभागेनान्नादिना च माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलं पुण्यरूपमाजहार स्वीकृतवान् । प्रीतोऽभूदिति यावत् ॥ १० ॥

यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्चात् ।
प्रीयेत सद्यः स हि विश्व एष प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ ११ ॥

प्रकाशिका – ननु कथं ब्रह्मादिके माद्यति भगवान्प्रीतोऽभूदित्यत उक्तं विशदयति ॥ यत्प्रीणनादिति । विरिञ्चमारभ्य देवादितृणान्तं यत्प्राणिजातं तस्य बर्हिषि यज्ञे प्रीणनात् सः भगवान् सद्यः प्रीयेत । कुतो हि यस्मादेषो विश्वस्तत्र प्रविष्टस्ततश्चाधिष्ठानतया पूजितेषु ब्रह्मादिप्रतीकेषु तदन्तर्गतो हरिः प्रीतो भवतीत्युक्तं भवति । यद्वा । ननु ब्रह्मादिषु सत्सु किं हरिप्रीत्येत्यपेक्षायां ब्रह्मादिप्रीत्या यत्फलं तद्धरिप्रीणनादेव भवतीत्याशयेनाहुः ॥ यत्प्रीणनादिति । यस्य हरेः प्रीणनादित्यर्थः । देवादितृणान्तं जगत् प्रीयेत तत्प्रीत्या यत्फलं तल्लभ्यते तत्कुत इत्यत आह । हि

यस्मात्स एषो विश्वः पूर्णगुण इति । तथा च सर्वगुणपूर्णतया हरेरेव सर्वपुरुषार्थप्रदत्वात्तत्प्रीणनेनैवेतरप्रीतिसाध्यं फलं लभ्यत इत्युक्तं भवति । ननु गयस्य हरिः किमिदानीमेव प्रीतोऽभून्नेत्याह ।। प्रीतः स्वयमिति । अयं स्वभावतः प्रीत एव पुनर्यज्ञादिना विशेषतः प्रीतिमगादित्यर्थः ।। ११ ।।

गयाज्जयंत्यां चित्ररथः स्वस्तिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्जायां सम्राडजनिष्ट ।। १२ ।।

तत उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत तस्मात्सुषेणायां मधुर्नामाभवत् । मधोः सुमनस्यां वीरव्रतस्ततो व्रजायां मन्युप्रमन्यू जज्ञाते मन्योः सत्यायां भुवनस्ततो दोषायां त्वष्टा अजनिष्ट त्वष्टुर्विरजोर्विरोचनायां विरजस्य शतजित्प्रवरं पुत्रशतं कन्याश्च विषूच्यां किल जाताः ।। १३ ।।

तत्रायं श्लोकः-

प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ।।
अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ।। १४ ।।

प्रकाशिका – शतजिन्नामा पुत्रः प्रवरो यस्मिंस्तच्छतजित्प्रवरम् । अतिशयेन कीर्त्याऽलमकरोद्भूषितवान् ।। १४ ।।

।। इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां पञ्चदशोऽध्यायः ।। १५ ।।

।। अथ षोडशोऽध्यायः ।।

राजोवाच–

इत्युक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमाः सह दृश्यते ।। १ ।।

प्रकाशिका – ।। हरिः ॐ ।। इतः परं संक्षेपेणाप्युक्तं समुद्रद्वीपमानादिकं प्रपञ्चयत्यध्यायपञ्चकेन । तत्र राजा विशेषतो ज्ञातुमुक्तमनुवदति ।। इत्युक्त इति । यावद्यावत्पर्यन्तमसावादित्यस्तपति । यत्र यावति च प्रदेशेऽसौ चन्द्रमा ज्योतिषां नक्षत्राणां गणैः सह दृश्यते । त्वया भूमण्डलस्यायामविशेषस्तावानित्युक्तः ।। १ ।।

तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्तसिन्धव उपक्लृप्ताः यत एतस्याः सप्तद्वीपविशेषकल्पस्त्वया भगवान् खलु सूचितः एतदेव निखिलमहंमानतो लक्षणतश्च सर्वं जिज्ञास्यामि ॥ २ ॥

प्रकाशिका– तत्रापि भूमण्डलेऽपि रथचरणपरिखातै रथचक्रपरिचरणनिमित्तपरिखातैर्यतो येभ्य एतस्या भुवः सप्तद्वीपानां विकल्पो विविधकल्पना सूचितः संक्षेपेणोक्तो निखिलं समुद्रद्वीपादिकं सर्वं समुद्रद्वीपादिषु विद्यमानं ततः परतोऽपि विद्यमानं काञ्चनभूम्यादिकमित्यर्थः । अतो न निखिलशब्देन गतार्थता ॥ २ ॥

भगवतो गुणमये एव स्थूलरूपे आवेशितं मनो ह्यगुणेऽपि सूक्ष्म आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु ह वै तत् गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥

प्रकाशिका – मोक्षानुपयोगित्वात्किमनेनेत्यत एतज्ज्ञानमपि मोक्षजनकब्रह्मज्ञानोपयोग्यत आवश्यकमित्याशयेनाह ॥ भगवत इति । गुणमये सत्त्वादिगुणविकारात्मके स्थूलरूपे पातालाद्यवयवविशिष्टे चतुर्दशलोकात्मकप्रतिमारूपे आवेशितं निरन्तराभ्यासेन प्रवेशितमगुणे सत्त्वादिगुणविकारशून्ये सूक्ष्मे स्वान्तर्यामिण्यात्मज्योतिषि स्वानुग्रहेणैव प्रकाशमाने । मायावाद्यभिमतनिर्गुणब्रह्मव्यावर्तनाय भगवति भगवच्छब्दवाच्यं वासुदेवाख्यं न मायाशबलमिति प्रदर्शनाय परे ब्रह्मणीत्युक्तम् । तदु तस्मादेव ॥ ३ ॥

ऋषिरुवाच–

न वै महाराज भगवतो मायागुणविभूतेः स्थानविशेषाणां नामरूपतः काष्ठां मनसाऽधिगन्तुमलं विबुधायुषेणापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥

प्रकाशिका – माया प्रकृतिस्तस्या गुणाः कार्याणि तेषु विभूतिर्विविधभवनं यस्य तस्य भगवतः स्थानविशेषाणां समुद्रद्वीपादीनां काष्ठामवसानमधिगन्तुं यदा नालं न समर्थस्तदा किं वाच्यं वक्तुमिति भावः । नामतो लवणेक्षुसुरासर्पिरित्यादिनामतो रूपतः संस्थानविशेषतो मानतो लक्षादिसङ्ख्यारूपपरिमाणतो लक्षणतस्तत्तदसाधारणधर्मतः ॥ ४ ॥

यो वा अयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करम् ॥ ५ ॥

प्रकाशिका – कुवलयं भूमण्डलं तदेव कमलं तस्य कोशाः सप्तद्वीपास्तेष्वभ्यन्तरकोशोऽयं द्वीपो जंबुद्वीपो नियुतयोजनविशालः। अयुतदशकं नियुतमित्युच्यते। तथा च लक्षयोजनविस्तीर्ण इत्यर्थः॥

यस्मिन्नववर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥ ६ ॥

प्रकाशिका – नव योजनसहस्रमायाम एव विस्तारो येषां तानि तथा। यद्यपि भद्राश्वकेतुमालवर्षयोः प्रत्येकमेकत्रिंशद्योजनसहस्रायामत्वं तथाऽप्यधिकसंख्यायां न्यूनसंख्याऽन्तर्भावाभिप्रायेणेयमुक्तिः। नवैवेत्यवधारणाभिप्राये छत्रिन्यायेनेयमुक्तिरिति ज्ञातव्यम्॥ ६ ॥

येषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सौवर्णः कुलगिरि राजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्र-योजनविततो मूले षोडशसहस्रं तावताऽन्तर्भूम्यां प्रविष्टः ॥ ७ ॥

प्रकाशिका – नाभ्यां मध्ये द्वीपायामो लक्षयोजनप्रमाणस्तावान्समुन्नाह उच्छ्रयो यस्य लक्षयोजनोच्छ्रित इत्यर्थः। कुवलयकमलस्य भूमण्डललक्षणपद्मस्य कर्णिकाभूतः कर्णिकास्थानीयः षोडशसहस्रं षोडशयोजनसहस्रं विततः। तावता षोडशयोजनसहस्रमानेन भूम्यामन्तः प्रविष्टः। तथा च बहिश्चतुरशीतियोजनसहस्रमानेन दृश्यत इति भावः॥ ७ ॥

उत्तरोत्तरेणेलावृतान्नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथवः एकैकशः पूर्वस्मा-दुत्तरोत्तराद्दशांशेन दैर्घ्य एव ह्रसन्ति ॥ ८ ॥

प्रकाशिका – उत्तरोत्तरेणेलावृतादिलावृतापेक्षयोत्तरस्यां दिशि क्रमेण नीलादयस्त्रयो रम्यकादि वर्षाणां मर्यादागिरयः प्रागायताः पश्चिमां दिशमारभ्य पूर्वतो दीर्घाः क्षारोदो लवणसमुद्र एवावधिर्येषां द्विसहस्रपृथवो द्विसहस्रयोजनविस्तीर्णा दैर्घ्य एव ह्रसन्ति। दशांशेन दैर्घ्य एव ह्रसन्ति नोच्चत्वेन वा पृथुत्वे इत्यर्थः॥ ८ ॥

एवं दक्षिणेनेलावृतान्निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः अयुतयोजनोत्सेधाः हरिवर्षकिम्पुरुषभारतानां यथासङ्ख्यम् ॥ ९ ॥

प्रकाशिका – एवमिलावृताद्दक्षिणेन दक्षिणस्यां दिशि निषधादयः प्रागायताः प्रागायतत्वादि-विशेषविशिष्टा अयुतयोजनोत्सेधा अयुतयोजनमुच्छ्रयो येषां ते तथा। अयं चोत्सेधो नीलादीनामपि

द्रष्टव्यः । हरिर्वर्षादिसंज्ञानां वर्षाणां यथासङ्ख्यं मर्यादागिरयो यथा नीलादयस्तथा क्रमेण दैर्घ्य एव ह्रसन्ति । अत्रायं विवेकः । नीलनिषधौ लक्षयोजनदीर्घौ । अन्ये क्रमेण दशांशतो न्यूना इति ।। तदुक्तं विष्णुपुराणे ।। लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापर इति । अत्र मध्ये स्थिताविति हेतुगर्भविशेषणम् । तथा च मध्ये स्थितत्वाल्लक्षप्रमाणावित्यर्थः । अत्रेलावृताद्बहिर्विद्यमानयोरनयोर्न मुख्यतो मध्ये स्थितत्वम् । अतः किञ्चिदूनमेव लक्षप्रमाणत्वम् । लक्षप्रमाणावित्युक्तिस्तु अल्पत्वात्तदविवक्षयेति ज्ञातव्यम् ।। ९ ।।

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रवृद्धौ केतुमालभद्राश्वयोः सीमानं विदधाते ।। १० ।।

प्रकाशिका – तथेलावृतमिति । यथेलावृतादुत्तरतो दक्षिणतश्च नीलनिषधादयो रम्यकादिवर्षमर्यादां कुर्वन्ति । तथेलावृतस्यापरेण पश्चिमेन पूर्वेण च माल्यवद्गन्धमादनौ यथासङ्ख्यं केतुमालभद्राश्वयोस्तन्नामकयोः सीमानं मर्यादां विदधात इत्यन्वयः। कथंभूतौ । आनीलनिषधायतावुत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं दीर्घावित्यर्थः । द्विसहस्रवृद्धौ द्विसहस्रविस्तारावित्यर्थः । अत्र मेर्वादिपर्वताक्रान्तभूप्रदेशानामपि गणनायां विवक्षितत्वाज्जंबूद्वीपस्य लक्षयोजनप्रमाणत्वं ज्ञातव्यम् । तथा हि पूर्वापररेखाविवक्षायां मेरोः प्रदेशः षोडशसहस्र इलावृतपूर्वापरभागद्वयस्याष्टादशसहस्रो गिर्योश्चतुःसहस्रः केतुमालभद्राश्वयोरासमुद्रं दीर्घयोर्द्विषष्टिसहस्र इत्येवं लक्षप्रमाणता । दक्षिणोत्तररेखाविवक्षायां तु मेरोः षोडशसहस्राणीलावृतस्याष्टादश षण्णां गिरीणां द्वादशान्येषां षण्णां वर्षाणां चतुःपञ्चाशदित्येवं लक्षप्रमाणता । अतोऽत्र वर्षप्रदेशमात्रगणनायां जंबूद्वीपस्य न लक्षप्रमाणता प्राप्नोतीति शङ्काऽनवकाश इति ।। १० ।।

मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहाः मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः ।। ११ ।।

प्रकाशिका – अयुतयोजनप्रमाणो विस्तारोन्नाहो येषां ते तथा । अवष्टंभगिरय इति मेरोरुपरिभागे विस्तारोऽधिको मूले त्वल्पोऽतस्तस्य परितोऽवष्टंभगिरयो मूलेऽपि विस्ताराधिक्यायोपक्लृप्ता इत्यर्थः ।।

चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इव अधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ।। १२ ।।

प्रकाशिका – अतैतेषां तेषां गिरीणां प्रत्येकमयुतयोजनविस्तारोक्तिरेकैकस्य परितो गमने यानि योजनानि तदभिप्रायेण । वस्तुतस्तु किञ्चिदधिकत्रिसहस्रयोजनविस्तारत्वमेव सर्वेषाम् । अत एव यस्य

स्तंभादेर्यावान्विस्तारस्तत्त्रिगुणितस्तत्परिवेष्ठितसूत्रे दृश्यते । अतः परितो नवयोजनविस्तारे इलावृते वर्षेऽयुतयोजनविस्ताराणामेतेषां कथमवस्थानमिति शङ्काऽनवकाश इति ध्येयम् । एतेषु मन्दरादिषु पर्वतकेतवो मन्दरादिपर्वतानां ध्वजा इव स्थिताः । अधिकसहस्रयोजनोन्नाहाः शताधिकसहस्र-योजनोन्नाहा इत्यर्थः ॥ तदुक्तम् ॥ एकादशशतायामाः पादपा गिरिकेतव इति । तावत्प्रमाणा विटपविततयः शाखाविस्तारा येषां शतयोजनं परिणाहः स्थूलता येषाम् ॥ १२ ॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥ १३ ॥

प्रकाशिका – पयोमध्विक्षुरसमृष्टं जलं च येषु ते तथा । यदुपस्पर्शिनो यत्सेविनः । हे भरतर्षभ । धारयन्ति तदभिव्यक्तिमन्तो भवन्ति ॥ १३ ॥

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतो भद्रमिति ॥ १४ ॥

येष्वमरपरिवृढाः सहामरललनाललामयूथपतयः उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ १५ ॥

प्रकाशिका – देवोद्यानानि देवानां क्रीडायोग्यवनानि । अमरपरिवृढा देवश्रेष्ठाः । कथंभूताः । अमरललनानां सुरस्त्रीणां या ललामभूता भूषणभूताः । श्रेष्ठा इति यावत् । तासां यूथस्य पतयः सह संभूय विहरन्ति । सह विद्यमानो योऽमरललनाललामयूथस्तस्य पतय इति वा ॥ १४,१५ ॥

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्य-मृतकल्पानि निपतन्ति ॥ १६ ॥

प्रकाशिका – मन्दरोत्सङ्गे मन्दरतटे देवोपभोगयोग्यत्वाद्देवचूतस्तच्छिरसोऽग्रप्रदेशाद्रसोदेन रसलवणोदकेन ॥ १६ ॥

तेषां विशीर्यमाणानामतिमधुरसुरभिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दगिरि-शिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥

प्रकाशिका – पूर्वेणेलावृतं इलावृतवर्षस्य पूर्वप्रदेशम् ॥ १७ ॥

यदुपजोषाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति ॥ १८ ॥

प्रकाशिका – यदुपजोषाद्यस्य रसस्य सेवनादनुवासयति सौरभ्ययुक्तं करोति ।। १८ ।।

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ।। १९ ।।

तावदुभयोरपि रोधसोर्या मृत्तिका तत्र फलरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ।। २० ।।

प्रकाशिका – अनस्थिप्रायाणां बहुलमनन्तर्गतबीजानामतिसूक्ष्मबीजानामिति यावत् । अत्रेभकायनिभानामिति पूर्वं गिरिशिखरस्थूलानीति चोक्तिः फलानां तावत्स्थूलतामभिप्रेत्यैव । न तु अरत्नीनां शतान्यष्टावेकषष्ठ्यधिकानि च । फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिरिति वायुपुराणोक्त्यनुसारेणान्यथैव ज्ञातव्यम् ।। भागवतानुसारेणैवान्यग्रन्थानां योजनीयत्वस्य भगवत्पादैरभिहितत्वात् । दक्षिणेनात्मानमिति । आत्मनो दक्षिणतो यावदिलावृतमुपस्यन्दयति वहति तावत्तावतीलावृतवर्षप्रदेशे विद्यमानरोधसोस्तीरयोर्या मृत्तिका सा जाम्बूनदं नाम सुवर्णं भवति । कथंभूतम् । अमरलोके आभरणानि यस्मात्तत् ।। १९,२० ।।

यदु ह वाव विबुधादयः सह युवतिभिः कटकमुकुटकटिसूत्राद्याभरणरूपेण खलु धारयन्ति ।। २१ ।।

यस्तु महाकदम्बः सुपार्श्वनिगूढस्तस्य कोटरेभ्यो निःसृताः पञ्चव्यामपरिणाहाः पञ्चमधुधाराः सुपार्श्वशिखरात्पतन्त्योऽपरेणात्मानं इलावृतमनुमोदयन्ति ।। २२ ।।

प्रकाशिका – एतदेवाह ।। यदु हवा वेति । कोटरेभ्यो विवरेभ्यो । व्यामो हस्तावधिः स्मृत इत्यभिधानात् पञ्च व्यामः पञ्चहस्तपरिमितः परिणाहः स्थौल्यं यासाम् । अपरेणात्मानमात्मनः पश्चिमतः ।। २१,२२ ।।

याह्युपभुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ।। २३ ।।

एवं कुमुदनिरूढो यः शतबलशो नाम वटस्तस्य स्कन्धेभ्योऽर्वाचीनाः पयोदधिघृतमधुगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्वकामदुघा नदाः कुमुदाग्रात्पतन्त उत्तरेणेलावृतमुपभोजयन्ति ।। २४ ।।

प्रकाशिका – मुखनिर्वासितो मुखनिर्गतोऽर्वाचीना अधोमुखाः । उपभोजयन्ति इलावृतस्थजनानिति शेषः ।। २३-२४ ।।

यानुपजुषाणानां न कदाचित्क्वचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्य जरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥

कुरङ्गकुररकुसुम्भकवैकङ्क त्रिकूटशिशिरपतङ्गरुचकनिषधशितिवासकपिलशङ्ख-वैदूर्यजारुधिहंसर्षभनीरनागकालञ्जरनारदादयो गिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥

प्रकाशिका – उपसर्गा ज्ञानविघ्नाः । आदिपदेन राजदस्युग्रहादिपीडादिसङ्ग्रहः । सुखं भवतीति शेषः ॥ २५-२६ ॥

जठरदेवकूटौ मेरुं पूर्वेणाऽष्टादशयोजनसहस्रौ उदगायतौ द्विसहस्रं पृथूत्तुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रगायतौ एवमुत्तरतः शृङ्गमकरौ इत्यष्टभिरेतैः परिस्तृतोऽग्निरिव परितो मेरुश्चकास्ति काञ्चनगिरिः ॥ २७ ॥

प्रकाशिका – मेरुं पूर्वेण मेरोः पूर्वतो मन्दराद्बहिःप्रदेश इत्यर्थः । उदगायतौ इलावृत-दक्षिणोत्तरविस्तारौ द्विसहस्रं पृथु च तुंगौ च भवतोऽपरेण मेरोः पश्चिमतः सुपार्श्वाद्बहिः । एवमित्यष्टादशयोजनसहस्रत्वस्योदगायतत्वस्यचातिदेशः । दक्षिणेन मेरोर्दक्षिणतो मेरुमन्दराद्बहिः प्रागायताविलावृतपूर्वापरविस्तृतावष्टादशयोजनसहस्रत्वस्योपलक्षणमेतत् । उत्तरतः । मेरोरिति शेषः । कुमुदाद्बहिरेवमिति प्रागायतत्वस्याष्टादशयोजनसहस्रत्वस्य चातिदेशः ॥ २७ ॥

मेरोर्मूर्धनि भगवत आत्मयोनेरुपक्लृप्तां पुरीं अयुतयोजनसाहस्रीं सम-चतुरस्रां शातकौम्भीं शतकोटिं वदन्ति ॥ २८ ॥

प्रकाशिका – आत्मयोनेर्विरिञ्चस्य शातकुंभीं सुवर्णमयीं शतकोटिं शतकोटिसंज्ञाम् ॥ २८ ॥

तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयभागेन पुरोऽष्टावुपक्लृप्ताः ॥ २९ ॥

तात्पर्यम् – 'यथा भागवते तूक्तं भौवनं कोशलक्षणम् । तस्याविरोधतो योज्यं सर्वग्रन्थान्तर-स्थितम् । मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे । राहुसोमरवीणां च मण्डलाद्द्विगुणोक्तिताम् । विनैव सर्वमुन्नेयं योजना भेदतोऽत्र त्वि'ति ब्रह्माण्डे ॥ २९ ॥

प्रकाशिका – यथारूपमिति । मानसोत्तरपर्वतगतेन्द्रादिलोकपालपुरीरूपानतिक्रमेणेत्यर्थः । यथानुरूपमिति पाठे यथानुकूलमित्यर्थः । तुरीयभागेन विरिञ्चपुर्याश्चतुर्थांशप्रमाणेन सार्धद्विसहस्र-योजनरूपेणेत्यर्थः । पुरः पुर्यस्तामनुपरित इत्यस्य विवरणम् ।। यथा दिशमिति । ननु भागवते कथ्यमानभुवनकोशलक्षणप्रमाणादेः संबन्धिभूवलयादिप्रमाणस्यान्यग्रन्थेष्वन्यथाकथनाद्विरोध इत्याशङ्कां प्रमाणेनैव परिहरति ।। यथा भागवत इति । तु निरवकाशतयोक्तम् । भुवनकोशो ब्रह्माण्डस्तत्संबन्धि तदन्तस्थं भूलोकादिकं भौवनं कोशं तस्य लक्षणं प्रमाणाद्युपलक्षणमेतत् । अत्र मुमागम आर्षः । तस्याविरोधतस्तदनुसारेण सर्वाणि च तानि ग्रन्थान्तराणि च तेषु स्थितं भूरादिलोकप्रमाणादिकं योज्यमित्यर्थः । नन्वेवं लवणेक्षुसुरासर्पिदधिक्षीरशुभोदका इत्युक्तप्रकारेण समुद्रनिर्देशे कर्तव्ये क्षारोदे-क्षुरसोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधय इति प्रियव्रतोपाख्याने क्षीरोदानन्तरं दधिमण्डोदो निर्दिष्टस्तथाऽत्रापि घृतोदानन्तरं दधिमण्डोदे वक्तव्ये क्षीरोद उक्तः । तथा सूर्यमण्डलाद्विगुणं सोममण्डलं तस्माद्विगुणं राहुमण्डलमिति वक्तव्ये द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोरित्युक्तम् । तदेतत्सर्वं निरवकाशप्रमाणविरुद्धम् । अतः कथं भागवतानुसारेण ग्रन्थान्तरयोजनोक्तिरित्यत उक्तस्यापवादमाह ।। मण्डोद इति । दधिमण्डोद इत्यर्थः । एवशब्दश्चार्थे । व्यत्यास इत्यनेन संबध्यते । शुभोदेतरेषां षण्णां समुद्राणां मण्डोदे पूरणं पूर्तिम् । मण्डोदस्य षष्ठत्वमिति यावत् । तद्वचनं क्षीरसागरे व्यत्यासं षष्ठस्य क्षीरसागरस्य पञ्चमतया वचनं च । द्विगुणविरुद्धोक्तिरद्विगुणोक्ति-र्मण्डलानामद्विगुणोक्तिर्येषां ते मण्डलाद्विगुणोक्तयस्तेषां भावस्तामित्यर्थः । एतत्त्रयमेव विना सर्वग्रन्थान्तरोक्तं भागवतानुसारेणोन्नेयमित्यर्थः । नन्वेवमुक्ते स्थलत्रये भागवतमप्रमाणं स्यादित्यत आह ।। योजनाभेदत इति । तुशब्दोऽवधारणे । अत्रोक्ते स्थलत्रये योजनाभेदतो योजनाविशेषेणैव सर्वं ग्रन्थान्तरे यथाऽस्ति तथोन्नेयमित्यर्थः । मण्डोदपूरणे क्षीरसागरव्यत्यासे च योजनाविशेषः भगवत्पादैरेव वक्ष्यते । सूर्यसोमराहुमण्डलानां यथा द्विगुणताऽत्रोक्ता स्यात्तथा योजनां तत्रैव प्रदर्शयिष्यामः ।। २९ ।।

।। इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां षोडशोऽध्यायः ।। १५ ।।

॥ अथ सप्तदशोऽध्यायः ॥

श्रीशुक उवाच–

तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिरभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥१॥

तात्पर्यम् – 'वाराहे वामपादं तु तदन्येषु तु दक्षिणम् । पादं कल्पेषु भगवानुज्जहार त्रिविक्रम' इति च ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ इलावृते चतुर्दिक्षु गङ्गागमनप्रकारं वक्तुमाह ॥ तत्रेति । बलेर्यज्ञे लिङ्गं वामनरूपं यस्य विक्रमतो दक्षिणेन पदा भुवमाक्रम्य वामपादमुत्क्षिपतो वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्याण्डकटाहस्तस्य विवरेणान्तःप्रविष्टा या बाह्यजलधारा सा दिवो मूर्धन्यवततारेत्यन्वयः । कथंभूता । तस्य यच्चरणपङ्कजं तस्यावनेजनेन प्रक्षालनेनारुणा ये पादतललग्नपांसवस्त एव किञ्जल्कास्तैरुपरंजिताऽरुणीभूता । अत एवाखिलस्य जगतोऽघमलापहमुपस्पर्शनमाचमनं यस्याः सा । अघमान्तरं मलं बाह्यं तथाऽपि स्वयममला तत्पापसङ्गशून्या । तदा तस्या नामाह ॥ साक्षादिति । प्रतिमापादोदकवैलक्षण्यप्रदर्शनाय साक्षादित्युक्तम् । अनुपचारेणेत्यर्थः । भगवत्पदीत्यनुपलक्षितं यद्वचो जान्हवी भागीरथीत्याद्युपलक्षणान्तररहितं नाम तेनाभिधीयमाना तस्मिन्समये भगवत्पदीत्यैव नाम न जान्हवीत्यादीनि नामानीति भावः । दिवोऽन्तरिक्षस्य मूर्धन्यवततार प्रकाशितस्वरूपाऽभूदित्यर्थः । नन्वत्र वामपादांगुष्ठेति किमर्थमुक्तमित्यतोऽत्राभिप्रायं प्रमाणेनैव दर्शयति ॥ वाराह इति । तुशब्दोऽवधारणे । तदन्येषु प्रतिदिनं जायमानेषु कल्पेषु वामपादेन भुवमाक्रम्य दक्षिणपादमुज्जहार । वाराहे तु वामपादमेवोज्जहारेत्यर्थः । तथा चेमं विशेषमभिप्रेत्य मूले वामपादेत्युक्तमिति भावः । कोऽसौ दिवो मूर्धेत्यपेक्षायामाह ॥ यत्तद्विष्णुपदमिति । विष्णोः शिंशुमारस्य पदं स्थानं यद्विष्णुपदं तद्दिवो मूर्धनीत्यत्र विवक्षितमाहुरित्यर्थः ॥ १ ॥

यत्र हवा व वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्याद्विवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलक अधुनापि परमादरेण शिरसा बिभर्ति ॥ २ ॥

प्रकाशिका – किं तच्छिंशुमारस्थानमित्यतो ध्रुवलोक एवेत्याशयेनाह ॥ यत्र हवा वेति । यत्र विष्णुपदे वीरव्रत आरब्धान्तगामिनां व्रतं यस्यौत्तानपादिर्ध्रुवः । अस्मत्कुले देवताया हरेश्चरणारविन्दोदकमिति हेतोर्यामनुसवनं प्रतिदिनं त्रिषवणमिति वा । परमादरेण बिभर्तीत्यर्थः । कथंभूतः सन् । अनुवसनमुत्कृष्यमाणेन वर्धमानेन भक्तिलक्षणयोगेन दृढमत्यन्तं क्लिद्यमानमन्तर्हृदयं यस्य । अत एवोक्तमौत्कण्ठ्येन विवशामीलितं यल्लोचनयुगलं तदेव कुड्मले ताभ्यां विगलितममलं बाष्पं तस्य कलया सहाभिव्यज्यमानं रोमकुलकानां कुलं समूहो यस्य । ततो ध्रुवलोकादधः पतन्ती ॥ २ ॥

तत ऋषयस्तत्प्रभावज्ञा ऋषिलोके इयं ननु तपस आत्यन्तिकी सिद्धिरेतावतीति भगवति सर्वात्मनि वासुदेवेऽनवरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षवः सबहुमानमेवाद्यापि जटाजूटैरुद्वहन्ति ॥ ३ ॥

प्रकाशिका – ऋषयः सप्तर्षयस्तस्या गङ्गायाः प्रभावाभिज्ञाः सन्तो यां जटाजूटैरुद्वहन्तीत्यन्वयः । तपसाऽऽत्यन्तिकी सिद्धिरेतावती नन्वित्यभिप्रायवन्तः । उपेक्षिता अन्यार्था अन्यपुरुषार्था आत्मगतिरात्मज्ञानं स्वप्रवृत्तिर्वा येषाम् । मुमुक्षुव आगतां मुक्तिमिव सबहुमानं यथा स्यात्तथा ॥ ३ ॥

ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेनावतरन्तीन्दुमण्डलमाप्लाव्य ब्रह्मसदने निपतति ॥ ४ ॥

प्रकाशिका – ततः सप्तर्षिलोकाद्देवयानेनेन्द्रादिपुरसंबन्धेनाकाशमार्गेण ब्रह्मसदने मेरुमध्यस्थिते शतकोटिनाम्नि पुरे निपतति ॥ ४ ॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यन्दती नदीनदपतिमेवभिनिविशति सीतालकनन्दा चक्षुर्भद्रेति ॥ ५ ॥

प्रकाशिका – अभिस्यन्दत्यभितो गच्छन्ती । नदीनदपतिं समुद्रम् । सीताऽलकानन्दा चक्षुर्भद्रेति चतुर्भिर्नामभिश्चतुर्दिशमभिस्यन्दती ॥ ५ ॥

सीता तु ब्रह्मसदनात्केसराद्रिशिखरेभ्योऽधोऽधः पतन्ती गन्धमादनमूर्ध्नि पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षाररससमुद्रं प्रविशति ॥ ६ ॥

एवं माल्यवच्छिखरान्निष्पतन्त्यनुपरतवेगा केतुमालामभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥

भद्राचोत्तरतो मेरुशिरसो निपतन्ती गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादभिस्यन्दमाना उत्तरांस्तु कुरूनतिक्रम्योदीच्यां दिशि लवणार्णवं प्रविशति ॥८॥

प्रकाशिका – नदी नदपतिमेवाभिनिविशतीत्युक्तमेव विशदयति ॥ सीता त्वित्यादिना । केसराद्रिशिखरेभ्य इत्युक्त्या केसरपर्वतानां गन्धमादनादिभ्योऽप्युच्चत्वं ज्ञापयति । अन्तरेण भद्राश्वं तन्मध्ये प्राच्यां दिशि विद्यमानम् । एवमग्रेऽपि ॥ चक्षुश्चक्षुःसंज्ञा । गिरिशिखरमित्यादि । केसरगिरिशिखरान्नीलसंज्ञगिरिशिखरम् । तस्माच्च श्वेतशिखरम् । तस्माच्छृङ्गवतः शिखरमित्यर्थः । तमप्यतिहायातिक्रम्य शृङ्गवन्तम् प्राप्तेति शेषः ॥ ६-८ ॥

तथैवालकनन्दा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषधहेमकूट-हिमकूटान्यतिरभसतररंहसा लुठन्ती भारतमेव वर्षं दक्षिणस्यां दिशि जलनिधिं प्रविशति ॥ ९ ॥

प्रकाशिका – गिरिकूटानि गिरीणां शृङ्गाणि । हिमालयशृङ्गाणि । अतिरभसतररंहसाऽत्यन्तमाटोपातिशयस्य वेगेन लुठन्ती भिन्दन्ती ॥ ९ ॥

अन्ये नदा नद्यश्च वर्षेऽस्मिन्सन्ति बहुशो मेर्वादिगिरिदुहितरः अत्रापि जम्बूद्वीपे भारतमेव वर्षं कर्मक्षेत्रं अथान्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ॥ १० ॥

प्रकाशिका – बहुशो बहुधा मेर्वादिगिरीणां दुहितरस्तत्प्रसूताः । कर्मक्षेत्रं कर्माचरणस्थानम् । स्वर्गिणां पुण्यशेषोपभोगस्थानानि स्वर्गप्राप्त्यनन्तरमवशिष्टपुण्यभोगस्थानानीत्यर्थः । दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः । तेषु भौमानि स्वर्गपदानि । भौमस्वर्गपदवाच्यानीत्यर्थः ॥ १० ॥

येषु पुरुषाणामयुतवर्षायुषां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोद-प्रमुदितमहासौरतनिरतनरवरावरोधमिथुनव्यवायापवर्गधृतैकगर्भकलत्राणां त्रेतायुग-समः कालो वर्तते ॥ ११ ॥

प्रकाशिका – येषु वर्षेषु वसतां पुरुषाणां त्रेतायुगसमः कालो वर्तत इत्यन्वयः । नागायुत-प्राणानामयुतगजबलानामित्यर्थः । वज्रवद्दृढं संहननं शारीरबलं च वयश्च मोदश्च तैः प्रमुदिता महत्सौर-तमतिशयितसुरतक्रिया तस्यां निरताश्च नरवरो राजा । अवरोधस्तत्स्त्रीलक्षणं यन्मिथुनं तद्योग्यो यो व्यवायो मैथुनकर्म तदपवर्गे धृत एको गर्भो यैस्तानि धृतैकगर्भाणि तानि कलत्राणि येषां ते तथा प्रमुदिताश्च ते महासौरतनिरताश्च ते नरवरावरोधमिथुनव्यवायापवर्गधृतैकगर्भकलत्राश्च ते तथा तेषां

बहुगर्भधारणे देहशैथिल्येन तारुण्यभङ्गे संभोगानुपपत्तिभयात्तदवसाने सन्तत्यर्थमेकमेव गर्भं धारयन्तीति भावः ॥ ११ ॥

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफल-किसलयश्रिया आनम्यमानविटपलताविटपिभिरुपशोभमानरुचिरकाननाश्रमायतन-वर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधवनरुहामोदमदमुदितराजहंस-जलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकरारुतिभिरुपकूजितेषु जलक्रीडादि भिर्विविधविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्ट-मनोदृष्टयः स्वैरं किल विहरन्ति ॥ १२ ॥

प्रकाशिका – यत्र येषु वर्षेषु देवपतयः स्वैः स्वैर्गणनायकैः सेवकगणेषु मुख्यैर्विहितमहार्हणाः कृतमहापूजाः सन्तः स्वैरं विहरन्तीन्वयः। केषु केषु स्थानेष्वित्यपेक्षायामाह ॥ सर्वर्तुकुसुमेत्यादिना। सर्वेषु ऋतुषु कुसुमस्तबकादीनां श्रिया समृद्ध्याऽत्यन्तनम्यमाना विटपाः शाखा लताश्च येषां ते तथा ते च ते आविटपिनो महावृक्षाश्च तैरुपशोभमानानि रुचिराणि काननानि येष्वाश्रमायतनेषु वर्षगिरीणां द्रोणीषु च। तथाऽमलजलाशयेषु निर्मलसरःसु च जलक्रीडादिभिर्विविधविनोदैर्विहरन्तीत्यन्वयः। कथं भूतेषु जलाशयेषु। विकचानि विकसितानि विविधानि यानि वनरुहाणि पद्मानि तेषामामोदो गन्धस्तज्जनितमदेन मुदितै राजहंसादिभिर्मधुकरनिकरारुतिभिर्भ्रमरसमूहध्वनिभिरुपकूजितेषु। कथं भूता देवपतयः। सुललिताः सुष्टु शृङ्गारयुताः सुरसुन्दर्यः सुरस्त्रियस्तासां कामेन कलिलैः क्षुभितैर्विलासादिभिराकृष्टं मनोदृष्टिश्च येषां ते तथा ॥ १२ ॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणामनुग्रहायात्मतत्त्व-व्यूहेनाद्यापि सन्निधीयते ॥ १३ ॥

प्रकाशिका – न केवलं नववर्षस्थानां व्यवायादिक्रियथैव कालयापनम्। किं तु भगवदाराधनेना-पीत्याशयेनाह ॥ नवस्वपीति। पुरुषाणां तत्तद्वर्षस्थानामात्मनः स्वस्य तत्त्वानामनारोपितरूपाणां मूर्तीनां व्यूहेन नवसंख्याकेन समूहेन संनिधीयते संनिहितो भवति। तत्त्वशब्दग्रहणेन मूर्तीनां माया-कल्पितत्वमतं निरस्तमिति ज्ञातव्यम् ॥ १३ ॥

इलावृते तु भगवान् भव एक एव पुमान् न ह्यन्यस्तत्र निविशति भवान्याः शापनिमित्ततः यत्प्रविश्य स्त्रीभावस्तत्पश्चाद्वक्ष्यामः ॥ १४ ॥

प्रकाशिका – इलावृते तु विशेषोऽस्तीत्याह ॥ इलावृत इति। पश्चान्नवमस्कन्धे ॥ १४ ॥

भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञां आत्मसमाधिरूपेण सन्निधायैतदभिगृणन् भव उपधावति ॥ १५ ॥

प्रकाशिका – भवानी पार्वती नाथा स्वामिनी येषां तैः स्त्रीणामर्बुदसहस्रैरवरुध्यमानः सेव्यमानश्चतुर्मूर्तेर्वासुदेवादिचतुर्मूर्तेस्तुरीयां चतुर्थांशभूतां तामसीं संसारकारणतमोगुणप्रवर्तिनीमात्मनः स्वस्य प्रकृतिं कारणभूतामात्मनो मनसः समाधिरूपेणैकाग्रतालक्षणधर्मेणोपधावत्युपास्ते । एतद्वक्ष्यमाणं मन्त्रादिकं अभिगृणन् जपन् ॥ १५ ॥

भव उवाच–

ॐ नमो भगवते महापुरुषाय सर्वगुणसङ्ख्यातायानन्तायाव्यक्ताय नम इति ॥१६॥

तात्पर्यम् – 'अनन्तान्तःस्थितो विष्णुरनन्तश्च सहामुना । पूज्यते गिरिशेनेश इलावृतगतेन त्वि'ति च ॥ 'जीवव्यपेक्षया चैव तथाऽन्तर्याम्यपेक्षया । मिश्रास्तु स्तुतयो ज्ञेया विष्णोरन्यत्र केवलमि'ति च ॥ १६ ॥

प्रकाशिका – अत्र संकर्षणनाम्नो हरेरेव रुद्रध्येयत्वेन नागवध्व इत्यादिना क्रियमाणं विशेषस्तोत्रमसंगतं स्यादतः शेषसहितः शेषान्तर्यामी संकर्षणो रुद्रध्येयतयाऽत्र विवक्षित इत्याशयेन समाख्यां पठति ॥ अनन्तान्तःस्थित इति । अनन्तः शेषोऽमुना विष्णुना सह विष्ण्वधिष्ठानत्वेन । नन्वेवमुभयोरुपास्यत्वेन वक्ष्यमाणानां ॐनम इति मन्त्रगतानां भगवदसाधारणगुणवाचकानां स्तुति-गतानां च तादृशानां पदानां कथं शेषे योजनेत्यपेक्षायां योजनाप्रकारं प्रमाणेनैव दर्शयति ॥ जीवव्यपेक्षयेति । एवशब्दस्य मिश्रा एव स्तुतय इति संबन्धः । तुशब्दो वृत्तितारतम्यसूचकः । एव शब्दव्यावर्त्यं दर्शयति ॥ विष्णोरिति । अन्यत्रान्याः स्तुतयः केवलं विष्णोरेव व्यपेक्षया ज्ञेया इत्यर्थः । तथा च या मिश्राः स्तुतयस्ता एवोभयव्यपेक्षायां मुख्यामुख्यवृत्तिभ्यामुभयप्रतिपादकतया ज्ञेयाः । यास्तु न मिश्राः स्तुतयस्ता विष्णोरेव प्रतिपादिका इति ज्ञेयमित्यर्थः । तथा चास्यापि मिश्रस्तुतितयोक्त प्रमाणसिद्धत्वात् । वक्ष्यमाणानि भगवत्पराण्यपि पदान्यमुख्यवृत्या शेषेऽपि योज्यानीत्युक्तं भवति । रुद्रजप्यं मन्त्रं तावदाह ॥ ॐ नम इति ॥ सर्वे गुणा ज्ञानानन्दाद्यास्तैः सम्यक् । स्वरूपतयेति यावत् । ख्याताय विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतिषु प्रसिद्धाय । शेषपक्षे सर्वशब्दार्थस्य संकोचः । अनन्तायान्तत्रयरहिताय । शेषे त्वव्यक्ताधिकरणान्यायेनानन्तशरीरत्वादनन्तायेत्यर्थः॥ अव्यक्तायेति ॥ स्वप्रसादमन्तरेणेति शेषः । शेषोऽपि न स्वप्रसादमन्तरेण भक्तानां व्यक्तो भवति ॥ १६ ॥

भजे भजन्यारुणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम् ।
भक्तेष्वलम्भावितभूतभावनं भवापहं त्वां भवभावमीश्वरम् ॥ १७ ॥

प्रकाशिका – इदानीं स्तुतिं दर्शयति ॥ भज इति । हे भक्तेषु भक्तैरलंभावित ध्यात । भूतभावनं सर्वप्राणिजनकं भवापहं भक्तजनसंसारनाशकं भवभावमभक्तजनसंसारजनकं त्वां भज इत्यन्वयः । पुनः कथंभूतम् । भजन्यं भजनीयमरुणं पादपङ्कजं यस्य तं कृत्स्नस्य समग्रस्य भगस्य भगशब्दवाच्यैश्वर्यादेः परं मुख्यं परायणमाश्रयम् । सर्वोपपादकमीश्वरमित्येते गुणाः शेषेऽप्यमुख्यतया द्रष्टव्याः। एवमग्रेऽपि । भूतभावनं अतीतानागतवर्तमानजगज्जनकं भवापहं भवति प्रभवति उत्पद्यत इतिभावो जगत् तस्यापहर्तारम् संहर्तारम् । न केवलमुत्पादकं संहर्तारमपीत्यर्थः । हरतेष्टिलोपेनापहेति रूपं साधु ॥१७॥

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षितो ह्यण्वपि दृष्टिरज्यते ।
ईशो यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १८ ॥

प्रकाशिका – ननु तस्य भूतभावनत्वेन दृष्टेः प्रकृतिगुणनिर्मितचित्तवृत्तिभिर्विकारः स्यात्ततश्चेश्वरत्वाभावेन मोक्षार्थं भजनीयो न स्यादित्यत आह ॥ न यस्येति । निरीक्षितः सर्वं जगदुपादानादिकं पश्यतः । सर्वकर्तुरिति यावत् । दृष्टिः स्वरूपज्ञानं मायागुणचित्तवृत्तिभिः प्रकृतिनिर्मितचित्तवृत्तिभिरण्वपीषदपि नाज्यते न विक्रियते । कुतो यत ईशः । प्रकृतिगुणानामिति शेषः । अत्र प्रमाणप्रसिद्धिद्योतको हिशब्दः । अत्र व्यतिरेकदृष्टान्तमाह ॥ यथेति । अजितमन्युरंहसामजितक्रोधवेगानां नोऽस्माकं दृष्टिर्यथाऽज्यते न तथेति । अत आत्मन आत्मानं मनो जिगीषुः । मुमुक्षुरिति यावत् । कृद्योगात्कर्मणि षष्ठी । कः पुरुषस्तं त्वां न मन्येत न भजेत ॥ १८ ॥

असन्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ।
न नागवध्वोऽर्हणमीशिरे हि या यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥ १९ ॥

प्रकाशिका – ननु तद्दृष्टेर्मायागुणचित्तवृत्तिभिर्विकाराभावे कथं मद्यपानेन मत्तो दृश्येतेत्यतः सा दृष्टिर्भ्रान्तिरित्याह ॥ असंदृश इति । मायया भगवतो मोहकशक्त्याऽसंदृशः । न विद्यते समीचीना दृक् यस्याधिष्ठानयाथात्म्यज्ञानशून्यस्येत्यर्थः । क्षीबेव क्षीबे मत्त इव वृक्षकोटरजन्यं मधु नारिकेलादिपुष्पजन्यमासवस्ताभ्यां मद्यविशेषाभ्यां ताम्रे लोचने यस्य स इव च प्रतिभाति न वस्तुतोऽतस्तद्दर्शनं भ्रम इत्याशयः । ननु नागवध्वनर्चितत्वादयं मत्त एव किं न स्यादित्यतस्तत्र निमित्तान्तरमाह ॥ न नागवध्व इति । यत्पादयोरर्हणं नागवध्वः कर्तुं ह्रिया नेशिरे । न तु मत्त इति बुद्ध्येति भावः । ह्रीस्तासां कुत इत्यत उक्तम् । यत्पादयोः स्पर्शनेन धर्षितान्याकृष्टानीन्द्रियाणि यासां तास्तथेति । तत्पादस्पर्शनेन चलितेन्द्रियत्वात्तासां ह्रीत्वमित्याशयः । इदं शेषान्तर्यामिण्यपि योज्यम् । एवमग्रेपि । न यस्य माययेत्यादि श्लोकगतानां यच्छब्दानां तस्मै नम इति वक्ष्यमाणेनान्वयः ॥ १९ ॥

यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमीश्वरम् ।
न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्धसहस्रधामसु ॥ २० ॥

प्रकाशिका – अस्य जगतः संयमः प्रलयः स्थित्या तं सहितौ जन्मसंयमौ यस्मात् । स्थित्यादिहेतुं त्रिभिः स्थित्यादिभिर्विहीनम् । अनन्तं पूर्ववत् । मूर्धसहस्रमेव धामानि स्थानानि तेषु मध्ये क्वचिदेकस्मिन्नेव मूर्धनि सिद्धार्थं सर्षपमिव स्थितं भूमण्डलं न वेद गुरुतया न जानातीत्यर्थः ॥ २० ॥

यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल ।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥ २१ ॥

प्रकाशिका – यस्य हरेः सकाशाद्यः पुन्नामाऽजो ब्रह्मा आसीत्किलेत्यन्वयः । गुणविग्रहस्त्रिगुणात्मकदेहो महान्महत्तत्त्वाभिमानी विज्ञानधिष्ण्यो विज्ञानाभिमानी सरस्वत्याश्रयः । शेषपक्षे यस्य शेषस्याद्यः पितेति योज्यम् । यस्माद्धरेः संभव उत्पत्तिर्यस्य सः । यत्संभवोऽहङ्कारतत्त्वाभिमान्यहं रुद्रस्त्रिवृता वैकारिकाद्यहङ्कारप्रेरकतया त्रिधा विद्यमानेन स्वतेजसा वैकारिकं वैकारिकाहङ्कारकार्यं देवतासमूहं तामसाहङ्कार्यं भूतगुणमैन्द्रियं तैजसाहङ्कारकार्यमिन्द्रियसमूहं सृजे सृजामि । शेषपक्षे येन संभवः सहोत्पत्तिर्यस्येति योज्यम् । यद्वा । तामसाहङ्काराभिमानिरुद्रस्य शेषजातत्वात्तदभिप्रायेणेदम् ॥

एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः ।
महानहं वैकृततामसेन्द्रियाः सृजाम सर्वं यदनुग्रहादिदम् ॥ २२ ॥

प्रकाशिका – अस्माभिः क्रियमाणं सर्जनं तदनुग्रहेणैवेत्याह ॥ एते वयमिति । शकुन्ताः पक्षिणः सूत्रेण तंत्वादिनिर्मितेन यन्त्रिता नियमिताः प्रकृते सूत्रनामा वायुस्तेन यन्त्रिता इत्यर्थः । वयमित्युक्तानेवाह ॥ महानिति । महान् ब्रह्मा वैकृता वैकारिका देवास्तामसा भूताभिमानिन इन्द्रिया भूतविकृतेन्द्रियनियामकाः । शेषपक्षे महान्पूज्योऽहं रुद्र इति योज्यम् । रुद्रस्य पदेन नीचत्वाद्यस्य वश इत्युपपन्नम् । अत एव भगवत्पादैरन्यत्र शर्वादिवन्द्यचरण इति शेषविशेषणमुक्तम् ॥ २२ ॥

यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ।
न वेद निस्तारणयोगमञ्जसा तस्मै नमस्तद्विलयोदयात्मने ॥ २३ ॥

प्रकाशिका – इदानीं बन्धकत्वं मोचकत्वं चाह ॥ यन्निर्मितामिति । येन हरिणा निर्मितामियं जनान्मोहयत्वित्याशयेन कल्पितां मायां स्त्रीपुत्रादिरूपां प्रकृतिमेव वेदेत्यन्वयः । कथंभूताम् । कर्माण्येव पर्वाणि ग्रन्थयस्तानि नयति प्रापयतीति तथा ताम् । कथंभूतो जनः । गुणसर्गः शब्दादिविषयसंपादनं

तदर्थं मोहितः । निस्तारणं योगं मायातरणोपायं न वेद । कोऽसौ तन्निस्तारणयोग इत्यतस्तत्सूचयन्नाह ॥ तद्विलयोदयात्मन इति । तस्या मायाया विलयो यस्याः सा तद्विलया । उत्कृष्टा या दया तत्स्वरूपायेत्यर्थः । अनेन हरिदयैव मायातरणोपाय इति सूचयति । शेषेऽपीदमिन्द्रादि-जीवान्प्रत्यस्तीति ध्येयम् ॥ २३ ॥

॥ इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां सप्तदशोऽध्यायः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

श्री शुक उवाच–

तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्वे वर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभिगृणन्त उपधावन्ति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ एवमिलावृतवर्षे पूज्यां हरिमूर्तिं पूजकं चाभिधायेतरेष्वपि वर्षेषु पूज्या हरिमूर्तीः पूजकांश्च पूर्वादिक्रमेणाह ॥ तथा चेत्यध्यायद्वयेन । यथेलावृतवर्षे पूज्यपूजकौस्तस्तथैव भद्राश्ववर्ष इत्यर्थः । तस्य भद्रश्रवसः कुलपतयश्च प्रियां लक्ष्म्यादेरिति शेषः । धर्ममयीं धर्मप्रवर्तकाम् ॥

भद्रश्रवस ऊचुः–

ॐ नमो भगवते धर्मायात्मशोधनाय नम इति ॥ २ ॥

प्रकाशिका – धर्माय जगज्जन्मादिकर्तृत्वरूपधर्मस्वरूपाय । धारकायेति वा । आत्मनो जीवान् ज्ञानादिना शोधयतीत्यात्मशोधनस्तस्मै ॥ २ ॥

अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति ।
ध्यायन्नसद्यर्हि विकर्म सेवते निर्हृत्य पुत्रः पितरं जिजीविषुः ॥ ३ ॥

प्रकाशिका – आत्मनामशुद्धप्रसक्तौ ज्ञानादिना तच्छोधनं युक्तम् । अतस्तेषामशुद्धत्वमेव कथमित्यतस्तदपि भगवतैव कृतमित्याशयेन तं स्तुवन्ति ॥ अहो इत्यादिना । अयं जनो घ्नन्तं स्वमारकं मृत्युं मिषन् अनुमानेन जानन्नपि न पश्यति न जानाति । कुतः । यर्हि यस्मादसदभद्रं विषयजातं ध्यायन्विकर्म पापं यथा स्यात्तथा तत् सेवते । तस्मान्न पश्यति । दुर्विषयसेवाजनितपापेन जातमपि ज्ञानं तिरोहितं भवतीति भावः । अतो भगवद्विचेष्टितं विचित्रं अहो आश्चर्यम् । भगवता मोहिता विषयानेव

ध्यात्वा तत्सेवया पापमाचरन्त उत्पन्नमपि ज्ञानं विनाश्याशुद्धा भवन्तीत्याशयः । घ्नन्तं मिषन्न पश्यतीत्यादिनोक्तमनुभवारूढं करोति ॥ निर्हृत्येति । पुत्रो मृतं पितरं निर्हृत्य दहनादिना संस्कृत्य स्वयं जिजीविषुर्भवति । पितृनिदर्शनेन स्वस्य मरणं निश्चित्यापि जीवनेच्छया पुनर्विषयं सेवमानः । पापमाचरतीति यावत् ॥ ३ ॥

वदन्ति विश्वं कवयश्च नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथाऽपि मुह्यन्ति तवाज मायया सुविस्मयं कृत्यमिदं नताः स्म तम् ॥ ४ ॥

प्रकाशिका – अज्ञानिनामेवैवं मोहको भगवान्न ज्ञानिनामित्यत आहुः ॥ वदन्तीति । वदन्ति शास्त्रतः पश्यन्ति । समाधौ । हे अज । तथाऽपि तव मायया मुह्यन्ति । अत एवेदं तव कृत्यं सुविस्मयं सुष्ठु विस्मयो यस्मात् । अत्याश्चर्यकरम् । अत एतादृशमोहनिवृत्त्यर्थं नता स्मः ॥ ४ ॥

विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतम् ।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुनि ॥ ५ ॥

तात्पर्यम् – 'अप्रयासेन कर्तृत्वमकर्तृत्वमिहोच्यते । महाशक्तित्वतस्तच्च युज्यते परमस्य त्वि'ति तन्त्रसारे ॥ ५ ॥

प्रकाशिका – ननु धर्मायेत्यनेन यद्विश्वकर्तृत्वादिधर्मरूपत्वमुक्तं तदयुक्तं, तस्य निष्क्रियत्वेन वेदादिप्रसिद्धस्य वास्तवकर्तृत्वाद्यसम्भवादित्यत आहुः ॥ विश्वोद्भवेति ॥ विश्वस्योत्पत्तिस्थितिसंहाररूपं कर्म तत्कर्तृत्वरूपो धर्मोऽकर्तुर्निष्क्रियस्यापि युक्तं सत्यमेव भवितुं युक्तम् । कुतः । हि यस्मादपावृतं व्यक्तं यथा स्यात्तथाऽङ्गीकृतम् । तथा प्रामाणिकैरुपपादितमित्यर्थः । ननु कथं प्रामाणिकैरुपपादित-मित्यपेक्षायां तदुपपादकं प्रमाणं पठति ॥ अप्रयासेनेति । अकर्तृत्वं निष्क्रियत्वमिह वेदादौ तच्च तदप्यसंभावितत्या दृश्यमानमप्येकस्यैव सर्वकर्तृत्वमित्यर्थः । अनेन द्वितीयार्धोक्तमपि प्रमापितमिति ज्ञातव्यम् । ननु तथाऽपीदं न युज्यते । एकस्यैव विचित्रानेककार्यकर्तृत्वस्य लोके क्वाप्यदर्शनादित्यत उक्तम् ॥ न चित्रमिति । कार्यकारणे विचित्रानेककार्यकरणशक्तिमति सर्वात्मनि प्रकृत्यादिसर्वकारण-सत्ताप्रदे । अत एव व्यतिरिक्ते लोकविलक्षणे वस्तुन्युक्तरूपतया प्रमाणसिद्धे इह त्वयीदमेकस्यैव विचित्रानेककार्यकर्तृत्वं न चित्रं नाश्चर्यं नासंभावितमित्यर्थः ॥ ५ ॥

वेदान्युगान्ते तमसा तिरस्कृतान्रसातलाद्यो नृतुरङ्गविग्रहः ।
प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथे हिताय ते ॥ ६ ॥

प्रकाशिका – इदानीं तदवतारचरितेनापि स्तुत्वा नमन्ति ॥ वेदानिति । युगान्ते प्रलयान्ते । आदिसृष्टाविति यावत् । तमसा तामसेन मधुनामकेन दैत्येन तिरस्कृतानपहृतान् । ना च तुरङ्गश्च नृतुरङ्गौ

तयोरिव विग्रहो यस्य । कवये ब्रह्मणे दातुमिति शेषः । प्रत्याददे । तं हत्वा पुनर्गृहीतवानित्यर्थः । अवितथे हिताय सत्यसंकल्पाय सत्यकर्मण इति वा । अनेन कर्तृत्वं मायिकमिति मतं निरस्तमिति ज्ञातव्यम् ॥ ६ ॥

हरिवर्षे च भगवान्नरहरिरूपेणाऽस्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्यामः तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलचरितः प्रल्हादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥ ७ ॥

प्रकाशिका – नरहरिरूपेण नृसिंहरुपेण । उत्तरत्र सप्तमे । दयितं भक्तानां प्रियं महापुरुषाणां ब्रह्मादीनां गुणा हरिभक्त्यादयस्तान् भजतीति तथा दैत्यदानवकुलस्य तीर्थीकरणं पवित्रकरं शीलं चरितं यस्य । अव्यवधानः फलकामनादिव्यवधानरहितः । अनन्योऽन्याविषयकः स चासौ भक्तियोगश्च तेन तद्वर्षस्थपुरुषैःसह ॥ ७ ॥

ॐ नमो नृसिंहाय तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्
रंधय रंधय तमो ग्रस स्वाहा अभयमभयमात्मने भूयिष्ठात् ॥ ८ ॥

प्रकाशिका – तेजस्तेजसे सूर्यादितेजोभ्योऽधिकतेजोरूपाय । आविराविरतिप्रकटो भव । प्रतिदिनं प्रकटो भवेति वा । कर्माशयान् कर्माण्याशयमन्तःकरणं च रंधय निर्दह । तमोऽज्ञानं ग्रस संहर । भूयिष्ठाद्भूयात् ॥ ८ ॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भद्राणि शिवं मनो धिया ।
मनश्च भद्रं भजतादधोक्षजे आविश्यतां नो मतिरप्यहैतुकी ॥ ९ ॥

प्रकाशिका – रंधयेति दाहप्रार्थनेन सर्वदा दाहप्रसक्तावाह ॥ स्वस्त्यस्त्विति । खलो दुर्जनानां खलवद्वर्तमानः सज्जनान्खेन ज्ञानेन लात्यनुगृण्हातीति खलो नृसिंहः । खलुरिति पाठे खलसंहर्तेत्यर्थः । विश्वस्य प्रसीदताम् । हे जना भद्राण्युद्दिश्य शिवं सुखरूपं मनो ज्ञानरूपं भद्रं नृसिंहं धिया ध्यायन्तु तदर्थं मनश्च भद्रं भजतात् । नोऽस्माकं मतिरप्यहैतुकी फलकामनाद्युपाधिरहिताऽधोक्षजे आविश्यताम् । अधोक्षजे आवेश्यतामिति पाठे युष्माभिरिति शेषः ॥ ९ ॥

माऽऽगारदारात्मजदेहबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥ १० ॥

प्रकाशिका – मन आदेर्हर्येकविषयत्वे साधनं विषयवैराग्यं तत्रापि साधनं सत्संग इत्याह ॥ मा गारेति । नोऽस्माकं यदि भगवत्प्रियेषु सङ्गः स्यात्तर्ह्यागारादिसङ्गो मा स्यान्न भविष्यति । ततश्च मनो

भद्रं भजिष्यति । अत एव भगवत्प्रियसङ्ग एवास्त्वित्याशयः । ननु गृहादिसङ्गाभावे कथं जीवनमित्याशङ्कां परिहरंस्तत्सङ्गे दोषमाह ॥ य इति । प्राणवृत्त्या प्राणधारणमात्रहेतुविषयसेवनेन परितुष्टोऽलम्बुद्धिं प्राप्तः स एवात्मवान्वशीकृतमनाः अदूराच्छीघ्रं सिद्ध्यत्यपरोक्षज्ञानं प्राप्नोति । इन्द्रियप्रियः प्राणवृत्त्यधिकरणविषयभोक्ता ॥ १० ॥

यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ।
हरत्यजोंहः श्रुतिभिर्गतोऽन्तः को वै न सेवेत मुकुन्दविक्रमम् ॥ ११ ॥

प्रकाशिका – भगवत्प्रियसङ्गेन विषयवैराग्यं कथं भवतीत्यपेक्षायां तदुपपादयंस्तत्संगस्यावश्यकतामाह ॥ यत्संगलब्धमिति । येषां भगवत्प्रियाणां संगाल्लब्धमवगतं निजवीर्यवैभवं निजपराक्रमविस्तारोपेतं मुकुन्दस्य विक्रमो विशिष्टपादविक्षेपो यस्मिन् ज्ञायते तत्तीर्थं शास्त्रं गङ्गारूपं वा श्रुतिभिः कर्णैः श्रवणादिभिस्त्वगिन्द्रियेण वा संस्पृशतां सेवमानानां पुंसामन्तर्गतोऽजो मानसं मनोगतमंहो विषयरागलक्षणं हरति । तान्को वै न सेवेतेत्यन्वयः ॥ ११ ॥

यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ १२ ॥

प्रकाशिका – ननु सत्संगलब्धवैराग्येण हरौ मनोनिवेशने भक्तिरूप एक एव गुणः प्राप्तस्तेन च हरिप्रसाद एव नेतरे गुणाः । न वेतरेषां देवानां प्रसाद इत्यत आह ॥ यस्येति । अकिञ्चना निष्कामनाः सर्वगुणैः सह तत्र तस्मिन्पुरुषे समासते गुणास्तिष्ठन्ति सुराः प्रसन्ना भवन्तीत्यर्थः । एतदेव व्यतिकरेण चोपपादयति ॥ हराविति । महतां गुणा येषां ते सुराश्च कुत इत्यर्थः । बहिर्बाह्येऽसत्यमङ्गले विषये ॥

हरिर्हि साक्षाद्भगवांच्छरीरिणामात्मा झषाणामिव तोयमीप्सितः ।
हित्वा महान्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनाम् ॥ १३ ॥

प्रकाशिका – हरावेव भक्तिः कार्येत्युपपादयन् । ननु हरिभक्तिं विना वृद्धानां दंपतीनां लोके महत्त्वादयो गुणा दृश्यन्ते । अतः कथं हरावभक्तस्येत्यादिकमुक्तमित्याशङ्कां परिहरति ॥ हरिर्हीति । आत्माऽऽदानादिकर्ता । पोषक इति यावत् । अतः झषाणां मीनानां तोयमिवेप्सित इष्टः । अतस्तत्र भक्तिरवश्यं कार्येत्याशयः । महान्तं परमोपकारिणम् । वयसा वयसैव महत्त्वम् । तच्च शूद्रादिसाधारणम् । न पूज्यत्वप्रयोजकमित्याशयः ॥ १३ ॥

तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजतां कुतोभयमिति ॥ १४ ॥

प्रकाशिका – विषयवैराग्यमवश्यं संपाद्यमित्युपपादयन्नुक्तमुपसंहरति ॥ तस्मादिति । रजोरागो राजसेषु पुत्रादिषु स्नेहो मानोऽहङ्कारः स्पृहेच्छा । संसृतेर्जननादिरूपायाश्चक्रवालं मण्डलं यस्मात् ॥१४॥

केतुमाले भगवान्कामदेवस्वरूपेणास्ते लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां च तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते निपतन्ति ॥ १५ ॥

तात्पर्यम् – 'कामदेवस्थितं विष्णुमुपास्ते श्री रतिस्थिता । कामदेवं रतिश्चापि विष्णोस्तु प्राकृतां तनुमि'ति ब्रह्माण्डे ॥ १५ ॥

प्रकाशिका – कामदेवस्वरूपेणेति । अत्र रमा कामदेवाभिन्नं विष्णुमुपास्त इत्यन्यथाप्रतीतिवारणायाभिप्रेतं तात्पर्यं प्रमाणेनैव दर्शयति ॥ कामदेवेति । कामदेवं चेति संबन्धः । चशब्दाद्विष्णोरप्राकृततनुं चेति ग्राह्यम् । प्राकृतामित्यनेन मायामयमित्येतदुक्तार्थम् ॥ ततश्चायं मूलार्थः ॥ कामदेवस्थितेन स्वरूपेण प्रद्युम्नाख्येनास्ते इत्यन्वयः । कामदेव आस्ते । तत्र प्रद्युम्ननामा भगवानाविष्टः । आस्त इति यावत् । लक्ष्म्या रत्याविष्टायाः प्रियचिकीर्षयेत्यर्थः । प्रजापतिः संवत्सरनामको ब्रह्मा संवत्सरो वै प्रजापतिरिति श्रुतेः । तस्य दुहितरो रात्र्यभिमानिन्यो देवतास्तासां प्रियचिकीर्षया पुरुषायुषा वर्षशतेन यान्यहोरात्राणि तैः परिसंख्यानं गणना यासां षट्त्रिंशत्सहस्रसंख्याकानामित्यर्थः । महापुरुषो विष्णुस्तस्य महास्त्रं सुदर्शनं तस्य तेजसा व्यसवो विगतप्राणाः ॥ १५ ॥

अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किञ्चिदुत्तंभितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ १६ ॥

प्रकाशिका – कामदेवान्तःस्थितः प्रद्युम्नस्तस्मिन्वर्षे स्थित्वा किं करोतीत्यपेक्षायामाह ॥ अतीवेति । अतीव सुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तत्सहितावलोक एव लीला तया किञ्चिदुत्तंभितं 'सुन्दरं यद्भ्रूमण्डलं तेन सुभगमिन्द्रियाणि । द्रष्टॄणामिति शेषः । इदमुपलक्षणम् । कामदेवो रतिं रमयन्नित्यपि ग्राह्यम् ॥ १६ ॥

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताहस्सु तद्भर्तृभिरुपेतोपास्ते । इदं चोदाहरति ॥ १७ ॥

प्रकाशिका – मायामयं ज्ञानेच्छात्मकम् । कामदेवपक्षे प्रकृतिविकृतं रूपं प्रतिमां रमा देवी द्योतमाना यस्यां सा रतिरिति योज्यम् । उदाहरति । रतिस्तत्स्था रमा च ॥ १७ ॥

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वविशेषवितूक्षेत्रात्मने आकूतीनां चित्तानां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृत-मयाय सर्वमयाय महसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥

प्रकाशिका – सर्वविशेषविदो ब्रह्मादयस्तेषां क्षेत्रमावासस्थानमात्मा देहो यस्य स तथा तस्मै । आकूतीनामभिप्रायाणां चित्तानां चित्तवृत्तीनां चेतसामन्तःकरणानां च विशेषाणां मनो बुद्धिरहंकार इत्यादितत्प्रभेदानां षोडशकला यस्मात् षोडशकलाप्रवर्तकाय । एकादशेन्द्रियाणि पञ्चभूतानि षोडशकला ज्ञातव्याः । छन्दोमयाय वेदप्रतिपाद्येषु प्रधानाय । अन्नमयाय महाभोक्त्रे महाभोग्याय । अमृतमयाय मुक्तप्रधानाय । सर्वमयाय सर्वप्रधानाय कामाय काम्याय । उभयत्रांतर्बहिश्च ॥ १८ ॥

स्त्रियो व्रतैस्त्वां हृषीकेश्वरं स्वतोह्याराध्य लोके पतिमाशासतेऽन्यम् ।
अनेन तासां परिपास्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ १९ ॥

प्रकाशिका – अनन्यकामनया त्वां भजंत्यहं कृतार्थाऽस्मि । अन्यकामनया त्वामर्चयंत्यो न परिपूर्णमनोरथाः स्युरित्याह ॥ स्त्रिय इति । स्वतोऽनन्याधीनतया हृषीकाणामिन्द्रियाणामीश्वर-माराध्यान्यं पतिमाशासते प्रार्थयन्ते । पतिकामना हि कामान्तर्गतहरिपूजात्वेन कर्तव्यतया श्रुत्यादिसिद्धेति हिशब्देन दर्शयति । तासां त्वत्पूजालब्धास्ते न वै । नैव पतय इति शेषः । कुतो यतस्तेऽपत्यादिकं न परिपातुमशक्तास्तदपि कुतो यतोऽस्वतन्त्राः ॥ १९ ॥

स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परम् ॥ २० ॥

प्रकाशिका – तथात्वेऽपि ते कुतो न पतय इत्यतः पतिशब्दमुख्यार्थं दर्शयति ॥ स वा इति । सः क इत्यतस्त्वमेक एवेत्याह ॥ स इति । भवानिति शेषः । स्वतन्त्रत्वादित्याशयः । विपक्षे बाधकमाह ॥ इतरथेति । बहूनां स्वतन्त्राणां पतित्व इत्यर्थः । मिथोऽन्योन्यं भयं स्यात् । अत एव भवानेक एव तादृशः पतिरित्यर्थः । हरेः स्वतन्त्रपतित्वमुपपादयति ॥ नैवात्मलाभादिति । आत्मलाभात्स्वरूप-सुखलाभात् । अधि अधिकं परमन्यं पुरुषार्थं नैव मन्यते । भवानिति शेषः । स्वरूपलाभेनैव तुष्टस्य नान्यापेक्षेत्याशयः । मिथो भजन्निति पाठे मिथोऽन्योन्यं भजन् आत्मलाभात्स्वसाध्यप्रयोजनात् । अधि अधिकदातारं परमन्यं नैव मन्यते । मद्धृदयमप्यस्वतन्त्रोऽतो नाधिकदातेत्येव मन्यते इत्यर्थः । अतः स भगवानेक एव पतिरिति योज्यम् ॥ २० ॥

यस्तस्य ते पादसरोरुहार्हणं निकामयेत्सोऽखिलकामलंपटः ।
तदेव चाभीप्सितमीप्सितार्चनं यद्भग्नयाञ्चो भगवन्प्रतप्यते ॥ २१ ॥

प्रकाशिका – निष्कामनया त्वत्पादसरोरुहार्चनमेव तवाभीप्सितं न काम्यकामनयेत्याह ॥ य इति । तस्योक्तरीत्या स्वतन्त्रस्य ते तव पादसरोरुहार्हणं योऽधिकारी निकामयेन्नितरां कामयेत् । अखिलकामान्परित्यज्य कामयेदिति यावत् । सोऽखिलकामलंपटोऽपेक्षिताशेषपुरुषार्थसाधने समर्थः । तेनैवाशेषपुरुषार्थप्राप्तिसंभवादित्याशयः । हे ईप्सित प्रेष्ठ । तदेवार्चनं निष्कामार्चनमेवाभीप्सितम् इत्यनुवर्तनीयम् । न कामनयाऽर्चनम् कुत इत्यत आह ॥ यद्भग्नयाञ्च इति । यद्यस्मात्प्रबलदुरितादिसत्वे कामनयाऽर्चनस्य तवानभीप्सितत्वेन फलानुदयाद्भग्ना व्यर्था याञ्ना मनोरथो यस्य स तथाविधः सन् प्रतप्यत दुःखीभवति ॥ २१ ॥

मत्प्राप्तये ये ससुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रिये धियः ।
ऋते भवत्पादपरायणं न मां विन्दन्त्यहं त्वद्हृदया यतोऽजित ॥ २२ ॥

प्रकाशिका – अतो निष्कामनया त्वदर्चनमेवाशेषपुरुषार्थहेतुर्नान्यदेवतार्चनमिति कैमुत्येनाह ॥ मत्प्राप्तय इति । मदभिमतैश्वर्यप्राप्तय इत्यर्थः । ससुरासुरादयः इत्यनेन स्वयं सर्वोत्तम इति सूचयति । तपस्तप्यन्ते कुर्वन्ति । ऐन्द्रिय इन्द्रियविषये शब्दादौ भोग्ये धीर्येषां ते मां मदभिमतैश्वर्यं न विन्दन्ति न प्राप्नुवन्ति । तेभ्यो निष्कण्टकमैश्वर्यं न ददामीत्याशयः । किं सर्वेषाम् । नेत्याह ॥ भवत्पादपरायणं ऋत इति । इतरविषयपरित्यागेन भगवत्पादयोरेवार्चकं विनेत्यर्थः । कुत इत्यत आह ॥ अहमिति । हे अजित । यतोऽहं त्वयि हृदयं मनो यस्याः सा तथा । त्वद्भक्तेति यावत् । सर्वसुरादिपूजिताऽप्यहं त्वद्भयात्त्वद्विमुखेभ्योऽखण्डितैश्वर्यादिदाने न समर्था तदा कुतः परे तत्र समर्थाः स्युरित्याशयः ॥२२॥

स त्वं ममापि कुरु शीर्षणि स्वकं करांबुजं यत्तदधायि सात्वताम् ।
बिभर्षि मा लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुः इति ॥ २३ ॥

प्रकाशिका – इदानीं कृपातिशयद्योतकं शीर्षण्यभयहस्तनिधानं प्रार्थयते ॥ स त्वमिति । यदर्चनमशेषपुरुषार्थसाधनं स त्वमित्यर्थः । यत्करांबुजं सात्वतां भक्तानां शीर्षण्यधायि कृपया न्यस्तं तन्ममापि शीर्षणि कुरु निधेहि । विशेषानुग्रहार्थमिदं प्रार्थयते । वस्तुतस्तु त्वत्कृपा मय्यस्त्येवेत्याशयेनाह ॥ बिभर्षीति । हे वरेण्य मा मां लक्ष्म चिन्हं यथा स्यात्तथा बिभर्षि । किं प्रयोजनापेक्षया । नेत्याह ॥ माययेति । इच्छयेत्यर्थः । ननु कुत इत्थमिच्छाऽपीत्यत उक्तम् । ईश्वरस्येति ईश्वरस्येहितं चेष्टितमूहितुं को विभुः समर्थो न कोऽपीति ॥ २३ ॥

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयन्निदं चोदाहरति ॥ २४ ॥

प्रकाशिका – मनोर्वैवस्वतस्य ॥ २४ ॥

ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे बलाय महामत्स्याय नम इति ॥ २५ ॥

प्रकाशिका – सत्त्वाय साधुगुणस्वरूपाय । प्राणाय प्रकृष्टचेष्टकाय । ओजआदिस्वरूपाय ॥ २५ ॥

अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं य इदं वशेऽनयन्नात्मा यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥

प्रकाशिका – उरुः स्वनो वेदनादो यस्य । यथा नरो दारुमयीं स्त्रियं वशे नयति । तथाऽयमात्माऽऽदानादिकर्तेश्वर इदं जगद्वशेऽनयन्नीतवान्नयन्वर्तत इति वा स्ववशमकरोत् । स ईश्वरस्त्वमित्यर्थः ॥ २६ ॥

यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक्समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपास्थास्नु यदत्र दृश्यते ॥ २७ ॥

तात्पर्यम् – **'स्पर्धन्त इव देवास्तु हरिणा यत्र कुत्रचित् । हरेरेवाज्ञया क्वापि दैत्यावेशादथापि वे'ति च ॥ २७ ॥**

प्रकाशिका – ननु लोकपालानां पालकत्वादेव तद्वशे इदं जगदस्तीति सिद्धमतः कथमीश्वरः स्ववशे इदमनयदित्युक्तमित्यतस्तेषां न स्वातन्त्र्येण पालकत्वमित्याह ॥ यमिति । अत्र मत्सरज्वरा इति लोकपालानां देवानां हरिणा मात्सर्यापरपर्याया स्पर्धा प्रतीयते । सा च हरिभक्तोत्तमेषु प्रमाण-बाधिताऽतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति ॥ स्पर्धन्त इवेति । मत्सरवन्त इवेत्यर्थः । हरिणा तु स्वभावत एव स्पर्धन्त इव दृश्यन्त इति शेषः । यत्र कुत्रचित्कार्ये कर्तव्ये । कुत इत्यतोऽत्र कारणमाह ॥ हरेराज्ञयैवेति । निमित्तान्तरमाह ॥ दैत्यावेशादिति । अथाऽपि वेति निपातसमुदायः पक्षान्तरे । तथा च मूले देवानां मात्सर्यकथनं दैत्यावेशनिमित्तकमात्सर्यपरमेव । न स्वाभाविकमात्सर्यपरमित्युक्तं भवति ॥ ततश्चायं श्लोकार्थः ॥ यं त्वां हित्वा लोकपालाः पृथग्वा समेत्य वा यतन्तोऽपि द्विपदादिकं यदत्र ब्रह्माण्डे दृश्यते तत्पातुं न शेकुः । कुत इत्यत उक्तम् ॥ मत्सर एव ज्वरो दाहको येषामिति । दैत्यावेशेन स्वभावतो मत्सरवन्त इव दृश्यमाना यत इत्यर्थः । अस्वतन्त्रा इति यावत् ॥ २७ ॥

भवान्युगान्तार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिविरुधां निधिम् ।
मया सहोरुक्रम ऊह ओजसा तस्मै जगत्प्राणगुणात्मने नम इति ॥ २८ ॥

प्रकाशिका – इदानीमवतारचरितेन स्तौति ॥ भवानिति । भवान्युगान्तार्णवे इमां क्षोणीमूह इत्यन्वयः । कथंभूतां क्षोणीम् । औषधीनां वीरुधां च निधिमाश्रयभूताम् । पुनः कथंभूताम् । मया मनुना सह विद्यमानाम् । जगत्प्राणगुणात्मने जगत्प्राणनरूपगुणस्वरूपाय ॥ २८ ॥

हिरण्मये भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य प्रियतमां तनुमर्यमासह तद्वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ॥ २९ ॥

ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणाय नोपलक्षितस्थानाय नमोऽवर्ष्मणे नमो भूयसे नमोऽवस्थानाय नमस्ते ॥ ३० ॥

प्रकाशिका – अकूपाराय न कूपे आरो गमनं यस्य स तथा तस्मै समुद्रवासिने कूर्माय । सर्वेषां सत्त्वानां प्राणिनां ये गुणास्तान्विशेषेण नयतीति सर्वसत्त्वगुणविशेषणस्तस्मै । सर्वं पूर्णं सत्त्वं ज्ञानबलसमाहारो वा पराक्रमो वा तल्लक्षणगुणविशेषणं यस्येति वा । नोपलक्षितं ज्ञातं स्थानं यस्य वारिचरत्वात् । अवर्ष्मणे प्राकृतदेहशून्याय । भूयसेऽनन्तरूपायावस्थानाय जगत्स्थित्याधाराय ॥ ३० ॥

यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपं बहुरूपरूपितम् ।
सङ्ख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥

तात्पर्यम् – उपलम्भनादयथा । यथा दृष्टं तथा न तिष्ठत्यन्यथाभवतीत्यर्थः ॥ ३१ ॥

प्रकाशिका – अवस्थानायेत्युक्तमेव प्रपञ्चयन् स्तौति ॥ यद्रूपमिति । अत्रायथोपलंभनादित्यस्य मिथ्योपलंभनादित्यन्यथाप्रतीतिवारणायान्वयं तावदाह ॥ उपलंभनादिति । एवमन्वयलब्धमर्थं दर्शयति ॥ यथा दृष्टमिति । अनेनोपलंभनशब्दः कर्मणि निष्पन्न इति सूचयति । नन्वेवं मिथ्यात्वमेव प्राप्तमित्यतोऽभिप्रायमाह ॥ अन्यथेति । विकृतं भवतीत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ निजमायया इदं मदाधारतया तिष्ठत्विति स्वेच्छयार्पितं स्वाधारतया स्थापितम् । अर्थस्वरूपं ज्ञेयरूपं जरायुजादिभिर्बहुभी रूपैः रूपितं निरूपितम् । शब्दितं यस्य संख्या नास्ति परमाणुप्रदेशोऽपि ह्यनन्ताः प्राणराशय इति वचनात् । यच्चोपलंभनात् । उपलब्धात्प्रकारादयथा येन प्रकारेणाद्योपलब्धं तेन प्रकारेण श्वो न तिष्ठति । विकृतमिति यावत् । एतज्जगद्यद्रूपं यत्स्वरूपं यदन्तर्यामिकमित्यर्थः । तस्मै नम इत्यन्वयः । न व्यपदेशो यस्य तदव्यपदेशं साकल्येन निर्देष्टुमशक्यं तादृशं रूपमस्यास्तीत्यव्यपदेशरूपी तस्मै ॥३१॥

जरायुजं स्वेदजमण्डजोद्भिजं चराचरं देवर्षिपितृभूतभेदम् ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥

तात्पर्यम् – 'सर्वान्तर्यामिकत्वात्तु सर्वनामा हरिः स्वयम् । न तु सर्वस्वरूपत्वाद्रूपत्वमुपचारत' इति च ॥ ३२ ॥

प्रकाशिका – ननु यद्रूपमित्यस्य यस्य साक्षात्स्वरूपमित्येवार्थो वाच्यो न यदन्तर्यामिकमिति । उत्तरश्लोके सर्वस्वरूपत्वोपपादनायैव सर्वशब्दवाच्यत्वस्य कथितत्वादित्याशङ्कापरिहारायोत्तरश्लोक-तात्पर्यं प्रमाणेनैव दर्शयति ॥ सर्वान्तर्यामिकत्वादिति । तत्तद्वस्तुगतसर्वशब्दप्रवृत्तिनिमित्तस्वामि-कत्वादित्यर्थः । तुशब्दोऽवधारणे । तद्व्यावर्त्यं दर्शयति ॥ न त्विति । तुशब्दो हेत्वर्थः । तेन चेतनस्या-चेतनैरैक्यायोगात् । चेतनानां च विशिष्टानामैक्यायोगात् । चिन्मात्रलक्षणायाश्च जघन्यत्वादिति । कथं तर्हि द्वे वाव ब्रह्मणो रूपे इत्यादौ तद्रूपत्वमुच्यत इत्यत उक्तम् ॥ रूपत्वमिति । उपचारतो गौण्या वृत्त्या । कथ्यत इति शेषः ॥ ततश्च इति इत्यादिशब्दैरेको मुख्योऽभिधेयो जरायुजाद्यन्तर्यामी त्वमेक एव तत्तच्छब्दप्रवृत्तिनिमित्तस्वामित्वात् । त्वदधीनं तु जरायुजादिकं न मुख्यतस्तत्तच्छब्दाभिधेयमिति मूलं व्याख्येयमिति भावः । देवादीनां भेदो यस्मिंस्तत्तथा । तथा चात्रोक्तम् । जरायुजादिसर्वशब्दाभिधेयत्वं यद्रूपमित्यत्रोक्तान्तर्यामिकत्वोपपादकमिति भावः ॥ ३२ ॥

यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ।
सङ्ख्या यया तत्त्वदृशा विनीयते तस्मै नमः सांख्यनिदर्शनाय हि इति ॥३३॥

तात्पर्यम् – दशावतार इत्यादिसङ्ख्या विनीयते विशेषेण नीयते तज्ज्ञानं तद्रूपमेव हि ॥ ३३ ॥

प्रकाशिका – ननु भूयस इत्यनन्तरूपत्वमुक्तम् । तथात्वे दशावतारत्वादिप्रसिद्धेरयोगादित्याशङ्कां परिहरन्पुनर्नमति ॥ यस्मिन्निति । अत्रेयं संख्येत्येतदप्रतीत्या व्याख्याति ॥ दशेति । आदिपदेन पंचद्वादशशतसहस्रादिपरिग्रहः । विनीयत इत्यस्यापि प्रकृतोपयुक्तमर्थं दर्शयति । विनीयत इति । विशेषेणाधिकसंख्यात्वेन नीयते ज्ञायत इत्यर्थः । यया तत्त्वदृशा येन तत्त्वज्ञानेन विनीयते तस्मै नम इत्युक्त्या तत्त्वज्ञानस्वरूपत्वं भगवत उच्यते । तत्कथमित्यतः श्रुत्यादौ प्रसिद्धत्वात्काऽत्र कथंतेत्याह ॥ तज्ज्ञानमिति । तज्ज्ञानं तत्त्वविषयकं भगवद्ज्ञानं तस्य भगवतः स्वरूपमेवेति हि विज्ञानमानन्दं ब्रह्मेत्यादि श्रुतिप्रसिद्धमित्यर्थः । अतो मूले यत्तच्छब्दाभ्यां तत्त्वज्ञानभगवतोरभेदोक्तिरुपपन्नेत्याशयः ॥

ततश्चायं श्लोकार्थः ॥ असंख्येया विशेषा गुणा नामानि नारायणादीनि रूपाणि शुक्लादीन्याकृतयो विग्रहा यस्य तस्मिंस्त्वयि कविभिरियं श्रुत्यादिसिद्धा संख्या दशपञ्चद्वादशशतसहस्रेत्यादिरूपा

कल्पिता समर्थिता सत्यतयोपपादिता । कथम् । यतः सा संख्या तत्त्वदृशा भगवत्तत्त्वज्ञानेन विनीयते विशेषेणानन्तत्वेन नीयते ज्ञायते दशादिशब्दानामानंत्यवाचकत्वादित्याशयः । दशादावनन्तत्वेन ज्ञानस्य तत्त्वज्ञानतोपपादनाय यया तत्त्वदृशा विनीयते तस्मै तद्रूपायेति तत्त्वज्ञानस्य निर्दोषभगवदभेद उक्तः । ननु परापरतत्त्वसंख्यापरिज्ञानं सांख्यशास्त्रजन्यं प्रसिद्धम् । तत्कथं भगवदभिन्नमित्यत उक्तम् ॥ सांख्यनिदर्शनायेति । दर्शयतीति दर्शनः सांख्यशास्त्रस्य नितरां प्रवर्तकायेत्यर्थः । तथा चार्वाचीनानां तत्त्वज्ञानस्य सांख्यशास्त्रजन्यत्वेऽपि न भगवज्ज्ञानस्य तथात्वं तस्य तच्छास्त्रमूलत्वादित्युक्तं भवति ॥

उत्तरेषु कुरुषु भगवान्यज्ञपुरुषः कृतवराहरूप आस्ते । तं तु देवी हैषा भूः सहकुरुभिरस्खलितभक्तियोगेनोपधावति । इमां च परमामुपनिषदमावर्तयति ॥३४॥

ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महीधराय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥

प्रकाशिका – यज्ञपुरुषो यज्ञोपयुक्तपदार्थजनकदेहो मन्त्रतत्त्वलिङ्गाय मन्त्रतात्पर्यनिर्णायकलिङ्गवते । मन्त्रतात्पर्यविषयीभूतदेहायेति वा । यज्ञा अयूपाः सयूपाः क्रतवे तत्प्रवर्तकतया । तच्छब्दवाच्याय । यज्ञसंकल्पविषयायेति वा । शुक्लं शुद्धं कर्म यस्मात्स कर्मशुक्लस्तस्मै शुद्धकर्मप्रवर्तकाय । कृतादीनि त्रीणि युगान्यवतारार्थं यस्य स त्रियुगस्तस्मै ॥ ३४,३५ ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु योनिष्विव जातवेदसम् ।
मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥

तात्पर्यम् – क्रियार्थैर्यज्ञाद्यर्थैरिन्द्रादिनामभिरीरितात्मने ॥ ३६ ॥

प्रकाशिका – मन्त्रतत्त्वलिङ्गायेत्युक्तं विशदयति ॥ यस्य स्वरूपमिति । कवयो ज्ञानिनो विपश्चितो विचारशीलाः । गुणेषु देहेन्द्रियादिषु गूढं नियामकतया स्थितत्वेऽप्यव्यक्तं मनसा मनोरूपेण मथ्ना मथनसाधनेन योनिषु काष्ठेषु गूढं जातवेदसमग्निमिव मथ्नंत्युपक्रमादिभिर्लिङ्गैर्वेदं विचार्य जानन्तीत्यर्थः। नन्वेवं विचार्यत्वं ब्रह्मकाण्डस्यैव न कर्मकाण्डस्य तत्र यज्ञाद्यङ्गेषु मन्त्रेष्विन्द्रादीनामेव प्रतिपाद्यतया प्रतीयमानत्वादित्यत उक्तम् ॥ क्रियार्थैरीरितात्मन इति । अत्र क्रियार्थैर्भावार्थैरीरितात्मन इत्यसङ्गतं भाति । ईरणस्य शब्दधर्मत्वादतोऽत्र विवक्षितमर्थं दर्शयति ॥ क्रियार्थैरिति । तथा च क्रियाशब्दः यज्ञादिकर्मवाची । अर्थशब्दः प्रयोजनवाची । तयोर्बहुव्रीहिस्तत्रान्यपदार्थभूतानींद्रादिनामानीत्युक्तं भवति । ततश्च क्रिया यज्ञादिकर्माणि । तन्निष्पत्तिरिति यावत् । अर्थः प्रयोजनं येषामिन्द्रादिनाम्नां तैरीरितात्मने मुख्यतः प्रतिपाद्यस्वरूपायेति मूलं व्याख्येयमिति भावः ॥ ३६ ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ।
तथैव तत्रातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥

तात्पर्यम् – मायागुणैस्तदिच्छानुसारिभिः । 'द्रव्येशः शङ्करः प्रोक्तः क्रियेशो गरुडः स्मृतः । कारणेशस्तथा ब्रह्मा वायुराधारकः स्मृत' इति ब्रह्मतर्के ॥ ३७ ॥

प्रकाशिका – मथ्नतां विपश्चितां के प्रवरा इत्यतस्तान्दर्शयन्ती प्रणमति ॥ द्रव्येति । अत्र मायागुणैरित्यस्य प्रकृतोपयुक्तमर्थं दर्शयति ॥ मायागुणैरिति । अनेन मायाया भगवत इच्छाया गुणा अप्रधानास्तदनुसारिण इति यावदिति मूलं व्याख्येयमिति सूचयति । द्रव्यक्रियाहेत्वयनेशेत्यस्य प्रकृतसङ्गतमर्थं प्रमाणेनैव दर्शयति ॥ द्रव्येश इति । अनेन द्वन्द्वान्ते श्रूयमाण ईशशब्दः प्रत्येकमभि-संबध्यत इति दर्शयति । कारणेश इत्युक्त्या हेतुशब्दः कारणपर इति सूचयति । आधारक इत्यनेनायनेश इत्येतदुक्तार्थम् ॥ ततश्चायं श्लोकार्थः ॥ तत्र विपश्चित्स्वतिशयेनात्मनः परमात्मनो बुद्धिर्येषां तैर्मायागुणैर्भगवदिच्छानुसारिभिः । अनेन द्रव्येशादीनामस्वातन्त्र्यमुक्तम् । द्रव्यक्रियाहेत्वयनेशाश्च ते कर्तारश्च तैः । अत्रेशपदं प्रत्येकमभिसंबध्यते । द्रव्येशः शङ्करः क्रियेशो गरुडः । हेतुशब्दः कारणपरः । कारणेशो ब्रह्माऽयनमाधारस्तदीशो वायुरेतैर्जगत्कर्तृभूतैर्यथावस्तु तथैव निरीक्षितात्मने दृष्टदेहाय । स देहो न प्राकृतदेह इत्याह ॥ निरस्तेति । निरस्ता दूरीकृता माया मायानिर्मिताऽऽकृतिर्येन तस्मै । नमो नम इति द्विरुक्तिरादरार्था ॥ ३७ ॥

करोति विश्वस्थितिसंयमोदयं यथेप्सितं नेक्षितुमीश ते गुणैः ।
माया यथाऽयो भ्रमते यदाश्रया ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥

प्रकाशिका – ननु ब्रह्मादीनां भगवदिच्छानुसारित्वेनास्वातन्त्र्येऽपि रमाया जगत्स्थित्यादिकर्त्र्याः स्वातन्त्र्यमस्त्वित्याशङ्कायां साऽपि भगवदाश्रयेणैव चेष्टत इति सदृष्टान्तमुक्त्वा पुनः प्रणमति ॥ करोतीति । माया रमा यद्यपि विश्वस्य स्थितिसंयमोदयम् । द्वन्द्वैकवद्भावः । करोति तथाऽपि गुणैर्ज्ञानानन्दादिभिर्यथेप्सितं तथेक्षितुं हरिं द्रष्टुं नेशते । तस्या अपि तद्विषये ज्ञातव्यमवशिष्टमस्तीति भावः । अनेनासर्वज्ञत्वोक्त्या वक्ष्यमाणं तदाश्रयत्वमुपपादितमिति ज्ञातव्यम् । यथाऽयो लोहं ग्राव्णः अयस्कान्ताद्भ्रमते चेष्टते । तथा यदाश्रया यस्य हरेराश्रयो यस्याः सा । भ्रमते तस्मै नम इत्यन्वयः । यथा रमा साकल्येन हरिगुणादिकं न जानाति । तथा हरिरपि किं स्वात्मगुणादिकं न जानाति । नेत्याह ॥ गुणेति । स्वकीयगुणकर्मणां साक्षिणे साक्षाद्द्रष्ट्रे । अथवा हरे रमाद्युत्तमत्वमुपपादयति ॥ गुणेति । रमादिचेतनगुणक्रियासाक्षिण इत्यर्थः ॥ ३८ ॥

प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ।
कृत्वाऽग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुम् ।। ३९ ।।

प्रकाशिका – इदानीमवतारकर्म विज्ञापयन्ती प्रणमति ।। प्रमथ्येति । यो जगतामादिः कारणभूतः सूकरः सूकराकारविग्रहो मां पृथिवीम् । अग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा स्थापयित्वा रसाया रसातलाद्रसातलमारभ्योदन्वतः समुद्रात् । इभो गज इव निरगात् । ततश्च मृधे युद्धे प्रतिवारणं प्रतिगजमिव स्थितं दैत्यं हिरण्याक्षं प्रमथ्य दंष्ट्रया हत्वा यः क्रीडन् स्थितस्तं विभुं प्रणतास्मीत्यन्वयः ।। ३९ ।।

इति श्रीमद्भागवतटिप्पण्यां प्रकाशिकायां अष्टादशोऽध्यायः ।। १८ ।।

।। एकोनविंशोऽध्यायः ।।

श्रीशुक उवाच–

किंपुरुषे तु वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनूमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ।। १ ।।

प्रकाशिका – ।। हरिः ॐ ।। सीतामभिरमयतीति सीताभिरामस्तम् ।। १ ।।

आर्ष्टिषेणेन सह गन्धर्वैरनुपगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ।। २ ।।

प्रकाशिका – भर्ता चासौ भगवांश्च । तस्य कथाम् ।। २ ।।

ॐ नमो भगवत उत्तमश्लोकाय नमः आर्यलक्षणशीलव्रताय नम उपाश्रितात्मने नमः साधुवादनिकर्षणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ।।३।।

प्रकाशिका – आर्याणां लक्षणानि शीलानि व्रतानि च यस्मात्तस्मै । उपाश्रिता आत्मानो जीवा यं स तथा तस्मै । उपासितलोकायेति पाठे उपासित उपासनायुक्तो लोको यमुद्दिश्य स तथा तस्मै । उपासितोऽनुसृतो लोको येनेति वा व्याख्येयम् । साधुवादः साधुरिति वादो वचनं प्रसिद्धस्तस्य निकर्षणाय निकषाश्मवन्निर्धारणस्थानाय । परमसीम्न इति यावत् ।। ३ ।।

यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणत्र्यवस्थम् ।
प्रत्यक्प्रशान्तं सुधियोपलंभनमनामरूपं निरहं प्रपद्ये ।। ४ ।।

प्रकाशिका – ॐ नमो भगवत इति मन्त्रे श्रीरामस्य भगवत्स्वरूपत्वमुक्तम् । तद्विशदयन् स्तौति ।। यत्तद्विशुद्धेति । यदेकं स्वगतभेदशून्यं परं ब्रह्म तत्प्रपद्य इत्यन्वयः । कथंभूतम् । विशुद्धानुभवमात्रं केवलं निर्दोषानुभवात्मकविग्रहम् । स्वतेजसा स्वसामर्थ्येन ध्वस्ता दूरीकृता गुणाः सत्त्वादयस्तिस्रोऽवस्थाश्च येन तथा । प्रत्यक् जीवान्तर्गतं प्रशान्तं प्रकृष्टसुखरूपम् । सुधिया शोभनबुध्योपलभ्यत इति सुधियोपलंभनम् । न विद्यते साकल्येन प्रतिपादकं नाम भौतिकं रूपं च यस्य तदनामरूपं निरहमहंकारशून्यम् ।। ४ ।।

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्यू रमतः स्व आत्मनूसीताकृतानि व्यसनानीश्वरस्य ।। ५ ।।

न वै स आत्माऽऽत्मवतामधीश्वरो भुङ्क्ते हि दुःखं भगवान्वासुदेवः ।
न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि जहाति कर्हिचित् ।। ६ ।।

प्रकाशिका – नन्वेवं रामस्य दशरथाज्जन्म मनुष्यवदाचरणं च किमर्थमित्यत आह ।। मर्त्यावतारस्त्विति । तुशब्दोऽवधारणे । मर्त्येष्ववतार एव न जन्मेत्यर्थः । स च विभो रामस्य केवलं रक्षोवधायैव न किन्तु मर्त्यानां शिक्षणं गुर्वाज्ञाऽवश्यं कार्या शरणागतपरिपालनमवश्यं कार्यम् । स्त्रीसंगेन दुःखमवर्जनीयमित्यादिशिक्षणं चोद्दिश्य भवतीति भावः । स्वे आत्मनि स्वस्वरूपे रमते । रममाणस्य सीताकृतानि व्यसनानि कुतः स्युर्न कुतोऽपीत्युक्तमेव विशदयति ।। न वा इति । प्रमाणसिद्धमेतदिति प्रदर्शनाय वा इत्युक्तम् । आत्मवतां देहधारिणामात्मा स्वामी । अपिशब्दः सीतामपीत्यस्य समुच्चायकः । अनेन सीताकृतानि व्यसनानीत्यत्र सीताशब्दो लक्ष्मणस्याप्युपलक्षक इति सूचयति ।। ५,६ ।।

न जन्म नूनं महतो न सौभगं न चांगबुद्धिर्नाकृतिस्तोषहेतुः ।
तिर्यग्विसृष्टानपि नो वनौकसश्चकार सख्ये च सलक्ष्मणाग्रजः ।। ७ ।।

प्रकाशिका – तिर्यग्योनित्वात्तव कथं तत्प्रत्तिपत्तिरित्यपेक्षायामाह ।। न जन्मेति । जन्म विप्रादिरूपं महतः श्रीरामस्य तोषहेतुरित्यन्वयः । अङ्ग हे आर्ष्टिषेण । तिर्यग्विसृष्टान् तिर्यग्विधतया सृष्टान् । चशब्दः सेवासमुच्चायकः ।। ७ ।।

सुरोऽसुरो वाऽथ नरोऽथ वानरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत् कोसलान्दिवमिति ।। ८ ।।

प्रकाशिका – तस्माद्रामादेव प्रतिपत्तौ न जन्मादिकं प्रयोजकमित्युपसंहरति ॥ सुर इति । यः सुरादिः स सर्वोऽपि । सुष्ठु कृतं जानातीति सुकृतज्ञस्तमुत्तमं सर्वोत्तमं रामं भजेत भजेत् । सर्वेषां सेवया फलप्रद इत्येतत्तत्कालीनपुरुषप्रत्यक्षसिद्धमित्याह ॥ उत्तरानिति । खगमृगतृणादीनपीति शेषः । दिवं मोक्षम् ॥ ८ ॥

भारतेऽपि वर्षे भगवान्नरनारायणाख्यः आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभोऽनुग्रहायात्मवतामनुकंपया तपोऽव्यक्तगतिश्चरति ॥ ९ ॥

प्रकाशिका – उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तदात्मोपलंभनं तपश्चरति । उपशमोऽत्यन्तं मनसो भगवन्निष्ठतोपरमो मनआदीन्द्रियनिग्रहः । आत्मोपलंभ इति पाठे उपचिताः प्रदर्शिता धर्मादय आत्मोपलम्भान्ताः येनेति व्याख्येयम् । आत्मवतामनुग्रहायैव न स्वार्थमित्यर्थः । तपश्चरद्भिरेवमेव भाव्यमिति दर्शयितुमिति यावत् ॥ ९ ॥

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चोदाहरति ॥ १० ॥

प्रकाशिका – सांख्ययोगाभ्यां तन्नामकशास्त्राभ्यां सह भगवदनुभाव उपवर्ण्यते येन तद्भगवदनुभावोपवर्णनं पञ्चरात्राख्यशास्त्रम् । सावर्णेर्मनोरुपसरत्युपास्ते ॥ १० ॥

ॐ नमो भगवत उपशमशीलायोपरतानात्म्यायाकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसाय परमगुरवे आत्मारामाधिपतये नमो नम इति ॥ ११ ॥

प्रकाशिका – उपरतानात्म्याय दूरीकृतदेहसंबन्धिदुःखाय ॥ ११ ॥

गायति चेदम्

कर्ताऽस्य सर्गादिषु यो न बद्ध्यते न हन्यते देहगतोऽपि दैहिकैः ।
द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥

प्रकाशिका – उपरतानात्म्यायेत्युक्तं विशदयन् स्तौति ॥ कर्तेति । यद्यपि सर्गादिषु कर्ता तथाऽपि जीववन्न बद्ध्यते । दैहिकैर्देहनिमित्तैः क्षुत्पिपासादिदुःखैर्न हन्यते न पीड्यते यस्य द्रष्टुरपि सतो दृक् दृष्टिरपि गुणै रूपादिभिर्दुर्विषयैर्न विदूष्यते दुष्टा भवति । असक्तश्चासौ विविक्तश्च स एव साक्षी तस्मै ।

असंगत्वान्न बद्ध्यते लोकविलक्षणत्वान्न हन्यते । साक्षित्वादौदासीन्येन द्रष्टृत्वान्न विदुष्यत इति हेतुगर्भविशेषणम् ॥ १२ ॥

इदं हि योगेश्वरयोगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो भक्त्या निधायोज्झति दुष्कलेवरम् ॥ १३ ॥

प्रकाशिका – उपशमशीलायेत्यनेन नारायणस्य ध्यानयोगनिष्ठत्वं लोकशिक्षणार्थमुक्तम् । तद्ध्यानयोगपाटवं निरूपयति ॥ इदमिति । हे योगेश्वर । हिरण्यगर्भो यद्योगनैपुण्यं ध्यानयोगपाटवं जगाद । इदमेव तत् । इदं किं तत्राह ॥ यदिति । त्वयि भक्त्या मनो निधाय दुष्कलेवरमुझ्झति त्यजतीति यत्तदिदमित्यर्थः । तथा तद्ध्यानयोगपाटवं संपाद्यं यथान्तकाले भगवति मनःप्रणिधानं स्यादिति भावः ॥ १३ ॥

यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥

प्रकाशिका – अन्यथा तस्य ध्यानाभ्यासादिश्रमो व्यर्थ इत्याह ॥ यथैहिकेति । लंपट आसक्तः सुतादिषु विषयेषु योगक्षेमादिकं चिन्तयन् कुकलेवरात्ययान्मरणाच्छङ्केत तथा विद्वानपि सन् यः शङ्कते तस्य यत्नो ध्यानरूपयोगाभ्यासादाविति शेषः । श्रम एव व्यर्थ इत्यर्थः ॥ १४ ॥

तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाऽहं ममतामधोक्षज ।
भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः सुभावितमिति ॥ १५ ॥

तात्पर्यम् – 'यस्य सम्यक्च भवति ज्ञानं भक्तिस्तथैव च । निश्चितस्तस्य मोक्षः स्यात्सर्वपापकृतोऽपि तु । यो ममत्वादिना दोषः स त्वन्यविषयः स्मृत' इति च ॥ १५ ॥

प्रकाशिका – इदानीं तादृशयोगनैपुण्यं स्वयं प्रार्थयते ॥ तन्न इति । अत्र कुकलेवरार्पितां सुदुर्भिदामहं ममतां येन योगेन भिन्द्याम तं योगं विधेहीति नारदेनाभे अहं ममताविच्छेदको योगः प्रार्थ्यते । न च नारदस्यापरोक्षज्ञानिनस्तादृशममताप्रसक्तिरस्ति येन तद्विच्छेदको योगः प्रार्थ्येत इत्याशङ्कापरिहारायात्र विवक्षितमर्थं प्रमाणैनैव दर्शयति ॥ यस्येति । ज्ञानमपरोक्षम् । तथाचशब्दौ भक्तिज्ञानयोः समुच्चये । एवशब्दस्य निश्चित एवेत्यन्वयः । ननु प्रारब्धनिमित्तेनाहंममतादिना निषिद्धकरणे कथं तस्य मोक्षो निश्चितः स्यादित्यत उक्तम् ॥ सर्वेति । तु कादाचित्कममतादिना निषिद्धकर्मकृतोऽपीत्यर्थः । उत्तराघस्याश्लेषोक्तेरित्याशयः । तर्हि ममतादिना मोक्षप्रतिबन्धो भवतीति

वचनस्य का गतिरित्यत आह ॥ य इति । आदिपदेनाहन्तादेर्ग्रहणम् । दोषो मोक्षप्रतिबन्धकरूपदोषवचनम् । अन्यविषयोऽज्ञानविषयः । सत्यम् । न नारदेऽहंममतादिदोषप्रसक्तिरस्तीति । तथाऽप्यज्ञानिभिरज्ञानिनामेव मोक्षप्रतिबन्धजननी या अहंममता सा चेत्कर्मवशादस्मासु कदाचित्प्राप्ता तर्हि तामपि योगेन भिंद्यामेत्यभिप्रायेणैवाहं ममताविच्छेदको योगो प्रार्थित इत्याशयः । ततश्चायं श्लोकार्थः ॥ तत्तस्माद्योगनैपुण्यस्यावश्यकत्वात्सुदुर्भिदामज्ञानादिभिर्भेत्तुमशक्यां त्वन्मायया त्वदीयया बन्धकशक्त्या कुकलेवरार्पितामज्ञानिभिः कृतामहं ममतां कदाचिदस्मासु प्राप्तां येन योगनैपुणेनाशु भिन्द्यामः सर्वथैव त्यजामः । तं त्वयि त्वद्विषये सुभावितं सुष्टु भक्त्यादिना वर्धितं योगं योगनैपुणं विधेहि ॥ १५ ॥

भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः सन्ति बहवो मलयो मन्दरप्रस्थो मैनाकस्त्रिकूट ऋषभः कनकः कोसलः सह्यो वेदगिरिः ऋष्यमूकः श्रीशैलो वेंकटो महेन्द्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलः कोकामुख इन्द्रकीलको हिमगिरिरिति चान्ये च शतशः सहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥ १६ ॥

एतासामापो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७ ॥

चन्द्रवटा ताम्रपर्णी अवटोदका कृतमाला वैहायसी कावेरी वेणी पयोदा यमुना सरस्वती शर्करावर्ता तुङ्गभद्रा कृष्णा भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी सुरसा नर्मदा चर्मण्वती सिंधुः अन्धः शोणश्च महानदौ वेदस्मृतिः ऋषिकुल्या त्रिसोमा कौशिकी मन्दाकिनी दृषद्वती गोमती सरयू ओघवती सप्तवती घोषणा सुषोमा शतमाला चन्द्रभागा शुतद्रु मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥

प्रकाशिका – भारतेऽपीति । न केवलमिलावृतादावित्यर्थः । सरितश्च शैलाः पर्वताश्च नितंबप्रभवाश्च तटेभ्यः संभूता आत्मना च देहेन वाप्युपस्पृशन्ति स्नानपानादिकं कुर्वन्तीत्यर्थः ॥१६,१७,१८॥

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्वय आत्मन आनुपूर्वेण सर्वा ह्येव सर्वेषां विधीयन्ते यथावर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥

प्रकाशिका – शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसरूपेण स्वारब्धेन स्वेन कृतेनानुपूर्वेण शुक्लेन दिव्या दिवि भवा लोहितेन मानुषाः कृष्णेन नारका इति क्रमेणेत्यर्थः । आत्मनः परमात्मनः

सकाशाद्विधीयन्ते साध्यन्ते । किं गतित्रयमेवैतद्वर्षगतानां नेत्याह ।। यथावर्णेति । अपिशब्दाद्यथाश्रम विधानमित्यस्य ग्रहणम् । ततश्चास्मिन्नेव वर्षे लब्धजन्मनां पुरुषाणां वर्णाश्रमविहितधर्मानतिक्रमेण मोक्षश्च भवतीत्यर्थः ।। १९ ।।

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरंधनद्वारेण यदा हि महापुरुषसङ्गतिः एतदेव हि देवा गायन्ति ।। २० ।।

प्रकाशिका – अपवर्गस्वरूपं ससाधनं दर्शयति ।। योऽसाविति । यदा हि महापुरुषाणां हरिपरायणानां संगतिस्तदा पूर्वोक्तानां नानागतीनां निमित्ता या अविद्याग्रन्थिस्तस्या रंधनं दहनं तद्वारेण योऽसौ भवति स्वरूपानन्दाद्याविर्भावरूपः सोऽपवर्ग इत्यन्वयः । स किं स्ववर्णाश्रमविहितधर्मानुष्ठानमात्रसाध्यः । नेत्याह ।। भगवतीति । भगवत्यनन्यनिमित्तभक्तियोग एव लक्षणं कारणतया ज्ञापको यस्य स तथा । तथा चैतादृशभक्तियोगोऽपि मोक्षजनक इत्याशयः । कथंभूते भगवति । सर्वभूतात्मनि सर्वप्राणिनामान्तर्यामिण्यनात्म्ये जीवधर्मरहितेऽनिरुक्ते साकल्येन वक्तुमशक्ये । अनिलयनेऽनन्याधारे परमात्मनि सर्वचेतनोत्तमे । मोक्षप्रदत्वाद्वासुदेवे इति विशेष्यम् । एतदेव भारतवर्षे लब्धजन्मनां पुरुषाणां वासुदेवेऽनन्यनिमित्तकभक्तियोगेन स्वस्ववर्णाश्रमविहितधर्मानुष्ठातॄणां मुक्तिर्भवतीत्ये-तदेवेत्यर्थः ।। २० ।।

अहो बतैषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्मलब्धं नृषु भारताजिरे मुकुन्दसेवोपयिकं स्पृहात्मभिः ।। २१ ।।

प्रकाशिका – एषामेभिरुत स्वित् । अथवा । स्वयमेव हरिरेषां प्रसन्नो भारताजिरे भारतांगणे मुकुन्दसेवोपयिकं मुकुन्दसेवोपयोगि यज्जन्म तत्र स्पृहेच्छा यस्मिन्स आत्मा मनो येषां ते तथा तैः ।।

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ।। २२ ।।

प्रकाशिका – एवं भारते वर्षे लब्धजन्मनो मुमुक्षून्प्रशंस्य स्वर्गप्राप्त्यर्थं काम्यकर्मिणो निन्दन्ति ।। किं दुष्करैरिति । न क्रतुभिरस्मदुद्देश्यकैर्यज्ञैरित्यर्थः । किं न किमपि प्रयोजनमित्यर्थः । ननु स्वर्गप्राप्तिरेव प्रयोजनमित्यत आहुः । फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या वा किमिति । न किमपीत्यर्थः । कुतो यत्र नारायणपादपङ्कजस्मृतिर्नास्ति । प्रत्युतातिशयेनेन्द्रियाणामुत्सवाद्विषयभोगलौल्यात्प्रमुष्टा भवति । तथा च नृणां हरिस्मरणहीनस्वर्गवासापेक्षया तत्स्मरणसंपादकं भरतवर्षजन्मैव श्रेष्ठमित्याशयः ।। २२ ।।

कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरः ।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः ॥ २३ ॥

प्रकाशिका – ननु तर्हि श्रवणादिसाध्यमहर्लोकप्राप्तिर्हरिस्मरणसंपादकत्वाच्छ्रेष्ठाऽस्त्वित्यत आहुः ॥ कल्पायुषामिति । कल्पो ब्रह्मदिनं तत्पर्यन्तमायुर्येषां तेषां स्थानं महर्लोकः । महर्लोके तु काल्पिका इत्युक्तत्वात् । तस्य जयः प्राप्तिस्तस्मात् । क्षणायुषामल्पायुषां मर्त्यानां भारतभूजयो भारतवर्षप्राप्तिर्महर्लोकजयस्यावरत्वोपपादनाय पुनर्भवादिति विशेषणम् । पुनरावृत्तिमत्त्वादित्यर्थः । अपुनरावृत्तिरूपमोक्षहेतुत्वाद्भारतभूजयो वर इत्याशयेनाह ॥ क्षणेनेति । अल्पकालेनेत्यर्थः । अनेन महर्लोकवासिनां कल्पपर्यन्तमायुर्न श्रेष्ठमित्याशयः । मर्त्येन मरणशीलेन देहेन कृतं कर्मादिकं मनस्विनो जितमनस्काः पुरुषाः संन्यस्य हरौ समर्प्य हरेरभयं पदं संयान्ति । एवं तत्संगत्या हरिकथाश्रवणादिना भक्तिमतो निवृत्तकर्मानुष्ठानेन मोक्षसंपादकत्वाद्भारतवर्षस्य वरत्वमुपपादितम् ॥ २३ ॥

न यत्र वैकुण्ठकथासुधाऽपगा न साधवो भागवतास्तदाऽऽश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न याति सेव्यताम् ॥ २४ ॥

प्रकाशिका – इदानीं तदभावे भारतवर्षप्रदेशो न सेव्यत इति कैमुत्येनाह ॥ न यत्रेति । यत्र स्वर्गादिलोके आपगा नद्यस्तदाश्रयाः कथापगाश्रयास्तद्वक्तार इति यावत् । यज्ञेशो विष्णुस्तत्प्रीतिकरा मखा महान्तो नृत्याद्युत्सवा येषु सुरेशा इन्द्रादयस्तेषां लोकोऽपि सेव्यतां सेवायोग्यतां न याति । किमु तादृशो भारतवर्षप्रदेश इत्याशयः ॥ २४ ॥

प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताः ।
न चेद्यतेरन्न पुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम् ॥ २५ ॥

प्रकाशिका – भारते वर्षे लब्धजन्मभिः सर्वथा मोक्षाय यत्नः कार्य इत्याशयेन तदर्थं यत्नशून्यान्निन्दन्ति ॥ प्राप्ता इति । इह भारते वर्षे वनमोक आश्रयो येषां ते वनौका मृगाः । समासान्तोऽकार आर्षः । यथा मृगयोर्बन्धनात्कथंचिन्मुक्ता मृगाः पुनस्तस्मिन्नेव प्रदेशे चरन्ति चेद्बन्धनं यान्ति तथैवेत्यर्थः ॥ २५ ॥

यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।
एकः पृथङ् नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥

प्रकाशिका – इतोऽपि भारतवर्षस्योत्तमत्वं तत्रत्यैः क्रियमाणयज्ञानां विशेषतो हरिप्रीतिजनकत्वादित्याशयेनाह ॥ यैरिति । भारतवर्षवासिभिरित्यर्थः । बर्हिषि यज्ञेऽग्नये जुष्टं निर्वपामीन्द्राय जुष्टं

निर्वपामीत्येवं भागशो निरुप्तं पृथक्कृतं पश्चादिष्टं कथं विधिमन्त्रवस्तुत इति ल्यब्लोपनिमित्ता पञ्चमी। विधिशब्दः प्रकारवाची। वस्तुशब्दो द्रव्यपरः। तथा च यस्मिन्यज्ञे यो विधिः प्रकारो यश्च मन्त्रो यच्च द्रव्यं तत्सर्वमनुसृत्येत्यर्थः। हरिराशिषां प्रभुरत एव पूर्णो हरिः स्वयमेव मुदा गृण्हाति। नन्विन्द्रादीनामेतन्मन्त्रैर्दीयमानं हविः कथं हरिर्गृण्हातीत्यत उक्तम् ॥ पृथङ्नामभिरेको मुख्य आहुत इति। इन्द्रादीनाममुख्यार्थत्वात्स एव मन्त्रैराहुत इत्याशयः ॥ २६ ॥

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थितो यत्पुनरर्थिनो मदः।
स्वयं विधत्ते भजतामनिच्छतामिच्छाविधानं निजपादपल्लवम् ॥ २७ ॥

प्रकाशिका – यज्विनां हविर्गृहीत्वा कीदृशं फलं ददातीत्यपेक्षायामाह ॥ सत्यमिति। अर्थितो हरिर्नृणां केषाञ्चित्काम्यकर्मिणामर्थितं धनादिकं दिशतीति सत्यम्। तथाऽपि न नियमः। पुनःशब्दोऽप्यर्थः। अर्थितोऽपि केषाञ्चिन्नृणां नैव दिशति। कुतो यद्यस्मादर्थिनो मदो भविष्यति। कर्म कृत्वा ये भक्ता अर्थादिकं प्राप्य न माद्यन्ति तेभ्योऽर्थितं दिशति। ये त्वर्थे दत्ते मदयुक्ता भविष्यन्ति तेभ्योऽनुग्रहायैवार्थितं नैव दिशतीत्याशयः। एवं मोक्षेतरफलेच्छुभ्यः फलदानप्रकारं निरूप्य तदनिच्छुभ्यः फलदानप्रकारमाह ॥ स्वयमिति। इतरपुरुषार्थमनिच्छतां भजतां यज्विनां निजपादपल्लवं तत्प्राप्तिरूपं मोक्षं स्वयं स्वयमेव तेषां तत्रेच्छाभावेऽपीत्यर्थः। विधत्ते दिशति। कथंभूतं पादपल्लवम्। इच्छाविधानमिच्छाया इष्टस्य विधानं प्राप्तिर्यस्मात्। तथा च भक्तैः कामनया कर्म कृतं चेत्कामितं ददाति। अन्यथा मोक्षमित्युक्तं भवति ॥ २७ ॥

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य दत्तस्य कृतस्य शोभनम्।
तेनाब्जनाभस्मृतिजन्मनः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥

श्रीशुक उवाच–

जंबुद्वीपस्य च राजन्नुपद्वीपानष्टौ ह्येक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पिताः ॥ २९ ॥

तद्यथा स्वर्णप्रस्थश्चन्द्र शुक्ल आवर्तनो रमणको मन्दोरुणः पाञ्चजन्यः सिंहलो लङ्केति ॥ ३० ॥

एवं तव भारतोत्तमजंबुद्वीपवर्षविभागो यथोपदेशमुपवर्णितः ॥ ३१ ॥

तात्पर्यम् – 'अनधीकारिणो देवाः स्वर्गस्था भारतोद्भवम् । वाञ्छन्त्यात्मविमोक्षार्थमुद्रेकार्थेऽधिकारिण' इति कौर्मे ।। २८ ।।

प्रकाशिका – एवं भारतवर्षे जन्म प्रशंस्य स्वेषामपि तत्र जन्म स्यादिति प्रार्थयन्ते ।। यद्यत्रेति । स्वर्गसुखावशेषितं स्वर्गादिभोगं दत्वाऽवशिष्टं स्विष्टस्य सम्यग्यजनस्य दत्तस्य दानस्य कृतस्यान्यस्यापि कर्मणः सकाशाद्यदि शोभनं पुण्यमस्ति तर्हि तेनात्र वर्षे भारते नोऽस्माकमब्जनाभस्य स्मृतिर्यस्माज्जन्म स्यात् । कुतो यद्यस्माद्धरिरत्र वर्षे भजतां शं मोक्षे आनन्दातिशयं तनोति । तस्मादत्र देवैर्भारते वर्षे जन्म प्रार्थ्यते । तद्व्यर्थम् । मोक्षेतरपुरुषार्थे तेषामिच्छाभावात् । मोक्षस्य च निश्चितत्वादित्याशङ्कापरिहारायात्राभिप्रायं प्रमाणेनैव दर्शयति ।। अनधीकारिण इति । अत्राधिकारिशब्द आधिकारिकपरः । तथा च ये नाधिकारिणः आधिकारिका न भवन्ति ते देवा देवत्वयोग्या मनुष्याः कर्मवशात्स्वर्गस्था अधिकारिण आधिकारिका देवा इन्द्राद्या उद्रेकार्थे आनन्दस्येति शेषः । तथा चैतदेव गायन्तीत्यत्र देवशब्देनोभयविधा अपि ग्राह्या इत्याशयः ।। २९-३१ ।।

इति श्रीमद्भागवतटिप्पण्यां प्रकाशियां एकोनविंशोऽध्यायः ।। १९ ।।

।। विंशोऽध्यायः ।।

श्री शुक उवाच–

अतः परं प्लक्षादिद्वीपानां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ।। १ ।।

प्रकाशिका – ।। हरिःॐ ।। प्रमाणमियत्तौ । लक्षणं तत्रत्यं वृक्षादिकं संस्थानं वर्तुलत्वादिरूपम् ।।१।।

जंबुद्वीपोऽयं यावान् प्रमाण्यविस्तारतस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्यातिकरो हिरण्मयः प्लक्ष उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ।। २ ।।

प्रकाशिका – तावता विस्तारेण । लक्षयोजनप्रमाणेनेति यावत् । ततो जंबुद्वीपात् । परिक्षिप्तः परिवेष्टितः । जंबूप्रमाणः पूर्वोक्तजंबूवृक्षप्रमाणः प्लक्षो वृक्षो यत्रोत्थितो द्वीपाख्यातिकरः । तत्संबन्धेनैव द्वीपस्य प्लक्ष इति संज्ञेत्याशयः । उपास्ते । हरिमिति शेषः । आकलय्य दत्वा ।। २ ।।

शिवं यशस्यं सुभद्रं शान्तं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्त सप्तैवासन्नभिज्ञाताः ॥ ३ ॥

प्रकाशिका – अभिज्ञाताः प्रसिद्धाः सप्तैव ॥ ३ ॥

मणिकूटो, वज्रकूट, इन्द्रसेनो, ज्योतिष्मान्, धूम्रवर्णो, हिरण्यग्रीवो, मेघमाल इति सेतुशैलाः, अरुणा, अनुगुणा, आङ्गिरसी, सावित्री, सुप्रभाता, ऋतंभरा, सत्यंभरेति महानद्यः यासां जलोपस्पर्शनविधूतरजस्तमसोहंसपतंगगोर्ध्वायनसप्तांग-संज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यात्मानं यजन्ते ॥ ४ ॥

प्रकाशिका – अन्ये च पर्वता नद्यश्च सहस्रशः संतीत्यर्थः । सेतुशैला मर्यादागिरयो जलोपस्पर्शनविधूतं रजस्तमश्च येषां हंसादिनामानो ब्राह्मणादिस्थानीयास्तत्र चत्वारो वर्णा विबुधोपमं संदर्शनं प्रजननं अपत्योत्पादनं च येषां स्वर्गद्वारं स्वर्गप्राप्तिसाधनं सूर्यात्मानमिति ॥ ४ ॥

''प्रत्नस्य विष्णो रूपं यत्सत्यर्तस्य ब्रह्मणः ।
अमृतस्य च मृत्योश्च सूर्यमात्मानमीमही''ति ॥ ५ ॥

तात्पर्यम् – 'सूर्यसोमाग्निवारीरविधातृषु यथाक्रमम् । प्लक्षादिद्वीपसंस्थास्तु स्थितं हरिमुपासत' इति च ॥ ५ ॥

प्रकाशिका – अत्र प्लक्षादिद्वीपषट्के उपास्यतयोक्तानां सूर्यसोमाग्यब्वायुब्रह्मणां विष्णुव्यतिरिक्तानां ग्रहणे तेषु प्रत्नस्येत्यादिमन्त्रार्थासंभवमालोच्य सूर्यसोमादिषट्कस्य विवक्षितमर्थं प्रमाणैनैव दर्शयति ॥ सूर्येति । यथाक्रमं स्थितं हरिमुपासते इत्यन्वयः । तथा च सूर्यादिशब्दास्तद्गतविष्णोरेव वाचका इत्याशयः । ततश्च सूर्यः सूर्यान्तःस्थः सूर्यनामा स चासावात्माऽऽदानादिकर्ता च तमित्यादिरूपेण मूलं व्याख्येयमित्याशयः । प्रत्नस्य पुरातनस्य व्याप्तस्य वा सत्यर्तस्य सत्यं मुक्तामुक्तनियामकं तच्च तद्दतं पूर्वावगतवत्स्थितं निर्विकारं च तस्य ब्रह्मणो गुणपूर्णस्यामृतस्य नित्यमुक्तस्य मृत्योर्मारकस्य विष्णोर्यद्रूपं सूर्यं सूरिभिः प्राप्यत्वात्सूर्यनामकं त्वां सूर्यान्तःस्थमात्मानमादानादिकर्तारमीमहि शरणं प्राप्नुम इति मन्त्रार्थः ॥ ५ ॥

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहोबलं बुद्धिर्विक्रम इति च सर्वेषा-मौत्पत्तिकीसिद्धिरविशेषेण वर्तते ॥ ६ ॥

प्लक्षस्तु समानेनेक्षुरसोदेनावृतो यथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृत्तेन ॥ ७ ॥

प्रकाशिका – द्वीप इत्यस्य पूर्वोत्तरेण च संबन्धः । परिवृतेन वर्तुलेनेत्येतत्सर्वद्वीपसमुद्रेष्वनुसंधेयम् ॥

यत्र ह वै शाल्मली प्लक्षायामा यस्यां वा व किल निलयमाहुर्भगवतच्छन्दःस्तुतः पतत्रिराजस्य साध्यर्धा जंबूत उपलक्ष्यते ॥ ८ ॥

तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्वबाहुः स्वसुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देवबर्हं पारिभद्रमाप्यायनमभिजातमिति ॥९॥

तेष्वद्रयो नद्यश्च सप्तैवाभिज्ञाताः सुरसः शतशृङ्गो वामदेवः कुन्दो मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥ १० ॥

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुन्धरोर्ध्वधरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥ ११ ॥

प्रकाशिका – यत्र शाल्मली समुत्पन्नाऽत एव द्वीपस्य शाल्मल इति नाम प्लक्षायामा प्लक्षवद्विस्तृतेत्यर्थः । छन्दोभिर्वेदैर्विष्णुं स्तौतीति छन्दस्तुत्तस्य पतत्त्रिराजस्य गरुडस्योच्चत्वस्य प्रमाणं दर्शयति ॥ सेति । सा शाल्मली जंबूतो जंबूवृक्षप्रमाणादध्यर्धोच्चेत्यर्थः । उपलक्ष्यते ज्ञायते । अस्मिन्वर्षे चतुर्वर्णानां नामान्याह ॥ श्रुतधरेत्यादिना । वेदमयंवेदप्रतिपाद्येषु प्रधानं सोमं सोमान्तःस्थं सोमनामानम् । आत्मानमिति पूर्ववत् ॥ ९-११ ॥

स्वगोभिः पितृदेवेभ्यो विभजन् शुक्लकृष्णयोः ।
अन्धः प्रजानां सर्वासां राजा नः सोममस्त्विति ॥ १२ ॥

प्रकाशिका – शुक्लकृष्णयोरुभयोः पक्षयोः स्वगोभिः स्वरश्मिभिः । पितृदेवेभ्यः पितृदेवानुद्दिश्य सोमं सोमरूपमन्धोऽन्नं विभजन् राजा चन्द्रान्तर्यामी सर्वासां प्रजानां नोऽस्माकं राजा रंजकोऽस्त्विति योजना ॥ १२ ॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वं कुशद्वीपो यस्मिन् कुशस्तबो देवकृतस्तद्द्वीपाख्यापनोज्वलन इवापरः शश्वत्स्वशष्परोचिषा दिशो विराजयति ॥ १३ ॥

प्रकाशिका – तद्विगुणः कुशद्वीप इत्यन्वयः । समानेन स्वसमानेन घृतोदेनावृतो यथा पूर्वं शाल्मलः सुरोदेनावृतस्तथा कुशस्तंबः कुशलक्षणतृणविशेषः स्वशष्पाणां निजबालतृणानां रोचिषा कांत्या ॥१३॥

तस्यापि प्रैय्यव्रतो राजा हिरण्यरेता नाम स्वद्वीपं सप्तभ्यः पुत्रेभ्यो यथाभागं विभज्य स्वयं तु तप आतिष्ठत् ॥ १४ ॥

वसुदानदृढरुचिनाभिगुप्तसत्यव्रतविप्रवामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तसप्तैव तु बभूवुः चक्रः शृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥ १५ ॥

रसकुल्या, मधुकुल्या, श्रुतविन्दा, मित्रविंदा, देवगर्भा, घृतच्युता, मन्त्रमालेति नद्यः यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुशलकसंज्ञा भगवन्तं जातवेद स्वरूपिणं कर्मकौशलेन यजन्ते ॥ १६ ॥

प्रकाशिका – अत्रत्यानां चतुर्वर्णानां नामान्याह ॥ कुशलेत्यादिना । जातवेदस्याग्नौ जातवेदोऽग्न्यादिनामकं स्वतन्त्रं रूपमस्यास्तीति जातवेदस्वरूपिणमित्यर्थः ॥ १४-१६ ॥

परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् ।
दैवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेति ॥ १७ ॥

प्रकाशिका – हे जातवेदः अग्ने । त्वं साक्षादनुपचारेण परस्य परब्रह्मणः । संनिधानयुतोऽसि । पुरुषाङ्गानां यज्ञपुरुषशरीरभूतानां देवानां हव्यवाडसि । अतो यज्ञेनास्मत्कृतेन पुरुषं देवान्तर्गतं यज । याज्ञीयं हविस्तस्मै समर्पयेत्यर्थः ॥ १७ ॥

तथा बहिः क्रौञ्चद्वीपो कुशद्वीपात्समानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनामनिवर्तक आस्ते ॥ १८ ॥

प्रकाशिका – क्षीरोदेन दधिमण्डोदेन । असुरजनमोहनायेयं व्यत्यासेनोक्तिः । अत एव व्यत्यासं क्षीरसागर इति पूर्वं भगवत्पादैरुक्तम् । उपक्लृप्तो वेष्टितो यथा कुशद्वीपो घृतोदेनोपक्लृप्तो वृतः ॥ १८ ॥

योऽसौ गुहप्रहरणोन्मथितनितंबकुंजोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ १९ ॥

प्रकाशिका – गुहस्य षण्मुखस्य प्रहरणेनायुधेनोन्मथिताः पीडिता नितंबाः कुञ्जा लतादिपिहितनिम्नप्रदेशाश्च यस्मिन्स तथा । क्षीरोदेन दधिमण्डोदेन ॥ १९ ॥

तस्मिन् प्रैय्यव्रतो घृतपृष्ठो नामाधिपतिः स तु तद्वीपवर्षाणि सप्तधा विभज्य तेषु पुत्रनामसु सप्तारिक्थादान्वर्षपान्निवेश्य स्वयं भगवतः परमकल्याणस्यात्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥ २० ॥

प्रकाशिका – आत्मभूतस्यात्मनि विद्यमानस्य ॥ २० ॥

आमो मधुमेहो मेघपृष्ठः सुधामा ऋषिज्योतिर्लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमान उपबर्हण उपभोजनो नन्दो नन्दनः सर्वतोभद्र इति ॥ २१ ॥

अभयामृतौघा आर्यका तीर्थवती रूपवती पवित्रा शुक्लेति यासामंभः पवित्रममलमुपयुंजाना गुरुऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा अम्मयं देवमपांपूर्णेनांजलिना यजन्ते ॥ २२ ॥

प्रकाशिका – अत्रापि चतुर्वर्णानां नामान्याह ॥ गुरु ऋषभेत्यादिना । अंमयं अपूशब्दार्थेन पूर्णमबन्तर्गतम् । देवं भगवन्तं यजन्ते पूजां कुर्वन्तीति यावत् । यज पूजायामिति धातोः ॥ २२ ॥

आपः पुरुषवीर्याश्च पुनन्तीर्भूर्भुवः सुवः ।
ता नः पुनीयुरघघ्नीः संस्पृशेतात्मनाऽभव इति ॥ २३ ॥

प्रकाशिका – पुरुषवीर्याः स्वान्तर्गतपरमपुरुषपराक्रमनियम्याः भूर्भुवःस्वस्त्रैलोक्यं पुनंतीः पुनंत्यो याश्चाघघ्नीः पापापहरा याश्चाभवेऽपुनर्भवाय लोकाय आत्मना देहेन संस्पृशेत ता नः पुनीयुरित्यन्वयः ॥ २३ ॥

एवं परस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परित उपक्लृप्तः यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य हि महान्सुरभिगन्धस्तद्वर्षमनुवासयति ॥ २४ ॥

तात्पर्यम् – 'अनाम्लं तु दधि क्षीरं क्षीरं सान्द्रं तथा दधी'ति शब्दनिर्णये ॥ २४ ॥

प्रकाशिका – क्षीरोदाद्दधिमण्डोदात् दधिमण्डोदेन क्षीरोदेन । पूर्वं क्षीरशब्देन च दधिमण्डोदः । अत्र च दधिमण्डोदशब्देन क्षीरोदोऽमुख्ययैव वृत्त्या व्याख्येय इत्याशयेनोभयत्र प्रवृत्तिनिमित्तभूतं गुणं प्रमाणेनैव दर्शयति ॥ अनाम्लं त्विति । तुशब्दोऽवधारणे । अनाम्लं मधुरमित्यर्थः । सान्द्रं घनीभूतं क्षीरमिति, दधीति च । व्यवह्रियते इति शेषः । तथा च पूर्वं दधिमण्डोदो माधुर्यलक्षणगुण-योगात्क्षीरशब्देन व्यवहृतः । अत्र तु क्षीरोदो सांद्रत्वगुणयोगेन दधिमण्डोदत्वेन व्यवहृत इति भावः । अनेन योजनाभेदतोऽत्र त्वित्युक्तो योजनाविशेषोऽप्यस्मिन्विषये प्रदर्शित इति ज्ञातव्यम् ॥ २४ ॥

तस्यापि प्रैययव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्र-नामानि तेषु स्वात्मजान्पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वाधार-संज्ञान्निधायाधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥

तेषु वर्षमर्यादागिरयो नद्यश्च सप्त सप्त एव ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ॥ २६ ॥

अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रश्रुतिर्निजधृतिरिति ॥ २७ ॥

तद्वर्षेषु पुरुषा धृतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायाम विधूतरजस्तमसः परमसमाधिना यजन्ते ॥ २८ ॥

अन्तःप्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे इदमिति ॥ २९ ॥

प्रकाशिका – शाकद्वीपेऽपि चतुर्वर्णानां नामान्याह ॥ धृतव्रतेत्यादिना । वाय्वात्मकमिति । वाय्वन्तर्गतं वायुनामानं वायोरादानादिकर्तारं सुखरूपमिति वा । विधूतरजस्तमसो विधूतराजस-तामसमला आत्मनः स्वस्य केतुभिः प्राणादिपञ्चवृत्तिनियामकविशेषैः ॥ २५-२९ ॥

एवमेव दधिमण्डोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकसमुद्रेण बहिरावृतो यस्मिन्बृहत्पुष्करं ज्वलनशिखामलकनक-पत्रायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनयोर्वर्षयोर्मर्यादाचलायुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात्सूर्यरथस्य मेरुं परिक्रमतः संवत्सरात्मकमहोरात्राभ्यां चक्रं परिभ्रमति ॥ ३० ॥

प्रकाशिका – दधिमण्डोदात्क्षीरोदात्। ज्वलनशिखावदमलानां कनकपत्राणामयुतं यस्मिंस्तत्तथा। अर्वाचीनपराचीनयोरान्तरबाह्यास्थितप्रदेशयोरहोरात्राभ्यां संवत्सरात्मकमहोरात्रकरणेन संवत्सररूपकाल प्रमापकम्॥ ३०॥

तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रोनामा स्वस्यात्मजौ रमणकधातुकनामानौ वर्षपती नियुज्य स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते॥ ३१॥

तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणमकर्मकेण कर्मणा चाराधयन्तीदं चोदाहरन्ति॥३२॥

यत्ते कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चति।
भेदेनैकान्तमद्वैतं तस्मै भगवते नम इति॥ ३३॥

प्रकाशिका – ब्रह्मरूपिणं ब्रह्मान्तर्गतं ब्रह्मनामकं रूपमस्यास्तीतितम्। अकर्मकेण ज्ञानमार्गेण कर्मणा च निवृत्तिकर्मणा च। हे भगवन्। यत्ते तव लिङ्गं स्वरूपं कर्म प्रधानं प्राधान्येन कर्मणा। यमुद्देश्यमिति यावत्। ब्रह्म लिङ्गं प्रतिमा यस्य तद्ब्रह्मलिङ्गम्। कथमर्चन्ति। भेदेन सर्ववैलक्षण्येनैकान्तनियमेन। पुनः कथंभूतम्। अद्वैतं स्वगतभेदवर्जितम् ''अहस्त्रिनाभिः सूर्यस्य एकचक्रस्य वै स्मृतम्। अरा संवत्सराः पञ्चभूतेभ्य षड्तवःस्मृता'' इति मत्स्यपुराणे चक्रस्य संवत्सरात्मकत्वमुक्तम्॥ ३१-३३॥

ततः परस्ताल्लोकालोकनामाचलः लोकालोकयोरन्तराले परित उपक्लृप्तः॥ ३४॥

यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलक्ष्यते तस्मात्सर्वसत्वपरिहृताऽऽसीत्॥ ३५॥

प्रकाशिका – ततः शुद्धोदकात्परस्ताद्बहिर्लोकः सूर्याद्या लोकवान्देश आलोकस्तयोरन्तराले मध्ये तयोर्विभागार्थमित्यर्थः। परस्तादिति यदुक्तं तत्राव्यवधानेनेत्यभिप्रेत्य तन्मध्यवर्तिनीं भूमिमाह॥ यावदिति। मानसोत्तरमेर्वोः पर्वतयोरन्तरमन्तराले स्थितम्। स्थलमिति शेषः। तावती तावत्संख्याका भूमिः काञ्चनीत्यर्थः। एवं च समुद्रान्परित्यज्य द्वीपलक्षणं स्थलमेव यावत्संख्याकं षण्णवति-लक्षयोजनसंख्याकं तावती षण्णवतिलक्षयोजनपरिमिता काञ्चनभूमिरित्युक्तं भवति। समुद्रसंख्याया अप्यत्र ग्रहणे सुवर्णभूमेः सार्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनसंख्याकत्वप्राप्त्याऽन्त्यार्धस्थलं हैममिति भारततात्पर्यनिर्णयाविरोधप्रसङ्ग इति ध्येयम्। नन्वेवमपि तद्विरोधस्तदवस्थो द्वीपमात्रगणनायामपि सार्धलक्षयोजनन्यूनतया षण्णवतिलक्षयोजनत्वालाभादिति चेन्न। काञ्चनभूमिलिप्तवज्रप्रदेशस्य

सार्धलक्षयोजनपरिमितस्य सत्वेन तत्साहित्येन षण्णवतिलक्षयोजनत्वोपपत्तेः । अत एव तत्र बाह्यतो वज्रलेपकमित्युक्तम् । यस्यां प्रहितः प्रगतो न पुनः प्रत्युपलक्ष्यते मृतो भवति । तस्मात्सर्वसत्त्व-परिहृता । देव तदनुगव्यतिरिक्तसर्वप्राणिभिः परित्यक्तेत्यर्थः ॥ ३४,३५ ॥

लोकालोक इति समाख्या यदनेनाचलेन लोकालोकावन्तरवर्तिना स्थाप्येत इति ॥

प्रकाशिका – लोकालोक इति नाम पर्वतस्यान्वर्थकमित्युपपादयितुमाह ॥ लोकालोकसमाख्येति । लोका इति सम्यक् अर्थमनुसृत्यैवाख्या नाम । कुत इत्यत आह ॥ यदिति । यद्यस्मादन्तर्वर्तिना मध्यवर्तिनाऽनेनाचलेन लोकालोकौ स्थाप्येते विविच्य ज्ञाप्येते तस्मात् । तथा च लोकालोक-व्यवस्थाहेतुत्वाल्लोकालोकसमाख्याऽस्येत्युक्तं भवति ॥ ३६ ॥

स लोकत्रयान्ते परित ईश्वरेण विहितः यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योति-र्गणानां गभस्तयोऽर्वाचीनांस्त्रिलोकान्वितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥ ३७ ॥

प्रकाशिका – लोकालोकाचलस्योन्नाहनायामयोः प्रमाणं सोपपत्तिकमाह ॥ स इत्यादिना । लोकत्रयान्ते सूर्यादिप्रकाशवल्लोकत्रयनिर्णयार्थम् । सोऽचलो यस्मात्परित ईश्वरेणोपक्लृप्तः । तस्मात्तल्लक्षणप्रतिबन्धकसद्भावात् । सूर्य आदिर्येषां ते ध्रुवोऽपवर्गोऽन्ते येषां तेषां ज्योतिर्गणानां गभस्तयोऽर्वाचीनान् अचलान्तःस्थितांस्त्रींलोकान्वितन्वानाः प्रकाशयन्तः पराचीना अचलाद्बहिस्थाता भवितुम् । बहिरपि गन्तुमिति यावत् । न कदाचिदुत्सहंते समर्था भवन्ति । अतः स तावदुन्नाहनायामो लोकत्रयोन्नहनवदुन्नहनायामौ यस्य स तथा । लोकत्रयं ह्येकपञ्चाशल्लक्षयोजनोच्चम् । अयमपि तावदुन्नहनायाम उच्चत्वे तावानेव एकपञ्चाशल्लक्षयोजनपरिमित एव । अन्यथा तस्य सूर्यादिप्रकाशानां बहिर्गमनप्रतिबन्धकत्वासंभवात् । विस्तारे तु किञ्चिन्न्यूनं तावत्वं सार्धपञ्चाशल्लक्षयोजनपरिमितत्वं ज्ञेयम् । लोकालोकप्रदेशस्तु पञ्चाशल्लक्षविस्तृतः । स पञ्चाशत्सहस्रश्चेति भारततात्पर्य-निर्णयेऽभिहितत्वात् ॥ ३७ ॥

एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटि गुणितभूगोलकस्य तुरीयभागो यावाँल्लोकालोकाचलः ॥ ३८ ॥

प्रकाशिका – एतावान् लोकविन्यासो देवर्षिमनुष्यादिसञ्चारप्रदेशो द्वीपादिलक्षणः कवि-भिर्विचिन्तितो निरूपितः । अनेन स्वोक्तप्रमाणसंवादेन दृढीकृतमिति ज्ञातव्यम् । एतावानपि लोकविन्यासो भूगोलैकैकदेशरूप एवेत्याशयेनाहुः ॥ स त्विति । भूगोलकस्य भूमण्डलस्य तुरीयभागे ।

निर्धारणे सप्तमी। सार्धद्वादशकोट्यात्मकतुरीयभागमध्ये लोकालोकाचलो लोकालोकपर्वतो यावत्पर्यन्तं तिष्ठति। तावानेव न तुरीयभागः सर्वोऽपीत्याशयः ॥ ३८ ॥

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणाऽभिनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥ ३९ ॥

प्रकाशिका – तदुपरिष्टात्तस्य लोकालोकाचलस्योपरि चतसृष्वाशासु दिक्ष्वात्मयोनिना ब्रह्मणाऽभिनिवेशिताः स्थापिता ये द्विरदपतयः गजेन्द्रा ऋषभ इत्यादिनामानश्चत्वारः ॥ ३९ ॥

तेषां स्वविभूतीनां महेन्द्रादीनां लोकपालानां विविधवीर्योपबृंहणाय भगवान्परम महापुरुषो महाविभूतिपतिरन्तर्याम्यात्मविशुद्धसत्वधर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणो विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्भुजदण्डैः सन्धार्यमाणस्तस्मिन् गिरिवरे समन्तात्सकललोकस्वस्तय आस्ते ॥४०॥

प्रकाशिका – तेषां गजेन्द्राणां विभूतीनां लोकपालानां च विविधवीर्योपबृंहणायान्तर्यामी सन् बहिरपि भुजदण्डैः संधार्यमाणः सम्यक् तद्धारणं कुर्वन् सकललोकस्वस्तये च भगवांस्तस्मिन्नास्त इत्यन्वयः। कथंभूतो भगवान्। आत्मनः स्वस्य विशुद्धा ये सत्त्वादयो वीर्यादयो महासिद्ध्यन्तास्तान्येव समीपे स्वस्वरूपे विद्यमानानि लक्षणानि यस्य स तथा ॥ ४० ॥

आकल्पमेष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायाथ योन्तर्विस्तार एतेन ह्यलोकपरिमाणं व्याख्यातम् ॥ ४१ ॥

प्रकाशिका – लोकस्वस्तय इत्युक्तमेव विशदयन् भगवतो गिरिवरेऽवस्थानस्य कालमर्यादां दर्शयति ॥ आकल्पमिति। ब्रह्मदिनपर्यन्तमित्यर्थः। योगमायया योगसामर्थ्येन गोपीथाय रक्षणायोऽन्तर्विस्तरः। लोकालोकचलस्येति शेषः। एतेन सार्धत्रिकोटियोजनात्मकान्तर्विस्तारप्रमाणेनालोकपरिमाणमालोकाख्यस्थलस्य परिमाणं व्याख्यातमुक्तं भवति। आलोकस्थलपरिमाणमप्येतावदेवेत्यर्थः ॥ ४१ ॥

यद्बहिर्लोकालोकाचलात्ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥ ४२ ॥

प्रकाशिका – किं तदलोकस्थलमित्यपेक्षायामाह ॥ यदिति ॥ लोकालोकाचलाद्बहिर्विद्यमानं स्थलं तदलोकसंज्ञमित्यर्थः। योगेश्वरा मुक्तास्तेषां गतिं गम्यमनन्तासनसंज्ञमित्यर्थः ॥ ४२ ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम्।
सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ॥ ४३ ॥

प्रकाशिका – एवं भूवलयप्रमाणमुक्त्वेदानीमन्तरिक्षादिलोकप्रमाणादिकं वक्तुं तावदन्तरिक्षस्थस्य सूर्यस्याण्डापेक्षया कियद्दूरे स्थानमित्यपेक्षायामाह ।। अण्डमध्यगत इति । द्यावाभूम्योर्यदन्तरमन्तरिक्षं तत्र योऽण्डमध्यप्रदेशस्तत्र सूर्यो गतः स्थित इत्यर्थः । सूर्यावासभूतान्तरिक्षप्रदेशस्याण्डमध्यत्वं कथमित्यपेक्षायामाह ।। सूर्याण्डेति । सूर्यावासप्रदेशाण्डगोलयोर्मध्ये सर्वदिगपेक्षया पञ्चविंशतिकोट्यः स्युः । अतस्तस्याण्डमध्यत्वमिति शेषः ।। ४३ ।।

मृतेऽण्ड एव एतस्मिन्यदभूत्ततो मार्ताण्ड इति व्यपदेशः ।
हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ।। ४४ ।।

प्रकाशिका – सूर्यस्याण्डमध्यगतत्वं तदीयं मार्ताण्ड इति हिरण्यगर्भ इति यन्नामद्वयं तदर्थपर्यालोचनया सिद्ध्यतीत्यभिप्रेत्य तन्नामद्वयं निर्वक्ति ।। मृतेऽण्ड इति । मृते जीवरहिते अचेतन इति यावत् । अण्डे यद्यस्मादभूत्तस्मात्तस्य मार्ताण्ड इति व्यपदेशो नाम प्रसिद्धमित्यर्थः । मृतेऽण्डभवनं सर्वसाधारणमतोऽसाधारण्येन व्यपदेशा भवन्तीति न्यायेन मृताण्डमध्य एव भवनं व्याख्येयमित्याशयः। एवं हिरण्याण्डेऽस्य यस्मात्समुद्भवस्तस्माद्धिरण्यगर्भ इति व्यपदेश इति योज्यम् ।। ४४ ।।

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही तथा ।
स्वर्गापवर्गनरकरसौकांसि च सर्वशः ।। ४५ ।।

देवतिर्यङ्मनुष्याणां सरीसृप्सगवीरुधाम् ।
सर्वजीवनिकायानां सूर्य आत्मा दृगीरितः ।। ४६ ।।

प्रकाशिका – अत्र सूर्यस्याण्डमध्यगतत्वोक्तिः पूर्वादिदिग्भागापेक्षयैव न तूर्ध्वाधोभागापेक्षयाऽपीति ध्येयम् । पूर्वादिदिगपेक्षयोर्ध्वाधोभागापेक्षया चाण्डमध्यगतत्वं तु मेरोरेव । योजनानां पञ्चविंशत्कोट्यो मेरुपर्वतात् । चतुसृष्वपि दिक्षूर्ध्वमधश्चाण्डं प्रकीर्तितमिति महाभारततात्पर्यनिर्णये कथितंत्वात् । अतोऽत्र सूर्यस्यांडमध्यगतत्वोक्तिस्तद्विरुद्धेति शङ्काऽनवकाश इति ज्ञातव्यम् । सूर्यनामकस्य हरेरुपासनार्थं माहात्म्यं दर्शयति ।। सूर्येण हीति । विभज्यन्ते विविक्ततया सृज्यन्ते रसौकांस्यतलादि स्थानानि । आत्मा आदानादिकर्ता दृङ्नेत्राधिष्ठातेरितः । श्रुत्यादाविति शेषः ।।४६।।

।। इति श्रीभागवतटिप्पण्यां प्रकाशिकायां विंशोऽध्यायः ।। २० ।।

॥ एकविंशोऽध्यायः ॥

श्री शुक उवाच–

एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतश्च व्याख्यात एतेनैव हि दिवो मण्डलमानं तद्विद उपदिशन्ति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ इदानीं द्व्यन्तरिक्षादिलोकप्रमाणादिकमतिदेशेन दर्शयितुमुक्तमनुवदति ॥ एतावानेवेति । सन्निवेशो विस्तार एतावानेव पञ्चाशत्कोटियोजनपरिमित एव । दिवो मण्डलमानं स्वर्गविस्तारप्रमाणम् ॥ १ ॥

यथा द्विदलनिष्पावादीनां तदन्तरेणान्तरिक्षमुपसन्धितम् ॥ २ ॥

यन्मध्यगो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकान् प्रतपत्यवभासयत्यात्मभासा एष उदगयन दक्षिणायन वैषुवसंज्ञाभिरारोहणवरोहणादिभिर्दीर्घ-ह्स्व-समानाभिर्गतिभिरारोहणावरोहणसमस्थानेषु यथासवनमभिपद्यमानो मकरादिराशिष्वहोरात्राणि दीर्घ-ह्स्वसमानानि विधत्ते ॥ ३ ॥

प्रकाशिका – एतदेव दृष्टान्तमुखेन दर्शयति ॥ यथेति । द्विदलानां निष्पावादीनां द्वयोर्दलयोर्मध्ये एकस्य मानेन यथा परस्य मानमुद्दिश्यते तद्वत् । अन्तरिक्षप्रमाणमप्यनेनैवोक्तंभवतीत्याशयेनाह ॥ तदन्तरेणेति । तयोर्द्यावापृथिव्योरन्तरेण मध्ये उपसन्धितं स्थापितम् । तदुभयसमविस्तारवदित्यर्थः । ''भुवः स्वर्गश्च कोट्यैव योजनानां प्रविस्तृतावि''ति भारततात्पर्यनिर्णयवचनम् । तत्रत्यानां भोगस्थान-विस्तारमेवाभिप्रेत्येति ज्ञातव्यम् ॥ ३ ॥

यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानानि भवन्ति ॥ ४ ॥

प्रकाशिका – अन्तरिक्षलोकस्य लक्षणं सूचयितुं तदन्तःस्थस्य सूर्यस्य माहात्म्यं संक्षिप्योक्तं विशदयति ॥ यन्मध्यग इति । तदन्तरिक्षमिति पूर्वेणान्वयः । अनेनैतादृशसूर्यवत्त्वमन्तरिक्षलोकस्य लक्षणं सूचितमिति ज्ञातव्यम् । एषः सूर्यनामा भगवान् उदगयनमुत्तरायणं गतेर्दीर्घत्वं मन्दत्वं ह्सत्वम् क्षिप्रत्वम् । तथा चोदगयनादिसंज्ञाभिर्मन्दक्षिप्रसमगतिभिरित्यर्थः । यथासवनं यथाकाल तत्तत्काल-मनतिक्रम्यानुसारेणेति यावत् । आरोहणावरोहणसमवस्थानेषु मानसोत्तरगतेष्विति शेषः । आरोहण-स्थानमुत्तरप्रदेशः । अवरोहणस्थानं निम्नप्रदेशः । एतदुभयभिन्नप्रदेशः समवस्थानम् । आरोहणा-वरोहणसमवस्थानेषु मकरादिराशिषु यथावसवनमभिपद्यमान इत्यन्वयः । आरोहणादयः शब्दाः

कर्मार्थकल्युडन्ताः । यथासवनं यथाकालं मकरादिसंक्रमणकालमनतिक्रम्य । तथा चोन्नतादिप्रदेशगमननिमित्तेषु मकरादिराशिषु मकरमासादिकालानुसारेणाभिपद्यमान इत्यर्थः । अत्र दीर्घत्वं त्रिंशन्मूहूर्तापेक्षयाऽधिकत्वं ह्रसत्वं तदपेक्षयाऽल्पत्वं तदुभयराहित्यं समानत्वमिति ज्ञातव्यम् ॥ ४ ॥

यदा वृषभादिषु पञ्चसु राशिषु चरति तदाहान्येव वर्धन्ते ह्रसन्ति च रात्रयः मासि मास्येकैका घटिका तुल्यं दिवसं वर्धमानान्यहानि तावतीरनुसंक्षीयमाणा रात्रयः समुद्धृत्य समान्यहोरात्राणि त्रिंशन्मुहूर्तान्येव भवन्ति यदा वृश्चिकादिषु पञ्चसु वर्तते तदाऽहोरात्राणि विपरीतानि भवन्ति ॥ ५ ॥

प्रकाशिका – एतदेव विविच्य दर्शयति ॥ यदेति । एकैका घटिकेति न नियमः । एकसार्धघटिकाभेदेन वृद्धिह्रासयोः प्रमाणसिद्धत्वाद्यथोक्तं फलं फले फलानि स्युरत्यादिनात्यन्तं वैषम्याभावात्समानानीत्युक्तम् । वृषभादिषु कन्यान्तेषु वर्धन्ते रात्र्यपेक्षयाऽधिका भवन्तीत्यर्थः । तेन कर्काटादिषु न ह्रासात्कथं वर्धन्त इत्युक्तमिति चोद्यानवकाशः । एवं वृश्चिकादिषु रात्रिवृद्धावपि दिनापेक्षयाऽल्पत्वात् ह्रसन्तीत्युक्तम् । कथमित्यत आह ॥ मासि मासीति । एकैका घटिकाऽधिका न्यूना वा यथा स्यात्तथा वर्धन्ते ह्रसन्ति चेत्यन्वयः । नन्वेवं दिवसस्य त्रिंशन्मूहूर्तात्मकता कथमित्यत आह ॥ तुल्यं दिवसमिति । अन्हां रात्रीणां च वृद्धिह्रासवत्त्वेऽपि त्रिंशन्मुहूर्तात्मकं दिवसं सर्वकालेषु तुल्यं सममेव वर्तत इत्यर्थः । कथमित्यतस्तदुपपादयति ॥ वर्धमानानीति । वर्धमानानि यान्यहानि तावतीस्तावत्संख्याकाः संक्षीयमाणा ह्रसंत्यो या रात्रयस्ताः । समुद्धृत्य घटिकाभिरेकीकृत्य । इदमुपलक्षणम् । वर्धमाना या रात्रयस्तावन्तीः संक्षीयमाणानि यान्यहानि समुद्धृत्येत्यपि ग्राह्यम् । अहोरात्राणि तदात्मकानि दिवसानि त्रिंशन्मुहूर्तानि त्रिंशन्मुहूर्तात्मकानि सन्ति समानि सर्वकालेष्वेकप्रकाराणि भवन्तीत्यर्थः । वृश्चिकादिषु मीनान्तेषु विपरीतान्यहानि ह्रसन्ति रात्रयो वर्धन्त इत्यर्थः ॥ ५ ॥

यावद्दक्षिणायनमहानि वर्धन्ते ह्रसन्ति च रात्रयः यावदुदगयनमहानि ह्रसन्ति रात्रयो वर्धन्ते ॥ ६ ॥

प्रकाशिका – मकरादिषु वृश्चिकादिषु मेषतुलयोरित्युक्तं संगृह्याह ॥ यावदिति । अत्रायं संप्रदायः । यदा सूर्यस्य वृषभादिषु राशिषूत्तरायणरूपगमनं भवति तदा ध्रुवेण मेरोर्दक्षिणदिग्भागे युगाक्षकोटिनिबद्धवायुपाशद्वयस्याकर्षणे क्रियमाणे रथस्यारोहणस्थाने गमनं गतिमांद्यंदिनवृद्धिः । यदा तु वृश्चिकादिषु दक्षिणायनरूपं गमनं तदोक्तपाशद्वये मेरोरुत्तरभागे ध्रुवेण मुच्यमाने रथस्यावरोहणस्थाने गमनम् । तेन गतेः क्षिप्रता रात्रिवृद्धिः । यदा तु मेषतुलयोर्वैषुवसंज्ञगमनं तदा तु पाशद्वयं समतया कृष्यते । तेन गतिसाम्यं दिवरात्रिसाम्यं च भवतीति ॥ ६ ॥

एवं नवकोट्य एकपञ्चाशल्लक्षाणि च योजनानां मानसोत्तरगिरिपरिवर्तमानस्योपदिशन्ति तस्मिन्नैन्द्रीपुरी मेरोः पूर्वस्माद्देवधानी नाम दक्षिणतो याम्या संयमिनी नाम पश्चाद्वारुणी निम्लोचनी नामोत्तरतः सौम्या विभावरी नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ ७ ॥

प्रकाशिका – इदानीं मानसोत्तराचले तोयेन परिभ्रमतः सूर्यस्यैकाहोरात्रगन्तव्यमार्गसंख्यामाह ॥ एवमिति । नवकोट्य इति । एकपञ्चाशल्लक्षाधिकनवकोट्य इत्यर्थः । मानसोत्तरपरिवर्तनस्य मानसोत्तरे परितो गमनमार्गस्य मेरोश्चतसृषु दिक्षु विद्यमानानां जनानामुदयास्तमयादिकं वक्तुमाह ॥ तस्मिन्निति । मानसोत्तराचल इत्यर्थः । मेरोः पूर्वस्मान्मेरोः पूर्वदिक्सूत्रनिपातप्रदेशे ऐन्द्रपुरी वर्तत इति शेषः । ऐन्द्रीमित्यादिद्वितीयान्तपाठे उपदिशन्तीत्यस्यानुषङ्गः । एवं दक्षिणत इत्यादिकमपि व्याख्येयम् । याम्या यमस्य विद्यमाना सोम्या सोमस्य विद्यमाना मेरोश्चतुर्दिशं स्थितासु तासु पुरीषु तत्पुरद्वारेषु सूर्यस्य यानि गमनानि तानि क्रमेणोदयादिसंज्ञानीत्युपदिशन्तीत्यन्वयः । भूतानां तत्तद्दिगवस्थितानां प्राणिनां प्रवृत्तिनिवृत्तिनिर्मितानीति । उदयमध्यान्हयोः प्रवृत्तिनिमित्तत्वमस्तमयनिशीथयोर्निवृत्तिनिमित्तत्वमिति ज्ञेयम् । समयविशेषेण संकेतविशेषेण । न हि सर्वदा संचरत उदयादिकं वास्तवं भवति । तथा च ये मेरोर्दक्षिणे देशे वसन्ति तेषामैन्द्रीमारभ्योदयादयः । ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सोम्यामारभ्य भवन्तीत्यर्थः ॥ ७ ॥

तत्रत्यानां दिवसमध्यगत एव सदाऽदित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥८॥

प्रकाशिका – तत्रत्यानां मेरुसमीपस्थेलावृतगतानां दिवसमध्यगत एव मध्याह्नसमयमत एव सव्येनाचलमिति । मकरादिसंक्रमणरूपगत्या स्वसव्येन विद्यमानमचलं ज्योतिश्चक्रभ्रमणवशात्प्रत्यहं दक्षिणतः करोतीत्यर्थः ॥ ८ ॥

यत्रोदेति तत्समानसूत्रनिपाते निम्लोचति यत्र क्व च न स्यन्दते तत्र हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तमनुपश्येरन् ॥ ९ ॥

प्रकाशिका – उदयास्तमययोर्देशनियममाह ॥ यत्रेत्यादिना । तत्समानसूत्रनिपाते पश्चिमे भागे निम्लोचत्यस्तमेति । दक्षिणायने क्रमेण किञ्चित्किञ्चिद्दक्षिणभागे उदयास्तमयौ उत्तरायणे क्रमेण किञ्चित्किञ्चिदुत्तरभागे तावित्यर्थः । एवमादित्योदयप्रदेशसूत्रनिपातप्रदेशं विहाय यत्र क्वापि न स्यन्दते न चलति । यो निम्लोचति । तस्यास्तमयभागगतस्य समानसूत्रनिपाते उदयप्रदेशे विद्यमानान् जनान्

प्रस्वापयति । तेषां निशीथं करोतीत्यर्थः । तत्रगतमस्तप्रदेशगतं न पश्यन्ति । मेरोर्दक्षिणतः स्थिता ये तमनुपश्येरन् इति पाठे ये दक्षिणतः स्थितास्तं सूर्यमनुपश्येरन् तस्मिन्समये विहितुं ध्यातुं ध्यानं कर्तुमुद्यतास्ते तदा तं न पश्यन्तीत्यर्थः । अनेन निम्लोचनशब्दार्थो दर्शित इति ज्ञातव्यम् ॥ ९ ॥

यदा चैन्द्र्याः पुर्याः प्रतिचलति पञ्चदशभिर्घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ १० ॥

एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनः पुनस्तथाऽन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रेण समभ्युद्यन्ति सह चाभिनिम्लोचन्ति ॥ ११ ॥

प्रकाशिका – साधिकानीति । पञ्चविंशतिसहस्राधिकानीत्यर्थः ॥ १०,११ ॥

एवं मुहूर्ते चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १२ ॥

प्रकाशिका – त्रयीमयो वेदप्रधानः । वेदोदित इति यावत् । यद्यपि सूर्यस्यापि नक्षत्रैः सहोदयास्तमयौ तथापि तस्य तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तमिति ज्ञातव्यम् ॥ १२ ॥

यस्यैकं चक्रं द्वादशारं षण्नेमित्रिनाभि स्वयं संवत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रवन्मानसोत्तरे गिरौ परिभ्रमति ॥ १३ ॥

प्रकाशिका – यस्य सूर्यरथस्य चक्रमेकं द्वादशमासाभिमानिदेवताभिमन्यमानाः द्वादशाराः यस्य तत् । षडृत्वभिमानिदेवताभिमन्यमानाः षण्णेमयो यस्य चातुर्मास्याभिमानिदेवताभिमन्यमानास्त्रिनाभयो यस्य स्वयं संवत्सराभिमानिदेवताभिमन्यमानं मेरोर्मूर्धनि कृतः कृतैकभागो मानसोत्तरे तदुपरि कृत एकोऽन्यो भागो यस्य । अक्षप्रमाणं तु सार्धकोटिद्वयं प्रोक्तं सप्तलक्षाधिकं तथा । रथाक्षस्य रवेर्मेरोर्मानसोत्तरवर्तिन इति प्रमाणानुसारेणेति ज्ञातव्यम् ॥ १३ ॥

तस्मिन्नक्षे कृतमूलो द्वितीयोक्षस्तुरीयमानेन संमितः ॥ १४ ॥

प्रकाशिका – यत्र मानसोत्तरगतेतरभागे प्रोतं रविरथचक्रं परिभ्रमति तस्मिन्दीर्घाक्षे चक्रप्रान्ते कृतमूलः कीलितपृष्ठभागस्तुरीयमानेन संमितो दीर्घाक्षचतुर्भागसमानः द्वितीयोक्षोऽस्ति ॥ १४ ॥

तैलयन्त्राक्षवद्ध्रुवे कृतोपरिभागो रथनीडस्तु षड्विंशल्लक्षयोजनायतस्तुरीयभाग-विशालस्तावान् रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ १५ ॥

प्रकाशिका – ध्रुवे ध्रुवलोके कृतो वायुपाशेन निबद्ध उपरिभागो यस्य । रथनीडो रथे सूर्यस्योपवेश्यस्थानम् । आयत उच्छ्रितः । तुरीयभागविशालो नवलक्षविस्तारस्तावान् रथनीडविशालसमानः । यत्र युगे गायत्र्यादिसप्तछन्दनामानोऽरुणेन सारथिनाऽयोजिताः सन्तो वहन्ति ॥ १५ ॥

पुरस्तात्सवितुररुणः पश्चान्नियुक्तः सौत्ये कर्मणि किलास्ते ॥ १६ ॥

तथा वालिखिल्या ऋषयोंऽगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥ १७ ॥

प्रकाशिका – एकोऽश्वो वहति सप्त नामेति श्रुतेः । एक एवाश्वः सप्तधा विभक्तः सप्तनामा सन्वहतीति ज्ञातव्यम् । सवितुः पुरस्तात्स्थितोऽपि पश्चात् प्रत्यङ्मुखो नवालिखिल्यादिवत्तदभिमुख इत्यर्थः । सूक्तवाकाय सूर्यप्रतिपादकमन्त्रैः स्तवनाय ॥ १६,१७ ॥

तथाऽन्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चैकैकशो रथस्था मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नामानः पृथक्कर्मभिर्द्वादश उपासते ॥ १८ ॥

लक्षोत्तरसार्धनवकोटियोजनपरिमण्डलभूवलयस्य क्षणेन गव्यूत्युत्तरद्विसहस्रयोजनानि स भुङ्क्ते ॥ १९ ॥

प्रकाशिका – ग्रामण्यस्तक्षाणः । ग्रामाधिपे तक्षणि च ग्रामणीः परिकीर्तित इत्यभिधानात् । गव्यूतिः क्रोशद्वयं भुंक्तेऽनुभवति । गच्छतीति यावत् ॥ १९ ॥

॥ इति श्रीभागवतटिप्पण्यां प्रकाशिकायां एकविंशोऽध्यायः ॥ २१ ॥

॥ द्वाविंशोऽध्यायः ॥

राजोवाच–

यदेतस्य भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रमतो राशीनामभिमुखं च प्रचलनं भगवतोपवर्णितं अमुष्य वयं कथमनुमीमहीति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ राशीनामभिमुखं प्रदक्षिणं चोपवर्णितम् । सव्येनाचलं दक्षिणेन करोतीति वदता । यद्वा । यदा वृषभादिषु राशिषु चरतीत्यादिकं वदतेत्यर्थः । राशिषु सञ्चरणं तदाभिमुखेनैवेति शास्त्रान्तरे प्रसिद्धमित्यतोऽभिप्रायत उपवर्णितमिति व्याख्येयम् । अमुष्य वयं कथमनुमीमहि । एतत्कथं सयुक्तिकं ज्ञास्यामो राशीनामप्रदक्षिणतो गमने हीदं कथंचिद्घटते । न च तदस्ति । नक्षत्रैः सहेति राशीनामपि प्रचलनस्य प्रदक्षिणत एवोक्तत्वात् । अतः सूर्यस्य राशिभिः सह प्रदक्षिणेन मेरुं परिक्रमतो राश्यभिमुखतया गमनं विरुद्धमत एतत्कथमनुमीमहीत्यर्थः ॥ १ ॥

स होवाच शुकः यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वात् । एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं प्रदक्षिणतः परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे वोपलभ्यमानत्वात् ॥ २ ॥

प्रकाशिका – नक्षत्रराशिभिर्नक्षत्रपादनवकात्मकमेषादिराशिभिरुपलक्षितेन युक्तेन कालचक्रेण कालज्ञापकसूर्यरथेन । अत्र सूर्यरथस्य नक्षत्रराशियुतत्वं वायुपाशविशेषद्वारेति ज्ञातव्यम् । एवं तदाश्रयणामित्युक्तं सोमादीनां सूर्यरथाश्रितत्वमपि वायुपाशद्वारैवोपपादनीयम् । तथा च प्रदक्षिणतः भ्रमता कुलालचक्रेण सह प्रदक्षिणीक्रियमाणा अपि तद्गता पिपीलिकादयो यथा स्वप्रयत्नसाध्यगत्याऽप्रदक्षिणा गच्छन्ति । एवं प्रदक्षिणेन भ्रमता सूर्यरथेन सह प्रदक्षिणीक्रियमाणोऽपि सविता स्वस्वाभाविकगत्योत्तरायणादिरूपया राशीनामभिमुखमप्रदक्षिणतश्चलति । अतो न कोऽपि विरोध इत्यर्थः । सूर्यादीनामिति वचनात् प्रश्नवाक्यस्थादित्यशब्द इतरोपलक्षक इति ज्ञातव्यम् ॥ २ ॥

स एष भगवानादिपुरुषः साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि वेदेन विज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषृतुषु यथोपजोषमृतुगुणान् विदधाति ॥ ३ ॥

प्रकाशिका – कर्मविशुद्धनिमित्तं द्वादशधा विभज्येत्यन्वयः । अन्यथा तन्मासदेवतापरिज्ञानाभावेन तदुद्देश्यकर्मणां न शुद्धिर्भवतीत्याशयः । यथोपजोषं स्वप्रीत्यनुसारेण ऋतुगुणान् पुष्पादीन्यस्मिन् ऋतौ यः पदार्थः स्वप्रीतिविषयस्तं पदार्थं तस्मिन् ऋतौ सृष्टवानित्यर्थः ॥ ३ ॥

तमेतमिह पुरुषास्त्रय्यां विद्यायां वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥ ४ ॥

प्रकाशिका – त्रय्यां विद्यायामाम्नातैः प्रतिपादितैः कर्मभिरित्यर्थः । वर्णाश्रमाचारानुपथा वर्णाश्रमविहिताचारानुवर्तिनः पुरुषा योगवितानैरीश्वरार्पणबुद्ध्या क्रियमाणकर्मादिरूपयोगसमूहैरंजसा श्रेयो मुख्यं श्रेयो मोक्षरूपम् ॥ ४ ॥

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुङ्क्ते तानेव राशिसंज्ञान् संवत्सरावयवान् मासान् पक्षद्वयं सपादर्क्षद्वयमुपदिशन्ति यावता षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥५॥

प्रकाशिका – एष एव स्वगत्या मासादिरूपकालविशेषः क्रियमाणयोगसमूहैर्ज्ञापक इत्याह ॥ अथ स इति । अथशब्दस्तस्मादित्यर्थे । द्वादशधा विभक्तत्वादित्यर्थः । लोकानामात्मा स्वामी । द्यावापृथिव्योरन्तरेण मध्ये विद्यमानस्य नभोवलयस्यान्तरिक्षस्य मध्ये कालचक्रगतः कालचक्राश्रितो भुङ्क्ते प्रवर्तयति । लोकानां ज्ञापयतीति यावत् । राशीनां मेषादीनां संज्ञा येषां तान्मेषसंक्रमणादिरूपान् सौरमासानुपदिशन्तीत्यन्वयः । इदमुपलक्षणम् । चैत्रादिसंज्ञान् चान्द्रमासानित्यपि ग्राह्यम् । अत एव चान्द्रमासप्रमाणमाह ॥ पक्षद्वयमिति । सपादऋक्षद्वयमिति सौरमासप्रमाणमुक्तं कृत्तिकापादयुक्ताश्विनीभरण्यौ मेषमास इत्यादिक्रमेण पादेन सहितं नक्षत्रद्वयमित्यर्थः । संवत्सरस्य षष्ठमंशं मासद्वयम् ॥ ५ ॥

अथ च यावताऽर्धेन नभोवीथ्याः प्रचरति तं कालमयनमाचक्षते ॥ ६ ॥

प्रकाशिका – नभोवीथ्या इति । नभसि विद्यमानाया अश्विन्यादिनक्षत्ररूपाया वीथ्या इत्यर्थः । वीथ्या इत्येकवचनं जात्यभिप्रायेण । नभसि हि वीथित्रयं प्रसिद्धम् । उत्तरत ऐरावती वीथी । मध्यतो जारद्गवी । दक्षिणतो वैश्वानरीति ॥ तदुक्तम् ॥ सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तम । स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् । वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वत इति । एतद्वीथीत्रयं प्रत्येकं त्रेधा भिद्यते । नागवीथी गजवीथी ऐरावतीत्युत्तरभागे वीथित्रयम् । आर्षभागो वीथी जरद्गवी चेति मध्यभागे वीथित्रयम् । अजावीथी मथवीथी वैश्वानरी चेति दक्षिणभागे वीथित्रयम् । एताश्च वीथ्योऽश्विन्यादिनक्षत्ररूपा एव । तथा चोक्तं वायुपुराणे । अश्विनी कृत्तिका याम्या नागवीथी तु शब्दिता । रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते । पुष्याश्लेषा तथाऽऽदित्या वीथी चैरावती मता । एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते । तथा द्वे चापि फाल्गुन्ये मघा चैवार्षभी मता । हस्तचित्ते

तथा स्वाती गोवीथी तु शब्दिता । ज्येष्ठा विशाखाऽनुराधा वीथी जारद्गवी मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते । मूलाषाढोत्तराषाढा अजवीथी तु शब्दिता। श्रवणश्च धनिष्ठा च मार्गी शतभिषक्तथा । वैश्वानरी भाद्रपदे रेवती चेति कीर्तिता । एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यत इति । याम्या भरणी । आदित्या अदितिदेवताका । पुनर्वसुः । मार्गी मृगवीथी । उत्तराषाढांत्यभागस्य श्रवणपूर्वभागस्य चाभिजिदिति संज्ञां प्रकल्प्याष्टाविंशति नक्षत्राणीत्याकरे स्पष्टम् । तथा च नभोविथ्या नभसि विद्यमानानां नक्षत्ररूपाणां वीथीनामर्धेन चतुर्दशनक्षत्रात्मकेन मार्गेण यावता कालेन षण्मासात्मकेन प्रचरति तं कालमयनं दक्षिणायनमित्याचक्षते । यानि पुष्यादीनि उत्तराषाढान्तानि चतुर्दश नक्षत्राणि तेषु यावता कालेन प्रचरति तं कालमुत्तरायणमित्याचक्षत इत्यर्थः ॥ ६ ॥

अथ च यन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन भुंजीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मांद्याशैघ्र्यसमानगतिभिः समामनन्ति ॥ ७ ॥

प्रकाशिका – अथ च यदिति ॥ यद्यावता कालेन द्यावापृथिव्योर्मण्डलाभ्यां सह विद्यमानं नभोमण्डलं लोकमित्यर्थः । कार्त्स्न्येनाष्टाविंशतिसंख्याककृस्त्ननक्षत्रसंचरणेन भुंजीत प्रकाशयेत्तं कालं संवत्सरादिरूपं समामनन्तीत्यन्वयः । संवत्सरादिसंज्ञानामर्थभेदस्तृतीयस्कन्धे भगवत्पादैरेवाभिहित-स्तत्रैवानुसंधेयः । नक्षत्रादिगतेरपि सूर्यगत्यधीनत्वात्तृतीये भगवत्पादोदितवत्सरपञ्चकस्य सूर्यप्रवृत्त्य-त्वमुपपन्नमिति ज्ञातव्यम् । कार्त्स्न्येनेत्युक्तमेव विवृणोति ॥ भानोरिति । उत्तरायणे मन्दगतिर्दक्षिणायने शीघ्रगतिर्वैषुवे समानेति ज्ञातव्यम् ॥ ७ ॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सर-भुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते नक्षत्राणामग्रणीत्वं च ॥ ८ ॥

प्रकाशिका – एवमादित्यस्य स्थानं कार्यं चाभिधाय सोमादीनामपि तदाह ॥ एवं चन्द्रमा इत्यादिना । अर्कगभस्तिभ्योऽर्कमण्डलात् । संवत्सरभुक्तिं द्वादशराशिरूपां पक्षाभ्यां शुक्लकृष्णसंज्ञाभ्यां भुङ्क्ते प्राप्नोति । मासभुक्तिमित्यादावर्कस्येत्यनुवर्तते । तथा चार्कस्य मासभुक्तिमेकराशिप्राप्ति-रूपामित्यर्थः । सपादऋक्षाभ्यां कृत्तिकापादसहिताश्विनीभरणीभ्यामित्यादिक्रमेण भुंक्ते इत्यर्थः । अर्कस्य पक्षभुक्तिमेकनक्षत्रप्राप्तिरूपामेकेनैव दिनेन भुंक्त इत्यर्थः । अत्र हेतुमाह ॥ अग्रचारीति । सूर्याद्यपेक्षयाऽग्रे चरतीति तथा । तदपि कुत इत्यत उक्तम् ॥ द्रुततरगमन इति । सूर्यादयो यस्मिन्नक्षत्रे स्थितास्तन्नक्षत्रमेकेनैव दिनेन भुक्त्वाऽग्रे नक्षत्रान्तरं गच्छतीत्यर्थः ॥ ८ ॥

अथ चापूर्यमाणाभिरुपक्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशन्मुहुर्तैर्भुङ्क्ते ॥९॥

प्रकाशिका – सर्वजीवनिवहप्राणः सर्वजीवराशिप्राणनहेतुभूतान्नवृद्धिकरः । अत एव जीवो जीवनप्रदः । दिनेन पक्षभुंक्तिं स्पष्टयति ॥ एकं नक्षत्रमिति । सूर्याद्यधिष्ठितमेकं नक्षत्रमित्यर्थः ॥ ९ ॥

य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति ॥ १० ॥

प्रकाशिका – महिमान्तरं वदन् जीवनिवहप्राण इत्युक्तं विशदयति ॥ य एष इति । मनोभिमानित्वान्मनोमयोऽमृतमयोऽमृतस्राविकिरणः । प्राणाप्यायनेति । अन्नवर्धनद्वारेति शेषः । सर्वमयः सर्वजीवप्रधानः ॥ १० ॥

तत उपरिष्टाल्लक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ ११ ॥

प्रकाशिका – नक्षत्राण्यश्विन्यादीनि । एवं सति सूर्यादीनां तन्नक्षत्रप्राप्तिस्तत्तन्नक्षत्रसमानदेशप्राप्तिरूपैव विवक्षितेति ज्ञातव्यम् । दक्षिणेनैवेत्यवधारणेन सूर्यादीनामेव न तेषामन्या गतिरस्तीति सूचयति । कालायने कालचक्रे सूर्यरथचक्ररूपे । तत्रेश्वरेण योजितत्वं तदनुसारेण प्रवर्तमानत्वम् । अष्टाविंशतिरष्टाधिकविंशतिसंख्याकानि । उपलभ्यन्त इति शेषः ॥ ११ ॥

तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव चार्कस्य शैघ्र्यमांद्यसाम्यादिभिर्गतिभिरर्कवच्चरति लोकानां नित्यदाऽनुकूल एव प्रायेण वर्षं यत्स्थितिद्वारेणानुमीयते स वृष्टिविष्टंभग्रहोपशमनः उशनसा बुधोऽपि व्याख्यातः ॥ १२ ॥

प्रकाशिका – उशनाः शुक्रः । स्वस्य शैघ्रगत्याऽर्कस्य पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे मांद्यगत्याऽर्कस्य पश्चात्तेन भुक्तनक्षत्रे साम्यगत्या सहैवार्केण भुज्यमाने नक्षत्रे । आदिपदेनातिचरादेर्ग्रहणम् । यद्वारेण यस्योशनसः स्थितिद्वारेण वृष्टेर्विष्टंभनं प्रतिबन्धो यस्माद्ग्रहात्तमुपशामयतीति वृष्टिविष्टंभग्रहोपशमनः बुधोऽपि व्याख्यातः ॥ १२ ॥

तत उपरिष्टाद् द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदाऽर्कमतिरिच्येत तदाऽतिवाताभ्रप्रायाऽनावृष्ट्याभयमाशंसते ॥ १३ ॥

प्रकाशिका – अर्कस्य पुरतः पश्चात्सहैवार्कवच्चरणे विषये विशेषमप्याह ।। तत इति । प्रायेणेत्यस्य कृत्यमाह ।। यदेति । अतिरिच्येत क्रमस्थनक्षत्रं विहायान्यत्र गच्छेत् । आशंसते सूचयति ।। १३ ।।

तत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ।। १४ ।।

प्रकाशिका – अघशंसो दुःखसूचकः । यदि न वक्रेणाभिवर्तते तर्हि त्रिभिस्त्रिभिः पक्षैरित्यन्वयः । शुभग्रहयोगे शुभसूचकोऽपि भवतीत्याशयेन प्रायेणेत्युक्तम् ।। १४ ।।

तत उपरिष्टाद्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं प्रचरति यदि न वक्रः स्यात् प्रायशोऽनुकूलो ब्राह्मणकुलस्य ।। १५ ।।

प्रकाशिका – सर्वानेव द्वादशराशीन् गुर्वावृत्तद्वादशांशस्य परिवत्सरत्वेनोक्तत्वात्परिवत्सर-मित्युक्तम् ।। १५ ।।

तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान् विलंबमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ।।१६।।

प्रकाशिका – तावद्भिस्त्रिंशद्भिरनुवत्सरैस्तिथीनां द्वादशावृत्तरूपैर्वत्सरविशेषैः पर्येति प्राप्नोति । अनेन राशिषु विलंबेन चरणात् शनैश्चरेति नामास्येति सूचयति । एकादशादिस्थाने स्थितस्य शुभकारित्वात्प्रायेणेत्युक्तम् ।। १६ ।।

तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलक्ष्यन्ते य एव लोकान्समनु-भावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति ।। १७ ।।

प्रकाशिका – ऋषयः । सप्तेति शेषः । समनुभावयन्तो स्वानुग्रहेण वर्धयन्तः परमं पदं शिंशुमारस्थानम् ।। १७ ।।

अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकाल-युग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ।। १८ ।।

प्रकाशिका – तस्मादृषिस्थानाद्यत्तद्विष्णोः परमं पदम् । यत्र ध्रुव उपास्ते । हरिमिति शेषः । अग्निनेत्यादिनोक्ता अग्न्यादयो नक्षत्ररूपा एव तैः समकालयुग्भिः समकालमेव युंजत इति यथा तैर्ध्रुवकालसमकालवासिभिरित्यर्थः । कल्पजीवानां महर्लोकवासिनामाजीव्यस्तत्त्वोपदेष्टृत्वादिनोपजीव्य उपास्ते । हरिमिति शेषः ॥ १८ ॥

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति ॥ १९ ॥

प्रकाशिका – ध्रुवमाहात्म्यमेवाह ॥ स हीति । ज्योतिर्गणानामित्युक्तमेव विवृणोति ॥ ग्रहनक्षत्रादीनामिति । अनिमिषेणोन्मीलितलोचनेन कालेन कालनाम्नेश्वरेणेत्यर्थः । अवष्टंभ आश्रयः । आक्रमणपशवो धान्यकाण्डानि पदा स्पृशन्तो बलीवर्दास्त्रिभिः सवनैः शैघ्रमांद्यसमानरूपैः कालविशेषैर्यथास्थानं स्वस्वविहितस्थानान्यतिक्रम्य मण्डलानि मेढीस्तंभस्य परितो विद्यमानानि त्रीणि स्थानानि ॥ १९ ॥

एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनोदीर्यमाणा आकल्पान्तं परितः क्रमन्ति ॥ २० ॥

प्रकाशिका – ग्रहादय इत्यत्रादिशब्दगृहीताः सप्तर्ष्यादयः ॥ अन्तर्बहिर्योगेनेति । आक्रमण-पशुवत्केषाञ्चिदन्तर्योगः केषाञ्चिद्बहिर्योग इत्यर्थः । कालचक्रे सूर्यरथचक्रे आयोजिता ईश्वरेण वायुपाशविशेषैः संयोजिता वायुना आतिवाहिकशब्दवाच्येनोदीर्यमाणाः प्रेर्यमाणाः ॥ २० ॥

नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते ॥ २१ ॥

एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीतकर्मनिर्मितगतयो भुवि न पतन्ति ॥ २२ ॥

प्रकाशिका – नन्वेते निरालंबाः कथं न पतन्तीत्यत आह ॥ यथेति । कर्म अदृष्टं सारथिः सहायो येषाम् । प्रकृतिपुरुषसंयोगेन जीवस्य शरीरविशेषसंयोगेनेति यावत् । अनुग्रहीतानि सहकृतानि कर्माण्यदृष्टानि । तैर्निर्मिता गतयो येषां जीवस्य पक्षादिशरीरविशेषसंयोगसहकृतादृष्टविशेषजनित-गतिमत्वाद्यथा श्येनादयो नभसि निरालंबा अपि न पतन्ति । तथैवैते ग्रहादयस्तेजोमयशरीर-विशेषसंयोगानुगृहीतादृष्टविशेषजनितगतिमन्तोऽस्मदादिवैलक्षण्यान्न पतन्तीत्याशयः ॥ २१,२२ ॥

केचनैतज्ज्योतिरनीकं शिंशुमारसंस्थानस्य भगवतो वासुदेवस्य योगधारणाया-मनुवर्णयन्ति ॥ २३ ॥

प्रकाशिका – एवं नभसि निराश्रयतया प्रतीयमानानां ग्रहादीनां निरालंबत्वमङ्गीकृत्य पतनमुपपादितम् । इदानीं वस्तुतो नैते निरालंबाः किन्तु शिंशुमारावयवालंबाः । अतोऽपि न पतन्तीति केषाञ्चिज्ज्ञानिनां पक्षमाश्रित्याह ॥ केचनेति । ज्योतिरनीकं ग्रहादिसमूहम् । प्रसिद्धशिंशुमारस्थानस्य प्रसिद्धशिंशुमारावयवसदृशावयवोपेतस्य योगधारणायां योगसामर्थ्येन धारणक्रियायां सत्यां भुवि न पतन्तीत्येतदनुवर्णयन्ति प्रतिपादयन्ति ॥ २३ ॥

यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लांगूले प्रजापतिरग्निरिन्द्रो धर्म इति ॥ २४ ॥

प्रकाशिका – शिंशुमारेण योगसामर्थ्येन कथं ज्योतिरनीकं धृतमित्यतस्तत्प्रपञ्चयति ॥ यस्येत्यादिना । कुण्डलीभूतदेहस्य वक्रीकृतशरीरस्य लांगूले पुच्छमध्ये प्रजापतिर्दक्षः । एते प्रजापत्यादयो नक्षत्ररूपा इति ज्ञेयम् ॥ २४ ॥

पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति ॥ २५ ॥

दक्षिणायनानि तु सव्ये यथा शिंशुमारस्य कुण्डलीभोगसन्निवेशस्य पार्श्वयोरुभयो-रप्यवयवाः समसंख्या भवन्ति ॥ २६ ॥

प्रकाशिका – उदगयनान्यादित्यानामुत्तरदिग्गमनमार्गभूतानि अभिजिदादीनि पुनर्वस्वान्तानि चतुर्दशनक्षत्राणि दक्षिणायनानि दक्षिणदिग्गमनमार्गभूतानि पुष्यादीन्युत्तराषाढान्तानि चतुर्दश सव्ये वामपार्श्वे ॥ २५-२६ ॥

पृष्ठे त्वजवीथी आकाशगङ्गा चोत्तरतः पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्यो-रार्द्राऽऽश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे च दक्षिणवामयोर्नासिक-योर्यथासङ्ख्यं च श्रवणपूर्वाषाढे च दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिण-वामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्वपङ्क्तिषु युञ्जीत ॥२७॥

प्रकाशिका – पृष्ठे त्वजवीथीति । इयमजवीथी न पूर्वोदाहृतवायुपुराणोक्तनक्षत्ररूपा किंत्वन्यैव प्रमाणान्तरोक्तेति ज्ञातव्यम् । उत्तरायणदक्षिणायननक्षत्राणां दक्षिणवामपार्श्वगतत्वमुक्तम् । तदेव स्थानविशेषेण विभज्य दर्शयति ॥ पुनर्वसुपुष्यावित्यादिना । वामपार्श्वपङ्क्तिषु वामपार्श्वप्रदेशेषु ॥ २७ ॥

तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येन प्रतियुञ्जीत ।। २८ ।।

प्रकाशिका – दक्षिणपार्श्वेषु दक्षिणपार्श्वप्रदेशेषु । ननु मृगशीर्षादीनां त्रयाणां भानामेवोदगयनत्वं न पुष्यादीनामित्यत आह ।। प्रातिलोम्येनेति । मृगशीर्षरोहिणीभरण्यश्विनीरेवतीत्यादिप्रातिलोम्येन पूर्वाभाद्रपदांतानि यान्युदगायननक्षत्राण्यष्ट तानि दक्षिणपार्श्वेषु युंजीतेत्यर्थः ।। २८ ।।

शतभिषज्ज्येष्ठे द्वे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ।। २९ ।।

उत्तरहनावगत्स्यः अधरहनौ यमो मुखे चाङ्गारकः शनैश्चर ऊपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयोराहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ।। ३० ।।

एतदुहैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्ष्यमाण उपतिष्ठेत नमोनमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषाय धीमहीति ।। ३१ ।।

प्रकाशिका – यमो नक्षत्ररूपः सर्वदेवतामयं रुपं सर्वदेवताप्रधानं रूपं प्रयतः कायिक-मानसिकनियमोपेतः । उपस्थानमन्त्रमाह ।। नमो नम इति । ज्योतिर्लोकाय ज्योतिषामाश्रयाय । कालायनाय कालज्ञापकायानिमिषां देवानामिति मन्त्रेणोपतिष्ठेतेत्यन्वयः ।। ३१ ।।

ग्रहर्क्षतारामयमाधिदैविकं रूपं हरेर्मंत्रकृतस्त्रिकालम् ।। नमस्यतः संस्तुवतो नश्यते वै स्वयं त्रिकालं कृतमाशु पापम् ।। ३२ ।।

तात्पर्यम् – 'ज्ञानानन्दात्मके विष्णौ शिंशुमारवपुष्यथ । ऊर्ध्वलोकेषु संव्याप्त आदित्याद्यास्त-दाश्रिता' इति ब्रह्माण्डे ।। ३२ ।।

प्रकाशिका – आधिदैविकमधिदेवाश्रयम् । मन्त्रकृतो जपतो नमस्यतो नमस्कारं कुर्वतः । पुंस इति शेषः । त्रिकालं त्रिकालजम् । अत्र हरेः शिंशुमारस्य स्थानमुक्तम् । तत्प्राकृतमिति शङ्कापरिहाराय केचनेत्युक्त्यैतन्मतं नाज्ञानिनां किन्तु ज्ञानिनामेवेति प्रदर्शनाय चात्र समाख्यप्रमाणं पठति ।। ज्ञानानन्दात्मक इति । अथशब्दोऽप्यर्थः । न केवलं नभोवलये समाश्रिताः किन्तु शिंशुमारवपुष्यपीति योजना ।। ३२ ।।

।। इति श्रीभागवतटिप्पण्यां प्रकाशिकायां द्वाविंशोऽध्यायः ।। २२ ।।

।। त्रयोविंशोऽध्यायः ।।

श्रीशुक उवाच–

अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं वालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्मकर्मणी चोपरिष्टाद्वक्ष्यामः ।। १ ।।

प्रकाशिका – ।। हरिः ॐ ।। सूर्यमारभ्य ध्रुवान्तं ज्योतिर्गणस्थितिं निरूप्येदानीं सूर्यादधस्ताद्विद्यमानस्य राहोः स्थितिं निरूपयति ।। अधस्तादिति । स्वर्भानू राहुर्नक्षत्रवदिति नभो मध्यमण्डले मेरुं परितः प्रादक्षिण्येनैव चरतीत्यर्थः । एके पौराणिकाः पूर्वस्यां दिशि भूमावेव समुदेत्य पश्चिमस्यां दिशि भूमावेवास्तमेतीत्येवं मतान्तरसूचनायैक इत्युक्तम् । आलभत लेभे । सैंहिकेयः सिंहिकायाः पुत्रः । अतदर्होऽमरत्वायोग्यः ।। १ ।।

यददस्तरणेर्मण्डलं प्रतपति तद्विस्तारतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यधानकृद्वैरानुबन्धात्सूर्याचन्द्रमसावभिधावति ।।२।।

प्रकाशिका – इदानीं सूर्यादिमण्डलानां परिमितिमाह ।। यदद इति ।। द्वादशसहस्रमिति । द्विदशसहस्रमित्यर्थः । विंशतिसहस्रपरिमितमिति यावत् । तेन सूर्यमण्डलाद्विगुणोक्तिता लभ्यते ।। त्रयोदशसहस्रमिति । अत्र दशशब्दो दशकपरः । स चावर्तनीयः । तेन त्रयोदशकस्त्रिंशदथ च दशेति व्याख्येयम् । तथा च राहुमण्डलस्य सोममण्डलाद्विगुणोक्तिता वा चत्वारिंशत्सहस्रपरिमितोक्तिता लभ्यत इति द्रष्टव्यम् । अत एवोक्तं भगवत्पादैः, ''राहुसोमरवीनां तु मण्डलाद्विगुणोक्तिताम् । विनैव सर्वमुन्नेयं योजना भेदतोऽत्र चे''ति ।। ग्रहणं वक्तुमाह ।। य इति । यो राहुः पर्वणि सूर्याचन्द्रमसावभिधावतीत्यन्वयः । पर्वकाल एव तस्य तादृशं सामर्थ्यमायाति नान्यदेत्याशयः । अभिधावति तौ गृहीतुमिति शेषः । तत्र हेतुसूचनाय तद्व्यवधानकृत् वैरानुबन्ध इति विशेषणद्वयम् । अमृतपानसमये तयोः सूर्यचन्द्रयोर्मध्ये उपवेशनेन व्यवधानं करोतीति । तथा अत एवैताभ्यां सूचितत्वात्तयोर्वैरमनुबध्नातीति तथा ।। २ ।।

तन्निशाम्योभयत्रापि भगवताऽभिरक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं चक्रं दुर्विषहं परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपराग इति वदन्ति लोकाः ।। ३ ।।

प्रकाशिका – भागवतं भगवतः प्रियम् । परिवर्तमानं परितो भ्रमत् । तदभिमुखं मुहूर्तमवस्थानम् । उपरागो ग्रहणम् ।। ३ ।।

ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ।। ४ ।।

प्रकाशिका – तावन्मात्रेऽयुतयोजनमात्रे ।। ४ ।।

ततोऽधस्ताद्यक्षरक्षःपिशाचभूतप्रेतगणानां विहाराजिरमन्तरिक्षं यावद्वायुर्वाति यावन्मेघा उपलभ्यन्ते ।। ५ ।।

प्रकाशिका – विहारार्थमजिरमङ्गणस्थानीयम् ।। ५ ।।

ततोऽधस्ताच्छतयोजनान्तरे चेयं पृथिवी यावद्धंससारसश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतन्तीत्युपवर्णितं भूमेर्यथा संनिवेशमवस्थानम् ।। ६ ।।

प्रकाशिका – पृथिव्या उपरि पार्थिवपक्षिसंचारप्रदेशोऽपि पृथिवीत्वेन विवक्षित इत्याह ।। ततोऽधस्ताच्छतयोजनान्तर इति ।। ६ ।।

अवनेरप्यधस्तात्सप्त भूविवरा एकैकशो योजनायुतायामविस्तारास्तारतम्येनोपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ।। ७ ।।

प्रकाशिका – भूविवरा अतलादयस्तारतम्येन सुखाधिक्यतारतम्येन । और्ध्वाधःक्रमेणेति वा ।। ७ ।।

एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिकाः सकलसंपत्समृद्धयः कामभोगैश्वर्यानन्दविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडाविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामविनोदा निवसन्ति ।।८।।

प्रकाशिका – सामान्यतो विवराणि वर्णयति ।। एतेष्वित्यादिना । अथातलमित्यतः प्राक्तनेन ग्रन्थेन एतेषु दैत्यादयो निवसन्तीत्यन्वयः । कथंभूतेषु । अधिकः कामभोगश्चैश्वर्यानन्दश्च विभूतिः संपत्तिश्च तैः सुसमृद्धा भवनादयो येषु । आक्रीडाविहारशब्दौ क्रीडाविशेषयोग्यस्थानपरौ । कथंभूताः । नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषाम् । ईश्वराच्छिवात् । तथात्वं च वरादित्यवगन्तव्यम् ।। ८ ।।

येषु महाराज मयेन मायया निर्मिताः पुरो नानामणिप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नानास्वनमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलङ्कृताश्चकासन्ति ।। ९ ।।

प्रकाशिका – येषु विवरेषु मयेन मायया मन्त्रौषधादिरूपया निर्मिताः पुरः पुराणि चकासन्तीत्यन्वयः । कथंभूताः । नानामणीनां प्रवेकाः श्रेष्ठास्तैर्विरचितैर्विचित्रैर्भवनादिभिर्विवरेश्वराणां गृहोत्तमैश्च समलंकृताः । कीदृशैर्गृहोत्तमैः । नानास्वनैर्मिथुनैर्मिथुनतो वर्तमानैः पारावतादिभिराकीर्णाः कृत्रिमभूमयो येषु ते तथा तैः ॥ ९ ॥

उद्यानानि चातितरां मन इन्द्रियानन्दिभिः कुसुमफलस्तबककिसलयावनतरुचिर-विटपैर्विटपिनां कनकलतालिङ्गितानां श्रीभिः समिथुनविहंगकुलकोलाहलजलाशया-साममृतजलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पलशत-पत्रादिवनेषु कृतनिकेतानामेनकविहाराकुलमधुकराणां मधुकरविविधस्वनादि-भिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥ १० ॥

प्रकाशिका – उद्यानानि चातितराममरलोकश्रियमतिशयितानि येषु चकासन्तीत्यन्वयः । कैः । विटपिनां वृक्षाणां मनआदीन्द्रियानन्दहेतुभिः कुसुमादिभिरवनता रुचिरा विटपाः शाखाविशेषास्तैः । पुनः काभिः । कनकलतालिङ्गितानां वृक्षविशेषाणां श्रीभिः शोभाभिः । पुनः कैः । अनेकविहाराकुल-मधुकराणामिन्द्रियोत्सवे मधुकरविविधस्वनादिभिः । कथंभूतानां मधुकराणाम् । वनेषु कृतनिकेतानाम् । वनवर्णनार्थमुक्तं स मिथुनेत्यादि । अमृतजलपूर्णानां स मिथुनाश्चक्रवाकादिमिथुनसहिता ये विविधा विहगास्तेषां कोलाहलो येषु तेषां जलाशयानां सरसां संबन्धिनां मत्स्यकुलानामुल्लङ्घनमुत्पतनं तेन क्षुभितं यन्नीरं जलाशयजलं तस्मिन्यानि नीरजादीनि तेषां वनेषु नीरजसाम्येन कमलम् । कल्हारं सौगन्धिकं लोहितम् । शतपत्रं तद्विशेषः । अतिशयितान्यतिशयोपेतानि ॥ १० ॥

यत्र ह वा न भयमहोरात्रिभिः कालविभागैरुपलक्ष्यते ॥ ११ ॥

यत्र हि महाहिप्रवरशिरोमणयः शार्वरं तमः प्रबाधन्ते ॥ १२ ॥

प्रकाशिका – शार्वरं शर्वरीभवं तमः ॥ १२ ॥

न वा एतेषु वसतां दिव्यौषधरसपानस्नानादाधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदश्रमग्लानिक्लमा इति वयोवस्थाश्च भवन्ति ॥ १३ ॥

प्रकाशिका – वयोऽवस्थाः शैशवादिवयःकृतावस्थाः ॥ १३ ॥

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ १४ ॥

प्रकाशिका – चक्रापदेशात् चक्रशब्दाभिधेयात् ।। १४ ।।

यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादास्रवन्ति पतन्ति च ।। १५ ।।

प्रकाशिका – यस्मिंश्चक्राख्ये भगवत्तेजसि पुंसवनानि गर्भा । आचतुर्थाद्भवेच्छ्रावः पातः पञ्चमषष्ठयोरिति वचनानुसारेण स्रावपातशब्दार्थो ज्ञातव्यः ।। १५ ।।

अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिमायाः काञ्चनाद्यापि मायाविनो धारयन्ति यस्य च विजृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्यः ।। १६ ।।

प्रकाशिका – एवं विवरस्वरूपं सामान्यत उक्त्वा विशेषतोऽप्याह ।। अथातलेत्यादिना । नाम्ना बलः तासु काञ्चनमायास्त्रयो जातिभेदेन स्वैरिण्यः स्वेच्छानुसारेण सवर्णे रताः कामिन्यः परकामानुसारेण सवर्णेऽपि प्रवर्तमानाः पुंश्चल्यः पुरुषमात्रेण सुरतमाकांक्षमाणाः ।। १६ ।।

या वै बिलायनप्रविष्टं पुरुषं रसेन हाटकाख्येन पाययित्वा स्वविलासावलोकनानुरागस्मितसल्लापोपगूहनादिभिः स्वैरं किल रमयन्ति ।। १७ ।।

प्रकाशिका – तासां सामर्थ्यमाह ।। या वा इति । बिलायनं बिलस्थानम् ।। १७ ।।

यस्मिन्नुपभुक्ते पुरुषा ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलात्मानः कत्थन्ते मदांधा इव ।। १८ ।।

प्रकाशिका – यस्मिन् रसे उपभुक्ते सेविते ।। १८ ।।

ततो वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिस्सर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूयाऽस्ते यत्र प्रवृत्ता सरित्प्रवरा हाटका नाम भवयोर्वीर्येण यत्तच्चित्रभानुर्मातरिश्वनेध्यमान अंजसा पिबति तन्निष्पन्नं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ।। १९ ।।

प्रकाशिका – भवयोर्भवश्च भवा च भवौ तयोर्यत्तद्वीर्यम् ।। चित्रभानुरग्निरेध्यमानः वर्धमानः पिबति पानं करोति अवरोधा अन्तःपुराणि पुरुषीभिः स्त्रीभिः ।। १९ ।।

ततोऽधस्तात्सुतले उरुश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तस्वलोकत्रयो

भगवदनुकंपयैव पुनःप्रवेशित इन्द्रादिष्वविद्यमानया सुसंवृद्धया श्रियाऽभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमपगतसाध्वस आस्तेऽधुनापि ॥ २० ॥

प्रकाशिका – सुतले बलिरधुनाऽप्यास्त इत्यन्वयः । कथंभूतः । प्रथमं भगवताक्षिप्तमाकृष्टं स्वाधीनं लोकत्रयं यस्य स तथा । प्रवेशितः । सुतल इति शेषः । कथंभूतेन भगवता । लब्धकायो भूत्वा धृतेन वटुवामनरूपेण ॥ २० ॥

नो एवैतत्साक्षाद्वरो भूमिदानस्य यद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं यस्य हवा क्षुत्पतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्पुरुषः कर्मबन्धमंजसा विधुनोति ॥ २१ ॥

प्रकाशिका – केचित्तु बलेरेतत्सुतलाधिपत्यं भूमिदानफलमिति मन्यन्ते । तन्निराकरोति ॥ नो वा एतदिति । अशेषजीवनिकायानां ब्रह्मादिजीवसमूहानां जीवभूते प्राणधारके आत्मभूते स्वामिन्यत एव परमात्मनि वासुदेवे तीर्थतमेऽतिशयेन शुद्धेऽत एवोपपन्ने युक्ते पात्रे परया शुद्धया संप्रतिपादितस्य तस्य भूमिदानस्य यद्बिलनिलयैश्वर्यमेतत् । साक्षाद्वरो मुख्यं फलं नो वै नैव तर्हि किमस्य मुख्यं फलमित्यपेक्षायामुक्तम् ॥ साक्षादपवर्गद्वारस्येति । मुख्यतो मोक्ष आनन्दातिशयकारणस्येत्यर्थः । यस्य नामोच्चारणमपि पुरुषस्य मोक्षादिसाधनं तदा किं वक्तव्यं तस्मिन्परया श्रद्धया समर्पितं भूमिदानं मोक्षसाधनं भविष्यतीत्याशयेनाह ॥ यस्य हवावेति । विवशः परमात्मवशत्वानुसंधानवान् ॥ २१ ॥

यस्य ह वै प्रतिबोधनं तु मुमुक्षवोंऽजसाहोपलभन्ते यत्तद्भगवन्नाम सर्वेषामात्मनामात्मदमेव ॥ २२ ॥

प्रकाशिका – ननु भगवत्साक्षात्कार एव कर्मक्षयरूपमोक्षसाधनतया प्रसिद्धोऽतः कथं नामाभिगृणन् तु कर्मबन्धं विधुनोतीत्यत आह ॥ यस्येति । प्रतिबोधनं साक्षात्कारमुपलभन्ते । नामोच्चारेणेनेति शेषः । तथा च नामाभिगृणन् भगवत्साक्षात्कारं संपाद्य कर्मबन्धं विधुनोतीत्यभिप्रेतम् । अतो न कोऽपि विरोध इत्यर्थः । न केवलं भगवन्नामोच्चारणं कर्मक्षयरूपमुक्तिसाधनं किन्तु स्वरूपानन्दाविर्भावप्रदं चेत्याह ॥ यत्तदिति । आत्मनामुक्तरीत्या कर्मक्षयं प्राप्तानामात्मदं स्वरूपानन्दाद्याविर्भावप्रदमेवेत्यनेनास्यार्थस्य प्रमाणसिद्धत्वं सूचयति । यद्भगवन्नामैतादृशं तदभिगृणन्पुरुष इत्यन्वयः । यस्येति यच्छब्दस्य तस्मिन् परमात्मनि वासुदेव इत्यन्वयः ॥ २२ ॥

न वै भगवान्नूनं मनुष्याननुजग्राह यदुत पुनरात्मानुसृतिमोक्षणं मायामयं भोगैश्वर्यमेवाऽतनुते ॥ २३ ॥

प्रकाशिका – नन्वेतादृशं चेद्भगवन्नाम तर्हि किमिति सर्वे न मुच्यन्त इत्यत आह ॥ न वा इति । मनुष्यान्सर्वान् । सृतिस्थानिति शेषः । आत्मनः स्वस्यानुसृतिरनुसरणम् । सेवेति यावत् । तस्या मोक्षणं विनाशो यस्मात्तत्तथा । भोगैश्वर्यमेव न तु नामोच्चारणादिरूपं स्वानुसरणमित्येवार्थः । आत्मानुस्मृतिमोक्षणमित्यपि क्वचित्पाठः । मायामयं प्रकृतिविकारम् । नश्वरमिति यावत् । तथा च भगवदनुग्रहस्यैव मोक्षहेतुतया यस्य प्रसादादित्यादिश्रुतिसिद्धत्वाद्भगवान् यस्मिन्नेनं मोक्षयिष्यामीत्यादि रूपमनुग्रहं करोति स एव नामोच्चारणादिरूपं मोक्षसाधनं संपाद्य मुक्तो भवति नेतर इत्याशयः ॥२३॥

यत्तद्भगवताऽनधिगतान्योपायेन च याश्ञाछलेनापहृतस्वशरीरावशेषितलोकत्रयो यो वरुणपाशैश्च बद्धो गिरिदर्यां चापविद्ध इति होवाच ॥ २४ ॥

प्रकाशिका – ननु बलेर्दैत्यस्य कथं भूमिदानेन मोक्ष आनन्दातिशय इत्यपेक्षायां दैत्यकुलोत्पन्नत्वेऽपि स हरिभक्त एव तद्वचनेन तथाऽवगमादित्याशयेन तद्वचनं प्रदर्शयितुमाह ॥ यत्तदिति । अवशेषितं स्वशरीरं येन तत्तथा । परनिपातः । याश्ञाछलेन याश्ञाव्याजेनापहृतं स्वशरीरावशेषितं लोकत्रयं यस्य स तथा । ननु भगवता याच्ञया कुतो लोकत्रयमपहृतमित्यत उक्तम् ॥ अनधिगतान्योपायेनेति । याच्ञाव्यतिरिक्तो युद्धादिरूपोपायस्तस्मिन्समये भगवता नाधिगतो बलेन ब्राह्मणानुग्रहबलेन युद्धादिना जेतुमशक्यत्वादित्याशयः । वरुणपाशैर्बद्धः संपूर्णं प्रतिश्रुतस्यादानाद्गिरिदर्यां कारागृहरूपायामिति वक्ष्यमाणप्रकारेण ॥ २४ ॥

नूनं बताऽयं भगवानर्थेषु निष्णातोऽसाविन्द्रस्य सचिवो मन्त्राय धृत एकान्ततो बृहस्पतिस्तमतिहाय यदा स्वयमुपेन्द्रेणातदर्हं मामयाचत पदान्यात्मन आशिषो नो एव न दास्यामि गंभीररयस्य कालस्य मन्वन्तरपरिमितं कियल्लोकत्रयमिदम् ॥२५॥

प्रकाशिका – बतेत्यास्वादनं । अर्थेषु भक्तस्य मम पुरुषार्थेषु निष्णातस्तत्साधनायोद्युक्तः । सचिवः सहायभूतो बृहस्पतिरेकान्ततो मन्त्रार्थमस्मत्संधानार्थं धृतः । इन्द्रेणेति शेषः । तदा तमतिहाय संधानात्पूर्वमेवातदर्हं स्वयाच्ञायामयोग्यम् । ननु भक्तस्य मम पुरुषार्थसाधनायोद्युक्तोऽयाचतेति कुतः । स्वप्रयोजनार्थमेवायाचतेति किं न स्यादित्यत उक्तं ॥ आत्मन आशिषो नो एवेति । अवाप्तसमस्तकामस्याशास्या अर्था नैवेत्यर्थः । नन्वथाऽप्युत्तरमन्वन्तरे दीयमानं लोकत्रयमेतद्भूमिदानस्य फलमस्त्वित्यत आह ॥ गंभीरेति । गंभीररयस्य गंभीरवेगस्य महतः कालस्य

मन्वन्तरलक्षणावयवपरिमितमत एवानित्यमिदं लोकत्रयात्मकं कियत्तुच्छमतो न मुख्यं फलं किन्तु नान्तरीयकमतो भक्तस्य ममानन्दोद्रेकार्थमेवायाचतेत्यर्थः । यथोक्तम् ।। ऐन्द्रं पदं नान्तरीयं फलं तु हरितोषणम् । जगद्दातुर्बलेर्यस्मादानन्दोद्रिक्तता भवेदिति ।। अपहृतस्वशरीरेत्यादि विशेषणत्रयम् आपत्काले इदमुक्तम् । अतः स हरिर्भक्तोत्तम इति दर्शयितुम् । न ह्यपकारिणि हि तत्कर्तृत्वं मन्यते ।।२५।।

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे नतु स्वपित्र्यं राज्यं यदकुतोभयं पदं दीयमानं भगवता विरमिते स्वपितरि तस्य महानुभावस्यानुपथमनुवर्तितुमल ममृदितकषायः को वाऽस्मद्विधः परिहीनभगवदनुग्रह इति ।। २६ ।।

प्रकाशिका – हरिसेवाया इतरन्न मुख्यं फलमित्यत्र पूर्वाचारमपि प्रमाणयति ।। यस्येति । पदं राज्यलक्षणं विरमिते विनाशिते । अस्मद्विधेषु तत्समः कोऽपि नास्तीत्याह ।। तस्येति । तस्यानुपथं तदनुष्ठितं मार्गमनुवर्तितुमनुष्ठातुमलं समर्थः । अमृदितः सम्यगनाशितः कषायो रागादिर्यस्य । प्रल्हादस्तु सम्यग्मृदितकषायोऽवाप्तभगवदनुग्रहश्चेत्यर्थः । इतिशब्दो बलिवाक्यसमाप्त्यर्थः ।। २६ ।।

तस्यानुचरितमुत्तरस्माद्विस्तरिष्यते यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येन पदांगुष्ठेन दशकंधरो योजनायुतं दिग्विजय उच्चाटितः ।। २७ ।।

प्रकाशिका – शुक आह ।। तस्यानुचरितमिति । तस्य प्रल्हादस्योत्तरस्मात् सप्तमे । तस्य बलेरुत्तरस्मादष्टम इति वा । बलिर्भगवद्भक्त इत्यत्र ज्ञापकान्तरमप्याह ।। यस्येति । निजजनेषु भक्तजनेष्वनुकंपितं कृतानुग्रहं हृदयं यस्य द्वारपालकतया स्थितस्य तस्य कर्माह ।। येनेति । दिग्विजये रावणदिग्विजयसमये । येन श्रीनारायणेन बलेर्द्वारि विशन् दशकंधर उच्चाटितः क्षिप्तः । केन पदा तत्राप्यंगुष्ठेनैवेत्यर्थः ।। २७ ।।

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता मुरारिणा त्रिलोक्याः शंचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ।। २८ ।।

प्रकाशिका – लब्धपदो लब्धं पदं तलातलाख्यं स्थानं येन स तथा । महीयते पूज्यते । स्वभृत्यैरिति शेषः ।। २८ ।।

ततोऽधस्तान्महातले काद्रवेयाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः पतत्रिराजाधिपतेः पुरुषोत्तमवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसङ्गेन क्वचित्प्रमत्ता विचरन्ति ॥ २९ ॥

प्रकाशिका – नैकशिरसामनेकफणानां गणः । अवतिष्ठतीति शेषः । एतत्प्रपञ्चयति ॥ कुहकेति । महाभोगवन्तः स्थूलशरीराः पुरुषोत्तमस्य वाहो वाहनं तस्मात्क्वचित्कदाचिदेव प्रमत्ता विचरन्ति न सर्वदेत्यर्थः ॥ २९ ॥

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालकेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकमहानुभावस्य हरेरेव तेजसा प्रतिहतावलेपा बिलेशया एव निवसन्ति ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ॥ ३० ॥

प्रकाशिका – विबुधप्रत्यनीका देवशत्रवः सकलेष्वपि लोकेषु महानुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतावलेपा विनाशितगर्वा बिलेशया एव सर्पतुल्या एवेन्द्रदूत्या सरमया तन्नामिकया शुन्या प्रयुक्ताभिर्मन्त्रवर्णाभिर्वेदरूपाभिर्वाग्भिरत्रैवमाख्यायिका, फणिभिरसुरैर्निगूहितां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां संधिमिच्छन्तः पणयः प्राहुः किमिच्छसीति । सा च सन्धिमनिच्छन्तीन्द्रस्तुतिपूर्वकं तान्प्रति पौरुषमाह । हता इन्द्रेण पणयः शयध्वमित्यादि । ते च तत्श्रुत्वा बिभ्यतीत्यादिरूपा ॥ ३० ॥

ततोऽधस्तात्पाताले नागपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनंजयधृतराष्ट्रशङ्खचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति येषामुह वै पञ्चसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ ३१ ॥

प्रकाशिका – महाभोगिनः स्थूलशरीरा महानमर्षः क्रोधो येषां पञ्चादिसंख्यानि शीर्षाणि येषां तेषाम् । शीर्षाणामित्युक्त्या शीर्षशब्द आकारान्तोऽप्यस्तीति ज्ञापयति । विरचिता विशेषेण रचिताः । संबद्धाः । औत्पत्तिका इति यावत् । विधमन्ति विनाशयन्ति ॥ ३१ ॥

तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तरे आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति सात्वता यद्दृश्ययोः सन्निकर्षणमहमित्यभिमानलक्षणं संकर्षणमित्याचक्षते ॥ ३२ ॥

प्रकाशिका – तस्य पातालस्य मूलदेशेऽधोभाग इत्यर्थः । तामसी तमोगुणकार्यसंहारकर्तृत्वादनन्तः शेषः इति समाख्याताः सात्त्वता इति पञ्चरात्राभिज्ञा यत्स्वरूपं संकर्षण इत्याचक्षते । केन निमित्तेन द्रष्टुर्दृश्ययोर्द्रष्टा जीवो दृश्यं देहगेहादिरूपं जडं तयोः सम्यक् कर्षणमेकीकरणं येन स तथा । एतदेव विवृणोति । अहमित्यभिमानलक्षणम् । देहादावहमित्यभिमानो लक्ष्यते येन तमित्यर्थः । तथा चाहं नाड्यां स्थित्वा देहादावहं कर्तेत्यभिमानप्रदत्वात्संकर्षण इत्युच्यते इत्युक्तं भवति ।। ३२ ।।

तस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्येत ।। ३३ ।।

प्रकाशिका – अनन्तबलत्वादनन्त इत्युच्यत इत्यभिप्रेत्य तद्बलस्यापरिमितत्वमाह ।। तस्येति । सिद्धार्थः सर्षपः ।। ३३ ।।

यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण संकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ।। ३४ ।।

प्रकाशिका – तामसत्वमुपपादयति ।। यस्येति । इदं विश्वमुपसंजिहीर्षत उपसंहर्तुमिच्छतः । अमर्षेण विरचिते कुण्डलीकृते भ्रमन्त्यौ भ्रुवौ तयोरन्तरेण मध्ये रुद्र उदतिष्ठदित्यन्वयः । एकादशव्यूह एकादशधा विभक्तरूपविशेषः । उत्तंभयन् उत्कंपयन् ।। ३४ ।।

यस्यांघ्रिकमलयुगलारुणविशदनखमणिमण्डलेष्वहिपतयः सह सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुंडलप्रभामण्डितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः किल विलोकयन्ति ।। ३५ ।।

प्रकाशिका – भगवत्त्वमाह ।। यस्याङ्घ्रीत्यादिना । एतेषां यच्छब्दानां स एष भगवानानन्त इत्युत्तरेणान्वयः । अङ्घ्रिकमलयुगलेऽरुणा विशदा नखास्त एव मणयस्तेषां मण्डलेषु प्रतिबिंबितानि स्ववदनानि विलोकयन्ति । कथंभूतानि । परिस्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि ।। ३५ ।।

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वंगदवलयविलसितविशदविपुलधवल सुभगरुचिरजभुजरजतस्तंभेष्वगरुचन्दनकुंकुमपङ्कानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरल लितस्मितास्तदनुरागसमुदितमदविघूर्णितारुणावलोकनयनवदनारविन्दं सव्रीडं किल विलोकयन्ति ।। ३६ ।।

प्रकाशिका – चारुभिरङ्गदवलयैर्विलसिता विशदादिरूपा भुजा एव रजतस्तंभास्तेषु तदभिमर्शेन भुजस्पर्शेन मदेन विघूर्णिते प्रचलिते आ ईषदरुणेनावलोकेन कृपाकटाक्षेण युक्ते नयने यस्मिंस्तद्वदनराविन्दम् । विलोकयन्ति । सव्रीडमिति क्रियाविशेषणम् ॥ ३६ ॥

स एष भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ३७ ॥

प्रकाशिका – अमर्षोऽसहनं रोषः क्रोध उपसंहृतस्तयोर्वेगो येन ॥ ३७ ॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतिविह्वललोचनः सुललितमुखरितामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदिकृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्ष्यामुदारलीलो बिभर्ति ॥ ३८ ॥

प्रकाशिका – सुरादिभिर्ध्यायमानोऽनवरतमदेन मुदितश्चासौ विकृतविव्हललोचनश्च सुललितेन मुखरितामृतेन वचनामृतेन स्वपार्षदान् विबुधयूथपतींश्चाप्यायमानो हर्षयन् वैजयन्तीं वनमालां बिभर्ति । कथंभूताम् । अपरिम्लानो रागःकान्तिर्यस्यास्तस्या नवतुलसिकायाः आमोदमध्वासवेन सुरभिमधुररसेन माद्यतां मधुकराणां ये व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्ताम् । नीले वाससी यस्य स तथा । एकमेव कुण्डलं यस्य स तथा । हलस्य निजायुधस्य ककुदि अग्रे कृतो न्यस्तः सुभगश्च सुन्दरश्च भुजो येन । उदारा लीला यस्य सः । कक्ष्यामुदरबन्धम् ॥ ३८ ॥

य एष एवमनुश्रुतोऽभिध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं सत्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति ॥ ३९ ॥

तस्यानुभावमिमं भगवान्स्वायंभुवो नारदः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ ४० ॥

तात्पर्यम् – इलावृतस्थस्तुतिवत्पातालमूलस्थस्तुतिर्योजनीयाऽनन्तविषया ॥ ४० ॥

प्रकाशिका – सश्लोकयामास पद्यलक्षणवाक्यैः कथयामास ॥ ४० ॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽसन् ।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमुह वेद तस्य वर्त्म ॥ ४१ ॥

प्रकाशिका – उत्पत्तीत्यादिश्लोकेषु जन्मादिकर्तृत्वरूपं हरेर्माहात्म्यमुच्यते । तत्कथं शेषस्तुतित्वेन व्याख्येयमित्यतोऽत्र विवक्षिततात्पर्यं दर्शयति ॥ इलावृतस्थस्तुतिवदिति । इलावृतखण्डे विद्यमानस्यानन्तस्य स्तुती रुद्रेण कृता यथा । जीवव्यपेक्षया चैव तथाऽन्तर्याम्यपेक्षया मिश्राः स्तुतयो ज्ञेया विष्णोरन्यत्र केवलमिति प्रमाणबलान्मुख्यामुख्यविवक्षयोभयपरतया व्याख्याताः । इलावृत-स्थानन्तस्तुतिर्मुख्यतोऽनन्तस्थहरिविषयैवामुख्यतोऽनन्तविषया योजनीया । अतो न कोऽपि विरोध इत्याशयः ॥ ततश्चायमुत्पत्तीत्यादेर्मूलस्यार्थः ॥ अस्य जगत उत्पत्त्यादिहेतवः सत्त्वाद्याः प्रकृतिगुणा यस्य शेषान्तर्यामिणः संकर्षणस्येक्षया कृपावलोकनेन कल्पाः स्वस्वकार्यकरणे समर्था आसन् । यद्रूपं ध्रुवं नाशशून्यमकृतमनादि यदेकमेव सत् । आत्मन्नात्मनि स्वाधारतया नाना नानाविधं जगदधात् धृतवत् । स्थानभेदेन भेदशङ्कापरिहारायैकमित्युक्तम् । अन्यन्याधीनत्वप्रदर्शनायात्मन्निति । तस्य शेषान्तर्यामिणो वर्त्म तत्त्वं जनः कथमु ह वेद नैव वेदेत्यर्थः ॥ ४१ ॥

मूर्तं यः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र ।
यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ ४२ ॥

प्रकाशिका – तर्हि मुमुक्षुभिः कथं ज्ञायत इत्यत उक्तम् ॥ मूर्तं य इति । यत्रेदं सदसत्कार्य-कारणात्मकं जगद्विभाति । स नोऽस्माकं भक्तानामुरुकृपया सत्त्वं बलज्ञानसमाहाररूपमत एव संशुद्धं मूर्त्तमस्मद्बुद्धियोग्यपरिच्छिन्नपरिमाणोपेतं रूपं बभार । स्वजनानां मनांस्यादातुं वशीकर्तुं यस्य लीलां शौर्यादिलक्षणां मृगपतिः सिंह आददे आशिक्षित ॥ ४२ ॥

यन्नामश्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलोभनाद्वा ।
हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ४३ ॥

प्रकाशिका – मुमुक्षूणामेतत्सेवाऽनायाससाध्येत्याह ॥ यन्नामेति ॥ ४३ ॥

मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादविदित विक्रमस्य भूम्नः को वीर्याण्यपि गणयेत्सहस्रजिह्वः ॥ ४४ ॥

प्रकाशिका – उदारवीर्य इत्युक्तमुपपादयति ॥ मूर्धनीति । गिर्यादिसहितं भूगोलं सत्त्वानि प्राणिनः सहस्रं मूर्धानो यस्य मूर्धन्यर्पितमणुवत्परमाणुवद्वर्तते । तस्य भूम्नो वीर्याणि । सहस्रजिह्वोऽपि को गणयेदित्यन्वयः ॥ ४४ ॥

एवं प्रभावो भगवाननन्तो दुरन्तवीर्यः स्वगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ ४५ ॥

प्रकाशिका – दुरन्तं वीर्यं यस्य स तथा । स चासौ स्वगुणानामनुभावः सामर्थ्यं यस्य स तथा । रसाया भूमेः उत्पत्तीत्यादिकं शेषदेवेऽप्यमुख्यतया कथञ्चिद्योज्यमतोऽस्य मिश्रस्तुतितेति ज्ञातव्यम् ॥ ४५ ॥

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्मविनिर्मिता यथोपदेशमनुवर्णिताः॥४६॥

प्रकाशिका – उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति ॥ एता ह्येवेति । गम्यन्त इति गतयो लोका । यथा कर्मविनिर्मिताः । तारतम्येनेति शेषः । तथा यथोपदेशमनुवर्णिताः ॥ ४६ ॥

कामान्कामयमानस्यैतावत्यो हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याख्याताः किमन्यत्कथयाम इति ॥ ४७ ॥

प्रकाशिका – कामान् कामयमानैर्नृभिरुपगन्तव्या इत्यन्वयः ॥ एतदेव विशदयति ॥ एतावत्यो हीति । विपाकगतयः फलभूता लोकाः । विसदृशा विलक्षणाः ॥ ४७ ॥

॥ इति श्रीभागवतटिप्पण्यां प्रकाशिकायां त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ चतुर्विंशोऽध्यायः ॥

राजोवाच–

महर्षे एतद्वैचित्र्यं लोकस्य कथमिति ॥ १ ॥

प्रकाशिका – ॥ हरिः ॐ ॥ पुंसो गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तम् । तत्कुत इति पृच्छति ॥ महर्ष इति । लोकस्य जनस्य कथं सुखसाधनप्रवृत्तकर्मणां समानत्वादित्याशयः ॥ १ ॥

श्रीशुक उवाच–

बहुगुणत्वात्कर्तुः श्रद्धायाः कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥ २ ॥

प्रकाशिका – कर्मणः श्रद्धावैचित्र्येण वैचित्र्यात्फलवैचित्र्यमिति परिहरति ॥ बहुगुणत्वादिति । सत्त्वादिभेदेनेज्यदेवताभेदेन च बहुविधत्वादित्यर्थः । सर्वा एवास्य भवन्तीति । यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमर्हति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितानिति । "यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जना" इति वचनादित्याशयः ॥ २ ॥

अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति ॥ ३ ॥

प्रकाशिका – एवं सात्त्विकादिभेदेन त्रिविधस्य प्रवृत्तधर्मस्य फलभूतां गतिं निरूप्येदानीमधर्मस्य गतिं निरुपयिष्यामीति प्रतिजानीते ॥ अथेति ॥ प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्य तस्याधर्मस्य कर्तुः श्रद्धायाः परलोकविषयबुद्धेर्वैसादृश्यात् तामसतरतामसतमादिभेदेन वैलक्षण्यात् । कर्मफलमधर्मफलं तथैव धर्मफलवदेव विसदृशं विलक्षणं भवति न त्वेकप्रकारम् ॥ ३ ॥

या ह्यनाद्यविद्याकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्ताः प्राचुर्येणानुवर्णयिष्यामः ॥ ४ ॥

प्रकाशिका – अथ तस्मादनाद्यविद्याकामानां जीवानां तत्परिमाणलक्षणा अधर्मपरिपाकस्वरूपा याः सृतयो गतयो नरकरूपास्ता इदानीं प्राचुर्येणानुवर्णयिष्याम इत्यन्वयः ॥ ४ ॥

राजोवाच–

नरका नाम भगवन् किं देशविशेषाः अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥ ५ ॥

प्रकाशिका – देशविशेषा भूमावेव केचन देशविशेषा इत्यर्थः । आहोस्वित्त्रिलोक्या अन्तराले मध्ये भूमिव्यतिरिक्ते विद्यमाना देशविशेषा इत्यर्थः ॥ ५ ॥

ऋषिरुवाच–

अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टा दण्डजलाशयस्याग्निष्वात्तादयः पितृगणा यस्यां दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासनानि वसन्ति ॥ ६ ॥

प्रकाशिका – अन्तिमपक्षमाश्रित्योत्तरमाह ॥ अन्तराल एवेति । अण्डजलाशयस्य गर्भोदकराशेरुपरिष्टात् ॥ ६ ॥

यत्र हवाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥ ७ ॥

प्रकाशिका – यथ कर्मावद्यं कर्मनिर्मितपापमनतिक्रम्य दमं दण्डम् ॥ ७ ॥

तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्र असीपत्रवनं सूकरमुखोऽन्धकूपः कृमिभोजनः सन्दंशस्तप्तभूमिर्वज्रकण्टकः शाल्मलीवैतरणीपूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचीपूरं रेतःपानमिति ॥ ८ ॥

किञ्चान्येऽपि क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकः पटनिरोधः पर्यावर्तनं सूचीमुखमित्यष्टाविंशतिनरका विविधयातनाभूमयः ॥ ९ ॥

तत्र ह यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते । अनशनातिपानदण्डसन्ताडनसन्तर्जनादिभिः पात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तमिस्रप्राये ॥ १०॥

प्रकाशिका – पात्यमानः पीड्यमानः। एकदेतिविशेषणात् कदाचिन्मूर्च्छां नयतीति सूचयति ॥१०॥

एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं धनदारादीनुपभुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति । यथा हि वनस्पतिर्वृंश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥ ११ ॥

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं कुटुम्बमेवानुदिनं पुष्णाति । स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १२ ॥

प्रकाशिका – एतद्गृहादिकमहं करोमीदं धनादिकं ममेति । बुद्ध्येति शेषः ॥ १२ ॥

ये चेह यथैवामुना विहिंसिता जन्तवः परत्रयमयातना उपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहुः । रुरुरिति सर्पादतिक्रूरसत्वापदेशः ॥१३॥

प्रकाशिका – त एव एतदनुसंधानवन्तो यमदूता एव ॥ १३ ॥

एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादारुरवस्तत्क्रव्येण खादयन्ति यः केवलं हि देहम्भरः ॥ १४ ॥

प्रकाशिका – अतिक्रूरस्य सत्त्वस्य प्राणिनोऽपदेशो व्यपदेशः केवलं हि देहंभरो यस्तं पुरुषमित्यन्वयः ॥ १४ ॥

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणिन उपरुन्धयति तमकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैल उपरुन्धयन्ति ॥ १५ ॥

प्रकाशिका – उपरुंधयन्ति श्वासमोक्षो यश्च न भवति तथा कारयन्तीत्यर्थः ॥ १५ ॥

यस्त्विह पितृभ्रातृब्रह्मध्रुक् तदर्थापहर्ता वा स कालसूत्रसंज्ञे नरकेऽयुतयोजनपरिमण्डले ताम्रमये खले तप्ततल उपर्यधस्तादग्न्यर्काभ्यां तप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिः शरीर आस्ते शेते तिष्ठति परिधावति याचति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि कालसूत्रसंज्ञके नरके निवसति ॥ १६ ॥

प्रकाशिका – अधस्तादग्निरुपर्यर्कस्ताभ्यां तदा खले । धान्यशोषणस्थलं खलमित्युच्यते । तद्वद्विद्यमानप्रदेश इत्यर्थः ॥ १६ ॥

यस्त्विह वै निजवेदपथादनापद्यपगतः पाषण्डं चोपगतस्तमसि पत्रवनं प्रवेश्य कशया प्रहरन्ति । तत्र हासादित इतस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति । स्वधर्महापाषण्डानुगतः फलं भुङ्क्ते ॥ १७ ॥

यस्त्विह राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्निष्पीडयमानावयवो यथैवेक्षुदण्ड आर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेह दृष्टदोष उपरुद्धः॥१८॥

प्रकाशिका – दृष्टःदोषश्चौर्यादिरूपो यस्य सः । यथा इह लोके उपरुद्धः कारागृहे निवेशितः । तथा कश्मलं मोहमुपगतो भवति ॥ १८ ॥

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविदितपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विदितपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकमत्कुणमक्षिकादिभिर्ये केचनेहाभिद्रोग्धारस्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिवृत्तिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ १९ ॥

प्रकाशिका – ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां पुरुषेणेश्वरेणोपकल्पिता वृत्तिर्विधिनिषेधादिरूपं वर्तनं यस्य ॥ १९ ॥

यस्त्विह वाऽसंविभज्याश्नाति यत्किञ्चनोपनतमनिवर्तिततयज्ञोपायमसंस्कृतं स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावदप्रदत्ताकृतनिर्वेशस्तावदात्मानं पातयति ॥

प्रकाशिका – यत्किंचनान्नादिकमुपनतं प्राप्तमसंविभज्यात्ति अतिथ्यादीन भोजयित्वाप्रदत्तस्यातिथ्यादिभ्योऽदत्तस्य न कृतो निर्वेशः प्रायश्चित्तं यस्य स तथा ॥ २० ॥

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य चापहरत्यन्यस्य वा नापदिपुरुषं तममुत्र राजन् यमपुरुषा अयस्मयैरग्निवर्णैः सन्दंशैस्त्वचि निष्कालयन्ति ॥२१॥

प्रकाशिका – संदंशैः सूचीविशेषैर्निष्कालयन्ति उद्धाटयन्ति ॥ २१ ॥

यस्त्विह वाऽगम्यां स्त्रियं पुरुषं वा योषिदपि गच्छति तावमुत्र कशया ताडयन्तस्तर्जयन्तस्तप्तया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २२ ॥

प्रकाशिका – सूर्म्या प्रतिमया ॥ २२ ॥

यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निकर्षयन्ति ॥ २३ ॥

प्रकाशिका – सर्वाभिगमः सर्वाभिः स्त्रीभिः कृतसौरतः शाल्मली कण्टकतरुः ॥ २३ ॥

ये त्विह वा राजन्यो राजपुरुषा वा पाषण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादाः तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानास्ते स्वासुभिरुह्यमानाश्चौघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवाहिन्यामुपतप्यन्ते ॥ २४ ॥

प्रकाशिका – आत्मना देहेन । स्वासुभिः स्वप्राणैश्च न वियुज्यमानाः ओघेन नदीप्रवाहेणोह्यमानाश्चोपतप्यन्त इत्यन्वयः ॥ २४ ॥

ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलपूर्णार्णवे निपतन्ति तदेवातिबीभत्सितमश्नन्ति ॥ २५ ॥

प्रकाशिका – पशुचर्यां स्वेच्छाचारम् ॥ २५ ॥

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि सम्परेतॉंल्लक्ष्यभूतान्यमपुरुषा इषुभिर्विद्धन्ति ॥ २६ ॥

प्रकाशिका – अतीर्थे विहितादन्यत्र ॥ २६ ॥

येत्विह वै डाम्भिका डम्भयज्ञेषु पशून्विशसन्ति तानमुष्मिंल्लोके वैशसने नरके पतितान्निरयपतयः पातयित्वा विशसन्ति ॥ २७ ॥

प्रकाशिका – निरयपतयो यमदूताः ॥ २७ ॥

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पातयति काममोहितस्तं पापकृतममुत्र रेतः कुल्यायां पातयित्वा रेतः पाययन्ति ॥ २८ ॥

ये त्विह वै दस्यवोऽग्निदागरदाग्रामान् सार्थान् वा विलुम्पन्ति राजाराजभटा वा तांश्चापि हि परे तान्यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च तैः सरभसं खादयन्ति ॥ २९ ॥

प्रकाशिका – सार्थान्वणिजः ॥ २९ ॥

यस्त्विह वाऽऽनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित्स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रयाद्गिरिभृङ्गान्निपात्यते । यत्तज्जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमतिलशोति विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ ३० ॥

प्रकाशिका – साक्ष्ये साक्षिणीवक्तव्ये । द्रव्यविनिमये क्रयविक्रयादौ । निरवकाशे निरवलंबे । आवीचीमच्छब्दार्थमाह ॥ यत्तदिति । तथा चावीचीमतीत्यस्य जलशून्ये पाषाणपृष्ठ इत्यर्थ उक्तो भवतीति ज्ञातव्यम् ॥ ३० ॥

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथास्तत्कलत्रं वा सुरां व्रतस्थितो वा पिबति तेषां निरयनीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥ ३१ ॥

प्रकाशिका – यस्त्विहेति । अत्रैवं योजना । विप्रस्तत्कलत्रं वा सुरां पिबति । राजन्यस्तत्कलत्रं वा सोमपीथः कृतः सोमपानः । सोमपानानन्तरमिति यावत् । सुरां पिबति वैश्यस्तत्कलत्रं वा पित्रादिव्रतस्थोऽपि सुरां पिबतीति ॥ ३१ ॥

अथ यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहुमन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽर्वाक्शिरनिपातितो दुरन्तायातना ह्यश्नुते ॥ ३२ ॥

ये त्विह वै पुरुषाः पुरुषमेधेन यजेरन्नशास्त्रीयान् वा पशून् खादन्ति याश्च स्त्रियोऽथ पशूंश्च खादन्ति तांश्च ताश्च वै पशव इह निहतास्ते यमसादने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिना विदार्यासृ क्पिबन्ति नृत्यन्ति गायन्ति हसन्ति च हृष्यमाणा यथेह पुरुषादाः ॥ ३३ ॥

प्रकाशिका – मृतकः जीवन्मृतक एव सन् मृत्वा पुरुषमेधेन पुरुषहत्यया यजेरन् । भैरवादीनिति शेषः । रक्षोगणाः रक्षोगणभूता सैनिकाः हिंसकाः पशुमारा इत्यर्थः । स्वधितिना विशंसनखड्गेन यथेह ते पुरुषादाः सन्तः पूर्वमनृत्यन्त तद्वत् ॥ ३२,३३ ॥

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैस्रम्भकैरुपविस्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनतया पातयन्ति तेऽपि च प्रेत्य यमयातनानुशूलसूत्रादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चोपहताः कङ्कबलाकादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति ॥ ३४ ॥

प्रकाशिका – विस्रंभकैर्विश्वासजनकोपायैरुपविस्रंभय्य विश्वस्य ॥ ३४ ॥

ये त्विह वै भूतानुद्वेजयन्ति नरा अत्युल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति यत्र नृपदन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृप्य ग्रसन्ति यथा बिलेशयाः ॥ ३५ ॥

प्रकाशिका – दंदशूकाः सदा दंशनशीलाः सर्पा इह लोके यथा बिलेशया अजगराः ॥ ३५ ॥

ये त्विह वा अवटकुसूलगृहादिषु भूतानि रुन्धन्ति तथाऽमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥ ३६ ॥

प्रकाशिका – अवटं निरुच्छ्वासबिलं कुलं सूव्रीहिगर्तः गृहम् कारागृहम् । आदिशब्दाज्जलमज्जनादिकं ग्राह्यम् । सगरेण विषसहितेनाग्निना ॥ ३६ ॥

यस्त्विह वाऽऽतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिवापचक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वक्रतुण्डा गृध्रकङ्ककाकबलाकादयः प्रसंह्योरुबलादुत्पाटयन्ति ॥ ३७ ॥

प्रकाशिका – अतिथयोऽज्ञातपूर्वा अभ्यागता ज्ञातपूर्वाः पापचक्षुषा वक्रीकृतेन नेत्रेण ॥ ३७ ॥

यस्त्विह वाऽर्थाभिमतिरहङ्कृतिस्तिर्यक्प्रेक्षणः सर्वतः शङ्की व्ययविनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनुपगतो ग्रह इवार्थमभिरक्षति । स चापि प्रेत्य तत्सम्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥ ३८ ॥

प्रकाशिका – अर्थाभिमतिरर्थेष्वभिमानवान् अहंकृतिरहंकारपूर्णो ग्रह इव यथा ब्रह्मराक्षसादिरूपो ग्रहो निधिमन्येभ्यो रक्षति तथेत्यर्थः । तस्यार्थस्य संपादनादिभिः शमलं गृण्हातीति तथा वित्तगृहं धनरक्षकपिशाचम् । वायकाः पटचीरैः कंथानिर्माणनिपुणाः परिवयन्ति सूचिप्रोतान् कुर्वन्ति ॥ ३८ ॥

एवंविधा नरका यमलोके सन्ति शतशः सहस्रशस्तेषु सर्वेषु सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशन्ति ॥ ३९ ॥

प्रकाशिका – अन्येऽपि नरका बहवः सन्तीत्याह ॥ एवंविधा इति ॥ ३९ ॥

तथैव धर्मानुवर्तिन उत्तरत्र इह तु पुनर्भवे उभयशेषाभ्यां निविशन्ति ॥ ४० ॥

प्रकाशिका – उत्तरत्र स्वर्गादौ इह मनुष्यलोके पुनर्भवे पुनरुत्पत्तिनिमित्ते उभयोर्धर्माधर्मयोः शेषाभ्याम् ॥ ४० ॥

निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषूपकल्पितः ॥ ४१ ॥

प्रकाशिका – आदावेव द्वितीयस्कन्धे वैश्वानरं यातीत्यादिना चतुर्दशधा चतुर्दशलोकप्रकारेण ।।४१।।

यस्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रुपमात्ममायया गुणमय-मनुवर्णितमादृतः पठति श्रुणोति श्रावयति स एवायं भगवतः परमात्मनोह्यणिष्ठमपि श्रद्धधानो भक्तिविशुद्धबुद्धिर्वेद ।। ४२ ।।

प्रकाशिका – स्थविष्ठं रूपं ब्रह्माण्डलक्षणम् । अणिष्टमपि स्वबिंबभूतमपि अणिष्टज्ञाने स्थूलश्रवणादिकं कारणमित्यर्थः ।। ४२ ।।

श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो याति ।
स्थूले निर्जितमात्मानं शनैः सूक्ष्मधिया नयेदिति ।। ४३ ।।

प्रकाशिका – एतदेवोपपादयति ।। श्रुत्वेति । याति जानाति । आत्मानं मनः सूक्ष्मधिया सूक्ष्मोपासनया ।। ४३ ।।

भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्थम् ।
गीतं मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम्नः ।। ४४ ।।

प्रकाशिका – सुखप्रतिपत्त्यर्थमुक्तं संगृह्याह ।। भूद्वीपेति । सकलजीवानां निकाय आश्रयो ब्रह्माण्डलक्षणस्तस्य धामाश्रयस्तस्य सकलजीवनिकायो धाम यस्येति वा । भूद्वीपादय एव संस्था अवयवा यस्य तत्तथा तत् ।। ४४ ।।

।। इति श्रीभागवतटिप्पण्यां प्रकाशिकायां चतुर्विंशोऽध्यायः ।। २४ ।।

समाप्तश्चायं पञ्चमस्कन्धः ।।

षष्ठस्कन्धः

॥ अथ प्रथमोऽध्यायः ॥

ॐ नमो भगवते वासुदेवाय

राजोवाच

निवृत्तिमार्गः कथित आदौ भगवता यथा ।
क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥

॥ अथ श्रीमद्भागवतटिप्पणी श्रीसत्यधर्मकृता प्रारभ्यते ॥

नृसिंहवासवीसूनुदाशरथ्यर्वकन्धरान् ।
कुलैतद्ग्रन्थसंस्थानोपास्तिदेवानुपास्महे ॥ १ ॥

देवते वाङ्मनसयो रमे हरिमनोरमे ।
द्रावयैतत्तरलतान्तरक्षीति केवलम् ॥ २ ॥

वाणि ते करवाण्यम्ब याञ्चां वाचं शुभां शुभे ।
दिश प्राङ्क्रमकृता नेति तान्तिर्बहुर्न हि ॥ ३ ॥

वाणीश तीर्थवाणी क्व वाग्दरिद्रस्य वाक् च ते ।
जनैर्नेत्यपहास्यः स्यां यतस्तद्वंशसम्भवः ॥ ४ ॥

टीकाकृत्पादनौका नो मनोरथमहार्णवम् ।
पारयेन्मध्वमरुता जयध्वजयुतायुता ॥ ५ ॥

आचार्यवर्यरचितोचितार्था विवृतिर्मितैः ।
पञ्चस्कन्ध्या पदैः सैव जीवातुर्मम निर्ममः ॥ ६ ॥

क्व ते त्वं क्वेति नो चेतः परां व्रज्यां व्रज प्रभो ।
साक्षात्तेभ्योऽपि पारोक्ष्यं क्षन्ते निदर्श्यते ॥ ७ ॥

निषिद्धोऽपि निषादस्त्वमेकलव्यो यदेकलः ।
मार्तिक्या च तन्मूर्त्या स्वस्त्राण्यापेति मा शुचः ॥ ८ ॥

किञ्च सूर्यास्तपूर्वाशोऽप्यसञ्चरण इत्यहम् ।
मानावजाने जाने यदरुणं स्वेट् पुरोदयम् ॥ ९ ॥

समयाज्ञोऽपि समयो गर्ह्यो नैतर्ह्यहं मया ।
गुरौ गीरिति विश्वासाद्विश्वासः फलदायकः ॥ १० ॥

ज्ञातो ज्ञातिविभागो वः पीयूषप्रापणक्षणे ।
नारायण्यकृता देवा न युक्तं नस्तदर्पणम् ॥ ११ ॥

श्रीसत्यबोधश्रीसत्यसन्धसत्यवरा वराः ।
मस्तकन्यस्तहस्ताय यद्दयां कुर्युः सहोदयाम् ॥ १२ ॥

नत्वा गुरून्भागवतषष्ठस्कन्धस्य काश्यते ।
तात्पर्यव्याकृतिमिषाद्भावो भावुकमोददः ॥ १३ ॥

एतत्तात्पर्यतात्पर्यभाष्यटीकान्तरानुगाम् ।
काञ्चित्तनोति विवृतिं कोऽपि कौपीनभाग्यभाक् ॥ १४ ॥

प्राक् तद्व्याख्यायते यत्र तात्पर्यं वर्तते न हि ।
यत्र तत्रादितो मूलमिति वित्त स्थितिं बुधाः ॥ १५ ॥

इह खलु नानाविधव्यसनसम्भृतसंसारासारकान्तारसन्ततसंसरणा निःसारणोपायनिदानव्यापारदीनजननिभालनकरुणापरवशः पराशरशरीरजो जननीतनूजनुषमिवोद्दिधीर्षुरनङ्कुरितधरान्तरस्थनिरुपरिसरणकरणबीजवदकिञ्चित्करज्ञानाङ्कुरं निर्निरञ्जनजनानामेतर्हि गर्हिताचारवत्परिदृश्यमानं पुरा चीर्णदुरिष्टवशादिष्टसाधनानुष्ठानाचतुरं पञ्चजनदीक्ष्याऽस्मिन्स्कन्धे सर्वाधिकारिसाधारणं सभक्ति भगवत्स्मरणमिव तन्नामसङ्कीर्तनं कार्पासराशिमाशुशुक्षणिरिव क्षणमात्रेणाघौघविघटकमिव घटकं सप्ररोहज्ञानं पुरो निधाय माधवधामाप्तेरिति निरूपयन्साक्षात्प्यक्षावतारस्य मनोनियामकस्य शुकस्य स्वरूपाप्रवित्या प्रवृत्त्यनुपपत्तेः श्रुतमश्रुतप्रायाभिप्रायं किमिति शङ्कातङ्कावैकल्याध्यवसायाच्छंसति किं शुकः परीक्षित्तु किं प्रेक्ष इति परीक्षकप्रेक्षावन्मानसशङ्काशङ्कुमुन्मूलयितुं द्वादशस्कन्ध्याः पादपीठत्वेन प्रथमस्कन्धे स्वप्रश्नग्रन्थस्यैवान्तिमत्वेनानुवदनीयत्वेन द्वितीयस्कन्धोदितमर्थमादीकृत्यापञ्चमस्कन्धोक्तार्थं लेशतोऽनुवदन्नरकादिश्रवणात्तन्निर्हरणोपायः पापिनां कथं भविष्यति कथयेति तदुद्धृतये

पृच्छति राजा चेति वक्ति ॥ निवृत्तिमार्ग इति । निवृत्तिमार्गो भगवत्प्रीतिमात्राशासनमार्गः । एतत्स्कन्धबोधनीयोऽर्थस्तु 'दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च सन्ततिः । यतो देवासुरनरास्तिर्यङ्नगखगादयः । त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजा' इत्यनुक्रमणिकातोऽवसेयः ।

नन्वनुक्रमणिकायां किं न सञ्जग्राह सङ्क्राह्याजामिलकथां भगवानिति चेन्न । भगवन्नामस्मरणतत्सङ्कीर्तनादेश्चापवर्गानर्गलमार्गताया अत्रैवाजामिलवत्परःशतं नाममात्रोच्चाराविर्भूतप्रभूतज्ञानानामधिकारिणाम् । आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । नामान्यनन्तस्य यशोऽङ्किता-नीत्यादि प्रथमे । योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् । यद्व्रह्यमाणैर्हरिनामधेयैरित्यादि द्वितीये । यन्नामधेयश्रवणानुकीर्तनात् । यज्जिह्वाग्रे वर्तते नाम तुभ्यम् । ब्रह्मानूचुर्नाम गृणन्ति एत इत्यादि तृतीये । यन्मख इज्यनामभिः । यन्नामधेयमभिधायेत्यादि चतुर्थे । सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् । कश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्त्वित्यादि पञ्चमे । यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः । नामव्याहरणं विष्णोरिति षष्ठे । हरेर्नामपदैरुदाहृतैः । वैकुण्ठनामग्रहणम् । उत्तमश्लोकं नाम यत् । भगवन्नाम मङ्गलम् । भगवन्नाम गृह्णन् । तीर्थपदानुकीर्तनात् । हरेर्नाम गृणन्पुत्रोपचारितम् । सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम् । नारायणेति यन्नाम सकृच्छ्रवणादि प्रस्तुते । मुहुः श्वसन्वक्ति हरेर्जगत्पतेर्नारायणेत्यादि सप्तमे । श्रवणमङ्गलनामधेयेत्याद्यष्टमे । यन्नामस्मृतिमात्रेत्यादि नवमे । यन्नाम गृह्णन्नखिलाञ्छ्रोतॄन् । नामानि च मङ्गलानि त इत्यादि दशमे । शृण्वन्सुभद्राणि रथाङ्गपाणेर्गीतानि नामानि तदर्थकानीत्येकादशे । यन्नामधेयम् । विमुक्तकर्मार्गल इत्यादि द्वादशे चोक्तेरनासाधारण्येन प्रतिपादनान्नैतत्स्कन्धमात्रमुख्यार्थत्वमिति त्यागसम्भवात् । भगवता पूज्येन त्वया । यथोक्तं तत्त्वविवेकटीकायां भगवानिति पूजार्थमिति । योग्यैश्वर्यादिमतेति वा । एतेन न धनाशया ममोपदेशनमिति सूचितं भवति । निवृत्तिर्नितरां वृत्तिस्तत्रैव वर्तनं कदाऽपि न प्रत्यावृत्तिर्मोक्ष इति । अन्यथारूपमिति निवृत्तिर्विमुक्तिस्तन्मार्ग इति वा । मुक्तिर्हित्वाऽन्यथारूपमित्यादेः ।

ननु तत्र सृष्ट्यादेरपि स्पष्टनात्तज्ज्ञानस्य च मुक्त्यनुपयुक्तत्वात्कथं निवृत्तिमार्गः कथित इत्यसदनुवादो मेदिनीपतेरित्यत आह ॥ यथेति । यथा सम्यक् तस्य सम्यक्त्वं च नोक्तोपयुक्तत्वातिरिक्तम् । जन्मादिकारणत्वेनेतरव्यावृत्तभगवज्जिज्ञासाया एव जन्माद्यस्य यतोऽथातो ब्रह्मजिज्ञासेति शंसता व्यासेनैव कर्तव्यतोक्तेस्तदुपयुक्तताऽऽपामरामरं दृढमनुभवारूढेति मन्तव्यम् । ननु यथा भगवता तव पित्रा त्वां प्रति प्रतिपादितं यथा मां प्रति त्वया कथितमिति योग्यतावीप्सानतिवृत्तिसादृश्यानि यथार्था इत्युक्तयथाऽसादृश्यं इति प्रतिषिद्धसमासतानुकूल्यसादृश्यार्थकत्वसम्भवात्कि-

मननुशिष्टसम्यगर्थतास्वीकारेणेति चेन्न । साक्षात्सदाशिवावतारं स्वं प्रति यथोपदिष्टवान्वासिष्ठस्तथा अचकथद्राज्ञ इत्यनधिकारात्तस्येत्यविलास्यव्याहरणत्वात् । यथोक्तम् । अतो यथात्मशक्त्यैवेत्युपासनापादीयानुव्याख्यानव्याख्यानावसरे सुधायाम् । नन्वत्रात्मशक्तिमनतिक्रम्य यथात्मशक्तिमित्यव्ययीभावे सति तस्याव्ययीभावश्चेत्यव्ययत्वादव्ययादाप्सुप इति तृतीयाया लुका भवितव्यम् । तथाऽऽत्मशक्त्येति कथम् । उच्यते । यथेति भिन्नं पदं सम्यग्वाचि । निवृत्तिमार्गः कथित आदौ भगवता यथेति यथेति । नन्वेतदर्थचतुष्टयाप्रविष्टस्य सम्यक्त्वरूपस्यार्थस्य मूलकृदनुक्तत्वात्कथमचकथंष्टीकारास्तन्निदर्शनेनेति चेत् । अन्यथाऽनुपपत्तेरिवाव्ययत्वस्याप्येतद्गमकत्वात्तदुपपत्तेः । अनव्ययस्थले कर्मनिर्णयटीकायां युक्तपदं शोभनमित्यर्थापयित्वा यदाह भिक्षुः । बालक्रीडा वासुदेवस्य युक्तेत्युक्तिरत्र कैमुत्यं सूचयति । टीकाकृतामेवं विवरणे मूलमाचार्यवचनम् ।

योग उपायो वयुनं ज्ञानम् । दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये । त्वद्दत्तया वयुनयेदमचष्ट विश्वमिति गीताभाष्येशावास्यभाष्यादिकमेतत्सजातीयमिति ज्ञेयम् । उत्तरत्र कीर्तनादेव कीर्तनात्साक्षान्मोक्षसाधनताया विना ज्ञानं तथात्वं तस्येति भ्रमभ्रंशं करोति ॥ क्रमयोगेति । क्रमस्य तरतमभावस्य योगस्तत्सम्बन्धो य उपायो वैराग्यादिसाधनजातं तेन । अथवा वैराग्यभक्त्युपासनाज्ञानानीति क्रमस्य योगः सम्बन्धस्तेन । क्रमेण गतो योगः समाध्यादिसाधनसाधनं तेनेति वा । उपलब्धेन ज्ञातेन ब्रह्मणा पूर्णेन भगवता यद्यस्मादनुष्ठितान्निवृत्तिमार्गादसंसृतिः संसाराभावः । असंसृतिरित्यत्र सुलोपाद्यभावो रक्षोहागमलध्वसन्देहा इति महाभाष्यनिर्देशादितो ज्ञेयः । विस्तृतं चैत'दविरोधोऽत्रे'त्यनुव्याख्याव्याख्या अविरोधो विरोधाभाव इति सुधावाक्यार्थचन्द्रिकायामनुसन्धेयम् । असंसृतिः संसाराभावस्तन्निवृत्तिरिति यावत् । एतदर्थे मानमाह ॥ क्रमयोगेति । क्रमस्य नियतैकप्रकारतादेस्तत्क्रमेणेत्यादिगदितस्य योगेन सहोपलब्धेन वसिष्ठादिदृष्टेन ब्रह्मणा वेदेनासंसृतिः कथित इति विपरिणतं सत्कथितेत्यन्वेति । ब्रह्म प्रोक्तं तपोऽध्यात्मवेदज्ञानेषु सूरिभिरिति विश्वः । ब्रह्मणा ज्ञानेनेति वा । क्रमयोगात्पूर्वस्मिन्नुत्तरोत्तरप्रवेशोपायाल्लब्धे भगवदन्तरङ्गद्वारत्वात्प्राप्तो ब्रह्मा चतुरास्यस्तेन सहासंसृतिर्मोक्ष इतरेषामिति वा वृद्धो यूनेति निर्देशादनुक्तावपि सहेति लभ्यते । 'ब्रह्मलोकात्सहामुना । ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते परात्मानः प्रविशन्ति परं पदम्' इत्यणुभाष्यभाष्यादेः ॥ १ ॥

॥ अथ श्रीचट्टी विरचिता श्रीमद्भागवत टिप्पणी ॥

सुखचित्प्रमुखैर्गुणैर्युतो वियुतश्चाखिलदोषसङ्घतः ।
नृहरिर्हृदयांबुजे वसन्मम दद्यादखिलेष्टसंचयम् ॥ १ ॥

आनन्दतीर्थगुरुमादरतो भजामि स्वानन्ददं स्वचरणौ भजतां जनानाम् ।
यद्वक्त्रनिर्गलितवागमृतप्रपूरैस्तापत्रयं शममुपैति विनाऽतियत्नात् ॥ २ ॥

जयतीर्थगुरुन्वन्दे सर्वाभीष्टप्रदान्मम ।
विजयध्वजतीर्थादीन् गुरूनन्यांश्च भक्तितः ॥ ३ ॥

श्रीमध्वशास्त्रदुग्धाब्धिविक्रीडनविशारदान् ।
नरसिंहाचार्यसंज्ञांश्च पितृव्याननिशं भजे ॥ ४ ॥

नत्वा श्रीमद्वेङ्कटाचार्यसंज्ञान्विद्यागुरूननिशं बुद्धिशुद्ध्यै ।
कुर्वे चट्टीवेङ्कटाव्हयोऽहं सद्भ्यः षष्ठस्कन्धटीकां हिताय ॥ ५ ॥

स्वोपदिष्टस्य सर्वस्य तत्त्वस्य हृदि धारणात् ।
मन्दोपदेशसंदेहव्यावृत्त्या बादरायणिः ॥ ६ ॥

हर्षेण महताविष्टः स्वपृष्टं प्रतिवक्ष्यते ।
इत्यभिप्रेत्य नृपतिर्ज्ञापयन् प्रतिभां स्वकाम् ॥ ७ ॥

अनूद्य पूर्वस्कन्धोक्तं वक्तुं प्रार्थयते पुनः ।
पञ्चमांत्योक्तनिरयनिवर्तनपटीयसी ॥ ८ ॥

निवृत्तिमार्ग इत्यादिषड्भिः श्लोकैर्विनिष्कृतिम् । भगवता सर्वज्ञेन त्वया । आदौ द्वितीयस्कन्धे । निवृत्तिमार्गो निवृत्तिधर्मलक्षणो मोक्षमार्गः । यथा यथावत् । कथितः । गृहात्प्रव्रजतो धीर इत्यादिना तत्फलमाह ॥ यदिति । यत् येन निवृत्तिधर्मानुष्ठानेन । असंसृतिर्मोक्षो भविष्यति । निष्कामं ज्ञानपूर्वन्तु निवृत्तमिति चोच्यते । निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमित्युक्तेः । एतच्च ब्रह्मसाक्षात्कारद्वारेणेत्याह ॥ क्रमेति । क्रमेणोपचितैर्योगैः भक्तिज्ञानादिलक्षणोपायैः । उपलब्धेन साक्षात्कृतेन । ब्रह्मणाऽनन्तकल्याणगुणपूर्णेन हरिणा निमित्तेनेत्यर्थः । अत्र ब्रह्मोपलंभेनेति वक्तव्ये उपलब्धेन ब्रह्मणेत्युक्तिस्तु कर्तृत्वं करणत्वं च परब्रह्मण एव मुख्यमिति ज्ञापनार्थम् । कर्तृकरणयोस्तृतीयेति सूत्रात् ॥ यद्वा ॥ निवृत्तिमार्गो निवृत्तिधर्मेण प्राप्यो मार्गोऽर्चिरादिमार्गः कथितः । वैश्वानरं यातीत्यादिना यद्येन मार्गेण गतानां क्रमयोगोपलब्धेन क्रमयोगोऽर्चिरादिप्राप्तिस्तेनोपलब्धेन प्राप्तेन ब्रह्मणा चतुर्मुखेन सहासंसृतिर्भगवत्प्राप्तिलक्षणो मोक्षो भविष्यतीत्यर्थः ॥ तदुक्तम् ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति ॥ १ ॥

प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ।
योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥

सत्यधर्म – ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिमित्यादिनोक्तं श्रुतं प्रवृत्तिलक्षणमनुवदति ॥ प्रवृत्तिलक्षण इति । काम्यकर्मात्मा । प्रवृत्तिं लक्षयति ॥ घटयतीति । प्रवृत्तिरिति लक्षणं नाम यस्येति वा प्रवृत्तिलक्षणः । लक्षणं नाम्नीति विश्वः । चस्तु मार्ग इति कथित इति चानुवर्तते इति सूचयति । तत्फलं लपति ॥ त्रैगुण्यविषय इति । त्रिगुणादिकार्यस्वर्गादिपातनिकार्थवानित्यर्थः । तद्धितःष्यञन्तोऽयम् । यथोक्तं प्रमेयदीपिकागीताभाष्यतट्टिप्पणीषु । त्रिगुणसम्बन्धिस्वर्गादिः प्रतीतितोऽर्थ इति । त्रिगुण-सम्बन्धीत्यनेन तस्येदमर्थे तद्धितोऽयम् । विचित्रा हि तद्धितगतिरिति सूचयति । सम्बन्धिकार्यं प्रतीतित आपातप्रतीतितस्तद्धितोऽयमिति । ष्यञ्प्रत्ययस्तद्धितसंज्ञ इत्यर्थः । ननु गुणवचनब्राह्मणादिभ्यः कर्मणि चेति भावे कर्मणि च ष्यञ्प्रत्ययो विहितः । न चात्र भावः कर्म वाऽभिप्रेतम् । प्रत्युत तस्येदमिति सूत्रेणोक्तार्थेऽणेव विहितस्तत्कथमत्र ष्यञ्प्राप्तिरित्यत उक्तं विचित्रेति । तद्धितप्रत्यय-प्रवृत्तिरभिमतेऽर्थे भवतीति वैय्याकरणवचनार्थः । अत एव तद्धितेत्यन्वर्थसंज्ञेति भावः । सम्बन्धीति भाष्ये कार्यकारणसम्बन्धोऽभिप्रेत इति भावेनोक्तं कार्यमिति । गुणत्रयजन्यपशुपुत्रादीत्यर्थ इत्यादि । एतत्सकलं न नित्यमाह ॥ य इति । योऽसावुक्तः प्रवृत्तिमार्गोऽलीनप्रकृतेरविनष्टप्रकृति-सामर्थ्यस्य पुंसो गुणसर्गो गुणस्य जीवचेष्टाधीनचेष्टावत्त्वादप्रधानस्य शरीरस्य पुनः पुनः सर्गः सृष्टिर्यस्मात्स तथा । पुनः पुनरित्यनेन विना निवृत्तिमार्गं न संसृत्युपरतिरित्यभिप्रैति । अथवाऽलीना च सा प्रकृतिश्च तस्याः । ल्यब्लोपनिमित्ता चेयं पञ्चमी । तामुपादानीकृत्य । पूर्ववदुर्वरितम् । गुणसर्गः सत्त्वादिनिमित्तोत्पत्तिरिति वाऽर्थस्तृतीयस्कन्धादौ कथित इति योगविभागो वेति । पूर्वे गुणैः प्राप्यः सर्गो मार्गः स च 'दक्षिणेन पथाऽऽर्यम्णः पितृलोकाद्व्रजन्ति ते' इत्यादिना तृतीये कथित इति वेति केऽपि । रूपादाहतप्रशंसयोर्यबिति सूत्रेऽन्येभ्योऽपि दृश्यत इत्युक्त्वा गुण्या गुणवन्तो ब्राह्मणा इति महाभाष्यभाषितप्रकारेणात्र गुण्यपदविग्रहो न सुग्रहः । त्रयश्च ते गुणाश्च त्रिगुणास्ते सन्त्यस्य जनकतया तत्त्रिगुणं तत्सम्बन्धि सुखादिकं त्रैगुण्यं स विषयो यस्येति किल भवितव्यम् । तत्र पुनरण् कर्तव्य इति गौरवग्रासात् । अत एव टीकाकृन्नाटीकत तथेति ॥ २ ॥

चट्टी – प्रवृत्तिलक्षणः काम्यकर्मलक्षणो मार्गश्च कथितः । ब्रह्मवर्चसकामस्तु यजेत ब्रह्मस्पति-मित्यादिना । तत्फलमाह ॥ त्रैगुण्येति । त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं यस्य स तथा । स्वर्गाद्यर्थं प्रवृत्तं स्यादित्युक्तेः । प्रवृत्तिलक्षणधर्मस्य नित्यसुखसाधननिवृत्तिमार्गाद्वैलक्षण्यमाह ॥ योऽसाविति । यः प्रवृत्तिधर्मोऽसावलीनप्रकृतेः प्रवृत्तिधर्मस्य प्रकृतिविलयापादनसामर्थ्याभावेनालीना

प्रकृतिर्यस्य तस्य पुंसः पुनः पुनर्गुणसर्गो गुणानां भौतिकदेहानां सर्ग उत्पत्तिर्यस्मात्स तथा । शरीरपरंपरारंभको भवतीति यावत् । क्षीणे पुण्ये मर्त्यलोकं विशंतीत्यादेः । प्रवृत्तिधर्मस्य क्षयिष्णुफलकत्वेन निवृत्तिधर्माद्वैलक्षण्यमिति भावः ।। यद्वा ।। प्रवृत्तिलक्षणो मार्गः पितृयानाख्यः कथितस्तृतीये । दक्षिणेन यथाऽर्यम्णः पितृलोकं यजन्ति त इत्यादिनेत्यर्थः ।। २ ।।

अधर्मलक्षणा नाना नरकाश्चोपवर्णिताः ।
मन्वन्तरश्च व्याख्यात आद्यः स्वायम्भुवो यतः ।। ३ ।।

सत्यधर्म – अधर्मलक्षणा इति । नरकापायपरिहरणोपायप्रश्नस्य कर्तव्यत्वेन मनसि दृढनिरूढत्वात्प्राक् प्रतिपादनीयमन्वन्तरेत्यादिचतुर्थस्कन्धार्थस्यावसरप्राप्तस्य क्षणमुपेक्षणं क्षान्त्वा अधर्मेत्यादिनाऽर्धेनान्ववदत् । श्रवणादेव मूर्च्छादिरेकसरण्याननुवदनीयत्वद्योतनाय मध्ये चतुर्थोक्तार्थव्यवधानो राज्ञोऽभीप्सितमित्यभिप्रायं प्रायशो व्यासवचनमिति न व्यत्ययदोषः। न च यादृच्छिकं भगवद्वचनमिति वाच्यम् । द्वीपवर्षेत्यादिसार्धश्लोकव्यवधानेन पुनरधुनेहेत्यादिना नरकोपरमकप्रश्नोक्तेरेतदकल्पकत्वात् । किञ्चासर्वज्ञताप्राप्तेश्च कवयितुर्द्वैपायनस्येति दिक् । अधर्मलक्षणाः अधर्मो लक्षणं स्वप्रापणचिन्हं येषां त इति । अधर्मं धर्मरूपातिरिक्तं यमरूपं लक्षयन्ति दर्शयन्तीति स्वप्रवेशात्पुरेति ते तथा वा । तद्रूपस्यैव पापिशिक्षणाधिकारादिति भावः । यद्वक्ष्यति न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृता इति विपर्ययेणाधर्मेणैव लक्ष्यन्ते दृश्यन्तेऽनुभूयन्त इति वा ।। नानानरका इति । अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्याम इति प्रतिज्ञाय तामिस्रोऽन्धतामिस्रो रौरव इत्यादिना पञ्चमे प्रपञ्चिताः । नामनरका इति पाठे नामानि तामिस्रेत्यादीनि च नरकाश्च स्वरूपतोऽनुवर्णिता इत्यर्थः । नामेति प्रसिद्ध्यर्थकमव्ययं वा । यतो यस्मिन्नाद्यः प्राथमिकः स्वायम्भुवो मनुरभूत् । योगरूढोऽयं शब्द इति नातिप्रसक्तिः । स च मन्वन्तरस्तद्विषयविचारो व्याख्यातो निरूपितः । चतुर्थादिभाग इति शेषः । स्वायम्भुवो ब्रह्मजो मनुर्यतो यस्मिन्स आद्यो मन्वन्तर इति वा । मनूनामन्येषामन्तरमवधिर्भेदः प्रभेदो वा यस्मात्सः तदात्मा मन्वन्तरमस्यास्तीति कालविशेष इति वा ।। ३ ।।

चट्टी – अधर्मेण लक्ष्यन्ते दृश्यन्तेऽनुभूयन्त इति ते तथोक्ताः । उपवर्णिताः । पञ्चमस्कन्धे । आद्यश्चतुर्दशमन्वन्तराणां मध्ये प्राथमिकः स्वायंभुवो मन्वन्तरश्च व्याख्यातः । चतुर्थस्कंधस्यादौ । सर्वं प्रमेयं सर्वेष्वपि स्कन्धेषु यथासंभवं संक्षेपविस्तराभ्यां निरूपितमिति ज्ञापनायानुवादे स्कंधक्रमोल्लङ्घनम् ।। ३ ।।

प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ।
द्वीपवर्षसमुद्राद्रिनदीनदवनानि च ।। ४ ।।

सत्यधर्म – उत्तानपदो राज्ञो वंशो ध्रुवादिस्तच्चरितानि वासुदेवप्रसादसम्पादनादिरूपाणि प्रियव्रतोत्तानपदोश्चरितानीति वाऽन्वयः। प्रियव्रतस्य वंशः ऋषभादिः उपवर्णितानीति लिङ्गविपरिणा-मेनान्वेति। यद्यपि समीपवर्तिव्याख्यात इत्यस्य विपरिणामोऽन्याय्यस्तथापि विपरिणयनमेकवचनस्य बहुवचनत्वेनापि कार्यमिति गौरवभीरुणा त्यक्त इति सन्तोष्टव्यम्। द्वीपादीनि चानुवर्णिता-नीत्येतदन्वेतीति सूच्यते। नदाश्च समुद्रातिरिक्ताः ॥ ४ ॥

चट्टी – यतो यस्मिन्स्वायंभुवमन्वन्तरे जातः प्रियव्रतोत्तानपदोर्वंशश्च व्याख्यातः। तयोश्चरितानि च व्याख्यातानि पञ्चमे चतुर्थे च द्वीपादीन् ॥ ४ ॥

धरामण्डलसंस्थानं भागलक्षणमानतः ।
ज्योतिषां विवराणां च यथेदमसृजद् विभुः ॥ ५ ॥

सत्यधर्म – विविधमासीदिति विभुः। तथा हि वारुणशास्त्रायाम्। विभुप्रभुप्रथमं मेहनावत इति स ह्येव प्राभवद्विविधोऽभवदिति। सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्चेति गीताभाष्योक्तप्रकारेण वा विभुः। भागलक्षणमानतो भागश्च लक्षणानि च मानं परिमाणं तेभ्यः। ज्योतिषां सूर्यचन्द्रनक्षत्रा-दीनाम्। विवराणामतलवितलादीनां स्वरूपं निरूपितं पञ्चमे। विभुर्व्यापीदं विश्वं यथा येन प्रकारेण पूर्वकल्पीयसृष्ट्यनुसारेणेति वाऽसृजत्सोऽपि वा व्याख्यातस्तत्र तत्र। इदं संस्थानं व्याख्यातमिति वा। विप्रसम्भ्योड्वसंज्ञायामिति भुवो डुः। विविधतया भावयतीति स इत्यन्तर्णीतण्यर्थता वा। धरेति पदं वा। धरा भूर्व्याख्याता। मानत इति बुद्धिविविक्तमन्वेति। मण्डलं संस्थानं राव्हादि-मण्डलस्थितिरिति वा ॥ ५ ॥

चट्टी – भागतो विभागतो लक्षणतो मानतः परिमाणतश्च। धरामण्डलस्य संस्थानं च ज्योतिषां विवराणां चेदं संस्थानं च विभुर्यथाऽसृजत्। तदपि व्याख्यातमित्यर्थः ॥ ५ ॥

अधुनेह महाभाग यथैव नरकान् नरः ।
नानोग्रयातनान् नेयात् तन्मे व्याख्यातुमर्हसि ॥ ६ ॥

सत्यधर्म – अधुना परमप्रमेयं पृच्छति ॥ इदानीमिति। इदानीमिहाधिकारिणि जीवसङ्घे वा। महाभाग महाभागधेय। भागो रूपार्धके प्रोक्तो भागधेय इति विश्वः। आन्महत इत्यात्वम्। महाभां प्रकाशं ज्ञानं वा गच्छति प्राप्नोतीति स तथा तत्सम्बुद्धिः। यथा येनानुष्ठितसाधनेन नरकान् नाना नानाप्रकारान् नेयान्न प्राप्नुयात्तत्साधनं व्याख्यातुं वितत्य वक्तुम्। मध्यमपुरुषप्रयोगात्त्वमिति लभ्यते। ततश्च त्वमर्हसीत्यन्वयः। तव किमियानायासो गन्ता गच्छत्वित्यतस्तवेव ममापि मुमूर्षोर्लोकोपकारः

केवलं परमपुरुषकरुणापदमिति मनसि कृत्वा पृच्छति ।। नर इति । कुतस्तेषु तव जिहासेत्यतस्तद्रूपं निरूपयति ।। उग्रेति । उग्रा घोरा यातनास्तीव्रवेदना येषु येभ्यो वा तान् । नानोग्रयातनानिति पदं वा । नाना नानाविधा इत्युग्रं यातनाविशेषणम् । नाना नानाविधविकारा उग्राः क्रूरा वैवस्वतदूतास्तैः कर्तृभिर्यातना येषु तानिति वा । तत्तत्साधनं नाना नानाविधं व्याख्यातुमर्हसीत्यन्वयो वा । अधिकारिणां बाहुविध्यात्साधनमपि तथाविधं बोधितं सत्साधयेदभिमतं नान्यथेति भावः । पुमर्थदलान्तरबाधन-प्रार्थनमप्यावश्यकं कथमियतैवार्थितेन कृती भवानित्यतो वक्ति ।। नर इति । नरो नरान् । सुपां सुलुगिति शसः सुः । अनश्वरानीश्वरलोकांस्तद्रूपविशेषान्वयात्तन्ममाख्यातुमर्हसीत्यावृत्त्याऽप्यन्वयः । एतस्या अजामिलादिमुक्तिभगवद्दर्शनाद्युपरितनोक्तियुक्ततायै सोढव्यत्वात् । नरौ तावविनाशित्वादिति ऋग्भाष्यभाषणात् ।। ६ ।।

चट्टी – इह पापिषु नरोऽनुतापवान्पुरुषः । नाना उग्रयातना येषु तान्नरकान्यथा येन साधनेन नेयात् नगच्छेत् । तत्साधनमधुना व्याख्यातुमर्हसि ।। ६ ।।

श्रीशुक उवाच

न चेदिहैवापचितिं यथाऽहंसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ।
ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ।। ७ ।।

सत्यधर्म – किं वीथीकथया तव कृत्यमत्यौपयिकं पृच्छेति तूष्णीमासीत्किं व्याससूनुर्न तस्याप्ये-तद्द्वारा नरोद्दिधीर्षापरतन्त्रतेति तदुत्तरयतीतीरयति ।। शुक इति ।। न चेदिति । अनेन न चेदवेदीन्महती विनष्टिरिति बृहदारण्यकनचेदिहावेदीन्महती विनष्टिरिरितिलवश्रुती उपादत्ते । इह महौ एतज्जन्मनि वा । यः पुरुषस्तत्सङ्ख इति यावत् । मनउक्तिपाणिभिः मनांसि चोच्यतेऽर्था आभिरित्युक्तयो वागिन्द्रियाणि च तत्सहिताः पाणयो हस्तोपलक्षितदेहाश्च तैः । हिरण्यपाणिमूतये हिरण्यहस्तो असुर इत्यादिऋग्भाष्यटीकयोः ''हिरण्यं वर्णतोऽपि च । रूपं नारायणस्यैव पाणिशब्दोपलक्षितम् । स्वर्णपाणिः स्वर्णहस्तश्च देवः । पृथक् पृथक् पाणिपूर्वाङ्गवित्त्यै स्वर्णवर्णः स्वर्णपाणिः स उक्तः । तथाऽपि पाण्योरेव हिरण्यवर्णत्वं लभ्यते । न सर्वावयविन इति न वाच्यम् । उपलक्षणार्थ-त्वात्पाणिशब्दस्येत्युक्तम् । पृथक् पृथक् सर्वेषामिति यावत् । पाणिपूर्वाणामङ्गानां हिरण्यत्ववित्या'' इत्याद्युक्तम् । कार्यैः कृतस्य सम्पादितस्यांहसः पापस्यापचितिं निष्कृतिम् । भवेदपचितिर्निष्कृताविति विश्वः । यथा पातकानुकूल्येन न कुर्याच्चेत्तर्हि पापी स प्रेत्य मृत्वा ये भवतः प्रति मे मया कीर्तितास्तिग्मयातनास्तिग्मास्तीक्ष्णा भोक्तुमशक्या यातना येषां ते तान्नरकानुपैति । न

वातवार्तेयमित्याह ।। ध्रुवमिति । यस्मिञ्जन्मनि पातकसम्पत्त्या विपत्तिस्तस्मिन्नेवोचिता-पचितिश्चेदल्पापि साकल्याशुद्धावित्यवश्यं सम्पादनीयेति भावः । वैशब्दोऽमुष्यार्थस्य प्रसिद्धिद्योतकः । न वैकेनाक्षरेण छन्दांसि वियन्तीत्यादेर्नरकानित्यत्र न वर्णाधिक्यदोषः । एवमुत्तरत्रापि ज्ञेयम् ।। ७ ।।

चट्टी – तत्र तावन्मन्वादिप्रायश्चित्तं विना नरका दुर्निवारा इत्याह ।। न चेदिहेति द्वाभ्याम् । मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसस्तैरेवेहापचितिं प्रायश्चित्तं यथा यथावत् । न कुर्याच्चेत्तर्हि सः पुरुषः प्रेत्य मृत्वा नरकान्ध्रुवमुपैति । ये मया भवतः कीर्तितास्तिग्मा दारुणा यातना येषु ते ।। ७ ।।

तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यदा(ऽऽ)त्मनः ।
दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ।। ८ ।।

सत्यधर्म – नश्वरस्यापि शरीरस्य शश्वदीश्वरतन्त्रत्वात्तत्रापीयान्समय आयुष इति न सर्वसाधारण्येन ज्ञानमित्यग्र एव जाग्रता भाव्यमिति वक्तुमुत्कमना यथेति सूचितं विवृणोति ।। तस्मादिति । पुरैव मध्यमे वयस्याशु तत्रापि विलम्बमनवलम्बमान इह पापनिष्कृतावेतद्दुष्कृतिनिष्कृतौ । पुरैवेत्युदीरितं विवृणोति ।। मृत्योरिति । यद्यावदात्मन एतद्देहस्य मृत्योरन्तकादविपद्विपदभावो रोगाद्युपद्रवाद्यभावः । इदमपि प्रायिकत्वाभिप्रायम् । प्राथमिकेऽपि प्रमाददर्शनात् तत्प्रागेव यतेत प्रयत्नं तनुयादित्यर्थः । आत्मनः स्वस्येति वा । अविपद्यतात्मनेति पाठोऽपि सुन्दरः । अविपदिति यतात्मनेति अविपद्यता आत्मनेति वा पदविभागः । यतात्मना यतेन तदेकाग्रीकृतेन आत्मना मनसा । निष्कृतिप्रयत्नकृति काले पुनः पापसम्पादककर्मानिष्पादकीकरणमेव तन्नियमनमिति भावः । मृत्योरविपद्यता विपत्तिमप्राप्नु-वताऽऽत्मना देहेन स्वेन मनसेति वा । दोषस्य पापापादकस्य । गुरुलाघवं गौरवं लाघवं च दृष्ट्वा शास्त्रतोऽवेत्य । यद्वा गुरुलाघवं गुरोराचार्यात्तन्मुखादिति यावत् । लाघवं दृष्ट्वाऽवेत्य । आचार्यः पूर्वरूपमाचार्योपासनं गुरुः यद्द्यात्सुप्रसन्नधीः । आचार्याद्धयेवेत्यादेः । लाघवं लघुनि चरिते प्रायश्चित्ते महीयसोऽप्यंहसः संहारोपायत्वमल्पवित्तव्ययकालायाससाध्यत्वं वा । अनुरूपनिदर्शनेन निरूपयति ।। यथेति । रुजां रोगाणां निदानविदादिकारणज्ञो भिषग्वैद्यश्चिकित्सेत चिकित्सते । आत्मनः शरीरस्य मृत्योरविपन्मरणरूपविपदभावो यद्यावत्तत्पुरैवेति योग्यान्वयीति सर्वमनुवर्तते । आत्मना अविपद्यता करणेन पुरैव यतेतेति द्वितीयपाठेऽप्यन्वयो ज्ञेयः । रुजानिदानविदिति क्वचित्कपाठः । तत्र टापं चैव हलन्तानामिति टाबन्तो रुजाशब्दः । स्त्रीरुग्रजेत्यमरः । तासां निदानवित् । अथवा यथा भिषक् चिकित्सते तथाऽयमपि यतेतेति विधेयतोभयकार्यस्येति लिङ्लोलट्त्वकरणश्रमो नास्त्येतत्पक्ष इति मन्तव्यम् । पूर्वं कुर्यादित्युक्तं स्वयं यतेतेति व्याख्यान् शुकोऽन्तरान्तरायोपनिपाते वा प्रारम्भमात्रमिच्छा वा विष्णुधर्मे न निष्फलेत्यादेश्च प्रयत्नमात्रादपि पातकघातो भवतीत्यभिप्रैति ।। ८ ।।

चट्टी – यस्मादेवं तस्मात्पापस्य निष्कृतौ प्रायश्चित्ते यतेत । कदा मृत्योर्मरणात्पुरैव । तत्रापि यदाऽऽत्मनः शरीरस्याविपत् रोगादिलक्षणा विपन्नास्ति । तत्राप्याशु । अन्यथाऽतीतकाले तु द्विगुणं व्रतमर्हतीति द्वैगुण्यापत्तेः । तत्र च पापस्य महत्वमल्पत्वं वाऽपेक्ष्य तदनुरूपप्रायश्चित्ते यतेत । रुजां रोगाणां निदानवित् । यथा वैद्यस्तदनुरूपं चिकित्सेततद्वत् ॥ ८ ॥

राजोवाच

दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ।
करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥

सत्यधर्म – स्वयं प्रायश्चित्तस्यावश्यानुष्ठेयत्वं जानन्नपि राजा रथस्थं केशवं दृष्ट्वा सर्वपापैः प्रमुच्यते । महात्मवचनाच्छुद्धो भवतीत्यादेरुक्तरूपप्रायश्चित्ताकरणेऽपि पातकनिवृत्तिश्रुतेः मृतो नरकमभ्येति ह्यगम्यागमनान्नरः । तथैव नरके पतन्तीत्यादिपश्चमप्रपञ्चितप्रकारश्रवणात एतदर्थे सन्दिहानमन्दजनसन्दोहमानन्दयितुं तत्संशयगतं निष्कृतेर्वैय्यर्थ्यं द्वाभ्यां श्लोकाभ्यामुपपादयन्पृच्छति ॥ दृष्टश्रुताभ्यामिति । यद्यस्माद् दृष्टश्रुताभ्यामात्मनोऽहितमैहिकपारलौकिकापत्प्रापकं पापं जानन्नपि जनः। दृष्टश्रुतेति भावे क्तो वा । दर्शनश्रवणाभ्यां भूयः पुनरपि । अथोऽनन्तरम् । तादृशमेव तनोति । तत्र निमित्तमुत्तम्भयति ॥ विवश इति । पराधीनः स्वानुष्ठितदुरिष्टवशो, वेः परमात्मनो वश इति वा । पुनर्दरिद्रः पुनरेव पापीत्यादेः । तस्मादस्माकं प्रायश्चित्तमुक्तं युक्तं नेति भातीत्याह ॥ प्रायश्चित्तं कथमिति । प्रायस्य चित्तिचित्तयोरिति सुट् । अपिना प्रायश्चित्तपक्षं गर्हयामास । जानन्नपीत्यन्वयो वा ॥ ९ ॥

चट्टी – प्रायश्चित्तस्य वैकल्यं द्वाभ्यां शङ्कते नृपः ॥ दृष्टेति । यत् दृष्टं राजदण्डादि श्रुतं नरकादि ताभ्यामात्मनः पापमहितं जानन्नपि प्रायश्चित्तानन्तरं पुनः पुनः करोति । जानता तत्करणे हेतुः ॥ विवश इति । भगवत्परतन्त्रः स कारयेत्पुण्यपापमिति श्रुतेः । रागादिपरतन्त्रो वा । अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ श्रीभगवानुवाच ॥ काम एष क्रोध एष इत्युक्तम् । अथोऽतः कारणात् । मन्वादि विहितद्वादशाब्दादि कथं प्रायश्चित्तं घटत इत्यर्थः । यद्यनुष्ठितं प्रायश्चित्तं समूलदुरितनिवारकं तर्हि तत्सकलं नरकनिवारकं स्यात् । न चैतदस्ति । तथात्वे सवासनदुरितोच्छेदेन कारणाभावेनोत्तरत्र दुरितानुत्पादप्रसङ्गात् । न चेष्टापत्तिः । लोके प्रायश्चित्तानन्तरमपि शतशः क्रियमाणदुरितदर्शनात् । अतः पापस्य दुर्निवारत्वेन नरकपातस्यावश्यं भावित्वान्निरधिकारिकत्वेन धर्मशास्त्रे क्रियमाणं प्रायश्चित्तविमर्शनं व्यर्थमिति भावः ॥ ९ ॥

क्वचिन्निवर्ततेऽभद्रात्क्वचिच्चरति तत्पुनः ।
प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत् ॥ १० ॥

सत्यधर्म – अयुक्ततामेव पुनर्वक्ति ॥ क्वचिदिति । अभद्रादमङ्गलकर्मणः क्वचिन्निवर्तते । तत् अभद्रम् । क्वचित् क्वापि पुनराचरति यस्मादित्यावृत्तं सत् हेतुसमर्पकं च भवति । तत्तस्मात् । अथोऽत इति वा । आचरति पुनराचरत्येव । अथोऽनन्तरमिति । कुञ्जरशौचवद्गजमज्जनवन्मन्ये । तद्यथा पुनः पुनर्धूलीप्रक्षेपेण वृथा तथेदं प्रायश्चित्तमिति मन्ये जान इति भावः । अथो संशयोऽयं क्व निवर्तते । त्वां विनैतत्परिहारो यत्र क्वापि न भवतीति वाऽर्थः । अथोऽथ च संशये च प्रकीर्तिताविति विश्वः । यद्यप्योदिति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावेन भवितव्यमथो अपार्थमिति तथाऽपि राजाभिसन्धेरितराभिसन्धिना निर्देशोऽप्येतदितरापरिहार्यतासूचक इति मन्तव्यम् । प्रायश्चित्तमथः अपार्थमिति पदविभागः । प्रायश्चित्तमथ इत्यभद्रविशेषणम् । प्रायश्चित्तं मथ्नातीति मथकम् । विशेषणपरनिपातः । प्रायश्चित्तं मथकं यस्य तत्तादृशादभद्रात् । प्रायश्चित्तमेव मथ्नाति स्वफलोपलम्भकत्वेनेति तत्तथा तस्मादभद्रादिति वा । मथे विलोडनेऽस्मात्कर्तरि क्विप् । जश्त्वचर्त्वयोः प्रायश्चित्तमदिति अग्निमच्छब्दवद्भवति । अत्र प्रसङ्गात्काचिच्चर्चा क्रियते । ये विद्वांसोऽबुधो जना इति बृहदारण्यकभाष्ये षष्ठेऽध्याये "बोधके विद्यमानेऽपि ये विदुर्न परं हरिम् । बुधः सकाशेऽप्यविद्वांस इत्यर्थः । बोधवान्ज्ञानवान्भुत्स्यात्तत्सकाशाच्च ये हरिमिति कर्तरि क्विप उररीकारात्कथमीक्षत्यधिकरणीयसुधायां बोधनाद्बुद्धेद इति करणग्रहणमिति चेन्न । मिथ्याशब्दोऽनिर्वचनीयं वदतीतिवत्करणस्यापि कर्तृत्वमौपचारिकमङ्गीकृत्य बृहदारण्यकैककण्ठ्यसम्पादनसम्भवात् । अन्यथा इत्यादिश्रुतयो मानं शतशोऽत्र समन्तत इति भूमिकानुव्याख्याकरणे कर्तृत्वमौपचारिकं स्वरसं स्यादिति मन्तव्यमिति । तत्प्रायश्चित्तमपार्थं मन्य इति वा ॥ १० ॥

चट्टी – उक्तमेव सदृष्टान्तं विवृणोति ॥ क्वचिदिति । क्वचित् कदाचित् । अभद्रात्पापान्निवर्तते । क्वचित्क्वचित्तदेव पुनराचरति । यथा कुञ्जरः स्नातोऽपि रजोभिरात्मानं मलिनीकरोति तथा । अथो तस्मात्प्रायश्चित्तमपार्थकं मन्य इत्यर्थः ॥ १० ॥

श्रीशुक उवाच
कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात्प्रायश्चित्तविमर्शनम् ॥ ११ ॥

सत्यधर्म – प्रायश्चित्तं किं सर्वथाऽविद्वत्कृतमीषज्ज्ञाच्चाविद्वत्कृतमुत विद्वत्कृतं पार्थिवापार्थं मन्यसे चेत्तत्राद्यद्वितीययोरनुमितिरननुमितिश्च चरमे कल्प इत्युत्तरमीरयति ॥ कर्मणेति । कर्मणा प्रायश्चित्तात्मकेन मखमुखेन । कर्मनिर्हारो बन्धककर्मबाधनम् । नेष्यते प्रामाणिकैरिति शेषः । किञ्चित्सङ्कुचितश्चेदपि न जातु च प्रायेणेत्यभिप्रायेणाह ॥ न हीति । आत्यन्तिको गलितमूलः । उभयत्राप्येकयोक्त्योत्तरमाह ॥ अविद्वदिति । अविद्वांसः सर्वाधिकारिणो यस्मिन्स तस्य भावस्तस्मात् । नञ ईषदर्थता चानुदरा कन्याऽतोया गङ्गा । अः स्यादभावे स्वल्पार्थ इति प्रयोगविश्वादितो ज्ञेया । उभयोरपि न सर्वथैतद्भयाभाव इति भावः । तृतीय आह ॥ प्रायश्चित्तविमर्शनमिति । प्रायश्चित्तस्य तद्रूपकर्मणो विमर्शनं भगवदवगमकगुरूपदेशेन तत्समर्पणम् । अपार्थं व्यर्थम् । नेष्यत इत्यनुवृत्त-मन्वेति। विद्वान्नाविद्वद्वदिति वदति ॥ अविद्वदिति । अज्ञवत् । तत्र तस्येवेति नियमितत्वेऽपि प्रथमादेरपि वतिर्धर्मत्वाद्रूपरसवदित्यादीनां प्रेक्षावत्प्रयोगाणां बहुलमुपलम्भादन्यतो भवति । प्रपञ्चितश्चायं प्रकारः सुधातोऽपीति ज्ञेयः । कर्मणा भगवदर्पणरूपेण । कर्मनिर्हारः कर्मणां समूल-विलयो यस्य सः । प्रायो बाहुल्येन समयज्ञसंमत्या नेष्यते । प्रेक्षावद्भिर्विद्वद्विलक्षणतया परोक्षीकृत इति भावः । तत्र हेतुमाह ॥ हि चित्तविमर्शनमिति । हि यतः । तस्येति शेषः । तदपि कुत इत्यत आह ॥ अधिकारित्वादिति । समधिगताधिकारित्वात् ।

अथवा प्रायः कर्म जीवजातं हि यतश्चित्तविमर्शनं चित्तस्य विमर्शनं यस्य तत् । अतोऽविद्वन्नेति वा । कर्मणि जीवेऽस्वात्रन्त्र्यात् । करोऽस्मिन्मीयत इति कर्म जीव उदाहृत इति नारदीये । कर इति सकारान्तोऽदृष्टवाची क्रियावाची वा । तदधीनत्वात् । प्रसिद्धश्च जीवे कर्मशब्दः पञ्चरात्र इति । कोऽयं करो नामेत्यत आह ॥ कर इति । करशब्दस्य हस्तादिवाचित्वमेव दृष्टं नादृष्टवाचित्वमित्यत आह ॥ सकारान्त इति । हस्तादिवाचिनोऽयं सकारान्तोऽन्य एवेति भावः । कर्मशब्दस्य जीवे विद्वद्रूढिं दर्शयति । प्रसिद्धश्चेत्यादिचतुर्थाध्यायगीतातात्पर्यन्यायदीपिकयोः । कर्मशब्दो जीववाचीत्युक्तेर्युक्त-मिदमिति मन्तव्यम् । यद्वा कर्मणा भविष्यद्बन्धानुबन्धसाधनेन । अविद्वत् अं भगवन्तं वेत्तीत्यवित्तद्वत् । नह्यात्यन्तिको नह्यो नहनीयो बन्धयोग्यः स चासावात्यन्तिकश्च । णह बन्धने । अर्हार्थे यत् । ण्यतिवाहश्च छान्दसः । आत्यन्तिकत्वं विशेष्ये स्वयमनन्वयि सत् तद्विशेषणेनान्वेति । सन्निधानात् । एतत्सजातीयं प्रमेयं परत्र सम्मतं टीकाकाराणामिति न चित्तं चित्रयितव्यम् । तथा हि । स्वर्गी ध्वस्तः सप्तघटिकाभोजनं परमाख्यविद्येत्याद्यनुव्याख्यानव्याख्यानावसरे तस्य परमत्वं नामान्यन्न भवतीत्यनुत्तमत्वमेव । तदपि सन्निधानात्प्रमाणत्वेनैव । तद्यथा परमधार्मिक इत्युक्ते परमत्वं धर्मेणेति सुधायां दीप्तानलार्कद्युतिमप्रमेयमिति गीताभाष्येऽनलार्कद्युतिमित्युक्ते मितत्वशङ्कामपाकरोति ॥ अप्रमेयमिति । उक्ते जातां द्युतेर्मितत्वशङ्काम् । एतच्च सविशेषणत्वविशेषणत्वात् द्युत्या सम्बध्यत इति

प्रमेयदीपिकायां तट्टिपणीष्वमेयत्वविशेषणमनलार्कद्युतिरूपविशेषणविशिष्टस्य भगवतो विशेषणं भवत् विशेष्ये वैय्यर्थ्याख्यबाधाद् द्युत्या सम्बध्यते । एवं चोक्तशङ्कापरिहार इत्येवं जातीयकासु । तत्कर्म न सम्मतं सतामनुत्तममित्यप्याह ।। अधिकारित्वादिति । महावैरिरूपत्वादित्यर्थः । कुतो विद्वद्दशेद्दशीत्यतो वाऽऽह ।। आत्यन्तिक इति । अत्यन्तिके भव आत्यन्तिकः । विद्वत्समीपवर्ति । न हि यतस्तस्य कर्म निर्हारः कर्मणोऽनुष्ठितस्य हारोऽपहारस्तस्य निर्निषेधोऽभाव इति यावत् । उपसर्गाश्च धातुलीनार्थद्योतका इति सम्भवति हारोऽपहार इष्यत इति वा । आत्यन्तिको बलवदनिष्टाननुबन्धी यः कर्मनिर्हारः स प्रायः प्रकृष्टभगवज्ज्ञानिलाभवान् प्रकृष्टोऽयः शुभावहभागधेयं यस्य । हि यतश्चित्तविमर्शनमुक्तरूपमिष्यते । प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपीति विश्वः । आयो लाभ निर्निषेध इति च । अयः शुभावहो विधिरित्यमरः । प्रायश्चित्ताश्च बहुज्ञास्तेभ्यो विविधं मर्शनं विचारो यस्य स तत्कर्म जीव इति वा । विद्वत्स्वरूपमप्यनेन निरूपयति ।। अविद्वदधिकारित्वादिति । अविद्वांसः पुत्राश्छात्रा वा तेऽधिकमरयो यस्य स तथा । पुत्रः शत्रुरपण्डित इत्यादेरिति वा । अथवा विद्वत्सु तद्विषयेऽधिकारित्वात्तच्छिक्षाधिकारवत्त्वादिति दिक् । सत्सूत्रगुरुमार्गेण रटन्ती धीर्नटीव नः । विस्तरं स्वबहिष्कारं दृष्ट्वान्तर्द्रवति द्रुतम् ।। ११ ।।

चट्टी – प्रायश्चित्ताधिकारी द्विविधः । विद्वानविद्वांश्च । तत्राविद्वत्कर्तृकप्रायश्चित्तस्यात्यन्तिकदुरितनिवारकत्वाभावेऽपि विद्वत्कर्तृकस्य तदस्तीति प्रायश्चित्तविमर्शनं सफलमित्यभिप्रेत्य परिहरति ।। कर्मणेति । कर्मणा द्वादशाब्दादिप्रायश्चित्तेन कर्मणा पापस्य निर्हारो नाश आत्यन्तिकः समूलो नेष्यते । कुतः । अविद्वदधिकारित्वात् । हि शब्दोऽवधारणार्थः । स नेत्यनेन संबध्यते । हि हेताववधारण इत्युक्तेः। अविद्वानधिकारी यस्मिंस्तस्य भावस्तत्त्वं तस्मात् । अज्ञेन क्रियमाणत्वादेवेति यावत् । ज्ञानिना तु क्रियमाणेन तेनैव प्रायश्चित्तेनात्यन्तिकनिर्हारो भवत्येव । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेरित्यवधारणार्थः । अतोऽधिकारिसंभवात्प्रायश्चित्तस्य विमर्शनविधानमुपपन्नमित्यर्थः ।। ११ ।।

नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्ति हि ।
एवं नियमकृद्राजञ्छनैः क्षेमाय कल्पते ।। १२ ।।

सत्यधर्म – निदर्शनप्रदर्शनेन सङ्क्च्योक्तं विविच्योवाच ।। नेति । यथा पथ्यं स्वदेहाननुकूलत्वरहितमन्नमश्नतो भोक्तॄन्व्याधयो रोगा नाभिभवन्ति हीति । अत्यम्बुपानाच्च न जीर्यतेऽन्नमनम्बुपानाच्च स एव दोषः । तस्मान्नरो वन्हिविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि । धातुरपथ्याद्विक्रियत इत्यादिप्रसिद्धिं द्योतयति । दार्ष्टान्तिकेऽप्याचष्टे ।। एवमिति । एवं प्रकारोपमयोरिति विश्वः । एवं तथा

राजन्नियमकृद्विहिताविहितचरणनियमो शनैर्मन्दं सम्पादितसाधनः क्षेमाय स्थितस्य परिपालनलक्षणाय। असाधारण्येन व्यपदेशा भवन्तीति क्षेमो मुख्यक्षेमो मोक्ष इति वा। तस्मै कल्पते समर्थो भवति। अश्नत इति षष्ठी वा। अश्नतः पुंसः शरीरमिति शेष इति पूर्वे। अश्नतः पुंसः। अभि आभिमुख्येन व्याधयो न भवन्ति। अभि वीप्साभिमुख्ययोरिति विश्वः। न भवन्ति सत्तां नाप्नुवन्ति। नाश्नतः पञ्चषाणि दिनानि अभुञ्जानस्य। नसमासः। पथ्यमन्नमेव व्याधयोऽप्यभिभवन्ति। न चैकान्तमनश्नत इत्यादेः। नाश्नतः पथि अमा इवेति वा पदानि। न पथि। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः। भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणादित्यादिना निराकृते शास्त्रविरुद्धे अनिवेदितानितरपङ्क्तिकैकान्तभोजनादिरूपे मार्गे शनैः स्वैररमा सहाश्नतो व्याधयोऽभिभवन्त्येवेत्यन्वयः। नियमकृत्पूर्वोदीरितविपरीतहरिसमर्पणादिनियमकृत्क्षेमायेहाऽऽयुःक्षयो न भवतीति क्षेमाय स्वस्थित्यै मोक्षाय परत्र कल्पते समर्थो भवतीति।

पथि नान्यः पन्था इति निवेदिते ज्ञानरूपे नियमकृत् तत्सम्पादननियमवान्। अं नारायणम्। अन्नमद्यतेऽत्ति चेति व्युत्पत्त्याऽन्नशब्दवाच्यम्। अविष्णावेष त्वनव्यय इति विश्वः। अद्यतेऽत्ति चेत्युपजीव्यत्वादत्तृत्वात्तच्छब्दवाच्यम्। अश्नत उपजीवनमेवाशनं तद्वतः। पपुर्नितान्तं सरसाक्षिभृङ्गैरित्यादिवद्गौणमशनम्। व्याधयो रोगा विविधाकारा आधयो नाभिभवन्ति न पराभावयन्ति। हिशब्दोऽन्नं ब्रह्मेत्युपासीतेत्यादिप्रमाणप्रसिद्धिद्योतकः। अं अन्नमुद्दिश्य नियमकृदित्यन्वयो वा। क्षेमायेत्यादि पूर्ववत्। शनैरन्नमश्नतश्चिरं भुञ्जानस्येति वा। तस्य चासम्पत्प्रापकत्वस्य च चिरस्नायी दीर्घभोजी तेन मे रावणः प्रिय इत्यादिना ज्ञापितत्वात्। त्वरितं नान्नमश्नीयादित्यादिवचनं कर्मविलोपेन नाश्नीयादित्यर्थपरमिति न तद्विरोधः। यद्वा पथ्यं शश्वद्धितरूपमन्नं व्याधयो विशिष्टा विविधाकारा वा आधयो यैस्ते दैतेया अभिभवन्त्येवमिति नियमकृज्जनोऽश्नतो दुःखादिभुञ्जानानामनादृत्य कल्पत इति वा। षष्ठी चानादर इति षष्ठी। कस्मा इत्यत आह॥ क्षेमायेति। शनैः शनैश्चरे स्वैर इति विश्वः। अमासहार्थान्तीत्यादि विश्वः। एवं पूर्वोदीरितरीत्या नियमकृद्यमकृदात्मशिक्षकत्वेन यमसम्पादकः। स नि न भवतीति तथा। निर्निश्चये निषेधे चेति विश्वः। निरामिणो निखिलमित्यादिप्रयोगाच्च। कृन्तति कर्तयतीति कृत् स्वयं दूतादितो वा। कृती छेदन इति धातुव्याख्यानात्। यमश्चासौ कृच्च यमकृत्। स नि न भवति यस्य स तथेति वा। विशेषणविशेष्यभावस्य कामचारित्वस्य निकामं वैयाकरणैरङ्गीकृतत्वादेतदादेरर्थस्य पद्यपदशाबल्यमेवानुकूल्यं कल्पयतीति न नः प्रयास इति मन्तव्यम्॥ १२॥

चट्टी – नन्वेवं चेदज्ञेन कृतप्रायश्चित्तस्य किं सर्वथा वैयर्थ्यम्। नेत्याह॥ नाश्नत इति। पथ्यमेवान्नमश्नतः पुरुषान्व्याधयो न बाधन्ते। एवं नियमकृन्नियतप्रायश्चित्तकृत्। निषिद्धत्यागेन विहितकृच्च पुरुषोऽविद्वानपि शनैर्विलंबेन क्षेमाय श्रेयसे कल्पते। समर्थो भवतीत्यर्थः। अज्ञानिनोऽपि

प्रत्यहं अनुष्ठितेन पञ्चयज्ञादिकर्मणा दुरितानुरूपप्रायश्चित्ताचरणेन शनैः पापोपमर्दो भवति । अहन्यहन्यनुष्ठानं यज्ञानां मुनिसत्तम । उपकारकरं पुंसां क्रियमाणाघशान्तिदमिति विष्णुपुराणोक्तेरिति ॥१२॥

तपसा ब्रह्मचर्येण शमेन च दमेन च ।
त्यागेन सत्यशौचाभ्यां नियमेन यमेन च ॥ १३ ॥

सत्यधर्म – उत्तमानुत्तमाधिकारिणोऽधिकृत्य करणीयाकरणीयसाधनप्रकारं कैश्चित् श्लोकैराह ॥ तपसेत्यादिना । देवद्विजगुरुप्राज्ञेत्यारभ्य गीतागीतकायसङ्क्लेशनानशनादिरूपेण तपसा । ब्रह्मचर्येणैकपत्नीविहितकालगामित्वाद्यात्मना । शमेन भगवन्निष्ठबुद्ध्या दमेनेन्द्रियनिग्रहेण । शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रह इत्यादेः । त्यागेन सत्पात्रे वित्तादिसमर्पणेन सत्येन भूतहितेन । सत्यं भूतहितं प्रोक्तमित्यादेः । शौचेन शरीरशुद्ध्या सदाचारादिना वा । यमेन विषयोपरत्या । नियमेन विना साधनग्रहणादिबलवद्बाधकोपनिपातम् ब्रह्मयज्ञादिविहितकल्पानतिक्रमणात्मना । अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः । आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयम् । शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् । तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् । एते यमास्तन्नियमा उभयो द्वादश स्मृता इत्येकादशे भगवदुक्तयमनियमाभ्यामिति वा । सात्त्विकस्यैव तपआदेर्भगवदवगमाङ्गता न तु राजसतामसादेः । विस्तृतं चायं सप्तदशाध्यायगीतातद्भाष्यप्रमेयदीपिकास्विति । ततोऽनुसन्धेयः । मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तप इति तपसा वा । ब्रह्मचर्येण । स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पो व्यवसायश्च क्रियानिर्वृतिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति स्मार्तब्रह्मचर्यं वेति केऽपि ॥ १३ ॥

चट्टी – ज्ञानिनां मन्वादिविहितप्रायश्चित्तानुष्ठानेनात्यन्तिकपापनिर्हारो भवतीत्युक्तम् । वस्तुतस्तु तेषां स्वभावसिद्धेनैव तपोब्रह्मचर्यादिना सर्वदुरितनिर्हारसिद्धेर्न तत्प्रायश्चित्तापेक्षाऽऽवश्यकीत्याह ॥ तपसेति त्रिभिः । केचिद्धीरा ज्ञानिनः । श्रद्धयाऽस्माकं मन्वादिविहितप्रायश्चित्तान्वेषणं किमर्थं स्वभावसिद्धशमादिकेनैव सकलदुरितोन्मूलनसंभवादित्यास्तिक्यबुद्धिः श्रद्धा तयाऽन्विता युक्तास्सन्तः । तपसा सच्छास्त्रालोचनेन । तप आलोचनं प्रोक्तमिति वचनात् । ब्रह्मचर्येणाष्टाङ्गेन ॥ तदुक्तम् ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमित्युक्तेः । शमेन शत्रुमित्रादिबुद्धिवर्जेन । शमः प्रियादिवैधुर्येत्युक्तेः । दमेन इन्द्रियनिग्रहेण । दम इन्द्रियनिग्रह इत्युक्तेः । त्यागेनाहंममतात्यागेन । मिथ्याभिमानविरतिस्त्याग इत्यभिधीयत इत्युक्तेः । काम्यकर्मत्यागेन वा । सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इत्युक्तेः । सत्यं सतां हितवचनम् । यत्सतां हितमत्यन्तं तत्सत्यमिति कथ्यत इत्युक्तेः ।

अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च व्यवस्थाने शौचमेतदुदाहृतमित्युक्तलक्षणं शौचम् । ताभ्याम् । अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ । यमाः शौचं तपस्तुष्टिः स्वाध्यायो हरिपूजनम् । नियमा इत्युक्तलक्षणेन यमेन नियमेन च ॥ १३ ॥

देहवाग्बुद्धिजं धीरा धर्मज्ञा श्रद्धयाऽन्विताः ।
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥

सत्यधर्म – धीरा धियां बुद्धौ रताः । रमेर्यमन्ताड्ड इति डः । धर्मज्ञा धर्मं पुण्यकर्म । स्याद्धर्ममस्त्रियां पुण्यं श्रेयसीत्यमरः । तं तद्वा जानन्तीति ते तथा । धर्मो भगवान् सर्वं जगद्धत्त इति धर्मः । पृथिवी धर्ममूर्धनीति प्रयोगान्मोक्षधर्म इति गीताभाष्योक्तेर्धर्मज्ञा भगवज्ज्ञाना वा । श्रद्धयान्विताः । श्रदित्यव्ययमास्तिक्यवाची तद्धत्त इति श्रद्धा परलोकादिकमस्तीति निष्ठा । श्रन्नामास्तिक्यमुच्यत इति गीताभाष्योक्तेः । तयाऽन्विताः । देहवाग्बुद्धिजं देहवाग्बुद्धिभ्यो जातम् । पञ्चम्यामजाताविति जनेर्डः । महदितरावारणीयत्वेन महत् । अघं कलुषम् । कलुषं वृजिनैनोघमंहो दुरितमित्यमरः । क्षिपन्ति नाशयन्ति । अनायासेन नाशयन्तीत्यत्र स्पष्टदृष्टान्तमाचष्टे ॥ वेण्विति । अनलोऽग्निर्वेणुगुल्मं वेणोर्वंशस्य । वेणुर्भूपान्तरे वंश इति विश्वः । गुल्मस्तम्बे प्लीह इति विश्वः ॥ १४ ॥

चट्टी – देहवाग्बुद्धिजं महदप्यघम् । अनलो वेणुगुल्ममिव क्षिपन्तीत्यर्थः ॥ १४ ॥

केचित्केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥ १५ ॥

सत्यधर्म – निस्त्राणगात्राणां कथं कथयेत्यत आह ॥ केचिदिति । केवलयाऽनपेक्षितेतरसाधनया भक्त्या । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्नचान्यथेति स्नेहरूपिण्या । वासुदेवपरायणा वासुदेवः परमयनं येषां ते तथा । नेतरफलोपलम्भाद्यर्थं तदासक्ता इति भावः । भागवता एव यूयं भक्त्या वयं प्रभो इति नारदेन धर्मं प्रत्युक्तेस्ते नारदादय इति ज्ञेयम् । यद्वा केवलया तपआद्युपेक्षया भक्त्या मुख्याश्रयो यादृशी मयि भक्तिः स्यात्तादृश्यन्यत्र नैव चेत् । अनन्यभक्तिर्विज्ञेयेत्युक्तरूपिण्येति विवक्षितेऽर्थे वासुदेवपरायणा इत्यतिरिच्यत इत्यतो वाऽऽह ॥ वेति । असुदेवपरायणाश्चेति मुख्यप्राणपरायणाश्च । वा समुच्चय इति विश्वः । देहेऽपि यत्र पवनो विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया । वायुरनिलममृतं वायुरप्यमृतः स्मृत इत्यादेस्तत्परायणता तदनुसारिण्यप्यावश्यकीति नातिरेकः । अथवा केवलया भक्त्या करणेन वासुदेवपरायणास्तदाश्रया इति तयोरन्तर्विशेषान्नातिरेक इति । अत एतस्मात् बिभ्यत्परो वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् । किन्त्वन्येषामश्रद्धया

तत्राप्रवृत्तेरर्थात्तेष्वेव पर्यवसानादनुवादमात्रमिति व्याख्यन्प्रत्याख्यातः । अथवा के केचन चित्के चितो ज्ञानस्य कं सुखं तत् चित्कम् । षष्ठ्यर्थस्तत्साध्यरूपः सम्बन्धः । ज्ञानमात्रसाध्ये मोक्षसुखे । विषयसप्तमी वा । यदघं तदपि धुन्वन्तीत्युत्तरेणान्वयः । एकान्तानां न कस्याचित् । त्वत्पादपद्मान्न परं वृणोम्यहमित्यादेर्मोक्षापेक्षां न महान्तः कुर्वन्ति तस्य स्वत एवान्तरालिकतया लभादिति भावः । सा च भक्तिरुपक्षीणसामर्थ्या फलकामनयेत्याह ॥ वलयेति । भगवत्प्रीतिमात्रसाधना पटीयसीत्यर्थः । वबयोरभेदात् । अघं के धुन्वन्ति न केऽपीत्यर्थः । अथवा वलते चरति विषये मोक्षादाविति सा वला । वल सञ्चरण इति धातुव्याख्यानात् । तर्हि मोक्षापेक्षारहितास्ते कीदृशा इत्यत आह ॥ वासुदेवपरायणा इति । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकममित्यादेस्तन्मात्रकामुकाः । भास्करः सूर्यो नीहारं हिममिव कार्त्स्न्र्येन सामस्त्येन तदधिगम इत्यादिशंसितप्रकारेणाघं पापं धुन्वन्ति क्षपयन्ति समूलघातं घ्नन्तीत्यर्थः । कार्त्स्न्र्येनेत्येतन्नीहारं भास्करः कार्त्स्न्र्येन यथा धुनोति तथेति वाऽन्वेति । तत्राघानां नानात्वेऽप्यघानीत्यनुक्त्वोक्त्वा चाघमिति कियन्त्यपि तानि सन्तु वासुदेवपरायणानां स्वल्पान्येवेति ध्वनयामासेति ज्ञेयम् ॥ १५ ॥

चट्टी – केचिच्च ज्ञानिनो वासुदेवपरायणाः । वासुदेव एव परमयनं आश्रय इति ज्ञानं येषां ते तथा । तदेकशरणा इति यावत् । केवलया सहायान्तरानपेक्षया । भक्त्या ज्ञानपूर्वकभगवत्स्नेहेन । ज्ञानपूर्वः परस्नेहो नित्यो भक्तिरितीर्यत इत्युक्तेः । अघं धुन्वन्ति परिहरन्तीत्यर्थः । ज्ञानिनो द्विविधाः । यमादियोगप्रचुरा भक्तिप्रचुराश्चेति । उभयेषामपि मन्वादिप्रायश्चित्तानपेक्षया स्वभावसिद्धाभ्यामेव योगभक्तिभ्यां सर्वपापनिवृत्तिर्भवति । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते क्षणात् । न हि ज्ञानेन सदृशं पवित्रमिह विद्यत इति भगवद्वचनादिति भावः ॥ १५ ॥

न तथा ह्यघवान् राजन् पूयेत तप आदिभिः ।
यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥

सत्यधर्म – अशक्तविषयमुक्तमिदं साधनं न मन्दमिति मन्दाशङ्कां परिहरति ॥ नेति । तपआदिभिः पूर्वमुदीरितैः । तथाऽघवान्पापी न पूयेत । क इवेत्यत आह ॥ यथेति । कृष्णे लसत्पीतपटे वासुदेवे । पुत्रात्प्रेयो मित्रात्प्रेयः सर्वस्मात्प्रेय इत्यर्पिताः प्राणा इन्द्रियाणि यस्य सः । एतदवाप्तिरपि केनेत्यत आह ॥ तत्पूरुषनिषेवया तद्भक्तसेवयेति । हिः समुच्चये । तत्पूरुषनिषेवया च यथा पूयेत न तथा पूयेतेति वा । पुरुषाः पूरुषा नरा इत्यमरः । ते पूरुषा अपि न मोक्षाय यतंत इत्यप्याह ॥ तत्पुरुषेति । वैकुण्ठादिषु रुषा कोपस्तदनाकाङ्क्षा येषां ते पूरुषास्ते च ते पूरुषाश्च तस्य पूरुषा इति वा निषेवया ॥ १६ ॥

चट्टी – तथाऽपि शमादियोगापेक्षया भक्तिरेव गरीयसीत्याह ।। न तथेति । कृष्णेऽर्पिताः प्राणाः श्रोत्रादीन्द्रियाणि येन स तथोक्तः तद्भक्तिमानिति यावत् । यथा पूयते । तथा तप आदिभिर्न पूयेत न शुध्येत । अत एव पूर्वश्लोके कात्स्न्र्येनेत्युक्तम् । कृष्णे भक्तिः केन स्यादत्राह ।। तदिति । तत्पूरुषाणां तद्भाक्तानां महतां सेवया कृष्णार्पितप्राण-इत्यन्वयः ।। १६ ।।

सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः साधवो यत्र नारायणपरायणाः ।। १७ ।।

सत्यधर्म – सङ्कलय्य पूर्वमुक्तमन्वयव्यतिरेकमुखेन द्रढयति ।। सध्रीचीन इति । लोके भुवने । लोकस्तु भुवने जन इत्यमरः । अयमव्यवहिततयाऽभिमतो मार्गः सध्रीचीनः प्रान्तपर्यवसायी समीचीन इति यावत् । सध्रीचीनेनेति सहाश्वतीति सध्र्यक् सहशब्दोपपदादश्वतेर्ऋत्विग्दधृगित्यादिना क्विन् तस्य सर्वापहरी लोपः । अनिदितामित्यादिनोपधानकारलोपः । सहस्य सध्रिरिति सहशब्दस्य सध्र्यादेशः । एवं निष्पन्नात्सध्र्यच्शब्दात्स्वार्थे विभाषाश्चेरदिक्स्त्रियामिति खप्रत्यये आयने इत्यादिना खस्येनादेशे भसंज्ञायामच इत्यकारलोपे चौ लुप्तनकारेऽश्वतौ परे पूर्वस्याणो दीर्घः स्यादिति सध्रिशब्दस्य दीर्घे च निष्पन्नेन सध्रीचीनशब्देन गुणैः सहाश्वतीति व्युत्पत्त्या समीचीनरूपो लभ्यत इति ऋग्भाष्य-टीकाटिप्पणोक्तेः । मोक्षेऽप्ययममुं न जहातीति भावः । अत्रावस्थानदशायामपि क्षेमः क्षेमङ्करो बोद्धारोऽपि निषेद्धारो नेत्याह ।। अकुतोभय इति । न विद्यते कुतोऽपि भयं यस्य स तथा । मयूरव्यंसकादिसमासः । कुत इत्यत आह ।। यत्रेति । यन्मार्गे नारायणपरायणा अत एव साधवः सुशीलाः सु पूज्यं शीलं स्वभावः सु अत्यन्तं शीलं सद्वृत्तं येषां ते तथा । शीलं स्वभावे सद्वृत्ते सु पूजायां भृशार्थे चेति विश्वौ । वर्तन्त इति शेषः ।। १७ ।।

चट्टी – भक्तिवदन्यन्न शोधकमित्यत्र हेतुमाह ।। सध्रीचीन इति । लोके आलोके आलोचने क्रियमाणे ।। यद्वा ।। लोके प्रायश्चित्तादिलक्षणसाधनसमूहोऽयं पन्था भक्तिमार्गः सध्रीचीनो हि यस्मादिति पूर्वश्लोकेनान्वयः । सध्रीचीनत्वे हेतुत्रयम् । क्षेमो मोक्षहेतुः । न कुतश्चिद्विघ्नादेर्भयं यस्य स तथा । यत्र यस्मिन्भक्तिमार्गे साधवः प्रवर्तन्ते । तत्परिगृहीत इति यावत् ।। १७ ।।

प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखैः ।
न वै पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः ।। १८ ।।

सत्यधर्म – नारायणपराङ्मुखैर्जनैश्चीर्णानि कृतानि तान्न पुनन्ति । वा इति पुराणादिप्रसिद्धिमाह । आपगा निम्नगा भागीरथ्याद्याः सुराकुम्भं मद्यभाण्डं यथा न पुनन्ति तथेति योजना । सुरो देवे सुरा

मध्ये कुम्भःस्याद्घटेति विश्वौ । अपां समूह आपं तद्गच्छतीत्यपगच्छतीति वाऽऽपगा । आपगा त्वापगापि चेति द्विरूपकोशः । नदी । उभयत्रापि गमेर्डः ॥ १८ ॥

चट्टी – तप आदीनामपि भक्त्योपचितबलादीनामेव पापनिर्हरणहेतुत्वं न केवलानामित्यतोऽपि भक्तेरेव प्राधान्यमित्याह ॥ प्रायश्चित्तानीति । महतामप्यशोधकत्वे दृष्टान्तः ॥ सुराकुंभं नद्य इवेति ॥ १८ ॥

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥१९॥

सत्यधर्म – तपआदिकं श्रीपतिकृपासम्पादनसाधनं चिरसमयसमाचीर्णमेव तथा नेदमिति सर्वाधिकारिसाधारणं तत्राप्यतिसुनायाससाध्यं साधनं बोधयति ॥ सकृदिति । यैर्जनैः सकृदेकवारं मनः कृष्णपदारविन्दयोः कृष्णस्य मूलरूपिणो नारायणस्य वासुदेवस्य वा सन्निधानात् । यथोक्तं तत्त्वप्रकाशिकायाम् । कृष्णो मूलरूपी नारायणः । कृष्णो मुक्तैरिज्यते वीतमोहैरिति । नियमनादिना सकललोककर्षणात्कृष्णः । तच्चोक्तम् । यतः कर्षसि देवेश नियम्य सकलं जगत् । अतो वदन्ति मुनयः कृष्ण त्वां ब्रह्मवादिन इति महाकौर्मे इति गीताभाष्योक्तेः । कृषिर्भूवाचकः शब्दःणश्च निर्वृतिवाचकः ततयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इत्यादेश्च । पदारविन्दयोः पदे एवारविन्दे कमले तयोः । अनेन मनसो भ्रमररूपतां ध्वनयति । सरसाक्षिभृङ्गैर्वराननाब्जमित्यादेः । द्विवचनेन द्वयोरपि विशेषबलेन विलक्षणफलोपलम्भकत्वेनोक्तिरावश्यकीति ज्ञापयति । सुवरिति प्रतिष्ठे द्वे एते अक्षरे इत्येतद्बृहदारण्यकभाष्ये स्वित्यानन्दः समुद्दिष्टो वरिति ज्ञानुमुच्यते । मोक्षदानेन तद्दानात्सुवरस्य पदद्वयम् । दक्षिणश्चैव सव्यश्चेत्याद्युक्तेः । निवेशितं नियोगेन स्थिरं स्थापितं मनसश्चञ्चलत्वात् । मनसश्चञ्चलत्वाद्धि स्थितिर्योगस्य वै स्थिरा । विनाऽभ्यासान्न शक्या स्याद्वैराग्याद्वा न संशय इति षष्ठगीताभाष्योक्तेः । इदं दुःसाधमित्यत आह ॥ तद्गुणरागियैरिति । रागोऽनुरक्तिरिति विश्वः । तस्य गुणास्तेषु राग आसक्तिरस्यास्तीति तत्तथाऽऽसक्तं मन इत्यर्थः । इदमवादीदानन्दतीर्थमुनिरासक्तमना अतीवस्नेहयुक्तमना इति सप्तमे गीताभाष्ये ।

ननु न बहुव्रीहिलभ्येऽर्थे भवन्ति मतुबादय इत्युक्तेस्तद्गुणरागमिति पूर्ते रागीति कथमिति चेन्न । प्रायिकाभिप्रायमिदम् । एकदेशे नैकाधिकरण इत्यत एकदेशिन इति निर्देशात् । तद्गुणश्च तदप्रधानभूता ब्रह्माद्यास्तद्रागीति वा । अप्रधानतया तद्रागस्यापि भगवत्प्रसादसाधनताया उपासनाङ्गदेवानां परमाङ्गतया भवेत् । तद्भक्तभक्तेष्वपि यो न कुर्यात्प्रीतिमञ्जसा । विष्णुर्जहाति तं पापमिह चामुत्र च प्रभुरित्यादिभाष्यभारताद्युक्तेः । शुक्ले सन्ध्यादिके गुण इत्यनुव्याख्याव्याख्यायाममरसुधायां गुणो

मौर्व्यामप्रधाने रूपादावित्यभिधानात्। गुणसम्मूढा इति व्याख्यावसरे गीताभाष्ये शब्दाद्या इन्द्रियाद्याश्च सत्त्वाद्याश्च शुभानि च । अप्रधानानि च गुणा निगद्यन्ते निरुक्तिगैरित्यभिधादित्यभिधानात् । नमन्त्यस्मिन्गुणा इत्यनुव्याख्यानसुधायां गुणा उपसर्जनभूता ब्रह्माद्या इति व्याख्याततत्वात्। अथवा निना कृतदुष्कृतानुतापो द्योत्यते तेन तत्पूर्वकं वशितमिति वा। सकृत्सहैकवारे स्यादिति विश्वः। ते यमं पाशभृतः पाशान्बिभ्रतीति ते तथा तांश्च न पश्यन्ति। तद्बाधा नास्तीति तात्पर्यम्।

नन्वग्रतो जाग्रद्दशायां तद्दर्शनाभावेऽपि भयं स्वाप्नेभ्यस्तेभ्यो दृष्टेभ्यः स्यादित्यतो नेत्याह ॥ स्वप्नेऽपि न पश्यन्तीति। तत्र हेतुमाह ॥ हि चीर्णनिष्कृता इति। यतश्चीर्णं निष्कृतम्। भावे क्तः। प्रायश्चित्तं यैस्ते तथा मनोनिवेशनमात्रेणैव सर्वं प्रायश्चित्तं कृतमिति भावः। तत्तद्भटानवलोकनमात्रेण कथं कृतिन एत इत्यतो भगवद्भगवद्दूतनिरीक्षणं च तेषां भवतीत्यप्यनेनाह ॥ नतेयममिति। ईं रमां यमयति नियमयतीति ईयमो रमारमो नतः सर्वनतश्चासावीयमश्च तं तद्भटांश्च पश्यन्ति। लक्ष्म्यामी स्यादनव्ययमिति विश्वः। नता प्रणता या ई तामिति वा। पाशः पक्ष्यादिबन्धने कर्णान्ते शोभनार्थक इति विश्वौ। कर्णयोरिति शेषः। कर्णशोभककुण्डलादिभृत इति तद्भटविशेषणम्। स्वप्नेऽपीत्यनेन पारवश्येऽपीत्थम्भावो यदा तदा किं वाच्यं जाग्रद्दशायामिति सूचयति। अर्थविशेषलाभलोभात्त-च्छब्दाध्याहारः सोढव्यः पूर्वत्रैवात्रापीति ज्ञेयम्। तर्हि के तान्पश्यन्तीत्यत एत इत्यप्याह ॥ यैरिति। यैर्जनैः सकृत्कृष्णपदारविन्दयोस्तद्गुणरागि ते च ते गुणाश्च विषयास्तत्र रागोऽशोभनेषु शोभन-त्वाध्यासः। यथोक्तं द्वितीयगीताभाष्ये। शोभनाध्यासो रागो रसो रागस्तथाऽऽसक्तिः शोभनाध्यास उच्यत इत्यभिधानादिति। सकृन्न निवेशितं यतो मनो वशितं नेति निवेशितं तत्तस्मान्न चीर्णनिष्कृता इति ते यमं तद्भटांश्च। अपिर्जाग्रदवस्थासमुच्चायकः। सदेति यावत्। पश्यतीत्यतस्तत्र न निवेश्यमिति वा यत्रानवसरोऽन्यत्रेत्यादिमानसिद्धत्वाच्च नापूर्वताऽपि ॥ १९ ॥

चट्टी – पापनिर्हरणं तप आदाविव चिरसाध्यं न भवति किन्तु क्षिप्रसाध्यमित्यतोऽपि भक्तेः प्राधान्यमित्याह ॥ सकृदिति। तस्य कृष्णस्य गुणेषु राग्यनुरागि मन इह चेतनानां वर्गे चीर्णा निष्कृताः कृतपापानुतापपूर्वकं श्रीकृष्णाङ्घ्रिपद्मे सकृन्मनोनिवेशेनैव कृतप्रायश्चित्ताः ॥ १९ ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
दूतानां विष्णुयमयोः संवादं तं निबोध मे ॥ २० ॥

सत्यधर्म – व्याजतोऽपि हर्याह्वयव्याहरणं दुरितदूरीकरणकारणधुरीणं यदा तदा किमुदाहर्तव्यं तदेकतानमानसेन सदा तदाराधनादिसाधनवतां महतामंहःसंहारो भविष्यतीत्यत्र निदर्शनप्रदर्शनेनेदम्।

अर्थविमुखान्सुमुखीकुर्वन्काञ्चनाख्यायिकामाख्याति ॥ अत्रेति । अत्र भगवन्नाममात्रकीर्तनेन पापापनोदे उदाहरन्ति सन्त इति शेषः । पारोक्ष्यनिर्देशेन बहुवचनेन च सम्प्रदायागतां सम्मतिं च सूचयति । इमं वक्ष्यमाणमितिहासं पुरावृत्तम् । पुरातनमिति पृथग्विद्यत इतीतिहासशब्दः स कीचकैर्मारुतपूर्ण-रन्ध्रैरित्यादिवद्वृत्तमात्रपरोऽवसेयः । तथा च पुरातनं वृत्तमिति सिध्यति । एवकारेणोत्तरत्र वक्ष्यमाणकार्यकारणभावो न व्यभिचारी क्वापीति नियममाह । यमपुरश्रीहरिपुरयोरतनं गमनमुद्दिश्य विष्णुयमयोर्दूतानां संवादो यस्मिन्स तं मे मत्तो निबोध शृणु । एतेन विवक्षा ममास्तीति सूचयति । न चाततेः सन्ततगमनार्थस्य कथं गमनसामान्यपर्यवसानमिति वाच्यम् । कामात्पौत्रायणः शोकादङ्गना-भामिनीत्यादिशब्दानामङ्गात्कल्याण्यामित्याद्यर्थविशेषे नियमितानाममितानां सामान्यकामिन्यादिपराणां बहुलमुपलम्भात्काऽत्र कथन्ता । ततश्च किञ्चिदितिहासपददौर्मुख्यं प्रत्याख्यातं भवतीति सन्तोष्टव्यम् । शृणुष्वेत्याद्यकथयंश्च कथयंश्च निबोधेति नितरां बोधो यस्येति तत्सम्बोधनेन वस्तुस्थितिसूचकेन राजसौमनस्यसम्पादनमिव लोकहितमित्यादिस्वाभिहितसौमुख्यं च ध्वनयामासेत्यान्तरङ्गिको भावो विभावनीयः । आगतिक्रमेण यमविष्ण्वोरिति वक्तव्यं तथाऽपि तदकार्यकारितयाऽऽद्यन्तत्वेनाभ्यर्हि-तत्वेन च विष्णुपुरस्कृतिरिति ज्ञेयम् ॥ २० ॥

चट्टी – इममर्थमितिहासेनोपपादयति ॥ अत्रेति । इतिहासं कथां मे मत्तः ॥ २० ॥

कान्यकुब्जे द्विजः कश्चिद् दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥ २१ ॥

सत्यधर्म – कान्यकुब्जे गङ्गायमुनामध्यस्थदेशविशेषे दासीपतिर्दास्याः पतिरुपपतिरन्यथा द्विज इत्युद्वेजयेदिति भावः । नाम्नाऽजामिलो दास्याः संसर्गदूषित इति हेतोर्नष्टोऽदर्शनं गतः सन् निर्दुष्ट आचारः सतामाचार इति वा यस्य स तथा । दृष्टं च नष्टशब्दस्यादर्शनं गत इत्यर्थकत्वं नष्टधर्मे-त्यादिगीताभाष्ये नश् अदर्शन इति धातुव्याख्यानात् । सर्वथा तन्नाशो भाविकार्याननुगुणः । अथवा दास्याः संसर्गदूषित इत्यनेनैव पतिशब्द उपपत्यर्थक इत्यभिप्रैतीति मन्तव्यम् । नाम्नाऽजामिल इति वदतो नं निर्भरस्तत्र यौगिकार्थविचारेण चित्तक्लेशो न इति ज्ञायते । तथाऽप्यजया प्रकृत्या ज्ञानस्य मीलो मीलनं तिरोभावो यस्य स तथा । पश्चादजाद्धरेः पूर्वपुण्यसम्पन्नज्ञानस्य मील उन्मीलनं यस्य स तथेत्युभयथा चाजामिलत्वं युक्तम् । ह्रस्वत्वं छान्दसमिति पूर्वमेव विवृतवन्तः । अजा मिलति श्लिष्यति मिल श्लेषण इति धातुव्याख्यानात् । स्वकार्येण यम् । अजो विष्णुः स आ सम्यक् स्वकार्येण सह मिलति यः सोऽजामिल इति निरुक्तौ त्वार्थिकतयाऽभिप्रेतोऽर्थः सेत्स्यति विना ह्रस्वश्छान्दसमिति विग्रहाग्रहेऽपि पन्थाः सुमिल इति मन्तव्यम् । चैत्रस्य दासभार्येत्यादिवन्नित्यसापेक्षत्वात्संसर्गदूषित इति समासः । षष्ठ्या आक्रोश इत्यलुक्समासो वा ॥ २१ ॥

चट्टी – कान्यकुब्जपुरे दास्याः पतिर्नाम्नाऽजामिलः ॥ २१ ॥

बन्द्यक्षैः कैतवैश्चौर्यैर्गर्हितां वृत्तिमाश्रितः ।
बिभ्रत् कुटुम्बमशुचिर्यातयामास देहिनम् ॥ २२ ॥

सत्यधर्म – बन्दी तद्ग्रहैर्मध्येऽध्वनोऽध्वनीनान्गृहीत्वा नयनैरक्षैः फाशैः । फाशके चाक्षमिति विश्वः । कैतवैः । कितवो मत्तो वञ्चक इति विश्वः । वञ्चकव्यापारैः कितु स्यादनृतत्वादि कैतवं तस्य भाषणमित्यभिधानेनासत्यव्यवहरणैरिति वा । कितवस्य कर्म । युवादित्वादण् । कितवं द्यूतदम्भयोः । कैतवः कितवे शत्राविति हैम इति भानुदीक्षित उदाजहार छद्मकैतव इत्यमरव्याख्यावसरे । चौर्यैः स्तेयैर्द्यूतेन चौर्येण वा चौर्यतद्यूतरि श्रमोऽस्ति भवतो भ्रष्टस्य का वा गतिरित्यादेः । गर्हितांमहितैर्निन्दितां वृत्तिमाचारमाश्रितोऽवलम्बमानः कुटुम्बं बिभ्रत् । नाभ्यस्तादिति नुमभावः । अत एवाशुचिरशुद्ध औपासनानलादिविकलो वा । शुचिः शुद्धे ग्रीष्मे हुतवहेऽपि चेति विश्वः । देहिनं स्वात्मानं यातयामास यातना नारकीः प्रति गमयामास । तत्साधनसिद्धेः सिद्धवत्कृत्योक्तिः । देहिनमिति स्वेतरकर्मीभूतस्याभावाद्बाधितान्वयं यातयामासेत्येतद्विशेषणे शरीरेऽन्वेति । ततश्च देहमेव यातयामास गमयामासेत्यर्थः सिध्यति । वृत्तिं जीवनोपायमिति वा देहिनमितरं स्ववद्गर्हितां वृत्तिं यातयामास ग्राहयामासेति वा ॥ २२ ॥

चट्टी – बन्दिग्रहणैरक्षैश्च द्यूतेन । कैतवैरनृतवादैश्च । कितवोऽनृतवादी स्यात्कैतवं तस्य भाषणमित्युक्तेः । वृत्तिं जीविकाम् । बिभ्रन्पुष्णन् । देहिनं स्वात्मानं यातयामास नरकगमनाभिमुखमकरोत् ॥ २२ ॥

एवं निवसतस्तस्य लालयानस्य तत्सुतान् ।
कालोऽत्यगान्महान् राजन्नष्टाशीत्याऽऽयुषः समाः ॥ २३ ॥

सत्यधर्म – तत्सुतान् दासीसुतान् लालयानस्य क्रीडयत आयुषो जीवनकालस्याष्टाशीतिसमास्तत्परिमितसंवत्सरा एतदात्मकालोऽत्यगाद्गतः । अशीतिशब्दोऽप्यक्षीतिशब्दवत्सङ्ख्याविशेषवाची । विंशत्याद्याः सदैकत्व इत्यमरादष्टाशीतिसमा इति सम्भव इत्यन्वयः । अष्टाशीत्या तत्सङ्ख्ययोपलक्षितः काल इति वा । हायनोऽस्त्रीशरत्समाः समा वर्ष इति चामरविश्वौ । महाराजन्निति पाठे जानन्ति पूर्वराजान आदिराज्ञामितिवद्राजाहःसखिभ्य इति टजभावे रूपम् । महानिति पाठस्तु महान् । कालस्य महत्त्वं तु तद्दौर्जन्यवशादिति मन्तव्यम् ॥ २३ ॥

चट्टी – आयुषः संबन्धी महान्कालोऽत्यगात्। कियानित्यपेक्षयामाह ॥ अष्टाशीत्येति। अष्टाशीत्या संख्यया युक्ताः समाः संवत्सराः ॥ २३ ॥

तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ।
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥

सत्यधर्म – प्रवयसः प्रगतं वयो यस्य स तस्य वृद्धस्य। तेषां मध्ये योऽवमः कनिष्ठः। पित्रोर्माता च दासी च पिता चाजामिलश्चेत्येतयोः पितामात्रेत्येकशेषः। भृशं दयितो बहुस्नेहपात्रम्। उत्तरत्र पुत्रप्रसवासम्भावनया प्रीतिपात्रमयमिति मन्तव्यम्। अतिवेलभृशात्यर्थेत्यमरः ॥ २४ ॥

चट्टी – प्रवयसो वृद्धस्यावमः कनिष्ठः ॥ २४ ॥

स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥ २५ ॥

सत्यधर्म – स जरठ इति सम्बन्धः। कलभाषिणि कलमव्यक्तमधुरं यथा भवति तथा भाषते तच्छील इति। सुप्यजाताविति णिनिः। कलोऽव्यक्तमधुरध्वनाविति विश्वः। कलेन भाषाऽस्तीति शिखादिनिवेशादनन्तत्वेऽपीति वा। बद्धहृदय आसक्तचित्तो बद्धं सस्नेहं हृदयं यस्येति वा। अनुबन्धो हि भक्तिः स्याद्बन्धः स्नेह उदाहृत इति सप्तमतात्पर्योक्तेः। तल्लीलां बालक्रीडाम्। भृशमिति स्थानत्रयान्वयि। मुमुदे तुतोष ॥ २५ ॥

चट्टी – जरठो वृद्धः ॥ २५ ॥

भुञ्जानः प्रपिबन्खादन्बालकस्नेहयन्त्रितः ।
भोजयन्पाययन्मूढो न वेदागतमन्तकम् ॥ २६ ॥

सत्यधर्म – बालकस्नेहयन्त्रितस्तन्नियतः। यन्त्रणा स्यान्नियमन इति विश्वः। पूर्वानुपूर्व्या खादन्निति पुरोऽपि पूरणीयम्। आगतं सन्निहितमन्तकं मृत्युं न वेद न व्यजानादत एव मूढः। मूढ इति न वेदेति वा ॥ २६ ॥

चट्टी – अन्तकं मृत्युम् ॥ २६,२७ ॥

स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ।
मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥

सत्यधर्म – प्रकृतमनुसरति ।। स इति । य एवं वर्तमानः समयं गमयन्मृत्युकाले उपस्थिते आसन्ने नारायणाव्हये नारायणेत्याव्हयो नाम यस्य स तस्मिन्बालेऽणीयसि तनये मतिं धियं चकार तल्लुलोकयिषापरवशोऽभूदिति भावः ।। २७ ।।

स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् भृशदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ।। २८ ।।

सत्यधर्म – यथा प्रवृत्तं कर्म क्रियमाणं क्रमाद्व्यक्तभक्तिनिवृत्तकर्मौपयिकं सन्मुक्त्युपयुक्तं तथा नारायणनाम बालानामपि प्राचीनचीर्णपुण्यविशेषवशेन सन्भक्तिमुक्त्युपयुक्तमिति श्लोकद्वय-स्याप्येकान्वयः । सोऽजामिलो भृशदारुणानतिक्रूरान् वक्रतुण्डान् कुटिलवक्त्रानूर्ध्वरोम्णोऽन्तर्निभृत-कोपेनोर्ध्वाञ्चितलोम्नः पाशहस्तान् । इदं सर्वं पुरुषपारुष्यसूचकमिति मन्तव्यम् । त्रीन्पुरुषान्परस्पर-प्रसरद्भिः । किं तव कृत्यमित्यतो वक्ति ।। आत्मानं नेतुमागतानिति ।। यमपुरं प्रतीति शेषः ।। २८ ।।

चट्टी – वक्राणि तुण्डानि मुखानि येषां ते । ऊर्ध्वाणि रोमाणि येषां तान् ।। २८ ।।

दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् ।
प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ।। २९ ।।

सत्यधर्म – दृष्ट्वा दूरे किञ्चिदसन्निधाने क्रीडनकासक्तं क्रीडनमेव क्रीडनकं तत्र निरतं क्रीड़ासक्तं पुत्रं नारायणेत्युच्चैः प्लावितेन स्वरेण तारस्वरेणाजुहावाहूतवान् । आकुलेन्द्रियो विकाराकारनिरीक्षणेन व्याकुलानीन्द्रियाणि यस्य स तथा । उच्चैर्निरीक्षितनरोत्तमैर्निमित्तेनाकुलेन्द्रियः सन्पुत्रमाजुहावेति वा । उच्चैरव्ययमनव्ययं च ।। २९ ।।

चट्टी – प्लावितेन प्लुतत्वान्वितेन । आकुलेन्द्रियो दुर्बलेन्द्रियः । पुत्रसङ्केतितनारायणनामाख्य-संबन्ध्यनुसन्धानेनोद्बुद्धप्राचीनसंस्कारोऽजामिलस्तन्मुख्यवाच्यं भगवन्तं स्मृत्वा भक्तिपारवश्येनाकु-लितेन्द्रियः सन् दूरे ब्रह्माण्डाद्बहिरपि वर्तमानं प्लुतेनाव्हानोपपत्त्यर्थमेतत् जगत्सर्जनादिक्रीडासक्तम् । बालक्रीडनकैर्यद्वत्क्रीडतेऽस्माभिरच्युत इत्युक्तेः । पुन्नामनरकात्त्रातारम् । त्राता पुत्रस्त्वमेव म इत्युक्तेः। नारायणाव्हयं मूर्तिविशेषम् । यत्तस्य व्यापकं रूपं परं नारायणाभिदमित्युक्तेः । आजुहावेत्यर्थोऽपि बोध्यः । न मत्स्वामितया तस्य स्मरणं जायते यतः । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योर्विमुच्यत इत्युक्तेः ।। २९ ।।

निशम्य म्रियमाणस्य मुखतो हरिकीर्तनम् ।
भर्तुर्नाम महाराज पार्षदाः सहसाऽपतन् ।। ३० ।।

सत्यधर्म – म्रियमाणस्य मरणोन्मुखस्य भर्तुः सुतदर्शनेच्छाभारवोढुरजामिलस्य मुखतो हरिकीर्तनं श्रीनारायणनामव्याहरणं निशम्य श्रुत्वा पार्षदास्तद्दूताः सहसा झडिति। इतरानूहितत्वं गमनस्य सहसेति द्योतयति । इदं नाविश्वसनीयमित्याह ॥ नामेति । प्रसिद्धमित्यर्थः । यत्पूर्वमहरिकीर्तनं स्मरणरहितं तस्मान्मुखतः भर्तुः स्वस्वामिनः सर्वस्वामिनो नाम निशम्य शिष्टं पूर्ववत् । एवमुत्तरत्रापि ज्ञेयम् । मुखत आरम्भदशायां म्रियमाणस्य पाप्मभिरत्युत्कटैस्तथा कटाक्षितस्याहरिकीर्तनं कीर्तनाभावस्तस्य मुखतो भर्तुर्नाम निशम्येति वा। मुखतो मुखे पूर्वमहरिकीर्तनमन्हि दिवा एः अस्यापत्यमिः । अत इञ् । कामो विष्णुपुत्रस्तस्य कीर्तनं सौरतसल्लाप इति यावत् । प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ संयुज्यन्त इति षट्प्रश्नोपनिषदादिप्रश्नोक्तेः । यामिन्यां कामिन्यां विहिता रतिर्विहितकाले न दिवेति भावः । भर्तुर्नामेति प्राग्वत् । यन्मुखे कीर्तनमहरि हरिविरहितं तन्मुखत इति वा। सार्वविभक्तिकस्तसिः । इ कामदेवे त्वनव्ययमिति विश्वः । मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरिति विश्वः । निशम्यम्रियमाणस्येति पदमेकम् । शमी हि भगवन्निष्ठः स न भवतीति निशमी स चासावम्रियमाणश्च तोकावलोकनवासनावानिति भवत्यम्रियमाणस्तस्य। नाम नाम्नः । प्रथमा षष्ठ्यर्थे । हरि दुरितादेर्हरणात् कीर्तनं व्याहरणं भर्तुर्धर्तुः कुर्वत इति यावत् । मुखतो मुखेऽभिमुखे । महाराजपार्षदा इति समस्तम् । महाराजस्य राजराजस्य हरेः पार्षदाः । हे महाराजेति वा। भर्तुर्नामेति समस्ते व्यस्ते पदे । भर्त्रोर्नाम भर्तॄणां नामेति विग्रहभूमिका भवेत्स चानिष्टो विष्ण्वेकश्रेष्ठता-विघटकत्वादतस्तां न ते विष्णवित्यादिप्रमाणप्रमितां निदर्शयिषुर्व्यासो व्यासेन निर्दिदेशेति तात्पर्यमवधेयम् ।

नन्वभिमानिव्यपदेशस्त्विति सूत्रव्याख्यासुधानुरोधेन समस्ते न्यस्ते न्यस्तेऽपि प्रकारोऽयमाकारयितुं व्यपदेश इत्याद्येकवचनादिनेव नामेत्येकवचनेन शक्य इति वक्तुं शक्यमिति चेन्न । वैषम्यात् । व्यपदेश इत्येकवचनमन्तरङ्गगमकमिव दृश्यते त्विति सूत्रैकवचनं चैकवचनान्तविग्रहसुग्राहकम् । अत एव भाष्ये देवताऽत्र व्यपदिश्यत इत्येकत्रापरत्र दृश्यन्ते मुनिभिश्च ता इति मानमनुसृत्य तासामित्युक्तिरिति। सुधायामेतदनुधावनार्थं व्यपदेशो दृश्यत इत्येतन्निमित्तमेकवचनान्तविग्रहं प्रदर्श्य प्रदर्श्य च न हीत्यादिना तत्र युक्तिं तास्तासामित्यनुसारेण जात्येकवचनाभिप्रायकत्वं च वर्णितम् । नात्र तथान्तरङ्गादिनिमित्तद्वैराश्यमस्ति । नामेत्येकवचनं तु विप्राणां भोजनं यथेत्येतदेतत्सुधानुसारेण सावकाशमेकलमिति न निर्धारकम् । न च परो मात्रया न ते विष्णो एष सर्वेश्वर इत्यादिमानानुयायि-विवरणशरणीकरणे समसनेन शंसनेऽपि भर्तुर्नाम भर्तृनामेति विग्रहः सुग्रहो विशिष्टा आख्या व्याख्येत्यादिवदिति वाच्यम् । न च व्याख्यानतोऽप्यधिकांशो ज्ञायत इति व्यर्थं पृथक्करणमिति वाच्यम् । अन्तरङ्गज्ञापकाभाव एव बहिरङ्गस्यान्वेषणीयत्वादितीति । अतोऽग्रत एव जाग्रता भाव्यमिति व्यासेन व्यासनिर्देश एव स्वैकाधिकत्वज्ञापकत्वेन कृत इति दिक् ॥ ३० ॥

चट्टी – हरिकीर्तनं निशम्यापतन्। यतस्तद्भर्तृनाम ॥ ३० ॥

विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥

सत्यधर्म – विष्णुदूता व्याप्तस्य भगवतो भृत्याः सदा तदुपरि परिवर्तिनः। एतेन क्व ते कायं कथं सहसाऽपतन्निति परास्तम्। हृदयात्तत्कर्णिकायाः। अन्तो नरकाद्यन्तः। अजामिलं जीवं विकर्षतो यमप्रेष्यान्यमदूतान् नियोज्य किङ्करप्रेष्यभुजिष्यपरिचारका इत्यमरः। हृदयात् ल्यब्लोपनिमित्तेयं पञ्चमी। हृदयं विधाय मनः कृत्वाऽन्तर्धाममध्ये न्यवारयन्निवारयामासुः। एतादृग्दुष्कृतिकर्षणेऽमर्षस्तेषां कुत इत्यतो वाऽऽह ॥ यमिति। तन्नामोच्चारं प्रत्यप्रेष्यान्स्वामिना यमेन प्रेषयितुं अयोग्यानित्यर्थः। तन्निवारणे कारणमोजसेति। ओजोऽवष्टम्भो बलं वा। ओजोऽवष्टम्भबलयोरिति यादवः। ॥ ३१ ॥

चट्टी – ओजसा बलेन। ओजोऽवष्टंभबलयोरित्युक्तेः ॥ ३१ ॥

ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ।
के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥

सत्यधर्म – निषेधिता निषिद्धास्तैः कर्तृभिः करणैर्व्याहरणैरिति वा। वैवस्वतपुरःसरा विवस्वतः सूर्यस्यापत्यं यमस्तस्य पुरस्सराः किङ्कराः ॥ ३२ ॥

चट्टी – पुरःसरा भृत्याः ॥ ३२ ॥

कस्य वा कुत आयाताः कस्मादस्य निषेधथ ।
किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥

सत्यधर्म – कस्य किं सम्बन्धिनः अस्य नयनमिति शेषः। देवादीनां त्रयाणां शमनशासनशमनशक्तियुक्तैरिति तथा विकल्पयामासुः। उपदेवा अपि यमोत्तमा इति न किन्तु महदाज्ञाकराः। सिद्धा नारदाद्या अपि तत्कालोपचितभक्तियुक्ता इति तदुभयग्रहणं नासङ्गतमिति मन्तव्यम् ॥ ३३ ॥

चट्टी – निषेधथ। अस्य नयनं इति शेषः। उपदेवा गन्धर्वादयः ॥ ३३ ॥

सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ।
किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः ॥ ३४ ॥

सत्यधर्म – लसत्पुष्करमालिनः शिखादिरियं मालाशब्दः ॥ ३४ ॥

चट्टी – देवाद्युत्तमजातिविषयकसंशयः कुत इत्यतोऽलौकिकरूपदर्शनादित्याहुः ॥ सर्व इति सार्धश्लोकाभ्याम् । लसन्त्यः पुष्करमाला येषां ते तान् ॥ ३४ ॥

सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ।
धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रियः ॥ ३५ ॥

सत्यधर्म – नूत्नवयसस्तरुणाः निषङ्गा इषुधयः । निषङ्ग इषुधिर्द्वयोरित्यमरः । एतदादीनां श्रीः शोभा तदादिभिर्वा येषां ते तथा ॥ ३५ ॥

चट्टी – नूत्नं नवं वयो येषां ते । निषङ्ग इषुधिः । धनुर्निषंगादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥

दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा ।
किमर्थं धर्मपालस्य किङ्करान् नो निषेधथ ॥ ३६ ॥

सत्यधर्म – वितिमिरालोकास्तिमिरस्य तमिस्रस्यालोको दर्शनं विगतो याभ्यस्ताः । तिमिरं चालोकोऽन्यप्रकाशश्च विगतो याभ्य इति वा । तिमिरेण निमित्तेनालोको ज्ञानाभावो विगतो यासामिति वा । स्वेन स्वकीयेन रोचिषा शोचिषा । तमिस्रं तिमिरं तमो रोचिः शोचिरित्युभयतश्चामरः । वितिमिरा हे लोका जना इति विष्णुदूतसम्बोधनं वा । धर्मपालस्य धर्मरक्षकस्य यमस्य । सार्धत्रिश्लोक्या एकोऽन्वय इति कलापकं विशेषकं वा । द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः प्रोक्तं विशेषकम् । कलापकं चतुर्भिश्च तदूर्ध्वं कुलकं स्मृतमिति वचनात् ॥ ३६ ॥

चट्टी – विगतं तिमिरमालोकश्चान्यस्य प्रकाशो याभ्यस्तथाभूता दिशः कुर्वन्तः । भवतामेतदनुचितमित्याह ॥ किमर्थमिति ॥ ३६ ॥

श्रीशुक उवाच
इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः ।
तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥

सत्यधर्म – धर्मराजस्य धर्मपालकस्येति स्वस्वामिनं वदतामियज्ज्ञानं नास्ति किलाहो इति प्रहस्येति सम्भवति ॥ ३७ ॥

चट्टी – अहो दण्ड्यादिज्ञानशून्या एते चोरा एवास्मद्भिया धर्मराजस्य किंकरा इत्यनृतं वदन्तीति विस्मयेन प्रहस्य तान्प्रत्यूचुरित्याह ॥ इत्युक्त इति त्रिभिः ॥ ३७ ॥

विष्णुदूता ऊचुः

यूयं वै धर्मराजस्य यदि निर्देशकारिणः ।
ब्रूत धर्मस्य नस्तत्त्वं यच्चाधर्मस्य लक्षणम् ॥ ३८ ॥

सत्यधर्म – धर्मस्याधर्मस्य च यल्लक्षणमसाधारणधर्मतत्त्वं यथार्थं यथा भवति तथा ब्रूत । यद्यपि प्रस्तुतो धर्मकृदित्यागतवतः प्रत्यधर्मस्य धर्मस्येति वक्तव्यं तथाऽपि प्रतियोगिज्ञाने तज्ज्ञानं सुकरमिति वा स्वेषां धर्म एवानुष्ठितोऽनेनेति ज्ञानात्तदनुरोधेन वा धर्मपुरस्करणमिति मन्तव्यम् ॥ ३८ ॥

चट्टी – धर्मस्याधर्मस्य च तत्त्वं स्वरूपं लक्षणं प्रमाणम् ॥ ३८ ॥

कथंस्विद् ध्रियते दण्डः किं वाऽस्य स्थानमीप्सितम् ।
दण्ड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥

सत्यधर्म – कथंस्विदिति निपातसमुदायः । केन प्रकारेणेति तदर्थः । कथं प्रश्ने सम्भवे च प्रकारार्थे त्वसम्भवे । स्वित्प्रश्ने च वितर्के चेति विश्वौ । अस्य दण्डस्य स्थानं विषयोऽस्य दण्डस्य स्थानं गन्तव्यो निवेशो नृणां तन्मध्ये कारिणः कर्मकारिणः सर्वे दण्ड्याः किमाहोस्विदथवा दुष्कर्मकारिषु कतिचित्केचनैवेति ब्रूतेत्यस्यानुवृत्तिः । यदि कारिणां मध्ये केचित्त्याज्या इति हन्त तर्हि कुतोऽयं न त्याज्य इति तद्धृदयम् । स्थानं स्थितौ च सादृश्ये सन्निवेशावकाशयोरिति विश्वः ॥ ३९ ॥

चट्टी – कथंस्वित् केन प्रकारेणास्य दण्डस्य स्थानं विषयः । ईप्सितमिष्टम् । भवतामिति शेषः । नृणां चेतनानां मध्ये किं कतिचिदेव कारिणः क्रूरस्वभावाश्चेतना दण्ड्याः । आहोस्वित् सर्वेऽपीत्यर्थः ॥ ३९ ॥

यमदूता ऊचुः

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम ॥ ४० ॥

श्रीमद् आनन्दतीर्थभगवत्पादाचार्यविरचितः श्रीमद्भागवततात्पर्यनिर्णयः

॥ हरिः ॐ ॥ 'वेदानां प्रथमो वक्ता हरिरेव यतो विभुः । अतो विष्ण्वात्मका वेदा इत्याहुर्वेदवादिन' इति शब्दनिर्णये ॥ ४० ॥

सत्यधर्म – इतःपूर्वतनो ग्रन्थः प्रायोऽतिरोहिताभिप्रायः क्वचिदनुचितार्थतया प्रतीयमानोऽपि समानसम्मत्युत्तरविवरणेन योग्यो योग्यार्थीकर्तुमिति मतिमानानन्दतीर्थमुनिरनितरसुलभसौभाग्यस्य रमारमणस्य विशिष्टचेतनस्याचेतनभेदाभेदं प्रत्याय्य तमापाततो वेदप्रणिहित इति श्लोकं व्याकुर्वन्प्रयत्नगौरवमसहमानो मानमेवादावुदाहरति ।। वेदानामिति । प्रथमो ,मुख्य आदिमश्च यतो विभुर्हरिर्वेदानां वक्ता । एवकारेणैतदन्यस्य प्रथमवक्तृत्वं प्रतिषेधतीति ज्ञेयम् । ताच्छील्यार्थकेन तृना न धनायादिनेति सूचयति । अत एतद्धेतोरस्मादिति वा । एतदोऽन्नित्यनि, इदम इश् इत्यस्मादिदम इति योगविभागादनुवृत्तस्यानि वाऽत इति भवति । वेदा विष्ण्वात्मका इत्याहुर्वेदवादिन इत्यनेन वक्तारोऽनेकेऽपि न पामरा इति क्रमाद्दर्शयति । शब्दनिर्णयो नाम ग्रन्थविशेषस्तस्मिन् । किं तत्प्रश्न उत्तरितः किंवा ते प्रतारिता इति परीक्षिच्छङ्कामपाकरोति ।। यमदूता इति । वेदप्रणिहितो वेदबोधितकर्तव्यत्वः स्वाध्यायोऽध्येतव्य इत्यादिवेदवेदितः स्वाध्यायादिर्धर्मः पुण्यसाधनम् । तद्विपर्ययो न सुरां पिबेदित्यकर्तव्यत्वेन बोधितः सुरापानादिरधर्मः पापापादकः । कुतो इयान्महिमाऽऽम्नायस्येत्यत आह ।। नारायण इति । यतो वेदो नारायणस्तद्रूपमुख्यवक्तृकस्तद्रूपादिवक्तृको वा । न च ऋग्वेद एवाग्नेरजायते-त्यादिना पौरुषेयत्वोक्तेस्तद्दोषप्रयुक्तदोषवत्त्वप्रसक्तेरविश्वसनीयत्वात्कथं तस्यैतदर्थे प्रमाणीकरणमित्यत आह ।। स्वयम्भूरिति । स्वयं भवति स्वयं भगवता सदा सत्तावानिति स तथा । तानि चाक्षराणि नित्यानि । वाचा विरूपनित्यया । अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । अत एव च नित्यत्वमित्यादिश्रुतिस्मृतिभगवद्वचनेभ्य इति गीताभाष्यात् । यावद्ब्रह्म विष्ठितं तावती वाक् । नित्या वेदा समस्ताश्च शाश्वता इत्यादेः । अग्न्यादयस्तद्व्यञ्जकतामात्रेण जनकतयोच्यन्त इति न तद्विरोध इति भावः । स्वयम्भूरिति नारायणविशेषणं सद्वक्तृवाच्यानुरूप्यं बोधयतीत्यपि ज्ञेयम् । तदपि स्वयं भवनं वेदस्वयम्भवनवदितराधीनं किं नेत्याह ।। साक्षादिति । शुश्रुमेत्यनेन नोपज्ञेयमस्माकमपि तु परम्पराप्राप्तमिदमिति ज्ञापयामासुरिति मूलार्थः । शुश्रुम इति पाठे छान्दसः परस्मैपदानामिति मादेशाभावः । साक्षात्स्वयम्भूस्तत्तुल्यः साक्षाच्चक्रधारिणो नारायणात्पुराणकर्तुः शुश्रुम इति वा । साक्षात्प्रत्यक्षतुल्ययोः । अक्षः कर्षे तुषे चक्र इति विश्वौ ।। ४० ।।

चट्टी – ब्रूत धर्मस्य नस्तत्वं यच्चाधर्मस्य लक्षणमित्यत्रोत्तरमाहुः ।। वेदेति । यो वेदेन प्रणिहितः कर्तव्यतया बोधितः । स धर्म इत्यनेन धर्मस्वरूपं निरूपितम् । यो धर्मः स वेदप्रणिहित इति व्यत्यासेन योजनायां धर्मप्रमाणं च निरूपितम् । यः तद्विपर्ययो वेदेन निषिद्धः सोऽधर्मः । अनेनाधर्मस्वरूपं निरूपितम् । व्यत्यासेन योजनायां अधर्मप्रमाणं च निरूपितमित्यर्थः । ननु ऋचः सामानि जज्ञिर इत्यादिश्रुतेर्वेदानां पौरुषेयत्वेन पुरुषनिबन्धनदोषशङ्कायाः सन्दिग्धप्रामाण्यकानां कथं धर्माधर्मयोः प्रामाण्यमित्यत आह ।। वेदः स्वयंभूरिति । स्वयमेव कारणमनपेक्ष्यैव भवति वर्तत इति स्वयंभूरित्यर्थः।

श्रुतिस्त्वभिव्यक्तिविषया । वाचा विरूपनित्ययेत्यादिश्रुतिविरोधादिति भावः । ननूत्पत्तिश्रुतिविरोधान्नित्यत्वश्रुतेरेव ध्रुवात् द्यौरित्यादाविव बहुकालावस्थायित्वमादायोपचरितार्थत्वं किं न स्यादित्यत आह ।। साक्षादिति । अनुपचारत इत्यर्थः । वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षयेत्यादेरिति भावः । ननु वेदस्यापौरुषेयत्वे पुरुषाभिपायप्रवेशमन्तरेण वाक्यस्य स्वातन्त्र्येण तात्पर्यायोगात् । कथं धर्मादौ प्रमाणत्वमित्यत आह ।। वेदो नारायण इति । तद्वक्तृक इत्यर्थः । मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वश इत्यादेस्तपःशक्तिदृष्टैकदेशवक्तृमुनिव्यावृत्त्यर्थं साक्षादिति । मुख्यतः कात्स्न्र्येनेति यावत् । नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः । सर्गे सर्गेऽमुनैवैत उद्गीर्यन्ते तथैव चेत्यादेः । अनागन्तुके वेदे आगन्तुकपुरुषाभिप्रायप्रवेशानुपयोगादाह ।। नारायणः स्वयंभूरिति ।। ४० ।।

येन स्वधाम्यमी भावा रजस्सत्वतमोमयाः ।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ।। ४१ ।।

सत्यधर्म – वेदो नारायण इत्यावेदितं स कथं ज्ञेय इत्यतो लक्षणमाहुरित्याह ।। येनेति । अमी भावाः पदार्थाः । स्वधाम्नि स्वाश्रये सत्ये । रजःसत्त्वतमोमया एतद्गुणत्रिकप्रचुराः विकृता वा । गुणनामक्रियारूपैर्गुणा रजस उत्तरत्र बोध्योत्पत्त्या पुरस्करणम् । तदनुरोधाद्रक्तादयो विशेषाननुसरणेन शब्दादयो वा । नामेति तदात्मकप्रपञ्चो नामानि मृत्तिकादीनि वा । क्रिया स्वाध्यायाध्ययनादिरूपं तदात्मप्रपञ्च आकारविशेषो वा । एतैर्यथातथं प्राचुर्यादसङ्कीर्णतया विभाव्यन्ते उत्पद्यन्ते । यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः । नामरूपविभेदेनेत्यादेः । सोऽप्येवं किं नेत्यप्याह ।। य इति । ये भावा वक्ष्यमाणा अमिते स्वधाम्नि स्वाश्रये । स्वे महिम्नीति श्रुतेः । सु अत्यन्तधाम्नि भिन्नाश्रयरहिते वा स नारायण इत्यन्वयः । किं मानेनेदमेतल्लक्षणं ज्ञेयमित्यतस्तदप्यवदन्निति वदति ।। येनेति । स्वधाम्नीत्यादि प्राग्वत् । यथातथं येन वेदेन विभाव्यन्ते विविच्य भगवदधीनतया बोध्यन्ते स वेद इत्यन्वयः । पूर्वत्र वेदो नारायणः साक्षादिति वचनेनोत्तरत्र वक्ष्यमाणसाक्षिप्रेक्षणेन सन्दष्टश्लोकयोजनाश्लिष्टान्तिमव्याख्यान इति भाति तां च बिन्दवो बन्धवोऽस्माकं विदां कुर्वन्त्वमत्सराः ।। ४१ ।।

चट्टी – वेदो नारायण इत्युक्तम् । तत्र कोऽसौ नारायण इत्यत आह ।। येनेति । येन स्वधाम्नि स्वाधारतया रजःसत्त्वतमोमयाः । तदुपादानका अमी प्रत्यक्षादिप्रमाणप्रमिताः । भावाश्चेतनाचेतनाश्च । गुणनामक्रियारूपैः गुणाः शब्दादयः शुक्लपीतादयश्च नामानि ब्राह्मणादीनि घटादीनि च क्रिया अध्ययनादय उत्क्षेपणादयश्च रूपाणि संस्थानविशेषाः । तैः । तदनुविद्धतयेति यावत् । विभाव्यन्ते उत्पाद्यन्ते । अवस्थाप्यन्ते संह्रियन्ते च । सृष्टिस्थितिश्च संहारो भवनं समुदाहृतमित्युक्तेः । स नारायण इत्यर्थः ।। ४१ ।।

सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनी दिशः ।
कालः स्वयं धर्म इति ह्येते धर्मस्य साक्षिणः ॥ ४२ ॥

सत्यधर्म – तथाऽपि धर्माधर्मज्ञानं दुश्शकमित्यतः सकलानुभूतसाक्षिण आहुरित्याह ॥ सूर्य इति । ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण इत्याद्युक्तेरुक्तेश्च वेदो नारायण इति । तदधिष्ठानतया रविपुरस्करणं स्वस्वामिजनकतया वेति मन्तव्यम् । खमाकाशो गाव आपश्चन्द्रश्च वाग्वारिषु गौर्माता गौश्चन्द्र इति विश्वौ । सोमो मनो हृदयं च वृत्तिभेदाद्भेदः । उमया सहितः सोमः सोमश्चन्द्र इति द्वयोरपि मनोभिमानित्वादभिमन्यमानाभिमानिनां चैकशब्दवाच्यता महतश्चतुर्मुखादित्यादौ दृष्टा । किञ्च चन्द्रमा मनसो जात इत्यादेर्मनोजन्यत्वाच्चन्द्रमसो जन्यजनकवाचकशब्दानां साङ्कर्यं यथा ब्रह्मादिकं मुखमित्यादावुद्देश्यविधेयशाबल्यात्पितामहाद्यास्तु पितरो नाम कीर्तिता इति सूत्रभाष्यैतरेयभाष्यादिषु स्पष्टं दृष्टमित्युभयग्रहः सम्भवति । सन्ध्याहनी सन्ध्या चाहश्च ते तदभिमानी देवः दिशो दिग्देवताः । कालो गृहीतकालेतरकालोभिमानी देवः श्रीनारायणो वा । कालोऽस्मि लोकक्षयकृदिति गीता । सोऽहं कालोऽवतीर्णोऽस्मीत्यनन्तकथोक्तेः । स्वयं कर्ता जीवः । धर्मो यमः । धर्मस्याकारप्रश्लेषेणाधर्मस्यापि साक्षिणः साक्षादीक्षन्ते ते तथा । साक्षाद्द्रष्टरि संज्ञायामिति पाणिनिस्मरणात् । एतेन यत्र साक्षाद्द्रष्टृत्वमनुपपन्नं तत्र देवता ग्राह्येति सूच्यते । साक्षिण इति पदेन स्वाध्यक्षवाचकस्य धर्मपदस्य साक्षादन्वयबोधनार्थं स्वधर्म इत्यन्ते निबन्ध इति बोध्यम् ।

कालो नारायणस्तस्मात्साक्षिण इति पञ्चम्यन्तं सदनुवर्तते । एते तस्मादेव साक्षिण इत्युच्यन्ते । स एवैतांस्तत्त्वेन स्थापयामासेति भावः । यथोक्तं परिस्पशोऽदधात्सूर्येणेत्येतदृग्भाष्यटीकयोः । सहैव सूर्येण च देवसङ्घांश्चरानज्ञातानदधाद्वासुदेवः । दैत्यानां वा तमसां वृत्तदृष्ट्यै । नन्वीश्वरस्तद्वृत्तं ज्ञात्वा दण्डयेत्तज्ज्ञानमेव तस्य कथं सर्वज्ञत्वात् । किं चन्द्रो वासुदेवो बहिर्दैत्यानामन्तस्तमसामज्ञानादीनां वृत्तदृष्ट्यै वृत्तदर्शनार्थं सूर्येण सहैव सूर्यसहितान्स्पशो ज्ञातचरान्देवसङ्घान्परितः स्थापितवान् । तथा चोक्तम् । आदित्यचन्द्रावनिलो नलश्च द्यौर्भूमिरापो हृदयं मनश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तिम् । तथा सूर्योऽग्निर्मरुतो गावः सोमः सन्ध्याहनी दिशः । स्वयं धर्म इति । एते धर्मस्य साक्षिण इति । हृदयं मनोबुद्धिरहङ्कारादिवृत्तिचतुष्टयम् । अन्यत्राभिमानिनो ग्राह्याः । अत्र गवां कालसामान्यस्य चानुक्तेः प्रमाणान्तरमाह ॥ सूर्य इति । अत्र च गवादीनामनुक्तेः पूर्वप्रमाणोपन्यास इति भाव इति छलारीये विष्णुपुराणे भागवते चेति क्रमाद्भिदरहल्लीयाचार्यटिप्पणे । साक्षी चेता केवलो निर्गुणश्च । वाङ्मनसि दर्शनाच्छब्दाच्चेति सूत्रभाष्ये मनो रुद्र उदाहृतः रुद्रो वीन्द्रः शेषकामौ मनसस्त्वेव देवता । तस्या रुद्रो मनोभिद इति षट्प्रश्नभाष्ये । मनोभिमानिनो रुद्रेत्यादि काठकभाष्ये चोक्तेः । तत्र

प्राणात्मना वायुर्मनोरूपेण शङ्करः । शेषः सुपर्ण इन्द्रश्च मनांस्येव पृथक् पृथक् । अहम्भावमनोरुद्रः। यज्ञादिसाधनं यत्तु मनश्चन्द्रः प्रकीर्तित इत्यैतरेयभाष्योक्तेर्मनश्चन्द्रः ॥ ४२ ॥

चट्टी – किं वाऽस्य स्थानमीप्सितमिति प्रश्नस्याधर्मिणो दण्डस्थानमित्युत्तरं वक्ष्यन् जीवानामनन्तत्वेन तत्कृतधर्माधर्मयोर्ज्ञातुमशक्यत्वेन एते पापिन इति विविच्य ज्ञानासंभवान्न दण्डस्थानत्वमिति शङ्कापरिहाराय धर्माधर्मसाक्षिणस्तावदाह ॥ सूर्योऽग्निरिति । खमाकाशं गावः स्वर्गभूमिजलानि । स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्टयोः स्त्रियां पुंसि गौलिङ्गं चिन्ह शेफयोरित्यभिधानात् । संध्याद्वयं अहनी अहश्च रात्रिश्च । कालः कालशब्दोदितो देववर्गः । हरिश्च प्रकृतिश्चैव ब्रह्मा वायुस्तथैव च । सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि । अग्निर्यमानुजश्चैव कालशब्दोदिताः क्रमात् । इति वचनात् । स्वयं कर्ता जीवः । स्वयं दण्डधारी धर्मश्चेति वा । अत्राधर्मस्येत्यपि पदच्छेदः । जडवाचकशब्दैस्तदभिमानिनो ग्राह्याः । एते देवा धर्माधर्मयोः साक्षिण इत्यर्थः ॥ तदुक्तम् ॥ आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति ॥ ४२ ॥

एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते ।
सर्वे क्रमानुरोधेन दण्डमर्हन्ति कारिणः ॥ ४३ ॥

सत्यधर्म – दण्ड्यादण्ड्यनिर्णायिकान्साक्षिण उक्त्वेदानीं तानाहुरित्याह ॥ एतैरिति । योऽधर्मः । बहुव्रीहिरनिजनित्यः । धर्मोऽस्यास्तीति धर्मो न धर्मोऽधर्म इति वेति विज्ञातः । पुमान्दण्डस्यास्मद्यमराजशिक्षाया युज्यते भवति स एव स्थानम् । यद्वैतैर्यो धर्मस्य दण्डस्य स्थानमिति विज्ञातस्तत्र युज्यते तत्र युक्तियुक्तो भवति । एतैर्यो धर्म इति विज्ञातस्तस्य यः स्थानं स दण्डस्य युज्यते योग्यो भवतीति वा । किं कारिणः सर्व उत कतिचिदित्येतदुत्तरयतीतीरयति ॥ सर्व इति । कारिणः पापकारिणः सर्वे क्रमानुरोधेन य इयतः पातकस्यैतावती शिक्षेति तदानुकूल्येन दण्डमर्हन्ति कस्यापि न तेष्ववशेष इति भावः । सर्वे कारिणः शुभकारिणः क्रमानुरोधे सति न दण्डमर्हन्ति वेदबोधितप्रकारेण कर्मकरणेन तच्छिक्षादक्षा वयमिति भाव इति वा ॥ ४३ ॥

चट्टी – इदानीं दण्डस्य स्थानमाह ॥ एतैरिति । यस्मादेतैः साक्षिभिर्न धर्मो यस्य सोऽधर्मो पुरुषो, विज्ञातो विज्ञापितस्तस्मात्स दण्डस्य स्थानमित्येतद्युज्यत इत्यर्थः । दण्ड्याः किं कारिणः सर्वे आहो स्वित्कतिचिन्नृणामित्यस्योत्तरमाहुः ॥ सर्व इति । कारिणो जीवाः सर्वेऽपि क्रमानुरोधेन । रौरवोऽथ महांश्चैव वन्हिर्वैतरणी तथा । कुंभीपाक इति प्रोक्तान्यनित्यनरकाणि तु । एतानि क्रमशो गत्वैवारोहोऽथावरोहणमिति भारतोक्तक्रमानुसारेण दण्डमर्हन्तीत्यर्थः ॥ ४३ ॥

संभवन्ति ह्यभद्राणि विपरीतानि चानघाः ।
कारणं गुणसङ्गोऽस्ति देहवान्न ह्यकर्मकृत् ॥ ४४ ॥

सत्यधर्म – ननु विदुषामविदुषां च दृष्टश्रुताभ्यामैहिके सुखदुःखफले कुतः कर्मणि प्रवृत्तिरामुष्मिकसुखैकफले कर्मण्येव न कुतः प्रवृत्तिरित्यत आहुरित्याह ॥ सम्भवंतीति । अभद्राणि सांसारिक्यां दशायां क्लेशदानि विपरीतान्यत्रैव सुखप्रदानि कर्माणि सम्भवन्ति । प्रथमतो धर्मप्रस्तावाद्विपरीतानीति प्राक् प्रयोज्यम् । तथाऽपि तदभद्राचाराणां बहुत्वादग्रे ग्रहणम् । अतस्त्वितरज्ज्यायो लिङ्गाच्च । असुरा बहुला इत्यादेः । अभ्यर्हितत्वात्तज्ज्ञानेन तत्प्रतियोगिनो ज्ञानं सुलभं प्रस्तुताप्रस्तुतश्चेति । भद्राणीति पाठस्तु भद्रतर इति ज्ञेयम् । सम्भवतीत्येतन्मात्रेण कथं समाधिरभूदित्यतस्तत्र निमित्तमाहुरित्याह ॥ कारणमिति । गुणसङ्गः सत्त्वादिगुणसम्बन्धः सोऽस्ति यतस्ततः सम्भवन्ति विना कर्मावस्थानं न स्थूलशरीरिण इत्याहुः । देहवानिति मतुपा चैतत्प्राप्तिमद्देहहेयतामाहुः । भूमनिन्देत्यादेः । अकर्मकृत्कर्मासम्पादको न ह्यस्तीत्यन्वयः । आचतुर्दशमाद्वर्षात्कर्माणि नियमेन तु । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः । न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृदित्यादिप्रसिद्धोऽयमर्थोऽत्रैवोक्तव्याप्तिबलेन चेति हिराह । अनघास्तत्रापि न कर्म स्वतन्त्रमित्यप्याहुः ॥ गुणसङ्ग इति । गुणसङ्गः श्रीहरिः कारणमिति ज्ञानमस्ति यस्य स एव देहवान्प्रशस्तशरीरः । अकर्मकृन्न हि चेदपि कर्मकृच्चेदपि तस्य यान्यनुष्ठितान्यभद्राणि कर्माणि विपरीतानि भद्राणि सम्भवन्तीति वा । हिना धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत । पापं भवति धर्मोऽपि यो न भक्तैः कृतो हर इत्यादिप्रसिद्धिं द्योतयति । अकर्मकृन्न अकर्मकृदिव कृतानामपि तेषामबन्धकत्वादिति भावः । चक्रं न वृत्तमित्यादिवन्नञ इवार्थकतेति वा । गुणसङ्गो नह्यस्ति तस्य देहवतो विपरीतानि भद्राणि अभद्राणि सम्भवन्ति मा तूक्ता पुरस्तात् ॥ ४४ ॥

चट्टी – ननु केषाञ्चित्पुण्यकर्तॄणामपि सद्भावात्कथं सर्वेऽपि दण्ड्या इत्युच्यत इत्यत आह ॥ संभवन्तीति । हि यस्मात्सर्वेषामपि कारिणामभद्राणि न तद्विपरीतानि भद्राणि च संभवन्ति तस्मादिति पूर्वेणान्वयः । संभवेऽपि किं कारणमत्राह ॥ गुणसङ्ग इति । त्रिगुणसंबन्ध एव कारणमिति भावः । गुणसंगनिमित्तकं कर्म कारणमित्यत्र प्रमाणमाह ॥ देहवानिति । गुणसंबन्धदेहवान् । अकर्मकृन्नास्तीत्येतद्धि प्रमाणप्रसिद्धमित्यर्थः ॥ तदुक्तम् ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरिति ॥ ४४ ॥

येन यावान्यथा धर्मो ह्यधर्मो वा समीहितः ।
स एव तत्फलं भुंक्ते यथा तावदमुत्र वै ॥ ४५ ॥

सत्यधर्म – कृताभ्यां सुकृतदुष्कृताभ्यां पारत्रिकं फलमस्यैवेत्यालपन्तीत्यालपति ॥ येनेति । येन देहिना यावान्स्वयोग्यतायोग्यो यथा धर्मोऽधर्मो वा समीहितोऽनुष्ठितः पृथक् पृथगन्वयः । स एव तत्फलमेव भुङ्क्त एवेति वैवान्वयः । तथा तत्कर्मानुकूल्येनामुत्र परत्र । कर्ता शास्त्रार्थवत्त्वात् । स पात्रं बन्धमोक्षयोरित्यादिकं स्मारयति वैकारः । स एव धर्म इत्यावर्तते । भगवान्भुङ्क्ते भोजयति । तर्हि कर्मणः फलमेकरूपं चेदयं जीवस्तत्पात्रं तत्रापि शुभफलाभावात्तस्य वैय्यर्थ्यं वा किमस्ति तस्य पात्रत्वमित्यत आहुरित्यप्याह धर्मो भगवांस्तत्फलं मुख्यामुख्यादिन्यायेन मुख्यं शुभं भुङ्क्त इति वै । गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । आत्मान्तरात्मेति हरिरेक एव द्विधा स्थितः । निविष्टो हृदये नित्यं रसं पिबति कर्मजमित्यादिसूत्रागमादिप्रख्यातिं ख्यापयति ॥ ४५ ॥

चट्टी – कथंस्विद्ध्रियते दण्ड इत्यस्योत्तरमाहुः ॥ येनेति । समीहितः कृतः । अमुत्र परलोके धर्मो वेति दृष्टान्तः । धर्मानुसारेण सुखवान् । अधर्मानुसारेण दण्ड इत्यर्थः ॥ ४५ ॥

यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ।
भूतेषु गुणवैचित्र्यात्तथाऽन्यत्रानुमीयते ॥ ४६ ॥

सत्यधर्म – महामतीनामेत एवमेते एवमिति भवतु ज्ञानं अतथाभूतानां तज्ज्ञानं दुःशकमित्यत उपायोक्त्याऽऽप्याययन्तीत्युपपादयति ॥ यथेति । हे देवप्रवरा इह संसारे भूतेषु प्राणिषु गुणवैचित्र्यात्त्रैविध्यं गुणत्रयप्रयोजकं फलमुपलभ्यते । दुःखी सुखी सुखदुःखवानिति त्रिविधमुपलभ्यते प्रत्यक्षादिना विषयीक्रियते । तथाऽमुत्र पुनर्जन्मनि परत्रानुमीयते । अयं परत्र महासुखपात्रमत्र तथाभूतत्वादागामिकगुर्वादिबोधिततथात्ववत्पुरुषान्तरवदित्यनुमानेन निश्चेतुं शक्यते ॥ ४६ ॥

चट्टी – न केवलं सूर्यादीनामेव धर्मादिविषयकं ज्ञानम् । किन्तु लौकिकानामप्यानुमानिकं तदस्तीति सिंहावलोकन्यायेनाहुः ॥ यथेहेति । हे देवप्रवरा यथेह जन्मनि भूतेषु प्राणिषु सत्त्वादिगुणानां वैचित्र्यात्सात्विकादिकर्मत्रैविध्यं दृश्यते । तथाऽन्यत्र जन्मान्तरेऽपीत्यनुमीयते । शरीरत्वावच्छिन्न-शरीरस्य गुणजन्यत्वनियमात् । गुणसंगस्य कर्मकारणत्वादित्यर्थः ॥ ४६ ॥

वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ।
एवं जन्मानयोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥

सत्यधर्म – स्थूलदृश्वनामप्याश्वासनप्रकारमाहुरित्याह ॥ वर्तमान इति । वर्तमानकालो वसन्तादिः । अन्ययोर्भूतभविष्यतोः स्वकालयोः । गुणाभिज्ञापको गुणानां फलपुष्पादीनामेवं तदेति यथाऽभिज्ञा-पकोऽनुमापकः । एवं एतज्जन्माद्यतनम् । अनयोरतीतानागतसम्भूत्योर्धर्माधर्मनिदर्शनं धर्मश्च श्रेयश्चाधर्मोऽश्रेयश्च तौ निदर्शयतीति तत्तथा ॥ ४७ ॥

चट्टी – उक्तमेव सदृष्टान्तं विवृणोति ॥ वर्तमान इति । वर्तमानो वसन्तादिकालः । अन्ययोर्भूतभाविनोर्वसन्तयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथा । एवमेतज्जन्मान्ययोर्भूतभाविनोर्जन्मनोर्धर्माधर्मादि दर्शयतीति धर्माधर्मनिदर्शनमित्यर्थः ॥ ४७ ॥

मनसैव पुरे देवः पूर्वरूपं विपश्यति ।
अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥

सत्यधर्म – सूर्योऽग्निरित्यादिप्रतिपादितसाक्षिमध्ये कांश्चित्सव्यापारानीरयित्वा तत्प्रत्यक्षोपजीव्यत्वान्न प्रतिक्षेपमर्हतीत्यनुमानमाहुरित्याह ॥ मनसैवेति । पुरे शरीरे । पुरं देहमणतीति गीताभाष्योक्तेः । तत्र सन्निहितः सन् देवः क्रीडन् तत्र निमित्तं भगवानिति । ऐश्वर्यादिवैराग्यान्तभगवान् अत्रापि निमित्तमज इति । सर्वदोषाणां जननानुरोधात्तदभावादेव तदभाव इति भगवत्त्वम् । ततश्चानश्नन्नन्योऽभिचाकशीतीत्यादेः क्रीडनं सम्भवति । नारायणः पूर्वरूपं मनसा करणेनाप्तमिति शेषः । जीवस्य पश्यति । तथा अपूर्वसमस्तमपि पदं रूपं इतिशब्दानुशासनमित्यत्र शब्दशब्दवदनुवर्तितमपूर्वपदेनान्वेति । अपूर्वरूपमेष्यद्विपश्यति । एवकारेणानन्यनिघ्नतां दर्शनस्य दर्शयति विशब्देन वा । मन एव मनुष्याणां कारणं बन्धमोक्षयोरित्यादेः । अजो जीवोऽपि । अजो ह्येको जुषमाण इत्यादेः । मनसाऽनुमीमांसते पूर्वम् । अपूर्वमनन्तरं मनसेश्वरानुगृहीतेन पश्यति । एतेन स्वयमित्युक्तो जीवो मनश्च साक्षित्वेनोक्ते इति ज्ञेयम् । अजो ब्रह्मा मनसाऽऽलोचनेनैव पश्यतीति च । उपलक्षणया सर्वतत्त्वेशादिसुरसङ्ग्रह इति ज्ञेयम् । ईदेवो लक्ष्मीनारायणः । अनेन लक्ष्मीरपि मनसैव स्वेच्छयैवेति बृहद्भाष्योक्तेरनालोचनेनैव पश्यतीतीशादन्यत्रानालोचने सर्वविषयकं लक्ष्मीज्ञानम् । आलोचने सर्वविषयं ब्रह्मज्ञानमित्याद्युक्तेः । भगवान् भगोऽर्कः सोऽस्यास्ति जनकतयेति भवति भगवान्यमो देवोऽस्माकं पुरे संयमिन्यामुर्वरितं सर्वं पूर्ववत् । अनेन धर्मेत्युक्तः साक्षी कटाक्षीकृत इति ज्ञेयम् । भगवान्भगः स्वार्थे मतुप् । सूर्यश्च गतेरर्थवत्त्वमिति यथा । अजशब्देन व्याख्यातोऽनिलः । यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथेत्यादेः ॥ ४८ ॥

चट्टी – धर्मराजस्तु मनसैव सर्वं पश्यतीत्याहुः ॥ मनसैवेति । पुरे संयमिन्यां स्थित एव देवो यमो जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं मनसा प्रत्यक्षेणैव पश्यति । अनु अनन्तरमपूर्वं मीमांसते यदस्यानुरूपं तद्विचारयति । तत्राधिकदृष्टान्तमाहुः ॥ भगवानिति । यथाऽन्तर्यामितया पुरे देहे वर्तमान एव सर्वं पश्यति । भगवानजः श्रीहरिस्तथेत्यर्थः ॥ ४८ ॥

यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ।
न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥

सत्यधर्म – यर्हि जीवः पूर्वापरं जानीयात्तर्हि जातोऽत्र तत्र जनिष्ये तत्र मृतोऽत्र मरिष्यामीति कुतो न जानातीत्यतो हर्यनुग्रहात्केचन तथाऽन्येषां प्रकृतिबन्धध्वंसाभावेन च ज्ञानानुदय इति वदन्तीति वदति ।। यथेति । यथाऽज्ञो मूढो व्यक्तं पुरः स्थितमेवोपास्ते तथा ज्ञो जीवः । ज्ञोऽत एवेति यथा । तमसा युक्तस्तमोगुणसहितोऽव्यक्तं प्रकृतिं हि यत उपास्ते ततो नष्टजन्मस्मृतिस्ततश्च पूर्वमपरं च न वेद । यथा नष्टजन्मस्मृतिरेतज्जन्मानुभूतमपि न प्रभूतं स्मर्तुं शक्तिमांस्तथा पूर्वमपरं च न वेदेति वा । जानन्तमपि जनमनेनैव बोधयतीति बोधयति ।। यथेति । तमसा कार्योन्मुखेनायुक्तो ज्ञोऽव्यक्तं सूक्ष्मतरं ब्रह्मैव । तदव्यक्तमाह हीत्यादेः । वेदपूर्वं वेदवेदितप्रकारपूर्वकं यथोपास्ते तथाऽपरमन्यद्वेदानुदितं नोपास्ते स नष्टजन्मस्मृतिः । नष्टमिति भावे क्तः । नष्टं च नष्टिर्मृतिश्च जन्म च तयोः स्मृतिश्च यस्य स इति ।। ४९ ।।

चट्टी – जीवस्त्वीश्वरेणोपस्थापितं वर्तमानमेव देहं पश्यति न पूर्वमपरं चेत्याहुः ।। यथेति । अज्ञो जीवस्तु व्यक्तमेव प्राचीनकर्मणाऽभिव्यक्तमेव देहमुपास्ते जानाति पूर्वमपरं वा न वेद । अत्र हेतुः । नष्टेति । नष्टा वर्तमानजन्मनां स्मृतिः तत्कारणसंस्कारो यस्य स तथा । तत्र दृष्टान्तः ।। तमसेति । यथा तमसांऽधकारेण युक्तः पुरुषो व्यक्तमेव त्वचा स्पृष्टमेवोपास्ते न तु पूर्वं पुरस्ताद्वर्तमानम् । अपरं पश्चाद्वर्तमानं च पदार्थं तथेत्यर्थः ।। यद्वा ।। तमसा निद्रया युक्तो यथा स्वप्नेऽभिव्यक्तमेव वासनामयपदार्थजातमेवोपास्ते न तु स्वप्नात्प्रागुत्तरजाग्रत्पदार्थजातं तथेत्यर्थः ।। ४९ ।।

पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाऽथ पञ्चभिः ।
एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ।। ५० ।।

सत्यधर्म – सांसारिक्यां दशायां देहवान्कर्म करोत्येवेत्युक्तम् । तत्र तत्कारणादिकं पञ्चभिः प्रपञ्चयतीति प्रतिपादयति ।। पञ्चभिरिति । पञ्चभिः करादिकर्मेन्द्रियैः स्वार्थान्स्वनिवर्त्यान्विषयान् शिल्पजल्पनविसर्पणविसर्गानन्दादीन्कुरुते । पञ्चभिः श्रोत्रादिभिः पञ्च शब्दादीन्वेद । स्वयमेकः षोडशेन मनसा सह सप्तदशःत्रीन्सुखं दुःखं मिश्रं चेति तत्तद्गुणव्यक्तान्विषयानश्नुते भुङ्क्ते । सत्त्वं सुखे सञ्जयतीत्याद्यात् । अत्र लेखनीयविशेषस्तु नित्योपलब्धिसूत्रसंसारं तथा मतान्तराणि चोदाहृत्य सविस्तरं महाभारततात्पर्यनिर्णयटीकायां लिखितोऽस्माभिर्विलोकनीयोऽत्र विस्तरदरत उपरतः ।।५०।।

चट्टी – एवंभूतस्य जीवस्य च प्रसंगात्संसारं प्रपञ्चयति पञ्चभिः श्लोकैः । स्वयमेको जीवो यैः पञ्चभिर्वागादिकर्मेन्द्रियैः । स्वार्थांस्तद्विषयानभिवादनशिल्पगतिविसर्गानन्दाख्यान् कुरुते । यैश्च पञ्चभिः श्रोत्रादिज्ञानेन्द्रियैः पञ्चशब्दादीन्वेद । येन च षोडशेन मनसा त्रीन् जाग्रत्स्वप्नसुषुप्ति-कालीनान्विषयानश्नुतेऽनुभवति ।। ५० ।।

तदेतच्छोडशकलं लिङ्गं शक्तित्रयं महत् ।
धत्तेऽनु संसृतिं पुंसि हर्षशोकभयार्तिदम् ॥ ५१ ॥

सत्यधर्म – एतन्मूलमालपन्ति । तदेतदिति । षोडशकलमिन्द्रियदशकं भूतपञ्चकं मनश्चेति षोडशकलम् । शक्तित्रयं सत्त्वादिगुणत्रिकशक्तियुक्तम् । ताश्च प्रकाशक्रियावरणरूपाश्च तिस्रो महद्विघमानवेदज्ञानाद्यनुज्जृम्भकतया लिङ्गं शरीरम् । पुंसीत्यजामिलप्रस्तावात्पुंपुरस्करणम् । जीव-सामान्ये अनु कर्मानुकूल्येन हर्षशोकभयार्तिदं सत्संसृतिं धत्ते । पुंसि परमपुरुषेऽनु अनुकूले सति न धत्ते । स्वतो लिङ्गस्यानुल्लङ्घनीयत्वादिति भावः । फलप्रदो वासुदेवोऽखिलस्येत्यादेः ॥ ५१ ॥

चट्टी – तदेतदुक्तम् । षोडशकलम् । ता एताः । पूर्वोक्ताः एकादशेन्द्रियाणि भूतपञ्चकं चेति षोडशकला यस्मिंस्तत् । तदेतच्छोडशकलम् । शक्तित्रयं शक्तीनां प्रकाशक्रियावरणलक्षणानां त्रयं यस्मिंस्तथा सत्त्वादिगुणशक्तियुक्तमित्यर्थः । अत एव हर्षादिप्रदं महत् । ईश्वरप्रसादमन्तरेणानिवृत्तं लिङ्गं लिङ्गशरीरं पुंसि पुरुषेऽनु स्वकर्मानुसारेण संसृतिं धत्ते ददासीति श्लोकद्वयस्यान्वयः ॥ ५१ ॥

देह्यज्ञोऽजितषड्वर्गोऽनिच्छन् कर्माणि कार्यते ।
कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति ॥ ५२ ॥

सत्यधर्म – अजितषड्वर्गोऽजितोऽस्वाधीनीकृतः षड्वर्गः षड्ढोतारमित्यादेः षडिन्द्रियवर्गो येन सः । यद्वा कामाद्यरिषड्वर्गः षड्वर्गः । अज्ञो देही तदभिमानवाननिच्छन् इन्द्रियैः कामादिभिर्वा कर्माणि कार्यते । तथाभूतत्वान्न ज्ञानमेतस्येत्यत्र दृष्टान्तमाचष्टे ॥ कोशकार इति । कोशकारः कृमिरिव यथा कर्मणा स्वव्याप्येन कोशेन कर्मणा स्वकर्तृकसर्जनकर्मीभूतेनेति वा । य आत्मानमासाद्य मुह्यति कोश एव निलीनः स्वनाशानाशौ न जानाति यथा तथाऽज्ञ इत्यर्थः ॥ ५२ ॥

चट्टी – लिङ्गशरीरं कर्मानुसारेण संसृतिं धत्त इत्युक्तम् । तर्हि कर्माकरणेन संसृतिनिवृत्तिः स्यादत आह ॥ देहीति । देही लिङ्गशरीरवान् ॥ जीवोऽज्ञो भगवजज्ज्ञानशून्यः । अत एवाजितषड्वर्गोऽवशी-कृतषडिन्द्रियवर्गः । अजितकामादिषड्वर्गोऽवा । अनिच्छन्नपि प्रकृतिगुणैर्बलात्कर्माणि कार्यते । ततश्च यथा कोशकारः कीटविशेषः । स्वकर्मणा निर्मितकोशेनात्मानमाच्छाद्य मुह्यति निर्गमोपायं न जानाति । तथा देह्यपि कर्मणाऽऽत्मानमाच्छाद्य मुह्यतीत्यर्थः ॥ ५२ ॥

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५३ ॥

सत्यधर्म – मुह्यतीति निस्सन्देहमुक्तं तत्र मानं किमित्यतः सकारणसर्वस्वं कर्मैव तदीयमित्यभिसन्धिमन्तः स्वस्वेतरानुभूतप्रमेयप्रतिपादकं प्राहुः प्रमाणमिति प्राह ।। न हीति । कश्चित्कोऽपि जातु कदाचिदप्यकर्मकृन्न तिष्ठति । ईक्षतेर्नाशब्दमितिवदर्थातिशयो द्वौ नञौ न्यायेन ज्ञेयः । कर्म विना न स्थितिरिति भावः । प्रकृतिजैर्गुणैरवशो विष्णुवशः परतन्त्र इति वा सर्वो जनः कर्म कार्यते । यथोक्तं गीताभाष्ये । प्रकृतिजन्मकृतानामनन्तकर्मणां भावादित्यादि । ननु सर्वजननिष्ठप्रयोज्यकर्तृत्वस्य तिङाऽनभिहितत्वात्कर्तृकरणयोस्तृतीयेति तृतीयायां सत्यां सर्वेणेति भाव्यं सर्व इति कथमिति चेत् । उच्यते । हृक्रोरन्यतरस्यामिति सूत्रेणाण्यन्तयोर्हरतिकरोत्योर्यः कर्ता स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवतीति कर्मसंज्ञाविधानेन कर्मसंज्ञया कर्तृसंज्ञाया बाधात्कर्तृकरणयोरिति तृतीयाप्राप्तिर्नास्ति । कर्मत्वस्य कार्यत इति तिङोक्तत्वेन कर्मणि द्वितीयेति द्वितीयाप्राप्त्यभावात्सर्व इति प्रथमा युक्तेति दुर्घटार्थप्रबोधिनी ।। ५३ ।।

चट्टी – कर्माणि कार्यत इत्यत्रानुभवं प्रमाणयन्ति ।। न हीति । गुणैर्गुणकार्यरागादिभिः स्वाभाविकैः पूर्वजन्मसंस्कारोद्भूतैरित्यर्थः ।। ५३ ।।

लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ।
यथा योनि यथा बीजं स्वभावेन बलीयसा ।। ५४ ।।

सत्यधर्म – जननमरणे न देहिनः किन्तु देहस्यैवाभिमानादेव जातो गत इति व्यवहार औपचारिक इतीरयन्तीतीरयति ।। लब्ध्वेति । अनिमित्तमुपादानकारणमव्यक्तं प्रकृतिं तत्सम्बद्धशरीरमिति वाऽव्यक्तं दुर्ज्ञेयं दैवं वा निमित्तं लब्ध्वेति तदनन्तरं व्यक्ताव्यक्तं स्थूलास्थूलकलेवरम् । व्यक्तेन सहितं च तदव्यक्तं चेति विग्रहः । विप्रतिषिद्धं चेत्येकवद्भावो वा । भवति जीवस्येति शेषः । यद्यप्यव्यक्तसम्बन्धानन्तरं व्यक्तसम्बन्ध इति तदेव पूर्वं निरूप्यं तथाऽपि व्यक्तेनानुमेयं तदिति पूर्वमुक्तिः । व्यक्ताव्यक्तं जन्ममरणं भवतीति वा । देहस्य सर्वथा नाशादनाशाच्चेतनस्य च । अजो नित्य इत्यादेः । यथायोनि स्वजातिमनतिहाय यथाबीजं कर्मादिकारणानुसारेण यथायोनि मातृसमं यथाबीजं पितृसदृशं योनिर्भगवान्यथायोनि तदिच्छानुसारेणेति यावत् । योनिश्च हि गीयत इति हि गीयते यथाबीजं भगवदिच्छानुसारमिति । व्यञ्जनाद्बीजमुच्यत इति बीजं तदहमर्जुनेत्यादेः । किं निमित्तीकृत्य भगवदादिः कार्यत इत्यत उक्तं स्वभावेन योग्यतयेति । स्वभावाख्या योग्यता या हटाख्येत्यादेः स्वभावस्यानपायाद्बलीयसेत्युक्तिः । न शक्य सोऽन्यथाकर्तुमित्यादेः ।। ५४ ।।

चट्टी – कर्मवशेन च तदनुरूपो देहो भवतीत्याहुः ।। लब्ध्वेति । अव्यक्तं निमित्तमदृष्टाख्यनिमित्तकारणम् । लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च शरीरं भवति । यथायोनि मातृसदृशं

यथाबीजं पितृसदृशं च । स्वभावो वासना शुक्लशोणितयोरेकरूपत्वेऽपि कर्मवासनया माता-पितृदेहसदृशो भवति । शरीराकृतिभेदास्तु भूपते कर्मयोनय इति विष्णुपुराणोक्तेरिति भावः ॥ ५४ ॥

एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः ।
आसीत्स एव न चिरादीशसङ्गाद्विलीयते ॥ ५५ ॥

सत्यधर्म – एतत्संसृतिमोचनं कथं कथयतेत्यनुयुक्ता इव युक्तं वदन्तीति वदति ॥ एष इति । प्रकृतिसङ्गेन पुरुषस्य विपर्ययः संसार आसीत् । स एवेशसङ्गात्स्वोत्तमानारभ्य सर्वोत्तमपर्यन्तं सेवालक्षणात् । न चिरात्क्षिप्रं विलीयते समूलं लयमभ्युपैति ॥ ५५ ॥

चट्टी – संसारक्रममुपसंहरन्मुक्तिप्रकारमाह ॥ एष इति । विपर्ययः संसार ईशसंगात्परमेश्वरभजनात् ॥ ५५ ॥

अयं च श्रुतसम्पन्नः शीलवृत्तगुणालयः ।
धृतव्रतो मृदुर्दान्तः सत्यवान्मन्त्रविच्छुचिः ॥ ५६ ॥

सत्यधर्म – अजानता कृता चेद्दुष्कतिर्निष्कृतिर्भवतु तस्य अयं तु नयविदपि कापथं गतवानिति नैतस्य पातकमपहाय यातनां लोपमुपैतीत्यालपितुं प्राचीनाचीर्णं सन्तमाचारं गर्हितमेतद्व्यनुष्ठितं च स्पष्टयन्त्यध्यायशेषेणेति स्पष्टयति ॥ अयमिति । श्रुतं श्रवणम् । क्तो भावे । अयं श्रुतसम्पत् न इति छेदः । श्रवणसम्पद्वान् नः सम्मत इति शेष इति वा । शीलं वृत्तं तदितरे गुणाश्च तदालयः सत्यवान्भूतहितवाक्समेतः सत्यं ब्रह्म तद्वांस्तदुपासक इति वा । सत्यं ब्रह्मेतीशावास्यभाष्योक्तेः । मन्त्रविद्वेदज्ञः ॥ ५६ ॥

चट्टी – तदेवं सामान्यतो धर्मविनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्मं प्रपञ्चयन्तो दंड्यत्वमाहुः ॥ अयं हीति । यावदध्यायसमाप्ति । तत्र द्वाभ्यां तत्पूर्ववृत्तानुवादोऽन्यायातिरेकप्रदर्शनार्थः । शीलं सुस्वभावः । वृत्तं सदाचारो गुणादयः क्षमादयः । तेषामाश्रयः । दान्तो निगृहीतेन्द्रियो मन्त्रविद्वेदज्ञः ॥ ५६ ॥

गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतिः ।
सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥

एकदाऽसौ वनं यातः पितृसन्देशकृद्द्विजः ।
आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥

सत्यधर्म – शुश्रूषुः सेवकः । शैषिकी च षष्ठी । यद्यपि श्रु श्रवण इति श्रवणार्थकोऽयं धातुस्तथाऽप्यखण्डोऽयमन्यः शब्दः । शुश्रूषा श्रवणेच्छायां परिचर्या कथितेति विश्वः ॥ आवृत्तोऽगारं प्रत्यागन्तुं निवर्तमानः ॥ ५७, ५८ ॥

चट्टी – ततो वनात् । आवृत्तः परावृत्तः ॥ ५७, ५८ ॥

ददर्श कामिनं कञ्चिच्छूद्रं सह भुजिष्यया ।
पीत्वा तु मधु मैरेयं मदघूर्णितनेत्रया ॥ ५९ ॥

सत्यधर्म – भुजिष्यया दास्या मधु मैरेयं मैरेयाख्यमद्यविशेषः स्वयं मधु पीत्वा मैरेयं पीत्वा मदाघूर्णितनेत्रयोपेतमिति वाऽन्वयः ॥ ५९ ॥

चट्टी – भुजिष्यया भोगस्त्रिया दास्या । मैरेयं मधुपैष्टिं पीत्वा मदेन घूर्णिते भ्रान्ते नेत्रे यस्याः । ॥ ५९ ॥

मत्तया विश्लथन्नीव्या ह्युपेतं निरपत्रपम् ।
क्रीडन्तमनुगायन्तं हसन्तमनयाऽन्तिके ॥ ६० ॥

सत्यधर्म – विश्लथन्ती नीवीवसनग्रन्थिर्यस्याः सा तया । नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवासस इति विश्वः । अनयाऽस्याः । अनया सहान्तिके लोकानां समीप इति वा ॥ ६० ॥

चट्टी – विशेषेण श्लथन्ती नीवी यस्या विवस्त्रया सह ॥ ६० ॥

दृष्ट्वा तां कामलिप्तेन बाहुना परिरम्भिताम् ।
जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥

सत्यधर्म – कामं लिप्तेन गन्धादिनेति । कामलिप्तेन स्मरपरवशेन । बाहुना बाहुभ्याम् । हृच्छयो मदनः । सहसा हाससहिता या तां दृष्ट्वेत्यन्वयः ॥ ६१ ॥

चट्टी – कामलिप्तेन कामवशीकृतेन शूद्रेण कामोद्दीपितेन । तदंगरागेण हरिद्रादिना लिप्तेन बाहुनेति वा । हृच्छयः कामः ॥ ६१ ॥

स्तम्भयन्नात्मनाऽऽत्मानं यावत्सत्त्वं यथाश्रुतम् ।
न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥

सत्यधर्म – यावत्सत्त्वं यावद्बलम् । यथा श्रुतं न शूद्र्यां पातयेद्रेत इत्यागमश्रवणमनुसृत्य । मदनवेपितं तत्कम्पितम् ॥ ६२ ॥

चट्टी – सत्त्वं धैर्यं श्रुतं ज्ञानम् । तद्बलेन स्तंभयन्नपि मदनकंपितं मनः । समाधातुं न शक्तोऽभूत् ॥ ॥ ६२ ॥

तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ।
तामेव मनसा ध्यायन् स्वधर्माद्विरराम ह ॥ ६३ ॥

सत्यधर्म – तन्निमित्तो भुजिष्यादर्शनजनितः स्मरव्याजः कन्दर्पापदेशो ग्रहस्तेन ग्रस्तः । विचेतनो विगता चेतना संविद्यस्मात्सः । चेतना संविदि प्रोक्तेति विश्वः । ज्ञानहीनः ॥ ६३ ॥

चट्टी – तद्दर्शनमेव निमित्तम् यस्य स्मरव्याजस्य ग्रहस्य । तेन ग्रस्तः । अत एव विचेतनो नष्टशास्त्रजन्यज्ञानः ॥ ६३ ॥

तामेव तोषयामास पित्र्येणार्थेन यावता ।
ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥

सत्यधर्म – पित्र्येण पित्रार्जितेन पितुर्यच्चेति यत् । ग्राम्यैः सुरतधर्मैः । ग्राम्यमश्लीलरतबन्दयोरिति विश्वः । यथा काम्यैः काम्यन्त इति कामा विषयास्तैः करणैः सा दासी प्रसीदेत भवेत्प्रसन्ना तथा तां तोषयामासेत्यन्वयः ॥ ६४ ॥

चट्टी – यावता समग्रेण ग्राम्यैः कामभोगसाधनैः । काम्यन्त इति कामा विषयास्तैः ॥ ६४ ॥

विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम् ।
विससर्जाचिरात्पापः स्वैरिण्यापाङ्गविद्धधीः ॥ ६५ ॥

सत्यधर्म – अप्रौढामनवाप्तत्रिंशत्संवत्सरां षोडशशरदमारभ्य त्रिंशत्संवत्सरपर्यन्तं तरुणीति तरुणीम् । बाला स्यात् षोडशाब्दात्तदुपरि तरुणी त्रिंशतं यावदूर्ध्वं प्रौढा स्यात्पञ्चपञ्चाशदित्यादेः । प्रादूहोढोढ्येषैष्येष्विति वृद्धिः । महति कुले वंशे लम्भितां लब्धोत्पत्तिम् । यद्यपि यभ्रं लभिति लभिरनिट्केषु गणितस्तथाऽपि रुधादित्वादिटि रभेरशब्लिटोर्लभेश्चेत्युक्तेर्नुमिच लम्भितामिति भवति । स्वैरिण्या स्वच्छन्दप्रवृत्त्या । स्वादीरेरिणोरिति वृद्धिः । स्वैरः स्वच्छन्दमन्दयोरिति विश्वः । कुलटा स्वैरिणीति जयः । कर्त्र्याऽपाङ्गनेत्रान्तेन करणेन । यद्वा पदमेकम् । स्वैरिण्या यत् आह ईषदपाङ्गोऽन्तेऽप्यन्तभागस्तेन । अपाङ्गनेत्रान्ते तिलकेऽपि चेति विश्वः ॥ ६५ ॥

चट्टी – अप्रौढां बालाम् । लंभितां परिणीताम् ॥ ६५ ॥

इतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम् ।
बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधीरयम् ॥ ६६ ॥

सत्यधर्म – अन्यायत एव न्यायत इति विभ्रम्य तदाचारविचारेण न्यायत इति कल्पस्याजल्प्यत्वात् । अयं मन्दधीः कुटुम्बं बभार पुपोष । मन्दधीरयं मन्दो धीरयो बुद्धिवेगो यथा भवति तथा बभारेति वा । ॥ ६६ ॥

चट्टी – कुटुंबिन्या दास्याः । कुटुम्बं बन्धुपुत्रादिकम् ॥ ६६ ॥

यदसौ शास्त्रमुल्लङ्घ्य स्वैरचार्यार्यगर्हितः ।
आवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥

सत्यधर्म – अघायोरित्यृग्भाष्येऽघार्थयोरिति । अघायुरिन्द्रियारामो मोघं पार्थ स जीवतीति गीताभाष्ये च । अघनिमित्तमेवायुर्यस्य सोऽघायुरिति व्याख्यानादघायुशब्दार्थो ज्ञेयः । मलात्कृपणाद्दास्यादेर्निमित्तादशुचिरशुचिरनलविकलोऽग्निहोत्रादिहीन इति यावत् । कृपणेऽमल इति विश्वः॥६७॥

चट्टी – स्वैरचारी निरंकुशत्वेन वर्तमानः । अघायुरघनिमित्तमायुर्यस्य स तथा । मलमेतदीयमन्नादिकमत्तीति मलात् । स्नानदानादिरहित एवान्नमत्तीति वा । अस्नात्वाशीमलं भुंक्त इत्युक्तेः॥६७॥

तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम् ।
नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन शुध्यति ॥ ६८ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

सत्यधर्म – एनमिदमोऽन्वादेशे द्वितीया टौ स्वेन इतीदमः पातकितोपपादनकार्यं प्रत्युपात्तस्य तस्य पुनः संयमिनीनयनदण्डनादिरूपकार्यान्तरं प्रत्युपादानादेनादेशः । अकृतनिर्वेशमननुष्ठितप्रायश्चित्तम् । यत्र नीतः दण्डेन यमदूतकृतेन ॥ ६८ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां षष्ठे प्रथमोऽध्यायः ॥ ६-१ ॥

चट्टी – अकृतनिर्वेशमकृतप्रायश्चित्तमस्यैव हितार्थं नेष्याम इत्याहुः ॥ यत्रेति । यत्र नीतो यमभटकृतताडनेन शुद्धो भवतीत्यर्थः ॥ ६८ ॥ इति श्रीभागवतटिप्पण्यां चट्टीत्याख्यायां प्रथमोऽध्यायः ॥ ६-१ ॥

॥ अथ द्वितीयोऽध्यायः ॥

बादरायणिरुवाच

एतत्ते भगवद्दूता यमदूताभिभाषितम् ।
उपधार्याथ तान्राजन् प्रत्याहुर्नयकोविदाः ॥ १ ॥

सत्यधर्म – ॥ हरिः ॐ ॥ हरिनामस्मरणमशेषदोषविनाशकमिति तदाचरन्नयं कथमकृतनिर्वेश इति तांस्ते वदन्तीति बादरायणिर्वदतीति वदति ॥ बादरायणिरिति । नयकोविदा नयेऽयं धर्मो नायमिति नीतौ कुशलाः । नयो न्याये, सन्सुधीः कोविदो बुध इत्युभयतश्चामरः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥

भक्तिपूर्वं भगवतो नामसंकीर्तनं सताम् ।
सर्वपापहृदित्येतदध्यायेऽस्मिन्निरूप्यते ।

उपधार्य श्रुत्वा । नयकोविदा न्यायनिपुणाः ॥ १ ॥

विष्णुदूता ऊचुः

अहो कष्टं धर्मदृशामधर्मः स्पृशते सताम् (सभाम्) ।
यत्रादण्ड्येष्वपापेषु दण्डो यैर्ध्रियते वृथा ॥ २ ॥

सत्यधर्म – सामान्यार्थान्तरन्यासमुखेनापहसन्तस्तच्चित्तं चित्रयन्तीति पद्यपञ्चकेन प्रपञ्चयति ॥ अहो इति । धर्मदृशां सतां तत्त्वेनाभिमानवतां स्पृशते स्पृशति ॥ २ ॥

चट्टी – धर्मदृशां सभामधर्मः स्पृशति । तदेव विवृणोति ॥ यत्रेति । यत्र सभायां यैर्धर्मदृग्भिः । तेषां सतां सभायाम् ॥ २ ॥

प्रजानां पितरो ये च शास्तारः साधवः समाः ।
यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ॥ ३ ॥

सत्यधर्म – समाः सर्वाः प्रजा इत्यन्वयः । समाः सदसद्योग्यतयेति वा । पितरः प्रजा इत्यनेन पिता विक्रयते सुतं, न स्त्री स्वातन्त्र्यमर्हतीत्याद्युक्तार्थं ध्वनयन्ति ॥ ३ ॥

चट्टी – पितरः पितृवत्पालकाः । शास्तारोऽनुशिक्षका वैषम्यमदंड्यदंडनम् ॥ ३ ॥

यद्यदाचरति श्रेयानितरस्तत्तदीहते ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥

सत्यधर्म – नापराधः परतन्त्राणां युष्माकं यौष्माकीणो देव एवादावेतदादिज्ञानहीन इति मन्यामह इत्यन्यापदेशेनोपदिशन्तीत्युपदिशति ॥ यद्यदिति । यद्यदिति तत्तदिति च पदमेकम् । सः श्रेयान् यत्प्रमाणं कुरुते इतरस्तदधमः । ननु पूर्वं वीप्सया सार्वत्रिकी श्रेयःसामान्यानुसारिणी इतर-सामान्यचर्येति व्याप्तिर्ज्ञातुं सुशकाऽत्र तु स यल्लोकस्तदित्येकयदादिना कथं व्याप्तिज्ञप्तिरिति चेन्न । एतेनापि सामान्यमुखी व्याप्तिर्ग्रहीतुं शक्या । यथोक्तं सुधायाम् । यत्तच्छब्दयोरननुगम इति चेदित्यारभ्य सामान्यपरीक्षायां वक्ष्याम इत्यन्तेन तत्रापि नरत्वादिकमित्यादिव्याख्यावसरे एवं संयोगादिवदित्यारभ्य ननु गतत्वेऽपि गुणकर्मवदित्यन्तेन च । ईश्वरवादे गदाधरभट्टोऽपि यन्नाम्ना स्थापयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतमिति वाक्यमुदाहृत्यैकपदादेरपि सार्वत्रिकव्यवहारौपयिकता सम्भवतीति व्याचख्यौ । न च कथं ते ते पिबन्त्वित्यृग्भाष्ये ते षष्ठयन्तोऽनुदात्तः स्यादुदात्तो बहुवाचकः । आवृतस्त्वित्याद्युक्तिरिति वाच्यम् । तत्र ये ये इति पूर्वं द्विरभिधानादुत्तरत्रापि त इत्येकस्यावृत्तिः कर्तव्येत्येवाभिप्रेतं न तु यदादेरेकस्या व्याप्तिगमकत्वाभिप्रायेणेति भावसम्भवात् । यो यो यां यां तनुं भक्तः श्रद्धयार्चितु-मिच्छति । तस्यतस्याचलां श्रद्धां तामेवेत्यादिस्थले द्वितीयतच्छब्दमध्याहृत्य वाऽन्वयः कर्तव्य इति न व्यभिचार इत्यर्थः ॥ ४ ॥

चट्टी – एतत्प्रवर्तितमधर्ममन्योऽपि करिष्यतीति महत्कष्टमभूदित्याहुः ॥ यद्यदिति । श्रेयान् श्रेष्ठः ॥ यद्वा ॥ किं प्रमाणं कुरुते प्रमाणत्वेन ज्ञापयति ॥ ४ ॥

यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः ।
स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥

सत्यधर्म – स्वयं परोपदेशमन्तरेण ॥ ५ ॥

चट्टी – विश्वासघातादपि महत्कष्टमभूदित्याहुः ॥ यस्येति द्वाभ्याम् । लोकः परोपदेशमन्तरेण स्वयं पशुर्यथा तथा धर्ममधर्मं वा न वेद हि यस्मात्तस्मादेव । यस्यांके शिर आधाय निर्वृतः निश्चिन्तः सन्स्वपिति । सर्वभारं तत्र निदधातीति यावत् ॥ ५ ॥

स कथं ह्यर्पितात्मानं कृतमैत्रमचेतनम् ।
विस्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥

सत्यधर्म – यो भूतानां विश्रम्भणीयो विश्वासः । कृत्यानां कर्तरि वेति षष्ठी । अर्पितात्मानमर्पितः स्वनिवेशित आत्मा मनो यस्य तम् । कृतमैत्रं कृतमित्रत्वानुसन्धानमचेतनं चेतना संविदि प्रोक्तेति विश्वादसंविदं द्रोग्धुमर्हति स सघृणो द्रवद्धृदयः कथं न कथमपीत्यर्थः । तं द्रोग्धुमित्यृते चतुर्थ्या निर्देशो हि यं प्रतीत्युक्ताभिप्रायेण नानाभिप्रेरणेनेति मन्तव्यम् ॥ ६ ॥

चट्टी – सः सघृणो दयालुरत एव भूतानां प्राणिनां विस्रंभणीयः । अचेतनं ज्ञानशून्यम् । अत एव कृतं मैत्रं विश्वासो येन स तथा । तम् । अत एवार्पित आत्मा मनो येन स तथा तम् । कथं दोग्ध्रुमर्हतीत्यन्वयः ॥ ६ ॥

अयं हि कृतनिर्वेशो जन्मकोट्यहंसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥

सत्यधर्म – प्रकृतमनुसरन्तोऽकृतनिर्वेश इति सहसाऽभिहितमसहमाना भाषन्ते ॥ अयमिति । जन्मकोट्यंहसान्ताभिरभ्यार्चितपातकानामपि नेदं कियदंह इत्यलक्षतां कटाक्षयन्ति किमस्मच्चित्रगुप्ता-विदितश्चित्रं गुप्तः स इत्यतो ब्रुवन्ति ॥ यदिति । स्वस्त्ययनं स्वस्ति तस्यायनं क्षेमधाम स्वस्तेरयनमिति वा । स्वस्त्याशीः क्षेमपुण्ययोरिति विश्वः । स्वस्तिरस्तु स्वस्तये इत्यादेरव्ययमनव्ययं चेति केचित् । सर्वत्रापि विभक्तिप्रतिरूपकमव्ययमेवेत्यपरे । हिः प्रमाणप्रसिद्धिद्योतकः ॥ ७ ॥

चट्टी – नन्वस्य पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः ॥ अयं हीति । अयमजामिलो यद्यस्माद्विवशो भक्तिपरवशः सन्नभक्तोदाहृतं नैव फलदातृ भविष्यतीत्युक्तेः । श्रीहरेर्नाम व्याजहारोच्चारितवान् तस्मादित्यन्वयः । निर्वेशो निष्कृतिः । न केवलं प्रायश्चित्तमात्रं श्रीहरेर्नाम । अपि तु स्वस्त्ययनं मोक्षसाधनमपि । आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत यं बिभेति स्वयंभुव इत्युक्तेः ॥ ७ ॥

एतेनैव ह्यघो नोऽस्य कृतं स्यादघनिष्कृतम् ।
यदा नारायण इति जगाद चतुरक्षरम् ॥ ८ ॥

सत्यधर्म – उक्तं दृढीकर्तुं किञ्चिदनूद्य नाम किं किंरूपं तदिति न ज्ञायत इत्यतस्तद्विवृण्वन्ति ॥ एतेनेति । मघोन इतिवदघोनः । यदा नारायणेति चतुरक्षरं नाम जगाद तदैतेन व्याहरणेनैव । यत् आ इति छेदः । आ ईषच्चतुरक्षरं नाम जगाद । चतुरक्षरमितीदं मुद्रणेनाक्षराधिक्यं व्यवच्छिनत्ति । नारायणेत्यभिहित इति वक्ष्यति च । कथं जगाद । नारायणायेति पठित्वा नारायण आय आगच्छ इत्येवं विक्रोशरूपेण पुत्राव्हानेनेति व्याख्यानं न समञ्जसम् । ननु दूरे क्रीडनकासक्तं तथा प्लावितेन

स्वरेणेत्युक्तेर्दूराद्धूते चेति प्लुतत्वे प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावेन नारायणा इति भवितव्यमिति चेन्न। न च भवितव्यं प्लुतमात्रस्य वैकल्पिकत्वात्। तथा चोक्तमग्रीषत्प्रेषणे परस्य चेति सूत्रमहाभाष्ये सर्वप्लुतः साहसमनिच्छता विभाषा कर्तव्य इति। मनोरमायां च साहसं शास्त्रत्यागस्तदनिच्छता शास्त्रमनुरुन्धानेनापीत्यर्थ इति हरदत्तः। वैकल्पिकेष्वनुष्ठानक्लेशधर्माधिक्यफलकमप्यशक्तत्वाद-निच्छतेत्यर्थः इत्यपरे। एतेन द्वैपायनो विरहकातर आजुहाव पुत्रेतीति भागवतं व्याख्यातं प्लुतस्य वैकल्पिकत्वात्। किञ्चेह पुत्रशब्दस्य वाक्यत्वं नास्तीत्यपि सुवचम्। आख्यातप्राग्वर्तिनोऽप्यनु-करणसम्भवात्। अपि चास्तु प्लुतः। प्रकृतिभावस्तु वैकल्पिकत्वान्माऽस्तु। तथा च ईचाक्रवर्मणस्येति सूत्रे भाष्यम्। ईग्रहणेन नार्थो वशा इयं वशेयमिति प्लुतप्रकृतिभावः सर्वोऽपि चाक्रवर्मणस्य मते नास्तीति भावः। अपि चेह प्रकृतिभावो दुर्लभ एव। अप्लुतवदुपस्थिते उपस्थितं नामावैदिक इति शब्दस्तस्मिन्परतः प्लुतोऽप्लुतवत्स्यादिति तस्यार्थः। एवं च चतुर्धा निर्वाहे स्पष्ट आर्षप्रयोग इति श्रीधरोक्तिर्नादर्तव्येति। किञ्चायेति नायतेर्न वा याते रूपम्। प्रथमे परस्मैपदता न स्यात्। चक्षिङो ङित्करणं तु नवीनमतेऽन्यथासिद्धं सन्न ज्ञापकमनुदात्ते त्वप्रयुक्तात्मनेपदानित्यतायाम्। न च प्राचीनमतेन तत्सम्भव इति वाच्यम्। चतुरक्षरत्वदूषणपिशाची तु नाधुना दूरनिहितेति। द्वितीये लोटः सेर्ह्यपिच्चेति हिरवर्जनीयेति। किञ्च यातेर्ह्रस्वदीर्घतावेदकसमयसमदर्शनात्तच्छान्दसताश्रयणं त्वगतिका गतिः। न वा प्रश्लिष्टस्येधातो रूपं दत्तोत्तरत्वात्। प्रथमस्कन्धे स्वकृतसमाधिरत्राप्यनुसन्धेय इति न चाशङ्का न चोत्तरमिति परितुष्यन्परो नास्मद्विनेयैः श्रीधरोक्तं नादर्तव्यमित्यनेन सभाजित इत्यलम्। ननु प्रकृतिभावाभावे भवितव्यं सन्धिनेति चेत्सत्यम्। विवक्षाभावात्तदभावोपपत्तेः ॥ ८ ॥

चट्टी – ननु कर्म षाड्गुण्यकरं श्रीहरेर्नामेति युक्तम्। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तमुच्यतमिति स्कान्दोक्तेः। स्वातन्त्र्येण त्वघनिवर्तकं कथं स्यादित्यत्राहुः ॥ एतेनैवेति। यत् आ इति पदच्छेदः। एषोऽजामिलो नारायणेति चतुरक्षरं यन्नाम जगाद एतेनैव प्रधानेन भगवन्नामोच्चरणेनैव न तु कस्यचिदंगेन। सामीप्ये च प्रधाने च एवशब्दोऽवधारणे इति वचनात्। अघनिष्कृतं हि यस्मात्तस्मादस्याजामिलस्याघः पापं नास्त्येवेत्यन्वयः। सकारान्तनपुंसकोऽयमघशब्दः। कंसशत्रुरघःशत्रुरिति प्रयोगात् ॥ यद्वा ॥ अघमस्यास्तीत्यघः पापी एषोऽजामिलाख्यो ना पुरुषो यन्नाम जगाद। एतेनैवास्याघनिष्कृतं कृतमभूदित्यर्थः। मर्ताऽमर्त्यस्य ते भूरिति नाममनामहे विप्रासो जातवेदसः। आस्य जानन्तो नाम चिद्विवक्तना। अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः। पुमान्विमुच्यते सद्यः सिंहग्रस्तैर्मृगैरिवेत्यादिश्रुतिस्मृतीनां भगवन्माहात्म्यपराणां स्मरणार्थमाकारः। अप्रगृह्य स्मृतौ वाक्ये इत्यमरोक्तेः ॥ ८ ॥

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ ९ ॥

सत्यधर्म – न केवलमियत एवासीद्दासीसम्बन्धनिबन्धनस्य तथाऽन्यायतो धनं बन्द्यक्षकितवैश्चौर्यैरिति च शंसितस्य स्तेयादेरेनसोऽनेन कृतस्य निष्कृतिरिति किन्तु पातकसर्वस्वगर्वकषं नाम नारायणस्येति तान्यमदूतान्प्रति महापातकानि नामनिर्देशपूर्वकं सङ्गृह्येममर्थमवधारयितुमेव सुनिष्कृतमिति जगदुः ॥ स्तेन इति । स्तेनश्चोरः । सुरापो मद्यपः । मित्रध्रुक् क्लेशस्थानं निरूप्य यो रक्षां करोति स मित्रम् । निरूप्यापि क्लेशं यः परिरक्षति स मित्रमिति गीताभाष्योक्तेः । मित्रेभ्यो द्रुह्यतीति स तथा । ब्रह्महा ब्राह्मणहन्ता । ब्रह्मभ्रूणेत्यादिना क्विप् । गुरुतल्पगो गुरुतरुणीरन्ता । तल्पमट्टकलत्रयोरिति विश्वः । स्त्रीराजपितृगोहन्ता स्त्रीहन्तेत्यादिरन्वयो ज्ञेयः । ये च पातकिनोऽपरे इत्यत्रत्यमपरपदं पातकिपदेन न स्वरसान्वयं सत्पातकपदेनान्वेति । अपरपातकवन्त इत्यर्थोऽपरे नीचा इति वा ॥ ९ ॥

चट्टी – ननु कामकृतानां बहूनां महापातकानां सहस्रश आवर्तितानां द्वादशाब्दादिकोटिप्रायश्चित्तैरप्यनिवर्त्यानां कथमिदमेकमेव प्रायश्चित्तं स्यादित्यत्राहुः ॥ स्तेन इति द्वाभ्याम् । स्तेनश्चोरः परद्रव्यापहरणं चौर्याद्वाऽथ बलेन वा । स्तेयस्तस्यानाचरणः स स्तेयोऽधर्मसाधनमित्युक्तेः ॥ ९ ॥

सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥

सत्यधर्म – विविच्य वचने वृथा समयगमनमिति मत्वा समुदितमुदितवन्त इत्याह ॥ सर्वेषामप्यघवतामिति । नारायणानुपूर्व्युच्चार एवैतदादिपापापनुत्तिदो नान्यनामोच्चार इति विचारभ्रमभ्रंशार्थं नामसामान्यताऽपि तथाविधमप्यभिदधते ॥ नामेति । यतो नाम्नः सङ्कीर्तनात्तद्विषया भगवद्गुणविषया मतिर्धीर्व्यज्यत इति शेषः । एतेनैतेन कृतं भगवन्नामस्मरणं भक्तिव्यक्तीकरणमुखेन सुखेन ज्ञाननिदानं सन्मुक्तिहेतुर्भवतीति सूचयन्ति । यथोक्तं विष्णुरहस्ये । सत्यमेवोदितं ब्रह्मन् लोहं याति सुवर्णताम् । केनाप्युपायेनाथाऽपि खर्परं हेम नो भवेत् । अजामिलादयोऽन्येऽपि प्रायो ये पापकर्मिणः । स्वभावेनैव ते भक्ताः प्रारब्धाद्दुष्टचेतसः । अन्तर्भक्त्यैव तन्नाम जगृहुर्नान्यथा क्वचित् । द्वेषिणोऽपि यदा मुक्तिस्तर्हि भक्तिं करोति कः । रमाब्रह्मादयः किन्नु मूढास्तद्भक्तिकारिण इत्यादि ॥ १० ॥

चट्टी – सुनिष्कृतं श्रेष्ठप्रायश्चित्तमिदमेव । अत्र हेतुर्नामव्याहरणान्मतिस्तद्विषया विष्णुविषया भवतीत्यर्थः ॥ यद्वा ॥ यतो नामव्याहरणात् । तद्विषया नामोच्चारकपुरुषविषया । मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवतीत्यर्थः ॥ १० ॥

न निष्कृतैरुदितैर्ब्रह्मवादिभि-
स्तथा विशुद्ध्यत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतै-
स्तदुत्तमश्लोकगुणोपलम्भकम् ॥ ११ ॥

सत्यधर्म – तर्हि गर्हितं किमर्हितैर्मन्वादिभिः करणीयत्वेनोक्तं तपआदिकमित्यतोऽन्ततो गत्वा तदनुकीर्तनमार्तिहरमिति कर्तव्यमेवेति ततः श्रेय इदमित्यवदन्नित्याह ॥ नेति । यथा न तथा विशुद्ध्यतीत्यन्वयः । तन्नामकीर्तनमुत्तमश्लोकगुणोपलम्भकमुत्तमश्लोकस्य ब्रह्मादिस्तुत्यस्य महाकीर्तेरिति वा गुणानान्दादींस्तत्तत्प्रतिबिम्बगुणबिम्बभूतानुपलम्भयति प्रापयतीति तत्तथा । नामपदैरुदाहृतैरिति बहुवचनेन नैकवारमेकस्य नाम्न आम्नानं फलोपलम्भकमिति भायात्तदपवदितुं तदुत्तमश्लोकगुणोपलम्भकमित्युक्तमिति मन्तव्यम् । नामात्मकैः पदैर्नारायणाद्यैः ॥ ११ ॥

चट्टी – भगवन्नामोच्चारणस्य प्रायश्चित्तश्रेष्ठत्वमुपपादयन्ति ॥ नेति द्वाभ्याम् । उदाहृतै रुच्चारितैर्हरेर्नामपदैर्यथा विशुद्ध्यति तथा ब्रह्मवादिभिर्वेदवादिभिर्मन्वादिभिरुदितैर्व्रतादिभिर्निष्कृतैः । अघवान्न शुद्ध्यतीत्यन्वयः । वाक्यत्वसंपादकनमामीत्यादिक्रियासंबन्धमनपेक्ष्यापि सर्वपापनिवर्तकत्वेनाहो भगवन्नाममाहात्म्यमित्यभिप्रेत्य नामभिरिति वक्तव्ये नामपदैरित्युक्तम् । इतोऽपि नामोच्चारणं श्रेष्ठमित्याहुः ॥ तदिति । तत् नामोच्चारणम् । उत्तमश्लोकः कीर्तिर्यस्य हरेर्गुणानां ज्ञानानन्दादीनाम् । उपलंभकं स्मारकं भवति । न कृच्छ्रचान्द्रायणादिवत् पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ॥ ११ ॥

नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ।
तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभावनः ॥ १२ ॥

सत्यधर्म – तप आद्युपरचनेऽपि न चित्तमुत्तम्भयितुं शक्यं ततो न शक्यं दुर्मार्गात्सन्मार्गं प्रति प्रत्यावर्तयितुमिति न केवलमर्थसिद्धिः प्रत्युतानर्थस्ततो भक्तियुक्तं हरिस्मरणं तच्छरणमिति स्फोरयन्तीति वदति ॥ नैकान्तिकमिति । निष्कृते कृतेऽपि प्रायश्चित्ते चीर्णेऽपि मनः किञ्चित्सङ्केतसङ्कोचं विषयवाञ्छया पुनरुत्कोचमसत्पथेऽसंश्चासौ पन्थाश्चासत्पथः । ऋक्पूरब्धूः पथामानक्ष इत्यकारप्रत्ययः । अथवाऽसंश्चासौ पथश्चासत्पथः । वाटः पथश्च पन्थाश्चेत्यमरः । धावति चेत् तत् प्रायश्चित्तम् । ऐकान्तिकमव्यभिचारि न । तत्तस्मात्कर्मनिर्हारमैकान्तिकमभीप्सतां काङ्क्षतां हरेर्भगवतो गुणानुवादः सत्त्वभावनोऽन्तःकरणनिर्मलीकरणकल्पः खलु साधनेयत्ताऽत्र पर्याप्तेत्यर्थः । खलु माने प्रकीर्तितमिति विश्वः । निश्चयार्थं वीप्सा वा खल्वर्थः । वीप्सायां खल्विति तत्रैवोक्तेः । सत्त्वं चित्ते

प्राणिष्विति विश्वः। स तु गुणानुवादस्तु । अभावनो भावयत्युत्पादयतीति भावनो न भावनोऽभावनोऽपुनर्भवद इति यावदिति वा। न विद्यते भावनमुत्पादनं यस्मादिति वा ॥ १२ ॥

चट्टी – यस्मिन्निष्कृते कृतेऽपि असत्पथे शास्त्रविरुद्धमार्गे मनो धावति चेन्निष्कृतं नैवान्तकं नात्यन्तशोधकम्। तत्तस्मात्कर्मनिर्हारं कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवादो गुणानां नामप्रवृत्तिनिमित्तभूतधर्माणामनुसन्धानपूर्वकं वाद उच्चारणमेव प्रायश्चित्तं यतोऽतोऽसौ सत्त्वभावनश्चित्तशोधकः खलु प्रसिद्ध इत्यर्थः ॥ १२ ॥

अथैनं माऽपनयत कृताशेषाघनिष्कृतम् ।
यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥

सत्यधर्म – फलितं विलम्बमनवलम्बमाना आलपन्तीति लपन्ति ॥ अथेति । अस्मद्दर्शन-समनन्तरमेनमजामिलं माऽपनयतामार्गेण न नयत। तत्र हेतुमाहुरित्याह ॥ कृताशेषाघनिष्कृतमिति। कृतमशेषाणामघानां निष्कृतं प्रायश्चित्तं येन स तम्। किंरूपं तदित्यतः शृङ्गिग्राहकतया दर्शयन्तीति दर्शयति ॥ यदसौ भगवन्नामेति। समग्रहीद् गृहीतवान्। समा रमारमणभक्तियुक्तता द्योत्यते। समा चतुरक्षरीमध्ये न न्यूनतां द्योतयन्तीति वा। एतेनैतेनानुष्ठितदुरितस्य नामैकदेशेनाप्युच्चारितेनालमयं तु नाम समग्रं जग्राहेति जग्रासैनः सर्वमिति सूचितमिति मन्तव्यम्। यथा नाथनाम तथाऽन्यदपि गृहीतवानितीतररतिरिति कथं तदेकतानमानसता सत एतस्येत्यतो नेत्यप्यनेनैवाहुरित्याह ॥ अथेति अथ श्रीनारायणनामव्याहरणानन्तरं कृताशेषाघनिष्कृतमेनमजामिलं यद्यतो मा मानं ज्ञानं सम्पद्याऽऽप प्रापैव। म्रियमाणोऽसौभगवत् सौभगं सौभाग्यं मङ्गलमिति यावत्। तदस्यास्तीति सौभगवत्तन्न भवतीत्यसौभगवन्नाम दास्यादेरसौभगवतां दास्यादीनां नामेति समस्तं वा । समग्रहीत्। विरक्तिभक्तिसम्पत्तिं समा सूचयति। तथाऽग्रहीन्निगृहीतवान्। ततश्च न नयतेति काकुः। न नयतेति तात्पर्यम्। मेत्यनुवृत्तिर्वा ॥ १३ ॥

चट्टी – ननु भगवन्नामोच्चारणमात्रं न पापनिवर्तकम्। किन्तु भक्तिपूर्वकमेव। न चाजामिलस्य तदस्तीत्याशङ्कां परिहरति ॥ अथेति। यद्यस्मादसौ अजामिलो म्रियमाणः सन् भगवन्नाम समग्रहीत् भक्तिपूर्वकमुच्चारितवान्। अथ तस्मात्कृतम् अशेषाणामघानां निष्कृतं येन स तथा। तमेनमपमार्गेण नरकमार्गेण मा नयतेत्यन्वयः। म्रियमाण इत्यनेनान्तकाले हरिस्मृतिर्जन्मनः परमो लाभ इति सूचयति ॥ तदुक्तम् ॥ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामन्ते नारायणस्मृतिरिति ॥ १३ ॥

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥

तात्पर्यम् – नारायणोऽयमित्यन्यहेलनविषयत्वेनोक्तमघहरम् । 'सर्वथाऽघहरं विष्णोर्नाम तद्भक्तिपूर्वकम् । अभक्त्योदाहृतं नैव फलदातृ भविष्यति । नामस्वामितया तस्य स्मरणं जायते यतः । भक्तस्यातो नामकीर्तिः सङ्केतादावपीरिता । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योरमुच्यते' ति नारदीये ॥ १४ ॥

सत्यधर्म – म्रियमाणो हरेर्नामेति श्लोके तोकनामैवाभक्तिपूर्वकं गृहीतं सन्मुक्तिदमिति भ्रमं तथा साङ्केत्यं पारिहास्यमिति श्लोके गोविन्दनिन्दां कुर्वतोऽपि कुर्वतो नामोच्चारणमुच्चलोकगमनमुच्यत इति भ्रममत्रापेक्षितपूरणेनान्वयं दर्शयन्वारयंश्चाचार्यवर्यस्तत्तात्पर्यार्थमाह ॥ नारायण इति । नारायणोऽय-मित्यन्यहेलनविषयत्वेनोक्तमघहरं स्वपुत्रं छात्रं वा नारायणादिनामानमनभ्यस्यन्तं नारायणोऽयं जाल्मो न पठतीत्यन्यहेलनविषयत्वेनोच्चरितं दुरितहरमित्यर्थः । एतेन मूले हेलनशब्दस्तद्विषयत्वार्थः । तथा चान्यहेलनविषयत्वेनोक्तमित्यर्थः सम्पन्नः । अन्यथा सर्वभक्तानां भागवतं नाम नटयतां कूटधियामयं हरिर्न चान्यथेत्यादिव्यवहरतां साल्वादीनामपि कैवल्यं स्यात् । न च स्यात्किमिति वाच्यम् । निन्दया गोविन्दस्य भगवत्यत्यर्थमनर्थ इत्यर्थप्रतिपादकानामागमानां विप्लवापत्तेः । स्ववादसंवादकमानमानन्द-तीर्थमुनिराह ॥ सर्वथेति । तद्भक्तिपूर्वकं विष्णुभक्तिपूर्वकं विष्णोर्नाम सर्वथा सङ्केतादितः । उदाहृतं फलदात्रित्युभयत्र सम्बध्यते । उदाहृतमशेषाघहरं न केवलं दुरितहरमपि तु फलदातृ मोक्षप्रापकं च । अनेन मानेन स्ववचनभाष्येऽप्यघहरमित्यत्र फलदात्रिति शेषः कार्य इति सूचितं भवति । मुखतो वचनं च प्रस्तुतमनुसृत्येति नाचातुर्याचार्याणामिति मन्तव्यम् । हरिरतस्यावशतो मुखतो निस्सृतं नाम पूर्वतनसत्कर्मवशतोऽघहरमिव फलदातृ च भविष्यतीति भावः । व्यतिरेकमुखेनापि भक्तेरावश्य-कतामभिधत्ते ॥ अभक्त्येति । भक्त्यभावेन न विद्यते भक्तिर्यस्यां सा तया धियेति प्रजयेति शेषो वा । अत्राप्यघहरमित्यन्वेति सङ्केतादिश्रीनिकेतनामग्रहणं किमनुबन्धेनाघहरमित्यत आह ॥ नामेति । तस्य हरेर्नाम स्वामितया तत्प्रवृत्तिनिमित्तपौष्कल्यसम्पन्नत्वेन तथाऽन्यदीयप्रवृत्तिनिमित्तोज्जृम्भकत्वेन स्वाम्यं तेन यतः स्मरणं भक्तस्य जायते ताः सङ्केतादावपि नामकीर्तिस्तत्कीर्तनमुदीरिताऽघहरत्वेनेति शेषः । नामकीर्तिरुत् दलद्वयात्मके मोक्षविषये ईरिता साधनत्वेनेति शेषः । उन्मोक्ष इति विश्वः । प्रकृते मानमाह ॥ अजामिलोऽपीति । भक्त्या स्मरणात् । अपिना लोकदृष्ट्या तदर्हतां सूचयति । मृत्योर्यमान्नरकादियातनाया वाऽमुच्यत मुक्तोऽभूत् । नन्वनेन कुमारनामैव गृहीतं विदितमाविपाल-गोपालं तत्कथं कथयत भक्तियुक्तहरिनामव्याहरणं कृतमित्यत आहुरित्याह ॥ साङ्केत्यमिति । साङ्केत्यं सङ्केतसम्बन्धि सङ्केतात्कृतमिति यावत् । एवं पारिहास्यम् । सङ्केतः पित्रादिकृतः परिहासे

प्राचीनाचार्याः स्मृतिपूर्वकं हर इति तत्स्मरणमिति ततो विशेषः । स्तोभं स्तोभो हि हरे मन्त इत्यादिगीतपूरकपदप्रक्षेपः सोऽस्त्यस्येत्यर्श आद्यच् । स्वाशयानाविर्भावपूर्वकं तच्छ्रोतृचित्तचौर्यफल-कस्ततोऽपि गरीयान् । हेलनमन्यविषयकमस्येति पूर्ववत् । तात्पर्यान्यविषयत्वेनेति प्रत्ययपरमिति मन्तव्यम् । सर्वमिदं नामग्रहणविशेषणम् । अथवा सुपां सुपो भवन्तीत्यादेस्तृतीयायाः प्रथमा । ततश्च साङ्केत्येनेत्यादिसिद्धिरिति दर्शयिषुर्वा तात्पर्येऽन्यविषयत्वेनेत्यूचे सुचेता इति ज्ञेयम् । अन्तरङ्ग-तरमभावतो वाऽधिकारिबाहुविध्येन वा सङ्केत्याद्युक्तिः । तत्रापि प्रस्तुतनारायणेति सङ्केतितसुतनाम-ग्रहणरूपत्वेन तत्पुरस्करणं युक्तमिति मन्तव्यम् । चतुरक्षरमित्याद्युक्तेर्नामनियमः किमिति नेत्याहुरित्याह ।। वैकुण्ठनामेति । विकुण्ठाया अपत्यं वैकुण्ठो हि विष्टरश्रवाः । शिवाद्यण् । विदुरित्यनेन बहुसंवादं ध्वनयामासुरिति ज्ञेयम् । एतत्तात्पर्येणैव पुत्रे नारायणाव्हये दूरे क्रीडनकासक्त-मित्याद्यभिप्रायः क्रोडीकृतप्राय इति बोध्यम् ।। १४ ।।

चट्टी – नन्वयं पुत्रनाम जग्राह । न तु भगवन्नामेति तत्राहुः ।। सांकेत्यमिति । सांकेत्यं पुत्रादौ कृतसंकेतनिमित्तकम् । पारिहास्यं, भगवत्यो वयं देवस्त्रीस्वभावेन यद्यपि । भगवानसि केन त्वं हेतुना यातु नाशनेत्याद्युक्तप्रकारेण परिहासेन कृतम् । स्तोभं गीताविलासपूर्णार्थं कृतम् । हेलनं नारायणशब्देन संकेतिते पुरुषेऽवज्ञया सर्वदोषाश्रयस्त्वं कथं नारायणोऽसीत्यादिरूपमपि वैकुंठनामग्रहणमशेषाघहरं विदुरित्यर्थः । सांकेत्यादिषु मध्ये केनापि प्रकारेणोच्चारितभगवन्नाम्नस्तन्मुख्यवाच्यभगवत्स्मारकत्वेन भगवद्भक्तिजनकत्वेन सर्वपापनिवर्तकत्वं युज्यत इति भावः ।। १४ ।।

पतितस्स्खलितो भग्नः सन्दष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ।। १५ ।।

सत्यधर्म – स्वोक्तं दृढीकर्तुं पुनः सप्तश्लोक्या प्रत्यपीपदन्निति प्रतिपादयति ।। पतित इति । पततेस्तनिपतिदरिद्रातिभ्य इति वैकल्पिकस्येटो यस्य विभाषेति निषेधात्तत्र चैकाजित्यनुवृत्तेर-प्राप्तेर्द्वितीयाश्रितातीतपतितेति निपातनाच्चुरादावदन्तेषु पठितस्य पतगतावित्यस्येटि रूपमिति वा मन्तव्यम् । सन्दष्टः सर्पादितः । तप्तो ज्वरादिना मध्येऽध्वसूर्यतापादिना वा । आहतस्ताडितो यः पुमानवशेन परिदृश्यमानबाह्यसाहित्यानधीनतया हरिरित्याह स यातनां नार्हतीति सम्बन्धः । हरिरित्यक्षरद्वयकनामग्रहणेनायं तु चतुरक्षरं नाम जग्राहेति यातनां नार्हतीति किं वक्तव्यमिति कैमुत्यं ध्वनयाञ्चक्रुरिति हृदयम् । पुमानित्यनेन वर्णाश्रमादिनियमाभावं लक्षयन्ति । पुमानित्युक्तेः पूर्वोक्ता गतिरनुसन्धेया ।। १५ ।।

चट्टी – नामव्याहरणं न ध्यानादिवदासनादिनियमसापेक्षमिति सुलभोपायः । स्मरणं सर्वदा योग्यं ध्यानोपासनमासन इत्यभिप्रेत्याहुः ।। पतित इति । प्रासादादिभ्यः सुपतितो मार्गे भग्नगात्रः संदष्टः

सर्पादिभिस्तप्तो ज्वरादिभिराहतो दण्डादिना । एतादृशः पुमान् । अवशेन भक्तिपारवश्येन हरिरित्याह । सः यातनां नार्हतीत्यर्थः । पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तम् ॥ १५ ॥

गुरूणां च लघूनां च गुरूणि च लघूनि च ।
प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

सत्यधर्म – ननु तर्हीयतैव सर्वपापापनोदे महतां पातकानां महान्ति लघीयसां लघीयांसीति विचार्य महर्षिभिराचार्यैरुदितानि । महान्तो ऋषयो द्रष्टारो येषां तैर्वेदादिभिरिति वा । उक्तानि प्रायश्चित्तानि वृथेत्यायातमित्यत एतैः पातकमात्रघातेऽप्यन्ततो गत्वा संसारकारणस्यान्तःकरणस्य कंसारिकरुणात एवातिसम्पादनीयोपायो नोपायान्तरेणेति सैव यतो हृदयं ब्रह्मेशा एवं समर्थेनाधिकारिणा कर्त्राऽङ्घ्रिसेवया करणेन पूयते हृदयमधर्मबीजं नेति वा कैश्चिच्छ्लोकैराहुरित्याह ॥ गुरूणामिति ॥१६॥

चट्टी – ननु पापतारतम्येन कृच्छ्रादितारतम्यवत् महतः पापस्य महदेव प्रायश्चित्तं युक्तम् । न त्वल्पनामग्रहणमात्रमिति तत्राहुः ॥ गुरूणामिति द्वाभ्याम् । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां लघूनीति तारतम्यं ज्ञात्वा मन्वादिषूक्तानि । अतस्तत्र न तथैव व्यवस्था । श्रीहरिनामस्तुतेरियं व्यवस्थोक्ता । मुच्यते सर्वपातकैरिति वचनात् । न चेदं वचनमपि विश्वसनीयम् । सुराबिन्दुमात्रपानस्य महापातकत्वाभिधायकवचनस्यापि तथात्वापातादिति भावः ॥ १६ ॥

तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः ।
नाधर्मबीजं हृदयं तदपीशाङ्घ्रिसेवया ॥ १७ ॥

सत्यधर्म – तैर्महर्षिभिरभिहितैरघानि पूयन्ते तेन तद्वन्तो लक्ष्यन्ते अघवन्तः पूयन्ते पूता भवन्तीत्यर्थः । अधर्मबीजं मुख्यमधर्मसाधनं मनः । पूयन्त इति पूयत इति विपरिणतं सदन्वेति । न पूयन्ते तर्हि तस्य कः प्रतीकार इत्यत आहुरित्याह ॥ तदपीति । ईशाङ्घ्रिसेवया स्मरणादिरूपिण्या । विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः । पापक्षयश्च भवति स्मरतां तमहर्निशमित्यादेः । तदपि तप आदिभिरपूतमपि पूयत इत्यन्वयः ॥ १७ ॥

चट्टी – किं च तैस्तपोदानादिभिस्तान्यघानि पूयन्ते नश्यन्ति अधर्माणां बीजमुत्पत्तिस्थानं हृदयं लिङ्गं मनो न शुद्ध्यति । तदपीशाङ्घ्रिसेवया कीर्तनादिलक्षणया शुद्ध्यतीत्यर्थः ॥ १७ ॥

धर्मो योऽयमुपन्यस्तः परमस्तु सनातनः ।
क्रियतेऽहरहः शुद्धिरात्मनो वाससो यथा ॥ १८ ॥

सत्यधर्म – ननु युष्मत्कपोलकल्पनमिदं न केऽपि लोका एवमवदन्नित्यत आहुः ।। धर्म इति । उपन्यस्तोऽस्माभिरिति शेषः । सनातनः परम्परागतत्वात् नादेन शब्देन सह वर्तत इति सनादन एव सनातन इति गीतातात्पर्योक्तदिशा निर्वचनत्वाद्दकारस्य तकारे सनातनो वेदवेदित इत्यर्थः । अहरहः सदा क्रियते चेदात्मनो मनसः शुद्धिर्भवतीति शेषः । यथा वाससो वसनस्य शुद्धिर्नीरक्षारादिनेति शेषः। क्रियते ह चेद्रहः शुद्धिरेकान्तिकी शुद्धिः सकृन्नाम गदाभृत इत्यादीनि नैकान्तशुद्धिः स्यात्कर्तुरित्यनुवचनं च लग्नानि भवन्तीति भगवन्नाममहामाहात्म्यलाभो भवत्येवं योजनायां इति ज्ञेयम् ।। १८ ।।

चट्टी – वैवश्येनापि सकृदनुष्ठित्तभगवन्नामकीर्तनादिना सर्वपापनिवृत्तिद्वारा मोक्षो भवतीत्येतदधिकारिविषयम् । शरीराद्वाचकाभ्यासो वाचकान्मानसो भवेत् । मानसाद्विवशान्मुच्येन्नान्यथा मुक्तिरिष्यत इति वचनात् । अजामिलस्य तदानीमेव मुक्त्यभावाच्च । अतो यावदधिकारपरिपाकं तावद्वृत्तिः कर्तव्येत्यभिप्रेत्याह ।। धर्म इति । यः कीर्तनादिलक्षणो धर्म उपन्यस्तोऽयं यदि पुरुषेणाहरहः क्रियेत तर्ह्यात्मनोऽन्तःकरणस्य शुद्धिर्भवति । तत्र दृष्टान्तः ।। वाससो यथेति । निर्णेजनेनेति शेषः ।। १८ ।।

नैकान्तशुद्धिः स्यात् कर्तुः क्रियया कर्तृता(तां) यतः ।
अकर्तुरात्मनस्तस्माद्भजेतानीहया हरिम् ।। १९ ।।

सत्यधर्म – क्रियया तप आदिकयैकान्तशुद्धिः संसृतिबीजभर्जने मनःशोधनं कर्तुर्जीवस्य न भवति । अकर्तुरक्लिष्टकारित्वात् । हरिरक्लिष्टकारित्वादकर्तेत्युच्यते बुधैरित्यादेः । अतत्फलभोक्तृत्वादकर्ता हरिः । अनश्नन्नित्यादेः । नासौ दुःखभुगुच्यत इत्यादिस्मृतेश्च । आत्मन आततत्वाच्च मातृत्वादात्मेत्यादेः । सकाशात्क्रियया करणेन यतः कर्तृता तस्मात्तं हरिं क्रियाकारयितारमनीहयाऽफलकामनया भजेत स्मरणादिरूपं भजनं कुर्यात् । यतः क्रियया पूर्वं कर्तुमारब्धया पुनः कर्तृता देहान्तरप्रापककर्मकर्तृता । अनेन कर्मपरम्परापराहतिरनयेति ध्वन्यते । अकर्तुरीषत्कर्तुः फलभोजनमात्रहेतुभूतपरतन्त्रकर्तृत्ववत आत्मनः क्रियया नैकान्तशुद्धिर्यतस्तस्मात् शिष्टं स्पष्टमिति वा । या क्रियेहैकान्तशुद्धिरेकान्ता मुख्येति यावत् शुद्धिर्यस्याः सा तथा न स्यात्तया क्रिययेति पूर्ववत्सर्वमन्वेतव्यम् । तस्मादनी प्राणी हरिं भजेतेति वा ।। १९ ।।

चट्टी – कीर्तनादिलक्षणभगवद्भजने इतिकर्तव्यतामाह ।। नेति । कर्तुर्जीवस्य क्रियया कर्मणा । एकान्तशुद्धिर्न स्यादित्यतस्तस्माद्धरिमनीहया फलानपेक्षया भजेतेत्यन्वयः । ननु हरिरेव कुतो भजनीय इत्यतः स्वतन्त्रत्वादित्याह । यतो न विद्यते कर्ता यस्य तस्यात्मनः परमात्मनः कर्तृतां स्वातन्त्र्यम् । कर्तृत्वं तु स्वतन्त्रत्वमित्युक्तेः । तस्माद्धरिमेव भजेतेत्यर्थः ।। १९ ।।

अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्तितमघं पुंसो दहत्येधो यथाऽनलः ॥ २० ॥

सत्यधर्म – अज्ञानादल्पज्ञानाद्भगवन्नामेदमेतत्स्मरणमेवारणमिति ज्ञानादित्यर्थः । ज्ञानान्मुख्यामुख्यनयेन निर्वचनलभ्यानन्याधीनार्थपौष्कल्यवत्त्वज्ञानात् । अज्ञानादिति छेदो वा । यदुत्तमश्लोकनामोद्गतं तमोऽज्ञानं यस्मात्स उच्यत उत्तमः । स श्लोको यशो यस्य तस्य नाम । एकशकारद्विशकारोच्चारणविशेषाविशेषविचारोऽस्माभिर्विरचितायां भाष्यदीपिकायुक्तिवात्यायां यद्वैतं न पश्यतीति बृहदारण्यकतत्त्वनिर्णयन्यायामृतमहाभाष्याद्युदाहरणेन कृतोऽनुसन्धेयः । तमोवाची तमशब्दो वा । तमं तु तमसा सार्धमिति द्विरूपकोशः । उदुत्कृष्टं तमो दुर्गात्मिका श्रीस्तया श्लोक्यत इति स तथा । तमो हि दुर्गेति श्रुतिगीता । तमो दुर्गा प्रकीर्तिता यतः स ग्लपयेत्सर्वमिति बृहदारण्यकभाष्योक्तेः । उत्तमौ श्लोकौ सुखज्ञाने यस्य स उत्तमश्लोकस्तस्य नामेति वा । शं लोकः श्लोकः परमानन्दं परमज्ञानं चेत्यर्थः। लुकृप्रकाश इति धातोरिति बृहद्भाष्योक्तेः । अघं पापम् । एकवचनेनेतराशक्यपरिहारमेतन्मात्रपरिहार्यं गात्रान्तरारम्भकं यद्दहने कैमुत्येनेतरपराकृतिस्तदघं धर्तव्यमिति सूचितं भवति । एधः काष्ठमनलोऽग्निः ॥ २० ॥

चट्टी – ननु तथाऽप्यजामिलेन भगवन्नाम सर्वपापप्रायश्चित्तमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः ॥ अज्ञानादिति । बालकेनाज्ञानात्प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वदित्यर्थः । भक्तिमता गृहीतमेव नामाघहरमिति ज्ञापनाय दृष्टान्ते एध इत्युक्तम् । अग्नेर्दाहकत्वसामर्थ्ये विद्यमानेऽपि स्वविषयं काष्टमेव दहति न त्वविषयं पाषाणम् । तथा भगवन्नामापि भक्तिमन्तमेव पुनाति न तु तद्रहितमिति भावः॥२०॥

यथाऽगदं वीर्य(तमं)युतं सूपयु(भु)क्तं यदृच्छया ।
अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः ॥ २१ ॥

सत्यधर्म – ननु नामानि सर्वाणि सर्वनामा सर्वकर्मेत्याद्याम्नायाम्नातत्वाद्धटपटाद्यभिधाऽपि भगवतोऽभिधैव तदुच्चारणं चास्ति सदातनतः फलं नोपलभ्यत उपलभ्यते च नारायणादिनामसङ्कीर्तने तु किं कृतोऽयं विशेष इति चेत्सत्यम् । तत्राधिकारिणो हि महान्तो ब्रह्मादय एव तेषां चोपलभ्यते तेषां फलमितर इतरत्रधिकारिण इति तेषामेव प्रस्तुततया नामपुरस्कारणं तच्च सामान्यतो ज्ञातं ज्ञातं च विशेषतः कलयत्येव स्वस्वानुगुणं फलमित्यनुरूपनिदर्शनेन दर्शयन्तीति दर्शयति ॥ यथेति । अगदम् औषधम् । भिषजौषधभैषज्यान्यगदोजायुरित्यपीत्यमरः । वीर्ययुतं स्वभावसामर्थ्योपेतं यदृच्छया हरीच्छयैव । यदृच्छा तु हरीच्छा स्यादित्यादेः । उपयुक्तं शरीरान्तः प्रविष्टमजानत एतद्रोगस्यैतदिति विशेषशेमुषीरहितस्यापि नरस्यात्मगुणमारोग्यादिकं कुर्यादेव । उदाहृतो मन्त्रः शब्दात्मा

सन्नप्यजानतोऽपि यदृच्छयोदाहृत आत्मगुणं श्रीश्रीनिवासप्रसादं रिपुपुरीहरणादिकं वा कुर्यादिति । तत्र यथा भगवत्सन्निधानविशेषमाहात्म्यं प्रयोजकमितीतरशब्दविलक्षणता तथा नामविशेष इति विशेषान्महामाहात्म्यं तस्येति तदुच्चारणमुच्चताहेतुरिति नाम सङ्कीर्तितमिति कीर्तितं युक्तमिति भावः ॥ २१ ॥

चट्टी – उक्तमर्थं दृष्टान्तान्तरेण समर्थयति ॥ यथेति । यथा वीर्यतममगदमौषधं यदृच्छया दैवेच्छयोपभुक्तं भक्षितं सत् आत्मगुणं स्वसामर्थ्यमजानतोऽपि पुरुषस्यात्मगुणमारोग्यलक्षणं कुर्यादेव । तथोदाहृत उच्चारितो हरिनामलक्षणमन्त्रोऽपि सकार्यं कुर्यादेवेत्यर्थः । पापनिवर्तनस्वभावमपि भगवन्नामज्ञानविशेषेण फलविशेषप्रदमिति ज्ञापनायौषधदृष्टान्तः ॥ तदुक्तम् ॥ औषधादिषु चैतस्माद्देवा एव वरप्रदाः । औषधादिस्थिता देवास्तेऽज्ञे दृष्टफलप्रदाः । ज्ञानिन्यदृष्टदाश्च स्युर्न दैवात्किञ्चिदिष्यते । यथाऽज्ञस्यापि राज्ञस्तु भोजनं क्षिप्रमिष्यते । न त्वविज्ञाय राजानं ग्रामप्राप्तिस्तथा भवेत् । एवं देवा दृष्टफलं दद्युरज्ञस्य चाल्पतः । किञ्चिदज्ञकृता दृष्टा तच्च नैवान्यथा भवेत् । अदृष्टाख्यं फलं यत्तु तज्ज्ञस्यैव न चान्यगमिति ॥ २१ ॥

पतिं वः पृच्छत भटा धर्मेऽस्मिन् यदि संशयः ।
स वेद परमं गुह्यं धर्मस्य भगवान् यमः ॥ २२ ॥

सत्यधर्म – स्वोदीरिते धर्मे श्रुतेऽपि किञ्चित्सङ्कुचितचेतसः प्रेतनाथदूतान्विश्वासजननाय तानाश्वासयामासुरेवमुपदेशेनेति शंसति ॥ पतिमिति । हे भटा यद्यस्मिन्नस्मदुक्ते धर्मे संशयस्तर्हि वः पतिं सर्वस्वाम्यं निरुपचरितं स्वस्वामिन एव नान्यस्येति भटा इत्यविशेषतोक्त्या तत्रापि व इत्येवोक्त्या किञ्चिदाधिपत्यं सम्मतीकृत्य प्रोचुरिति सूच्यते । भगवद्दूतगदितो धर्मो वा वेदति स्वामिनं यमं पृच्छत । यथा राजा तथा प्रजा इत्यादेस्तदुपदेशेनैवेयं दशाऽस्माकमिति तत्प्रश्नो विफल इति चेन्न स तथेत्याहुरित्याह ॥ स इति । स भगवान्यमो धर्मस्य परमं गुह्यमितरातिगोप्यस्वरूपं वेद जानात्यतो वः प्रश्नः फलवानिति फलितोऽर्थः । धर्मस्य धर्मं भगवतो वेद परमं वेद मुख्यार्थं गुह्यं साकल्येन ज्ञातुमशक्यत्वाद्गोप्यम् । वेदेत्येकदेशावृत्तिः । परमं बहुज्ञं बहुसम्पदं रमारमणं वेदेति वा ॥ २२ ॥

चट्टी – नास्मद्वाक्यमविश्वसनीयमित्याहुः ॥ पतिमिति ॥ २२ ॥

श्रीशुक उवाच
एवं ते सुविनिर्णीय धर्मं भागवतं नृप ।
तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २३ ॥

सत्यधर्म – एवं विवादानन्तरमनन्तदूताः किं चक्रुरिति परीक्षित्प्रश्नस्यावसरमददानः शुको वदतीति वदति ॥ श्रीशुक इति । नृपेत्यनेन राजस्वपि विबलीयस्सु बलीयसां राज्ञां वृत्तिरेतादृशीति त्वदनुभवारूढं प्रमेयमिदमिति ध्वनयति । तात्कालिकापमृत्योरमूमुचन्नायुषः शेषो गमनीय इति तं त्यक्त्वा कृत्वा भगवत्प्रवणं गता इति भावः ॥ २३ ॥

चट्टी – तं विप्रं मृत्योर्देहवियोगलक्षणात् । अमूमुचन् मोचयामासुरित्यन्वयः ॥ २३ ॥

इति प्रत्युदिता याम्या दूता याता(यात्वा)यमान्तिकम् ।
यमराज्ञे यथा सर्वमाचचख्युररिन्दम ॥ २४ ॥

सत्यधर्म – हरिपरिचरोदीरितस्य प्रत्युत्तरदाननिदानज्ञानहीना निर्निष्पादितपतिप्रतिभाषितार्थाः श्रितास्तमेव देशं गता वा विदेशं निदेशकारिणां किमस्माकमिति स्वेशं प्रत्येव गता इत्यतोऽननुमत्या प्रतिक्षिप्य पक्षद्वयं तृतीयं मन्वानाः क्षेमङ्करं तथा चक्रुरित्याह ॥ इतीति । प्रत्युदिताः प्रत्याख्याताः श्रीनाथदूतैः। इति पूर्वोदीरितरीत्या । यथा सर्वं स्वानुभूतसर्वार्थानुसारम् यमराज्ञे यमराजाय जानन्ति पूर्वराजान आदिराज्ञामिति प्रयोगात् टजनित्य इति बोध्यम् । आचचख्युराख्यातवन्तः । हे यमेति सम्बोध्य राज्ञ आचचख्युरिति वा । आ च चख्युरिति छेदः । व्यवहिताश्चेत्युक्तेराङः क्रियया योगो ~~बोध्यः । तथा चाचख्युश्चेत्यन्वयः । धर्मं प्रत्युद्दिश्योदितास्तन्नाममात्रोच्चारणरूपमाचरितं धर्मम~~-रान्दोषान् आ सम्यग्जानातीति ज्ञः । दोषारश्छिद्रेत्यादेः । दोषज्ञे विपश्चिति तत्समीपे । वटे गाव इतिवत्सामीपकाधिकरणे सप्तमी । आचख्युरिति वा । हरिदूतकृतावमतिदरतो यम यमेति याता याम्यदूताः । अन्तिकं ;अन्ती हि स्वैर्देयत्वेन क्लृप्तोऽन्तो देहवियोगरूपस्तद्वांस्तस्य मृतप्राय-स्येत्यभिप्रायः । कं तदवियोगजनजनितसुखं भगवद्दूतदत्तमिति वाऽन्वयः । सुखशीर्षजलेषु कमिति विश्वः । अरिन्दम परीक्षित् । संज्ञायां भृतॄवृजिधारिसहितपिदम इति खश् । अरुर्द्विषदजन्तस्येति मुम् । दमिः शमनायां तेन सकर्मक इत्युक्तम् । मतान्तरे त्वन्तर्भावितण्यर्थोऽत्र दमिरिति कौमुद्युक्तेर्दमिमात्रे विशेषो बोध्यः ॥ २४ ॥

चट्टी – प्रत्युदिता निराकृताः । विष्णुदूतैरिति शेषः । यात्वा गत्वा यमराज्ञे यमराजाय यथा यथावत्कथयामासुः ॥ २४ ॥

द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ।
ववन्दे शिरसा विष्णोः किङ्करान्दर्शनो(त्सुकान्)त्सवः ॥ २५ ॥

सत्यधर्म – अजामिलो निजमोचनानन्तरं किमचीचरत्ते वा चक्रभृद्भटाः किं चक्रुरित्यत आह ॥ द्विज इति । प्रकृतिं अयं हि श्रुतिसम्पन्न इत्यादिनाऽऽदित उदितां सत्त्वं स्वभावम् । दर्शनोत्सवो

दर्शनाज्जात उत्सवो यस्य दर्शनस्य सम्बन्धश्चोक्तरूप उत्सवो यस्येति वा दर्शने उत्सव इच्छाप्रसरो यस्येति वा । उत्सवो मह उत्सेक इच्छाप्रसरकोपयोरिति विश्वः ॥ २५ ॥

चट्टी – प्रकृतिं सात्विकावस्थाम् । दर्शनोत्सुकान् स्वदर्शनेन जनानामुत्सवापादकान् ॥ २५ ॥

तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः ।
सहसा पश्यतस्तस्य तन्त्रान्तर्दधिरेऽनघ ॥ २६ ॥

सत्यधर्म – विवक्षुं किञ्चिद्वक्तुकाममभिप्रेत्य ज्ञात्वा सहसा तत्रान्तर्दधिरे । आगमनप्रयोजननिष्पत्तेः कृत्यान्तरस्येदानीमभावादन्तर्धानमिति भावः ॥ २६ ॥

चट्टी – विवक्षुं वक्तुमिच्छन्तम् । अभिप्रेत्य ज्ञात्वा ॥ २६ ॥

अथाजामिल आकर्ण्य दूतानां यमकृष्णयोः ।
धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥ २७ ॥

सत्यधर्म – यमकृष्णयोरागमनक्रमतो निर्देश इति वा सिद्धान्तस्य सिद्धं पूर्वपक्षपूर्वकत्वमिति वा नाभ्यर्हितसमयसमीक्षेति मन्तव्यम् । तयोः सकाशात्त्रैविद्यं वेदत्रयविहितं गुणाश्रयं शुद्धं भागवतदूतानां धर्ममाकर्ण्येति सामानाधिकरण्येनान्वयः । त्रैविद्यं गुणाश्रयं सत्त्वादिगुणाश्रयकं धर्मं यमदूतोदितं शुद्धं भागवतं धर्मं हरिकिङ्करोदीरितमाकर्ण्येति वैय्यधिकरण्येन यथाक्रममन्वयो वा । चशब्दः परस्पर-समुच्चायकः प्राचि सम्प्रति तु वक्त्रन्तरप्रकारान्तरसमुच्चायक इति ज्ञेयम् ॥ २७ ॥

चट्टी – कृष्णदूतानां सकाशात् । शुद्धं मोक्षसाधनं भागवतं धर्मं भगवत्कीर्तनादिलक्षणधर्मं, यमदूतानां सकाशात् त्रैविद्यं वेदप्रतिपाद्यम् । गुणाश्रयं गुणमयस्वर्गादिविषयं धर्मं च श्रुत्वेति विवेकेन योज्यम् ॥ २७ ॥

भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ।
अनुतापो महानासीत् स्मरतोऽशुभमात्मनः ॥ २८ ॥

सत्यधर्म – यो हरेर्माहात्म्यश्रवणादाशूपदेशकमाहात्म्येन भक्तिमांस्तस्यात्मनोऽशुभं स्मरतः कामादशुभं स्मरत इत्यावृत्यान्वयो वा । महाननुतापः पश्चात्ताप आसीदिति यच्छब्दमात्राध्याहारेण योजना लघुः ॥ २८ ॥

चट्टी – भक्तिमानासीदित्युत्तरस्यानुषङ्गः ॥ २८ ॥

अहो मे परमं कष्टमभूदविजितात्मनः ।
येन विप्लावितं ब्रह्म वृषल्यां जायताऽऽत्मना ॥ २९ ॥

सत्यधर्म – अनुतापस्वरूपमेव निरूपयति कैश्चिच्छ्लोकैः ॥ अहो इति । ब्रह्म वेदो वा तपो वा ब्राह्मणकुलं विप्लावितं विनाशितं । वृषल्यां, यस्मिन्विलीयते धर्मस्तमेव वृषलं विदुः । वृषो हि भगवान्धर्मो यस्तस्य कुरुते लयमिति शान्तिपर्वराजधर्मोक्तेरेतादृशस्य स्त्रीति पुंयोगङीष् । साधवः शूद्रा वारिताः । जायता जायमानेन रेतोरूपेणोत्पन्नेनात्मना मया । तज्जाया जाया भवति यदस्यां जायते पुनः । आभूतिरेषा भूतिर्बीजमेतन्निधीयत इति सप्तमपञ्चकीयत्रयोदशखण्डोक्तेः । आत्मा वै पुत्रानामासीदित्यादेश्च ॥ २९ ॥

चट्टी – अनुतापं प्रपञ्चयति ॥ अहो इति चतुर्भिः । येनात्मना मया वृषल्यां पुत्रतया जायमानेन ब्रह्म ब्राह्मणजातिः प्लावितं नाशितम् ॥ २९ ॥

धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् ।
हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् ॥ ३० ॥

सत्यधर्म – दुष्कृतं दुःखसाधनत्वेन दुष्टव्यापारं कुलकज्जलं कुलस्य कालुष्यप्रदत्वेन कज्जलं मषीसदृशं कलङ्ककरमिति यावत् बालां स्त्रियं सतीं पतिव्रताम् ॥ ३० ॥

चट्टी – दुष्कृतं दोषकर्तारं कुलकज्जलं कुलस्य ब्राह्मणकुलस्य कज्जलं कलङ्कम् ॥ ३० ॥

वृद्धावनाथौ पितरौ नान्यबन्धू तपस्विनौ ।
अहो मयाऽधुना त्यक्तावकृतज्ञेन नीचवत् ॥ ३१ ॥

सत्यधर्म – अनाथौ निरैश्वर्यौ रक्षकरहितौ वा नान्यबन्धू अन्यो बन्धुः पुत्रादिर्ययोस्तौ तौ न भवत इति तथा । नसमासः । अन्यबन्धू नेति वा । अधुनेति तात्कालिकविवक्षया । नीचवन्नीचेनेव । अकृतज्ञेन नीचवदिति पदमेकं वा । अकृतज्ञानामिनः पतिः । इनः सूर्ये नृपे पत्याविति विश्वः । स चासौ नीचः पामरस्तेन । नीचस्तु पामर इत्यमरः ॥ ३१ ॥

चट्टी – नास्त्यन्यो बन्धुः पुत्रादिर्ययोस्तौ तथा । तपस्विनौ सन्तप्तौ । अधुना तत्क्षणमेव त्यक्तौ ॥ ३१,३२ ॥

सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ।
धर्मघ्नाः कामिनो यत्र विन्दन्ति यमयातनाः ॥ ३२ ॥

सत्यधर्म – धर्मघ्ना मूलविभुजादित्वात्कः । पतिष्यामीत्यनेन स्वाचरिताचाराव्यभिचारं नरकाप्तेर्ध्वनयति । अतो न "गतभीः प्रकृतिं गत" इति विरोधः। उत्प्रेक्षया विकल्पोऽयमथाऽपीत्युत्तर-ग्रन्थस्वारस्यायेति वा ज्ञेयम् । यमयातनास्तत्कृततीव्रवेदनाः ॥ ३२ ॥

किमिदं स्वप्नमाहोस्वित्साक्षाद् दृष्टमिहाद्भुतम् ।
क्व याता अद्य ते ये मां व्यकर्षन् पाशपाणयः ॥ ३३ ॥

सत्यधर्म – इदमद्भुतं स्वप्नः किमाहोस्वित्साक्षाद्दृष्टम् । अबाधितप्रत्यक्षविषयः सत्यता समा तथाऽप्यालस्यानालस्यफलोपलम्भकताकृतः स एवेति जाग्रद्दृष्टं तादात्म्यभ्रमकृतो वा विशेषो बोध्यः ॥ ३३ ॥

चट्टी – इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह ॥ किमिदमित्यादिना । साक्षात्प्रत्यक्षम् । इह जाग्रतौ दृष्टम् ॥ ३३ ॥

अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ।
व्यमोचयन् नीयमानं बद्ध्वा पाशैरधोभुवः ॥ ३४ ॥

सत्यधर्म – भुवोऽधो नरकम् ॥ ३४ ॥

चट्टी – ये भुवोऽधो नरकं प्रति नीयमानं मां व्यमोचयन् । ते च क्व गता इत्यन्वयः ॥ ३४ ॥

अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ।
भवितव्यं मङ्गलेन येनाऽत्मा मे प्रसीदति ॥ ३५ ॥

सत्यधर्म – येन कारणेनात्मा मनः प्रसीदति प्रसन्नं वर्तते तेन विबुधोत्तमदर्शने मङ्गलसाधने जाते सति मङ्गलायनभगवल्लोकादिप्रापकेन भवितव्यम् । तदवलोको मनःप्रसादश्च भाविभावुक-घटकावित्यूहितवानिति भावः ॥ ३५ ॥

चट्टी – यद्यप्यहमस्मिञ्जन्मनि दुर्भगः पापीयान् । तथाऽपि जन्मान्तरे नूनं पुण्यवानित्याह ॥ अथाऽपीति । विबुधोत्तमदर्शन इति निमित्तसप्रमी । तेषां दर्शनार्थं पूर्वेण मङ्गलेन महापुण्येन भवितव्यम् । येन दर्शनेनात्मा मनः प्रसीदति । निर्मलं भवति । आत्मा परमात्मेति वा ॥ ३५ ॥

अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ।
वैकुण्ठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥ ३६ ॥

सत्यधर्म – निश्चयोऽपि जातो मुख्यसाधनसम्पत्त्येत्यर्थापत्त्योपपादयति ॥ अन्यथेति । गृह्यत इति ग्रहणं वैकुण्ठनामात्मकं ग्राह्यं पदं जिव्हा वक्तुं नार्हति न योग्या भवति । जिव्हा वैकुण्ठनाम वक्तुं नार्हति । ग्रहणं हरिदूतैः स्वीकरणं च नार्हतीति वा ॥ ३६ ॥

चट्टी – अन्यथा पूर्वपुण्यं विना ॥ ३६ ॥

क्व चाहं कितवः पापो ब्रह्मोज्झो निरपत्रपः ।
क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ ३७ ॥

सत्यधर्म – अङ्गस्मृत्यभावाद्भङ्ग्यन्तरेणोक्तमेव पुनर्वक्ति । निरपत्रपो वृषलीवृषभतायास्तल्लज्जा-वर्जितः । लज्जा साऽपत्रपान्यत इत्यमरः ॥ ३७ ॥

चट्टी – ब्रह्मोज्झस्त्यक्तब्राह्मण्यः ॥ ३७,३८ ॥

सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः ।
यथा न भूय आत्मानमन्धे तमसि मज्जये ॥ ३८ ॥

सत्यधर्म – यतचित्तेन्द्रियानिलो नियमितमनस्को नियतेन्द्रियो जितश्वास इत्यर्थः । यथाऽऽत्मानं स्वदेहं वाऽन्धे तमसि न मज्जये न मग्नं कुर्यां तथा यतिष्यामि यतिष्ये । एवं मज्जये मम जयविषये यतिष्यामीत्यावृत्त्याऽप्यन्वयः । पतितप्रायत्वाद्भूय इति सम्भवति । मनःप्रसाद इत्यारभ्य तपो मानस उच्यत इत्यन्तेन गीतागीतं तपोऽप्येकं सम्पन्नं ममेति सूचयति ॥ ३८ ॥

विमुच्य तमिमं बन्धमविद्याकामकर्मजम् ।
सर्वभूतसुहृद्दान्तो मैत्रः करुण आत्मवान् ॥ ३९ ॥

सत्यधर्म – अविद्याकामकर्मजं बन्धं संसारं बन्धं स्नेहमिति वा । सुहृत् प्रत्युपकारमनपेक्ष्योपकारकृत् करुणयतीति करुणाऽस्यास्तीति अर्शआद्यचि वा करुणः सघृणः। आत्मवान्स्वाधीनदेहः । सहोरूरित्यादिवत्प्रशस्तशरीरो वा निगृहीतमनस्को वा ॥ ३९ ॥

चट्टी – कामो राग आत्मवान्वशीकृतमनाः ॥ ३९ ॥

मोचये ग्रस्तमात्मानं योषिन्मय्याऽऽत्ममायया ।
विक्रीडितो यथैवाहं क्रीडामृग इवाधमः ॥ ४० ॥

सत्यधर्म – योषिन्मय्या स्त्र्यात्मिकयाऽऽत्ममाययेशशक्त्या । महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यत इत्युक्तेः । यथा क्रीडामृगः क्रीडोपयुक्तः कप्यादिस्तथा विक्रीडत एवमनया ग्रस्तमात्मानं मोचये । ननु मनुजस्य न सममिदं निदर्शनमित्यतो दृष्टान्तान्तरमाह ।। अधम इवेति । श्रुतसम्पन्नत्वाद्यसम्पन्नतयाऽधमः पुमानिति वा ।। ४० ।।

चट्टी – योषिन्मय्या स्त्रीरूपया । आत्मनो भगवतो मायया बन्धकशक्त्या ।। ४० ।।

ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिम् ।
धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ।। ४१ ।।

सत्यधर्म – मिथ्यार्थधीर्भगवदवगममन्तरेणासद्रूपेऽर्थे धीरनेन मम प्रयोजनमिति धीर्यस्य स तथा । देहादौ देहगेहादावहं ममेति मतिं हित्वा तत्कीर्तनादिभिस्तस्य कीर्तनं नामोच्चारणमादिर्येषां तद्भूतदर्शनसम्भाषणवन्दनानां तानि तैः शुद्धं मनो भगवति धास्य इति सम्बन्धः ।। ४१ ।।

चट्टी – अर्थधीः अर्थे मोक्षाख्यपुरुषार्थे धीर्यस्य सोऽहम् । देहेन्द्रियादौ विषये ममाहमिति मिथ्यामतिं भ्रान्तिं हित्वा भगवति मनो धास्य इत्यन्वयः ।। ४१ ।।

इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु ।
गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ।। ४२ ।।

सत्यधर्म – क्षणसङ्गेन क्षणमात्रसहवासेनोत्सवपूर्वकसङ्गेनेति वा जातनिर्वेदः समुत्पन्नविरक्तिर्मुक्तसर्वानुबन्धनस्त्यक्तदास्यादिसर्वस्नेह एतस्य विरक्तिकार्यत्वात् । यद्वा मुक्तसर्वानुबन्धनो ह्यतिविरक्तो जातसुनिर्वेदो जातस्तत्प्रायः सुनिर्वेदो नितरां लाभो भागवतदर्शनस्पर्शनादिजो यस्य स तथेति । यथोक्तं गीताभाष्ये । निर्वेदं नितरां लाभमिति प्रयोगात्तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्येत्यादि । सुना लभ्यलाभस्य नैरवद्यं द्योतयति । गङ्गाद्वारं तन्नामकतीर्थविशेषमुपेयाय जगाम ।। ४२ ।।

चट्टी – गङ्गाद्वारं नाम तीर्थविशेषम् । मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन सः ।। ४२ ।।

स तस्मिन् देवसदनं(ने) आसीनो योगमास्थितः ।
प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ।। ४३ ।।

सत्यधर्म – देवसदनं श्रीश्रीनिवासावासं योगं शरीरस्थैर्यप्रयोगमुपायं वा । योगो वपुःस्थैर्यप्रयोगे च द्रव्योपायसन्नहनेष्वपीति विश्वः । योग उपायः । दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धय इति भागवत इति गीताभाष्योक्तेः । तत्फलमालपति । प्रत्याहृतेन्द्रियग्रामः प्रत्याहृत इतरविषयेभ्यः प्रत्यावर्तित

इन्द्रियाणां ग्रामः समुदायो येन स इति मन आत्मनि । आत्मा प्रयत्न इति विश्वः । स्वप्रयत्ने युयोज स्वयत्नानुकूलं कृतवानित्यर्थः ।। ४३ ।।

चट्टी – तस्मिन्गङ्गाद्वारे देवसदने त्रिविक्रमाख्यदेवालये । गङ्गाद्वारे त्रिविक्रममिति स्कान्दोक्तेः । प्रत्याहृतो वशीकृदिन्द्रियग्रामो येन स तथाभूतः सन् मन आत्मनि स्वान्तर्यामिणि हरौ युयोज ।।४३।।

ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ।
युयुजे(युयोज) भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ।। ४४ ।।

सत्यधर्म – ततोऽनन्तरं गुणेभ्यः सत्कार्येभ्योऽगुणेभ्यो वैषयिकदोषेभ्य इति वा । समाधिना नियमेन। समाधिर्नियम इति विश्वः । समाधिना प्राक्तन्याऽतिमनोव्यथया वा । पुंस्याधिर्मानसी व्यथेत्यमरः । आत्मानं स्वमनो वियुज्य वियोज्य भगवद्धाम्नि भगवतो धाम स्वरूपं यस्य तत्तस्मिन्ब्रह्मणि गुणपूर्णेऽनुभवात्मन्यनुभवं प्रतिजन्म आत्मनि स्वामिनि शाश्वतिकरे ज्ञानात्मके वा युयुजे योजयामास। स्वरूपं धाम चोच्यते बृहन्तो ह्यस्मिन्गुणा इत्यादेः । आत्मा भवतीत्यादिव्याख्याने आत्मा स्वामीति तत्त्वनिर्णयाद्युक्तेः ।। ४४ ।।

चट्टी – ततस्तदनंतरमात्मसमाधिना चित्तैकाग्रेणात्मानमन्तर्यामिणं गुणेभ्यः स्वदेहेन्द्रियादिभ्यो विविच्य स्फुटतरं वैलक्षण्येन ज्ञात्वाऽनुभवात्मनि ज्ञानरूपे भगवद्धाम्नि समग्रैश्वर्यादिसंपन्ने तेजोरूपे ब्रह्मणि व्याप्तरूपे परमात्मनि युयोज तदैक्येन चिन्तितवानित्यर्थः ।। ४४ ।।

यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत् पुरुषान् पुरः ।
उपलभ्योपलब्धान् प्राग् ववन्दे शिरसा द्विजः ।। ४५ ।।

सत्यधर्म – यर्हि यदोपारतधीस्तस्मिन्काले विषयविरक्तचित्त उप सर्वाधिके आरता सम्यगासक्ता धीर्यस्येति वा । उपोऽधिके चेति सूत्रात् उत्कृष्टानन्दरूपत्वादुपशब्दः प्रकीर्तित इति माण्डूकोपशम-शब्दव्याख्याभाष्यव्याख्यायामुत्कृष्टवाच्युशब्दपर्याय उपशब्द इति व्याख्यानात् । उप उत्कृष्ट इति वा । उप हीनोऽधिके प्रोक्तमिति विश्वः । उप सर्वेश्वर इति सप्तमतात्पर्योक्तेः । प्रागुपलब्धान् पुनरुपलभ्येत्यन्वयः ।। ४५ ।।

चट्टी – यर्हि यदा तस्मिन्भगवद्रूपे उपारता निश्चिता धीर्यस्य स तथा । तस्मिन् काले पुरः पुरतः पुरुषानद्राक्षीदित्यन्वयः । ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय हरिनामकीर्तनश्रद्धातिशयं जनयन् ।। ४५-४७ ।।

हित्वा कलेवरं तीर्थे गङ्गायां दर्शनादनु ।
सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ॥ ४६ ॥

सत्यधर्म – गङ्गायां तत्रापि तीर्थे क्षेत्रविशेषे वाऽवतारप्रदेशे वा मज्जनाय गच्छत्सज्जनचरण-धूलीधूसरणार्थमिति भावः । तीर्थं क्षेत्रोपायावतारर्षिजुष्टाम्भ इति विश्वः । दर्शनाद्भागवतदूतदर्शनादनु अनन्तरं कलेवरं शरीरं हित्वा सद्यो भगवत्पार्श्ववर्तिनां दृष्टदूतानां स्वरूपमिव स्वरूपं जगृह इत्यन्वयः । मुक्तानां स्वरूपमित्यर्थो वा ॥ ४६ ॥

साकं विहायसा विप्रो महापुरुषकिङ्करैः ।
हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥ ४७ ॥

सत्यधर्म – विहायसाऽऽकाशमार्गेण हैमं हेममयम् । प्राणिरजतादित्वादञ् ॥ ४७ ॥

एवं स विप्लावितसर्वधर्मो दास्याः पतिः पतितो गर्ह्यकर्मा ।
निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥ ४८ ॥

सत्यधर्म – इयता प्रबन्धेन प्रतिपादितमर्थं श्रद्धातिशयसिद्धये सूत्रप्रायश्लोकीकृत्य निगमयति ॥ एवमिति । विप्लावितसर्वधर्मो विप्लाविताः सर्वे धर्मा येन सः । अनित्यत्वान्नान्निच् सर्वधर्मशब्दस्य केवलत्वाभावाद्वा । दास्याः पतिः । षष्ठ्या आक्रोशे । पतितस्तत्प्रायो हतव्रत इत्यादिहेतुभिर्निपात्यमानो नाम गृह्णन्सद्यो विमुक्त इत्यन्वयः ॥ ४८ ॥

चट्टी – उपसंहरति ॥ एवमिति द्वाभ्याम् । विप्लाविताः सर्वे धर्मा येन हतं व्रतं स्वदारनियमादिकं यस्य स तथा ॥ ४८ ॥

नातः परं कर्मनिबन्धकृन्तनं मुमुक्षुतां तीर्थपदानुकीर्तनात् ।
न यत् पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं न चान्यथा ॥४९॥

सत्यधर्म – अतस्तीर्थपदानुकीर्तनात्परमन्यदुत्तमं वा मुमुक्षुतां मोक्षेच्छावतां कर्मनिबन्धकृन्तनं कर्मदृढबन्धच्छेदकं न नास्ति । कृन्तनमिति कृतिधात्वन्तररूपम् । नखनिकृन्तविकारो विरह-निकृन्तनकुन्तमुखेत्यादिकगीतगोविन्दादिलौकिकप्रयोगात् । केचिदीदित एव कृतीधातोर्ल्युटि इदित् सूत्रस्य धातोरिति योगविभागं शे मुचादीनामिति सूत्रमहाभाष्योक्तमभ्युपगम्य नुममुपापादयन्निति तथा वा कृन्तनं ज्ञेयम् । यद्यस्माद्रजस्तमोभ्यां कलिलमपि मनः कर्मसु पुनर्न सज्जते तस्मादन्यथा न परमिति न । अन्यथा रजस्तमोभ्यां कलिलं मनः कर्मसु न सज्जत इति नेति वाऽन्वयः ॥ ४९, ५० ॥

चट्टी – कर्मनिबन्धनस्य पापमूलस्य कृंतनं छेदनम् । अतः परं नास्ति । कस्मात्परं तीर्थपदानुकीर्तनात् । यद्यस्मात्कीर्तनान्मनो रजस्तमोभ्यां कलिलं सत् कर्मसु पापेषु न सज्जते । अन्यथा कीर्तनाभावे न सज्जेत इत्येतन्नास्तीत्यर्थः ॥ ४९ ॥

य एवं परमं गुह्यमितिहासमघापहम् ।
श्रुणुयाच्छ्रद्धया युक्तो यश्च भक्त्याऽनुकीर्तयेत् ॥ ५० ॥

चट्टी – श्रोतृवक्तृणां फलमाह ॥ य एवमिति त्रिभिः । यद्यप्यमङ्गलस्तथाऽपि अष्टाशीतिवर्ष-परिमितायुषो वैयर्थ्येऽप्यन्तकाले पुत्रोपचारितानुसन्धानाभिव्यक्तश्रद्धयाऽपि मुक्तिमगात् । किमुत स्वाभाविकया निरन्तरभगवच्छ्रद्धया गृणन्निति भावः ॥ ५०-५२ ॥ इति श्रीभागवतटिप्पण्यां चेट्टीत्याख्यायां द्वितीयोऽध्यायः ॥ ६-२ ॥

न वै स नरकं गच्छेन्नेक्षितो यमकिङ्करैः ।
यद्यप्यमङ्गलो मर्त्यो विष्णुलोके महीयते ॥ ५१ ॥

सत्यधर्म – यो यद्यप्यमङ्गलो मर्त्यस्तथाऽपि नरकं न गच्छेद्वै प्रसिद्धम् । अजामिलवन्न दूतसमीक्षणमित्यप्याह । यमकिङ्करैर्नेक्षितोऽनवलोकित एवं विष्णुलोके महीयते । अयमो निःसदृशशिक्षकान्तररहितो हि भगवांस्तत्किङ्करैरीक्षितो ना पुरुषो विष्णुलोके विना गरुडेनोपलक्षणया तत्समः शेषश्च तेन मार्गेण ष्णुव्यते । ष्णु प्रस्रवणे । तदपि गतिविशेष इति गम्यते स विष्णुः । पृषोदरादित्वात् षत्वम् । स चासौ लोकश्च तस्मिन्निति वा विष्णुलोके हरिलोक इति वा अमर्त्यः सन्महीयत इति वा ॥ ५१ ॥

म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
अजामिलोऽप्यगान्मुक्तिं किमुत श्रद्धया गृणन् ॥ ५२ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे द्वितीयोऽध्यायः ।

सत्यधर्म – पुत्रे स्वतनये उपचारितं निर्वचनलभ्यार्थविकला भवत्त्युपचरितमिति नाम श्रद्धया गृह्णन्नजामिलो दुराचार्यपीति फलितोऽर्थः । धाम वैकुण्ठमगात् । श्रद्धया बहिर्दृश्यमानसद्वृत्तिरहितया गृणन्धाम गच्छेदिति किमुतेति कैमुत्यो न त्वभक्त्याऽपीति ज्ञेयः ॥ ५२ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे द्वितीयोऽध्यायः ॥ ६-२ ॥

।। अथ तृतीयोऽध्यायः ।।

राजोवाच
निशम्य देवः स्वभटोपवर्णितं
प्रत्याह किं तानपि धर्मराजः ।
एवं हताज्ञो विहितान् मुरारे-
र्नैदेशिकैर्यस्य वशे जनोऽयम् ।। १ ।।

सत्यधर्म – भक्तियुक्तं नामकीर्तनं मुक्तिसाधनमिति प्रागुक्तार्थमेव द्रढयत्यस्मिन्नध्याये । श्रुतशमनशासनो निराशनः साश्चर्यचेताः किञ्च किं चकार स्वचारमुखतो विचारं विज्ञाय यम इति परसंशयमात्मन्यारोप्य नृवृषभो ऋषिं पृच्छति ।। राजेति । धर्मराजो देवः स्वभटोपवर्णितं श्रुत्वा तान्प्रति किमाहेत्यन्वयः । सतां माने म्लाने मरणमथवा दूरगमनम् । आज्ञाभङ्गो नरेन्द्राणामितिवन्नेति पृच्छसि कुत इत्यत आह । एवमुक्तप्रकारेण हताज्ञो हताऽऽज्ञा यस्य स तथा सोऽपीति । यस्य हरेर्वशे जनस्तस्य मुरारेर्नैदेशिकैर्निदेश आज्ञा तं चरद्भिर्दूतैरिति यावत् । विहितान्कार्यतस्तत्प्रायान्यस्य यमस्य स इति वा । समाधानी चेदनुसन्धानवान्स्यादयं न तथेत्यप्याह ।। निशमीति । शमीभिन्नः क्रूर इति यावत् । अदेव एतद्विषयराजान्तररहितः । देवः सुरे घने राज्ञीति विश्वः। स्वभटोपवर्णितमुद्दिश्य तान्प्रति किमाहेति वा ।। १ ।।

चट्टी – यमस्तद्भटसंवादव्याजेन परमात्मनोऽविवादं स्वतन्त्रत्वमध्यायेऽस्मिन्निरूप्यते ।। यमराज्ञे यथा सर्वमाचख्युरिति यत्पुरोक्तं ततश्च किं वृत्तमिति पृच्छति भूपतिः ।। निशम्येति द्वाभ्याम् । अयं जनो भटवर्गो यस्य वशे वर्ती । भटस्वामीति यावत् । स धर्मराजो देवः स्वभटोपवर्णितं निशम्य मुरारेर्नैदेशिकैराज्ञाकारिभिः । किङ्करैरिति यावत् । विहितान्निराकृतान् । अत एव स्वयं हताज्ञो हता प्रतिहताऽऽज्ञा यस्य स तथा । तान्प्रति किमाहेत्यन्वयः ।। १ ।।

यमस्य देवस्य न दण्डभङ्गः
कुतश्चनर्षे श्रुतपूर्व आसीत् ।
एवं मुने वृश्चति लोकसंशयं
न हि त्वदन्य इति मे विनिश्चितम् ।। २ ।।

सत्यधर्म – कौतुकहेतुमाह ॥ यमस्येति । दण्डभङ्ग आज्ञाभङ्गः श्रुतपूर्वः पूर्वं श्रुतः श्रुतपूर्वो नासीत् । इदानीं जातश्च स किंकारणक एवमिति लोकसंशयम् । त्वदन्य इति पदमेकमनेकं च । न हि वृश्चति । वृश्च छेदन इति व्याख्यानात् । न दाक्षिण्यादियमुक्तिरित्याह ॥ इतीति । मे मम निश्चितं निश्चयः । भावे क्तः । त्वदन्य इति न्यकारागौरवेणान्यस्मिन्नेतच्छेदविषये मम गौरवं न सम्मतमिति महीपत्याशय इति ध्वनयाञ्चक्रे । ऋषे मुन इति द्विः सम्बोधनेन बोधे शब्दप्रवृत्तिनिमित्त एतत्सन्देहमन्दीकरणपाटवं द्योतयति ॥ २ ॥

चट्टी – अत्याश्चर्यमेतदित्याह ॥ यमस्येति । हे ऋषे यमस्य दण्डभङ्ग आज्ञाभङ्गः कुतश्चन कस्मादपि श्रुतपूर्वो नासीत् । अनेनैका संशयकोटिर्निरूपिता । शुकोक्तिर्द्वितीयेति भावः । एवं कोटिद्वयप्रापितं सर्वलोकस्य वर्तमानं संशयं त्वत्तोऽन्यो न छिनत्ति । इति निश्चयो हि यस्मात्तस्मान्मे तु विशेषार्थज्ञापनाय । कथयेति शेषः । जानन्तोऽपि विशेषार्थज्ञानाय स्थापनाय वा । पृच्छन्ति साधवो यस्मादिति वचनात् । अत एव लोकसंशयमित्युक्तमिति भावः ॥ २ ॥

बादरायणिरुवाच

भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः ।
पतिं विज्ञापयामासुः यमं संयमनीपतिम् ॥ ३ ॥

सत्यधर्म – हे राजन्प्रतिहतोद्यमा मोघीकृतोद्योगा यमं पतिं स्वस्वामिनं संयमनीपतिं नरकमूलनगरीश्वरम् । यद्यपि यममित्यनेन प्रकरणनिरीक्षणेनेतरशङ्कां न कथञ्चिदपि सचेतनः सम्भावयेदिति तावता पूर्तिस्तथाऽपि यं प्रति यं प्रत्यानेतुं गतानां मध्येऽध्वदशेदृशी जातेत्याक्रोशेन संयमनीपतिमित्युक्तिरिति सन्तोष्टव्यम् ॥ ३ ॥

चट्टी – भगवतः पुरुषैः प्रतिहता उद्यमा येषां ते याम्याः पुरुषाः ॥ ३ ॥

यमदूता ऊचुः

कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो ।
त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥

सत्यधर्म – हे प्रभो स्वामिन् । एकवचनेनेह शास्तारः शासकाः कति सन्तीति काकुः । तथा चाक्षेपो ध्वन्यते । तेन न सन्तीत्यान्तरङ्गिको भावोऽपि ध्वनितः । त्रैविध्यं वेदत्रयबोधितं कर्म कुर्वतो जीवलोकस्य चेतनमात्रस्य फलाभिव्यक्तिहेतवः । त्रैविध्यं कर्म कुर्वत इत्यत्र विशेषणीभूतत्रैविध्यकर्मपदं

योग्यतया फलपदात्प्रागन्वेति । ततश्च त्रैविद्यकर्मफलाभिव्यक्तिहेतवस्त्रिविधकर्मफलोपलम्भकाः कतीति प्रश्नाशय इत्याशयः । वै इत्यनेन तवैव प्रभावं प्रसिद्धमिति काकुमुज्जीवयन्तीति ज्ञायते । ज्ञायते च यदि स्युरित्युत्तरपद्येनापि । त्रैविध्यमित्यपि कुत्रचित्पाठः सोऽपि सुन्दरः । त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् । त्रैविध्यं यथा भवति तथा कर्म कुर्वत इति वा तदर्थः । अभिव्यक्तिपदेन मोक्षमपि कटाक्षयतीति सूच्यते ॥ ४ ॥

चट्टी – त्रैविद्यं वेदविहितम् । त्रैविध्यमिति पाठे सात्विकादिभेदेन त्रिविधम् । स्वार्थे ष्यञ् प्रत्ययः ॥ यद्वा त्रिविधं यथा भवति तथा । कर्म कुर्वतो जीवलोकस्य जीवसमूहस्य फलाभिव्यक्तिहेतवः कर्मफलदातारः शास्तारः स्वामिनः कति सन्तीत्याक्षेपः । बहवः शास्तारो न सन्तीत्यर्थः ॥ ४ ॥

यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः ।
कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव च ॥ ५ ॥

सत्यधर्म – दण्डधारिणस्तव सकाशाद्यदि शास्तारो लोकेऽन्ये बहवः स्युः । अनेन शास्तारो दण्डधारिण इति पदे अर्थतः पुनरुक्ते इति परास्तम् । मृत्युर्बन्धोऽमृतपदस्वारस्यादमृतं मोक्षश्चेत्येते कस्य सकाशात्स्यातां स्वातन्त्र्यस्याव्यवस्थितत्वात्कस्य स्याताम् । यद्येको मारयितुं वाञ्छेत् अपरो नेदानीं ते कर्तव्ये इति कुर्याच्चेदपरोधं तर्हि कस्यापि न वा स्यातामिति विरुद्धक्रियं शरीरमुन्मथ्येतेति वा । हे लोकेश यद्यस्तारो निरस्तदोषः । एकवचनेन चैकत्वं शासितुः सम्मतमिति ध्वन्यते । तर्हि कस्य मृत्युश्चामृत्युश्चामृतं च स्यातामिति वाञ्छति तस्य स्यातां न वेति कस्य तस्य न स्यातामिति तेषामान्तरङ्गिको भाव इति पदसम्पदा प्रतिपाद्यत इति मन्तव्यम् ॥ ५ ॥

चट्टी – स्वामिबहुत्वे किं बाधकमित्यत्राहुः ॥ यदीति । मृत्युर्दुःखम् । अमृतं सुखम् । तेषां विप्रतिपत्तौ ते उभे कस्य वा स्याताम् । न कस्यापि । परस्परविरोधेनोभयोरपि प्रतिबन्धात् । एकमत्ये तु कस्य वा न स्याताम् । एकः सुखं कर्तुमिच्छति । दुःखं चान्यः । एकमत्ये च तयोः परस्पर-कार्यानुमोदे । अनेन उभयोरपि प्राप्तेः । कस्य वा ते उभेऽपि सहैव न स्यातामित्यर्थः ॥ ५ ॥

किन्तु शास्तृबहुत्वे स्याद् बहूनामिह कर्मणाम् ।
शास्तृत्वमुपचारो हि यथा मण्डलवर्तिनाम् ॥ ६ ॥

सत्यधर्म – तत्रापि स्वतन्त्राः सर्वे सर्वदा स्वां प्रवृत्तिं कुर्वन्ति किंवाऽव्यवस्थया नोभयथाऽपि तद्दुरवस्थावस्कन्दनमित्यनवस्थितेरसम्भवाच्च नेतर इत्यादेः । केवलं त्वमेकल एव लोकेश इति चास्माकीनो निश्चयः पाश्चात्त्यः स कथमन्यथाभूतो भूतलेऽभूदिति पञ्चभिः पद्यैः प्रपञ्चयति ॥

किन्त्विति। कर्मणां तत्सम्बन्धि शास्तृत्वं शिक्षकतोपचारः स्यात्। यथा मण्डलवर्तिनां खण्डेशानां तत्तद्देशविशेषेशता तथा स्यात्तथा सावधिस्वाम्यं स्यात्तच्चासम्भवादिदूषितमिति न शक्याङ्गीकारमिति हृदयम्॥ ६॥

चट्टी – ननु बहूनां कर्मणां व्यवस्थया बहवः शास्तारो भवन्तु। तथा च सति नायं दोषः स्यात्तत्राहुः॥ किंत्विति। बहूनां कर्मणां व्यवस्थया शास्तृबहुत्वे शास्तृत्वं स्यात् घटेत्। किन्तु यत्सर्वशास्तरि मुख्यं शास्तृत्वं तदेकदेशे उपचारमात्रमेव स्यात्। तत्र दृष्टान्तमाह॥ यथेति। यथा चक्रवर्तिन एव मुख्यशास्तृत्वं मण्डलवर्तिनामुपचारमात्रम्। निरंकुशत्वाभावात्। तद्वदित्यर्थः॥ ६॥

अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः।
शास्ता दण्डधरो नॄणां शुभाशुभविवेचनः॥ ७॥

सत्यधर्म – सेश्वराणां तत्तदवान्तरेश्वरसहितानां शुभाशुभविवेचनः शुभाशुभे सदसती कर्मणी विवेचयति फलदानद्वारेति स तथा। दण्डधर इत्यनेन चतुराननवरत उपायातो दण्डस्तस्य धर इति शास्तृत्वं क्वापि न प्रतिहतमियत्पर्यन्तमिति सूचयन्ति। यदि प्रतिक्षेप्यो बहुशास्तृत्वपक्षो हन्त तर्ह्यहं कुतः कुतो न भवेत्कश्चिन्मतं शासिताऽन्य इत्यतोऽस्मदनुभवसिद्धत्वादाद्यः कल्पोऽनवद्य इति राज्ञे विज्ञापयन्ति॥ त्वमेक इति। नृणां मनुष्याणामनृणां रक्षः पिशाचादीनामेवम्भूतानाम्। सभाराजामनुष्यपूर्वेति व्याख्यायाममनुष्यशब्दो रक्षः पिशाचादीनाहेत्युक्तेः। नृ चेति नामि दीर्घः॥ ७॥

चट्टी – यस्मादेवं शास्तृबहुत्वं न घटत इत्यतस्तस्मात्त्वमेक एव शास्ता शुभाशुभे विवेचयति विविनक्तीति॥ ७॥

तस्य ते विहतो दण्डो नृलोके वर्ततेऽधुना।
चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलम्भिता॥ ८॥

सत्यधर्म – तस्य तत्त्वेनास्मत्सम्मतस्य ते दण्डोऽद्भुतैराश्चर्यचर्यैः सिद्धैश्चतुर्भिर्विहत इत्यधुना लोके न वर्तत इत्यन्वयः। अतः सिद्धैस्त्वदनुष्ठाने सदा सन्नद्धैस्ते आज्ञाऽजामिलानयनविषयिणी विप्रलम्भिताऽतिक्रान्ता नास्मन्मनःपूर्वकमिति निरपराधिनो वयमित्यवयन्तीति तात्पर्यं ज्ञेयम्। एवमनन्वये पादः सर्व उक्तानुवादरूप इति निरूपणीयं स्यात्तथा चागतिका गतिस्तथाऽपि त इति वृथेत्यस्य शङ्कनस्यापारणीयत्वं चेति मन्तव्यम्॥ ८॥

चट्टी – विहितो वर्तत इत्यन्वयः। तदेव विवृण्वति॥ चतुर्भिरिति। विप्रलंभिता वञ्चिता लङ्घितेत्यर्थः॥ ८॥

नीयमानं तवादेशादस्माभिर्यातनागृहम् ।
व्यामोचयन् पातकिन छित्वा पाशान् प्रसह्य ते ॥ ९ ॥

सत्यधर्म – तत्प्रकारं खेदतः सविस्तरं वदन्तीति वदति ॥ नीयमानमिति । प्रसह्य पाशांश्छित्वा व्यामोचयन्नित्यन्वयः ॥ ९ ॥

चट्टी – तदेवाहुः ॥ नीयमानमिति ॥ ९ ॥

तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ।
नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ॥ १० ॥

सत्यधर्म – ते तव सकाशान्नारायणेति तेनाभिहिते मा भैर्मा भैषीर्न भीतो भवेति द्रुतमाययुस्ते क इति वेदितुमिच्छामः । यदि क्षमं श्रोतुं योग्यं मन्यसे तर्हि वदेति शेषः ॥ १० ॥

चट्टी – यदि नोऽस्माकं क्षमं हितं मन्यसे इत्यर्थः । क्षिति क्षान्त्योः क्षमा प्रोक्ता हिते शक्ते च वाच्यवदिति विश्वः । तत्स्वरूपज्ञानेन किं प्रयोजनमित्यत आहुः ॥ नारायणेति । श्रीनारायणेति केवलमभिहिते मा भयं कुर्विति वदन्तो द्रुतं शीघ्रमागता इत्यर्थः । एवमतर्क्यप्रभवात्तेषां तज्ज्ञानेनास्माभिरवज्ञाने कृते तवाप्यनर्थः स्यात् । भृत्यकृतस्य राजकृतत्वादिति भावः ॥ १०,११ ॥

श्रीशुक उवाच

इति देवः स आपृष्टः प्रजासंयमनो यमः ।
प्रीतः स्वदूतान् प्रत्याह स्मरन् पादाम्बुजं हरेः ॥ ११ ॥

सत्यधर्म – दूतोदितं स्वस्वाम्यनैरवद्यमसहमान ऐकस्वाम्यपक्षं स्वीकृत्य यन्नामाग्रहीदजामिलः, सा च प्रशासनात्, एकः शास्ता न द्वितीयोऽस्ति शास्तेत्यादिसूत्रश्रुतिबोधितः स्वामी शास्ता स भगवानित्यवगमयितुं महाप्रमेयबोधनावसर इति भानुसूनुर्मङ्गलाचरणपूर्वकमितीत्यादिभिः श्लोकैरवादीदिति वदति ॥ इतीति । प्रजासंयमनस्तच्छिक्षकः प्रीतः श्रीभगवन्मङ्गलकथाकथनमनायासेन भविष्यतीति प्रीतिमान् ॥ ११ ॥

यम उवाच

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद् यत्र विश्वम् ।
यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद् यस्य वशे च लोकः ॥ १२ ॥

तात्पर्यम् – ओतं प्रोतं पटवत् । 'यथा कन्थापटाः सूत्र ओताः प्रोताश्च संस्थिताः । एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितमि'ति स्कान्दे ॥ १२ ॥

सत्यधर्म – परो मदन्यो जगतस्तस्थुषश्चेति श्लोके यद्यपि परपदमन्यपदं वा ओतं प्रोतं पटवदित्यस्योपादानत्वेन प्रपञ्चैक्यं बोधयितुमवसरं न दद्यादित्याचार्येणान्तरङ्गानुपपत्तिः प्रदर्शनीया तथाऽप्यन्यादिपदस्य व्यावहारिकभेदपरत्वमभ्युपेत्यापि पूर्वपक्षी समादध्याद्विदध्याद्वाऽन्योऽन्तरात्मेत्यादावनैकान्त्यमुद्भाव्य परपदस्य बव्हर्थत्वेनानिर्धारितेदमर्थतां चोपपाद्य किञ्चित्प्रयत्नाभिमुखमुक्तमनुक्तप्रायं भवेदिति मन्वानस्तन्वानोऽन्यादिपदस्येतरानवकाशेन मुख्यभेदपरत्वव्यवस्थामर्थत आनन्दतीर्थमुनिरनूद्य प्रमाणेनैव विवृणोति ॥ ओतं प्रोतं पटवदिति । पटेन तुल्यं वर्तत इति तत्तथा तेन तुल्यं क्रिया चेद्वतिरिति स्मरणात् । तथा तत्र सूत्रे सूत्र इत्यपि क्वचित्पाठः स च सरलः । कन्थापटाः प्रावरणविशेषाः । कन्था प्रावरणान्तर इति विश्वः । ओता दीर्घाकाराः प्रोतास्तिर्यगाकारास्तेन पृथक् सीवितेन सूत्रेणात्यन्तभिन्नाः संत्येवं तथा विष्णौ भगवतीदं विश्वं जगत् । जगदिति वचने सङ्कोचेन कस्यचित्त्यागः सम्भाव्येत तत्पराकृत्यै विश्वमित्युक्तम् । तच्च तन्त्रेण जगद्वाचकं सामस्त्यस्येति न तत्सम्भावनावसर इत्यवसेयम् । अनेन पटस्य समस्ततन्त्वभिन्नत्वात्कथं तद्दृष्टान्तीकरणमिति शङ्का परास्ता । स्कान्द इति वदन्निश्चितप्रामाण्यमित्युदाहरणीयतां द्योतयति । एवं पूर्वत्रोत्तरत्र च प्रमाणनामग्रहणकृत्यमवधेयम् ॥ ततश्चायं श्लोकार्थः ॥ मदन्य इति पदमेकमनेकं च । अन्यो भिन्नो जगतश्चेतनमात्रस्य तस्थुषः स्थावरस्योत्तमः । कुत उत्तम इत्यत आह ॥ ओतमिति । यत्रोत्तमे पटवत्कन्थापटवद्विश्वमोतं दीर्घतया प्रोतं तिरश्चीनतया च तन्त्वाधारत्वेन कन्थापटः सूत्रे स्थितस्तथौतमाश्रित्य वर्तत इत्यर्थः । यस्मिन्निदं सं च विचैधि सर्वमित्यादेः । भर्ता सन्नित्यादेर्धर्ता च स एव । परत्वमव्यभिचारीत्याह ॥ यदंशत इति । यद्यस्मादस्यांशतोऽभिन्नान्मत्स्यादेर्भिन्नाद् ब्रह्मादेः स्थितिजन्मनाशा मुख्यतयाऽमुख्यतया च भवन्तीति शेषः । यतो वा इमानि भूतानि जायन्ते । स ब्रह्मणा विसृजति स रुद्रेण विलापयत्यंशा एव हीमे जीवा इत्यादेः । अंशा हीम इत्यारभ्य न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य इति चेत्यन्तब्रह्मसूत्रभाष्यादंशद्वैविध्यं बोध्यम् । लोकाभिन्नांशत्वेनोक्तहिरण्यगर्भादयो हरिपराङ्मुख्ये मुख्या अपि पशुप्राया इत्यभिप्रायेणानुरूपं दृष्टान्तमाचष्टे ॥ नसीति । नसि नासिकाधिकरणे । ओतवदित्यत्र वतिप्रत्ययात्पूर्वं प्रकृतेः परतो गोशब्दमध्याहृत्य योजनीयः । ततश्चौतगववदिति पदनिष्पत्तिर्भवति । नसि रज्जुसमासज्जना गाव इवेति तदर्थः । न च गोपदस्याध्याहृतस्य प्रकृतिप्रत्ययान्तर्निवेशः कथं क्वाप्येतत्सदृशस्यादृष्टेरिति वाच्यम् । यथार्थज्ञानजनका यथार्था युक्तयः स्मृता इत्यनुव्याख्याव्याख्यायुक्त्यादय इत्यर्थ इति सुधाव्याख्याने "बहुवचनमाद्यर्थ इति । आदिशब्दार्थे बहुवचनं ज्ञापकमित्यर्थः । तेन फणां च सप्तानामित्यादाविव युक्तय इत्यत्र

प्रकृतिप्रत्ययोर्मध्ये यत्रानवसरोऽन्यत्र न्यायेनादिपदमध्याहार्यमिति भावेनाह ।। युक्त्यादय इत्यर्थ इति । तथा च युक्तिश्चादी च युक्त्यादय इति बहुवचनोपपत्तिरिति भाव'' इति परिमले सुमिलः प्रयोग इति काऽत्र कथन्ता । न च तत्र बहुवचनमिवात्र ज्ञापकाभावान्न साम्यमिति शङ्क्यम् । ओतमिति विशेषणनैरर्थक्यस्यैवात्रैतद्गमकत्ववदुत्तरत्रात्र स्थानान्तरे च गोपदसमभिव्याहारनैय्यत्यस्यापि गमकत्वान्नानुपपत्तिरिति केचित् । ओतपदमेव लक्षणयौतगवपर इति वा । नासिकारज्जुसमासज्जनेन जनानां वशा यथा गावो भवन्ति तथा लोकाश्चास्य वशे भवन्तीति वा । सर्वान्य इति वक्तव्ये भटैः परत्वस्य स्वमात्रपर्यवसानं कृतमिति मदन्य इति प्रागुत्तरत्र चास्य वशे च लोका इति च वदन्निदमस्मत्पदमुपलक्षकं ततोऽप्युत्तरत्राप्यन्यान्यत्वस्फोरकविरुद्धधर्माणां बहूनामुपन्यसनाच्च न मन्मात्रपरमित्यभिप्रैति प्रेतपरमिति मन्तव्यम् ।। १२ ।।

चट्टी – यदुक्तं त्वमेक एव शास्तेति तदयुक्तमित्याह ।। पर इति । मत्तोऽन्यो जगतो जङ्गमस्य तस्थुषः स्थावरस्य च पर ईश्वरोऽस्ति । अहं तु जङ्गमानामेवेति । तत्रापि नृणामेव तत्रापि पापिनामेव तत्किङ्करः सन् ईश्वरो न तु सर्वेश्वरः । कोऽसावित्यतस्तस्य लक्षणान्याह ।। ओतमिति । यत्र यस्मिन्नाधारभूते विश्वं जगत् । ओतं प्रोतं च दीर्घात्मना तिर्यगात्मना चावस्थितम् । तत्र दृष्टान्तः ।। पटवदिति । यथा कंथाऽवयवाः खण्डपटा आधारभूते सूत्रे ओतप्रोतत्वेन संस्थितास्तद्वदित्यर्थः । एतेनोपादानोपादेयभावापन्नतन्तुपटदृष्टान्तोपादानेन जगद्ब्रह्मणोरुपादानोपादेयभाव इति शङ्का परास्ता । कंथपटानां सूत्रस्य चात्यन्तभेदात् ।। तदुक्तम् ।। यथा कंथापटाः सूत्रे ओताः प्रोताश्च संस्थिताः । एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितमिति स्कान्दे । किञ्च यस्यांशतः स्वरूपांशेभ्यो विष्णुब्रह्मरुद्राख्येभ्यः । अस्य जगतः स्थित्यादयो भवन्ति ।। तदुक्तम् ।। ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः ।। ब्रह्मणिस्थः सृजेद्विष्णुः स्थित्वा रुद्रे त्वभक्षयत् ।। पृथक् स्थित्वा जगत्पाति तद्ब्रह्माद्याव्हयो हरिः ।। स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः ।। स्रष्टृत्वादिकमन्येषां दारुयोषावदिष्यत इति च । किञ्च यस्य वशे लोको वर्तते । तत्र दृष्टान्तः ।। नसीति । नसि नासिकायां प्रोतबलीवर्दवदित्यर्थः ।। १२ ।।

यो नामभिर्वाचि जनं निजायां बध्नाति तन्त्यामिव दामभिर्गाः ।
यस्मै बलिं त इमे नामकर्मभिर्निबन्धबद्धाश्चकिता वहन्ति ।। १३ ।।

सत्यधर्म – योऽनामभिः सहितं तद्रहितं जनं निजायां स्वसम्बन्धिन्याम् । निजमात्मीयनित्ययोरित्यभिधानात् । ऋचः सऋच उद्धृत्येत्यादेः । अखिला वेदा उद्गीर्यन्त इत्यादेश्च । न जायत इति निजा वा तस्यां नित्यायां वाचि वेदरूपिण्यां तन्त्यां दामभिर्गाव इव बध्नाति । यस्मै ते कार्यकारित्वेन

प्रसिद्धा इमे वक्ष्यमाणत्वेन बुद्धिसन्निहिता ब्रह्माद्या नामकर्मभिर्नामभिर्ब्रह्मेत्यादिभिः कर्मभिः स्वस्वक्रियाभिर्निबन्धोऽयमेतन्नामाऽयमेतत्कर्मा भवत्विति नियमस्तेन बद्धाश्चकिता भीताः । भीषास्माद्वातः पवत इत्यादेः । बलिं पूजोपहारम् । बलिः करपूजोपहारयोरिति विश्वः । अथवा नामभिरिति पदं पूर्वतोऽत्रान्वेतुं योग्यमित्यत्र नामेति भिन्नं पदम् । नामभिः कर्मभिश्च निबन्धा बद्धा बलिं वहन्ति । नाम प्रसिद्धमिति वा । निबन्धेन विधिनिषेधकसमयेनेति वा । स मदन्यः पर इत्यन्वयः। जनमिति वचनानुसारेण यमित्युत्तरत्रोक्त्या पूर्तावपि यत् इमे इति जगाद न तेन स्वतन्त्रतया प्रतीता अपि न पर इति भावमाविश्चकारेति ज्ञेयम् ।। १३ ।।

चट्टी – एतदेव प्रपञ्चयति ।। य इति । यो निजायां स्वाज्ञारूपायाम् । वाचि विधिनिषेधात्मकवेदवाग्रूपायां तंत्यां दामन्यां नामभिर्ब्राह्मणादिनामलक्षणैर्दामभिरवान्तरपाशैर्गोस्वामी गा इव जनं बध्नाति । त इमे जीवा नामकर्मभिः । नामभिर्ब्राह्मणादिभिः कर्मभिः शमादिभिः । निबन्धैर्दृष्टबन्धसाधनैर्बद्धाश्चकिता भीताः सन्तो यस्मै बलिं वहन्ति । गाव इव गोस्वामिने यदधीनाः कर्म कुर्वति । भीषास्माद्वातः पवत इत्यादिश्रुतेरित्यर्थः ।। १३ ।।

अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चः ।
आदित्यविश्वेवसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ।। १४ ।।

सत्यधर्म – यदि स्वामिन् तवेयती संवित्सीमा तर्हि पूर्वमेव वयं तं समानेतुं नाज्ञाप्यास्तथा चैवं मानहानिर्नानुभूता स्यादित्यतो न वयं साकल्येन तदभिज्ञा इति स्वोत्तमान्गृह्णानः कैमुत्येनाह ।। अहमिति । पुर इव पुरस्करणं स्वस्यावसेयम् । समेषामज्ञत्वसाम्यादतरतमभावेन सङ्ग्रहः । प्रचेता वरुण ईशः शिवोऽर्कः सूर्य आदित्यास्तद्गणा देवा वा । आदित्याश्च विश्वे च वसवश्च ते । एदन्तो विश्वे इति शब्दः प्रथमाया अलुग्वा । आदित्यविश्वे इति भिन्नपदं वा । विभाषा जसीत्युक्तेः सर्वनामत्वाज्जसः शीति शीभावः । वसवश्चाष्टसङ्ख्याता रुद्राश्चैकादश स्मृता इति मानोक्ता गणदेवताः । कचिद्विश्ववसव इति पाठः । तत्रासंज्ञत्वान्न विश्वस्य वसुराटोरिति दीर्घः । सिद्धैर्देवयोनिभिः सहिता मरुद्गणा एकोनपञ्चाशत्सङ्ख्याः ।। १४ ।।

चट्टी – तस्य च लीला दुर्विभाव्येत्यत आह ।। अहमिति द्वाभ्याम् ।। १४ ।।

अन्ये च ये विश्वसृजोऽमरेश भृग्वादयोऽस्पृष्टरजस्तमस्काः ।
यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ।। १५ ।।

सत्यधर्म – विश्वसृजः प्रजासर्जकाः कश्यपाद्या भृग्वादय इति येऽन्ये यस्य हरेरीहितं चेष्टितं न विदुस्तत एतेभ्योऽन्ये न विदुरिति किं वक्तव्यमित्यर्थः । को विशेषस्तेषामेषां चेत्यत आह । अस्पृष्ट-रजस्तमस्का अस्पृष्टा ईषत्स्पृष्टा रजस्तमस्का अत एव सत्त्वप्रधाना अपीति स्पृष्टमायाः सत्त्वाप्राचुर्येतर प्राचुर्यप्रापकप्रकृतिसम्पर्किनोऽन्ये । यद्वा सर्वेऽपि स्पृष्टमाया भगवदिच्छाच्छादिताः । महामायेत्यविद्येति तवेच्छाऽनन्त कथ्यते इत्यादेः । तत्तद्योग्यतानुसार्याच्छादनक्रमेण ज्ञानक्रमो ज्ञेयः ॥ १५ ॥

चट्टी – अस्पष्टं रजस्तमश्च यैस्ते तथा । सत्वप्रधानाः सात्विका अपि । ईहितमभिलाषितं चेष्टितं वा न विदुः । तत्र हेतुः ॥ स्पृष्टमायाः । मायास्पृष्टा भगवदिच्छावृता इति ततस्तेभ्योऽन्ये न विदुरिति किं पुनर्वक्तव्यमित्यर्थः ॥ १५ ॥

यं वै न गोभिर्मनसाऽसुभिर्वा हृदा गिरा वाऽसुभृतो विचक्षते ।
आत्मानमन्तर्हृदि सन्तमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥

सत्यधर्म – यं गोभिरिति सामान्यत इन्द्रियोक्तिरिन्द्रियैः । नेन्द्रियाणीति श्रुतेः । तद्विविच्योचे । मनसा । यन्मनसा न मनुत इत्यादेः । असुभिः प्राणैः । हृदेति पुनर्वचः पूर्ववत् । गिरा । यद्वाचाऽनभ्युदितं यतो वाचो निवर्तन्त इत्यादेः । असुभृतोऽसून्बिभ्रतीति ते तथा न विचक्षते न विपश्यन्ति । दूरे वसतो न निरीक्षणं सम्भावितमित्यत आह ॥ हृदीति । तत्राप्यन्तः कमलकर्णिकायां सन्तमात्मानमन्तर्यामिणम् । ततो गवादेः परं विलक्षणं साकल्येनाविषयम् । आकृतयो रूपाणि । आकृतिः कथितारूप इति विश्वः । चक्षुश्चक्षुरिन्द्रियं कर्म यथा न विचक्षते । ग्राह्यग्राहकयोः सन्निकर्षेऽपि निष्कर्षोऽयं ग्राहक एवायं तद्ग्राह्य इति चक्षुर्नाकृतिग्राह्य इत्यर्थः । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षयेत्यादेर्भगवतोऽनुग्रहाभावे न किञ्चिदप्युदश्वयितुं समर्था इति द्योतयन्तीति निदर्शनेनेति ज्ञेयम् ॥ १६ ॥

चट्टी – भगवन्मायामोहितबुद्धित्वान्न जानन्तीत्युक्तम् । इदानीं तस्य करणाविषयत्वाच्च न विदुरित्याह ॥ यमिति । असुभृतः प्राणिनो गोभिश्चक्षुरिन्द्रियैर्मनसा बुध्याख्येन्द्रियेण । आत्मा मनश्चिन्तनं च शेमुषी बुद्धिरित्यपि । एकार्थवाचिका इत्यभिधानात् । हृदा मनइन्द्रियेण । स्वान्तं हृन्मानसं मन इत्यभिधानात् । गिरा वागिन्द्रियेण । असुभिः प्राणैरितरेन्द्रियैः । सप्तप्राणस्त्वगतेः पञ्चप्राणाश्च कर्मणः । एवं प्राणद्वादशकं मनोबुद्धी तु द्वादशेति वचनात् । यं न विचक्षते न विजानन्ति । दूरस्थत्वात्किं नेत्याह ॥ आत्मानमिति । आत्मनां सर्वप्राणिनां अन्तर्हृदि नियमाकत्वेन वर्तमानम् ॥ यद्वा ॥ आत्मानं सर्वद्रष्टारम् । अन्येषां स्वविषयकज्ञानाभावेऽपि स्वयं सर्वं पश्यतीत्यर्थः । तर्हि कुतो न जानन्तीत्यत आह ॥ तत इति । तत इन्द्रियेभ्यः परमिन्द्रियाविषयम् । यतो वाचो निवर्तन्ते ।

यद्वाचानभ्युदितमित्यादिश्रुतेरित्यर्थः । तत्र दृष्टान्तमाह ॥ चक्षुरिति । तस्य चक्षुर्विषयत्वात् । ननु रूपं चक्षुः प्रकाशयति । चक्षुषो रूपं प्रति विषयत्वाभावात् । एवमेव भगवन्तमविषयीकुर्वाणैश्चक्षुरादीन्द्रियैः सर्वेऽपि न जानन्ति भगवानेव सर्वं जानातीति भावः । ॥ यद्वा ॥ जीवानां भगवद्विषयकज्ञानाभावे तमेवं विद्वानित्यादिश्रुतिविरोधः स्यादित्यत आह ॥ यमिति । गोभिरिन्द्रियाभिमानिभिरिन्द्राद्यैः । इन्द्राद्या इन्द्रियात्मान इत्युक्तेः । मनसा चन्द्रेण । मनश्चन्द्रः प्रकीर्तित इत्युक्तेः । असुभिर्मुख्य-प्राणादिमरुद्भिः । मरुतः प्राणमानिन इत्युक्तेः । हृदाऽन्तःकरणाभिमानिना रुद्रेण रुद्रोऽन्तःकरणात्मक इत्युक्तेः । गिरा वेदाभिमानिन्या लक्ष्म्या सरस्वत्या च । वागाभिमानिन्या पार्वत्या च । उमैव वाक्समुद्दिष्टेत्यर्थः । सर्वज्ञत्वेन प्रसिद्धैरेतैः सहिता असुभृतः सर्वे जीवा यं न विचक्षते विशेषतो न जानन्ति । तत्र हेतुस्तत उक्तचेतनराशेः परो विलक्षणः । अलौकिकत्वादित्यर्थः । तत्र दृष्टान्तः । आकृतयः । रूपाभिमानिरुद्रपुत्रो व्यानस्ततो व्यानात्परमधिकमहिमोपेतं चक्षुस्तदभिमानिनं सूर्यं न वेद । तद्वदित्यर्थः । साकल्येन भगवद्विषयकज्ञानाभावेऽपि तदनुग्रहेण स्वयोग्यतया जानन्तीति न श्रुतिविरोध इति भावः । तथा चोक्तम् । ब्रह्माद्या यं न जानन्ति करणाद्यभिमानिनः । जानंत्यनुग्रहाच्चास्य प्रधानाग्निं यथाऽर्चिषः । अग्निपुत्र नमस्तस्मै यमाह श्रीश्च न स्फुटम् । वेदरूपा परं देवं वैलक्षण्यात्समस्तशः । आनन्दो नेदृशानन्दो इत्युक्तेः लोकतः परम् । प्रतिभाति न चाभाति यथावद्दर्शनं विनेति ब्रह्मतर्के । एवंभूतः परमेश्वरो मदन्योऽस्तीति पूर्वेणान्वयः ॥ १६ ॥

तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ।
प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥ १७ ॥

सत्यधर्म – तांस्ते वेदितुमिच्छाम इत्युत्तरयति ॥ तस्येत्यादिना । आत्मतन्त्रस्याधीशितुः परस्य महात्मन इत्येकैकदूतमुद्दिश्य पृथक् पृथगुक्तमिति न कृत्यविवेचनेन चित्तचाञ्चल्यं सम्पादनीयम् । मायाधिपते रमारमणस्य दूता इह मह्यां चरन्ति । मनोहरा आकारतः प्रायेण तद्रूपगुणस्वभावास्तस्य रूपं चर्तुभुजत्वादिर्गुणा ज्ञानादयः स्वभावो भक्तप्रियत्वादिरिति येषां ते तथा । प्रायेणेत्यनेन तद्गुणादिप्रतिबिम्बतया सारूप्यं रूपादिकस्य सूचयति । प्रायस्तुल्यबाहुल्ययोरपीति विश्वः । प्रायेण चरन्तीत्यन्वयो वा ॥ १७ ॥

चट्टी – भवत्वेवंभूतः परमेश्वरो ये पुनरस्मान्निर्भर्त्स्य पापिनं रक्षितवन्तस्ते क इत्यतस्तानाह ॥ तस्येति द्वाभ्याम् । तद्रूपगुणस्वभावास्तस्य हरेरिव रूपं श्यामवर्णादि, गुणाः प्रभावादयः स्वभावश्च भक्तवात्सल्यादिश्च येषां ते तथा । अत एव मनोहराः श्रीहरेर्दूताश्चरन्तीत्यन्वयः । आत्मतन्त्रस्य स्वतन्त्रस्याधीशितुः पूर्णैश्वर्यस्य । परस्य निर्दोषगुणपूर्णस्य मायाधिपतेर्लक्ष्मीपतेः ॥ १७ ॥

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ।
रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ १८ ॥

सत्यधर्म – न चैतत्काकतालीयं तदागमनमिति मनुतेति दूतानभिधत्ते ॥ भूतानीति । विष्णोर्भूतानि दूतभूतानि प्राणिनः सुरपूजितान्यमरसमञ्चितानि महाद्भुतान्यत्याश्चर्यरूपाणि । यर्हि ते सर्वदा सर्वत्र चरन्ति तर्हि कुतो न लोकैर्विलोक्यन्त इत्यतो न वणिग्वीथ्यां त उपलभ्यन्त इत्याहुः ॥ दुर्दर्शलिङ्गानीति । अपुण्यवददर्शनीयचिन्हानि तद्भक्तिमतो मर्त्यान्परेभ्यो मदन्येभ्य इति सर्वतश्च । अथ कृतसुकृताविर्भावानन्तरं रक्षन्ति । यस्तद्भक्तिमतस्तस्मिन्भक्तिर्यस्य स इति मतः सम्मतः स मत्तश्चेदपि सर्वतोऽपि रक्षति । अथानन्तरं परेभ्य इतरेभ्यो मर्त्यान्मर्त्याननयति चेष्टयति नियमयतीति यावत् । मर्त्यान् णिलोपस्य स्थानिवद्भावेन न लोपाभावः । छान्दोग्योपनिषद्भाष्ये तज्जलानित्येतद्व्याख्यानावसरे योऽसौ जलेऽनितीत्याचार्योक्तेः पुरुनियामको राजा भवतीति शेषः । यमवादानुवादे मदिति मात्रे उच्चारितलाघवमर्थपूर्तिश्च भवतस्तत्र धियमनाधाय निधाय मत्त इति पदमिदमर्थभूमिकां सूचयामास व्यास इत्यवसेयम् । परेषामिभ्य आढ्यः सन्मर्त्यानिति वा । इभ्य आढ्य इति विश्वः । परमत्यन्तमिभ्य इति वा । यद्वा सर्वतो हिंसातः । अर्वषर्वहिंसायामिति धातुव्याख्यानात् ॥ १८ ॥

चट्टी – श्रीविष्णोर्भूतानि भृत्याः । दुर्दर्शानि द्रष्टुमशक्यानि लिङ्गानि रूपाणि येषां तानि तद्भक्तिमतः श्रीविष्णुभक्तान्परेभ्यः शत्रुभ्यः । परोऽरिपरमात्मनोरित्यभिधानात् । सर्वतोऽग्न्यादिभिश्च रक्षतीत्यर्थः ॥ १८ ॥

धर्मं तु साक्षाद् भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः ॥ १९ ॥

सत्यधर्म – हरिपरिचरश्चेच्चेतःपूर्वकं गरिष्ठदुरितं कथममूमुचदमोचयन्नित्यतो धर्ममर्म सूक्ष्मतरं तत्रैतादृशानिर्दर्शां का दशा युष्माकमिति कांश्चित्संगृह्णाति ॥ धर्ममिति । साक्षाद्भगवत्प्रणीतं धर्मं देवाः सिद्धमुख्या ऋषयो विद्याधरचारणादयोऽसुरा अपि न विदुः कुतो मनुष्या न विदुरिति वक्तव्यं कैमुत्यत एव सिद्धेर्न वक्तव्यमिति भावः ॥ १९ ॥

चट्टी – ननु श्रीविष्णुभक्ताश्चैते कथमधर्मिपक्षपातं कृतवन्तस्तत्राह ॥ धर्मं त्विति ॥ १९ ॥

स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥

सत्यधर्म – तर्हि सर्वाविदितश्चेद्धर्मः शशशृङ्गसदृशः स्यादित्यतस्तद्विपश्चितोऽपि कांश्चिदन्वाचिनोति ॥ स्वयम्भूरिति । स्वयं भगवान्भू रमा । अयमान्तरङ्गिको भाव इति न द्वादशेति मुद्रणं विरुणद्धीति ध्येयम् । अथवाऽनीशकोटिनिवेशपरा द्वादशेति मुद्रेति साऽपि स्थूलदृश्वनां प्रदर्शनार्थमधिकारिणामधिकानां भावस्य सर्वाङ्गीकरणीयत्वात् । अन्यथा येऽन्ये विभीषणहनूमदुपेन्द्रदत्ताः पार्थार्ष्णिषेणविदुरश्रुतसेनभूपा इत्यादिबहुमानावमानप्रसङ्गादिति लक्षणीयम् । स्वयम्भूर्ब्रह्मा कुमारः सनत्कुमारः कपिलः कश्चन सन् भागवतेऽर्थे भगवानृषिकोटिनिवेशात्स्वयंपदोदितभगवतः पृथगुक्तिरिति ज्ञेयम् । द्वितीयपक्षस्तु सुनायासः । मनुः स्वायम्भुवः । वैयासकिः । इञ् अकङादेशश्च । नय्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैजित्यैच् । व्यासवरुडेत्यादिवार्तिकोक्त्या शुकः । वयमस्मदाद्वयोश्चेति वयमिति सम्भवति ॥ २० ॥

चट्टी – ननु तेऽपि चेन्न जानन्ति तस्य सत्वे किं प्रमाणमिति तत्राह ॥ स्वयंभूरिति । कुमारः सनत्कुमारो मनुः स्वायंभुवो वैय्यासकिः श्रीशुकः । वयमित्यात्मानमेव बहुमन्यमानो निर्दिशति । न तु भटसाहित्येन बहुवचनम् ॥ २० ॥

द्वादशैते विजानीमो धर्मं भागवतं भटाः ।
गुह्यं विशुद्धं दुर्बोधं यज्ज्ञात्वाऽमृतमश्नुते ॥ २१ ॥

सत्यधर्म – गुह्यं गोप्यं दुर्बोधं विना श्रीनाथानुग्रहं विशुद्धं विशिष्टं शुद्धेभ्य इति विशुद्धं यं ज्ञात्वाऽमृतं मोक्षमश्नुते जनस्तं भागवतं धर्मं द्वादशैते विजानीमः । एते द्वादश सूर्या इति वा सूर्योऽग्निरिति पूर्वोक्तेः । स्वपितृत्वं तत्राविशेषितमिति द्वादशेत्युक्तिः । एते द्वादश वयं च विजानीम इत्यन्वयः । गुरुत्वान्न नामग्रहः । नेदं मुद्रणमेतत्पक्ष इति मन्तव्यम् ॥ २१ ॥

चट्टी – हे भटाः ॥ २१ ॥

एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥

सत्यधर्म – धर्माणां मध्ये श्रेयान्यो धर्मः स एवानेनाचरितोऽतो दूतैरुक्तं युक्तमिति जातं यदिदानीं तज्जातमग्रे वा जाग्रद्भिर्भवद्भिर्भवितव्यमिति स्थलास्थले विविच्य गन्तव्यमिति कैश्चिदपि श्लोकैः स्वकानन्वशासद्यम इत्याह ॥ एतावानित्यादिना । पुंसामित्युक्तगतिकं बहुवचनमाद्यर्थे वा । पुमादिमानां तन्नामग्रहणादिभिर्भगवति भक्तियोगो भक्तेर्योजनमित्येतावान्परमो धर्मः । स्मृत इत्यनेनैष मे सर्वधर्माणां धर्मोऽधिकतमो मत इत्यादिसमानकतामाहैतत्प्रमेयस्येति मेयम् ॥ २२ ॥

चट्टी – तमेव धर्ममाह ।। एतावानिति । तस्य हरेर्नामग्रहणादिभिर्भगवति भक्तियोग एतावान्पर उत्तमो धर्मः । एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदेत्युक्तेरित्यर्थः ।। २२ ।।

नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ।। २३ ।।

सत्यधर्म – इहेयताऽनेहसा सहवासे मयेयान्न ज्ञातो धर्मो भवद्भिरिति क्रमात्पुत्रेत्यनेन कप्रत्ययेन च लालनहेलने चकारेति ज्ञेयम् । अपिना तस्यानेतदर्हतां सूचयति ।। २३ ।।

चट्टी – न चात्र प्रमाणं वक्तव्यम् । दृष्टत्वादित्याह ।। नामोच्चारणेति । भक्तिपूर्वकनामोच्चारणमाहात्म्यमित्यर्थः । येनैव सहायान्तरमन्तरेण भक्तिपूर्वकनामोच्चारणेनेत्यर्थः ।। २३ ।।

एतावताऽलमघनिर्हरणाय पुंसां
सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि
नारायणेति म्रियमाण इयाय मुक्तिम् ।। २४ ।।

सत्यधर्म – गुणकर्मनाम्नां यच्छब्दा योगवृत्तय इति सङ्क्षेपे तथा भगवति विद्वद्रूढ्यैव सर्वशब्दवृत्त्यङ्गीकाराद्विद्वद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यत इत्यणुभाष्ये चोक्तेस्तत्रप्रसिद्धानां नारायणादिनाम्नामित्याद्याम्नानवद्विशेषकृत आनन्दो ब्रह्मेत्याद्युक्तानन्दादीनां गुणनामकत्वं कंसहिंसक इत्यादीनां कर्मशर्मत्वमिति व्यवहार इति ज्ञेयम् । यद्वा गुणकर्मनाम्नां सङ्कलय्य गुणकर्मोभयप्रयोजकानां नाम्नां कर्मणां नाम्नां गुणानां चेति वा । सङ्कीर्तनमित्येतावत्कृतेनाघहरणायालम् । मुक्तये चेत्युपलक्षणीयम् । उपैति मुक्तिमित्युक्तिस्वारस्यात् । यद्यतो नारायणेति पुत्रं विक्रुश्याघवान्म्रियमाणोऽजामिलोऽपि मुक्तिमुपैति । क्रियाप्रबन्धे लडित्युक्तेरुपैत्युपैदित्यर्थकं ज्ञेयम् । यावत्पुरा निपातयोरित्यनुशासनात्पुराशब्दाध्याहारे लटो लङर्थकतेति वा ज्ञेयम् । अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेदित्यादेस्तिम्रियेत्यत्र म्रौ सत्यपि तिर्लघुः पठनीयः ।। २४ ।।

चट्टी – येनैवेत्युक्तं विवृणोति ।। एतावतेति । भगवतो गुणकर्मनाम्नां नारायणेत्यादिगुणनाम्नां मधुसूदनेत्यादिकर्मनाम्नां च गुणानां कर्मणां नाम्नां वा संकीर्तनं सम्यक् भक्तिपूर्वकं कीर्तनं पुंसामघनिर्हरणायालं पर्याप्तम् । अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यभिधानात् । ननु नैतावन्मुक्त्यर्थमपेक्षितम् । भक्त्याद्यभावेऽपि पुत्रोपचरितेन नामोच्चारणेनैवाजामिलस्य मुक्तिदर्शनादित्यत आह

॥ विक्रुश्येति । यद्यस्मादघवानजामिलोऽपि म्रियमाणः सन् नारायणेति नाम्ना पुत्रं विक्रुश्याहूयानन्तरमेवैतावता नामस्वामिस्मरणाभिव्यक्तभक्तिपूर्वककीर्तनेनैव मुक्तिमुपैत्यवाप । तस्मादिति पूर्वेणान्वयः। ॥ यद्वा ॥ यच्छब्दः प्रश्नार्थे च क्वचिद्भवेत् । क्वचित्परामर्शवाची । क्वचिदाक्षेपवाचीत्यभिधानात् । ततोऽजामिलोऽपि पुत्रं विक्रुश्य मुक्तिमगाद्यत्, अगात्किं नैव । किन्तु एतावता प्रागुक्तभक्तिपूर्वकसंकीर्तनेनैवेत्यर्थः । यत्तु श्रीधरनामकौमुदीकाराभ्यामुक्तम् । अनेन श्लोकेन भक्तिरहितकीर्तनस्य कृत्स्नपापक्षयहेतुत्वमेव समर्थ्यते । यदि पर्याप्तिवचनोऽयमलंशब्दस्तर्हि प्रथमाप्रयोगेन भवितव्यम् । अलं मल्लो मल्लायेतिवत् । इह तु तृतीयाप्रयोगो दृश्यते । अतो निवारणवचनोऽयम् अलमिति । प्रसङ्गेनेतिवत् । ततश्चायमर्थः । भगवद्गुणकर्मनाम्नाम् । सम्यक्कीर्तनमिति यावत् । पुंसामघनिर्हरणायैतावतालमेतावन्नानुष्ठेयम् । पापक्षयमात्रस्यातितुच्छत्वात् । भगवत्कीर्तनस्यातिगरीयस्त्वात् । तदेव विवृणोति ॥ विक्रुश्येति । आमरणमभ्यस्तमहापापोऽजामिलोऽपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तच्च पुत्रं विक्रुश्य न तु श्रीहरिं कीर्तयित्वा तदपि न स्पष्टं म्रियमाणत्वेन शिथिलकरणत्वात् । तथाऽपि दैवगत्या तु पुत्रनाम्नो भगवन्नामत्वान्मुक्तिं समस्तानर्थनिवृत्तिलक्षणां निरतिशयानन्दरूपां च प्राप । नानर्थैकदेशस्य पापस्य निवृत्तिमात्रा । तत्रापि मुक्तिः किल बभूवेति । नैतन्मात्रं किंत्वधुनैव मुक्तिमुपैति । सांगुलिनिर्देशमभिधीयते । धर्मराजेन तत्समये तस्य जनस्य वर्तमानत्वाद्वेति । तदतितुच्छम् । नामाभासस्यैव कृत्स्नपापक्षयहेतुत्वाङ्गीकारे शरीरंभककर्मणामपि नाशावश्यंभावेनानादौ संसारे कदाचिन्नामाभासमुच्चारयतां तत्सिद्धान्तानुवर्तिनां सर्वेषामपि सद्यो मरणापातात्सर्वपुराणेषु श्रद्धाभक्त्यावृत्त्यादेरपि विधानात्केवलनामकीर्तनेन सर्वपापक्षयायोगाच्च । तथाहि । सायंप्रातर्गृणन्भक्त्या दुःखग्राहाद्विमुच्यत इति । अनुदिनमिदमादरेण गृणन्निति । श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्मगुणानां च तदर्थोऽखिलचेष्टितमित्याद्यस्मिन्नेव पुराणेषु पठ्यते। तत्र तत्र पुराणान्तरे च पापक्षयश्च भवति । स्मरतामहर्निशमित्यादि । अत्रैव च । तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विध्येकान्तविनिष्कृतिमित्यादिना सम्यक्कीर्तनादवगम्यते । किञ्च तथा सति किमिति मन्वादयो द्वादशाब्दानि प्रायश्चित्तानि स्मरेयुः । तेषामतिक्लेशसाध्यत्वात् । नामाभासस्य च सर्वसौलभ्यात् । नचावृत्तिः श्रद्धादिविधयः पापवासनाक्षयार्था इति वाच्यम् । तथात्वे वासनाक्षयार्थत्वेनापि भक्त्यादेरावश्यकत्वेन केवलकीर्तनस्य मुक्तिसाधनत्वप्रतिज्ञाव्याकोपात् । तस्माद्भक्तिपूर्वकमेव कीर्तनादिकमघहरम् । तथा चोक्तम् । सर्वपापहरं विष्णोर्नाम तद्भक्तिपूर्वकम् । अभक्त्योदाहृतं नैव फलदातृ भविष्यति । नामस्वामितया तस्य स्मरणं जायते यतः । भक्तस्यातो नामकीर्तिः संकेतादावपीरिता । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योर्विमुच्यतेति नारदीये । न चालंशब्दस्य पर्याप्त्यर्थत्वे एतावतेति तृतीयानुपपत्तिरिति वाच्यम् ।

अस्यास्मदुक्तिप्रकारेणोत्तरार्धेनान्वयात् । न च व्यवधानेनान्वयदोषः । संनिधानापेक्षया योग्यतायाः प्रबलत्वात् ।। उक्तं च व्यवधानेनान्वयोऽपि योग्यतापेक्षया भवेदिति ।। २४ ।।

प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्बत माययाऽलम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्मणि युज्यमानः ।। २५ ।।

सत्यधर्म – यज्ञादिकृतोऽप्यज्ञा इत्याज्ञापयति ।। प्रायेणेति । महाजनस्तत्त्वेन ज्ञातो देव्या मायया वारणरूपिण्या हरीच्छया प्रकृत्या चालं विमोहितमतिरिति हेतोस्त्रय्यामाम्नाये जडीकृतमतिरित-रत्राचलन्तीति जडीकृतमतिर्यस्य स तथा । मधुवन्मदप्रापिकां पुष्पं स्वर्गसुखम् । यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चित इति गीताभाष्ये मोक्षमप्यपेक्ष्य स्वर्गादिपुष्पयुक्तामित्युक्तेः । पुष्पितेति तारकादितचि ज्ञेयम् । तत्प्रतिपादिकायाम् । वैतानिके वितानो हि यज्ञः । वितानो यज्ञविस्तार इति विश्वः । तत्सम्बन्धिनि कर्मणि महति महायाससाध्ये । यद्वा वैतानिके यज्ञकर्मणि कर्मणि तद्भिन्ने क्रियान्तरे चेति वा । वितानः क्रतुकर्मणीति विश्वः । मायया युज्यमानः प्रेर्यमाणस्तदिदं न प्रायेण वेदेत्यन्वयः । माययेदं भवत्कीर्तनं विमोहितमतिर्विमं न सम्पत्प्रदं वा न ज्ञानप्रदं वेत्यूहिता सञ्जातोहा मतिर्यस्य स इति वा । एतेन जडीकृतमतिरिति नातिरिक्तमिति ज्ञेयम् । यदिदमलं निरर्थकं वेद तत्तस्मादयं न महाजन इति वा । अलं भूषणपर्याप्तिवारणेषु निरर्थक इति विश्वः । नारायणेति मन्त्रोऽस्ति वागस्ति वशवर्तिनी । तथाऽपि नरके घोरे पतन्तीत्येतदद्भुतमित्यादेः । बत विस्मये खेदे वा । बत खेदानुक्रोशविस्मय इति विश्वः । अमहति कर्मणीति व्यस्तं समस्तं च । तुच्छफलदत्वेन तुच्छे । अमं, न भवति मा ज्ञानं यस्मात्तत्तथा । तस्य हतिस्तिरस्क्रिया यस्य तदमहति । तच्च तत्कर्म च तस्मिन्निति क्रामिकार्थो ज्ञेयः । यद्वा मधु स्वर्गसुखं तद्रूपपुष्पितायामिति वा । यथोक्तमेकादशगीताभाष्यप्रमेयदीपिकासुधासु मधु द्यौरस्तु नः पिता मधु सुखहेतुरस्त्विति । आम्नायस्त्रयीत्यमरः ।। २५ ।।

चट्टी – नन्वेवं भक्तिपूर्वकं भगवन्नामकीर्तनं मुक्तिसाधनं चेत्सर्वे एतत्कुतो नानुतिष्ठन्तीत्यत आह ।। प्रायेणेति । प्रायेण प्राचुर्येणायं महाजनो बहुशो जनो देव्या द्योतमानया मायया भगवदिच्छयाऽलं मोहितमतिरत एव मधुपुष्पितायाम् आपाततः स्वर्गाख्यपुष्पप्रतिपादिकायां त्रय्यां श्रुतौ जडीकृताऽभि-निविष्टा मतिर्यस्य स तथा । आपातप्रतीतिमादाय वेदमुख्यार्थभूतमोक्षतत्साधनज्ञानशून्यः । अत एव महति महायाससाध्ये वैतानिके यज्ञसंबन्धिनि कर्मणि युज्यमानः संतप्तः सन्मोक्षाख्यं फलमिदं तत्साधनं भगवदनुस्मरणं च न वेदेत्यर्थः । तथा चोक्तम् । मन्दाधिकारिणा नित्यं तपसैव प्रतीक्षितुम् ।

मोक्षो न शक्यते धैर्यात्ततः स्वर्गादिकं वदन् । स्वर्गादिपुष्पफलतां ज्ञापयित्वा विमोक्षदम् । ज्ञानं वक्तुं तूत्तमानां नित्यो वेदः प्रवर्तते । इक्षुदण्डं ददानीति यथा भैषज्यरोचनम् । एवं मन्देषूत्तमेषु मोक्षमाहात्म्यमुच्यते । न ह्यल्पफलभाग्वेदो वासुदेवैकसंश्रय इति ॥ २५ ॥

एवं विमृश्य सुधियो भगवत्यनन्ते
सर्वात्मना विदधते खलु भावयोगम् ।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां
स्यात् पातकं तदपि हन्त्युरुगायवादः ॥ २६ ॥

सत्यधर्म – एवं ''क्षिप्रप्रसादसाधनं किमिति'' विमृश्य । तत्र हेतुः ॥ सुधिय इति । हे सुधियः। अनन्ते देशतः कालतो गुणतश्चान्तरहिते । यद्वाऽनन्तेऽबद्धे नित्यमुक्त इति यावत् । मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रह इत्यादेः । अति, अदि बन्धन इति धातुव्याख्यानात् । भगवति सर्वात्मना सर्वप्रकारेण भावयोगं भक्तिलक्षणोपायम् । भावो भक्तिरिति प्रोक्त इत्यादेः । मनोयोगमिति वा । भावश्चेष्टात्मेति विश्वः । विदधते कुर्वन्ति ते मे मम सकाशाद्दण्डं नार्हन्ति । तादृशा अपि यदि किञ्चित्कुर्युः पातकं तदाऽयं समय इति नमनं तनुतेत्याह ॥ अथेति । अमीषां तेषां स्याद्यदि पातकं तदपि दैववशादेवोपयातमप्युरुगायो ब्रह्मादिगीतो हरिस्तस्य वादो मुखवचनम् । गै शब्द इत्यतः कर्मणि घञि आदेच इत्यात्व आतो युकूचिण्कृतोरिति युकि रूपम् । हन्ति नाशयन्ति । वादो विषयकत्वं च मुखतो वचनं स्मृतमित्यभिधानादिति गीताभाष्येऽभिधानात् । खलु निश्चितमेतादृशा न दण्डमर्हन्ति शिक्षायोग्या न । अथाथाऽप्यमीषां तत्पातकं तदप्युरुगाया उरुं सर्वोत्तमं गायन्त इति ते तथा । बाहुलिकः कर्तर्यण् । उरु यथा तथा गायतीति णो वा । तैः सह वादः सम्भाषणादिरूप उरु जगद्गच्छति व्याप्नोतीत्युरुगो हरिस्तेन अयो लाभो वा । अयः शुभावहं दैवं वाऽभिव्यज्यते येषां ते उरुगायास्तैर्वाद इति वा । महापापिनो यत्संवादादपापा भवन्ति ते मद्दमनीया नेति किं वक्तव्यमिति भावोऽवधेयः । तुलयाम लवेनापि स्वर्गं वा नापुनर्भवम् । भगवत्सङ्गिसङ्गस्येत्यादेः ॥ २६ ॥

चट्टी – प्रायेणेत्यस्य व्यावर्त्यमाह ॥ एवमिति । ये सुधियो ज्ञानिन एवं भक्तिसहितमेव कीर्तनं मुक्तिसाधनमित्युक्तप्रकारेण विमृश्य सम्यगालोच्य भगवति भावयोगं भक्तियोगम् । भावो भक्तिः समुद्दिष्ट इति वचनात् । विदधते कुर्वन्तीत्यर्थः । अमीषां तावत्पातकं न स्यादेव । यदि स्यात् । उरुगायस्य नारायणस्य वादः कीर्तनं तदपि हन्ति ॥ २६ ॥

ते देवसिद्धपरिगीतपवित्रगाथा
ये साधवः समदृशो भगवत्प्रपन्नाः ।
तान् नोपसीदत हरेर्गदयाऽभिगुप्तान्
नैषां भयं न च वयं प्रभवाम दण्डे ।। २७ ।।

सत्यधर्म – श्रोतव्यं सर्वं श्रावयित्वा कर्तव्यंताननुशास्ति ।। त इति । ये भगवत्प्रपन्ना भगवान्प्रपन्नः शरणं प्राप्तो यैस्ते । समं निर्दोषं ब्रह्म पश्यन्तीति ते तथा । निर्दोषं हि समं ब्रह्मेत्यादेः । तत्तद्योग्यतामनुसृत्य भगवान्सन्निहित इति ज्ञानिनः । पण्डिताः समदर्शिन इत्यादेः । साधवः परापीडकास्ते । देवसिद्धपरिगीतपवित्रगाथा देवसिद्धैः परिगीताः पवित्रगाथाः स्वचर्यागानं येषां ते तथा देवादयोऽपि तान्स्तुवन्तीति भावः । तांस्तादृशान्नोपसीदत नावाप्नुत । गमनं न कार्यं कुत इत्यत आह ।। हरेरिति । गदया कौमोदिक्याऽभिगुप्तानभितो रक्षितान् । एषां सामान्यतो भयं नास्ति । वयं च दण्डे न च प्रभवाम न समर्थाः स्मः । नैषां भयं न च वयः प्रभवाम दण्ड इति वयः कालोऽपि न प्रभवतीति पाठार्थावसरलौ । ये अदेवसिद्धपरिगीतपवित्रगाथा असाधवः समदृशः समत्यन्तमदृशो ज्ञानहीना अभगवत्प्रपन्ना हरेर्गदयाऽभिगुप्तान् । हरेर्गदया अव्ययानामनेकार्थत्वादभिप्रेयस इति काठकखण्डार्थे अवज्ञार्थेऽभ्यभिधानादवज्ञायैव गुप्तान्न तु मानपूर्वकं तान्नोपसीदतेति न एषां सकाशाद्भयं न च । वयं दण्डे प्रभवामेति वा । हरेर्गं गीता च सा दया च तयाऽभिगुप्तान् । गं गीत इति विश्वः । अप विकृतकृतिमत्तया निर्देशपूर्वकं हर्षं सीदत । न एषां सकाशाद्भयं न सर्वमुर्वरितं पूर्ववत् । अप विकृतौ चौर्यनिर्देशहर्षयोरिति विश्व इति वा ।। २७ ।।

चट्टी – तदेव धर्मतत्त्वं विनिर्णीय भृत्याननुशास्ति ।। त इति । ये भगवंतं प्रपन्नास्ते देवैः सिद्धैश्च परिगीतपवित्रमाथा वर्णितपुण्यगाथाः । अतस्तान्नोपसीदत । तत्समीपमपि न गच्छतेत्यर्थः ।। २७ ।।

तानानयध्वमसतो विमुखान् मुकुन्द-
पादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैः रसज्ञैः
जुष्टाद् गृहे निरयवर्त्मनि बद्धतृष्णान् ।। २८ ।।

सत्यधर्म – असत आचारैः । निष्किञ्चनैर्निर्गता किञ्चनाऽपेक्षणीयविषयादीति ते तथा तैः । सुप्सुपेति समासः । परमहंसकुलैर्योगिसङ्घैः परं अहंसा निर्मत्सरास्तेषां कुलैरिति वा । हंसो

योगिमात्रेऽपि परमात्मनि मत्सर इति विश्वः । रसज्ञैः सारविद्भिः । रसः सारो वरः श्रेष्ठ इति गीताभाष्योक्तेः । अजस्रं निरन्तरं जुष्टात्सेवितान्मुकुन्दपादारविन्दमकरन्दरसाद्विमुखा इति निरयवर्त्मनि नरकमार्गे गृहे भार्यादौ बद्धतृष्णांस्तदेकनिष्ठानानयध्वमित्यर्थः । निरयवर्त्मनि गृहेऽसतोऽविद्यमानप्रायान् । तत्र हेतुर्बद्धतृष्णानिति । बद्धा प्रतिरुद्धा तृष्णा येषां ते तथा तदातृषानिति यावत् निष्किञ्चनै रसज्ञैः परमहंसकुलैर्जुष्टान्मुकुन्दपादारविन्दमकरन्दरसादजस्रमविमुखांस्तत्परानिति यावत्तान् अ आनयध्वमिति पदं नानयध्वमित्यर्थः । अः स्यान्नञर्थ इति हैम इति भानुः । सवर्णदीर्घश्छान्दसस्तान्मेति पूर्वस्मादावृत्त्याऽन्वेतव्यम् ॥ २८ ॥

चट्टी – के तर्हि दण्डार्थमानेया इत्यत्राह ॥ तानिति द्वाभ्याम् । असतो दुष्टान् । तानेवाह । मुकुन्दपादारविन्दयोर्यो मकरन्दरूपो रसस्तस्माद्विमुखान् । कथंभूतान् । निष्किञ्चनैरजस्रं जुष्टात् । तेषां दुष्टत्वज्ञापकमाह । निरयवर्त्मनि नरकद्वारे गृहे भार्यादौ बद्धा तृष्णा यैस्तान् ॥ २८ ॥

जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदाऽपि
तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥

सत्यधर्म – येषां जिव्हा रसना भगवद्गुणनामधेयं न वक्ति येषां चेतश्चेतोऽपि तच्चरणारविन्दं न स्मरति यच्छिरः शीर्ष्णा कृष्णाय नो नमति तानकृतविष्णुकृत्यानित्यननुष्ठितभगवत्सेवादिकर्मण आनयध्वम् । येषां भगवद्गुणनामधेयं जिव्हा न न वक्ति चेतश्च तच्चरणारविन्दं स्मरति यश्च कृष्णाय नो यच्छिर एकदा कदाचित्तच्चरणारविन्दं नमत्यसतः संसारेऽकृतविष्णुकृत्यान् अकृतमकृत्रिमं विष्णुकृत्यं येषां ते तान् । कृतं हि फलं तस्मै विष्णोः कृत्यं कर्म येषां ते न भवतीति तथा तान् । कृतमिदमलमिति पर्याप्तं तन्न भवति तद्विष्णुकृत्यं येषां ते तथा तान्वा । कृतं पर्याप्ते फल इति विश्वः । अकृतविष्णुविद्वेषानिति वा । कृत्यं विद्विष्टकार्ययोरिति विश्वः । हे कद सुखद स्वामिन्नित्यपि यच्छिरो नमति प्रव्हीभवति तानिति वा । ए अकारवाच्ये भगवति उर्वरितं पूर्ववत् । यः स्मरति मन्मथवदाचरति सौन्दर्यतच्चरणारविन्दं यद्यतो न नमति स कृष्णाय नो नेति । असतोऽमङ्गलस्य शिर आनयध्वम् । यत्तदित्यादयः शब्दाः पञ्चम्यन्ताः प्रकीर्तिता इति बृहद्भाष्योक्तेः । भगवत्सङ्गिसङ्गो न चेत्तमानयतेत्यप्याह ॥ कृष्णायनोनमिति । कृष्णायनेन भगवदाश्रयेण जनेनोनं रहितमत्यतिक्रम्य तस्यासतः शिर आनयध्वम् । अति लङ्घन इति विश्वः । रातं रतिस्तदस्यास्तीति रती हि भक्तस्तत् तद्वत् । यथोक्तं प्रथमतात्पर्ये । तद्वै धनुरिति व्याख्यावसरे स रथो हयास्त इति तत्सदृशा इत्यर्थः । तद्रथहयानां

दाहोक्तेरिति चतुर्दशेऽध्याये । त इषव इतीव । सदृशे वा प्रधाने वा कारणे वा तदित्ययम् । शब्दः सङ्घटते भेदे विद्यमानेऽपि तत्त्वत इति ब्रह्मतर्के । चरणारविन्दं रविन्दमन्धकारम् । द्यति खण्डयतीति । रविन्दमन्धकारे स्यादिति जयः । तन्न विद्यते येन तदरविन्दम् । चरणं चक्रमरविन्दं यस्य सः अरविन्दचरणः । चरणं पवित्रमिति श्रुतेः । चरण श्रीशचरणौ स्थिरीकुरु मनस्सु न इति चक्रस्तुत्युक्तेः । यद्यत्र धेयं निधेयं न तच्चेतो न तन्मनसो मनस्त्वमेव नास्तीत्यर्थः । यदित्यव्ययत्वाद्यत्रेत्यपि भवतीति बृहद्भाष्योक्तेः । या भगवद्गुणनां भगवन्भगवन्निति गुणनां अभ्यासं नाकृत सा जिव्हा न । यच्च न स्मरति तच्चरणारविन्दं ध्येयं नेति तच्चेतश्चेत इति न वक्ति जन इति शेषः । गुणनिका चरणादिकगोचरेति मध्वविजयोक्तेः । विष्णुकृत्यान्विष्णुद्वेषिणो विष्णोः कृत्यं येषां त इत्युभयपक्षेऽप्यर्थो बोध्यः । इतश्च इतोऽप्येतावदन्वयव्यतिरेकत उत्तमतानुभवेऽपि वा । या जिव्हा भगवद्गुणनामधा न इयं जनता सा नेति नास्तीति वक्तीति वा । या जिव्हा भगवत् ऐश्वर्यशालि गुणनामधा ब्रह्मेति । यो देवानां नामधा इति श्रुतेः। न वक्ति सा जिव्हा इयं दार्दुरिकीवेत्युक्तेति वा बुद्धिसन्निधानादियमुक्तिरिति वा ।

यद्यपि पद्ये पद्याऽर्थस्य विद्यते हृद्यता ।
विस्तरदुस्तरदरतो विरतं नरतं मनो व* नो विद्धि ॥ २९ ॥
(*अत्र वेत्यत्रे ममेति भाव्यमितिभाति)

चट्टी – किञ्च यत् येषां जिह्वेत्याद्यन्वयः । अत्र श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इत्युक्तनवके कीर्तनं स्मरणं वन्दनं चेति त्रिकं साक्षादुक्तम् । तदितरषट्कं तु विष्णुकृत्यपदेनोच्यत इति ज्ञातव्यम् ॥ २९ ॥

कृष्णाङ्घ्रिपद्ममधुलिट् न पुनर्विसृष्ट-
मायागुणेषु रमते वृजिनावहेषु ।
अन्यस्तु कामहत आत्मरजः प्रमार्ष्टु-
मीहेत कर्म यत एव रजः पुनः स्यात् ॥ ३० ॥

सत्यधर्म – यो मधुलिट् मधु लेढीति भ्रमरस्तत्तुलो वृजिनावहेषु पापापादकेषु विसृष्टा विष्णुभक्त्या हेयत्वेन त्यक्ता ये मायागुणा ममतादयस्तेषु पुनर्न रमते आसक्तो न भवति तं तत्समूहं नानयध्वमित्यन्वयः । अन्यो विधुततदास्वादः कामहत इच्छाधीनो विषयवासनाप्रतिहतो वाऽऽत्मरजः पूर्वकर्मनिर्मितं रागं तेन तद्दोषो गृह्यते । तत्प्रमार्ष्टुं मार्जयितुं परिहर्तुमिति यावत् । यतः पुरत आचरितात्पुना रजःस्पृष्टं स्यादेव तत्कर्म ईहेत तमानयध्वम् । स च द्विविधः । किञ्चित्कालं मन्निलये

स्थित्वा तत्कर्मफलनिर्मोकानन्तरं प्राप्यभगवल्लोकः । एकस्त्वनुत्थाने स्थाने स्थापनीय इत्युभयोर-प्यानयनं युक्तमित्युक्तं युक्तमित्यभिप्रायः । बाहिरङ्गिकमान्तरङ्गिकमस्मदुपपादितं भावमाविर्भावयामास व्यासः पुनर्न रमतेऽन्य इत्येतैस्तुना च विशेषसूचकेनेति ज्ञेयम् । अत एव विसृष्टपदेन त्यागार्थ-कताव्याख्यानमेतत्सख्यं भजते । वृजिनं कल्मषेऽपि स्यादिति विश्वः । ऋकारे रेफोऽप्यपेक्षित लाघवगौरवानुरोधेन न किश्चन व्रजनमस्तीत्यन्यत्र वृत्तसम्पत्त्यै पठनीयाविति ज्ञेयम् । वृजिनं व्रजिनं दुःखं क्लेशो बाधेति चोच्यत इति बृहद्भाष्योक्तेः । अत एव कुञ्जरशौचवदिति पूर्वमुक्तं संश्लिष्टमिति च सन्तोष्टव्यम् । कर्दमं कर्दमेनोदकेन मर्दयन्निवायमनुपायज्ञस्यापायपदं भवतीति भावः ।। ३० ।।

चट्टी – दण्डचानुक्त्वेदानीं भगवद्भजनमेवाशेषपापनिवर्तकं न कर्मादिकमित्युपसंहरति ।। कृष्णेति । श्रीकृष्णांघ्रिपद्मयोर्मधुलिट् आस्वादयतीति तथा । तुच्छत्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुनर्न रमते । अन्यस्तु मध्वास्वादनरहितोऽत एव कामाभिभूतः सन् आत्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहते करोति । यतो यस्मिन्कर्मण्यनुष्ठितेऽपि रजः पापं पुनः स्यादेव । समूलं न निवर्तत इत्यर्थः । पापपरिहारमार्जनबुध्या कृतमपि कर्म भगवद्भक्तिशून्यं न पुनातीति भावः ।। ३० ।।

तत् क्षम्यतां स भगवान् पुरुषः पुराणो
नारायणः स्वपुरुषैर्यदसत्कृतं नः ।

स्वानामहो न विदुषां रचिताञ्जलीनां
क्षान्तिर्वरीयसि नमः पुरुषाय भूम्ने ।। ३१ ।।

सत्यधर्म – दूतसम्भूतो मन्तुस्तन्मात्रपर्यवसायी न किन्तु स्वामिनो निकामं फलोपलम्भक इति भीतः प्रेतनाथः श्रीनाथं क्षमापयतीत्याह ।। तदिति । स भगवान्पुरुषः शरीरस्थः पूर्णषड्गुणो वा पुरुषो विष्णुरुषणात्सर्वपापानां पूर्णः पुरुष उच्यत इति बृहदारण्यकभाष्योक्तेः पापतापक इति वा । स्वपुरुषैः स्वदूतैर्यदसत्कृतमवज्ञातं तन्न एवेति भगवान्नारायणस्तत्क्षम्यताम् । सामान्यार्थान्तरमुखेन शंसति ।। स्वानामिति । रचिताञ्जलीनां सम्पुटीकृतकरपुटीनां स्वानां स्वकीयानां वरीयसि महत्यंहसि सत्यपि क्षान्तिर्विदुषां ज्ञानिनां महतां युक्तेति नाहो नाश्चर्यम् । अञ्जलिः कुडवे विद्यादञ्जलिः करसम्पुट इति विश्वः । क्षमणानन्तरं यदसदहोऽनभिव्यक्तो मोक्षश्च कृतं फलितमित्यर्थः । अहर्मुहूर्तं विज्ञेयमहर्मोक्षेऽपि भण्यते । असदनुज्जृम्भितज्ञानं बलं वा कृतं सम्पादितमिति । अहर्दिनं प्रकाशश्च क्वचिज्ज्ञानं बलं तथेति बृहद्भाष्योक्तेः । गुणश्छदस्त्वाद्वरीयसि परतरे स्वामिनीति वा । त्वया देयो दायश्चायनायक इत्यतो नम इति प्रह्वत्वमेवार्हणमित्याह ।। नम इति । भूम्न इति भावभवित्रोरभेदविवक्षयेति ज्ञेयम् । पुरुषैर्ब्रह्मादि-भिरायो गम्यो भूमा योग्यतया पूर्णता येनेति वा । यथोक्तं बृहद्भाष्ये । पुरुषविध इति पदव्याख्याने ओषेत्सर्वमनुष्णः सन् ब्रह्मा विष्णुप्रसादत इति । एतेन पुरुषेति पुनर्वचनस्य भूमपदस्य च

वैय्यर्थ्याक्लिष्टते भ्रष्टे इति ज्ञेयम् । भूयिष्ठान्ते नम उक्तिं विधेमेत्यादेः अन्तेऽपि स्वोक्तेर्मङ्गल-रूपतासूचनार्थं भगवन्नमनरूपं मङ्गलं कृतवानिति रहस्यम् ॥ ३१ ॥

चट्टी – भगवन्तं क्षमापयति ॥ तदिति । सः भगवान् नः स्वपुरुषैर्यद्यस्मादसत् अन्याय्यं कृतम् । तत्तस्मात्स्वयमेव क्षम्यतां सहताम् । तदर्थं नास्माभिः प्रार्थनीयमिति भावः । इदानीमस्मत्प्रार्थनयाऽपि क्षम्यतामित्याह ॥ स्वानामिति । स्वानां भक्तानाम् । अहो आश्चर्यभूतमाहात्म्यं नविदुषामजानताम् । किञ्च भूम्ने पूर्णाय पुरुषाय नम इत्युक्तिपुरःसरं रचितांजलीनां न इति पूर्वेणान्वयः । यद्यपि यमो भगवद्भक्तमाहात्म्यं जानाति । अन्यथा स्वभृत्यान्प्रति पूर्वोक्तोपदेशासंभवात् । तथाऽपि भृत्यकृतापराधं स्वकृतापराधमिति मत्वा नविदुषामित्युक्तवानिति ज्ञातव्यम् । क्षान्तिरहितपुरुषप्रार्थनाया निष्फलत्वादित्यत आह ॥ क्षान्तिरिति । वरीयसि महत्तमे भगवति क्षान्तिरस्त्येवेत्यर्थः । क्षमा महतां स्वभावः । किं पुनर्महत्तमस्य भगवत इति भावेन वरीयसीत्युक्तमिति ज्ञातव्यम् ॥ यद्वा ॥ स भगवान्स्वपुरुषैः स्वभृत्यैरस्माभिर्यदसत्कृतम् नस्तदन्याय्यं क्षम्यताम् । अत्र हेतुत्रयम् । स्वानां स्वकीयानां नविदुषामज्ञानां रचिताञ्जलीनां विहितकरसंपुटानामिति । ननु द्रव्यादिदण्डमन्तरेण कथं भगवान्क्षमिष्यतीति तत्राह ॥ क्षान्तिरिति । पुरुषाय नम इत्युक्तिमात्रेण वरीयसि क्षान्तिरुदेत्यहो आश्चर्यमित्यर्थः ॥ ३१ ॥

श्रीशुक उवाच

इत्थं स्वभर्तृगदितं भगवन्महित्वं
संस्मृत्य विस्मितधियो यमकिङ्करास्ते ।
तेनाच्युताश्रयजनं प्रतिशङ्कमाना
द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ॥ ३२ ॥

सत्यधर्म – ते दूता नाथगाथां मद्दलोलूखलनीतिरीतिं निशम्य किं चक्रुरित्यतस्तेऽपि भागवतोत्तंसा इति तेभ्यस्तद्वचो रुरुच इत्याह ॥ इत्थमिति । महित्वं महत्त्वं श्रुत्वाऽथ संस्मृत्य तेन कारणेन प्राक्तनस्वावमानेन च ततः प्रभृति तदारभ्य द्रष्टुं क्रूरदृष्ट्या विषयीकर्तुं बिभ्यति भीता भवन्ति । स्म राजन्नित्यत्र स्मर अजन् इति छेदः । त्वमपि गच्छन्निति चरमसमय इति स्मरेत्यान्तरङ्गिकः शुकाशय इति । अन्यथा स्म पादपूरण इत्यभिधानात्तन्मात्रप्रतिपत्त्यर्थमप्रयोक्तव्यत्वात् ॥ ३२ ॥

तस्मात् सङ्कीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् ।
महतामपि कौरव्य विद्ध्येकान्तविनिष्कृतम् ॥ ३३ ॥

सत्यधर्म – यदर्थमयमितिहासशंसनायासो वैय्यासकिस्तन्निगमयति ॥ तस्मादिति । महतामंहसामितरापरिहारपापानामेकान्तविनिष्कृतं मुख्यप्रायश्चित्तं रहस्यप्रायश्चित्तं वा त्वयाऽपीदं कियदिति नाविश्वसनीयमिति विधत्ते ॥ कौरव्य त्वं विद्धीति । हि यतो हे कौरव्य यत्र भीष्ममुख्या धर्मोपदेष्टारस्तत्रोत्पन्नस्त्वमपि । विष्णोः संकीर्तनं जगन्मङ्गलं महतामंहसामप्येकान्तविनिष्कृतिवज्ज्ञाता संवादात्मायं वाद इति वा ॥ ३३ ॥

चट्टी – जगतोऽपि मङ्गलरूपं महतां प्रायश्चित्तान्तरनिवृत्त्या नाम विद्धि । अंहसामेकान्तविनिष्कृत मात्यन्तिकप्रायश्चित्तम् ॥ ३२-३३ ॥

शृण्वतो गृणतो वीर्याण्युद्दामानि हरेर्मुहुः ।
यथा सुजातया भक्त्या शुध्येन्नात्मा व्रतादिभिः ॥ ३४ ॥

सत्यधर्म – शृण्वतो गुरुमुखात् । गृणतः स्वयमुच्चारयतः । उद्दामान्यत्युत्तमानि सुजाता या सर्वस्मादुत्तम इति स्नेहमतिः सुस्थिरा भक्तिरुद्दिष्टा तया मुक्तिर्न चान्यथेति बृहद्भाष्योक्तेस्तादृश्याऽऽत्मा जीवो मनो वा यथा शुध्येन्न तथा व्रतादिभिः केवलैर्न शुध्येत् । तर्हि भक्तेरपीयं नीतिर्व्रतादिवद्दुरवस्था चेत्किं तत्सम्पादनापादनेनेत्यतो वाऽऽह ॥ अव्रतादिभिरिति । व्रतादिभिर्विना ना पुरुषः ॥ ३४ ॥

चट्टी – तदेवाह ॥ शृण्वत इति । व्रतादिभिस्तथा न सिद्ध्येत् । तेन विस्मितधिय इत्यन्वयः ॥ यद्वा ॥ तेन भगवता निमित्तेन परिशङ्कमाना अस्मानेवैष हन्यादिति शङ्कावन्तः । अच्युतजनं द्रष्टुमपि बिभ्यति स्मेत्यन्वयः ॥ ३३-३४ ॥

इतिहासमिमं गुह्यं भगवान् कुम्भसम्भवः ।
कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

सत्यधर्म – कुम्भसम्भवोऽगस्त्यः । भगवानिति विश्वासजननाय । हरिमर्चयन्नित्यनेनोद्धृत्य, भुजमुच्यत इत्यादिवच्छपथपूर्वकमवादीदिति ध्वनयतीति ज्ञेयम् । मलये तन्नामकगिरौ हरिमर्चयन्नासीनः कथयामासेत्यन्वयः । भगवानिति निर्दिशन्देशको व्यासोऽपीति मन्दमान्दोलयति शिर इति ध्वनिः ॥ ३५ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे तृतीयोऽध्यायः ॥ ६-३ ॥

चट्टी – कुंभसंभवोऽगस्त्यो मलयपर्वते आसीनः श्रीहरिमर्चयन्पुनः पुनर्विश्वासार्थं श्रीहरेः पादं स्पृशन्नित्यर्थः ॥ ३५ ॥ इति श्रीभागवतटिप्पण्यां चेट्टीत्याख्यायां तृतीयोऽध्यायः ॥ ६-३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

राजोवाच
देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ।
सामासिकस्त्वया प्रोक्तो यस्तु स्वायम्भुवेऽन्तरे ॥ १ ॥

सत्यधर्म – ॥ हरिः ॐ ॥ राजा तृतीयादौ सङ्कुच्योक्तं किञ्चित्सर्गादिकं विविच्यार्थापयेति प्रार्थयते ॥ राजेति । देवासुरनृणां नागानामित्यादि पृथग्ग्रहणं विलक्षणताया जन्मन आम्नानार्थम् । स्वायम्भुवान्तरे सामासिकः समासः सङ्कोचः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ स्रष्टृत्वं प्राक् प्रतिज्ञातं जन्माद्यस्येति श्रीहरेः प्रपञ्चतेऽस्मिन्नध्याये । तद्राजा तत्र पृच्छति ॥ देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तः । प्रोक्तस्तृतीयस्कन्धे ॥ १ ॥

तस्यैव व्यासमिच्छामि श्रोतुं ते भगवन् यथा ।
अनुसर्गं यथा शक्त्या ससर्ज भगवान् परः ॥ २ ॥

सत्यधर्म – व्यासो हि विस्तारः । भगवान्परः । यथा शक्त्येति द्वे पदे । शक्त्या स्वसामर्थ्येन रमया सहित इति वा । शक्यत्वाच्छक्तयो भार्या इत्यादेः । यथा ससर्ज तथाऽनुसर्गमवान्तरसृष्टिं च ते सकाशात्कथं ससर्जेति श्रोतुमिच्छामि यथा सम्यगिति वा ॥ २ ॥

चट्टी – व्यासं विस्तारं त्वत्तो यथा यथावज्ज्ञातुं शक्त्या स्वसामर्थ्येन अनुसर्गमण्डान्तरावान्तर-सृष्टिम् । महदाद्यण्डपर्यन्तः सर्गोऽण्डे ब्रह्मणस्तु यः । अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यत इति वचनात् ॥ २, ३ ॥

सूत उवाच
इति सम्प्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ।
प्रतिनन्द्य महायोगी जगाद मुनिसत्तमाः ॥ ३ ॥

सत्यधर्म –सूत इत्येतत्प्राग्राज्ञोक्तमुत्तरितं किं वा कथान्तरं कथितं शुकेनेति शौनकप्रश्न-वाक्यमध्याहर्तव्यम् । व्यतिहारो विशिंषन्ति हीतरवदिति सूत्रीय एष तु वाऽतिवदतीति विशिंषन्ति हि यथेतरेषु विशेषणम् । उत्तमत्वं हि देवानां मुक्तावपि हि मानवात् । तेभ्यः प्राणः तस्मान्नित्यमुक्तस्य वै हरेरिति भाष्यटीकायां प्रश्नाद्यभावात्प्राणविशेषणमेवेदमिति न वाच्यम् । प्रश्नाद्यध्याहारस्य कर्तुं

शक्यत्वादित्यादिना प्रश्नोत्तराध्याहारोक्तेः । न चाध्याहारनैरङ्क्श्याद्राजोवाचेत्येतदनु शौनक उवाचेत्यादित एवाध्याहरणं न्याय्यं लघुवचनं च भवतीति वाच्यम् । मुनिसत्तमा इत्यतः प्राक्तनग्रन्थं पीडा न सम्पाद्येति जोषमास्व । अन्यथा मुनिसत्तमा इति विशेष्यसम्बोधनं दुर्मनस्कं स्यादिति मन्तव्यम् । एवं सति नापृष्टः कस्यचिदिति वचश्चसम्मानितं भवतीति भावनीयम् । प्रश्नस्य सामीचीन्यं नाम भगवद्भक्तिपूर्वकत्वम् । वक्तृश्रोत्रोः सद्गतिगमकत्वं वा । सामर्थ्यं न नास्ति वक्तुरिति वक्तुं बादरायणिरिति प्रष्टुरविवक्षयोपेक्षणं प्रतिक्षेप्तुं राजर्षेरिति । एतदुभयानुयायि च प्रतिनन्द्येति प्रतिनन्दनम् । सांसारिकविविधव्यसनाव्यग्रो नाग्रे जगाद जगाम चेति नेत्याह ॥ महायोगीति । हे मुनिसत्तमाः शौनकादयः ॥ ३ ॥

ऋषिरुवाच

यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ।
अन्तस्समुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥

सत्यधर्म – जन्माद्यस्य यत इत्यादिनोदितं नातिव्याप्नोत् । यतो दक्षादयो न दक्षाः स्वतः सर्जन इति तत्सर्जनं च वक्तुं पीठमारचयति ॥ यदेति । प्राचीनबर्हिषो नाम्ना दशपुत्राः प्रचेतनामान उन्मग्नास्तपोर्थं निमग्नाः समुद्रात् । ल्यब्लोपनिमित्ता पञ्चमीयम् । समुद्रमुत्तार्यान्तः प्रान्ते । अन्तर्मध्ये तथा प्रान्त इति विश्वः । तत्तीरप्रान्तमारभ्येत्यर्थः । गां भूमिं वृक्षैर्वृतां स्वेषामनीषत्कालं जलनिमज्जनात्प्राचीनबर्हिषो निवृत्तत्वादराजकतया कृषीवलादिविकलतया तरुप्ररोहणमित्यूहनीयम् ॥ ४ ॥

चट्टी – यथा ससर्ज दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रस्तावनयाऽऽह ॥ यदेत्यादिना । प्राचीनबर्हिषः पुत्राः प्रचेतसो प्रचेतोनामका यदाऽन्तःसमुद्रात् समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथिवीं द्रुमैर्वृतां ददृशुः । नारदोपदेशतः प्राचीनबर्हिषो निवृत्त्याऽराजके सति कृष्याद्यभावादिति भावः ॥ ४ ॥

द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ।
मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥

सत्यधर्म – द्रुमेभ्यः क्रुधद्रुहेति चतुर्थी । तपोदीपितमन्यवस्तपसा दीपित उज्ज्वलितो मन्युः कोपो येषां ते तथा । अनेन कोपवैफल्यं नास्तीति दुर्बलकोपो दंष्ट्रामूल इत्याभाणकातिक्रमणं सूचयति । तद्दिधक्षया वृक्षदाहेच्छया मुखतो वायुमग्निं च ससृजुः । भाविफलानुकूल्यात्परस्परमैत्र्यादुभयसर्जनं ज्ञेयम् ॥ ५ ॥

चट्टी – तपसा दीपितो मन्युर्येषां ते तथा। तद्दिधक्षया तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥

ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह।
राजोवाच महान् सोमो मन्युं प्रशमयन्निव ॥ ६ ॥

सत्यधर्म – ताभ्यामनिलानलाभ्याम्। कुरूद्वहेत्यनेन त्वमपि राजेति जागृहि प्रजापालन इति द्योतयति। सतीसु सर्वासु देवतासु किं सोमस्यैवेयानुदरानल इत्यत आह ॥ राजेति। सोमो वै वनस्पतीनां राजेत्यादेः। कथितं तेन कुतस्ते कुर्युरित्यत उक्तं महानिति। सोऽपि कोपी चेद्व्याघ्रेणोरणेनय इति चेन्नेत्यप्याह ॥ सोम इति। उमाः प्रजास्ताभिः सहित इति सोमः। विरहपालनं न तत्साहित्यं सम्भवति। यथोक्तम्। सोमो हिनोति मर्त्यमित्यृग्भाष्यटीकयोः। ऊमैर्युक्तत्वतोऽपि वा ऊमैर्भूतैः। भूतानि वै ऊमा इति श्रुतेः। सह ऊमैर्वतत इति सोम इति। श्रुतौ भाष्ये च ऊमा इति पाठ इति व्याकर्तारः केचित्। भवन्त्यूमा इत्यष्टमाष्टकसप्तमाध्यायप्रथमवर्गे श्रवणं बलम्। एवं तत्रैव मदन्त्यूमा इति ऋगन्तरोक्तिश्चेति ज्ञेयम्। ऊरीकृताश्च मा उमास्ताभिः सहितः सोमो भगवान्मुख्योऽमुख्याश्चेतरे। यथोक्तम्। ओमा स इत्यृग्व्याख्याभाष्यटीकयोः। आ समन्तात्स्वीकृता मा ओमा इति च शब्दिताः। ओन्नामा भगवान्विष्णुस्तेन वा निर्मिताः सुराः। ओता मानेषु मा वैषु प्रोता ओमा इतीरिताः। आ इत्यनुवाद इत्यारभ्य नैघण्टुकैरित्यन्तेन ऋग्भाष्यटीकोक्तेः। राजा परिवृढे चन्द्र इति धनञ्जयोक्तेरेकेनैव तन्त्रेणैवार्थद्वयग्रहणसम्भवात्सोम इत्यतिरेक इति व्यतिरेकः सम्पादितोऽनेन वेदितव्यः। शमयन्निव स्वल्पं शमयन्नित्यर्थः। उपमार्थे तथाऽल्पत्वे चेवशब्दः प्रयुज्यत इति शब्दनिर्णय इति बृहद्भाष्योक्तेः। सादृश्यार्थकत्वे तु भावी अशम इति प्रतीतेरुत्तरानानुगुण्यं सोमस्य श्रमवैय्यर्थ्यं भायाच्चेति युक्तोऽयमुक्तोऽर्थः। अगाधक्रोधस्य च शनैः शमनस्यौचित्यात् ॥ ६ ॥

चट्टी – ताभ्यां वाय्वग्निभ्यां दह्यमानास्तांन्द्रुमानुपलभ्य निरीक्ष्य वनस्पतीनां राजा सोम उवाच। मा द्रुमेभ्य इति नवभिः ॥। ६ ॥

मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ।
विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥

सत्यधर्म – तत्प्रकारमाह। हे महाभागा इति सुमुखीकर्तुं हे भाग्यशालिनः। द्रुमेभ्यो द्रोग्धुं माऽर्हथ मऽयं न योग्या भवत। प्रजानां पतयो विवर्धयिषवो वर्धयितुकामा उभयथाऽपि न भयदानं युक्तमिति भावः। नो हिता इति वक्ति ॥ स्मृता इति। प्रागेव पातृरहिता इति क्षीणा वृक्षा इत्याह। दीनेभ्यस्तप्तेभ्यः कृपास्पदेभ्यो वा। दीङुपताप इति धातुव्याख्यानात् ॥ ७ ॥

चट्टी – हे महाभागा द्रुमेभ्यो द्रोग्धुं द्रोहं कर्तुम् । क्रुधद्रुहेर्ष्येत्यादीनां संप्रदानत्वाच्चतुर्थी । यतो विवर्धयिषवो विशेषेण वर्धयितुमिच्छवः । प्रजानां पतयः पालकाश्च ॥ ७ ॥

आदौ प्रजापतिपतिर्भगवान् हरिरव्ययः ।
वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥

सत्यधर्म – प्रजापतीनां प्रजापतेः ब्रह्मादीनां ब्रह्मणो वा पतिः स्वामी । वनस्पतयः वृक्षाः । वनस्पतिर्वृक्षमात्रे विना पुष्पफले द्रुम इति विश्वः । अफलाः सुकुसुमा वनस्पतयस्तान् । ओषधीर्धान्यान्यूर्जं देवान्नम् । यथोक्तं बृहद्भाष्ये । ऊर्जं देवान्नमुद्दिष्टमूर्जितास्तु गुणास्तथेति । इषं पित्र्यादि । ऊर्जं नो धेहि द्विपदे चतुष्पदे । ईषमूर्जमस्मासु धेह्यूर्जं तदाथा ऊर्जं मे दत्त सरस्वतीमिषमित्यादिश्रुतेः । नेयमवान्तरसृष्टिरित्यवादीदादाविति । प्रजापतिर्न विधातेति भगवानिति । सोऽपि भगवान्हरिवातार्केति विश्वान्न मातरिश्वादय इति वक्तुमव्यय इत्येकानुपूर्व्या विशेषणानि ज्ञेयानि । स तु न दूरेऽस्तीति वाऽऽह ॥ अव्यय इति । अविं सूर्यमयते गच्छतीति । ध्येयः सदा सवित्रित्यादेः स तथा । अविः शैले रवाविति विश्वः । अवयः शैलमेषार्का इत्यभिधानात् ॥ ८ ॥

चट्टी – प्रजापालकानां भवतां प्रजाभोग्यदाहोऽनुचित इत्याह ॥ आदाविति त्रिभिः ॥ ऊर्जं देवान्नं इषं पित्र्यन्नम् । वनस्पत्यादीनूर्जादित्वेन ससर्जेत्यर्थः ॥ ८ ॥

अन्नं चराणामचरा ह्यपादः पादचारिणाम् ।
अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥

सत्यधर्म – साधारणं प्राणधारणान्नमाह ॥ अन्नमिति । चराणां चेतनानामचरा व्रीह्यादयोऽपादः पादशून्यः। पाच्छब्दो वा । ततश्च न बहुवचनक्रमव्यतिक्रमः । पादचारिणामहस्ताश्चतुष्पदो विहिताः पश्चनखादयः । अन्नमिति सर्वत्रान्वेतव्यम् । विना द्रोहं महीरुहाणां दाहे हर्यनुग्रहस्तत्सृष्टनष्टेर्न युष्मासु भवेदिति भावः । तोषितो हरिरित्युत्तरस्वारस्यात् ॥ ९ ॥

चट्टी – तदेवाह ॥ अन्नमिति ॥ ९ ॥

यूयं च पित्राऽन्वादिष्टा देवदेवेन चानघाः ।
प्रजासर्गाय हि कथं वृक्षान् निर्दग्धुमर्हथ ॥ १० ॥

सत्यधर्म – प्रतिपन्नप्रतिपत्तिभावानां न कार्यव्यापृतिरित्यतो व्याहरति ॥ यूयमित्यादिना । आदिष्टास्तत्प्रायः । देवदेवेन विष्णुना च किमर्थमित्यत आह ॥ प्रजासर्गायेति । यदर्थं सृष्टास्तद्दाहो हेय

इत्याह ॥ कथमिति । न तद्दैवं देवास्माकमित्यतो वाऽऽह ॥ आदिष्टा इति । आ समीचीनं सर्जनार्जकं दैवं दिष्टं येषां ते तथा । पित्रेत्यनेनाज्ञाया अवज्ञानं न युक्तमित्याह । तन्मात्राज्ञा चेन्मन्मात्रेण कदाचिदनुसरणीया कदाचिदननुसरणेऽपि स्नेहविशेषात्स सहतेत्यत आह ॥ देवदेवेन चेति । सकलसुरपूज्येनेश्वरेण चेति ॥ १० ॥

चट्टी – पित्रा प्राचीनबर्हिषा । देवदेवेन चतुर्मुखेन ॥ १० ॥

आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् ।
पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥

सत्यधर्म – दीपितं तप उद्दीपितं यच्छत स्वाधीनं कुरुत । सतां मार्गं दीनत्राणरूपमध्वानमातिष्ठताश्रयत । यद्यपि शंससि न वशोऽस्माकमयमाचार इत्यत आह ॥ पित्रेति । वः पित्रा प्राचीनबर्हिषा पितामहप्रपितामहमुखैर्जुष्टं सेवितम् । पितामहाद्यास्तु पितरो नाम कीर्तिता इत्यैतरेयभाष्योक्तदिशा पितृभिरित्यनेन सर्वलाभेऽपि तन्मार्गं कुलपरम्परागतो मध्ये न सङ्कुकोचेति सूचयति विविच्य वचनेनेति ज्ञेयम् ॥ ११ ॥

चट्टी – तस्मादातिष्ठत आश्रयत । सतां मार्गमुपशमं पित्रादिभिर्जुष्टम् ॥ ११ ॥

तोकानां पितरौ बन्धू दृशः पक्ष्म स्त्रियः पतिः ।
नृपः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् ॥ १२ ॥

सत्यधर्म – भूतानामपि भगवदधिष्ठानत्वादेतत्कर्मानुष्ठानेनेष्टं घटेत युष्माकमिति सोपयुक्तं युक्तं वक्ति ॥ तोकानामिति । पितरौ मातापितरौ बन्धू इति यथायथं विकृतमन्वेति । आवृत्तस्य सुहृदित्यस्य पक्ष्मेत्याद्यन्वयो वा । दृशो नेत्रस्य पक्ष्म लोचनलोम । पक्ष्म नेत्रलोमनि दृग्दृष्टिरिति विश्वामरौ । स्त्रियः स्त्रियाः । क्वचित्स्त्रिया इति सा सरणिः सरला । भार्यायाः पतिर्भर्ता । मध्ये तान्कटाक्षयति ॥ नृप इति भिक्षूणां सन्यासिनां गृहे गृहस्थोऽज्ञानां बुधः सुहृत् बुधः किञ्चिदज्ञस्य सुहृत्सुमनस्क इति वा । एतत्पक्षे बन्ध्वन्वयः सर्वत्रेति ज्ञेयम् ॥ १२ ॥

चट्टी – प्रजानां प्रजापतिरेव बन्धुरतस्तज्जीविकानाशो न कर्तव्य इति दृष्टान्तपञ्चकेनाह ॥ तोकानामिति । तोकानां बालानां पितरौ मातापितरौ बन्धुपदं सर्वत्रान्वेतव्यम् । अज्ञानां ज्ञानदो बुध एव सुहृत् ॥ १२ ॥

अन्तर्देहेषु भूतानामात्माऽऽस्ते हरिरीश्वरः ।
सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥

सत्यधर्म – भूतानां प्राणिनां देहेषु शरीरेषु हरिरीश्वर ईशेभ्यो ब्रह्मरुद्रादिभ्यो वरः । आत्मा चिदानन्दादयो यस्य । गुणा आप्ताः सदैव तु । स आत्मेति प्रविज्ञेयो गुणानामाप्तितो हरिः । आत्मा भवति व्यापको भवतीति च बृहदारण्यकोपनिषद्भाष्योक्तेर्गुणपूर्णत्वेन व्याप्तत्वेन वाऽऽत्मा । आस्ते यतः सर्वं तद्धिष्ण्यं तत्स्थानमीक्षध्वं पश्यत । तेन किमित्यतः फलमालपति ।। एवमिति । वो युष्माभिर्युष्मदुपरि वा यद्धिष्ण्यं कोपपावकोऽन्तो नाशक इति सर्वं मदुक्तमीक्षध्वम् । आलोचयतेति वा । तत्राप्यन्तरिति वा । धिष्ण्यं स्थाने च पावक इति विश्वः । असौ हरिस्तोषितो भवतीति शेषः । न हि तत्तोषः सुखदुःखायव्ययान्यतर इत्यतो हिस्तुष्टे तु तत्र किमलभ्यमनन्त ईश इत्यादि-मानसिद्धसर्वफलसौलभ्यमालपति ।। १३ ।।

चट्टी – ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह ।। अन्तर्देहेष्विति । एवं चेत् वो युष्माभिस्तोषितो भवति ।। १३ ।।

यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् ।
आत्मजिज्ञासया यच्छेत् सगुणानतिवर्तते ।। १४ ।।

सत्यधर्म – आकाशाद्धृदयाकाशाद्भगवतो वा । आकाशस्तल्लिङ्गादित्यादेः । सकलं वाङ्मनसदेवताया आकाशाद्रमाया इति वा आकाशनामिका श्रीश्चेति बृहद्भाष्योक्तेः । विनायकाद्वा । आकाशो विघ्न उद्दिष्टः काशते हि पृथूदर इति च । आकाशाभिमानयुक्त्या चादिसृष्ट्यादिविघ्नदत्वात् । एतदादिनिमित्तेन देहे समुत्पतितमुल्बणं वक्ष्यमाणकारणमन्तरेणापरिहरणीयं मन्युमात्मजिज्ञासया परमात्मविचारेण । ज्ञानेच्छान्तरित्यारभ्य जिज्ञासितं सुसम्पन्नमित्याद्यन्तेन सुधायां तत्त्वप्रकाशिकायां च रूढ्या लक्षणया विचारपरत्वोक्तेः । यो यच्छेत्सगुणान्संसारापादकानति अतिक्रम्य वर्तते । समुत् पतितमिति वा छेदः । समुच्च ससन्तोषश्च भवतीति शेषः । वर्तते वर्तिष्यत इति पूर्वोक्तरीत्या वाऽर्थो ज्ञेयः । कोपस्यापादकोऽनापादकश्च हरिरेव मुख्यत इति तज्जिज्ञासावश्यम्भाविनीति सा कार्येति भावः । आकाशाद्देहे समुत्पतितमाकस्मिकमिति व्याख्यानं तदेतत्कर्मवाददाशुरित्याद्युक्तं निमित्तं वेदितृभिर्न केवलं न क्षमनीयं चैददादिदूषणैः ।। १४ ।।

चट्टी – आकाशाद्देहे समुत्पतिते । आकस्मिकमित्यर्थः । आत्मजिज्ञासया भगवत एव स्वतन्त्रत्वादन्यः कोऽपि विषयो नास्तीति परमात्मविचारेण यो नियच्छेत् । सः गुणान्सत्त्वादीन् । अतिवर्तते अतिक्रान्तो भवति । मुक्तो भवतीति यावत् ।। १४ ।।

अलं दग्धैर्द्रुमैर्दीनैः शेषाणां शिवमस्तु वः ।
वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ।। १५ ।।

सत्यधर्म – अलं पर्याप्तं बहुलं जातमितस्त्यजतेति भावः । शिष्यन्त इति शेषास्तेषां वो भवद्भ्यः शिवं मङ्गलं क्षेम इति यावत् । अस्तु दृषद्धृदया अपि द्रवद्धृदया भवन्ति । नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमानित्यादेरत एतदुपायमिदमुपायनं विधुर्बोधयति ।। वार्क्षीति । एषा वरा उत्तमा । वरयति वरानिति वा वरा । एतेनानूढेति प्रौढमतिस्सूचितवानिति वा मन्तव्यम् । कन्या दीप्तिमती । अनेन कौरूप्यं पराकरणकारणं नास्तीत्यसूचीति ज्ञेयम् । पञ्च कन्याः स्मरेन्नित्यमिति कन्यात्वं व्यभिचारीति तदप्रयोजकीकृत्य विना व्यभिचारं वरयितृत्वप्रयुक्तवरत्वमविवाहितत्वे प्रयोजकमुक्तमिति प्रयोजकैर्विभावनीयम् । परीक्षाऽपि न क्षणपरिक्षयेण तत्रापि न परलपनालापनत इति सूचयत्येषा प्रत्यक्षसिद्धेत्यनेन । वार्क्षीति तद्विधक्षणमोक्षणं लक्षीकृत्योक्तमाप्सरस्यापीति ज्ञेयम् । पत्नीत्वे भार्यात्वे । भार्यात्व इत्याद्यनुदाहार्योदाहृत्य च पत्नीत्व इति न यागाद्यनुपयोगिजात्यन्तरजातेयमिति ध्वनयाञ्चक्र इति ज्ञेयम् । अत एव पत्युर्न इति सूत्रव्याख्यावसरे कथं तर्हि वृषलस्य पत्नीति शङ्का पत्नीव पत्नीत्युपचार इत्युत्तरं च सङ्गच्छत इति विभावनीयम् ।। १५ ।।

चट्टी – शेषाणां द्रुमाणां वो युष्माकं च शिवमस्तु । वः सकाशादिति वा । वृक्षरक्षणार्थं तदीयां कन्यां ददाति वार्क्षीति वृक्षैः पालिता ।। १५ ।।

इत्यामन्त्र्य वरारोहां कन्यामाप्सरसीं नृप ।

सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे ।। १६ ।।

सत्यधर्म – आमन्त्र्य प्रचेतसः सहालोच्य कन्यां वरारोहाम् । उत्तमो हि वर आरोहो नितम्बप्रदेशो यस्याः सा ताम् । आरोह आरोहणे नितम्बे चेति विश्वः । आप्सरसीमप्सरसः प्रम्लोचायाः सुतां कुण्डुजातां सोमो दत्वा ययौ । आज्ञाया अनुल्लङ्घनीयतामाह ।। राजेति । तेऽपि न दण्डभीतां यत्तां जगृहुरित्याह ।। धर्मेणोपयेमिर इति । एकैवैकस्य पाणिगृहीती विहिता कथमेते सर्वे एका प्रिया इत्यतोऽनुरूपं निदर्शनमपि वा दर्शयति । धर्मेण । लुप्तोपमेयम् । धर्मराजेनेवोपयेमिरे स यथा चतुर्भिः सह पाञ्चालीमेकलां तथोपयेमिर इति । न निबन्धानो विद्यादिपदं पदं च धर्मेणेति निबबन्ध तेनायमान्तरङ्गिको भावो ममेति सूचयामासेति सुचेतस्कैः सन्तोष्टव्यम् । अत्र यल्लेख्यं तत्पूर्वार्धेऽक्रूरोऽध्यगात्पुरेत्यत्र लिखितमनुसन्धेयम् ।। १६ ।।

चट्टी – आमन्त्र्य सांत्वयित्वा वर आरोहो नितंबप्रदेशो यस्यास्ताम् । आप्सरसीं अप्सरसः प्रम्लोचायाः सुताम् ।। १६-१७ ।।

तेभ्यस्तस्यामभूद् राजन् दक्षः प्राचेतसः किल ।
यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥

सत्यधर्म – यस्य दक्षस्य प्रजाविसर्गेण तत्सृष्ट्या त्रयो लोका आपूरिताः सम्यक् पूर्णाः । स तेभ्यः प्रचेतोभ्यो दक्षो नाम्ना प्राचेतसस्तदपत्यतायाः । तदेवाह ॥ तस्यामिति । दक्षः सृष्ट्यादिकर्मणि समर्थ इति वा किल सत्यमित्यर्थः । किलशब्दः सत्यनृत्ययोरिति विश्वः ॥ १७ ॥

यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ।
रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥

सत्यधर्म – अवहितः सावधानमानसो दुहितृवत्सल इत्युत्तरदृष्ट्या ॥ १८ ॥

चट्टी – दुहितृवत्सल इत्यनेन तस्य कन्यावंश एवेति सूचयति । मम सकाशात् ॥ १८ ॥

मनसैवासृजत् पूर्वं प्रजापतिरिमाः प्रजाः ।
देवासुरमनुष्यादीन् नभःस्थलजलौकसः ॥ १९ ॥

सत्यधर्म – एष्यत्कथोपयोगिनीं काञ्चन कथां कथयति ॥ प्रजापतिरिति । दक्षः पूर्वं प्रथमतः सृष्टौ देवासुरमनुष्यादीन्नभस्थलजलौकसामित्यत्रौकःशब्दः सर्वान्वयी । रेतःपुरस्करणं पूर्वश्लोके तेनैवोत्तरत्र भाविनी भूयसी सृष्टिरिति मनसैवेत्यत्र तत्पुरस्करणं तु तत्पूर्वभावित्वान्मानसिक्याः सृष्टेरिति भावेनेति भावः ॥ १९ ॥

चट्टी – मनसा ससर्जेत्युक्तं विवृणोति ॥ मनसेति । प्रजापतिर्दक्षः ॥ १९ ॥

तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ।
विन्ध्यपादानुपव्रज्य सोऽचरद् दुश्चरं तपः ॥ २० ॥

सत्यधर्म – तं मानसिकमबृंहितं स्वपरकार्याननुकूलत्वेनापूर्णम् । विन्ध्यपादान्विन्ध्यस्य गिरेः पादाः प्रत्यन्तपर्वतास्तान्दुश्चरमितरैस्तपोऽचरच्चचार ॥ २० ॥

चट्टी – अबृंहितं असंवृद्धम् । विंध्यस्य पादान्सन्निहितपर्वतान् ॥ २० ॥

तत्राघमर्षणं नाम तीर्थं पापहरं परम् ।
उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥

सत्यधर्म – तत्र विन्ध्यपादेष्वघमर्षणं नाम नाम्ना तीर्थमृषिनिषेवितं जलम् । तीर्थमवतारर्षिजुष्टाम्भ इति विश्वः । उपस्पृश्य स्नानादिकं कृत्वेत्यर्थः । अनुसवनं निरन्तरम् ॥ २१ ॥

चट्टी – तत्र तीर्थमस्ति । तत्र तीर्थेऽनुसवनं प्रतिसंध्यमुपस्पृश्य स्नात्वा ॥ २१ ॥

अस्तौषीद् हंसगुह्येन भगवन्तमधोक्षजम् ।
तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥

सत्यधर्म – हंसगुह्येन तन्नामकेन मन्त्रेणास्तौषीत्स्तुतवान् । अधोक्षजमक्षेभ्योऽक्षादीन्द्रियेभ्यो जातं यज्ज्ञानं तदधः कृतं येन स तथा । नेन्द्रियाणि नानुमानमित्यादेः । तं भगवन्तम् । यतो येन कस्य दक्षस्य हरिरतुष्यत्तद्धंसगुह्यं तुभ्यमभिधास्यामि । क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् । पत्ये शेत इत्याद्युक्तेस्तुभ्यमिति चतुर्थी भवति । तुभ्यं तदभिधास्यामीति प्रतिश्रुते विदितैतदभिधानो राजाऽपृच्छद्यतो येन कस्याधिकारिणो हरिरतुष्यदिति तदुत्तरयति मतिमाञ्छुकः । काशीतलवाहिनी गङ्गा कं बलवन्तं न बाधते शीतमित्यादिवत्कस्य दक्षस्येत्यादीति प्रश्नोत्तरतया योज्यमिति पदचमत्कृत्या ध्वन्यते ॥ २२ ॥

चट्टी – हंसगुह्याख्येन स्तोत्रेण । कस्य दक्षस्य । यतो येन स्तोत्रेण ॥ २२ ॥

प्रजापतिरुवाच

नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे ।
अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानावधये स्वयम्भुवे ॥ २३ ॥

सत्यधर्म – पराय नमः परोऽरिपरमात्मनोरित्यभिधानादेतदभिधानं हरेरिति संज्ञोपसर्जनी-भूतास्त्वित्यादेर्न स्मै । स्तुतिपदानां वस्तुस्तुतिमात्रतात्पर्यकत्वान्नार्थिकी पुनरुक्तिर्दोषस्तथैव सुधादौ कथितत्वात् । ननु संज्ञात्वेऽपि शब्दः कस्मै यदा भवेदित्यृग्भाष्यव्याख्यावसरे प्रवेशनाद्विशां वानादिति पक्षद्वयेऽपि विश्व इति रूपं न सिध्यति । सर्वशब्दपर्यायस्यैव विश्वशब्दस्य सर्वनामसंज्ञा-स्मरणात्सर्वनाम्नः परस्य जसः शीभावविधानादिति तत्राह ॥ शब्द इति । यथा खलु कस्मै देवाय हविषा विधेमेत्यत्र प्रजापतिपर्यायस्य शब्दस्य सर्वनामसंज्ञाभावेऽपि सर्वे विधयश्छन्दसि बहुला भवन्तीति सर्वनाम्नः स्मा इति सर्वनामकार्यं दृश्यत इति टीकायां कथयित्वा कथनाच्च नमः परस्मै पुरुषायेत्यत्रैव । विष्णुसहस्रनाम्नि च कः किमिति नामद्वयेऽकयेति रूढेरेकत्रैकत्र च रूढित्वेऽपि सर्वनामसंज्ञाया विना राज्ञामाज्ञां स्वीकार्यत्वात् । अन्यथा नामवैचित्र्यासम्पत्तेरनुच्चार्यत्वापत्तेश्चेत्येवं बहुस्थले कथमिदं समाधानमिति चेत् । सत्यम् । वचः संवलितमिति मन्त्रतया गोपनीयत्वात्

मोनयदासाप्रपक्षिव्यत्यस्तपक्षितारौ चेत्यादिवद्धरेरितरवैलक्षण्यतां बोधयन्विचक्षण एवमवोचदिति किञ्चित्सान्त्वनोपपत्तेः । अयं परोऽपि परवञ्चननादिमांश्चेद्दोषवान्स्यात्ततः स्याच्चाप्राथ्य इत्यत आह ॥ स्वयम्भुव इति । स्वयं भवतीति स्वयम्भूः । ननु तथाऽप्यशितेऽपि लशुने न शान्तो व्याधिरिति विधिं ये मन्वते तथा तन्मते विधौ स्वयम्भूश्चतुरानन इति कोशाद्व्यावृत्तिर्नेति पुनरार्तिः स्यादित्यत आह ॥ अवितथानुभूतय इति । अवितथा अप्रतिहता अमोघाऽनुभूतिर्ज्ञानं यस्य स तथा । तथा चाज्ञानं च चतुर्वारमित्यादेर्विधिरधिक्षिप्तः । स्वाभिलषितसिद्धये तथाऽस्तवीति ॥

गुणत्रयेति । गुणानां त्रयं मुनित्रयमित्यादाविवाभेदेऽप्यवयवावयविभावेन घटकतालोकितेत्युपपन्नं गुणत्रयमिति मन्तव्यम् । तस्याभासः प्रतीतिः कार्यतः सर्जनस्य तत्र निमित्तं दैवकालादिकं साधारणकारणं तद्बन्धुरुत्तेजकत्वात् । गुणत्रयशब्देन तदुत्तेजकोपादाने चिदचित्प्रकृती आभासस्तु प्रतिबिम्बो जीवः । आभासकाभास आभास एव चेत्यादेः । निमित्तं कालादिकं तद्बन्धवे वा । गुणत्रयस्याभासोऽप्रतिभानं तन्निमित्तबन्धवे मोक्षदायेति यावदिति वा । गुणतत्त्वबुद्धिभिर्गुणेषु भूतमात्रासु शब्दादिषु तत्त्वबुद्धिभिर्मे मम एव सुखजनका इति रहस्यमतिभिर्गुणेष्वप्रधानेषु तत्त्वबुद्धिः परमात्मत्वबुद्धिर्येषां तैरिति वा । तत्त्वं स्वरूपे परमात्मनीति विश्वः । अदृष्टधाम्नेऽज्ञातस्वस्वरूपायादर्शितवैकुण्ठादि गृहादि वाऽदृष्टस्वतेजसे वा गुणतत्त्वबुद्धिभिर्गुणेषु भागवतज्ञानानन्दादिषु तत्त्वस्य भगवत्स्वरूपत्वस्य बुद्धिर्येषां तैः । नेह नानास्ति किञ्चन । एवं धर्मान्पृथक्पश्यन्नित्यादेर्भेदज्ञानस्यानर्थताश्रवणात् । ब्रह्मणस्तद्गुणानां च भेददर्श्यधरं तमः । भेदाभेदप्रदर्शी च मध्यमंतु तमो विशेत् । ईषद्भेदप्रदर्शी च तम एवोत्तरं विशेदिति बृहद्भाष्योक्तेः । अदृष्टमीषद्दृष्टं साकल्येनानाकलितमिति यावत् धाम स्वरूपं यस्येति तस्मै । निवृत्तमानावधये मानस्य परिमाणस्यावधिः सीमा स निवृत्तो यस्मात्परिमाणातीताय व्यासायेति यावत् मानानां वेदानामवधिः । प्रतिपादनावसानं निवृत्तं यस्मिन्निति तस्मै वेदा अपि नावेदयितुं साकल्येन शक्ता इति भावः । निवृत्तो नितरां वृत्तो हि मानानामवधिः साक्षी तद्रूपायेति वा । निवृत्तौ नितरां वृत्तं प्रवर्तनं लोकानां याभ्यां तौ मा च रमा चानश्च वायुश्च तौ अवधी दुःखस्पृष्टतदस्पृष्टयोर्येन स तस्मै । नित्याऽदुःखा रमा । इयदामननात् । श्रीर्वायुश्च । नियतौ हरिणैव त्वित्यादिबृहदारण्यकभाष्यादित्यादेः । लोकमाता मा । अवधिस्त्ववसाने स्यात्सीम्नीत्यमरविश्वौ । निवृत्तमानावधये निरहङ्कारशिरोमणये निवृत्तास्सदाचारास्तेषु मानरसत्कारश्चित्तसमुन्नतिर्वा तस्यावधये तद्दाननिदानायेति वा निवृत्तं गतं मानं लयो यस्य सः स चावधिनिषेधशेषः स चेति वा । मानं ज्ञानं लयश्चैवेति बृहद्भाष्यादेः । नम इत्यन्वयः ॥ २३ ॥

चट्टी – तदेवाह ॥ नम इति द्वादशभिः ॥ अत्र सर्वत्र गुणिनिष्ठगुणाभिधानलक्षणायाः स्तुतेर्देवतातोषत्वेन मन्त्रावृत्तिवन्न पौनरुक्त्यं न वाऽत्यन्तसङ्गत्यपेक्षेति ज्ञातव्यम् । पराय परमात्मने

नमः । तस्य लक्षणमाह । पराय निर्दोषगुणपूर्णाय । निर्दोषगुणपूर्णत्वात्परमाहुर्जनार्दनमित्युक्तेः । परत्वमुपपादयति ॥ अवितथेत्यादिना । अवितथा यथार्था काप्यप्रतिहताऽनुभूतिर्यस्य तस्मै सत्यज्ञानाय। सत्यं ज्ञानमिति श्रुतेः । गुणत्रयेणाभासः सृष्टिस्तत्र निमित्तयोः प्रकृतिपुरुषयोर्बन्धुभूताय। तत्र स्थित्वा ताभ्यां सृष्टौ प्रवर्तमानाय गुणत्रयप्रवृत्तिनिमित्ताव्यक्ताश्रयाय वा। स नो बन्धुमसति निरविन्दन्निति श्रुतेः । निवृत्तमाने परिमाणे ज्ञाने वाऽवधिर्मर्यादा यस्मात्तथा। सत्यं ज्ञानमनन्तमिति श्रुतेः । मानं ज्ञानं लयश्चेति मर्यादा चेति कथ्यत इत्यभिधानम् ॥ यद्वा ॥ निवृत्तं मानं प्रमाणं यस्मात्स तथा । यतो वाचो निवर्तन्त इति श्रुतेः । व्याप्तश्चेत्कुतो नोपलभ्यत इत्यत आह ॥ अदृष्टेति । गुणेषु शब्दादिविषयेषु तत्त्वबुद्धिः पुरुषार्थबुद्धिर्येषां तैः । विषयलंपटैरिति यावत् ॥ अदृष्टधाम्ने । अज्ञातस्वरूपाय । न चक्षुषा पश्यति कश्चिदेनमिति श्रुतिः । स्वयंभुवे स्वतःसिद्धाय । स भगवान् कस्मिंश्चित्प्रतिष्ठित इति । स्वे महीम्नीति श्रुतेरित्यर्थः ॥ २३ ॥

न यस्य सख्यं पुरुषो वेत्ति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनोऽव्यक्तदृष्टिस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥

तात्पर्यम् – गुणो यथा गुणिनः । कश्चित्पुरस्थितो गुणभूतः प्रधानभूतस्य राज्ञः ममासौ सखेति राज्ञा चिन्तितमपि न जानाति । 'यथा राज्ञः प्रियत्वं तु भृत्यो वेद न चात्मनः । तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोस्तु त' इति स्कान्दे ॥ २४ ॥

सत्यधर्म – गुणो विषयो गुणिनो विषयिण इन्द्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति तद्वदिति परविवरणे प्रतिपत्तिप्रसक्तिरहितस्य शब्दादेर्विषयस्य वेदनाधिकारिविज्ञाता निदर्शनीयता न प्राज्ञसम्मतेति स्वयं विवृत्य तत्र प्रमाणं स्कान्दवचनं चोदाहरति ॥ गुण इति । कश्चित्पुरस्थः पुरत एव स्थितोऽपि । गुण इति मौलपदं तस्यार्थो गुणभूत इति । अप्रधानो नूतनमन्त्र्यादिरभिधानमभिहितं प्राक् तदनुसन्धेयम् । गुणिन इत्यनूद्य प्रधानभूतस्य राज्ञ इति व्याख्यानम् । ममासौ सखेति राज्ञा चिन्तितमपि न जानाति नानुसन्धत्ते दुरूहत्वात्तच्चित्तस्येति न जानाति राज्ञश्चिन्तनीयम् । यथा राज्ञ आत्मनः स्वस्य प्रियत्वमन्तर्गर्भं भृत्यः स्थूलदृश्वा न वेद न जानाति राज्ञ आत्मनो मनसस्तत्सम्बन्धि प्रियत्वमिति तन्त्रेणावृत्त्याऽन्वयो वा । स्ववचनभाष्यस्थचिन्तितपदस्वारस्यात् । तथा जीव एकस्मिन्सन्नपि शरीरे यत्सख्यं स्वस्थित्यन्वयगम्यं येन भगवता सख्यं न वेद महामोहोऽनेन सूचितः । तुरेतस्मात्तं भगवन्तं विशेषयत्यतादृशैतन्मोहयितृत्वेन ते तस्मै नमः । तस्मै ते तस्मा इव द्वितीयस्य नम्यस्याभावान्नम इति वा ॥ ततोऽयं मूलार्थः ॥ सखा पुरुषो जीवो मूलकृत्स्वयमेव तस्मै तच्छब्दप्रवत्तिनिमित्तमालपति । अस्मिन्प्रात्यक्षिके पुरे शरीरे वसन्वासं कुर्वन्निति । संवसतः सख्युः सह

ख्यायमानस्य । सोऽपि नेतीतीरयति ॥ पुरे वसत इति । पुरुषः पुरुषु स्थितेः पुराख्येष्वपि देहेषु हृत्पुर्यपि वसत्यसाविति बृहद्भाष्योक्तेः । अत एव पूर्वं वसत इत्येवोक्तिः । समानस्थिति-निमित्तककर्मलेपलोपं ज्ञापयति । गुणोऽप्रधानोपरि ततः कश्चिदव्यक्तदृष्टिर्मन्दमतिर्यस्य भगवतो ज्ञानात्मकस्येति वा । येति ज्ञानं समुद्दिष्टमिति तात्पर्यान्तरात् । महेशायोत्सवस्वामिने ईशत्वेन शब्दितशिवादिर्महान्येन तस्मै वा । अवेति वेत्तीति पाठौ द्वावप्यद्वितीयौ । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति श्रुतिमनुकरोत्यनेनेति ज्ञेयम् ॥ २४ ॥

चट्टी – अदृष्टधामत्वमुपपादयति ॥ न यस्येति द्वाभ्याम् । सखा पुरुषो जीवोऽस्मिन्पुरे देहे वसन्नप्यत्रैव संवसतः सख्युर्यस्य सख्यम् । शरीरेन्द्रियादिप्रवर्तकत्वं लक्षणं न वेत्ति । परस्परसखित्वं त्वेकशरीराश्रयत्वेन । द्वा सुपर्णेति श्रुतेः । तत्र दृष्टान्तमाह ॥ गुण इति । यथा कश्चिद्गुणोऽप्रधानः । भृत्य इति यावत् । गुणिनो भृत्यस्वामिनः प्रधानभूतस्य राज्ञः पुरःस्थितोऽपि ममासौ सखेति गंभीरेण राज्ञा चिन्तितमपि न जानाति । यतो व्यक्तदृष्टिः । स्थूलदृष्टिः । अनेंगितज्ञस्तथेत्यर्थः ॥ तदुक्तम् ॥ यथा राज्ञः प्रियत्वं तु भृत्यो वेद न चात्मनः । तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोऽस्तु त इति स्कान्दे ॥ महेशाय । प्रतिसमर्थाय । समर्थ ईश इत्युक्त इति वचनात् ॥ २४ ॥

देहोऽसवोऽक्षा मन(सो)वो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ २५ ॥

तात्पर्यम् – **'देहमानी वैश्रवणो मरुतः प्राणमानिनः । इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तः-करणात्मकः । नैते विन्दन्ति स्वात्मानं परं वापि विमोहिताः । जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः । सोऽपि वेद हरिं नैव सम्यक्सैव हि सर्वविदि'ति च ॥ २५ ॥**

सत्यधर्म – ननु देहोऽसवोऽक्षा मनव इति श्लोके केषाञ्चिज्ज्ञानसामान्यहीनानां तत्प्रसक्तेरे-वायुक्तेस्तत एव न विदुरिति तन्निषेधोऽयुक्त इत्यतो मानेनैव तदभिमानिनो ज्ञानप्रसक्तिमतो नामनिर्देशपूर्वकं तथैव पुमानिति नामनुष्यादिजीववाचीति च यथाविवक्षं विवक्षुरर्थं समग्रं श्लोकं व्याकरोति ॥ देहमानीत्यादिना । देहमानी तदभिमानवान्वैश्रवणः कुबेरो विश्रवसोऽपत्यम् । विश्रवसो विश्रवणाविति विश्रवणादेशः । विश्रवशब्दस्य विश्रवणश्च शशिवादिगणे निपातितः स्थानिवत्सूत्रस्य कौस्तुभरीत्या शब्दान्तराणि प्रत्ययविषयाणीति वा बोध्यम् । असव इति विवृणोति ॥ मरुत इति । इन्द्राद्याः । मूलेऽक्षपदोदितेन्द्रियस्वामिनः । मनव इत्यर्थापयति ॥ रुद्र इति । अन्तःकरणात्मक-स्तद्वृत्तिविशेषविवक्षया मूले बहुवचनम् । मन् अवबोधन इति मनुर्हि बुद्धिस्तदुपादानत्वादन्तःकरणं तत्स्वामित्वान्मनो रुद्र उदाहृत इत्यादे रुद्रो गृहीतः ।

ननु ब्रह्माद्या मनुसंज्ञा य इति छान्दोग्यभाष्ये मनवो बोधवैशेष्याद्देवा ब्रह्मादयः स्मृता इति गीतातात्पर्ये चेत्येवमादिषु मनुशब्दस्य ब्रह्मादिवाचकत्वावगमात्तत्त्यागेन त्रिनेत्रग्रहणं यदि मनोभिमाननिमित्तकं भवेत्तदपि भवेन्मनसोऽपि ब्रह्मा सरस्वती वायुर्मन आद्यभिमानिन इति बृहद्भाष्ये सर्वे सर्वाभिमानिन इति मानाच्च तथा पूर्वोदीरितमानेनोमाचन्द्रादेर्ग्रहणमप्रयोजकमिति किं पुरहरपुरस्करणमिति चेत्। न। जीवाभिमानी ब्रह्मा त्विति किञ्चिज्ज्ञत्वेनोक्तेभ्य एतेभ्य उत्कृष्यवचनात्तेनैव व्याख्यातो ब्रह्मणा मरुदित्यादेर्वायोः कैमुत्येनैव तद्भार्यादीनामप्यवचनीयत्वादत्र तद्ग्रहानौचितीव भवग्रहणेनैव भवानीचन्द्रादीनां कैमुत्येनैवाविज्ञत्वं प्राप्नोतीति तद्ग्रहानुचितता चेति रुद्रोऽन्तःकरणात्मक इत्येवोक्तमिति मन्तव्यम् । एते कुबेरादयः स्वात्मानं स्वस्वरूपं परमितरस्वरूपं च विमोहिताः स्वस्वकर्मानुरोधेन प्रकृत्या हरीच्छया च हरिं न विदन्ति न जानते। जीवाभिमानी जीवान्तर्यामी सन् तत्प्रेरको ब्रह्मा सर्वं स्वरूपं परं चालोचने वेद। सोचि लोपे चेत्पादपूरणमिति सुलोपे सति वृद्धौ च सैष दाशरथी राम इत्यादिवत्सन्धिरवधेयः । स हरिरेव सर्ववित्स्वपरगताखिलविशेषज्ञो हीति सर्वविदित्यादिप्रसिद्धिं द्योतयति । स एव हि सर्वविदिति वक्तव्ये सैवेति वदन्स्कन्दो लोकजननी चेज्ज्ञानीयादिति कश्चिदपि विपश्चिच्छङ्केत सोऽपि सम्यङ्न वेदेति तदपाकृतिमपि सूचितवानिति मतिमद्भिर्मननीयम् । सा लक्ष्मीः समुदाहृतेत्येकाक्षरघण्टुः । यद्वा प्रजापतिरित्यनेन पूर्तावतिरिक्तं ब्रह्मपदं मम योनिर्महद्ब्रह्मेति पुंवच्छक्तिमती यत इत्याद्युक्तेश्च कूटस्थोऽक्षर उच्यत इत्यादेर्वत्पुल्लिङ्गं भगवतीवाचकं भवतीति ब्रह्मा रमेति ज्ञेयम्। अथवा ब्रह्म अ तु इति छेदः । ब्रह्म लक्ष्मीर्वेदश्च। ब्रह्म तत्त्वं तपो वेद इति विश्वः। अनेन वेदेत्यन्वयोऽक्लेशिष्ट इत्यतिश्लिष्ट इति ॥

तथा चेदं मूलविवरणम्॥ जीवः सख्युर्न जातु जानीयात्स्वरूपं स्वस्वरूपमन्यच्च भगवद्व्यतिरिक्तसखित्वाकारज्ञानहीनत्वेऽपि सामान्यज्ञानं हरेः स्यात्स्वत इत्यतो मुह्यन्ति यं सूरय इत्यादिनोक्तमाविष्कार्षीरित्याह ॥ देह इति । देहो हि कुबेरोऽसवो मरुतोऽक्षा इन्द्रियाभिमानिनः । अक्षमिन्द्रिय इत्यक्षशब्द इन्द्रियवाची न पुल्लिङ्ग इति विश्वस्मिन्नपि विश्वादौ कोशे शंसितस्तमक्षा इति पुल्लिङ्गत्वेनोदाहरन्मूलकारो नात्रैते देहादयः शब्दा अचेतनवाचकाः किन्त्वन्तःसन्निहिततत्प्रेरणशक्तियुक्तचिन्मात्रपरा इति ध्वनयामासेति तात्पर्यमवधेयम् । मनः शिवो भूतानि तदभिमानिविनायकादयो मात्राः शब्दादयः शम्भुसम्भवाः सुपर्णाद्या वेत्येते देवा आत्मानं स्वस्वरूपमन्यं स्वविलक्षणप्रपञ्चं परमत्यन्तं न विदुः। पुमाञ्जीवाभिमानी ब्रह्मा स्वात्मानमन्यं प्रपञ्चगुणांस्तद्धर्मांश्चेति सर्वमीश्वरानुग्रहेण वेद। तर्हि जानीयाद्वाणीरमण इति तज्ज्ञानी तमपि भगवन्तमित्यत आह ॥ तज्ज्ञ इति। अप्यर्थे चः। स स्वात्मानमन्यं चेति यत्तज्ज्ञानातीति स तथा भगवन्तं न वेद परमत्यन्तं सम्यक्। सोऽप्येनं न जानाति चेत्समः समाधिरित्येतद्धिक्करोति ॥ सर्वज्ञमिति । एतत्स्थेम्ने हेतुमाह ॥

अनन्तमिति । अपरिच्छिन्नमबद्धमृत्युं वैतदसिद्धिप्रतिषेधाय सर्वज्ञमिति । परस्परोपकार्योपकारकत्वं वा बोध्यम् । एतत्पक्षे सर्वज्ञमिति प्रतीकप्रतिनिधित्वेनानन्तमिति तत्प्रतिनिधित्वेन सर्वज्ञमिति ज्ञेयम् । मौलपरपदस्य व्याख्यानरूपं प्रमाणभाष्यस्थसम्यक्पदं परं सम्यङ्न वेदेति मूले योजना द्रष्टव्या । तद्ब्रह्मा वेदाहं ब्रह्मास्मीति विष्णोर्नु कं वीर्याणि प्रवोचम् । न तदीदृगित्यादिमानसिद्धोऽयमर्थ इति नानादरणीयः ।

ईड इत्यत्र ई ईड इति पदे । ई रमाऽपि स्वात्मानं स्वस्वरूपमन्यत्तद्गुणानन्यधर्मान्वा या वेद साऽपि परं सम्यङ्न वेदेत्यान्तरङ्गिको भावो विभावनीयः । ईशकोटिनिवेशादनधिकारिकेति मूले तात्पर्ये चेदं पर्यायेणोदितम् । अन्यथा मङ्गलदेवता चेद्भगवन्तं जानीयादिति शङ्काऽनुत्तारिता स्यात् । वेदा ह्येवैनं वेदयन्तीत्यादेर्वेदस्य तज्ज्ञत्वं वर्तत इत्यतोऽवादि ॥ न वेद सर्वज्ञमिति । वेदाः सर्वज्ञा ज्ञापका वा न यस्य स तथा तम् । यतो वाचो निवर्तन्त इत्यादेः । न वेदेत्येकत्रोक्तेन सर्वनिर्वाहे कर्तुं शक्ये यत्पुनर्न वेद सर्वज्ञमित्युक्तिस्तत्राप्येतदानुपूर्व्योक्तिश्चार्थविशेषं प्रयच्छत इत्यतुच्छहृदयैरालोचनीयम् ॥ २५ ॥

चट्टी – ननु साधारणानां भगवज्ज्ञानाभावेऽपि देवानां तत्स्यादित्यत आह ॥ देह इति । देहो तदभिमानी कुबेरः ॥ असवः प्राणाभिमानिनो मरुतः । अक्षमिन्द्रियमेषामस्तीति नियम्यत्वेनेत्यक्षाः इन्द्रियाद्या इत्यनेन सर्वत्राभिमानिनो मरुतः । एतेन सर्वत्राभिमानिनो ग्राह्या इति सूचितम् । अन्यथा लिङ्गव्यत्ययापत्तेः । ॥ मनसः । मनोभिमानी रुद्रः । मनसो वृत्तिबाहुल्यात् । बहुवचनाद्भूताभिमानिनो गणपत्यादयः ॥ मात्राः । शब्दाद्यभिमानिनो बृहस्पत्त्यादयः । एते सर्वेऽप्यात्मानं स्वस्वरूपमन्यं स्वव्यतिरिक्तं प्रपञ्चं यत्परं ब्रह्म तच्च सर्वथा न विदुः । प्रपञ्चविषयकज्ञानमपि नास्ति किमुत ब्रह्मज्ञानमिति कैमुत्यप्रदर्शनार्थमात्मानमन्यं चेत्युक्तम् ॥ पुमान् । जीवाभिमानी ब्रह्मा तु स्वात्मानमन्यं चेति सर्वं वेद । न केवलं तावदेव किन्तु गुणान् तद्वस्तुसमवेतान् । चशब्दस्तत्तद्विशेषक्रियादींश्च वेद । सोऽपि भगवन्तं न वेदेत्याह ॥ तदिति । तानि सर्वाणि जानातीति तत्ज्ञोऽपि ब्रह्माणं न वेद । तमीड-इत्यन्वयः । सर्वतस्तत्ज्ञानाभावेऽधिकार्युत्तमत्वं न स्यादित्यत आह ॥ अनन्तमिति । अनन्तगुण-त्वात्साकल्येन न वेद । स्वयोग्यतानुसारेण जानात्येवेति भावः । कस्यापि साकल्येन ज्ञानाभावे गुणानंत्यस्यासत्वमेव स्यादित्यत आह ॥ सर्वज्ञमिति । भगवत्ज्ञानमेव तत्र प्रमाणमिति भावः ॥ तदुक्तम् ॥ देहमानी वैश्रवणो मरुतः प्राणमानिनः । इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तःकरणात्मकः । नैते विदन्ति स्वात्मानं परं वापि विमोहिताः । जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः । सोऽपि वेद हरिं नैव सम्यक्सैव हि सर्वविदिति च ॥ २५ ॥

यदोपरामो मनसो नामरूपरूपस्य दृष्टिस्मृतिसंप्रमोषात् ।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥

तात्पर्यम् – केवलया स्वसंस्थया । स्वप्नसुषुप्त्यादौ मनस उपरमाज्जीवस्यास्वातन्त्र्यदर्शनेऽपि स्वप्नप्रबोधादिदर्शनादन्य ईश्वरस्तन्नियामकोऽस्तीति ज्ञायते । जीवेच्छाभावात्केवलत्वम् । 'यदोपरामो मनसः स्वप्नसुप्तिलयादिषु । तदावस्थाप्रबोधादिकारणत्वेन केशवः । अस्वातन्त्र्यात्तु जीवस्य विद्यतेऽन्यो नियामकः । जीवप्रवृत्त्यानुकूल्याज्ज्ञायतेऽसौ तदा विभुरि'ति हरिवंशेषु ॥ २६ ॥

सत्यधर्म – यदोपरामो मनस इति श्लोके मनस उपरमो यदा भवति तदा यः केवलया स्वसंस्थयेयते ज्ञायत इत्यन्वयभ्रमभ्रंशाय तथा नामरूपरूपस्य दृष्टिस्मृतिसम्प्रमोषादित्यस्य विवक्षितार्थप्रतिपत्तये च किञ्चिद्वाञ्छितमध्याहृत्यान्वयार्थौ दर्शयति ॥ केवलयेति । दृष्टिस्मृतिसम्प्रमोषाद्दृष्टिरुभयविधप्रपञ्चानभुवः स्मृतिरपि तादृशी तयोः प्रमोषोऽपहरस्तस्मात् । एतत्पदं छायया व्याकरोति ॥ स्वप्नसुप्त्यादाविति । आदिपदेन लयमूर्छाप्रबोधग्रहणम् । स्वप्नादिषु मनसस्तदुपलक्षितानां सर्वेषामक्षाणामुपरमान्नामरूपरूपविश्वविषयीकरणव्यापारराहित्याज्जीवानां च तद्वारेणैव विषयज्ञानित्वात्तदभावेऽस्वातन्त्र्यदर्शने स्वातन्त्र्याभावे मानतः सिद्धे स्वसंस्थया स्वस्वरूपभूतया विशेषेण स्वसंस्थत्वादिव्याहरणं विषयस्वेच्छया साऽपि न जाग्रद्दशायामिव जीवव्यापारव्यामिश्रेति केवलयेति मूलपदमनूद्य व्याकरोति ॥ जीवेच्छाभावात्केवलत्वमिति । अत्र जीवेच्छेति वदन्नानन्दतीर्थमुनिः स्वसंस्थयेति पदमिच्छावाचकमिति छायया सूचितवानिति ज्ञेयम् ।

ननु तत्कार्यस्यादर्शनात्कथं कथितं स्वसंस्थयेतीति दुरवस्थीकरोति ॥ स्वप्नप्रबोधादिदर्शनादिति । स्वप्नसुप्त्यादावित्यादावुदीरणादुत्तरत्रापि तथैव वक्तव्ये यत्स्वप्नप्रबोधादीति निबबन्ध तेन तस्यादिपदेन प्राचीनवाक्ये ग्राह्यतां ग्राहयामास । स प्रबोधोऽपि न जाग्रत्कालिक इति बोधयामासानुपूर्व्याऽनयेति च ज्ञेयम् । मनआदीनामव्यापारे व्यापारयितुरस्वातन्त्र्यात्कार्यस्य सर्वानुभवसिद्धस्यापलपितुमशक्यत्वादाकस्मिकत्वे च सदानुभवस्य भाव्यत्वाच्च कश्चित्सर्वविपश्चिदीश्वरोऽन्यो नियामकोऽस्तीति ज्ञायते । जीवेच्छाभावाज्जीवस्य ममाक्षमत्वात्केनचित्क्षमेण भाव्यमितीच्छाभावात्स्वसंस्था केवलेति भावः । स्वप्नप्रबोधादिदर्शनादित्यावृत्य तस्य स्वप्नप्रबोधादिदर्शनमातयति सततं गमयतीति । क्विप्यततेः प्रथमैकवचनतायां स्वप्नप्रबोधादिदर्शनादिति भवतीश्वरविशेषणम् । तथा च नायासेन समीरनीरदरीत्या गमकतागमकते ईश्वरायत्ते इति ज्ञातं भवति ।

यदा यस्मादेवं तदेत्यपि । यदा तदेति हेत्वर्थे कालार्थे चापि भण्यत इति तृतीयतात्पर्यात् । स्वप्नसुप्तिलयादिष्विति कालस्यार्थात्पृथगुक्तेः स्वप्नसुप्तिलयादिषु मनस उपरमस्तदा तदवस्थाप्रबोधादिकारणत्वेन केशवः कश्चेशश्चेति केशौ विधिविधुशेखरौ तौ वर्तयति प्रवर्तयति यः सृष्ट्यादिना स केशवः । यथोक्तं गीताभाष्ये । कं ब्रह्माणमीशं रुद्रं च वर्तयतीति केशवः । तथा हि निरुक्तिः कृता

हरिवंशेषु रुद्रेण कैलासयात्रायाम्। हिरण्यगर्भः कः प्रोक्त ईशः शङ्कर एव च। सृष्ट्यादिना वर्तयति तौ यतः केशवो भवानिति वचनाच्चेति। प्रेमयदीपिकायां च। को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिषु। आवां त्वदङ्गसम्भूतौ ततः केशवनामवानिति हरिवंशवचनम्। वचनान्तराच्चेयमेव निरुक्तिः स्वीकार्येत्याह॥ हिरण्यगर्भ इति। अत इति लभ्यते तेनैवशब्दस्यान्वयः। हिरण्यगर्भ एव न त्वन्यः। प्रजापतिरीशः शङ्कर एव न त्वन्यः समर्थ इति वा। अनेन केशयोः कर्मणोरुपपदयोरन्तर्णीतण्यर्थाद्वृतु वर्तन इत्यस्माद्धातोर्डोऽन्यत्रापि दृश्यत इति डप्रत्यय इत्युक्तं भवतीत्युक्तम्।

यद्वा कश्च ई च रमा चेशः शङ्करश्च। नैकांशसममाहात्म्याः श्रीशेषब्रह्मशङ्करा इति गीताभाष्यादि-स्थानान्तरोक्तेश्चेतरत्समम्। सूर्यस्तपतो लोकानग्नेः सोमस्य चाप्युत। अंशवो यत्प्रकाशन्ते ममैते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुरिति मोक्षधर्मोक्ता निरुक्तिरपि ज्ञेया। एतन्नाम्ना न फलं स्वपत्न्यामाहितो गर्भ इत्यारभ्य स हि दीर्घतमा नामेति गर्भीकृत्य स चक्षुष्मान्समभवद्गौतमश्च भवत्पुनरित्यन्तेनोक्तं तत्रात्रानुसन्धेयम्। उदाहृतवाक्यसहिताचार्यवचसि च ईशकोटिनिवेशा-भिप्रायेणानुदीरणमर्थविशेषलाभलोभेनैतदादिव्याख्याननिषिद्धमनुमतं नीत्या च सम्मतमाचार्य-वर्याणामिति तोषो मनीषिभिरेष्टव्यः।

अर्थापत्तिसम्पदमुपपादयति॥ अस्वातन्त्र्यात्तु जीवस्येत्यादिना। जीवस्येत्यकवचनं जातौ। अस्वातन्त्र्येत्येनन्तरं प्रत्ययात् ङसेः पूर्वं दर्शनेत्यध्याहार्यमिति दर्शयति। अथवा पञ्चमीं सप्तमीं कृत्वा पूर्वोदीरितसरण्याऽध्याहृते दर्शनपदे स्वातन्त्र्यदर्शन इति पदसम्पत्तिः सम्पादनीया प्रमाणभाष्य इति दर्शयतीति वदन्निति मन्तव्यम्। अस्वातन्त्र्यपदस्यैवास्वातन्त्र्यदर्शनपदे लक्षणा वा। जीवप्रवृत्त्य-नाकुल्यात् वासनामयपदार्थग्रहणादिप्रवृत्त्यनुकूलतन्निमित्तादसौ विभुर्व्यापी समर्थो वा। विप्रसंभ्यो ड्वसंज्ञायामिति डुः। कश्चिन्नियामकोऽन्यो विद्यत इति ज्ञायत इति योजना। केचित्तु जीवप्रवृत्त्यानुकुल्यादिति पठित्वाऽऽनुकूल्यं तन्न विद्यते यस्मिन्हरिसंस्थान इति व्याचक्षते। हरिवंशकोशेष्विव बहुतात्पर्यकोशेष्वप्यदर्शनान्न पाठः सरलोर्थोऽपि न मूलाविरलः। स्वसंस्थयेत्यस्य स्वस्थित्येति व्याख्यानं सख्यं भजते स्थित्यदनाभ्यां चेति सूत्रेणेत्योमर्हम्।

ननु संस्कारैर्भगवानेव सृष्ट्वा नानाविधं जगत्। स्वप्नकाले दर्शयतीत्यनुव्याख्याव्याख्यासुधायां श्रीमट्टीकाकारचरणैर्जीवायेति शेषः। दर्शनसाधनं च मन एवेति वक्ष्यति। मनश्च केचन जड एवेति मन्यन्ते। अपरे त्वचेतनमेवारोपितचैतन्यं तन्निरासेन स्वरूपं कथयति॥ चिदचिन्मिश्रमेवेति। चिदचिन्मिश्रमेवैतन्मनो यावच्च संसृतिः। तेनावस्था इमाः सर्वा जीवः पश्यतीति व्याख्यानावसरे केवलमचेतनस्य घटादिवदेवंभावासम्भवाच्चैतन्यारोपस्य निराकृतत्वाच्चिदचिन्मिश्रमेवाङ्गीकार्यम्।

भवन्ति चात्रागमाः । यदि मनसः सर्वावस्थाप्राप्तिस्तदा तस्य मोक्षेऽपि भावादवस्थाः स्युरित्यत उक्तं यावत्संसृतिस्तावज्जीवस्योपकारापकारौ करोतीति । कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति व्याख्याति ॥ मनोविकारा इति । यद्यस्मात्स्वाप्नविषया मनोजन्यवासनाविकारा न केवलं स्वाप्नं किन्तु सांसारिकीः सर्वा अप्यवस्थास्तेनैव मनसैव पश्यति । अतः प्रधानत्वात्तद्द्वारक एव सम्बन्ध आदरणीयो नापर इत्यादिना सव्यापारस्य मनसः सत्त्वाभिधानादत्र स्वप्नसुषुप्त्यादौ मनस उपरमादिति तात्पर्ये यदोपरामो मनसः स्वप्नसुप्तिलयादिष्विति हरिवंशे च । मूले यदोपरामो मनस इत्युपरमः कथं मनसः कथित इति चेन्न । तदानीं जनितपदार्थसार्थस्य बाह्यार्थवत्स्थौल्यस्य स्वपरसाधारणतत्कालान्तरदर्शन-विमर्शनादिहेतुभूतस्याभावान्मनसस्तद्व्यापारस्योपरमसमीरणमिति समाधानाभिधानसम्भवात् । यथोक्तं तत्रैव । अत एव बाह्यार्थवत्स्थूला न भवति । तेषां क्वचित्स्पष्टता नास्ति । अतः स्वाप्नविषया मनोविकारा इति योजनेत्यादि ।

ननु बाह्यव्यापाराणामपि यथायथं बहुलमुपलम्भो हि तत्र तत्र मानसिद्धोऽस्तीति चेन्न । तत्रैव तदप्याशङ्क्य समाहितम् । तथा हि । ननु स्वाप्नकामिनीसम्भोगादेश्चरमधातुविसर्गादिबाह्यार्थ-क्रियाकारित्वदर्शनाद्भागासिद्धिरित्यत आह ॥ क्वचिदिति । ते स्वाप्ना विषयाः क्वचित्स्पष्टा अपि स्युरेव । तथाऽपि तदतिरिक्तपक्षीकरणाददोष इति भावः । ननु तर्हि तदंशस्य वासनामयत्वं न स्यादित्यत आह ॥ वासनेति । सा च मानसी वासना सिद्धा । अस्पष्टत्वाभावेऽप्यस्थूलत्वस्य सत्त्वादिति भाव इत्यादिना । ततश्च सर्वत्रोपरामशब्देन मनसो व्यापारोदीरणं तद्विकारवासनामयपदार्थस्य विस्पष्टस्य स्थूलभावाभावाभिप्रायेणेति सम्भवात् । सन्ध्ये सृष्टिराह हीत्यादिचतुःसूत्र्याऽतः प्रबोधोऽस्मान्मुग्धेऽर्धसम्पत्तिः परिशेषादिति सूत्राभ्यां चेति सूत्रैर्न स्वप्नोऽपि तमित्यारभ्य यत एवं त्रयोऽवस्था मोहस्तु परिशेषतः । अर्धप्राप्तिरिति ज्ञेयो दुःखमात्रप्रतिस्मृतेरित्यन्तभाष्येण च मनस उपरमतरतमभावोक्तिभाव आविष्कृतोऽनेनैव कृत आसीदिति सर्वैककण्ठ्यं सैतद्विचारणौत्कण्ठ्यै-र्विमत्सरैर्विभावनीयमित्यलम् ॥

ततश्चेयं श्लोकव्याकृतिः ॥ यदा यस्मान्मनसो नामरूपस्य नामात्मकरूपात्मकप्रपञ्चस्य दृष्टिस्मृतिविप्रमोषात्तद्विषयानुभवस्मरणापहारात्तद्विषय एतन्मनीषास्मरणचोरणकर्ता कश्चित्प्रसिद्धश्चोरो नारायणनामापि वर्तत एतत्कर्मानुसृत्येति द्योत्यते स्तेयाभिधेयकप्रोपसृष्टमुषधातुनिष्पन्नमोषपदेनेति ज्ञेयम् । सुप्त्यादौ केवलया ममेदानीं मां व्यापारयित्रा केनचिद्भवितव्यमिति जीवेच्छामिश्रया स्वसंस्थया स्वस्थित्या वा । उभयपक्षेऽपि समा । तयोः स्वरूपभूतयोरप्रमोषो विशेषेण धर्मधर्मिव्यवहृतिश्च सम्भवत इति सूचयति । यो दृष्टिस्मृतिसम्प्रमोषादनुभूतस्मृतपदार्थावगत्यनवगत्युपगमापगमकोऽस्तीह कश्चिदिति हीयतेऽर्थापत्त्या तस्मै हंसाय शुद्धाय सूर्यसंस्थाय प्रलये सर्वप्रलयकर्त्रे वा । तथोक्तं

बृहद्भाष्ये। स एव सूर्यसंस्थत्वाद्धंसनामा हन्तृत्वाद्धंसनामाऽसावित्यादिना । जीवश्वासनियामकत्वेन प्रातर्योगो महानयमित्याद्युक्तेस्तन्मन्त्रवेद्यायेति वा। न यस्य सख्यमिति श्लोकेऽर्थतः प्रतीकत्वेन धृतायां द्वासुपर्णेति श्रुतौ वृक्षपक्ष्यादित्वेन देहहरिजीवानामुत्प्रेक्षणाद्धंसायेत्युक्तिर्वा । सुपर्णः पक्षिमात्रे स्याद्वैनतेये चेति वचनाद्धंस इव हंसस्तस्मै । अत एव द्विखगो ह्यादिवृक्ष इत्यादिस्कन्धान्तरोक्तय एतदनुकूला इति ज्ञेयम्। शरीरसमीरान्तरचर इति वा हंसः। हंसः शरीरमरुदन्तरे हंसो विहगभेदे चेति विश्वौ। हिनस्ति लये सर्वमिति हंसः। हिसि हिंसायामिति धातुव्याख्यानात्। भवेद्वर्णागमाद्धंस इत्यादेः पृषोदरादिरियम् । शुचयः शुद्धयोगिनो वा वायुर्वाऽग्निर्वा सद्म निवासस्थानं यस्य तस्मै । शुचिषदित्यादिश्रुतेः। प्रलयेऽप्यलीनस्थलाय वा तस्मै नमोऽस्त्वित्यन्वयः ॥ २६ ॥

चट्टी – ननु भगवतो दोषित्वेनानुभवसिद्धजीवाभिन्नत्वात् पूर्वोक्तमहिमा नोपपद्यत इत्याशङ्क्य इत्याशङ्क्य तस्य जीवभेदेऽर्थापत्तिं तावत्प्रमाणयति ॥ यदेति । भगवान् यदा यस्मिन्काले नामरूपरूपस्य नामरूपात्मकप्रपञ्चप्रत्यायकस्य मनसः । केवलया सुप्त्यादिजीवेच्छानधीनत्वेन जीवेच्छाविश्लिष्टया स्वसंस्थया स्वेच्छालक्षणमहिम्ना उपरामो व्यापारोपरमो भवति । तदा तत्कार्यात् दृष्टिस्मृतिसंप्रमोषात् । दृष्टिरनुभवः । स्मृतिः स्मरणं तयोः संप्रमोषो विलयो यस्मिन्स तथा । तस्मात्सुप्त्यादेः प्रबुद्धेन पुरुषेण केवलया स्वसंस्थया जीवव्यतिरिक्ततया विद्यमानत्वेनेयते ज्ञायते तस्मै हंसाय। नित्यनिर्दोषसाररूपाय। शुचिसद्मने शुचिर्वायुः सद्म मुख्याधिष्ठानं यस्य। नित्यहीनोऽखिलैर्दोषैः साररूपो यतो हरिः । हंस इत्युच्यते तस्माद्वायुस्थः शुचिसद्मन इति वचनात् । तस्मै नम इत्यन्वयः । जीवस्य सुप्त्याद्यवस्थासु ज्ञानकरणस्य मनस उपरतत्वेन जीवव्यतिरिक्ततयाऽवस्थाकारणभगवज्ज्ञानाभावेऽपि प्रबोधानन्तरं तदन्यथाऽनुपपत्त्याऽवस्थाप्रबोधादिकारणत्वेन भगवान् ज्ञायत इति भावः ॥ २६ ॥

मनीषिणोऽन्तर्हृदि सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ।
वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कृषन्तीह गूढम् ॥ २७ ॥

तात्पर्यम् – इच्छादिरूपेण त्रिवृद्भिः । 'इच्छादित्वेन त्रिविधा विमलाद्यास्तु शक्तयः । विष्णोः स्वरूपभूता यास्ताभ्यस्तन्नामिकाः पराः । जायन्ते तत्प्रसादेव ताश्च पीठे प्रपूजयेत् । तद्भिन्नजीवास्तस्यैव प्रसादात्तत्समीपगा' इति तन्त्रनिर्णये । 'दशेन्द्रियाणि च मनो बुद्धिप्राणप्रधानकाः । चतुर्दशैषां परमः पाञ्चदश्यो हरिः स्मृतः । बुद्धेर्भेदेन वैतेषु पाञ्चदश्योऽथ संस्थितेरि'ति च ॥ २७ ॥

सत्यधर्म – मनीषिणोऽन्तर्हृदि सन्निवेशितमिति श्लोके त्रिवृद्भिर्नवभिः शक्तिभिरित्यनेन शक्तीनामुक्तेस्ताः काः शक्तय इत्यतो मूले नवभिरिति वचनेऽपि प्राचि तिसृणां शक्तीनां सर्वकार्यकारणत्वात्पूर्वमुदीरणं युक्तमिति मन्वानः स्वयं स्ववचनेन स्वयं प्रदर्श्य तत्तदितरविषये मानमेव मानयंस्तदुदाहरति ॥ इच्छादिरूपेणेति । त्रिवृद्भिस्त्रीन्प्रकारान्वृण्वत इति त्रिवृतस्ताभिः । ते च क इत्यतो वक्ति ॥ इच्छादिरूपेणेति । आदिपदेन ज्ञानशक्तिः प्रयत्नशक्तिश्चेति द्वे ग्राह्ये । जानातीच्छति यतत इति स्थिते इच्छाया आदितया ग्रहणम् । तासां च भगवतेव परस्परं चाभेदज्ञापनायेति ज्ञेयम् । यथोक्तं द्वितीयतात्पर्ये । इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुः । स्वरूपभूता अपि तु भिन्नवद्व्यवहारिका इति प्रकाशसंहितायामिति । बृहद्भाष्ये च । प्रत्येकं तु गुणांस्तांस्तु सदा सर्वगुणात्मकानित्यादिना । गीताभाष्ये च । तानि तानि च सर्वाण्यन्योन्यस्वरूपाणीत्यादिना । द्वितीयतात्पर्ये स्थानान्तरे । ज्ञानवीर्यो ज्ञानबलो ज्ञानानन्द उदाहृत इत्यादिना । अमन्दानन्दस्यन्द्यनन्तगुणार्णव इत्यनुव्याख्याननयचन्द्रिकासन्न्यायरत्नावल्योरानन्दस्यन्दिन आनन्दपूर्णा अनन्तगुणा नित्यानन्दस्यन्दिगुणानन्त्यमित्यादिना चोक्तेः । ननु तर्हि सुधायाममन्दस्यन्दी चासावनन्तगुणश्चासावर्णवश्चेति विग्रहप्रदर्शनात्तद्विरोध इति चेत् । यतोऽष्टगुणत्वेन प्रमेय इत्येतत्खण्डनमात्रे निभृतनैर्भर्यास्समग्ररूपकतानिरूपणे च तस्यैतत्प्रदर्शननिष्पत्तिकत्वादमुं प्रकारं नादर्शयन्बहुसम्मत्याऽनुमतिमन्त एतस्मिन्प्रमेये श्रीमन्तष्टीकाकारा इति न विरोधः ।

विमलाद्याश्च शक्तयो विमलाद्या इत्याद्यपदेन मानान्तरावगमिता उत्कर्षिणी ज्ञाना क्रिया योगा प्रव्ही सत्या ईशानाऽनुग्रहा ग्राह्याः । ननु मूले नवभिरित्युक्तेस्तत्र सम्मतित्वेनोदाहृते तन्त्रनिर्णयवचने तदवचनात्कथमिति चेन्न । मूले त्रिवृद्भिरित्येतद्व्याख्यानरूपं त्रिविधा इति मानिकं पदं विमलाद्यपदेनाप्यन्वेति । तुश्च विमलोत्कर्षिणी ज्ञाना चेत्येकविधा । क्रियायोगा प्रव्हीत्येका । सत्या ईशानाऽनुग्रहेत्येका चेत्येवं तिस्रो विधा इति भेदसूचकः । तु पादपूरणे भेद इति विश्वः । ततश्चैवं त्रिकत्रिकोपस्थितौ नवत्वसङ्ख्यासम्पत्तिर्भवति । ताश्च भिन्नाभिन्नाश्चेति द्विविधाः । यद्यप्यभावप्रतीतिर्भावप्रतीत्यधीना नियमेनेत्युक्तेर्भिन्ना निरूपणीयाः पुरा तथाऽपि तत्कारणत्वादभिन्नाः शक्तीः पूर्वमुक्तीकरोति ॥ विष्णोरिति । याः स्वरूपभूता विमलाद्याः शक्तयो विष्णोः स्वरूपभूतास्ताभ्यः परा भिन्नास्तन्नामिकास्तानि नामानि तासां नामानि वा यासां ता जायन्ते । तत्र हेतुस्तत्प्रसादेनाधिष्ठानत्वेन पूज्यतार्जकत्वेनेति । ता एतदुत्पादिकाः शक्तीः पीठे पूजयेत् । तद्भिन्नजीवा विमलाद्यधिष्ठितजीवास्तस्यैव प्रसादाद्विमलादिनिलयाः स्थिताश्च मम समीपे भवन्तीत्यङ्गीकरणप्रसादादेव तत्समीपगा विष्णुसमीपगा आधाराधेययोरेकाभिधेयेति ज्ञेयम् । तेन सूचयामास तासामपि तथोचितां च नीयतामिति मन्तव्यम् । वासिष्ठे, गृहीतचामरा दिव्या विमलाद्याश्च शक्तयः ।

छत्रं च चामरं चैव व्यजनं दर्पणं तथा । गीतं नृत्यं च वाद्यं च स्तोत्रमेतत्समर्पणमिति च छत्रादीनां नवसु चामराविरोधेन स्वीकारान्न विरोधः ।

तस्मिन्नेव पद्येऽप्रतिपत्तिविप्रतिपत्तिभ्यां पाञ्चदश्यशब्दं मानेनैव विवृणोति ॥ दशेति । इन्द्रियाणि चक्षुरादीनि मनो बुद्धिः प्राणः प्रधानकोऽव्यक्तमेवं चतुर्दश । एषां चतुर्दशसङ्ख्यानां सकाशात्परम उत्तमः पाञ्चदश्यः पञ्चदशसङ्ख्यापूरकः । पूरणार्थे तद्धिता इति बहुवचनज्ञापितःष्यञ् । पक्षान्तरं किञ्चिदंशे शंसति ॥ बुद्धेरिति । वाशब्दोऽथेत्यनन्तरमन्वेति । ततश्चाथवेति सन्पक्षान्तरवाचको भवति । बुद्धेर्भेदेन बुद्धिर्मनोऽहङ्कारश्चित्तं चेतनेत्येवं पञ्चकेन सहितानि दशेन्द्रियाणीत्याहत्य पञ्चदशसङ्ख्येष्वेतेषु स्थितेर्हेतोः पाञ्चदश्यमिति निर्देश्यमिति वेत्यर्थः । भावार्थ एतत्पक्षे तद्धित इति भावः । चेनेदमपि तन्त्रनिर्णयाख्यग्रन्थग्रथितमिति सूचयति । एवमुत्तरत्राप्यनुसन्धेयम् ॥

अथ मूलार्थः ॥ नार्थापत्तेरन्यथाऽप्युपपत्तिविपत्तिर्विपश्चित्प्रत्यक्षसिद्धत्वादित्याह ॥ मनीषिण इति । मनस्विनो ज्ञानिनो वाऽऽत्मा मनश्चिन्तनं च शेमुषी बुद्धिरेकार्थवाचका धीश्च मनीषा तप इत्यपि बृहद्भाष्योक्तेः । त्रिवृद्भिरिच्छाज्ञानप्रयत्नात्मभिर्नवभिर्विमलादिभिः स्वशक्तिभिः स्वरूपभूतशक्तिभिः स्वाभिः समीपगत्वेन स्वकीयाभिरेतदाख्यासङ्ख्याभिस्ताभिस्तासां सामर्थ्यं विनैतद्द्वयं नास्तीत्यपि तन्त्रेणाह ॥ स्वशक्तिभिरिति । न विद्यते शक्तिर्यासां ता अशक्तयः सु अत्यन्तमशक्तयः । सामर्थ्यात्स्वर्थस्य शक्तिपदार्थेऽन्वयः । अनत्यन्तशक्ता इत्यर्थः । न च कथमिदमलौकिकमिति वाच्यम् । एतत्सजातीयविग्रहाणां स्वलक्षणैरिति व्याख्यावसरे सु सम्यक् स्वरूपान्तर्गत्या न लक्षणानीति वाऽर्थोपपत्तेरिति सुधाया अभिनिमाननिषङ्गेति ऋग्भाष्यटीकादौ दर्शनात् । तथा हि । नितराममितत्वेन नितरां यः सङ्गहीनो निषङ्गः । यद्यपि नीति मानपदेन समस्तं तथाऽपि सामर्थ्येन नञर्थे सम्बध्यते । नेर्नञा सम्बन्ध इत्यभिधानात् । परास्तन्नामिकास्तद्भिन्ना जीवा इत्यादिमानपदानामनेवंविवरण उन्मूलत्वमुन्मिषेत्तच्च निस्तोषदमिति मन्तव्यम् । हृद्यन्तस्तत्रापि पदद्वयमिति नानुपपत्तिः । सह सन्निवेशितम् । णिच् । सन्निभ्यां भक्तभक्तिपारवश्यं परमात्मनः सूच्यते । वृद्धो यूनेति निर्देशात्सहेति लभ्यत इत्युक्तेस्सहेति लभ्यते । गूढं प्रसादं विना प्रकाशं पाञ्चदश्यं चक्षुरादि-चतुर्दशव्यतिरिक्तं पञ्चदशसङ्ख्यापूरकम् । अथवा दशेन्द्रियाणि बुद्ध्यादिपञ्चकेति पञ्चदशसु भवमिति । मनीषया मनसा प्रज्ञया वा निष्कृषन्ति सर्वविलक्षणतया निष्कृष्य जानन्ति । निदर्शनमनुरूपं निरूपयति ॥ वन्हिं यथेति । इह दारुणि काष्ठे गूढं गूहितमप्रत्यक्षमाशुशुक्षणिं मनीषया तत्कालोचित-मन्त्रादिविषयिण्या निष्कृषन्ति मथनादिना प्रत्यक्षं कृत्वा जानन्ति तथेत्यर्थः । इहान्तर्गूढं हृद्येव निष्कृषन्तीति वा योजना ॥ २७ ॥

चट्टी – भगवतो जीवभेदे सर्वसाधारणमर्थापत्तिमुक्त्वेदानीं विद्वत्प्रत्यक्षं प्रमाणयति ।। मनीषिण इति । इह जीवराशौ मनीषिणो मनसेषिणो धीराः । विद्वांस इति यावत् । पृषोदरादित्वात्साधुः । अन्तर्हृदि हृत्कमलमध्ये । त्रिवृद्भिरिच्छाज्ञानक्रियारूपेण त्रिधा वर्तमानाभिः । विमलोत्कर्षण्यादिभेदेन नवभिः स्वाभिः स्वरूपभूताभिः शक्तिभिः शकनाच्छक्तिसंज्ञाभिर्मूर्तिभिस्तथा स्वशक्तिभिस्तन्नामसंख्याविशिष्टजीवाख्यस्वाधीनकशक्तिभिश्च सह सन्निवेशितम् । तथाऽपि ।। गूढम् । अयोग्यैरनुपलभ्यमानम् ।। पाश्वदश्यम् । दशेन्द्रियमनोबुद्धिप्राणप्रधानाख्यानां चतुर्दशतत्त्वानां नियामकत्वेन स्थितं यं भगवन्तं मनीषया स्वप्रतिभया ।। निष्कृषन्ति । जीवादिभ्यो विविच्य जानन्ति । स मम प्रसीदतामित्युत्तरेणान्वयः । तत्र दृष्टान्तः । अग्निचितो यथा दारुण्यरण्यादौ गूढं वन्हिं मथनाद्युपायेन ततो निष्कृष्य प्रत्यक्षीकुर्वन्ति तथेत्यर्थः । अयमर्थ इच्छादित्वेन त्रिविधा इत्यादि तात्पर्योदाहृतप्रमाणप्रसिद्धः ।। २७ ।।

स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ।
स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ।। २८ ।।

तात्पर्यम् – 'इयत्ता तु विशेषः स्यादानन्दादौ तदुज्झितेः । सर्वैर्विशेषै रहित उच्यते हरिरव्ययः । अप्राकृतस्वरूपत्वान्निर्मायश्चेति कथ्यत' इति च । 'तद्रूपसदृशं रूपं यतः सर्वस्य सर्वदा । सर्वरूपो यतः शब्दमुख्यार्थः सर्वनामक' इति च ।। २८ ।।

सत्यधर्म – स वै ममाशेषविशेषेति श्लोके भगवता निर्गुणतैवोच्यत इत्यन्यथाप्रतीतिप्रतिषेधाय प्रमाणेनैव विवक्षितमर्थं दर्शयति ।। इयत्ता त्विति । इयतो भाव इयत्ता । अनेन मूलस्थविशेषपदाभिधेयमभिधत्ते । सुखानुभूतिपदमन्योपलक्षकमित्यादिपदेन बोध्यते । अन्यथा सुखानुभूत्योरित्यवक्ष्यत् । तेनैव सुखानुभूतिपदं सुखविषयकानुभवपरत्वेनापि विवरीतुं योग्यमिति सूचयति । आनन्दादौ गुणजाते तदुज्झितेस्तस्या इयत्ताया हानाद्धेतोरव्ययो हरिः सर्वैर्विशेषै रहित इत्युच्यते न तु निर्विशेषत्वेनेत्यर्थः । मायेति स्फुटं मायिकत्वं प्रतीयते तत्कथमपलप्यत इति चेत्तत्राह ।। अप्राकृतस्वरूपत्वादिति । निर्मायेति कथ्यत इत्यन्वयः । विश्वरूपो जगदात्मक इति प्रतीतिं वारयति ।। तद्रूपदृश्यमिति । सर्वस्य सर्वदा रूपं रूपं प्रतिरूपो बभूव नित्योपाध्या स्वरूपया चिद्रूपया युतो जीवः केशवप्रतिबिम्बकः । आभास एव चेत्यादेः । सदृशं विप्रुडानन्दादित्वेन किञ्चिदिति सर्वरूप इत्युच्यत इति सम्बन्धः । सर्वनामेत्यत्र सर्वं इति नाम यस्येति भ्रमं भ्रंशयति ।। यत इति । शब्दमुख्यार्थः परममुख्यार्थोऽतः सर्वनामक इत्युच्यत इत्यन्वयः ।।

अतश्चायं मूलार्थः । समनीषिभिर्मनीषया विषयीकृतोऽशेषोऽशेषगुणगता विशेष इयत्ता च माया प्रकृतिश्च विशेषाश्च माया चेति वा तयोश्च तासां वा निषेधेनाभावेन राहित्येनेति यावत् । निर्वाणे भिन्नशरीराभोग्ये लक्षणया सुखं चानुभूतिश्च तादृशी यस्य स निर्वाणमशरीरम् । कायो बाणं शरीरं चेत्यभिधानादिति गीताभाष्ये । अभावाज्जडदेहस्य विष्णुर्निर्वाण उच्यते । भिन्नदेहाभावतो वा । स सहस्रशिरा अपीति गीतातात्पर्ये च । एतद्वाणमवष्टभ्येति षट्प्रश्नोपनिषदि चोक्तेः । सुखानुभवो यस्येति वा । सु शोभनानीन्द्रियाणि खान्यप्राकृतान्यनुभूतिश्च । स्वित्यानन्दः समुद्दिष्ट इत्यादिबृहद्भाष्योक्तेः । सु आनन्दः खानि चानुभूतिश्च यस्येति वा । नासाधारणं नारायणगमकं किञ्चिदित्यतो वाऽऽह ॥ सुखानुभूतिरिति । सुखादनु हीना भूतिर्महालक्ष्मीर्यस्य स सुखानुभूतिः । अनु सह भूत्वा वर्तत इत्यनुभूतिरिति वा । अस्मिन्पक्षे निर्वाणसुखश्चासौ अनुभूतिश्चेति विग्रहः । अनु हीने सहार्थे चेति विश्वः । साऽपि न लक्ष्म्यैकलेत्यालपति ॥ अनुभूतिरिति । अनुसृताया भुवो भूरूपिण्या अप्यूतिः सम्बन्धो यस्य स इति वा । अनु मुमुक्षुमोक्षमपेक्ष्यैव भूतिः प्रादुर्भावा यस्येति वा । अनुभु प्रत्यवतारं ऊतिरभिप्रेतार्थसिद्धिर्येनेति वा । आश्रये मोक्षेऽन्विति विश्वः । ऊतयेऽभिप्रेतार्थसिद्धय इति ऋग्भाष्योक्तेः । ऊतिजूतीति निपातितोऽयं शब्दः । सर्वनामा परममुख्यया वृत्त्या । विश्वरूपः स्वप्रतिमबिम्बकप्रपञ्चः ।अनिरुक्ता साकल्येन वक्तुमशक्या आत्मा स्वरूपं स्वशक्तयश्च स्वरूपशक्तिर्वा यस्य स इति वा । मम प्रसीदतामिति सम्बन्धः । मद्विषये स्वेच्छामेनमुद्धरिष्यामीति करोत्विति वा । अनुग्रहसहितः स्यादिति वाऽर्थः । प्रसादो नामेच्छाविशेषो गुणान्तरं वा न नः काचित्क्षतिरिति सुधाभिधानात् । प्रसादोऽनुग्रह इति विश्वः । वैशब्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । न ते विष्णो विचित्रशक्तिः पुरुषः पुराणः । अदृश्येऽनात्म्येऽनिरुक्ते न तदीदृगिति ज्ञेयम् । सर्वनामा । यो देवानां नामधाः । नामानि सर्वाणि यमाविशन्तीत्यादिप्रसिद्धिद्योतकः । अनुभूतिः अनुभु तद्भवनमनु ऊतिः सन्तानविशेषो यस्मात्स इति वा । तदभिलषितानुकूल्यमेवमर्थापने ज्ञेयम् । अत्रानुपपत्त्युपपत्ती नन्वसौ तन्तुसन्ताने पठ्यत इत्यादि सुधातोऽनुसन्धेयम् ॥ २८ ॥

चट्टी – नन्वन्तर्हृदिसन्निवेशितमित्युक्तं तर्हि दुर्भगशरीरप्रविष्टस्य जीवदुःखादिदोषलेपः स्यादित्यत आह ॥ अशेषेति । अशेषेषु गुणेषु विशेषः इयत्ता लक्षणपरिच्छेदो माया प्रकृतिस्तयोर्निषिद्धो यस्य स चासौ निर्वाणसुखानुभूतिश्च निर्वाणं नित्यं यत्सुखं तस्यानुभूतिः पूर्णगुणोऽप्राकृतो नित्यसुखानुभवरूपश्चेत्यर्थः । पूर्णगुणत्वं कथमित्यत । आह ॥ सर्वनामेति । सर्वाणि नामानि मुख्यतो वाचकत्वेन यस्य स तथा । सर्वनाम्नां प्रवृत्तिनिमित्तस्य भगवति मुख्यत्वात्पूर्णत्वं युज्यत इति भावः । ब्रह्मादीन्विहाय भगवानेव कुतः प्रसाद्यत इत्यतो ब्रह्मादिजगतो भगवत्प्रतिबिंबत्वेन बिंबस्यैव प्रधानत्वादित्याह ॥ सर्वरूप इति । सर्वं जगद्रूपं प्रतिबिंबं यस्य सः तथा । दुर्भगशरीरप्रविष्टस्यापि दोषलेशो नास्तीत्युक्तम् । तत्कुत इत्यतः पूर्णशक्तित्वादित्याह ॥ अनिरुक्तेति । अनिरुक्ता वेदैः

साकल्येनानिरूपिता स्वरूपभूता शक्तिर्यस्य स तथा । एतादृशः स भगवान् प्रसीदतामित्यन्वयः । अयमर्थ इयत्ता तु विशेषः स्यादानन्दादावित्यादिप्रमाणादवगन्तव्यः ॥ २८ ॥

यद्यन्निरुक्तं वचसा निरूपितं धियाऽक्षिभिर्वा मनसा वोत यस्य ।
मा भूत् स्वरूपं गुणरूपबृंहितं स वै गुणापायनिसर्गलक्षणः ॥ २९ ॥

तात्पर्यम् – अलौकिकत्वान्नो विष्णुर्निरुक्तोऽतो निरूपितः । तथापि वेदेषूक्तत्वादुक्तो रूपी स एव चे'ति व्योमसंहितायाम् ॥ २९ ॥

सत्यधर्म – यद्यन्निरुक्तमितिश्लोके यद्यद्वच आद्यनिरुक्तं तत्तद्धरे रूपं निरुक्तं निरूपितं च मा भूदिति सर्वथाऽनिरुक्तमनिरूपितमिति भ्रममूलकमूलपीडां विलोडयति ॥ अलौकिकत्वादिति । विष्णुरलौकिकत्वाल्लोकविलक्षणत्वान्नो निरुक्तो निरूपितश्च तथाऽपि वेदेषु तदादिषूक्तत्वादेव । चशब्द उक्तसमुच्चायकः सन्ननुक्तं च समुच्चिनोति । आनन्दादिभिरप्यनिरुक्तो निरुक्तश्चालौकिकत्वात् । आनन्दो नेदृश आनन्द इत्यादेः । वेदा ह्येवैनं वेदयन्ति । वेदे रामायणे । सर्वे वेदाः । शास्त्रयोनित्वात् । ईक्षतेर्नाशब्दमित्यादिषूक्तो निरूपितश्च । उच्यत इति शेषो वोक्त इत्यावृत्तिर्वा ॥

ततश्चेयं श्लोकव्याकृतिः ॥ अनिरुक्तात्मशक्तिरित्युक्तिः पङ्कस्तम्भनिभेत्यतो भाषते ॥ यद्यदिति । यस्य हरेर्यद्यत्स्वरूपं तत्तत् । वीप्सया कस्यचिद्वीप्सामवतारेषु व्यत्यासविषयिणीं पराकरोति । सर्वं च भगवद्रूपं वचसा निरुक्तं धिया मत्याऽक्षिभिरक्षैरिन्द्रियैरुत मनसा चेति निरूपितं मा भूत् । मा भूदिति पदे । तेन माङि लुङित्युक्तेर्लङ्र्थकता । अक्षिभिरिति मनसोऽपि सौमनस्येन ग्रहणसम्भवे पुनर्मनसेत्युक्तिः सर्वमूलत्वेन वा सर्वोपरमे कदाचित्तद्व्यापृतेरनावृत्तेर्वेति मन्तव्यम् । धियेति वृत्तिविशेषविवक्षयेति ज्ञेयम् । धीर्भीरित्याद्युक्तेः । न भवति तर्हि निरुपाख्यं किमित्यत आख्याति ॥ गुणरूपबृंहितमिति । गुणैर्ज्ञानानन्दादिभी रूपैर्निरूप्याकारैश्च बृंहितं पूर्णं च । गुणशब्देन न सत्त्वादिप्रतिग्रह इत्याह ॥ स वा इति । गुणापायनिसर्गलक्षणो गुणानां सत्त्वादीनामपायो वर्जनं स एव निसर्गः स्वाभाविकं लक्षणं जगद्विलक्षणताहेतुर्यस्य । अथवा गुणापायेनैव निसर्गः प्रादुर्भावादिः स एव लक्षणं यस्येति सः । वैशब्दस्त्रिगुणातीतमक्षरम् । न तस्य प्राकृता मूर्तिः । अरूपो भूतवर्जनात् । आनन्दमात्रकरः । सदेह इत्यादिप्रसिद्धिं द्योतयति । गुणरूपबृंहितं गुणान्सत्त्वादीन्रूपयति प्रतिष्ठितान्करोतीति गुणरूपं गुणा रूपमाकारो यस्येति वा तत्प्रधानं तद्बृंहितं विश्वं यस्य स्वरूपं मा भून्न भवति । कुत इत्यत आह ॥ स वा इति । विरुद्धधर्माधिकरणत्वान्नानयोरभेद इति भावः ॥ २९ ॥

चट्टी – स च विश्वरूप इति ब्रह्मजगतोर्बिंबप्रतिबिम्बभावोक्त्या सूचितं भेदं स्पष्टमाह ॥ यद्यदिति । वचसा । वचसा घट इत्यादिरूपेण निरुक्तं प्रतिपादितं यच्च धियाऽक्षिभिरक्षैर्मनसा च निरूपितं ज्ञातं

तत्सर्वं यस्य हरेः स्वरूपं मा भूत् । न भवत्येव तस्य लोकप्रमाणाविषयत्वादिति भावः। वै इत्यनेनालौकिकत्वान्नो विष्णुर्निरुक्तोऽतो निरूपितः । तथापि वेदेषूक्तत्वादुक्तो रूपी स एव चेति स्मृतिसिद्धं दर्शयति । लौकिकत्वालौकिकत्वाभ्यां भेद इति भावः । इतोऽपि भेद इत्याह ।। गुणेति । गुणरूपबृंहितं सत्त्वादिगुणबद्धम् । स हरिस्तु गुणापायनिसर्गलक्षणः । गुणानां सत्त्वादीनाम् । आपायं राहित्यमेव निसर्गलक्षणं स्वाभाविकलक्षणं यस्य स तथा । विरुद्धधर्माधिकरणयोरेतयोर्भेद इति भावः ।। २९ ।।

यस्मिन् यतो येन च यस्य यस्मै यं यो यथा कुरुते कार्यते वा ।
परावरेषां परमं प्राक् स्वसिद्धं तद् ब्रह्म तद्धेतुरनन्यदेकम् ।। ३० ।।

तात्पर्यम् – सप्तविभक्त्यर्थस्य कालस्य प्रकारस्य च हेतुर्ब्रह्मैव । 'विभक्त्यर्थस्य कालस्य प्रकाराणां च कारणम् । एक एव परो विष्णुः सर्वसत्ताप्रदत्वत' इति भविष्यत्पर्वणि ।। 'अनन्यः सदृशाभावादेको रूपाद्यभेदत' इति च ।। ३० ।।

सत्यधर्म – यस्मिन्यतो येन चेति श्लोके सप्तम्यादिसप्तविभक्त्यन्तपदानामधिकरणादिकारक-वाचकत्वभ्रान्तिमिव भ्रान्तिं यथाशब्दो दृष्टान्तार्थ इति च विघटयन्सान्वयं स्वयं व्याकृत्य मानमाह ।। सप्तेति । मूले यस्मिन्निति सप्तमीपुरस्कृतिर्यथा तात्पर्ये च कथंचिद्ब्रह्मर्था सप्तमीति पदार्था इदानीं सर्वासामविशेष ऐकनिष्ठ्यादिति भावेनैवमुक्तिरिति भावः । सप्तविभक्त्यर्थस्य सप्त च ता विभक्तयश्च तासामर्थोऽधिकरणत्वादिस्तस्य कालस्येति सामानाधिकरण्यम् । प्रकारस्येत्येकवचनं जातौ । हेतुरेव ब्रह्मेति वा ब्रह्मैव हेतुरिति वाऽन्वयः । मूलस्थयथापदार्थाः प्रकारा इति ज्ञेयम् । एक एवेत्यत्रैवकारः सर्वसत्ताप्रदत्वत एवेत्यन्वेति । तस्मादेवैक इत्युच्यते । यदधीना यस्य सत्ता तत्तदित्येव भण्यते । सर्वं समाप्नोषि ततोऽसि सर्व इत्यादेरेव न द्वितीयाभावत इत्यर्थः । एकपदमेकधा मानेन व्याख्याय व्याख्यातानन्यत्पदेन सह प्रकारान्तरेण स्थानान्तरस्थेन भविष्यत्पर्ववचनेन व्याख्याति ।। अनन्य इति । सदृशो ह्यन्यपदार्थः । न स विद्यते येन सो रूपाद्यभेदतो रूपाणि मत्स्यादीनि । आदिपदेन गुणकर्मादिसङ्ग्रहः । तदभेदतो हेतोरेक इत्यर्थः ।। ततश्चायं मूलार्थः ।। कारणत्वेन लोकव्याहरण-विषयाणां कालादीनां कारणं नारायण एवेत्याह ।। यस्मिन्निति । यस्मिन्काले इदं वर्तते । सर्वत्रापि तत्तद्विभक्त्यन्ततया कालपदमन्वेतव्यम् । यत उपादानाद्यात्मकाद्येन करणाद्यात्मना यस्य यत्सम्बन्धि यस्मै यं कर्म यः कर्ता यथा यैः प्रकारैर्जीवः कुरुतेऽपरेण स्वयं कार्यते वा । परावरेषां परैः सहिताश्च तेऽवराश्च तेषां तरतमभावेन परेषामवरेषामिति यावत् । ब्रह्मादीनां सकाशात्प्राक् स्वसिद्धमात्मनैव लब्धस्वरूपम् । तत्र तन्त्रं परममिति । परममुत्तमं बहुज्ञानं बहुसम्पदमनन्यन्निःसदृशमेकमवतार-

गुणकर्मभेदरहितं तस्योक्तरूपस्य कालस्य हेतुः कारणं तद्ब्रह्म प्रसीदतामिति पूर्वश्लोकादनुवृत्तमन्वेतव्यम् । यस्मिन्नित्यादिनाऽधिकरणादिसप्तविभक्त्यर्था उक्ताः । यथेति प्रकारः । कार्यते कुरुते वेति कालः । एतेषां तद्ब्रह्मेति ब्रह्माभेद उच्यत इति भाति । ततस्तथोक्तेरभिप्रायमाहेति तात्पर्यमवतारयन्ति ॥ ३० ॥

चट्टी – ब्रह्मणो जगत्कारणत्वेनापि तस्माद्भेद इत्याह ॥ यस्मिन्निति । यस्मिन्नधिकरणे यतोऽपादानात् । येन करणेन यस्य संबन्धि । यस्मै संप्रदानाय । यः कर्ता कुरुते । यदीप्सिततमं यः कर्ता कुरुते स्वतन्त्रः कार्यते वाऽन्वयेन प्रयोज्यकर्ता तेषां सर्वेषां ब्रह्म हेतुरिति । प्रत्येकं संबन्धः । प्रातिपदिकार्थकर्मत्वकर्तृत्वकरणत्वसंप्रदानत्वापादानत्वस्वस्वामिभावाद्याधाराधेयभावादिरूपस्येत्यादिसप्तविभक्त्यर्थस्य कुरुत इत्यादितिङर्थभूतस्य भूतभविष्यद्वर्तमानकालस्य सुप्तिङ्ङर्थेषु एकत्वद्वित्वबहुत्वरूपाणां, यथेत्युक्तप्रकाराणां च ब्रह्मैव कारणमिति भावः । ननु चतुर्मुखादीनां सृष्ट्यादौ कुलालादीनां च घटादौ कर्तृत्वदर्शनात्कथं ब्रह्मैव सर्वकारणमित्युच्यत इत्याशङ्क्य तदपि भगवदधीनमेव तस्यैव स्वतन्त्रत्वादित्याह ॥ परावरेषां परममिति । ननु न ब्रह्मणो जगत्कारणत्वमुपपद्यते । ब्रह्मव्यतिरेकेणान्यस्य सृज्यस्याभावात् । एकमेवाद्वितीयं ब्रह्मेति श्रुतेरित्यत आह ॥ अनन्यदिति । न विद्यतेऽन्यत्सदृशं यस्येति तथा । श्रुतिस्तु सदृशद्वितीयपरेति भावः । ननु नरसिंहादीनां संहारकारणत्वदर्शनात् ब्रह्मैव सर्वहेतुरित्ययुक्तमित्यत आह ॥ एकमिति । सर्वावताराभिन्न इत्यर्थः । सर्वकारणत्वोपयोगिपूर्वभावित्वमाह ॥ प्रागनादितोऽपि स्वत एव सिद्धमिति । तस्मै नम इत्युत्तरेणान्वयः । अयमर्थः सप्तविभक्त्यर्थस्य कालस्येत्यादिप्रमाणाद्वगन्तव्यः ॥ ३० ॥

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति तेषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ ३१ ॥

सत्यधर्म – शक्तिस्वरूपं व्यक्तीकरोति ॥ यच्छक्तय इति । यस्य हरेः शक्तयः पराऽस्य शक्तिर्विविधैव श्रूयत इति श्रुतिश्रुता वदतां वादिनां विवादसंवादभुवो विप्रतिपत्तिसम्प्रतिपत्तिभूमयो विषया इति यावद्भवन्ति । न केवलमेतावदेवेत्याह ॥ कुर्वन्तीति । तेषामात्मविषये मोहमनिर्धारणकारणं वैचित्र्यं मुहुः पुनः कुर्वन्ति तस्मै तच्छक्तियुक्ताय । भूम्ने पूर्णगुणाय । अनन्तायानन्तानां मुक्तानां गुणा येनेति तस्मा अनन्तगुणायापरिच्छिन्नगुणाय । भूम्ने व्याप्ताय वा । यद्वाऽनन्तगुणायभूम्न इति विशिष्टं पदम् । अनन्तगुण आकाशगुणः शब्दः । अनन्तं सुरवर्त्म खमित्यमरः । तेनाप्यन्तेऽवगम्यन्ते तेऽनन्तगुणायाः श्रीब्रह्मादयस्तेषु तेषां वा भूमा ज्यायांस्तस्मै नमः । अनन्तगुणायो यः शब्दवेद्यो भूमा महत्त्वं स यस्य तस्मै । नैकांशसममाहात्म्याः श्रीशेषब्रह्मशङ्करा इति गीताभाष्योक्तेः । यच्छक्तय एव

वादिनां वदतां वदिताम् । द्वितीयैकवचनम् । कुर्वन्ति । वदो वादावदो वाग्मीत्यमरः । ता एवात्ममोहमपि कुर्वन्तीति वाऽन्वयः । अनेन वादिनामित्येवालं कृतं भायात्तदापदमपनुत्त्यै वदतामिति तस्य वर्तमानकालवर्तमानतामभिप्रैतीति च ज्ञेयम् । न चैवं चेदतिरिच्यत इत्युच्यत इति चेन्न । इदानीमेवाभ्यस्य शुकतोकवत्किञ्चिद्वक्तीति प्रतीयेत तदपायोपायं वादिनामित्यत्रत्येन इनिप्रत्ययेन भूमार्थकेन प्रत्याययामास । तादृशा अपि तूष्णीका इति वदतामिति वदताऽसूचीति सर्वं चतुरस्रम् ॥ ३१ ॥

चट्टी – अनिरुक्तात्मशक्तिरित्येतद्विवृणोति । यच्छक्तय इति । वदताम् ब्रह्म निर्गुणं सगुणं वेति विवदतां वादो विवादः संप्रोक्त इति वचनात् । वादिनां यच्छक्तयो यस्य हरेः शक्त्यादिगुणा विवादसंवादभुवो विप्रतिपत्तिसंप्रतिपत्तिस्थानानि । तद्विषया इति यावत् । भवन्ति । केचिद्भगवतो गुणान्नाङ्गीकुर्वन्तीत्यर्थः । उभयेऽपि तत्र मुह्यन्तीत्याह ॥ कुर्वन्तीति । तेषामुभयेषामपि यच्छक्तय आत्ममोहं स्वविषयकाज्ञानं कुर्वन्ति जनयन्ति । उभयेऽपि न जानत इति यावत् । तत्र हेतुमाह ॥ अनन्तगुणायेति । योग्या गुणानामानन्त्यात्साकल्येन न जानन्ति । अयोग्यास्तु सर्वथा न जानन्तीति भावः । भूम्ने सर्वोत्तमाय ॥ ३१ ॥

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ।
अपेक्षितं किञ्चन सांख्ययोगयोः समं परं ह्यनुकूलं बृहत् तत् ॥ ३२ ॥

तात्पर्यम् – 'मदन्यो नास्ति सर्वेश इति विध्यासुरं मतम् । अस्तीति दैवमुभयोर्हरिरेव व्यपेक्षितः। निषेधविध्योर्विषयः फलदाता च केशवः । तादृग्बुद्धेः कारणं च स्थान-योश्चोच्चनीचयोरि'ति च ॥ ३२ ॥

सत्यधर्म – अस्तीति नास्तीति श्लोके तत्परं ब्रह्मास्तीति नास्तीति भिन्नविरुद्धयोर्भिन्नौ सत्त्वासत्त्वे तयोरपेक्षितं तद्विषयकापेक्षावदित्यन्यथाव्याख्यां प्रत्याख्यन् मानमेवाह ॥ मदन्य इति । उभयोः पूर्वदेवदेवयोस्तत्सम्बन्धिनो निषेधविध्योर्व्यपेक्षितो विषयः । व्यपाश्रय इत्यत्र यथा खण्डं व्यपेतं तथेति । हरिरेव तं विषयीकृत्येदं मतद्वयं प्रावर्ततेत्यर्थः । मूलेऽस्तीति नास्तीति क्रमः प्रमाणभाष्ये तु तद्विपरीतक्रमश्च किं कृतस्तथैव निषेधविध्योरित्यत्र घ्यन्तात्ल्पाच्कत्वनिमित्तयोः सतोर्विधिपदं न प्राक् प्रायुङ्क्त किं स क्रमोऽप्युच्चनीचयोरित्यत्र च्युतश्चेन्मैवम् । मूले तथैवोच्चनीचयोरित्यत्र च विध्युच्चयोरादितः सङ्कीर्तनं स्वरूपकृतमाहात्म्यं ततोऽन्यत्र बाहुल्यमाहात्म्यतोऽसुरा बहुला यस्मात् । कनीयसा देवा ज्यायसा असुराः । अतस्त्वितरज्ज्यायो लिङ्गाच्चेत्यादेः । प्रतिषेधस्य पुरोऽभिधा-नसम्भवात् । मदन्यो मद्भिन्नः सर्वेशो नास्त्यहमेव सर्वेश्वर इति यन्मतं तदासुरं दैत्यसम्बन्धि ।

तस्येदमित्यण् । एवं दैवं विद्धि जानीहि । अस्ति मदन्य ईश्वर इति दैवं मतं विद्धीत्यावर्तितमन्वेति । उभयोर्मतयोर्हरिरेव व्यपेक्षितो विषयः । कुतो यतस्तयोः फलदातृताद्दृग्बुद्धेश्च कारणं तच्चोच्चनीचयोः सुखदुःखप्रापकयोः स्थानयोः कारणमिति वा । फलदातेत्यत्र न दातेत्यनेन वा पूर्वोदीरितरीत्याऽन्वयः ॥

अथ मूलार्थः ॥ विवादसंवादभुवो भवन्तीत्युक्तं तौ च किमाकारावित्यतस्तमाह । अस्तीति नास्तीति भिन्नविरुद्धमतयोर्विरुद्धौ च तौ धर्मौ च विरुद्धधर्मौ भिन्नौ विरुद्धधर्मौ ययोस्तौ तथोक्तौ तयोः । अकेवलपूर्वपदत्वान्नानिच् । अधर्मोत्तरपदकत्वात्त्रिपदबहुव्रीहौ वा । भिन्नेत्येवोक्ते पञ्च पाण्डवा इत्येकः परश्च दशार्धसङ्ख्यास्त इति वदेच्चेत्तत्रार्थतः साम्येऽपि भङ्गीभेदवदिति स्यात्तदर्थं विरुद्धेति । तावत्येवोक्ते हरावणुत्वमहत्त्ववत्समानाधिकृतावित्यपि भायादतो भिन्नेत्यपि धर्मविशेषणमिति ज्ञेयम् । अपेक्षितं विषयीभूतं तदाकारस्तु मदन्य ईश्वरोऽस्तीति स नास्त्यहमेवेश्वर इति दर्शयतोर्मतयोरिति वेदितव्यः । ते एव कथमित्यतः कथयति ॥ वस्तुनिष्ठयोरिति । विभिन्नवस्तुनिष्ठयोः । ननु घटादेः स्वात्मना सत्त्वमन्यात्मनाऽसत्त्वमितिवत्किं प्रकृते सत्त्वासत्त्वे एते इत्येतदपाकरोति ॥ एकस्थयोरिति । वस्तुपदेन निस्स्वरूपतानिरासः । वस्तुनिष्ठयोरित्यत्र द्विबहुवचनान्तविग्रहो नेति दर्शयितुमेकेत्यादेः । साङ्ख्ययोगयोः शुद्धात्मतत्त्वविज्ञानजनको वेदान्तभागः साङ्ख्ययोगः कर्मकाण्डस्तयोः समम् । अविशेषेण नारायणपरा वेदा इत्यादेः प्रतिपाद्यम् ।

साङ्ख्यस्य वक्ता कपिलोऽयं सन्कपिलोऽन्यो जगाद हेत्युक्तः कपिलोऽसंस्तत्साङ्ख्यमपि ज्ञेयमसदिति ज्ञेयम् । साङ्ख्ययोगाविति गीताविवरणरूपे भाष्ये शुद्धात्मतत्त्वविज्ञानमित्यारभ्योपायश्च वक्ष्यत इत्यन्तेनोक्तौ साङ्ख्ययोगौ वा ग्राह्यौ । साङ्ख्यस्य शुद्धात्मतत्त्वविज्ञानस्य योगस्य चोपायस्येति तयोः समपेक्षितमेकं ब्रह्मैव विषय इत्यर्थः । अपेक्षितं न रक्षकं पालकरहितं वा । यथोक्तं न्यायदीपिकायाम् । पातीति पः । आतोनुपसर्गे क इत्यत्र योगविभागाद्वा मूलविभुजादित्वाद्वा कः । अन्येभ्योऽपि दृश्यत इति डो वा । पः पातरि समीरेऽर्के पः पुमान्यवनेपातरीति पैकविश्वैकाक्षरनिघण्टू । स्वयमेव सर्वरक्षकमितीक्षितमिति मतद्वन्द्वरहस्यं वेदितव्यमिति विषयादिपदमनिधायैवं बोधयामासेति सरसमानसैर्देया दृष्टिः । अनुकूलं स्वस्वकर्मानुरोधेन फलवितरणो हि तात्पर्योदाहृतमानख्यातिख्यापकः परं किञ्चन नास्तीत्यासुरं सौरं च बृहद्ब्रह्मास्तीति चैतद्विषयं पूर्णं प्रपद्य इत्यन्वयः ॥ ३२ ॥

चट्टी – विवादसंवादविषयत्वमेवोपपादयति ॥ अस्तीति । यद्भिन्नयोर्विरुद्धयोर्धर्मयोरपेक्षितं विषयः । किमाकारयोर्मदन्य इश्वरोऽस्ति नास्तीति वादिभिः प्रतिपाद्यमानयोर्भिन्नत्वविरुद्धत्वे कथमत्राह ॥ वस्त्विति । भिन्नवस्तुनिष्ठत्वादेकस्मिन्स्थितयोरित्यंगीकारे विरुद्धयोः । यद्यप्येकस्य स्वरूपेण सत्वं

पररूपेणासत्वमिति द्वौ धर्मौ स्तः । तथाऽपि नैव दृश्येते सत्वासत्वे किन्तु स्वरूपस्यैवेति द्योतनाय वस्तुनिष्ठयोरेकस्थयोरिति पदद्वयम् । यच्च किञ्चन । अलौकिकं यच्च सांख्ययोगयोः समम् । एकवाक्यतया प्रतिपाद्यम् । यच्चानुकूलम् । उभयविधज्ञानानुसारेण फलदं तत्परं बृहत् परं ब्रह्म । प्रसीदतामित्युक्तस्यानुषङ्गः । जीवभिन्न ईश्वरोऽस्तीति पक्ष एव श्रेयान् सांख्यादिशास्त्रेषु तथा प्रतिपादितत्वादित्यभिप्रेत्य सांख्ययोगयोः सममित्युक्तम् । हिशब्देन तु मदन्यो नास्ति सर्वेश इत्यादि प्रमाणप्रसिद्धिं दर्शयति ॥ ३२ ॥

योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ।
नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदताम् ॥ ३३ ॥

तात्पर्यम् – 'तत्कर्मणामदृष्टत्वादनामा चाप्यदर्शनात् । अरूपस्त्ववतारेण रूपकर्माणि दर्शयेत् । नित्यरूपो नित्यकर्माऽप्यव्यक्तत्वमपेक्ष्य तु । अरूपकर्मेत्युदितो रूपकर्मोज्झितेर्न त्वि'ति प्रकाशसंहितायाम् । 'अनामा सोऽधिकार्थत्वादव्यक्तत्वादरूपकः । कंसारित्वादिसाम्यार्थो व्यक्तरूपोऽवतारग' इति च । 'लोकदृष्ट्याधिकार्थानि मूलनामानि केशवे । अथ दामोदरादीनि लोकदृष्ट्या समानि तु । आनन्दोऽव्यक्तरूपस्तु मूलरूपमुदाहृतम् । स एव व्यक्तिमापन्नः प्रादुर्भाव उदीरित' इति च ॥ ३३ ॥

सत्यधर्म – दैवमतमेव मतं सदैव संसेवनीयं श्रेयःसाधनत्वात् । अनुग्रहार्थमिति श्लोकेऽनामरूपो नामरूपाणि भजत इत्याद्युक्तेरनित्यता नामरूपाणां व्यक्तमुक्ता भाति । तच्च निष्टङ्कमनिष्टमित्यतस्तद्भावमाविष्करोति ॥ तत्कर्मणामिति । कंसहिंसक इत्याद्यर्थभूतकंसहिंसनादिकर्मणां तत्तत्र पूर्णमद इत्यादिवेदवेदितमूलरूपे अदृष्टत्वाल्लोकैरिति शेषः । कृष्णादिरूपाणामदर्शनात्तत्रैव तदैव तैरेव । अतो नामा च रूपश्चावतारेण कृष्णादिना दर्शयेत् । तत्स्वभावमावेदयति ॥ नित्यरूप इत्यादिना । तर्हि किं कृतमदर्शनमित्यतो दर्शयति ॥ अव्यक्तत्वमपेक्ष्य त्विति । इत्येवारूपकर्मेत्युदितो न तु रूपकर्मोज्झितेस्तद्धानात् । प्रकारान्तरेणापि प्रमाणेन स्थानान्तरस्थेनाह ॥ अनामेति । इदं ध्वनयामास मध्वमुनिर्मध्ये मानं प्रकाशसंहितायामिति नामग्रहणेनैवेति चेति ग्रहणेन नैतयोर्भागान्तरस्थत्वं मन्तव्यमिति । अधिकार्थत्वादर्थपौष्कल्येनानल्पतया निर्वक्तुमयोग्यत्वादनामा । अव्यक्तत्वात्सूक्ष्मसूक्ष्मत्वादरूपकः । अवतारगः कृष्णाद्यवतारं गतः कंसारित्वादिसामर्थ्यसहित इति व्यक्तनामरूपश्च । अरिपदं यद्यपि रिपुमात्राभिधायि तथाऽप्यरिर्वधादिकर्तेति गीताभाष्योक्तेररिर्हिंसकः ।

सर्वेषां नाम्नामधिकार्थत्वं चेन्न तद्वेदनं सर्ववेदितृसाधारणमिति केषाञ्चिदेव तत्राधिकार इति स्यादित्यतोऽधिकार्थत्वं स्वाभाविकं सदप्येतदुपाधिना नानाविधं प्रतीयत इति मानेनैवाह ॥

लोकदृष्ट्येति । यानि केशवे मूलनामानि नारायणादीनि लोकदृष्ट्याऽधिकार्थानि । भागवत्या दृष्ट्या तु समानीति भावः । यानि दामोदरादिनामानि लोकदृष्ट्या समान्यन्वर्थानि । आनन्दस्तदात्मको मूलकारोऽव्यक्तरूप एवोदाहृतः । स एव मूलरूपी पद्मनाभादिर्व्यक्तिं कृष्णाद्यात्मनाऽऽपन्नः सन्प्रादुर्भावः प्रादुर्भूत उदीरित इत्यर्थः । यद्वा स्वामिन्दैत्यादिकृताऽऽपत् नोऽस्माकमित्युदीरितः । प्रादुर्भावे तदर्थं ब्रह्मादिप्रार्थित इति यावत्स एव व्यक्तिमापन्न इत्यावृत्त्याऽन्वयः ॥ तत इयं मूलार्थविवृतिः ॥ य इति । यो भगवाननन्तः परमः स्वपादमूलं भजतां जनानामनुग्रहार्थं तदुपरि कृपां कर्तुमनामरूपोऽधिकानामर्थानां सर्वसाधारण्येनाप्रत्यक्षत्वादरूपाणां रूपाणामभिमततथात्वादनामरूपो जन्मकर्मभिर्जन्मभिः कृष्णादिप्रादुर्भावैः कर्मभिः कंसहिंसादिभिर्नामानि रूपाणि च भजते स मह्यं प्रसीदतु । उक्ता गतिः । सर्वनामा सर्वकर्माऽनामासौ प्रसिद्धत्वादरूपो भूतवर्जनादित्यादेश्च । सर्वथैतद्राहित्यं भगवत इति मतमासुरमतमिति मन्तव्यम् ॥ ३३ ॥

चट्टी – ननु पूर्णकामत्वेनोदासीनस्य प्रार्थने को लाभ इत्यत आह ॥ य इति । योऽनन्तो भगवान् अनामरूपोऽन्यैर्दृष्टप्रवृत्तिनिमित्तान्यल्पानि वा नामान्यैर्दृष्टानि रूपाणि रुग्मवर्णादीनि च न विद्यन्ते यस्य स तथा । मूलरूपेण तादृशोऽपि स्वपादमूलं भजतामनुग्रहार्थं जन्मकर्मभिर्जन्मभिरवताररूपैः रूपाणि भेजे व्यक्तो भवति । कर्मभिरुदरे दामबन्धनादिकर्मभिर्नामानि दामोदरादीनि भेजे लोकानां ज्ञापयति । स परमः प्रसीदतामित्यर्थः । हिशब्देन तत्कर्मणामदृष्टत्वादित्यादिप्रमाणसिद्धतामुक्तार्थस्य दर्शयति ॥ ३३ ॥

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ।
यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥ ३४ ॥

तात्पर्यम् – 'स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु । मध्यमाश्चाप्यनिर्णीतं जीवाद्भिन्नं जनार्दनम् । पूर्णानन्दादिगुणकं सर्वजीवविलक्षणम् । उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च । बुद्धिशुध्यनुसारेण यथाप्राणं शरीरगम् । श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः । देवदेवेश्वरं सूत्रमानन्दं प्राणवेदिन' इति च ॥ ३४ ॥

सत्यधर्म – यः प्राकृतैर्ज्ञानपथैरिति श्लोके तत्तदाशयानुसारतः प्राकृतैर्मनोविकारैर्ज्ञानपथैर्विभाति विषयीकृतो भवतीति भ्रान्तितान्तिं प्रमाणेनैव निराकरोति ॥ स्वदेहस्थमिति । अधमा अधिकारिणः स्वदेहस्थं स्वदेहे सन्तं विचार्यमाणे तन्त्रेण सु अदेहे स्थितं तद्बाधाबाधनास्पदं हरिं जीवमेव प्राहुः । व्यवहाररूपकार्यादेव तत्कारणज्ञानं लभ्यत इतीत्थमुक्तिरिति ज्ञेयम् । मध्यमा मिश्रमतिकाः। जनार्दनं न जायतेऽर्दयति संसारमिति जनार्दनः । तथा हि बाभ्रव्यशाखायाम् । सम्भूतः स जनार्दन इति । स

ह्यासीत्स नासीत्सोऽर्दयतीति गीताभाष्योक्तेरजं संसारार्दकं च । जीवाद्भिन्नमन्तर्णीतं सन्दिग्धतया प्राहुः । भिन्न इत्येतद्विशेषणे भेदेऽनिर्णीत इत्यन्वेति सामर्थ्यादिति ज्ञेयम् । तथा चानिर्णीत-भेदवन्तमाहुरिति पर्यवस्यति । उत्तमास्तु पूर्णानन्दादिगुणकं तत एव सर्वजीवविलक्षणम् । तदपि न सामान्येनेत्याह । तेषु च तारतम्येन हिरण्यगर्भादिस्तम्बपर्यन्तं तारतम्येन तरतमभावस्तेनेति । बुद्धिशुद्ध्यनुसारेणेत्युत्तममात्रान्वयि । अन्यथा शुद्धिपदं कुटिलकटाक्षीभूयादिति मन्तव्यम् । तारतम्यस्य बुद्धिशुद्धिसाध्यत्वात्सौलभ्यं चाधिकम् । अथवा बुद्धिशुद्ध्यनुसारेणेत्यत्र भावे क्तः । बुद्धिरेषामस्तीति बुद्धिनो निन्दायामिनिः । अधमा अधमबुद्ध्यनुसारेण । मध्यमाश्च बुद्ध्यनुसारेण मिश्रज्ञानानु-सारेणोत्तमाश्च बुद्धिशुद्ध्यनुसारेणेति धिया विविच्य सर्वत्रान्वयो ज्ञेयः ।

अधिकारित्रयानुरूपं निदर्शनं दर्शयति ।। यथेति । यथा शरीरगं प्राणं जना अधमाः श्वासमात्रं तदात्मकमेव प्राहुर्मध्यमा अनिर्णीतं श्वासो वा मातरिश्वा वेति प्राहुरुत्तमाश्च देवदेवेश्वरं देवदेवा महादेवादयस्तेषामीश्वरं देवदेवो हि वासुदेवः स ईश्वरो यस्य तं वा सूत्रं तन्नामानमानन्दं तत्प्रदं वाऽऽनन्दं यथा भवति तथा प्राणवेदिन उक्तप्रकारेण प्राहुरिति वा तदर्थः ।। ततश्चायं श्लोकार्थः ।। मदन्यो नास्तीश्वर इति मतमासुरमिति विवेक्तुमधिकारिणस्तज्ज्ञानं चैतद्रूपमिति निरूपयति ।। य इति । यो हरिर्भगवान् जनानां त्रिविधानां प्राकृतैर्ज्ञानपथैर्यथाशयैः स्वस्वमानसमनुसृत्य । न स दूरेऽस्तीत्याह ।। देहगत इति । विभाति विषयीभवति । कृतं सुकृतं नास्ति येषां ते ह्यकृताः प्रकर्षेण अकृताः प्राकृताः। सामर्थ्यात्प्रार्थस्य कृतेत्यनेनान्वयः । प्राकृतैरविहितैर्ज्ञानपथैरित्यर्थः । इदमधमादिकार्यधिकारिकम् । प्राकृतैरमहाफलेष्टमात्रपर्यवसायिभिर्मिश्रैः । कृतं युगेऽपि पर्याप्ते विहित इति विश्वः । मध्यमान-धिकरोतीदम् । प्रकृतेः स्वभावस्येमे तस्येदमित्यण् । प्राकृताः स्वाभाविकास्तैर्ज्ञानपथैर्ज्ञानस्य पन्थानो ज्ञानपथाः । ऋक्पूरब्धूः पथामानक्ष इत्यप्रत्ययः । इत्युत्तमाधिकारिज्ञानाभिधानम् । पार्थिवं पृथिवीसम्बन्धिनं गुणमप्रधानं शरीरमाश्रितोऽनलो वायुर्यथा श्वासमात्रत्वेन मातरिश्वा वा श्वासो वेति देवदेवेश्वरः सूत्रात्मा वेति तथा विभाति । स ईश्वरो मे मनोरथं मनोगतमभिलषितं कुरुतात् ।। ३४ ।।

चट्टी – यच्छक्तयो विवादसंवादभुव इत्युक्तं स्पष्टयति ।। य इति । देहगतो यो भगवान् ज्ञानपथैः सदागमैः प्राकृतैर्दुरागमैश्च ज्ञानकरणैर्निमित्तैर्जनानां यथाऽऽशयमनादिवासनावासितान्तःकरणानुसारेण विभाति विविधतया ज्ञानविषयो भवतीत्यर्थः । तत्र दृष्टान्तमाह ।। यथेति । पार्थिवं भौतिकं गुणं देहमाश्रितोऽनिलः प्राणः । यथा जनानां यथाऽऽशयमन्तःकरणानुसारेण विभाति तथेत्यर्थः ।। तदुक्तम् ।। स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु । मध्यमाश्चाप्यनिर्णीतं जीवाद्भिन्नं जनार्दनम् । पूर्णानन्दादि-गुणकं सर्वजीवविलक्षणम् । उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च । बुद्धिशुध्यनुसारेण यथाप्राणं

शरीरगम् । श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः । देवदेवेश्वरं सूत्रमानन्दं प्राणवेदिन इति ॥ ३४ ॥

श्रीशुक उवाच

इति स्तवैः संस्तुवतः स तस्मिन्नघमर्षणे ।
प्रादुरासीत् कुरुश्रेष्ठ भगवान् भक्तवत्सलः ॥ ३५ ॥

सत्यधर्म – एतदालोचिता स्तुतिरेतत्कालोचितेत्यफलदित्यालपति ॥ इतीति । स्तवैः स्तुत्यैर्गुणैस्तद्वत्त्वेन स्तुतिं कुर्वतः स भक्तवत्सलो भगवान्प्रादुरासीदित्यन्वयः ॥ ३५ ॥

चट्टी – संस्तुवतो दक्षस्य स भगवान्प्रत्यक्षोऽभूत् ॥ ३५ ॥

कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः ।
शङ्खचक्रासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥

सत्यधर्म – शङ्खचक्रासिचर्मेषुधनुःपाशगदं तस्याधारः ॥ ३६ ॥

चट्टी – तं वर्णयति ॥ कृतपाद इत्यादिसार्धचतुर्भिः । सुपूर्णस्यांसे स्कन्धे कृतौ पादौ येन स तथा । प्रलंबा दीर्घा अष्टौ महान्तो भुजा यस्य । चक्राद्यष्टायुधधरः ॥ ३६ ॥

पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ।
वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥

सत्यधर्म – घनवन्मेघवच्छ्यामो घनश्यामो घनश्च महांश्चासौ श्यामः षोडशवार्षिक इत्युक्तेस्तरुणो वा ॥ ३७ ॥

चट्टी – प्रसन्नं वदनमीक्षणे च यस्य । वनमालया निवीतं कण्ठादिपादान्तं व्याप्तमंगं यस्य । लसंतौ श्रीवत्सकौस्तुभौ यस्य ॥ ३७ ॥

महाकिरीटकटकस्फुरन्मकरकुण्डलः ।
काञ्चयङ्गुलीयवलयनूपुराङ्गदभूषितः ॥ ३८ ॥

सत्यधर्म – वलत इति वलय इति नुपूरविशेषणम् । वल संवरणे वलमलितनिभ्यः क्यन् । पारिहार्यः कटकं वलयोऽस्त्रियामित्यमरोक्तेः । कटकस्य पृथगुक्तेर्वलयमत्र पादभूषणम् । कटकस्योक्तत्वादिति

व्याख्यानात् । पदाङ्गदनूपुरोऽस्त्रियामित्यमरं नापश्यदिति तथाऽन्यवाचकस्य विनाऽभिधानाभिधानं धौर्त्येनैवं वचनमिति च न च मदकृतकृतिनः ।। ३८ ।।

चट्टी – महान्ति किरीटकटकानि यस्य । स्फुरती मकरकुण्डले यस्य । कांच्यादिभिर्विभूषितो । वलयमत्र पादभूषणं दृष्टव्यम् । कटकस्योक्तत्वात् ।। ३८ ।।

त्रैलोक्यमोहनं रूपं बिभ्रत् त्रिभुवनेश्वरः ।
वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ।। ३९ ।।

सत्यधर्म – नारदश्चोत्तरत्र भगवत्सङ्कल्पितकल्पकत्वेनादावुदितः ।। ३९ ।।

चट्टी – सुरयूथपैः सुरयूथपालैः ।। ३९,४० ।।

स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः ।
रूपं तन्महदाश्चर्यं विलक्ष्यागतसाध्वसः ।
ननाम दण्डवद् भूमौ प्रहृष्टात्मा प्रजापतिः ।। ४० ।।

सत्यधर्म – महदाश्चर्यमिति समस्तम् । महतामाश्चर्यम् । द्वे पदे वा । दण्डवदित्यनेनाङ्गस्मरणाभावो ध्वन्यते ।। ४० ।।

न किञ्चनोदीरयितुमशकत् तीव्रया मुदा ।
आपूरितमनोद्वारो ह्रदिन्य इव निर्झरैः ।। ४१ ।।

सत्यधर्म – ह्रदिन्यो नद्यः । तटिनी ह्रदिनी धुनीत्यमरः । ह्रदाः सन्त्यस्यामितीन्यन्तात् ङीबन्तः शब्दः ।। ४१ ।।

चट्टी – ह्रदिन्यो नद्यो निर्झरैरिव प्रवाहैः । यथाऽऽपूर्यन्ते । एवमेव तीव्रयाऽनर्गलया मुदाऽऽपूरितानि मनोद्वाराणीन्द्रियाणि यस्य स तथा । वागिन्द्रियाणां महानन्दपूर्णत्वेनावृत्तिकत्वान्न किञ्चिद्वक्तुं शक्तोऽभूत्तदित्यर्थः । यद्यप्यसौ नावोचत्तथाऽपि चित्तज्ञ इदं वक्ष्यमाणमाह ।। ४१,४२ ।।

तं तथाऽवनतं भक्तं प्रजाकामं प्रजापतिम् ।
चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ।। ४२ ।।

सत्यधर्म – प्रजाकाममित्यनेन स्त्र्यपत्यप्रयुक्त एवास्यैतावान्संवत्सरो भगवद्दत्तवरस्य तदनुरूपता चेति ध्वन्यते । जनार्दन इत्यनेनैककारिता हरिरूपाणां किन्तु सेवाविशेषवशात्तत्तदाशीःपूरकतेति

द्योत्यते। अथवा जनं जननमर्दयत्यागमयतीति । अर्द गतौ याचने चेति धातोः । अन्यथा जनं जननमर्दयतीति व्युत्पत्त्यैतन्नाम्नः प्रजाकामनासमयाननुरूपता स्यादिति तथा न प्रयोक्तव्यं तत्स्यादिति किन्न सन्तोष्टव्यम् ।। ४२ ।।

श्रीभगवानुवाच
प्राचेतस महाभाग संसिद्धस्तपसा भवान् ।
यच्छ्रद्धया मत्परया मयि भावं परं गतः ।। ४३ ।।

प्रीतोऽहं ते प्रजानाथ यत्ते स्याद्बृंहणं तपः ।
ममैष कामो भूतानां यद् भूयासुर्विभूतयः ।। ४४ ।।

सत्यधर्म – भावो हि भक्तिः । ते तव यद्बृंहयति प्रजा इति बृंहणं तप इति सामानाधिकरण्यं तेनाहं ते प्रीत इति प्रकृतकार्यद्वयप्रतीक्षया ते त इति वचः । विभूतयो मत्सन्निधानविशेषपात्राणि । विभूतयो विविधभूतय इति गीताभाष्योक्तेः । भूयासुरिति ममाप्येव कामो वाञ्छितः । अनेन दातृप्रतिग्रहीत्रोः भर्तुः खट्वायामसम्मतिरसम्मतं च पत्न्याः पृथ्वीशयनमिति नीतिवन्न किन्त्वानुरूप्यं ब्रह्मब्रह्मभुवोः सूचयामासेति ज्ञेयम् ।। ४३,४४ ।।

चट्टी – भावं भक्तिं गतः प्राप्तः । यद्यतस्ते तपो बृंहणं प्रजावृद्धिकरम् । अतस्तेऽहं प्रीतो मत्तपसो लोकसमृध्यर्थत्वे त्वत्प्रीतेः किं कारणमत्राह ।। ममेति । भूतानां विभूतयः समृद्धयो भूयासुरिति यत् एष एव मम कामः । अतो मत्कामपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ।। ।। ४३, ४४ ।।

ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ।
विभूतयो मम ह्येता भूतानां भूतिहेतवः ।। ४५ ।।

तात्पर्यम् – 'विशेषव्यक्तिपात्रत्वात् ब्रह्माद्यास्तु विभूतयः । तदन्तर्यामिणश्चैव मत्स्याद्या विभवाः स्मृता' इति तन्त्रनिर्णये ।। ४५ ।।

सत्यधर्म – ब्रह्मा भवो भवन्तश्चेति श्लोके विभूतयः साक्षाद्रूपाणीति भ्रमभ्रंशपूर्वकं तात्पर्यार्थं मानेनानुमानमुनिराह ।। विशेषेति । तदन्तर्यामिणो ब्रह्माद्यन्तर्यामिणो विभवा इत्युच्यन्त इति विभवविभूतिपदार्थवैलक्षण्यं मानिकं ज्ञेयम् ।। ततश्चायं मूलार्थः ।। पूर्वोदीरिताः किमाकारा विभूतय इत्यतस्ता विस्तरेणाह ।। ब्रह्मेति । भवन्तो भवदाद्याः प्रजेशाः । नव विश्वसृजो युष्मानिति यद्वक्ष्यति । विभूतय इत्यानुगुण्येनैता इत्युक्तिः । भूतानां विशेषसन्निधानपात्रतया विभूतिपदवाच्यानां भूतिहेतवो मत्स्याद्या इत्यपि मानानुसारतो योजनीयम् ।। ४५ ।।

चट्टी – भूतविस्तारप्रयत्नश्च तवोचित एवेत्याह ॥ ब्रह्मेति । भवन्तः प्रजापतयो मम विभूतयो विशेषाभिव्यक्तिस्थानानि । एता विभूतयो भूतैरुद्भवस्य हेतवः ॥ ४५ ॥

तपो मे हृदयं ब्रह्म तनुर्विद्या क्रियाऽऽकृतिः ।
अङ्गानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥ ४६ ॥

तात्पर्यम् – 'तपोऽभिमानी रुद्रस्तु विष्णोर्हृदयमाश्रितः । विद्यारूपा तथैवोमा विष्णोस्त-नुमुपाश्रिता । शृङ्गाराद्याकृतिगतः क्रियात्मा पाकशासनः । अङ्गेषु क्रतवः सर्वे मध्यदेहे च धर्मराट् । प्राणो वायुश्चित्तगतो ब्रह्माद्याः खेषु देवता' इति च ॥ यदाश्रितं यद्भवति तत्तन्नामकमीरितमि'ति शब्दनिर्णये ॥ ४६ ॥

सत्यधर्म – तपो मे हृदयं ब्रह्मेति पद्ये सामानाधिकरण्येन जडानामेव भगवदवयवतादात्म्यमुच्यत इत्यन्यथाप्रतिपत्तिव्यथां श्लथयन्मानत एव तत्तात्पर्यमीरयन् मुनिरीरयति ॥ तपोऽभिमानीति । तपोऽभिमानी रुद्रो विष्णोर्हृदयमास्थितो विद्या तद्रूपोमा मम तनुमाश्रितेति पदमेकम् । तनुं समग्रमङ्गं क्रियात्मा कर्मस्वामी पाकशासन इन्द्रः शृङ्गाराद्याकृतिगतः । क्रतवस्तदभिमानिनोऽङ्गेषु हस्तपादादिषु मध्ये देहे च यमराड्यमः प्राणो वायुर्मुख्यश्चित्तगतो मनोभिमानवान् ब्रह्माद्याः खेष्विन्द्रियेषु यथायथं यदिन्द्रियमाश्रयो यस्य तद्यदाश्रयं तद्वस्तु तत्तन्नामकमीरितं न तु तत्तादात्म्येन ॥ ततो वितन्यते मूलम् ॥ ब्रह्म पूर्णं पञ्चभिः पञ्चभिर्ब्रह्मेत्यत्र ब्रह्म पूर्णमिति व्याख्यानात् । बृहद्ब्रह्म महच्चेति शब्दाः पर्यायवाचका इति मोक्षधर्मोक्तेश्च । तपस्तदभिमानिरुद्रस्तज्जस्तदाश्रितश्च । एवमेव सर्वत्र बोध्यम् । विद्या तदभिमानिन्युमा क्रियेन्द्र आकृतिः शृङ्गाराद्याकारगः । क्रतवो यज्ञास्तदभिमानिनश्च । यज्ञदेवता इन्द्राद्या इति छान्दोग्यभाष्योक्तेः । अङ्गान्यवयवभवाः । धर्मराड्यम आत्मा मध्यदेहज आत्मेत्यावृत्त्य तस्य चित्तगतो वायुरित्यर्थः । असवः प्राणास्तदाश्रिताः खेष्विति मनोभिधानाद्धृदयाद्यङ्गेषु ब्रह्माद्याः सुरास्तज्जास्तदाश्रिताश्चेति ज्ञेयम् । ब्रह्म वेदस्तस्य यजुरेव शिरो ऋग्दक्षिणः पक्षः सामोत्तरः पक्ष इत्यादेस्तदवयवोक्तेस्तदभिमानिनो यजुर्वेदस्य यजुर्वेदात्मको हरः । इन्द्राद्या यजुरुदिष्टा इति च । ऋचः श्रीर्गीरुमाद्याश्चेति छान्दोग्यभाष्योक्तेः । साम्नः प्राणशिवादय इति गीतातात्पर्योक्तेः । ता आप ऐक्षन्त । यजमानः प्रस्तरः । महतश्चतुर्मुखात् । ममात्मा भद्रसेन इत्यादीनां वैदिकानां लौकिकानां च प्रयोगाणां गतिरकामेनाभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामिति सूत्रकृदाद्युक्ताऽङ्गीकरणीया । एतत्पक्षे ब्रह्मपदार्थसामञ्जस्यं ज्ञेयम् ॥ ४६ ॥

चट्टी – विश्वसृष्ट्यर्थत्वेन त्वत्तपसाऽहं प्रीत इत्युक्तम् । तदेव तपः स्तुवन् प्रसंगादन्यान्यपि लोकवृद्धिकराणि विद्यादीनि स्तौति ॥ तप इति । अत्र तप आदिशब्दैः प्रसिद्धतप आद्यास्तदभिमानिनो

देवाश्च ग्राह्याः । ब्रह्म पूर्णं तपो मे हृदयं प्रियं कुतः; तपोऽभिमानी रुद्रो मम हृदयाज्जातस्तदाश्रितश्चेत्येवं व्याख्येयम् । विद्या तदभिमानिन्युमा तनुस्तनोर्जाता तदाश्रिता च । क्रिया क्रियाभिमानीन्द्र आकृतिः शृङ्गाराद्याकृतेर्जातस्तदाश्रितश्च । सर्वे ऋतवो यज्ञास्तदभिमानिनो देवाश्चाङ्गान्यङ्गेभ्यो जातास्तदाश्रिताश्च । शिरो वै तद्यज्ञस्य यत्प्रवर्ग्यो ग्रीवोपसदश्चक्षुष्याज्यभागावित्यादिश्रुतेः । धर्मस्तदभिमानी धर्मराजश्चात्मा मध्यदेहाज्जातस्तदाश्रितश्च । असवः प्राणाः सुरास्तदभिमानिनो ब्रह्माद्याश्चासवः प्राणेभ्यो जातास्तदाश्रिताश्चेत्यर्थः । एतत्सर्वं तपोऽभिमानी रुद्र इत्यादिप्रमाणादवगन्तव्यम् ॥ ४६ ॥

अहमेवेदमासाग्रे नान्यत् किञ्चान्तरं बहिः ।
संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥

तात्पर्यम् – संज्ञानमात्रं यदिदं त्वया तपसा दृष्टं मम रूपं तदेवाग्र आसीत् । 'नानावर्णो हरिस्त्वेको बहुशीर्षभुजोरुपात् । आसील्लये तदन्यत्तु सूक्ष्मरूपं श्रियं विना । असुप्तः सुप्त इव च मीलिताक्षो भवेद्धरिः । अन्यत्रानादराद्विष्णौ श्रीश्च लीनेव कथ्यते । सूक्ष्मत्वेन हरौ स्थानांल्लीनमन्यदपीष्यत' इति मात्स्ये ॥ ४७ ॥

सत्यधर्म – अहमेवेदमासाग्र इति श्लोके जगदिदमहमेव मदात्मकमेवासेत्यपार्थप्रतीतिमपाकुर्वन्स्वयं व्याकृत्य प्रलयकालवर्तिनो हरेर्निराकारत्वभ्रमपरिहाराय प्रमाणमुदाहरति ॥ सज्ज्ञानेत्यादिना । यत्त्वयेत्यादीकृत्य तदेवेत्यन्तं मूले पूरणम् । नानावर्णो रुक्मवर्णं शशिवर्णम् । नानावर्णानि दिव्यानीत्यादेः । लोहिताकारो वासुदेवः शुक्लवर्णः सङ्कर्षण इत्यादिछान्दोग्यभाष्योक्तेः । बहुशीर्षभुजोरुपात् । बव्हिति सर्वान्वयि । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । अनन्तकरपादमुखोदरादिरित्यादेः । सूक्ष्मरूपं भूतसूक्ष्ममुपलक्षणया जीवाव्याकृताकाशवर्णानां ग्रहः प्रामाणिकत्वात् । एताञ्छ्रियं रमां च विनाऽन्यत्किञ्चन नासीत् । असुप्तः स्वभावतः सुप्तः कार्यतोऽत इवेत्युक्तिः । तर्हि लक्ष्म्या लयाभाव इति भावः स्यात् । स च स इदं सर्वं विलापयति स हरिः परः परमात्मा तेजः परस्यां देवतायामित्यादिबाधित इत्यत आह ॥ अन्यत्रेति । विष्णोरन्यत्रानादराद्धेतोर्लक्ष्मीर्लीनेति कथ्यते । हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तित इत्यन्यत्राप्येतदेवाभिप्रेत्योक्तम् । अन्यदपि हरौ सूक्ष्मत्वेन स्थानादवस्थानात्स्थूलतयाभावादिति यावल्लीनमिष्यते । पूर्वं पूर्वं सूक्ष्मरूपनिरूपणं नियम्योक्तौ नियामकसंवित्सुलभसाध्येति दर्शयितुम् । पश्चात्प्राक् च श्रीरिति कथनं सूक्ष्मसत्ताऽपि लक्ष्म्यायत्तेति मुख्यतामाख्यातुमिति मतिमद्भिमर्शनीयम् । असुप्तः सुप्तानभिचाकशीतीति श्रुत्यर्थगर्भेयं माहात्म्यवाणीति मन्तव्यम् ।

ततोऽयं श्लोकार्थः ॥ अहं मम यदिदं त्वया दृष्टं रूपं तदेवाग्रे सृष्टेः प्राक् प्रलय इति यावदास । विभक्तिप्रतिरूपकमव्ययम् । यथा द्रोणेरुलूकेन कृतमप्यास बोधकमित्यनुव्याख्याव्याख्यासुधायां नन्वासेति कथम् । अस्तेर्भूरित्यस्य नित्यत्वात् । विभक्तिप्रतिरूपकं चाव्ययं भवतीति वचनाद-व्ययमेतदिति न दोषः । विभक्तिप्रतिरूपकमव्ययमित्युच्यते । न चैवं विभक्तिरस्ति । अमन्तानुप्रयोगस्य विद्यमानत्वादित्युक्तेः । गत्यर्थादसतेर्धातूनामनेकार्थत्वादासाभूदिति ज्ञेयम् । एवमेव यदिदमुपासत इति तलवकारभाष्यस्थासतेर्विनियामकमित्यत्रत्यासेति व्याचक्रिरे श्रीसत्यप्रियतीर्थगुरुराजाः । अन्तरं सर्वान्तःस्थं बहिर्बहिरपि स्थितम् । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादेः । अन्यदित्यत्राप्यन्वेति । बहिरन्यत्किञ्च किमपि नासान्तरमुदरस्थितमासेति वा । संज्ञानमात्रं ज्ञानात्मकमव्यक्तं विना प्रसादं विश्वतः सर्वप्रकारेणाप्यन्यत्किञ्चन सूक्ष्मं लक्ष्मीं च विना नास । प्रसुप्तमिव वस्तुतस्त्वलुप्तज्ञप्ति । सदेव सोम्येदमग्र आसीदिति व्याख्यावसरे इदमग्रे षष्ठ्यर्थे द्वितीयेति बृहद्भाष्यदिशाऽपि शक्यं पद्यं योजयितुम् । इदमस्य जगतोऽग्रे यस्य मम रूपं तपसा त्वया दृष्टं तदहमेवाहं नैतस्य तस्य च भेद इति भावः । सर्वमुर्वरितं पूर्ववत् । ननु बृहद्भाष्ये भाष्यकृत्पादः प्रथमप्राप्तां प्रथमां सप्तसु प्रथमेति महाव्याकरणसूत्रतः सुनाऽनायाससम्पादनीयषष्ठ्यर्थतामतीयाय द्वितीयां च कुतः स्वीकृतवानिति चेत् । शङ्का यद्यपि सातङ्कीकर्तुं शक्या न केनचित् । तथाऽपि भक्तेर्गौरव्याः किमसाध्यं वदाम तम् । स्वतन्त्रेच्छोऽपि प्रथमेति कथिते सप्तविभक्त्यर्थैरुप-स्थितैर्भाव्यम् । द्वितीयेति कथिते च षण्णां विभक्त्यर्थानामित्यर्थोपस्थितिलाघवे धियमाधाय 'षट्सु द्वितीया यस्माच्चेति' छान्दोग्यभाष्ये स्वोक्तदिशेति पक्षद्वयेऽपि महाव्याकरणसम्मतिरेव किलेति कश्चिदविपश्चिन्नासिकां कर्षयेत्सोऽपि तुष्यत्विति षष्ठ्यर्थे द्वितीया योगविभागेन केवलं द्वितीया । इदमप्येतिमात्रशेषेणाभिलषितसर्वनिर्वाहिका नैवं प्रथमेत्येवमूचे सुचेता इति वा समाधिरवधेयः ॥ ४७ ॥

चट्टी – तपसः संतानवृद्धिहेतुत्वं दर्शयितुं द्वितीयतृतीययोरनुक्तमितिहासमाह ॥ अहमेवेत्यादि-चतुर्भिः । आन्तरं सर्वान्तःस्थितं बहिः सर्वस्माद्बहिरपि स्थितं संज्ञानमात्रं शुद्धज्ञानादिरूपम् । मात्र शब्दादशुभव्यावृत्तिः । अव्यक्तं स्वानुग्रहमन्तरेण द्रष्टुमशक्यं विश्वतो विश्वं पूर्णं प्रलये प्रसुप्तं सुप्त्यवस्थापन्नमिव वर्तमानम् । मुख्यसुप्त्यभावादिवेति । अहन्तु मम । सप्तसु प्रथमेति सूत्रात् । यदि त्वया तपसा दृष्टं रूपं तदेवाग्रे प्रलयकाले आसीदित्यर्थः । अनेन ब्रह्मणः सगुणनिर्गुणभेदेन रूपद्वयमस्तीति वदन्तो निरस्ताः ॥ ४७ ॥

मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे ।
यदासीत् तत एवाद्यः स्वयम्भूः समभूदजः ॥ ४८ ॥

तात्पर्यम् – गुणतोऽनन्ते । 'प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते । तदानन्त्यं तु गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव चे'ति तन्त्रभागवते ॥ ४८ ॥ (४,५,६,७)

सत्यधर्म – मय्यनन्तगुणेऽनन्त इति श्लोके गुणतः सत्त्वादिभिरनन्तविग्रहे देवदानवमानवतिर्यगाद्यपर्यवसितशरीरे मयीत्यन्वयलापनलोपनं विधित्सुः स्वयमन्वयं प्रदर्श्य प्रमाणेन द्रढयति ॥ गुणत इति । गुणतोऽनन्ते यद्गुणत आनन्त्यं तत्प्रत्येकशो गुणानामानन्दादिव्यक्तीनां निस्सीमत्वं निर्गतः सीमाऽवधिर्येभ्यस्ते निस्सीमानस्तेषां भावस्तत्त्वम् । सामसीमे स्त्रियामुभे इत्यमरात्सीमाऽऽकारान्तो वा । निस्सङ्ख्यत्वमेवोदीर्यते हि यतस्ते च गुणाः सङ्ख्ययाऽनन्ता अनवधय एतद्धेतोरतोऽनन्तगुणो गुणतोऽनन्तश्च विष्णुरुदीर्यत इत्यर्थः । व्याख्यातमिदं सुधायाम् । ''अष्टगुणत्ववदनन्तगुणत्वेऽपीश्वरस्य प्रमाणं नास्तीत्यत आह ॥ मयीति । अनन्ता असङ्ख्याता गुणा यस्यासावनन्तगुणो गुणतोऽनन्त इति गुणानां प्रत्येकमनवधिकत्वमनन्तावान्तरविशेषवत्त्वं चाभिप्रेयते । अनन्तविग्रह इत्यन्तं भगवद्वाक्यमिति'' । ननु परमात्मा स्वगुणेयत्तां जानाति न वा । नोभयमप्यभयदम् । अनन्तत्वहतेरसर्ववित्त्वापत्तेश्चेति चेन्न । विद्यमानाशेषार्थज्ञत्वस्यैव सार्वज्ञ्यपदार्थत्वात् । भगवद्गुणसङ्ख्याया निरूपाख्यत्वात् । यद्वक्ष्यत्येकादशतात्पर्ये । अनन्तमिति वेत्तीशस्त्वनन्तत्वं तव तत्तथा । अनन्तस्य तु सङ्ख्याने न तु सर्वज्ञता भवेदिति ॥ अथ मूलार्थोपयामः ॥ लयमालप्य प्राचेतसचेतोऽनुगुणं सर्गमार्गमाह ॥ मयीति ॥ यन्मय्यजस्य नाभावित्यादिमानबोधितं पुष्करमाविष्कृतं तत एव पद्मादेव स्वयम्भूश्चतुराननो रूढः शब्दस्समभूदतोऽज आज्ञात इत्यजशब्दवाच्य एवं बहवो जातास्तेष्वस्यैव को विशेष इत्यत आह । आद्य इति । आदौ भव आद्यो मयीति । कीदृशे त्वयीत्यत आह ॥ अनन्तगुण इति । असङ्ख्यज्ञानादिगुणे गुणतः प्रत्येकशोऽप्यनन्तेऽनन्तविग्रहे । गुणत इत्यत्राप्यन्वेति । गुणात्मकानन्तकाये ॥ ४८ ॥

चट्टी – कारणत्वोपपादकपूर्वभावित्वमुक्त्वा सृष्टिमाह ॥ मयीति । अनन्तगुणेऽसंख्यातज्ञानादिगुणे । गुणतोऽनन्ते प्रत्येकशोऽप्यसंख्याते । अनन्तविग्रहे असंख्यातरूपे । मयि । यत्पद्ममासीत्तत तस्मादेव स्वयंभूर्ब्रह्मा समभूत् ॥ ४८ ॥

स वै यदा महादेवो मम वीर्योपबृंहितः ।
मेनेऽकल्पमिवात्मानमुद्यतः सर्गकर्मणि ॥ ४९ ॥

सत्यधर्म – यदा महादेवो महांश्चासौ देवश्च देवश्रेष्ठ इत्यर्थः । समवीर्योपबृंहितः सर्गकर्मण्युद्यतः साधनास्फूर्तेरात्मानमकल्पमिव अदक्षमिव मेने व्यजानात् । वैशब्दः स भाणमकरोत् भारूपो

णरूपश्चेति भगवान्भाण् तद्व्यञ्जकत्वाद्घ्राणनं वाक् । न रेमे स ततो ब्रह्मा तस्मादेकस्य नो रतिरित्यादिबृहदारण्यभाष्यादिप्रमाणप्रचारयोग्यतां दर्शयति । यद्वा मेने लक्ष्मीनाथे मयि सत्येव सर्गकर्मणि सृष्टिक्रियायां यतो यस्य ब्रह्मणो मुन्मय्यसहाय्ये तु सृष्टिकर्मण्युक्तरूपे आत्मनो न सः स्वसङ्कल्पमिवाकल्पमेव मेन इत्यर्थः । आत्मानमुत् यत इति छेदः । महादेवो वामदेवः किन्नेत्याह ॥ आत्मेति । आत्मा विरिञ्चः सुमना इति बृहदारण्यभाष्योक्तेर्ब्रह्मा सर्गकर्मणि यतो नियमितोऽप्येकाकीति नमुद्गितोषः सन् अकल्पमसमर्थं मेने । खिलमित्यखिलमनोहरः पाठः । खिलं सवेधं दुर्बलमिति यावत् । असमस्तं साहितीविरहितमिति वा । खिलं पद्मवेधयोरिति विश्वः । यतो न मुत्ततोऽकल्पं मेन इति वा । अज्ञानादेश्च स दर्शयति मोहाय विष्णोः प्रीत्यर्थमेव चेत्यादिनोक्तेर्यदा यस्मान्महादेवो विष्णुनाऽऽत्मानमुत्स्वप्राणप्रतोषकस्तदा तस्मात्कल्पमपि मेने । यद्वा अमहात् एवः इति छेदः । अमहादनुत्सवाद्भयादिति यावत् एवः एकत्वादे वातीति वः ए चासौ वश्च एव एक एव चरन्नित्यर्थः । उक्तं च गीतातात्पर्यन्यायदीपिकयोः । एकः सर्वाधिको ज्ञेय एक एव करोति यदिति च । एकत्वादे करोतीति क इति । यदाह शौनको देवदत्ताय । वर्णस्य वर्णयोर्लोपो बहूनां व्यञ्जनस्य चेति ॥ ४९ ॥

चट्टी – अकल्पं सृष्टावसमर्थम् ॥ ४९ ॥

अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ।
नव विश्वसृजो युष्मान् येनादावसृजद् विभुः ॥ ५० ॥

सत्यधर्म – अथानन्तरं मे मयाऽभिहितस्तप तपेत्यशरीरगिरोदीरितो दारुणमितरासाध्यं तपोऽतप्यताकरोत् । येन तपोरूपसाधनेन नव विश्वसृजः प्रजापतीन्युष्मानादौ पूर्वं विभुः कल्पो वाऽखिलो वा सन्नसृजत् । एवमीशो यदुपदिदेश तप तपेतीत्येतदुदितेनैवात्मानमुत्कल्पं मेन इत्याद्यन्वयेनार्थापनमुज्जीवितमिति नाननुरूपता ॥ ५० ॥

चट्टी – मे मया तपस्तपेत्यभिहितो येन तपसा ॥ ५० ॥

एषा पञ्चजनस्याङ्ग दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥ ५१ ॥

सत्यधर्म – कथया कथितया प्रकृते किं कृतमासीदित्यतः सर्जनकर्मैव मार्जयेत्याह ॥ एषेति । अङ्ग हे इष्ट वा अङ्ग इष्टेति छान्दोग्यभाष्योक्तेः । प्रजेश । अङ्ग हे हा इत्यमरः । पञ्चजनस्य तन्नाम्नः प्रजापतेर्दुहिता पुत्री । नामेत्यव्ययं लुप्ततृतीयान्तम् । नाम्ना असिक्नी एषा पत्नीत्वे प्रतिगृह्यताम् । अङ्गदुहिता साक्षाच्छरीरजा न पालिता पुत्रीति वा ॥ ५१ ॥

चट्टी – सन्ततिवृद्ध्युपायमाह ।। एषेति । अङ्ग हे दक्ष । पञ्चजनाख्यस्य प्रजापतेः ।। ५१ ।।

मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ।
मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ।। ५२ ।।

सत्यधर्म – व्यवायस्य सुरतस्य धर्मो मिथुनेन दम्पतित्वेन निवर्त्यः सो यस्य सः । मिथुनं दम्पती युगे व्यवायः सुरतेर्ध्रीति विश्वौ । उभयत्रापि स्त्रीपुंसयुगं मिथुनपदार्थ इत्येवं मिथुनव्यवायधर्मिण्यां भूरिशो बहुवारं भूरिशो बहुमुख इति वा प्रजासर्गं प्रजारूपं सृज्यं भावयिष्यस्युत्पादयिष्यसि सम्पादयिष्यसि वा ।। ५२ ।।

चट्टी – मिथुनस्य यो व्यवाय इति स एव धर्मो यस्य स त्वं तथा भूतायां तस्याम् ।। ५२ ।।

त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया ।
मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम् ।। ५३ ।।

सत्यधर्म – त्वत्तोऽधस्तादर्वाञ्चो मदीयया माययेच्छया प्रकृत्या वा मिथुनीभूय तद्भावं प्राप्य भविष्यन्त्युत्पद्यन्ते । मम बलिं पूजोपहारं हरिष्यन्त्याहरिष्यन्ति चेति तत्कृत्योक्तिः ।। ५३ ।।

चट्टी – अधस्तादर्वाचीनाः प्रजा मायया स्त्रिया सह मिथुनीभूय । मदीयया मायया मत्सामर्थ्येन भविष्यन्ति । पुत्रादिरूपेणोत्पत्स्यन्ते मे मह्यं हरिष्यन्ति । दास्यन्ति ।। ५३ ।।

इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः ।
स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ।। ५४ ।।

।। इति श्रीमद्भागवते षष्ठस्कन्धे चतुर्थोऽध्यायः ।

सत्यधर्म – मिषतः पश्यतः सतः । विश्वभावनो जगदुत्पादकः । मिषत इत्यत्राप्यन्वेति । मिषतः प्रजापतिव्यापारव्याजात् । मिषं तु स्पर्शने व्याज इति विश्वः । स्वप्नोपलब्धार्थ इव तत्रैव प्रादुर्भावभूमावेवान्तर्दध इति वा । स्वप्नोपलब्धस्यार्थो निवृत्तिर्यथा तथाऽन्तर्दध इति वा । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः।।५४।। इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे चतुर्थोऽध्यायः।।६-४ ।।

चट्टी – मिषतः पश्यतः ।। ५४ ।। इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ।। ६-४ ।।

अथ पञ्चमोऽध्यायः ।

बादरायणिरुवाच
तस्यां स पाञ्चजन्यां वै विष्णुमायोपबृंहितः ।
हर्यश्वसंज्ञानयुतं पुत्रानजनयद् विभुः ॥ १ ॥

सत्यधर्म – ॥ हरिः ॐ ॥ कर्मैव परमशर्मप्रदं विना ज्ञानमित्येतत्प्रतिषिध्यतेऽस्मिन्नध्याये । तत्रादौ तदुपयुक्तं वदन् सम्पादितहर्यनुकम्पः किं चकार दक्ष इति परीक्षिन्मानसं संशयं वैय्यासकिः परिहरतीतीरयति । बादरायणिरिति । पाञ्चजन्यां पञ्चजनतनयायां मायेच्छा हर्यश्वसंज्ञान्सामस्त्येनायुतं दशसहस्रसङ्ख्याकान् ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ संसारासारतां ज्ञात्वा हरिः सेव्यो बभूषुभिः ।
हर्यश्वादिवदित्येतदध्यायेऽस्मिन्निरूप्यते ॥ माया । सामर्थ्यम् ॥ १ ॥

अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ।
पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २ ॥

सत्यधर्म – अपृथग्धर्मशीलाः समानधर्मस्वभावाः । शीलं स्वभावे सद्वृत्त इति विश्वः । दाक्षायणास्तद्धिता इति बहुवचनज्ञापितो दक्षस्यापत्यानीत्यर्थे फञ्प्रत्ययः । दक्षस्यार्थे दक्षशब्दस्य वा नामधेयस्येति वृद्धसंज्ञायामुदीचां वृद्धादगोत्रादिति फिञि गौरादित्वात् ङीष् दाक्षायणी साऽस्त्येषां भगिनीयत्वेनेति दाक्षयणा इति वा ॥ २ ॥

चट्टी – अपृथग्धर्मशीला एकाचारस्वभावाः । प्रजासर्गे प्रजासृष्ट्यर्थम् ॥ २ ॥

तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः ।
सङ्गमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥

सत्यधर्म – सिन्धुर्नदी । सिन्धुः समुद्रे नद्यां चेति विश्वः । गङ्गा सिन्धुसरस्वतीत्यादेः स्वतन्त्रसरित्तन्नाम्नी वा समुद्रश्च तयोः सङ्गमो यत्र सुमहन्नारायणसरस्तन्नामकं तीर्थं तत्र तां प्रतीचीदिशं ययुः । सुमहामुनिसिद्धनिषेवितमिति पाठे महान्तश्च ते मुनयः सन्न्यासिनः सिद्धास्तदितरे योगिनश्च तैर्निषेवितम् । यथोक्तं गीताभाष्ये । मुनिः सन्न्यासी तच्चोक्तं स हि लोके मुनिर्नाम यः कामक्रोधवर्जित इतीति ॥ ३ ॥

चट्टी – तत्र प्रतीच्यां दिशि । सिन्धोर्नद्याः समुद्रस्य च यत्र संगमः । तत्रस्थं नारायणसरोनाम तीर्थं प्रययुरित्यन्वयः । सुमहान् अतिपूज्यः ॥ ३ ॥

तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥

तेपुस्ते तप एवोग्रं पित्रादेशेन यन्त्रिताः ।
प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ॥ ५ ॥

सत्यधर्म – तदुपस्पर्शनात्तत्स्नानपानादेर्विनिर्धूतः मलाशयो येषां ते तथा । पारमहंस्ये परमहंससम्बन्धिनियन्त्रितपदस्वारस्येन । यद्यपि तेषां मनः पारमहंस्ये प्रभृतं तथाऽपि पुनराज्ञाया अनुल्लङ्घनीयत्वात्प्रजासृष्टावुद्योग इति न विरोधः । यत्तान्सन्नद्धान् ॥ ४, ५ ॥

चट्टी – विनिर्धूतो मलो रागादिर्यस्मात्स आशयो येषां ते । ऊर्ध्वरेतस्कत्वादिलक्षणधर्मे कृतनिश्चया अपि पित्राज्ञावशवर्तिनः सन्तः प्रजावृद्ध्यर्थं तप एव तेपिर इत्यर्थः । प्रजावृद्धये यत्तानुद्युक्तान्नारदो ददर्श ॥ ४,५ ॥

उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ।
अदृष्ट्वाऽन्तं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥

सत्यधर्म – हे हर्यश्वाः पालकाः सन्तोऽपि बालिशाः प्रजापतिप्रजातत्वात्पालका इत्युक्तिः । बालका इति पाठे न वामनवदिति वदति ॥ बालिशा इति । बालिशा मूर्खा इत्यर्थः । बालिशः किंशुके मूर्ख इति विश्वः ॥ ६ ॥

चट्टी – अहो मोक्षमार्गाधिकारिणः सन्त एते प्रवृत्तिनिष्ठैः कर्मभिर्भ्रंस्येरन्निति कृपया तान्निगूढार्थैर्वाक्यैर्नारद उपदिशतीत्याह ॥ उवाचेत्यादिचतुर्भिः । हे हर्यश्वा बालका अत एव बालिशा अज्ञानिनो यूयं कथं प्रजाः स्रक्ष्यथ । बत खेदे ॥ ६ ॥

तथैकपुरुषं राज्यं बिलं चादृष्टनिर्गमम् ।
बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥

सत्यधर्म – परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इत्यादेः प्रौढानपि स्वान्मूढान्दर्शयतो निगूढस्वाशयो नारद ईरयति ॥ तथैकेति ॥ ७,८ ॥

चट्टी – एक एव पुरुषो यस्मिंस्तद्राज्यमदृष्ट्वेत्यनुषङ्गः । बिलं चेत्यादिद्वितीयान्तानामविज्ञाय कथं सर्गं करिष्यथेति तृतीयेणान्वयः ॥ ७ ॥

नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम् ।
क्वचिद्धंसं चित्रकथं क्षुरान्तं च स्वयं भ्रमिम् ॥ ८ ॥

चट्टी – पञ्चपञ्चानां पञ्चविंशतेरद्भुतं गृहं क्षुरस्यान्तर्भाग इव वर्तमानम् । अतितीक्ष्णमित्यर्थः । स्वयं स्वतन्त्रं भ्रमिं भ्रमणस्वभावम् ॥ ८ ॥

कथं स्वपितुरादेशमविद्वांसो विपश्चितः ।
अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥

सत्यधर्म – विपश्चितः पितुरिति वाऽन्वयः । आदेशमनुरूपमविद्वांसोऽजानन्तोऽविज्ञाय । भुवो यूयमित्यादिमकितिमेचित् । सर्गं करिष्यथाहो इति बहिष्ठोऽर्थः ॥ ९ ॥

चट्टी – विपश्चितः सर्वज्ञस्य पितुरादेशमात्मनोऽनुरूपम् । अविद्वांसोऽजानन्तः पूर्वोक्तं चैकपुरुषं राज्यमित्याद्यविज्ञायाहो सर्गं करिष्यथेत्यन्वयः ॥ ९ ॥

श्रीशुक उवाच
तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ।
वाचः कूटं च देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥

सत्यधर्म – औत्पत्तिकमनीषया सहजबुद्ध्या देवर्षेर्नारदस्य वाचो वाक्सम्बन्धि कूटं कैतवम् । कूटं तु कैतवं ज्ञेयं समूहो मेलनं तथेत्यभिधानात् । निशम्य स्वयं धिया विममृशुः । अनेन पूर्वं बालिशा इत्युक्तिर्नाज्ञतया किन्तु बुभुत्सातिशयजननाय वा स्ववचनश्रवणसमनन्तरमेव मननादरोन्नयनार्थं वेति ज्ञेयम् ॥ १० ॥

चट्टी – वाचः कूटं परोक्षवादेनार्थान्तरप्रतीयमानं औत्पत्तिकी सहजा मनीषा विचारशक्तिर्यस्यास्तया धिया स्वयमेव विममृशुर्विचारितवन्तः ॥ १० ॥

भूः क्षेत्रं बीजसंज्ञस्य यदनादिनिबन्धनम् ।
अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥

सत्यधर्म – ऋषिभाषिते स्वयं धियमाधाय निधायार्थं प्रतिवदतीति वदति ॥ भूः क्षेत्रमिति । भुवोऽन्तमदृष्ट्वेत्यस्येदमुत्तरम् । सूक्ष्मं लिङ्गशरीरं क्षेत्रमुच्यते । कस्याधिष्ठानमित्यत आचक्षते ॥

बीजसंज्ञस्येति । बीजमिति संज्ञा नाम यस्य तस्य बीजं तदहमर्जुनेत्यादेर्बीजेन हरिणा संज्ञा सुखदुःखानुभवो यस्य तस्येति वा । इदं गच्छदिवागच्छत्किं न प्रागभावादिवदित्याह ॥ अनादिनिबन्धनमिति । समस्तं व्यस्तं च निबध्नातीति निबन्धनम् । अन्तमविज्ञायेत्यस्यार्थोऽदृष्ट्वा तस्य निर्वाणमिति । निर्वाणं निवृत्तिम् । निर्वाणमस्तगमने निवृत्ताविति विश्वः । असत्कर्मभिः सतामप्यफलोपलम्भकत्वात्तत्तुलैः सर्जनादिभिः किं न किमपि भवेत् । तर्ह्येतद्रतिः किमिवेत्यत इदमेवोत्तरं निर्वाणमिति । लुप्तोपमम् । गजमज्जनमिव तद्यथा वृथा तथेदमित्यर्थः । निर्वाणं गजमज्जनमिति विश्वः ॥ ११ ॥

चट्टी – नारदोक्तदशवाक्यानां तैर्विमृश्य निर्णीतार्थानाह दशभिः । तत्र दृष्टान्तं भुव इत्यत्र भूशब्दार्थमाह ॥ भूरिति । क्षेत्रं लिङ्गशरीरं भूशब्देनोच्यते । यल्लिङ्गशरीरं बीजसंज्ञस्य जीवस्यानादि-निबन्धनमनादिकालतोऽपि नितरां बन्धकारणम् । जीवस्य तुषारावच्छिन्नस्यैवांकुरोत्पादकत्व-वज्जीवस्यापि लिङ्गशरीरावच्छिन्नस्यैवानेकशरीरारंभककर्ममकर्तृत्वेन तन्नाशार्थः । अवश्यं प्रयत्नः कर्तव्य इति ज्ञापनाय बीजसंज्ञस्येत्युक्तम् । अन्तशब्दार्थमाह ॥ निर्वाणामिति ॥ नाशमित्यर्थः । असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किंभवेन्न किञ्चित् ॥ ११ ॥

एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः ।
तमदृष्ट्वाऽभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥

सत्यधर्म – तथैकपुरुषं राज्यमित्यस्य प्राज्यमिति विमृष्टमर्थं स्पष्टयन्तीत्याचष्टे ॥ एक एवेति । तुर्यश्चतुर्थोऽवस्थात्रयातीतत्वात् । विष्णुस्तुरीयरूपेण द्वादशान्ते व्यवस्थित इत्यारभ्य मुक्तस्य सर्वव्यापारहेतुरेव तुरीयक इत्यन्तेन माण्डूकभाष्य उक्तेर्विशेषोऽवसेयः । स चानन्याश्रय इति न जीव इत्यावेदयन्तीत्यावेदयति ॥ स्वाश्रयो भगवान्परः सर्वोत्तम इति । स्वे महिम्नीत्यादेः । सोऽपि यद्यनादिनिबन्धनस्तर्हि गर्हितमेतज्ज्ञानमर्हितैः कर्मवदित्यतोऽवदन्निति वदति ॥ अभवमिति ॥ संसारो हि भवः लिङ्गमिति यावत्स न विद्यते यस्य तं पुंस एतदनुष्ठातुरसद्भिर्भगवज्ज्ञानपूर्वकं तदसमर्पितैरित्यसद्भिर्यज्ञादिभिः ॥ १२ ॥

चट्टी – एकपुरुष इत्यस्यार्थमाह ॥ एक एवेति । सर्वस्यापि जगतो भगवानेक एवेश्वरः स्वामी । एष सर्वेश्वर इत्यादिश्रुतेः । तुर्यो जाग्रदाद्यवस्थात्रयातीतः । अभवं नित्यमुक्तम् । असद्भिरीश्वरेऽसमर्पितैः कर्मभिः ॥ १२ ॥

पुमान् नापैति यद् गत्वा बिलं स्वर्गगतो यथा ।
प्रत्यगात्माऽविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥

सत्यधर्म – बिलश्चादृष्टनिर्गममिति प्रत्युत्तरयन्तीतीरयति ॥ पुमान्नापैतीति । पुमानधिकारी यद्बिलम् । तृतीयोऽतिशय इत्याकारस्येकारे भवति बलमेव बिलम् । भगवन्तं गत्वा नापैति न च पुनरावर्तते । तदविदः किमसत्कर्मभिर्भवेदित्यन्वयः । तत्र व्यतिरेकं निदर्शनं दर्शयन्ति । प्रत्यगात्मा जीवः स्वर्गमसत्कर्मभिर्यज्ञादिभिः प्राप्तं स्वर्गम् । यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदमित्युक्तेरतत्सुखं गतः पुण्यविशेषेण यथेह भवेदागतस्तथा नेति । कृतात्ययेऽनुशयवान् शेषवानेवायाति । क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादेः । स्वर्गं गतः प्राप्त इन्द्रादिर्वा यथा पुनरवन्याद्यनागत्येत्यन्वयो वा । दृष्टान्तः स्वर्गं विष्णुलोकम् । यथोक्तं छान्दोग्योपनिषद्भाष्यटिप्पणीषु । स्वर्गस्य लोकस्य विष्णुलोकं स्वरूपभूतरमणसुखज्ञानात्मकत्वात्स्वर्गशब्दो विष्णुलोकपरः इति । स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि निगद्यत इति बृहद्भाष्योक्तेः । बिलं यत्किञ्चिद्गत्वा पुमानपैति न तथेति व्यतिरेको वा । बिलं नित्यनरकं तमो वेत्यन्वयोऽपि वा ॥१३॥

चट्टी – बिलं चादृष्टनिर्गममित्यस्यार्थमाह ॥ पुमानिति । पुमान्यद्ब्रह्म गत्वा प्राप्य बिलं स्वर्गं पातालं गत इव नापैति नावर्तते तत् । प्रत्यक्सर्वान्तर्यामी । अतिशयितबलात्मकत्वाद्बिलशब्दवाच्यम् । धाम तेजोमयम् । ब्रह्मरूपमविदोऽविदुषोऽसद्भिर्नश्वरैश्वर्यस्वर्गादिसाधनैः कर्मभिः ॥ १३ ॥

नानारूपाऽऽत्मनो बुद्धिः स्वैरिणीव गुणान्विता ।
तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥

सत्यधर्म – बहुरूपां स्त्रियमित्यस्यैतद्रूपा सेति निरूपयन्तीति निरूपयति ॥ नानारूपेति । आत्मनो जीवस्य गुणान्विता सत्त्वादिसम्बद्धाऽत एव नानारूपा प्रकृतेरजामेकां लोहितशुक्लकृष्णामिति नानावर्णत्वादनेकवृत्तिमतीति वा । बुद्धिश्चिदचिन्मिश्रं मनः । स्वैरिणीति पुंश्चलीत्येतद्विवरणम् । स्वादीरेरिणोरिति वृद्धिः । यथा स्वैरिणी तथा व्यभिचारिणी बुद्धिरियं नानारूपेत्यर्थः । तन्निष्ठां तत्स्थितिम् । निष्ठां स्थितिमिति गीताभाष्यात् । एकत्र भगवत्यगतस्यनाप्तस्य स्वैरिणी पिङ्गला किमसत्कर्मभिरसद्द्वारदेशे यो जारस्तत्कर्मभिस्तदा तदागतिसूचनालोचनादिभिः किं भवेदिति । गुणान्विता गुणानु गुणाश्रयो भगवांस्तमितास्तथा नेति व्यतिरेको वा । अनु आश्रय इति विश्वः । एकादशस्कन्धेऽष्टमाध्याये सा स्वैरिण्येकदा कान्तं सङ्केतमुपनेष्यती । अभूत्काले बहिर्द्वारीत्यारभ्याध्यायावसितीयं कथा कथितानुसन्धेयेति स्वैरिणीशब्दं बन्धानोऽसूचयद्ग्रन्थकृदिति मन्तव्यम् ।

नानारूपात्मनो नानारूपं सुवर्णं तदात्मनस्तदासक्तचित्तात्स्वैरिणीवेत्यप्यन्वयः । सुवर्णादि-वरणव्यग्रचेतसो हेतोः । यथोक्तं काठकभाष्ये । शृङ्कां चेमामनेकरूपामिति वृत्तिपरे बहुरूपं पुरटं कार्तस्वरमितीर्यत इत्यभिधानादिति ॥ १४ ॥

चट्टी – बहुरूपामित्यस्यार्थमाह ॥ नानारूपेति । या आत्मनो जीवस्य बुद्धिः स्वैरिणी पुंश्चलीव विमोहकै रजआदिगुणैरन्विता अत एव नानारूपा । तन्निष्ठां तस्या बुद्धेर्निष्ठामवसानं विवेकमगतस्या-प्राप्तस्यासद्भिरशाश्वतैः कर्मभिः ॥ १४ ॥

तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ।
तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १५ ॥

सत्यधर्म – पुमांसं पुंश्चलीपतिमित्यर्थतोऽनुकूलयन्तीत्यालपति ॥ तत्सङ्गेति । तस्याः बुद्धेः सङ्गः सम्बन्धस्तेन भ्रष्टं भ्रंशितमैश्वर्यं भगवदवगमसाम्राज्यमत एव संसरन्तं कमिव कुभार्यवत् । तत्र तस्येवेत्यस्य प्रायिकत्वाद्द्वितीयाद्यन्तादपि वतिः । अस्मदनस्मत्संमतः । तथोक्तं सुधायाम् । अतो विरुद्धवद्भातमिति विवरणावसरे विरुद्धवदुक्तोभयविरुद्धार्थप्रतिपादकमिव भातमिति । परेऽपि प्रनाड्याऽनया घटवदित्यादि निर्वक्ष्यन्ति । यद्वा कुभार्यस्येव तद्गतीस्तद्बुद्धिसङ्गस्य गतीरबुधस्येत्यन्वयः । तं संसरन्तं तद्गतीश्चाबुधस्य यथापूर्वमुर्वरितम् ॥ १५ ॥

चट्टी – पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह ॥ तत्संगेति । तस्या गुणत्रयोपरक्तबुद्धेः सङ्गेन वशवर्तित्वलक्षणेन भ्रंशितं विगलितमैश्वर्यं भगवत्ज्ञानलक्षणं यस्य तम् । अत एव कुभार्यावत्संसरंतं सुखदुःखभुजं जीवं तद्गतीस्तस्य जीवस्य गतीः स्वर्गनरकादिलक्षणाश्चाबुधस्याजानतः पुंसोऽसद्भिर्बुध्यविवेकप्राप्तैः राजसादिकर्मभिः । कुत्सिता पुंश्चली भार्या यस्य स तथा । तद्वदित्यनेन पुंश्चलीपतिमित्यस्यार्थ उक्तः । सात्त्विकादिभेदेन बुद्धित्रैविध्यं ज्ञात्वाऽनर्थसाधनत्वाद्राजसबुद्धिं विहाय केवलसात्त्विकबुद्ध्या भगवन्तं प्रतिपद्येतेति भावः ॥ १५ ॥

सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिनी(ता)म् ।
मत्तस्य तदविज्ञानात् किमसत्कर्मभिर्भवेत् ॥ १६ ॥

सत्यधर्म – नदीमुभयतो वाहामित्यर्थमाहुरित्याह ॥ सृष्टीति । सृष्टिसंहारकारणीभूतां मायाम् । मायानद्या वेलाकूले पूर्वतीरोत्तरतीरे तयोरन्ते मध्ये वेगोऽस्या अस्तीति ताम् । यथा सरित्तीरयोरन्तरा सरति तथा माया भगवद्बन्धकशक्तिनदी सृष्टिसंहारयोरन्तराऽऽस्ते । पुनः पुनर्जननहेतुवेग-वतीवेति भावः । उभयतो वाहामित्यनुलोमविलोमाः सृष्टिप्रलयवाहाः । यदीयेयं माया तस्य

भगवतोऽविज्ञानात्तस्या मायायाश्चाविज्ञानात् । प्रसिद्धसिन्धुसालक्षण्यं वेगिनीमित्यनेनोक्त्वा तद्वैलक्षण्यमुभयतो वेलाकूलान्तेति व्याख्येयव्याख्यानाभ्यां शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमला इत्यादाविव प्राहेति वाऽभूतोपमैतदंशे वा सङ्गमस्थले तथा दर्शनादिति वा नदीमुभयतो वाहां वेलाकूलान्तवेगिनीमित्युक्तिरिति ज्ञेयम् । वान्वाततीव्रनीरपूर्वप्रसरणोभयतो वाहत्वादेर्दृष्टेरिति वा । वेगो जवे प्रवाहे चेति विश्वः । यद्यपि बहुव्रीहिणैवार्थपूर्तिस्तथाऽपि वेगिनीमितीनिना वेगस्यासह्यत्वं निन्दार्थकेन द्योतयामासेति तात्पर्यमवधेयम् ॥ १६ ॥

चट्टी – नदीमुभयतो वाहामित्यस्यार्थमाह ॥ सृष्टीति । सृष्ट्यप्ययौ सृष्टिसंहारौ करोतीति तथा । तामित्यनेनोभयतः प्रवाहो दर्शितः । यथा समुद्रसमीपे नदी वृद्धिह्रासाभ्यां कदाचिदुत्तराभिमुखी कदाचिद्दक्षिणाभिमुखी च प्रवहति । एवमेव भगवदिच्छाऽपि कदाचित्सृष्ट्युन्मुखी चेति । वेलाकूलान्तवेगितां वेलाकूलं संसारप्रवाहपतितानां निर्गमस्थानं तपोविद्यादि । तस्यान्ते समीपे वेगिता निर्गमप्रतिबन्धाय कामक्रोधादिजननलक्षणो वेगो यस्यास्तां मायाम् । भगवदिच्छालक्षणसामर्थ्यं प्रति मत्तस्य तद्विषयश्रवणादिशून्यपुंसः । तदविज्ञानात् जननमरणलक्षणसंसारापादकभगवदिच्छाभिमुखीकरणोपायज्ञानाभावात् । असद्भिः कामक्रोधादिकलुषितैस्तप आदिभिः कर्मभिः ॥ १६ ॥

पञ्चविंशतितत्वानां पुरुषोऽद्भुतदर्शनः ।
अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥

सत्यधर्म – पञ्चपञ्चाद्भुतं गृहमित्यस्योपहितमर्थमभिहितीकुर्वन्तीत्याह ॥ पञ्चविंशतीति । पञ्चविंशतितत्त्वानां पञ्चभिर्महाभूतैः पुनः पञ्चभिस्तन्मात्राभिश्चतुर्भिर्महदहङ्कारमनोबुद्ध्यादिभिर्दशभिरिन्द्रियैः पञ्चभिः पञ्चभिर्ब्रह्मेत्यनुव्याख्योदाहृतभागवतविवृतिसुधोदितैः सह जीवश्चैक इति पञ्चविंशतितत्त्वानाम् । अनेन पञ्चपञ्चाद्भुतं गृहमिति मूले प्रथमः पञ्चशब्दो नान्तः द्वितीयः पञ्चद्दशतौ वर्गे वेति वर्गार्थेऽन्यथाऽनुपपत्तिबललब्धडप्रत्ययान्तः । तेनाद्भुतपदस्य पञ्च च ते पञ्चाश्च पञ्चपञ्चास्तैरद्भुतमिति समासः । पञ्चपञ्चकैराश्चर्यावहं गृहं तत्स्थानीयम् । विस्तृतं चैतत्सजातीयस्थले पञ्चानां वर्ग इत्यादिना । तथैव न सङ्ख्योपसङ्ग्रहादिति सूत्रभाष्यानुभाष्यव्याख्यासुधातत्त्वप्रकाशिकाचन्द्रिकावाक्यार्थचन्द्रिकादिभ्योऽनुसन्धेयम् । अद्भुतं दर्शयतीति स तथा । पुरुषो यस्तम् । अध्यात्ममात्मानमेतदात्मकं शरीरमधिकृत्य पञ्चविंशतितत्त्वमध्ये विद्यमानं परमात्मानं पञ्चतां पञ्चविंशेति सप्तमोक्तेरिति वाऽध्यात्मं जीवमन्तर्निविश्य पञ्चविंशतितत्त्वानामित्युक्तिः । अध्यात्मं जीव उच्यत इति गीताभाष्योक्तेः । षड्विंशतिपक्षेऽध्यात्मं पुरुष इति विवेकः । एतदाद्यबुधस्य किमसत्कर्मभिर्भवेन्न किमपीत्यर्थः ॥ १७ ॥

चट्टी – पञ्चपञ्चेत्यस्यार्थमाह ॥ पञ्चविंशतीति । एकादशेन्द्रियाणि पञ्च भूतानि पञ्च तन्मात्राः प्रकृतिमहदहंकारा जीवश्चेति पञ्चविंशतिसंख्यानां तत्त्वानाम् । पुरुषः पूर्णषड्गुणत्वात्पुरुषनामा भगवान् । आश्रय इति शेषः । कीदृशोऽद्भुतदर्शनोऽद्भुतमाश्चर्यं दर्शनं ज्ञानं यस्मात्सः । पञ्चविंशति-तत्त्वाश्रयत्वेन जीवदेहे स्थित्वा ज्ञानप्रद इत्यर्थः ॥ तदुक्तम् ॥ अन्तस्थः पुरुषो नाम ज्ञानदः सर्वदेहिनाम् । बहिस्थ ईश्वरो नाम ज्ञानादिफलदो हरिरिति मात्स्ये । अध्यात्मं नियामकत्वेन देहेन्द्रियाद्यधिष्ठातारं तम् । अबुधस्याविदुषः । असद्भिर्मिथ्यास्वातन्त्र्यकृतैः कर्मभिः । अयं श्लोको जीवपरत्वेनाप्यूहनीयः ॥ १७ ॥

ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् ।
विविक्तपदमज्ञात्वा किमसत्कर्मभिर्भवेत् ॥ १८ ॥

सत्यधर्म – कचिद्धंसं चित्रकथमित्येतत्प्रति शंसतीति शंसति ॥ ऐश्वरमिति । ईश्वरस्येदमैश्वरं तत्प्रतिपादकं शास्त्रं भारतादि । बन्धमोक्षानुदर्शनं बन्धमोक्षावनुदर्शयतीति तथा । विविक्तपदं विविक्तानि समाध्यादिभाषात्रितयोपपन्नत्वेन विलक्षणलक्षणानि पदानि यस्मिंस्तत् । यद्वा विविक्तं सर्वविलक्षणं पद्यतेऽनेनेति पदं साधनं तत्पदम् । यथोक्तं बृहद्भाष्ये पद्यतेऽनेनेति पदं साधनमिति । अथवा विविक्तं पदं नारायणाख्यं विषयत्वेन यस्मिन्नित्यैश्वरं शास्त्रमज्ञात्वा वर्तमानस्यासत्कर्मभिः काम्यकर्मभिः किं भवेत् । हंसमिति पीठिकायां टीकायां च विविक्तपदमित्याद्युक्त्या यथा नीरक्षीरमिश्रणे हंसः संशोध्य क्षीरमात्रं गृह्णाति तथा भाषात्रयवद्वेद्यं विविक्तपदं भगवन्तमज्ञात्वेत्यर्थातिरेको निदर्शनेन ध्वनितोऽवसेयः ॥ १८ ॥

चट्टी – कचिद्धंसमित्यस्यार्थमाह ॥ ऐश्वरमिति ऐश्वरमीश्वरप्रतिपादकम् । विविक्तं विविच्य ज्ञापितं पदं परापरतत्त्वाख्यं वस्तु येन तत्तथा । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यभिधानात् । अनेन हंसपदं व्याख्यातम् । हंसस्यापि क्षीरनीरविवेचकत्वात् । बन्धमोक्षावनुदर्शयतीति तथा । अनेन चित्राः कथा यस्येति व्याख्यातम् । तच्छास्त्रमुत्सृज्यानभ्यस्य । अत एवाज्ञात्वाऽसद्भिर्बहिर्मुखैः कर्मभिः ॥१८॥

कालचक्रं भ्रमिं तीक्ष्णं सर्वं निष्कर्षयेज्जगत् ।
स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥

सत्यधर्म – क्षुरान्तं च स्वयं भ्रमिमित्युत्तरयन्तीतीरयति ॥ कालचक्रमिति । कालश्चासौ चक्रं च कालचक्रं भगवन्तम् । कालोऽस्मि । चक्रं चङ्क्रमणादेष इत्यादेः । भ्रमिमिति बिन्द्वन्तमशनायां हि मृत्युरिति व्याख्यावसरे सर्वाशनेत्यर्थे बिन्दुराधिक्येऽधिकमिति सूत्रादिति भाष्योक्ताशनायां हि पदवत् ।

ततश्च तृतीयोऽतिशय इत्यकारे, इकारोऽस्त्यतिशयेन भ्रमद्भ्रमिमन्यत्कालचक्रम् । भ्रमिं भ्रमि भ्रामकम् । भ्रामयन्सर्वभूतानीत्यादेः । सोम्यानां भ्रमिरसातिऋग्भाष्ये त्वं भ्रामको मानुषाणामृषीणा-मित्युक्तेः । नभोवलयस्य कालचक्रगतो द्वादशमासान्भुङ्क्त इति पञ्चमोक्तेः । क्षुरान्तेति व्याख्याति ॥ तीक्ष्णमिति । चक्रकार्यमिदं चक्रमित्याहुः सर्वं जगत्कर्षयेदित्यपरतन्त्रमित्यन्यत्र सङ्कोचासङ्कोचाभ्यां स्वतन्त्रं स्वः "परः स्वो हरिरुद्दाम" इति हरिस्तत्तन्त्रं तदधीनं स्वतन्त्रमपरतन्त्रमित्यन्यत्र । यद्वा चक्रवज्रान्धकारसारपारक्षीरेत्याद्युक्त्वा नपुंसकं चेति लिङ्गानुशासनोक्तेश्चक्रशब्दस्य पुल्लिङ्गतायां भ्रमिमिति द्वितीयोपपत्तिर्ज्ञेया । यः सर्वं जगत्कर्षयेत्तं कालचक्रमित्यादिकमबुधस्येत्यन्वयः ॥ १९ ॥

चट्टी – क्षुरान्तं च स्वयं भ्रमिमित्यस्यार्थमाह ॥ कालचक्रमिति । भ्रमिमित्येतद्भ्रमिमित्यनेनानूद्य सर्वं जगन्निष्कर्षयेद्भ्रमयेदिति व्याख्यातम् । क्षुरान्तमित्यस्यार्थस्तीक्ष्णमिति । क्षुरस्यान्तो धारा तद्वत्तीक्ष्णमित्यर्थः । स्वयमित्यस्यार्थः स्वतन्त्रमिति । भगवदितरेणाप्रवर्त्यमित्यर्थः । एतादृशं कालचक्रमरस्थानीयद्वादशमासोपेतत्वाच्चक्रत्वव्यपदेशः । तत्स्वरूपमजानतः पुंसोऽसत्कर्मभिः स्वर्गादिफलेषु नित्यताबुध्याऽनुष्ठितैः काम्यकर्मभिः । कर्मोचितकालज्ञानाभावादकाले कृतकर्मभिरिति वा ॥ १९ ॥

शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ।
कथं तदनुरूपाय गुणविश्रम्भ्युपक्रमेत् ॥ २० ॥

सत्यधर्म – कथं स्वपितुरादेशमित्यस्य सदृशमान्तरङ्गिकमर्थमाहुरित्याह ॥ शास्त्रस्येति । पितुः शास्त्रस्येति सामानाधिकरण्यम् । मातेव रक्षति पितेव हिते नियुङ्क्त इत्यादेर्विद्याया मातृत्वादिकं ज्ञेयम् । हिताभिहितृ हि शास्त्रं पिता । तदादेशं तद्विजिज्ञासस्व तद्ब्रह्मेत्याद्युपासनाशासनरूपं यो न वेद स गुणत्रयविश्रम्भी गुणविश्वासवांस्तदनुरूपाय तदानुगुण्याय निवर्तकं संसृतिनिस्सृतिसाधनं सत्कर्मेति यावदुपक्रमेत्प्रारभेत । उपपराभ्यामिति वा प्रोपाभ्यां समर्थाभ्यामिति वाऽऽत्मनेपदविधानात् ॥ २० ॥

चट्टी – स्वपितुरादेशमित्यस्यार्थमाह ॥ शास्त्रस्येति । स्वपितुर्द्वितीयजन्महेतोस्तदनुरूपाय निवृत्तिमार्गार्हाय निवर्तकमादेशं यो न वेद स केवलं गुणविश्रंभी गुणमयप्रवृत्तिमार्गविश्वासवान्कथं निवृत्तिमार्गमुपक्रमेत् । अनुतिष्ठेतेत्यर्थः । निवृत्तिमार्गार्हेण पुरुषेण निवर्तकशास्त्रतात्पर्यं ज्ञात्वा भगवानेव भजनीयो न तु सृष्ट्यादिरूपे प्रवृत्तिकर्मणि प्रवर्तितव्यमिति भावः ॥ २० ॥

इति व्यवसिता राजन् हर्यश्वा एकमेधसः ।
प्रययुस्तं परिक्रम्य पन्थानमनिवर्तकम् ॥ २१ ॥

सत्यधर्म – इतिव्यवसिता इति व्यवसितं निश्चयो येषां ते तथा । पदमेकम् । एकमेधस एकमतिकाः । मेधापर्यायोऽयं मेधस्शब्दः । नञो दुःसुभ्य इत्येवेत्युक्तेः । एकचेतस इति पाठश्चेतोहरः । तं नारदं परिक्रम्य तत्त्वोपदेशकत्वात् । अनिवर्तकं सन्यासलक्षणमनिवर्तकमप्रत्यावर्तकं वा पन्थानं मार्गम् । स्वेषामेकशेमुषिकत्वादागमस्यैतद्गतिकत्वादितरस्य नरस्य निषेद्धुरभावान्निवर्तकनिवृत्तिमन्मार्गमिति वा ॥ २१ ॥

चट्टी – इति व्यवसिता एवं नारदोक्तं निश्चितवन्तः । एकमेधस एकमत्या युक्तास्तं नारदं परिक्रम्य प्रदक्षणीकृत्यानिवर्तकमपुनरावृत्तिमार्गं प्रययुः ॥ २१ ॥

स्वरब्रह्मणि निर्भाते हृषीकेशपदाम्बुजे ।
अखण्डं चित्तमावेश्य लोकानन्वचरन्मुहुः ॥ २२ ॥

सत्यधर्म – प्राचेतसान्प्रचेतसो विधाय किं कृतवाननन्तरं नारद इत्यत ईरयति ॥ स्वरब्रह्मणीति । स्वरब्रह्मणि महतीजनितषड्जादिशब्दब्रह्मणि निर्भाते प्रकाशिते । हृषीकेशपदाम्बुजे । हृष्यः केशा अंशवो यस्य हृषीकेशः । उक्तं चैकादशाध्यायगीताभाष्यप्रमेयदीपिकादिषु । अग्नीषोमाद्यनन्तर्यामितया जगद्धर्षणादेर्हृषीकेशः । केशत्त्वं त्वंशूनां तन्नियतत्वादेः । प्रमाणं तु शशिसूर्यनेत्रमित्यत्रोक्तम् । सूर्याचन्द्रमसौ शश्वत्केशैर्मेंऽशुसंज्ञितैः । बोधयन्स्थापयंश्चैव जगदुत्पद्यते पृथक् । बोधनात्स्थापनाच्चैव जगतो हर्षसम्भवात् । अग्नीषोमकृतैरेभिः कर्मभिः पाण्डुनन्दन । हृषीकेशोऽहमीशानो वरदो लोकभावन इति । हृषीकाणामिन्द्रियाणामीश्वरत्वाच्च । न मे हृषीकाणि पतन्त्यसत्पथ इत्यादिप्रयोगादिति । हृष्यतेः कीप्रत्ययः । हृष्यो हर्षहेतवः केशा अस्येति हृषीकेशः । नानेन प्रसिद्धोऽर्थस्त्याज्य इति भावेन तमप्यर्थमाह ॥ हृषीकाणामिति । हृषी चासौ कश्चासौ ईशश्च हृषीकेशः । निरुक्तं चोद्योगपर्वणि । हर्षात्सुखात्सुखैश्वर्याद्धृषीकेश इत्यादिना । अखण्डं यथा भवति तथा चित्तं मन आवेश्य लोकान्भूरादीन्ज्ञानिजनान्वोद्दिश्य मुहुरन्वचरच्चचार । मुनिरिति पाठो ललितः ॥ २२ ॥

चट्टी – स्वरब्रह्मणि । षड्जादिस्वरलक्षणि ब्रह्मणि गान्धर्वे निर्भाते प्रकाशिते । अखण्डमिति क्रियाविशेषणम् । मुनिर्नारदः ॥ २२ ॥

नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ।
अन्वतप्यत कः शोचन् सुप्रजास्त्वं शुचां पदम् ॥ २३ ॥

सत्यधर्म – नाशमदर्शनं पदमित्यत्राप्यन्वेति । न विद्यते आशा पुनरागमनविषयिणी यस्य तत्पदं गमनं निशम्य श्रुत्वा । शीलशालिनां शीलेन सत्स्वभावेन शालन्ते शोभन्त इति तेषाम् । को दक्षः

सुप्रजास्त्वं सुप्रजास्त्वमुद्दिश्य शुचानां शोकानां पदं विषय इति शोचन्नन्वतप्यत सन्तप्तोऽभूत् । सुप्रजास्त्वाय सुप्रजास्त्वमङ्गिरसो वोऽस्तु इत्यादिश्रौतपदानुकरणम् ॥ २३ ॥

चट्टी – नाशमर्दनम् । नश अदर्शन इति धातोः । प्रजावृद्धिलक्षणस्वधर्मभ्रंशं वा । शीलेन सत्स्वभावेन सद्वृत्तेन वा शीलन्ते शोभन्त इति तथोक्तास्तेषाम् । शीलं स्वभावे सद्वृत्त इत्यमरः । को दक्षः सुप्रजास्त्वं सुपुत्रवत्त्वं शुचां शोकानां पदं स्थानं हीति शुकोक्तिः ॥ २३ ॥

स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः ।
पुत्रानजनयद् दक्षः शबलाश्वान् सहस्रिणः ॥ २४ ॥

तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ।
नारायणसरो जग्मुर्यत्र सिद्धास्तु पूर्वजाः ॥ २५ ॥

सत्यधर्म – अजेन ब्रह्मणा । पाञ्चजनीशब्दपर्यायोऽयं पञ्चजन्याशब्दः । सहस्रिणः सहस्रं सङ्ख्या-विशेषो एषामस्ति ते तथा । शबलाश्वांस्तन्नामकान्पुत्रानजनयज्जनयामास ॥ २४,२५,२६ ॥

चट्टी – अजेन चतुर्मुखेन । सहस्रं संख्या एषामस्तीति सहस्रिणः ॥ २४,२५ ॥

तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
जपन्तो ब्रह्म परमं तेपुस्तत्र महत् तपः ॥ २६ ॥

चट्टी – परमं ब्रह्म परब्रह्मप्रतिपादकं प्रणवं वक्ष्यमाणमन्त्रं वा । तेपुश्चक्रुः ॥ २६ ॥

अब्भक्षाः कतिचिन्मासान् कतिचिद् वायुभोजनाः ।
आराधयन् मन्त्रमिममभ्यसन्त इडस्पतिम् ॥ २७ ॥

सत्यधर्म – अभ्यसन्तोऽभ्यस्यन्तः । इडस्पतिम् । इडाशब्दपर्यायोऽयमिडसुशब्दः । वाक्पतिम् । इडा वाचीति विश्वः । इला सरस्वतीत्येतद्व्याख्यावसरे इलेड्यत्वादिति ऋग्भाष्योक्तेरीड स्तुतावित्य-स्मात्कर्मणि डसि, आदेश्च ह्रस्वे इडसामीड्यानां पतिमिति वा । पारस्करादिरियम् ॥ २७ ॥

चट्टी – अभ्यसन्त इडस्पतिम् । इडां वाचां मन्त्राणां पतिम् । श्रीविष्णुमाराधयन् आराधया-मासुः ॥ २७ ॥

ओं नमो नारायणाय पुरुषाय महात्मने ।
विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥

सत्यधर्म – तमेव मन्त्रमाह ॥ ओमिति । विशुद्धसत्त्वधिष्ण्याय विशुद्धसत्त्वानाममलीमसमानसानां ब्रह्मादीनामोकसे महाहंसाय बहुनिर्मलाय धीमहीति श्रौतपदानुवादः ॥ २८ ॥

चट्टी – ॐनामकं भगवन्तं धीमहि ध्यायेम इत्यन्वयः ॥ चतुर्थ्यन्तानां नमःशब्देनान्वयः । एतदुपासनं न जीवब्रह्माभेदेन कर्तव्यम् । किन्तु स्वामिभृत्यन्यायेनेति ज्ञापनाय नम इत्युक्तिः ॥ तदुक्तम् ॥ मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च । इति ध्येयःसर्वदैव भगवान्विष्णुरव्यय इति । ॐ सकलगुणपरिपूर्णम् । ओतस्मिन्जगत्सर्वमत्युच्चश्चाखिलैर्गुणैः । इत्योमिति सदोपास्योऽक्षरः पुरुषोत्तम इति वचनात् । इतरत्सर्वमोङ्कारव्याख्यानरूपम् । देहोऽयं मे सदानन्दो नायं प्रकृतिनिर्मितः । परिपूर्णश्च सर्वत्र तेन नारायणः स्मृत इति वचनान्नारायणशब्दार्थो ज्ञातव्यः । पुरुषु सर्वशरीरेषु नियामकत्वेन शेते वर्तत इति शेषः । तस्मै । स वाऽयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनासंवृतमिति श्रुतेः । महान् सर्वोत्तमत्वादिगुणकः । तस्मै । यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिति । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत इति भारतोक्तेः । विशुद्धं निर्दोषं सत्त्वं बलज्ञानादिगुणराशिस्तस्य धिष्ण्याय । आश्रयाय । बलज्ञानसमाहारः सत्त्वमित्युच्यते बुधैरिति वचनात् । महाहंसाय । प्राप्यं प्राप्तं यतो नित्यं पूर्णं सर्वोत्तमं मया । अतः परमहंसोऽहमिति भगवद्वचनात् । ओमादिशब्दवाच्याय भगवते । नमो धीमहि । नमस्कुर्म इति वा । इति मन्त्रमभ्यसन्त इति पूर्वेणान्वयः ॥ २८ ॥

इति तानपि राजेन्द्र प्रजासर्गधियो मुनिः ।
उपेत्य नारदः प्राह वचःकूटानि पूर्ववत् ॥ २९ ॥

सत्यधर्म – पूर्ववदिति पूर्ववद्गतिः ॥ वचांसि तानि कूटानि च । वाचः कूटानीति पाठे लिङ्गसर्वनामनपुंसकतेति चक्षुदपहन्तुमितिवत्कूटानीत्यस्यान्वयः । वाचः कूटाः प्राहेत्यन्वयः । बालिशा इति तिरस्कृत्य क्षेपार्थि नि स्मृतमिति विश्वः । कतुविप्रनिनरमितिवत् ॥ २९ ॥

चट्टी – प्रजासर्गे धीर्येषां तान् । वाचःकूटानि अदृष्ट्वांऽतं भुव इत्यादीनि पूर्वोक्तानि प्राह ॥ २९ ॥

दाक्षायणाः संश्रुणुत गदतो निगमं मम ।
अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥

सत्यधर्म – निगमं वेदसदृशम् ॥ ३० ॥

चट्टी – पुनरन्यदपि प्राह ॥ दाक्षायणा इति । हे दाक्षायणा निगममुपदेशं पदवीमन्विच्छत । अवलोकयत ॥ ३० ॥

भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ।
स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ।। ३१ ।।

सत्यधर्म – प्रायणं मोक्षमुद्दिश्यानुष्ठितं धर्मम् । प्रायणान्तमोङ्कारमभिध्यायीतेति षट्प्रश्नोपनिषदुक्तेः । पुण्यास्तद्वन्तो बन्धवो यस्य पुण्यमेव बन्धुर्यस्य स वा । मरुद्भिरेकोनपञ्चाशत्सङ्ख्यैः सह मोदते । हरिहननार्थप्रार्थनाजातानां मरुतां तेन सख्यं विख्यातमभूदित्यनुरूपनिदर्शनं निरूपितमिति मन्तव्यम् ।। ३१ ।।

चट्टी – प्रायणं प्रकृष्टं गमनम् । पुण्यमेव बन्धुर्यस्य स तथा । मरुद्भिर्दैवैः । वृन्दारका निर्जराश्च मरुतो बंधवोऽमराः इत्यभिधानात् ।। ३१ ।।

एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ।
तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ।। ३२ ।।

सत्यधर्म – अमोघदर्शनोऽमोघमव्यर्थं महाफलोपलम्भकमिति यावत् । दर्शनं यस्य तम् । अमोघं दर्शयतीति वा । मारिष आर्य बुद्ध्या समुद्र वा । मारिषश्चार्ये मारिषं कनकेऽम्बुदाविति विश्वः ।।३२।।

चट्टी – अमोघो देवदर्शनं यस्य स तथा । हे मारिष आर्य । आर्यस्तु मारिष इत्यभिधानात् ।। ३२ ।।

सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ।
नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ।। ३३ ।।

सत्यधर्म – परस्य परमात्मनः । पश्चिमा अतीता यामिनी यामिन्यो रजन्यः । रजनी यामिनी तमीत्यमरः । ता यथा नायान्ति तथेत्यर्थः । यद्यप्यनागमनं रजनीनामिवाह्नामपि समं तथाऽप्यकर्मसमयाता यास्तासामेषां ततो निवृत्तेर्निदर्शनीयतादर्शनीयतेत्येवमाहेति ज्ञेयम् । सध्रीचीनमित्यादि तु व्याख्यातचरम् ।। ३३ ।।

चट्टी – सध्रीचीनं समीचीनं प्रत्यग्दृष्टिभिर्गम्यम् । परस्य परमात्मनः । अनुपथमनुगुणं पंथानं स्वानुगुणम् भगवन्मार्गमिति यावत् । पश्चिमा यामिनीरिवातीतरात्रय इव ।। ३३ ।।

एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः ।
पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ।। ३४ ।।

सत्यधर्म – उपाशृणोज्जनानननतः ।। ३४ ।।

चट्टी – प्रजापतिर्दक्षः पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि प्रायशो निरुक्तःस्यादिति । तदनुग्रहार्थं नारदस्तत्पार्श्वं गतः ।। ३४ ।।

चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ।
देवर्षिमुपलक्ष्याह रुषा प्रस्फुरिताधरः ।। ३५ ।।

सत्यधर्म – नारदाय क्रुधद्रुहेत्यादिना चतुर्थी ।। ३५ ।।

दक्ष उवाच
अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया ।
असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ।। ३६ ।।

सत्यधर्म – साधुलिङ्गेन त्वयेति सामानाधिकरण्यवत्साधूनां न इत्यपि सामानाधिकरण्यम् । साधूनां लिङ्गमिव लिङ्गं यस्येति तेन । लिङ्गं चिन्ह इति विश्वः । अहो असाधो इत्यत्र ओदिति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः । असाध्वमङ्गलमकारि । किं तदित्यत आह । अर्भकाणां बालानां भिक्षोः परिव्राजः । कोपेनाङ्गस्मरणाभावेन वा सर्वेषामैकमत्यस्य कृत्याभावाद्बहुवचनेनेति वा समयत्वाद्धिक्करणार्थं वा भिक्षोरिति दक्षो जगादेति ज्ञेयम् । मार्गः प्रदर्शित इति यत्तदिति साधूनां वेलां स्थलीं वाऽवलोक्येति शेषः । साधुभिरूना तद्रहिता ताम् । सन्तः केऽपि तत्र वसन्तश्चेदेवं न भवेदित्याशयः ।। ३६ ।।

चट्टी – तदा तमुपलभ्य दक्ष आह ।। अहो असाधो इति । साधोरिव लिङ्गं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणामसाध्वकारि कृतं तदेवाह । साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्यो मार्गः स प्रदर्शितः ।। ३६ ।।

ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ।
विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ।। ३७ ।।

सत्यधर्म – यत्याश्रमे तुरीये वै प्रीतिर्मम गरीयसीति गीताभाष्यादौ सन्यासस्यावश्यतोक्तेः कथमयं पन्था अकथनीय इति कथ्यत इत्यत आह ।। ऋणैरिति । देवर्षिपितृसम्बन्धिभिर्ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति श्रुतेः । मनुरपि ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यध इति । अमीमांसितान्यविचारितानि कर्माणि क्रत्वादीनि यस्तेषामुभयोर्लोक-योस्तत्सम्बन्धिन ऐहलौकिकपारलौकिकस्य श्रेयसः सम्पदो विघातः कृतः । असाधो पाप विघातः कृत इत्येवमादिकं कोपपारवश्येनेति मन्तव्यम् । दक्षस्यापि मतिमद्दक्षत्वात् ।। ३७ ।।

चट्टी – ननु संन्यासिनां मार्गः साधुरेव । मोक्षहेतुत्वादिति चेत् । सत्यम् । ऋणत्रयापकरणं विना तु महानर्थ एवेत्याह ॥ ऋणैरिति । जायमानो वै ब्राह्मणस्त्रिभिर्ऋणी वा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । एष वाऽनृणो यः । पुत्री यज्वा ब्रह्मचारीति श्रुत्युक्तप्रकारेण त्रिऋणैरमुक्तानाम् । तत्र हेतुः । न मीमांसितानि विचारितानि कर्माणि यैस्तेषामिति । अमीमांसित-कर्मणां तावद्दष्येण यो विमोक्षो नास्ति । ततश्च तदुत्तरकालभाविनोः पुत्रोत्पादनयज्ञानुष्ठा-नयोरप्यभावेन पितृदेवऋणमुक्तिश्च नास्ति । अतः पापविषयभोगत्यागादिह लोके श्रेयसो विघातः कृतः । मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः ॥ तथा च मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सवेमानः पतत्यध इति ॥ ३७ ॥

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ।
पार्षदमध्ये चरसि यशोहानिरपत्रपः ॥ ३८ ॥

सत्यधर्म – निरनुक्रोशो निर्दयः । दयानुकम्पा स्यादनुक्रोश इत्यमरः । पार्षदमध्ये चरसीति काकुः । अतद्योग इत्यर्थः । अचरस्यभटवदाचरसीति वा यशोहा । अन्येभ्योऽपि दृश्यत इति क्विप् । निरपत्रपो निर्लज्जो यशोहानिर्यशसो हानिर्यस्य सः । अथवा पुत्रद्वारा सम्पाद्यस्य मद्यशसो हानिर्यस्मात्सोऽपत्रपो गतलज्जः । मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यत इत्यमरः ॥ ३८ ॥

चट्टी – बालादीनां मतिं पित्रादिविषयां भिनत्तीति तथा । एवं निरनुक्रोशो निर्घृणः श्रीहरेर्यशोनाशकः सन् तत्पार्षदानां मध्ये चरसि । अतो निरपत्रपः निर्लज्जः ॥३८ ॥

ननु भागवता नित्यं भूतानुग्रहकातराः ।
ऋते त्वां सौहृदघ्नं वै वैरकारमवैरिणाम् ॥ ३९ ॥

सत्यधर्म – त्वामृते त्वां विना । ज्ञानसूर्यमृत इत्याद्यनुव्याख्याव्याख्यासुधायां विना वातं विना वर्षमित्यादिप्रयोगदर्शनाद्विनायोग इवर्तेयोगेऽपि द्वितीया भवत्येवेत्युक्तेः । द्वितीयाविधिः परस्यापि संमतः । अत एवोक्तं पृथग्विनानानाभिरिति योगविभागः कार्यो द्वितीयार्थ इति । उक्तं च हरदत्तेनापि । अत्रासत्यपि मुनित्रयवचने प्रयोगबाहुल्यादेवं व्याख्यातमिति । तथर्तेयोगे द्वितीयाविधिर-वश्यमभ्युपगमनीयः । निमित्तस्य ऋतेऽपि त्वां न भविष्यन्ति सर्वे इति ऋतेयोगे द्वितीयाप्रयोगस्य सद्भावादित्याशयेनाह ॥ विना वातमित्यादीतीति । व्याकर्तृवचनात्त्वामृत इति सम्भवतीति मन्तव्यम् । उभयतसोरिति श्लोकवार्तिकेऽन्यत्रापि दृश्यत इति इत्युक्ते ऋतेयोगे द्वितीया । ऋते द्वितीयेति चन्द्रसूत्रादिति मनोरमाद्युक्तेः । अवैरिणां वैररहितानां मध्ये वैरकारं वैरं करोति कारयतीति वा स तथा

तम् । वैरंकरमिति खशन्तोऽपि पाठोऽकुण्ठार्थः । परन्तु बाहुलकः खश् । सौहृदघ्नं संज्ञापूर्वकविधेरनित्यत्वाद्धृद्भगेत्युभयपदवृद्धेरप्रवृत्तेस्तद्धितेष्वचामादेरित्यादिवृद्धिरेवेति । अर्थवतो ग्रहणे नानर्थकस्येति परिभाषायाः स्वं रूपं शब्दस्याशब्दसंज्ञेत्यत्र रूपग्रहणेन ज्ञापितत्वात् । हृद्भगसूत्रेऽर्थवत एव तच्छब्दस्योपादानात् । सुहृद्दुर्हृदौ मित्रामित्रयोर्निपातिते सुहृच्छब्दसमुदायस्यैवार्थवत्त्वेन तदवयवहृच्छब्दस्यानर्थवत्त्वात्तस्योभयपदवृद्धिर्न भवति किन्त्वादिवृद्धिरेवेति दुर्घटवृत्तिकारोक्तेः । चान्द्रास्तु हृद्भगेत्यत्र प्रतिपदोक्तहृच्छब्दस्यैव हृदयपर्यायस्य ग्रहणं न तु हृदयस्य हृल्लेखयदण्लासेष्वित्युक्तहृदादेशस्य । सौहृदमित्यादौ तु हृदादेश एवेति मन्यते । अत एव क्षणभङ्गसौहृद इति कुमारसम्भवे प्रयोग इति सौहृदमिति सम्भवति । स्वयमितरविषये तदकर्तृत्वेन तद्धन्तीति स तथा तमिति वैरंकरवैलक्षण्यं ज्ञेयम् । नारदः कलहप्रिय इत्यादेः ।। ३९ ।।

चट्टी – निर्लज्जत्वमुपपादयति ।। नन्विति । ननु त्वामृते भागवताः सर्वेऽपि भूतानुग्रहपरवशाः । त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः ।। ३९ ।।

नेत्थं पुंसो विरागः स्यात् त्वया केवलिना विना ।
मन्यसे यद्युपशमं स्नेहपाशनिवर्तनम् ।। ४० ।।

सत्यधर्म – ननु यदहरेव विरजेत्तदहरेव प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतेः ऋणत्रयमोचनस्यानत्यावश्यकतया मया हितमेवाभिहितं त्वया त्वन्यथा ज्ञातमित्यत आह ।। नेत्थमिति । केवलिना विलक्षणप्रेक्षेण । केवली ज्ञानभेदे स्यादिति विश्वः । पृथग्विनेति तृतीया । कोपपरीतात्मना विपरीतमुदीर्यते विरक्त्या कर्तनं स्नेहमोहस्य भविष्यति भविष्यति च मङ्गलमित्यतो नैवं बलात्कदलीपक्वीकरणवदिदमत्यावश्यकमेवं चेदित्याह ।। मन्यस इत्यादिना ।। ४० ।।

चट्टी – ननु वैराग्ये उपशम उपशमे च स्नेहपाशच्छेदनं भवति । न च विरक्तस्य ऋणत्रयापकरणमावश्यकम् । यदहरेव विरजेत्तदहरेव प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति श्रुतेः । अतो वैराग्योपदेशेन तेषां मयाऽनुग्रह एव कृत इति चेत्तत्राह ।। नेत्थमिति ।। विनेत्यनन्तरं विषयानुभवमिति शेषः । यद्यपि त्वमेव मन्यसे तथाऽपि केवलिना ज्ञानाभावेऽपि केवलं वेषमात्रधारिणा त्वया इत्थं मतिचालने कृते विषयानुभवं विना पुंसो विरागो नैव स्यात् । न च विरागं विनोपशमः । न च तेन विना स्नेहपाशनिकृन्तनमित्यर्थः ।। ४० ।।

नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् ।
निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ।। ४१ ।।

सत्यधर्म – विषयतीक्ष्णतां स्वभोगेन विषयाकर्षणसामर्थ्यम् । पुमान्प्रस्तुतत्वादेवमुक्तिः । अधिकारी नानुभूय न जानात्यतस्तद्भोगेनाग्रे भवितव्यं स्वयं परोपदेशनैरपेक्ष्येण तस्माद्विषय-समुदायान्निर्विद्य विरज्यते यथा परैर्भिन्नधीर्विभिन्नमतिर्न निर्विद्यत इत्यन्वयः । परैरित्यनेनानेकैरपि लोकैर्मिलितैर्न भवेत्त्वं त्वेकलस्तत्रापि केवलीति न तथा भवेदित्यभिप्रैति ॥ ४१ ॥

चट्टी – विषयानुभवं विना पुंसो विरागो न जायत इत्येतद्विवृणोति ॥ नानुभूयेति । नानुभूय विषयाणां तीक्ष्णताम् । दुःखहेतुत्वं न जानाति । तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात् । पुमान्स्वयमेव यथा निर्विद्येत विरक्तो भवति । तथेतरैर्भिन्नधीश्चालितबुद्धिः । न निर्विद्येतेत्यन्वयः ॥ ४१ ॥

यन्नस्त्वं कर्मबन्धानां साधूनां गृहमेधिनाम् ।
कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम् ॥ ४२ ॥

सत्यधर्म – अग्रत एव जाग्रता भवितव्यं त्वयेत्यतो झडिति नैवं कर्तव्यं क्षन्तव्यमिति तूष्णीक आसमिति शंसति ॥ यदिति । अस्मदीयानां तेषामिव विद्यमानानामजानानामिति यावत् साधूनां बालानां गृहमेधिनां यद्विप्रियमसम्मतं गृहमेधिनां नो दुर्मर्षमसह्यं कृतवानसि प्राक् तत्तव कर्म मर्षितम् ॥ ४२ ॥

चट्टी – अतस्त्वयाऽस्माकमप्रियमेव कृतं यत्तथाऽप्यस्माभिः क्षान्तमित्याह ॥ यदिति । कर्मणि प्रजावृद्धिलक्षणे बद्धानां नियुक्तानां नो दुर्मर्षं दुःसहं यद्विप्रियमहितं कृतवानसि तन्मर्षितं सोढव्यम् ॥ ४२ ॥

तन्तुकृन्तनयानां त्वमभद्रमचरः पुनः ।
तस्माल्लोकेषु ते मूढ न भवेद् भ्रमतः पदम् ॥ ४३ ॥

सत्यधर्म – न पुनरेवं चेत्कोऽपि प्रजातर्षो मर्षयेदिति कोपफलमालपति ॥ तन्तुकृदिति । तन्तुर्वंशस्तत्कृतश्च ते तनयाश्च तेषामभद्रं तदन्तरायरूपं भ्रमतश्चरतः पदमेकत्र निवासस्थानं न भवेत् । चरत इति प्रयोगमचरतो ग्रन्थकृतो भ्रमतः पदं क्वापि न भवेत्किन्तु प्रमादत एवेति तत्स्वभावावेदननैर्भर्यमान्तरङ्गिकमन्तरङ्ग आनेयम् ॥ ४३ ॥

चट्टी – तथाऽपि द्वितीयापराधादभद्रं भविष्यत्येवेत्याह ॥ तन्तुकृदिति । हे तन्तुकृत् । सन्तानछेदककृती छेदनेति धातोः । यद्वा । तन्तुकृन्तनयानामित्येकं पदं वा । तन्तुकृतां सन्तानवृद्धिकराणां तनयानामभद्रं स्थानभ्रंशं पुनर्द्वितीयवारं यद्यस्मादचरस्तस्माद्धे मूढ लोकेषु भ्रमतस्ते पदं स्थानं न भवेदिति । मृदुछलेन शापः ॥ ४३ ॥

श्रीशुक उवाच
प्रतिजग्राह तद् बाढं नारदः साधुसम्मतः ।
एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयम् ॥ ४४ ॥

इति षष्ठस्कन्धे पञ्चमोऽध्यायः ॥

सत्यधर्म – एवं तप्तेन शप्तः प्रतिशप्तवान्किमित्यतो नारदमधिकारिविशेषं द्वारीकृत्य भागवतानामयमेव स्वभाव इति हनुमानब्धिमतरद्दुष्करं किं महात्मनामित्यालङ्कारिकोक्तसामान्यार्थान्तरन्यासमुखेन शंसति ॥ प्रतीति । बाढमोमिति प्रतिजग्राह । स्वयमीश्वरः सन्नपि तितिक्षेतेत्येतावान् यः स साधुवाद इत्यन्वयः ॥ ४४ ॥ इति श्री भागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे पञ्चमोऽध्यायः ॥ ६-५ ॥

चट्टी – बाढं तथेति । प्रतिजग्राह स्वीकृतवान् । ननु नारदः समर्थोऽपि किमर्थं न प्रतिशप्तवानित्यतः साधूनां स्वभावस्तादृश इत्याह ॥ एतावानिति । ईश्वरोऽपि स्वयं प्रतिशप्तुं समर्थोऽपि तितिक्षेतेति यदेतावान्साधूनां वादः । हीत्यनेन साधूनां भूषणं क्षमेति स्मृतिप्रसिद्धिं दर्शयति ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ ६-५ ॥

॥ अथ षष्ठोऽध्यायः ॥

श्रीशुक उवाच
ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा ।
षष्टिं सञ्जनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥

सत्यधर्म – हरिः ॐ ॥ नारदेन द्विरेवं कृतम् । तस्मात्पुनर्बिभ्यद्दक्षो वीक्ष्यैवं मनसा तदविरोधेन साधनीयं कार्यमिति ततानैवमिति बोधयति ॥ तत इति । तेनानुनीतः समाहितः । दुहितॄः स्त्र्यपत्यानि । षष्टिं सतीव्यतिरिक्ताः सृष्ट्युपयोगिनीस्तत्सङ्ख्याः । ता अपि वेद वेत्यादिवदनिदंकार्यकारिण्यः किं नेत्याह ॥ पितृवत्सला इति ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ प्राचेतसो दक्षः । अनुनीतः सांत्वितः । नारदात्पुत्राणां नाशमाशङ्कमानो दुहितॄर्जनयामासेति भावः ॥ १ ॥

ददौ स दश धर्माय कश्यपाय त्रयोदश ।
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ।
भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्यस्य चापराः ॥ २ ॥

सत्यधर्म – स्त्रीणां प्रदानकर्मैव यथोपनयनं तथा । पुत्राच्छतगुणं पुत्री यदि पात्रे प्रदीयत इत्याद्युक्तेः को न्यायेन कन्यां ददाविति वदति ॥ ददाविति । धर्माय दश । कालस्य नयने यापने ज्ञापने वा विनियुक्ता युक्ताः । धर्मायेत्यादौ परस्वत्वोत्पादरूपेणैकेन दलेनैवोपपत्तिश्चतुर्थ्या ज्ञेया । न ममेत्यस्यानाशंस्यस्य निबन्धादावुक्तेः । एवं सप्तविंशतिमिन्दवे कुमुदबान्धवाय । भूतांगिरःकृशाश्वेभ्यस्तन्नामकेभ्यो द्वे द्वे एकस्मा इति षट् । अपरा उर्वरिता द्वे द्वे इत्यत्राप्यन्वेति । एवं चतस्रस्तार्क्ष्याय कश्यपाय तार्क्ष्यः पिता पुत्रश्च । अथ तार्क्ष्यसुतो ज्ञात्वेत्यष्टमे । तार्क्ष्यपुत्रा इवोरगानिति सप्तमे । तार्क्ष्यपुत्रः सुधामिवेत्यन्यत्र । गरुत्मान्गरुडस्तार्क्ष्य इत्यमरोक्तेः कश्यपस्य विप्रस्य च संज्ञेयम् । कश्यपाय त्रयोदश तार्क्ष्याय चापरा इति विभज्योक्तिस्तु विवाहक्रमविवक्षयेति नैकधारया सप्तदशेत्युक्तिरिति ज्ञेयम् । परे तु दश धर्माय कायेन्दोर्द्विषट्त्रिणव दत्तवानिति पठित्वा द्विषट्द्विगुणाः षट् द्वादश यासु तास्त्रयोदशेत्यर्थापयाश्चक्रुः । परन्तु स क्लेशिष्टोऽर्थ इति श्लिष्टोऽर्थोऽस्मत्पाठ इति तदेतद्विदितार एव वदेयुः ॥ २ ॥

चट्टी – कालस्य नयने ज्ञापने । तार्क्ष्यायारिष्टनेमिसंज्ञायापरा अवशिष्टाश्चतस्रः । ददाविति सर्वत्रानुषङ्गः ॥ २ ॥

नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ।
यासां प्रसूतिप्रभवैर्लोका आपूरितास्त्रयः ॥ ३ ॥

सत्यधर्म – सापत्यानामित्यत्रत्यापत्यशब्दो यासां प्रसूतिप्रभवैरित्येतदनुसारेण पुत्रपौत्रादिपरो व्याकर्तव्यः । सापत्यानाममूषां नामधेयानि मे मत्तः शृणु । अनेन स्वस्य विवक्षाऽस्तीति ध्वनयामासेति ज्ञायते ॥ ३ ॥

चट्टी – सापत्यानामपत्यसहितानाम् । मे मत्तः । प्रसूतिप्रभवैः पुत्रपौत्रादिभिः ॥ ३ ॥

भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती ।
वसुर्मुहूर्ता सङ्कल्पा धर्मपत्न्यः सुताञ्छृणु ॥ ४ ॥

सत्यधर्म – इति भान्वादिनाम्न्यो धर्मपत्न्यो निरूपितास्तत्सुताञ्छृणु ॥ ४ ॥

भानोस्तु वेदऋषभ इन्द्रसेनस्ततो नृप ।
विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः ॥ ५ ॥

सत्यधर्म – ततो वेदर्षभात् ॥ ५ ॥

चट्टी – ततो विद्योतात् स्तनयित्नवः ॥ ५ ॥

ककुभः सङ्कटश्चासीत् कीकटस्तनयो यतः ।
भुवो दुर्गाणि जामेयाः स्वर्गो नन्दिस्ततोऽभवत् ॥ ६ ॥

सत्यधर्म – यतः सङ्कटाज्जामेया ढगन्तः । भुवो दुर्गाणि तदभिमानिनः ॥ ६ ॥

चट्टी – यतः संकटात् । कीकटस्तनयो जातः । भुवो भूमेर्दुर्गाण्यगम्यस्थानानि तदभिमानिनो देवा जामेयास्ताभ्यः पुत्राः स्वर्गः स्वर्गाभिमानी देवोऽपि जामिपुत्रस्ततः स्वर्गान्नन्दिः ॥ ६ ॥

विश्वेदेवास्तु विश्वायामप्रजांस्तान् प्रचक्षते ।
साध्योगणस्तु साध्यायामर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥

सत्यधर्म – विश्वेदेवा रूढशब्दः । तानप्रजानप्रजाकानिति गतेऽनपत्यान् । साध्योगणशब्दः । तत्सुतः साध्यगणसुतः ॥ ७ ॥

चट्टी – अप्रजान्पुत्ररहितान् । तत्सुतः साध्यानां सुतः ॥ ७ ॥

मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥ ८ ॥

सत्यधर्म – यमुपेन्द्र इति विदुर्विद्वांसः स वासुदेवांशो जयन्त आदितेयादयमुपेन्द्रोऽन्यः । मरुत्त्वान्मरुत्वतीति चाखण्डौ । यद्वा यमुपेन्द्रमिति विदुस्तस्य वासुदेवस्यांशो जयन्त इति योजना ॥ ८ ॥

मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ।
यथा फलं प्रयच्छन्ति भूतानां स्वस्वकालजम् ॥ ९ ॥

सत्यधर्म – मौहूर्तिकाः । स्युर्मौहूर्तिकमौहूर्तेत्यमरः । मुहूर्तं विदन्तीति ते तथा । तद्वेदेत्यर्थे उक्थादित्वाट्ठक् । मुहूर्ताद्यभिमानिनः स्वस्वकालाज्जातं काले जातं वा फलं यथा सम्यक् प्रयच्छन्ति ॥ ९ ॥

चट्टी –मौहूर्तिका दिनावयवभूतमुहूर्ताभिमानिनो देवाः । स्वस्वकालजं स्वस्वमुहूर्तानुष्ठितकर्मजन्यं फलम् । यथा स्वनामानुसारेण प्रयच्छन्ति ॥ ९ ॥

सङ्कल्पायाश्च सङ्कल्पः कामः सङ्कल्पजः स्मृतः ।
वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥

सत्यधर्म – वसोस्तत्संज्ञाया अष्टौ मनवस्तेषां मनूनाम् । ननु वसुरष्टमी किमित्यन्ते निरूपिता यदिदानीं निबन्धस्य कश्चिदस्त्यनुबन्धो हन्त तर्हि निर्देशसमय एव किं तथा निर्देशो न कृत इति चेन्न । अर्थद्वन्द्वयुक्तताप्रयुक्तडोलायमानमानसो व्यास एवं शशंस । तथा हि । उत्पत्तिक्रमं क्रमं च कन्यावितरणस्य चालोच्य प्रोच्यते । सूचीकटाहनयेन वसुवंशः सुविस्तृत इति पश्चात्तमूच इति समाध्युपपत्तेरिति ॥ १० ॥

चट्टी – वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः । मे मत्तः ॥ १० ॥

द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वस्तुर्विभावसुः ।
द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥

सत्यधर्म – अभिमतेस्तन्नाम्न्या अभिमन्यमानाभिमानिन्या हर्षशोकभयादयोऽन्तःकरणप्रभेदास्त-द्देवाश्च । सर्वत्राप्येवमनुसन्धेयम् ॥ ११ ॥

चट्टी – विभावसुरिति तेषां नामानीति शेषः । द्रोणस्याभिमान्यभिमानित्वादभिमतिनाम्नी पत्नी आसीत् । हर्षादयो हर्षाद्यन्तःकरणधर्मदेवताः । तस्याः पुत्रा इति शेषः ॥११॥

प्राणस्योर्जस्वती भार्या सह आयुः परोजवः ।
ध्रुवस्य भार्या धरणी त्वसूत विविधाः पुरः ॥ १२ ॥

सत्यधर्म – सह आयुर्नाम्ना । पुरः पत्तनानि ॥ १२ ॥

चट्टी – पुरः पुराणि । तदभिमानिनो देवान् । सह आदयस्त्रय ऊर्जस्वत्याः पुत्राः ॥ १२ ॥

अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ।
अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥

सत्यधर्म – वसोः सूनोरग्नेर्धारा नामान्तरमेतत्स्वाहायाः । पुत्रा धारोदरजाः ॥ १३ ॥

चट्टी – अग्नेर्भार्या वसोर्धारा नाम्नी ॥ १३ ॥

स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ।
दोषस्य शर्वरी पुत्रः शिंशुमारो हरेः कला ॥ १४ ॥

सत्यधर्म – स्कन्दः कृत्तिकापुत्रश्चेत्यन्वयः । तं कार्तिकेयं गाङ्गेयमाग्नेयं च प्रचक्षत इत्यादेः । ततः स्कन्दाद्दोषस्य पूर्वं दोषेत्यव्ययेनोक्तस्यैवात्रैवमुक्तिः । तस्य सम्बन्धिनी या शर्वरी तत्पुत्रः शिंशुमारो हरेः कला साक्षादभिन्नांशः ॥ १४ ॥

चट्टी – स्कन्धश्च कृत्तिकासु जातोऽग्नेः पुत्रः षाण्मातुर इति । अग्निभूरिति प्रसिद्धेः । ततः स्कन्दात् । शर्वरी नाम भार्या ॥ १४ ॥

वस्तोराङ्गिरसी पुत्रो विश्वकर्मा कृतीपतिः ।
ततो मनुश्चाक्षुषोऽभूद् विश्वेशाद्या मनोः सुताः ॥ १५ ॥

सत्यधर्म – कृतीति तत्सती । कृतीनां क्रियाणां इःकाम इच्छा तस्याः पतिः प्रभुः । यथोक्तं प्रवो भ्रियन्त इन्दव इत्यृग्भाष्यटीकयोः । इष्टदानात्तथेन्दवः । इन्दुशब्दं सोमेषु मनोवृत्तिषु च व्याख्याति ॥ **इष्टेति** । इकारः कामवाची इं कामं ददतीतीन्दव इति ॥ १५ ॥

चट्टी – आङ्गिरसी नाम । भार्या कृती कर्मसु निपुणः ॥ पतिः शिल्पाचार्यः । कृत्या देव्याः पतिरित्येकं पदं वा । ततः विश्वकर्मणः ॥ १५ ॥

विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ।
पञ्चयामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥

सत्यधर्म – विभावसोः सकाशात्पञ्चयामोऽन्हो यामचतुष्टयं पश्चिमापश्चिमार्धयामद्वयं चेत्याहत्य सैको यामश्चेति पञ्चयामोऽत एव रात्र्यास्त्रियामेति नाम । दिवसदेवताऽथातपाज्जात इति शेषः ॥ १६ ॥

चट्टी – उषा भार्या । अथातपात् । पञ्चयामो दिवसो जातः । अत एव रात्रिस्त्रियामप्रदोषप्रत्यूषयोर्दिवसावयवत्त्वात् । अत्र सर्वत्र तपआदिशब्दैरभिमानिनस्तदभिमन्यमानाश्च ग्राह्याः । येन दिवसेन भूतानि प्राणिनः कर्मसु विषयेषु जाग्रति जागरं प्राप्नुवन्ति ॥ १६ ॥

भूतस्य भार्या भूताया रुद्रा एकादश स्मृताः ।
सुरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ १७ ॥

सत्यधर्म – भूतस्याभूद्भूतैकाऽपरा च सुरुपेति भार्याद्वयम् । भूता एकादशरुद्रानसूत सुरूपा तु कोटिशः ॥ १७ ॥

चट्टी – भूतस्य द्वे भार्ये तयोर्वंशमाह ॥ सुरूपेति । सुरूपा नाम्नी भार्या कोटिशो रुद्रानसूत ॥१७॥

रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ।
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ।
रुद्रांश्च पार्षदांश्चान्यान् घोरान् प्रेतविनायकान् ॥ १८ ॥

सत्यधर्म – एकादशरुद्राणां प्रधानत्वादल्पनिरूपणसूपपादकत्वाद्वा नामान्याह ॥ रैवत इत्यादिना । प्रेतविनायकांश्चासूत ॥ १८ ॥

चट्टी – तत्र प्रधानानां नामान्याह ॥ रैवत इति । महानित्येकादशरुद्राः । प्रधाना इति शेषः । रुद्रपार्षदान्घोरान्प्रेतादींश्च । अन्यान् अन्यस्यां भार्यायां जातान् । विद्धीति शेषः ॥ १८ ॥

प्रजापतेराङ्गिरसः स्वधा पत्नी पितॄनथ ।
अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ॥ १९ ॥

सत्यधर्म – आङ्गिरसः प्रजापतेरिति सामानाधिकरण्यम् । सती स्वधा चेति द्वे भार्ये । तत्र स्वधा पितॄनसूत । सती चाथर्वाङ्गिरसं वेदं तदभिमानिनं पुत्रत्वेऽकरोत्कृतवती ॥ १९ ॥

चट्टी – आङ्गिरसः स्वधा सती चेति द्वे भार्ये । तयोर्वंशमाह ॥ प्रजापतेरिति । स्वधा नाम पत्नी पितॄन्पुत्रत्वेऽकरोत् । अथ सती अथर्वाङ्गिरसं नाम वेदं पुत्रत्वेऽकरोदित्यन्वयः ॥ १९ ॥

कृशाश्वोऽर्चिषि भार्यायां धूमकेतुमजीजनत् ।
धिषणायां वेदशिरा देवलं च सुतं मनुम् ॥ २० ॥

सत्यधर्म – कृशाश्वो नाम्नाऽर्चिर्धिषणेति द्वे भार्ये । वेदशिरा इति कृशाश्वस्यैव नामान्तरम् ॥ २० ॥

चट्टी – कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये । तयोर्वंशमाह ॥ कृशाश्व इति । वेदशिरा इति कृशाश्वस्य नामान्तरम् ॥ २० ॥

तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति ।
पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥ २१ ॥

सत्यधर्म – यामिनी इति विना सन्धिं निर्देश उत्तरत्र व्यत्यस्य सन्तत्युक्तिर्नैकसरण्येति सूचक इति ज्ञेयम् । यामिनी नाम्ना ॥ २१ ॥

चट्टी – यामिनीति चतस्रो भार्या इति शेषः । विवक्षाधीनत्वात्संधेस्तदभावादभावः । तासां वंशमाह ॥ पतङ्गीति । ॥ २१ ॥

विनताऽसूत गरुडं साक्षाद् यज्ञेशवाहनम् ।
सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २२ ॥

सत्यधर्म – साक्षाद्यज्ञेशो हि नारायणः । अनूरुमिति वा सूर्यसूतमिति पदे व्यवस्थया संज्ञास्वरूपनिरूपणपरे ज्ञेये । सूर्यसूतोऽरुणोऽनूरुरित्यमरात् । कद्रुकमण्डल्वोरित्यूङ् ॥ २२ ॥

चट्टी – अनूरुं अरुणं च विनताऽसूतेत्यन्वयः ॥ २२ ॥

कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत ।
दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ।
पुनः प्रसाद्य तं सोमः कला लेभे क्षयेधिताः ॥ २३ ॥

सत्यधर्म – कृत्तिकादीनि नक्षत्राणि । इन्दोः पत्न्यो दक्षशापाद्रोहिणीमात्रासक्तिप्रसक्तकोपजाद्यक्ष्मग्रहार्दितो यक्ष्मणा राजरोगेण ग्रहो ग्रहणं तेनार्दितस्तद्रूपपिशाचेनेति वा । तं क्षयेधिता अपचयोपचयसहिताः । क्षयैधिता इति सुपठे यत्क्षयेधिता इति पपाठ तेन न सदातनी वृद्धिरैन्दवीति वा पूर्वानर्थातिशयापेक्षयाऽयमेको गुणः पररूपमिति वा सूचयामासेत्यवसेयम् । कृष्णपक्षे कलापचय उपचयश्च शुक्लपक्ष इति क्षयेधिताः । क्षयो रोगान्तरे वेश्मकल्पान्तापचयेष्विति विश्वः । रोगराजः क्षये वेश्मेति रभसः । क्षये दिता इति क्वाचित्कः पाठः स न सरलश्च तथाऽपि क्षये कृष्णपक्षे दिता अवखण्डिता दोऽवखण्डन इति धातुव्याकृतेः । अक्षये शुक्लपक्षे च कला लेभ इति व्याख्येयः । सोमो रोहिण्यामधिकं प्रीतिमानभूदित्यादीकृत्य दक्षश्चैनमब्रवीत्समं वर्तयसीत्यन्तेन मोक्षधर्मे कथितः शापस्तत्रैव तन्मोक्षश्च व्यवस्थया तत्र । ऋषयः सोममब्रुवन्क्षीयसे यक्ष्मणा पश्चिमस्यां दिश्यस्ति समुद्रे हिरण्यसरस्तीर्थं तत्र गत्वाऽऽत्मानमभिषेचयस्वेत्यादीकृत्य तदस्य शशलक्ष्म विमलमभवदित्यन्तोक्तोऽनुसन्धेयः । दक्षस्तु तदनुमेन इति पुनः प्रसाद्येत्याद्युक्तिरिति न तद्विसंवादः ॥ २३ ॥

चट्टी – रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात् । कुपितस्य दक्षस्य शापाद्यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योऽभूत् । तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि । कथंभूताः क्षयेधिताः कृष्णपक्षे क्षये सति शुक्लपक्षे पुनरेधितास्तेनैव विवर्धिताः सतीः। वृद्ध्यभाव आर्षः ॥ २३ ॥

शृणु नामानि लोकानां मातॄणां शङ्कराणि च ।
अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ २४ ॥

सत्यधर्म – शङ्कराणि शमिति सुखवाच्यव्ययम् । शं कुर्वन्तीति तानि । शमिधातोः संज्ञायामित्यच् । ञ्निति न असंज्ञत्वात् । शं सुखस्य कुर्वन्तीति कराणि । पचादिरच् । भिन्नं वा पदम् ॥ २४ ॥

चट्टी – शङ्कराणि सुखकराणि ॥ २४, २५ ॥

अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ।
मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥ २५ ॥

सत्यधर्म – सुरसा इलेत्यसन्धिर्विवक्षाभावात् । सुरसाशब्दपर्यायोऽयं सुरसा इति सान्तः शब्द इति वा ॥ २५ ॥

तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ।
सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ।
ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ २६ ॥

सत्यधर्म – तिमिरित्यंतिमायास्तिमेरिति प्रथमत उक्तिः कासाञ्चित्त्यागश्च स्वातन्त्र्यतयेति ज्ञेयम् ॥ २६ ॥

चट्टी – अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशमाह ॥ तिमेरित्यादिना ॥ २६ ॥

दन्दशूकादयः सर्पा राजन् क्रोधवशात्मजाः ।
इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ २७ ॥

सत्यधर्म – सौरसाः सुरसासम्बन्धिनः ॥ २७ ॥

चट्टी – भूरुहा वृक्षाः । सौरसाः सुरसायाः पुत्राः ॥ २७ ॥

अरिष्टायाश्च गन्धर्वाः काष्ठाया द्विशफेतराः ।
सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु ॥ २८ ॥

सत्यधर्म – द्विशफेतरा द्विशफा इतरे येभ्यस्त इति बहुव्रीहिरतो न सर्वनामता । एकशफजातयः । प्राधानिकान्मुख्यान् ॥ २८ ॥

चट्टी – द्विशफेतरा एकशफास्तेषां मध्ये प्राधानिकं प्रधानविषयसंख्यानं शृणु ॥ २८ ॥

द्विमूर्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ।
अयोमुखः शंकुशिराः स्वर्भानुः कपिलोऽरुणः ॥ २९ ॥

सत्यधर्म – द्विमूर्धा संज्ञात्वान्न षः ॥ २९,३०,३१,३२,३३ ॥

पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ।
धूम्रकेशो विरूपाक्षो विप्रचित्तिस्तु दुर्जयः ॥ ३० ॥

चट्टी – दुर्जय इत्येतेऽष्टादशप्रधाना इति शेषः ॥ ३० ॥

स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ।
वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ३१ ॥

वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ।
उपदानवी हयशिरा पुलोमा कालिका तथा ॥ ३२ ॥

उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ।
पुलोमां कालिकां च द्वे वैश्वानरसुते नृप ॥ ३३ ॥

चट्टी – वैश्वानरो दनोः पुत्रस्तस्य सुता या उपदानवीत्यादयश्चतस्रस्तासां मध्ये उपदानवी हिरण्याक्षमुपयेमे । इत्यादिरन्वयः ॥ ३१, ३२, ३३ ॥

उपयेमे च भगवान् कश्यपो ब्रह्मचोदितः ।
पौलोमाः कालिकेयाश्च दानवा युद्धशालिनः ॥ ३४ ॥

सत्यधर्म – कः प्रजापतिः।*कश्यपः (। *तं पश्यतीति कश्यपः, वर्णविपर्ययात् । इति भाव्यमिति भाति) ॥ ३४ ॥

चट्टी – दानवीपरिण्यायने हेतुर्ब्रह्मणा चोदित इति ॥ ३४ ॥

तयोः षष्ठिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ।
जघान स्वर्गतो राजन् एक इन्द्रप्रियङ्करः ॥ ३५ ॥

सत्यधर्म – स्वरव्ययं स्वर्गेत्यमरात्स्वः स्वर्गं गतः । ते तव पितुरभिमन्योः पिता जनकोऽर्जुनः । पितामह इत्यमहता निर्देशेनार्थनिर्वाहे यत्पितुः पितुरित्यगदत्तेन मम जनको विरोचनादिवद्यः कश्चिद्धर्तेतेति दुश्चित्ततया मन्मुखनिरीक्षकः परीक्षिद्भवेन्न तथा भवत्विति तं सान्त्वयामामस व्याससूनुरिति मन्तव्यम् । इन्द्रप्रियंकरः । क्षेमप्रियमद्रेण् चेति खश् स्वांशित्वात् ।। ३५ ।।

चट्टी – तयोः षष्ठिसहस्राणि पौलोमकालेयानां मानः । निवातकवचाः पुत्रा जाताः । ते च स्वर्गं गताः सन्तस्ते पितुरभिमन्योः पिताऽर्जुनो जघान ।। ३५ ।।

विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ।
राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ।। ३६ ।।

सत्यधर्म – शतं चैकं चेत्येकोत्तरशतम् । तत्र ज्येष्ठो राहुः । केतुशतं केत्वादिशतं शरीरविवक्षयैवमुक्तिः । तत्प्रकारश्चाष्टमे स्पष्टयिष्यते ।। ३६ ।।

चट्टी – शतमेकं चाजीजनत् । तदेव विवृणोति ।। राहुज्येष्ठमिति । राहुर्ज्येष्ठो यस्य तत्केतुशतमजीजनत् । इत्युरुक्रम इत्येते द्वादश अदितेः पुत्रा इति शेषः ।। ३६-३८ ।।

अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ।
यत्र नारायणो देवः स्वांशेनावतरद् विभुः ।। ३७ ।।

विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः ।
धाता विधाता वरुणो मित्रश्शक्र उरुक्रमः ।। ३८ ।।

सत्यधर्म – स्वांशेन स्वरूपांशेनावतरदवातरद्वामनतया ।। ३७, ३८ ।।

विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम् ।
मिथुनं च महाभाग यमं देवं यमीं तथा ।। ३९ ।।

सत्यधर्म – संज्ञा संज्ञयाऽसूयत । यमं देवं यमीं चेति मिथुनं द्वन्द्वम् ।। ३९ ।।

चट्टी – संज्ञानाम्नी भार्या श्राद्धदेवं वैवस्वतं मनुम् ।। ३९ ।।

सैव भूत्वाऽथ वडवा नासत्यौ सुषुवे भुवि ।
छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ।
कन्यां च तपतीं या वै वव्रे संवरणं पतिम् ।। ४० ।।

सत्यधर्म – भुवि वर्तमाना। अथवा भुवि नीरोगतया सत्ताविषये नासत्यौ सुषुवे भिषक्त्वात्तयोर्भुवि पुनरपत्यजनने प्रस्तुत इति वा सावर्णिं नाम्ना। या संवरणं नाम्ना पतिं वव्रे तां तपतीमित्यन्वयः ॥४०॥

चट्टी – भुवि वर्तमाना। छाया विवस्वतः अपरा भार्या। संवरणं नाम राजानम् ॥ ४० ॥

अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥ ४१ ॥

सत्यधर्म – तयोर्मातृकार्यम्णोश्चर्षणयः। ओमासश्चर्षणीधृत इत्यृग्भाष्यटीकाटिप्पणीषु प्रजाश्चर्षणयः प्रोक्ता नैघण्टुकैः। मनुष्या नरो धवो जन्तवो विशः क्षितयः कृष्टयश्चर्षणय इत्यादिपञ्चविंशतिसङ्ख्याकेषु मनुष्यनामसु चर्षणिशब्दः पठित इत्युक्तेः। यत्र प्रजासामान्ये मानुषी ज्ञानवती पौरुषी जातिश्चर्षणयः कृताकृतज्ञानवन्तः पश्यकर्मत्वेन निघण्ट्वाद्युक्तेः। यत्र येष्वनुसन्धानविशेषेण मानुषी जातिश्चोपकल्पिता। तथा च श्रुतिः। पुरुषत्वे वा विस्तरामात्मेतीति। केचित्स्वयमेव निघण्टुमार्गणसङ्कटं त्रोटयामासुरिति तोषः ॥ ४१ ॥

चट्टी – मातृका नाम पत्नी ॥ ४१ ॥

पूषाऽनपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा।
योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥ ४२ ॥

सत्यधर्म – कुपितं भवं विवृतद्विजो दर्शितदन्तः। अयमुदन्तश्चतुर्थेऽभिहितोऽनुसन्धेयः ॥ ४२ ॥

चट्टी – कुपितम्। हरमिति शेषः। विवृतद्विजः प्रकटितदन्तः सन् ॥ ४२ ॥

त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका।
सन्निवेशस्तयो(स्तया)र्जज्ञे विश्वरूपश्च वीर्यवान् ॥ ४३ ॥

सत्यधर्म – तयोस्त्वष्टृरचनयोः सन्निवेशस्तच्छर्मा सुतो जज्ञे विश्वरूपश्च जज्ञ इति पृथक् पृथगन्वयः। वीर्यवानितीर्यमाणकथोपोद्बलनार्थम् ॥ ४३ ॥

चट्टी – तया रचनया ॥ ४३ ॥

तं वव्रिरे सुरगणा स्वस्रीयं द्विषतामपि।
विमतेन परित्यक्ता गुरुणाऽऽङ्गिरसेन यत् ॥ ४४ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

सत्यधर्म – स्वस्रीयं स्वसुरपत्यं स्वस्रीयस्तम्। स्वसुश्छ इति छः। दौहित्रमिति पाठोऽप्येतदर्थकः। द्विषतां दैत्यानामपि कश्यपपुत्रत्वादुभयेषाम्। स्वस्त्रियमिति लेखकापराधत इति बोध्यम्। उत्तरत्राभिधीयमाननिमित्तेन विमनस्केनाङ्गिरसेन जीव आङ्गिरस इत्यमराज्जीवेन गुरुणा यत्परित्यक्तास्तस्मात्ते वव्रिरे। गुरुणा मुक्तोपसृप्यवन्नेह नानाऽस्तीतिवद्भावप्रधानो निर्देशः। गुरुत्वेन वव्रिरे। परपराकरणरूपकर्मभारेण निमित्तेनेति वा। परित्यक्ताः सुराः शिष्याणामक्रममित्युत्तरपद्यपद्यां प्रतिपद्य परित्यक्त इति पाठस्तु परित्यक्तः ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे षष्ठोऽध्यायः ॥ ६-६ ॥

चट्टी – यत् यदा विमतेनावज्ञातेन गुरुणा बृहस्पतिना परित्यक्ताः। तदा द्विषतां शत्रूणां स्वस्रीयं भागिनेयमपि तं विश्वरूपं वव्रिरे। पौरोहित्ये व्रतवन्त इत्यन्वयः ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ६-६ ॥

॥ अथ सप्तमोऽध्यायः ॥

राजोवाच

यस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ।
एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ ॥ १ ॥

सत्यधर्म – ॥ हरिः ॐ ॥ गुरुप्रसादो बलवान्गुरुद्वारा प्रसादकृदाचार्याद्धैव विद्या विदिता साधिष्ठा हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चनेत्यादेरनादरेण देवाः, किं विना कविना तथैव तस्थुः किं वा तदनादरेण कञ्चनान्यं मान्यं वव्रिरे किं वा सान्त्वयित्वा त्वय्येव निभृतनैर्भर्या इति भूयर्थयित्वा तमेव तारां रन्तारं गृहान्ग्राहयामासुस्तदेव भक्षयामि द्वारं विदारय रमणीति दुरूहं सन्देहं सभ्यसन्दोहस्य मन्दीकारयितुमादौ नेदं गुरुपरित्यजं दृष्टचरं विना निदानं सञ्जाघटीतीति राजा तद्वदेति वदति ॥ राजेति। यस्य हेतोः कस्य हेतोः। द्वितीयस्कन्धीय यथा सन्धार्येदिति श्लोकव्याकृत्यवसरे श्रीमत्तात्पर्ये यच्छब्दः प्रश्ने यतश्चोदेति सूर्य इत्यादिवत्। यच्छब्दस्तु परामर्शे प्रश्नार्थे चापि भण्यत इत्यभिधानात्। यतस्तदुदितमित्यनुव्याख्यावसरे यतो यत्कारणम्। अन्यत्रापि तत्कस्य हेतोर्निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यादिसुधातद्व्याख्यानाद्यस्य हेतोरिति सम्भवति। आत्मनः स्वेषाम्। आत्मेत्येक-वचनान्तात्मा सन्नपि शब्दो बहुवचनविशेषणीभूतो भवति। यत्र वर्तेत बहुवचनमात्मनामित्याद्यात्मा सोऽपि गुणाय तेन यतेत जात्येकवचनत्वादिरूपेण विवेचयितुमहङ्कारात्मने गरुडशेषरुद्रेभ्य इत्यादि-

प्रयोगात् । आत्मनो मनसो मनःपूर्वकमिति यावदिति वा । शिष्याणामक्रममिति मात्रं अतिमात्रं वदतश्छात्रैर्देशिकनिदेशे स्थातव्यमेव । अत इदं देवमौढ्यमेवेति प्रौढमतेः क्षितिपतेर्निगूढ आशय इत्याशयः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ गुर्ववज्ञाऽनर्थकरी महतामपि यतः । गुरुः संपूज्य इत्येतदध्यायेऽस्मिन्निरूप्यते । यस्य हेतोः । आचार्येणात्मनः शिष्याः सुराः परित्यक्ताः । आत्मनः आचार्येणेति वा । एतदाचक्ष्व । तस्यैव विवरणमक्रममाचक्ष्वेति । अक्रममपराधम् ॥ १ ॥

श्रीशुक उवाच

इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः ।
मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ ॥

विश्वेदेवैश्च साध्यैश्च नासत्यभ्यां परिश्रितः ।
सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥

विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ।
निषेव्यमाणो भगवांस्तूयमानश्च भारत ॥ ४ ॥

सत्यधर्म – मदोल्लङ्घितेति पदमेकम् । मदो लङ्घितसत्पथ इति पाठे मदस्य सत्पथव्युदसनहेतुताऽऽर्थिक्यनुसन्धेया । श्लोकाष्टकस्यैकान्वयः । रुद्राद्यपेक्षया मरुत्पुरस्करणं पुरतस्तत्सौम्यस्य सम्पादनोपपादनानुसरणेन वैरिणोऽपि वज्री स्वाधीनानकरोदित्याद्भुत्येनैवेति ज्ञेयम् ॥ २,३,४ ॥

चट्टी – इन्द्रो यदा संप्राप्तं वाचस्पतिं नाभ्यनन्दितवान् । तदाऽङ्गिरसः कविः सर्वज्ञोऽङ्गिरसो बृहस्पतिस्ततो निर्गत्य तूर्ष्णीं स्वगृहमाययावित्यष्टमेनान्वयः । अनादरे हेतुं मन्दं दर्शयितुं तं विशिनष्टि ॥ त्रिभुवनेत्यादिना । त्रिभुवनैश्वर्यमदोल्लङ्घितः सतां पन्था येन स तथा । परिश्रितो ललितमिति क्रियाविशेषणम् । आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः । पारमेष्ठ्यैर्महाराजचिन्हैः । आसनार्धे स्थितया पौलोम्या सह विराजमानः । प्रत्युत्थानादिभिः । नाभ्यनन्दत न चोच्चचाल । आसन एव स्थितोऽपि किञ्चिन्न चलितवान् । एकैकमपि पूज्यत्वे हेतुरिति ज्ञापनाय वाचस्पतिमित्यादिविशेषणबाहुल्यम् । श्रीमदेन या विक्रिया विकारस्तां विद्वान् जानन् ॥ २-९ ॥

उपगीयमानो ललितमास्थानाध्यासनाश्रितः ।
पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥

सत्यधर्म – आस्थाने सुधर्मायां तत्राप्यध्यासनं सिंहासनमाश्रितः । चन्द्रमण्डलवदिति वा चन्द्रमण्डलादिति वा विग्रहः । तत्र द्वितीय एव ज्यायान् तत्कलङ्किताशङ्कातङ्कनादित्युक्तेः ॥ ५ ॥

युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ।
विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥

स यदा परमाचार्यं देवानामात्मनश्च ह ।
नाभ्यनन्दत सम्प्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥

सत्यधर्म – सहेतुक्तिर्युक्ता ।नाभ्यनन्दत नान्वमोदत प्रत्युत्थानादिभिर्नार्चयामासेति यावत् ॥६,७॥

वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ।
नोच्चचालासनादिन्द्रः पश्यन्नपि समागतम् ॥ ८ ॥

सत्यधर्म – पूर्वं देवानामात्मनः परमाचार्यमित्युक्तिरत्र वाचस्पतिमित्याद्युक्तिश्चैतस्मिन्नेकै-कस्मिन्सति भजनं विहितं न विहितं त्यजनं किम्वेतेषां समवायेऽतो महामोहो देवानां सर्वाभिभावकोऽहो इति द्योतनार्थेति मन्तव्यम् । पश्यन्नपीत्यपिनाऽमरेशस्यापि दशेदृशीति गर्हणार्हणं चकारेति ज्ञेयम् । यदप्यसुरनमस्कृतमिति तेन समयोचितसमबुद्धित्वं द्योत्यते । षष्ठ्याः पतिपुत्रेतिसत्त्वविधानात् षष्ठ्या अलुक् । जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिज इत्यमरः ॥ ८ ॥

ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः ।
आययौ स्वगृहं तूर्ष्णीं विद्वांच्छ्रीमदविक्रियाम् ॥ ९ ॥

सत्यधर्म – आङ्गिरसोऽङ्गिरसः पुत्रो निरन्नः खिन्नः स्वयमेवोपेयादिति नेत्याह ॥ प्रभुरिति । विद्वान् श्रीमदविक्रियामित्यनेन नेयं क्रिया स्वाभाविकी समयान्तरे स मया दशा पञ्चनददायनीय इति हृदये दधौ यदिति हृदयं ध्वन्यते । श्रीमदविक्रियां श्रीमतोऽप्यविक्रियां भाविनीं विद्वानित्यप्यावर्तितस्यार्थो बोध्यः ॥ ९ ॥

तर्ह्येव प्रतिबुध्येन्द्रो गुरुहेलनमात्मनः ।
गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥

सत्यधर्म – यर्हि गुरुर्गतस्तर्ह्येव तत्क्षण एवात्मनो गुरुहेलनं तदवज्ञानं प्रतिबुद्ध्यानुसृत्य । आत्मना स्वेन मनसा वा । सदसि यत्रावमानितो गुरुस्तत्रैव स्वावमाननेनापणवीथ्यां पादेन पोथयित्वैकान्ते

चरणधारणदुर्नीतिर्नानुनीतेन्द्रेणेति परोक्षतः श्रुत्वा दयां तनुयादिति पाकशासनमानसमिति ध्यनयति ॥ १० ॥

चट्टी – हेलनमवज्ञाम्। प्रतिबुध्यानुस्मृत्य ॥ १० ॥

अहो बत मयाऽसाधु कृतं वै दभ्रबुद्धिना।
यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥

सत्यधर्म – दभ्रबुद्धिना तनुमनीषेण। दभ्रं कृशं तन्वित्यमरः। मयैश्वर्यमत्तेन गुरुः कात्कृतो यत्ततो मयाऽसाधु कृतमतो न मयाऽतिरेकः। यद्वा यन्मयैश्वर्यमत्तेनेति पदमेकम्। यो मयः प्रधानो यस्य तच्च तदैश्वर्यं च तेन मत्तेन यत्स्वामिकैश्वर्ये मत्स्वामिकमिति मदवगतेत्यर्थः। वै इति यदर्थे वा यदिति शेषो वै तत्पक्ष इति ज्ञेयम्। कात्कृतः कादिति तिरस्कारसूचकं, तिरस्कृतः ॥ ११ ॥

चट्टी – आत्मानं गर्हयामासेत्युक्तमेव विवृणोति ॥ अहो इति। मया कृतं कर्म अहो असाधु यद्यस्माद्दभ्रबुद्धिनाऽल्पबुद्धिना मया कात्कृतः तिरस्कृतः ॥ ११ ॥

को गृध्येत् पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि।
ययाऽहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥

सत्यधर्म – यच्चाहं विबुधेश्वरोऽप्यासुरभावमद्य नीतस्तां त्रिविष्टपपतेर्लक्ष्मीं कः पण्डितः। तारकादिः। यद्वा पण्डतेर्गत्यर्थेति क्तः। इट्। सङ्ख्यावान्पण्डितः कविरित्यमरः। गृध्येदोङ्क्षुर्यान्न कोऽपीत्यर्थः ॥ १२ ॥

चट्टी – त्रिविष्ठपपतेरपि लक्ष्मीं कःपण्डितो गृध्येत् अभिकांक्ष्यते। गृध अभिकांक्षायामिति धातोः। विबुधानां सात्विकानां देवानामीश्वरोऽप्यहम्॥ १२ ॥

ये पारमेष्ठ्यधिषणमधितिष्ठन् न कञ्चन।
प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥

सत्यधर्म – नन्वनधिरूढाध्यासनानां यादृशां तादृशामुत्थानादि ज्ञानिभिरुक्तं त्वं तु मूर्धाभिषिक्तमूर्धन्य इति का चिन्ता तवेत्यतस्तेऽसम्यज्ज्ञानिन इति द्वाभ्यामाह ॥ य इति। ये,धिष्ठ्यशब्दपर्यायो धिषणशब्दः। निर्भज्यमानधिषणध्वजेति नवमे च प्रयोगाद्धिषणं सिंहासनं धिषणं बृहस्पतिं तदादिकं कञ्चन न प्रत्युत्तिष्ठेदित्यन्वयो वा। इति ब्रूयुस्ते परं धर्मं न विदुः। ऊर्ध्वं प्राणा ह्युत्क्रमन्ति यूनः स्थविर आगत इत्यादेः। विदुरिति बहुवचनेन शतमप्यन्धानां न पश्यतीत्यादि कटाक्षयति ॥ १३ ॥

चट्टी – ननु सिंहासनस्थितो राजा प्रत्युत्थानं न कुर्यादिति वृद्धा वदन्तीति चेत्तत्राह ॥ य इति द्वाभ्याम् । पारमेष्ठ्यधिषणं राजसिंहासनम् ॥ १३ ॥

तेषां कुपथद्रष्टॄणां पततां तमसि ह्यधः ।
ये श्रद्दधुर्वचस्ते वै मज्जन्त्यश्मप्लवा इव ॥ १४ ॥

सत्यधर्म – कुपथं कापथम् । अपि माषमित्यादिरीत्या द्रो लघुः पठनीयः । अश्मप्लवाः पाषाणमयनौकाः ॥ १४ ॥

चट्टी – कुपथं दिशंत्यपदिशंतीति कुपथद्रष्टारस्तेषां वचोऽश्ममयः पाषाणमयः प्लवो येषां ते यथा मज्जन्तं प्लवमनुमज्जन्ति तद्वत् ॥ १४ ॥

अथाहममराचार्यमगाधधिषणं द्विजम् ।
प्रसादयिष्येऽपि(वि)शठः शीर्ष्णा तच्चरणं स्पृशन् ॥ १५ ॥

सत्यधर्म – यत एवमनर्थस्तस्मादगाधधिषणं विततमतिम् । अपिशब्दः । अपि प्राक् प्रकटितातिशठत्वोऽपि । निशठ इति पाठे न शठो निशठः शठभिन्नोऽशठ इति यावदित्यर्थः । अतिशठः शठानतिक्रान्त इति वा तदर्थश्च ज्ञेयौ ॥ १५ ॥

चट्टी – यत एवमनर्थोऽथ तस्मात् । अगाधा गंभीरा धिषणा बुद्धिर्यस्य तम् । विशठः शाठ्यरहितः सन् ॥ १५ ॥

एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात् ।
बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥

सत्यधर्म – मघोन एवं चिन्तयतः सतो भगवानेतदाद्यनागतज्ञानादिमान्गृहात्स्वसद्मतोऽदृष्टां गतिं कैरप्यदृश्यत्वलक्षणां गतिमध्यात्ममायया योगसामर्थ्येन गतः । अध्यात्ममाययेति पदस्वारस्यात् । गृहाद्गृहेऽततीति गृहात् । अततेः क्विप् । गृहे स्थितोऽपीत्यर्थः इति वा । कामाच्च राजा पौत्रायणः, शोकाच्छूद्रेत्यादिवदयं शब्दः । तत्राप्यनेवार्थतायामनुमा कामचारीत्यनुव्याख्यानस्य तदाद्रवणादित्यत्र मानत्वेनोदाहृतवाक्ये द्रवणश्रवणादुन्मूलताविसंवादाद्यापत्तेः । गृहाद्बहिर्गमनेन दृश्यत्वस्य नाध्यात्ममायासापेक्ष्यतेति तस्या अवक्तव्यत्वाच्च । गृहात् ल्यब्लोपनिमित्ता चेयं पञ्चमी । गृहमधिष्ठाय चिन्तयत इति वाऽन्वयः ॥ १६ ॥

चट्टी – अध्यात्ममायया योगगसामर्थ्येन । अदृष्टां गतिमदृश्यलक्षणां स्थितिम् ।। १६ ।।

गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट् ।
ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ।। १७ ।।

सत्यधर्म – स्वराट् स्वेन राजत इति स्वराट् । अन्यथा स्वाराडिति स्यात्स्याच्च तथा पाठे छन्दोभङ्गः । अत एवामरे स्वाराण्नमुचिसूदन इति पाठः । परीक्षन् परीक्षमाणः संज्ञां तत्स्वरूपज्ञानं नाधिगतो न प्राप्तवान् शर्म सुखम् ।। १७ ।।

चट्टी – गुरोःसंज्ञां ज्ञानोपायं परीक्षमाणोऽपि नाधिगतोऽप्राप्तः सन् ।। १७ ।।

तत् श्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतम् ।
देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ।। १८ ।।

सत्यधर्म – उशनसो भार्गवस्येदमौशनसं मतम् । देवान्प्रति । आततायिनः । अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहा । क्षेत्रदारापहर्ता च षडेते ह्याततायिन इति स्मृतेराततायिन एत इति ज्ञेयम् ।। १८ ।।

चट्टी – आततायिन उद्यतास्त्राः ।। १८ ।।

तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः ।
ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकन्धराः ।। १९ ।।

सत्यधर्म – निर्भिन्नमङ्गोरुबाहु येषामिति विग्रहः । नतकन्धरा नता कन्धरा ग्रीवा येषामिति विग्रहः । ग्रीवायामपि कन्धरेति विश्वः ।। १९ ।।

चट्टी – निर्भिन्नान्यङ्गान्युत्तमाङ्गानि शिरांस्युरवो बाहवश्च येषां ते तथोक्ताः ।। १९ ।।

तांस्तथाऽभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः ।
कृपया परया देव उवाच परिसान्त्वयन् ।। २० ।।

सत्यधर्म – आत्मभूरज एको रूढ एको यौगिक आत्मभूरात्मनो भूः स्थानं यस्य स सत्यलोकस्थितः सन्नित्यर्थः । विश्वरूपसंवरणमात्रनिवारणीयाया आपदो वासुदेवनिवास-गमनाद्यपेक्षाया निमित्तत्वेनात्मभूरित्युक्तिः । भूःस्थानमात्र इति विश्वः । अजः क्षिपन्निति वा । अजे व्यादेशाभाव आर्षः । विस्तृतं चैतदाजा नष्टं यथेत्यृग्भाष्यटीकाटिप्पणादावनुसन्धेयम् ।। २० ।।

ब्रह्मोवाच

अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ।
ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत ॥ २१ ॥

सत्यधर्म – ब्रह्मिष्ठं तपोनिष्ठम् । ब्राह्मणं जात्या । ब्रह्माणतीति ब्राह्मण इति गीताभाष्योक्तेरपरोक्षज्ञानीति वा । निर्वचनत्वात्स्वरव्यत्यासः । यथोक्तं तत्त्वप्रकाशिकायाम् । स्वरव्यत्ययस्याधिक्यार्थत्वादण गताविति धातोरिति । दान्तं निगृहीतेन्द्रियम् । अशापप्रदानेनापयानाद्युष्मदनुभूतमिदमिति मर्मोक्तिरियम् । ऐश्वर्यान्नाभ्यनन्दतेति यन्महत्कृतं कर्म वोऽभद्रममङ्गलप्रदमित्यर्थः॥ २१ ॥

चट्टी – वो कृतं कर्म महदभद्रम् ॥ तदेवाह ॥ ब्रह्मिष्ठमिति । नाभ्यनन्दत नाभिनन्दितवन्तः ॥२१॥

तस्यायमनयस्यासीत् परेभ्यो वः पराभवः ।
प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत् सुराः ॥ २२ ॥

सत्यधर्म – परेभ्य इदानीमुच्चेभ्यः प्राक् प्रक्षीणत्वात् । सु अवैरिभ्यो वैररहितेभ्यः । परेभ्यो वैरिभ्य इति वा । अनयस्यान्यायस्य । नयो न्याय इति विश्वः । अयमनयस्यासदृशन्यायस्य सकाशात्समृद्धानां प्रागिति । आयमनयस्य नित्यकर्मत्वेन कृतनयस्य सकाशादिति वाऽऽवर्त्य समृद्धिप्रयोजकताऽनुसन्धेया । यमः शरीरसाधनापेक्षे नित्यकर्मणीति विश्वः । समृद्धानां वः पराभव आसीदित्यन्वयः ॥ २२ ॥

चट्टी – परेभ्यः शत्रुभ्यः समृद्धानामपि वः पराभव इति । यदयं तस्यानयस्य संबन्धिफलरूप आसीदित्यन्वयः । कीदृशेभ्यः । स्वयमेव देवा एव वैरिणो हन्तारो येषां तेभ्यः ॥ २२ ॥

मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात् ।
सम्प्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः ॥
आददीरन् निलयनं ममापि भृगुदेवताः ॥ २३ ॥

सत्यधर्म – प्रक्षीणांस्तत्र कारणं गुर्वतिक्रमत इति । शुक्रातिक्रमणात् । ममापि निलयनं, सत्यलोकम् । ईर्यमाणकार्य प्रोत्साहनार्थ मवेमाहेति भावः । एवमर्थ एवोत्तरत्र त्रिविष्टपं किं गणयन्तीति वक्ष्यमाणं कैमुत्यमत्यन्तश्लिष्टं भवतीति सुन्दरतरोऽयमर्थः ॥ २३ ॥

चट्टी – गुरुतिरस्कारसत्कारावेवापचयोपचयकारणमित्यसुरदृष्टान्तेनाह ॥ मघवन्निति । द्विषतः शत्रून् काव्यं शुक्रं गुरुमेवाराध्योपचितान् । उपचितत्वमेवाह ॥ आददीरन्निति । भृगुः शुक्रो देवता येषां ते । मम निलयनं सत्यलोकमप्याददीरन् गृह्णीयुः ॥ २३ ॥

त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः ।
न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम् ।। २४ ।।

सत्यधर्म – भृगूणां शुक्राचार्याणामनुशिक्षितार्था अनुशिक्षिता अर्था येषां ते तथा शिष्या इति । अभेद्यमन्त्रा अभेद्यो मन्त्र आथर्वणिको येषां ते तथा मन्त्रो गुप्तवादो वा । मन्त्रो वेदप्रभेदे स्याद्देवादीनां प्रसादने गुप्तवादे चेति विश्वः । अमोघमन्त्रा इति पाठोऽप्यमोघार्थः । अभेद्यं मन्त्रा इति क्वाचित्कः सरलः पाठस्तत्र त्रिविष्टपविशेषणम् । त्रिविष्टपमभेद्यं गणयन्तीति किमिति । मन्त्राः कर्तारो वा । अर्शआद्यचि तद्वन्तोऽसुरा वेत्यर्थो लेशक्लेशसाध्य इति बोध्यम् । सामान्यन्यायमुखेनोक्तमर्थं व्यक्तीकरोति ।। न विप्रेति । विप्रा ब्राह्मणाश्च गोविन्दो गरुडध्वजश्च । गावो धेनवश्चेश्वरा येषां तेषां नरेश्वराणां राज्ञामभद्राणि न भवन्ति । भवतां गुर्वगुरणादीदृशी दशेदानीं तेषां तु तद्भजनेन विजय इत्यन्वय व्यतिरेकौ सूचितौ भवतः । गोविन्द उभयाभयद इति मध्ये निवेशितः । आन्महतः समानाधिकरणजातीययोः समुद्राभ्रादिति निर्देशादनित्य इत्युक्तेर्वा बहुष्वनियम इत्युक्तेर्वा गोनिर्देशोऽन्ते युक्त इति ज्ञेयम् । गा वेदादिशब्दान् गा धेनूर्वा विन्दतीति गोविन्दः । गवादिषु विदेः संज्ञायामिति शः । विप्रेति प्रस्तुतेः प्रथमतः प्रोक्तम् ।। २४ ।।

चट्टी – मन्त्रा इति मत्वर्थीयाच्प्रत्ययान्तः शब्दः । मन्त्रा भृगूपदेशमन्त्रवंतो भृगूणामनुशिक्षितार्थाः शिष्याः । अन्येषामभेद्यमपि स्वर्गं गणयन्ति किं न गणयन्त्येवेत्यर्थः । यतो विप्रा गोविन्दो गावश्चेश्वरा अनुग्राहका येषां तेषामेवाभद्राणि न भवन्ति । अन्येषां तु भवन्ति ।। २४ ।।

तद् विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम् ।
सभाजिता(तोऽ)र्थान् स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ।।२५।।

सत्यधर्म – इयतायासेनायातानामनयस्येत्यादिना कृतः सत्कारः । पुरतोऽपि गतिः केत्यत आह ।। तदिति । अर्थान्न बृहस्पतिप्रसादनसमयोऽयमिति सूचयति । त्वाष्ट्रं त्वष्टृपुत्रम् । न सन्निवेशनामके द्वितीये त्वष्टृसुते त्वाष्ट्रे मम मनःसन्निवेश इत्यादिशति । विश्वरूपमिति । स च वरणकारणगुण इति भणति ।। तपस्विनमात्मवन्तं मनस्विनमिति । आशु विलम्बमनवलम्बमानाः । आलस्यादमृतं विषमित्यादेः । स विश्वरूपो यदि यर्ह्यस्य कर्मासुरपक्षपाताद्यान्तरङ्गिकं क्षमिष्यध्वं क्षमिष्यध्वे उतानन्तरं वः सभाजितार्थान् जनसंमानितानर्थान्विधास्यत इत्यन्वयः । बहुवचनसभाजितपदाभ्यां सर्वेऽप्यर्था अनेन सिध्यन्ति ते च सज्जनसम्मता इति स्फोरयति उताप्यर्थे वा ।। २५ ।।

चट्टी – तत्तस्मादनन्तरमेव विश्वरूपं भजतां कीदृशमात्मवन्तं वशीकृतमनसं त्वाष्ट्रं त्वष्टुः पुत्रम् । अस्य विश्वरूपस्य यदसुरपक्षपातिरूपं कर्म तत्क्षमध्वम् । यदि क्षमिष्यथ तर्हि स विश्वरूपः सभाजितः प्रीत्या सेवितः सन् । सभाजनप्रीतिसेवनयोरिति धातोः । अर्थानभीष्टानि विधास्यते । करिष्यतीत्यन्वयः ॥ २५ ॥

श्रीशुक उवाच

त एवमुदिता राजन् ब्रह्मणा विगतज्वराः ।
ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥

सत्यधर्म – परिष्वज्याधुनाऽऽचार्यत्वेन वरणाभावात्परिष्वङ्गः सङ्गतः ॥ २६ ॥

चट्टी – ते देवा उदिता उक्ता विगतज्वरा गतसंतापाः ॥ २६ ॥

देवा ऊचुः

वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ।
कामः सम्पाद्यतां तात पितॄणां समयोचितः ॥ २७ ॥

सत्यधर्म – त तव आश्रमं प्राप्ता इत्यतिथयस्ते भद्रमस्तु । पितॄणामित्याद्यपि दत्तोत्तरम् । समयोचितः कामः काम्यत इति काम इच्छाविषयोऽर्थः सम्पाद्यतां त्वया ॥ २७ ॥

चट्टी – पितॄणामस्माकं विश्वरूपपितुस्त्वष्टुर्देवत्वात् । समयोचितः एतत्कालयोग्यः ॥ २७ ॥

पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ।
अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणाम् ॥ २८ ॥

सत्यधर्म – कंसादिवन्नेति सतामिति पुत्रविशेषणम् । पुत्रवतां संसारिणामपि पितृशुश्रूषणं मतं तव तु न तथेत्यन्यापदेशेनोपदिशन्ति ॥ किमुत ब्रह्मचारिणामिति ॥ २८ ॥

चट्टी – सतां पुत्राणां पितृशुश्रूषणं परो धर्मः पुत्रोत्पादनेन पितृऋणनिवृत्तावपि पितृशुश्रूषणं न हातव्यमित्याह ॥ पुत्रवतामिति । पुत्रविशेषणमेतत् । ब्रह्मचारिणां पितृशुश्रूषणं परमो धर्म इति किमु वक्तव्यम् । पुत्रोत्पादनाभावेन ऋणविमोचनस्यैवाभावादिति भावः ॥ २८ ॥

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात् क्षितेस्तनुः ॥ २९ ॥

सत्यधर्म – स्वातिरस्कारे तन्मनीषां परिष्कारयति ।। आचार्य इति । चरेराङि चागुराविति क्यपो निषेधादृहलोरिति ण्यत् । ब्रह्मणश्चतुर्मुखस्य । गुरुर्ब्रह्माऽखिलस्य हीत्यादेः । मूर्तिर्मुख्याधिष्ठानम् । एवं सर्वत्रापि । प्रजापते रुद्रस्य । प्रजापतिः शिवः स्थाणुरुमेशो वृषवाहन इत्यभिधानम् । मरुत्पतेर्वायोरिन्द्रस्य वा । क्षितेः क्षमायाः । साक्षादिति मातेत्यनेनान्वेति । तेन पोषयित्र्यादिव्युदासः । सर्वसहा क्षितिरियमपि पादाघातादिसर्वदुर्वृत्तसहा नाल्प इति साक्षात् । तत्तुल्यतनूरिति वा । साक्षात्प्रत्यक्षतुल्ययोरिति विश्वः ।। २९ ।।

चट्टी – अतिथीनां पितॄणां च प्रशंसनार्थमाह ।। आचार्य इति । आचार्य उपनीय वेदाध्यापकः ।। तदुक्तम् ।। शिष्यमध्यापयति यः कृत्वोपनयनादिकम् । सहकल्परहस्याभ्यामाचार्यः स निगद्यत इति ।। ब्रह्मणश्चतुर्मुखस्य मूर्तिरधिष्ठानम् । प्रजापतेः रुद्रस्य । प्रजापतिः शिवः स्थाणुरुमेशो वृषवाहन इत्यभिधानात् । मरुत्पतेरिन्द्रस्य ।। २९ ।।

दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ।। ३० ।।

सत्यधर्म – प्रस्तुतं स्तुवन्ति । धर्मस्य यमस्यात्माऽतिथिः स्वयमिति । अभ्यागतो बान्धवजन आत्मनः परमात्मनः । एको देवः सर्वभूतेषु गूढः सर्वव्यापी । त्रीन् लोकान्व्याप्य भूतात्मेत्यादि-श्रुतिस्मृतयोऽत्र भवन्ति ।। ३० ।।

चट्टी – दयाया दयाभिमानिदेवतायाः । धर्मस्य धर्मराजस्याज्ञातकुलगोत्रस्तत्क्षणमेव समागतोऽतिथिः स्वयं साक्षान्मूर्तिर्मुख्याधिष्ठानं ज्ञातकुलगोत्रो ग्रामान्तरादागतोऽभ्यागतः । आत्मनः परमात्मनः सर्वभूतानि मूर्तिरधिष्ठानम् । एकोदेवः सर्वभूतेषु गूढ इति श्रुतेः । आचार्यादीनां पूजनेन तत्सन्निहिता ब्रह्मादयो देवाः प्रीणन्तीति भावः ।। ३० ।।

तस्मात् पितॄणामार्तानामार्तिं परपराभवाम् ।
तपसाऽपनयन् तात सन्देशं कर्तुमर्हसि ।। ३१ ।।

सत्यधर्म – परपराभवां तज्जन्यामपनयन् ।। ३१ ।।

चट्टी – परेभ्यः पराभव एवेति ।। ३१ ।।

वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ।
यथाञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ।। ३२ ।।

सत्यधर्म – त्वा त्वाम् ॥ ३२ ॥

चट्टी – तां सन्देशमेवाहुः ॥ वृणीमह इति । त्वा त्वाम् ॥ ३२ ॥

नो(न) गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् ।
छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥

सत्यधर्म – महिष्ठैर्भवद्भिर्यविष्ठस्य मम नमनमनुचितमित्यतो न वयं तत्र कारणमितीरयन्ति ॥ नेति । अर्थेषु भविष्यत्सु छन्दोभ्यस्तज्ज्ञानेनान्यत्र विना ज्यैष्ठ्यस्य कारणं वयो नेत्यर्थः । यद्वा छन्दोभ्यो लक्षणया वेदाधिकारित्रैवर्णिकेभ्योऽन्यत्र शूद्रादौ ज्यैष्ठ्यस्य कारणं नो न गर्हयन्तीति वा नः सम्मतमिति वाऽर्थः । सर्वा देवता वेदविदि ब्राह्मणे वसन्तीत्यादेः । गुणादिमतः कनीयसोऽपि महीयसां प्रणतिर्युक्ता । दृष्टा च सा शन्तन्वादौ गुणज्येष्ठश्च शन्तनुरिति श्रीमदुक्तेः ॥ ३३, ३४ ॥

चट्टी – ननूपाध्यायत्वे कनिष्ठस्य ममाभिवन्दनं करिष्यथ । तच्च गर्हितमिति चेतत्राहुः ॥ नेति । अर्थेषु प्रयोजनं निमित्तम् । यविष्ठांघ्र्यभिवादनं न निन्दन्ति । किं च छन्दोभ्योऽन्यत्र मन्त्रेभ्योऽन्यत्र वयो ज्येष्ठस्य कारणं न भवति । किन्तु वेदा एव मुख्यं कारणं तत्साम्ये तु वयः । अतो वेदज्ञत्वात्त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३ ॥

ऋषिरुवाच
अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ।
स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥

चट्टी – पौरोहित्यार्थम् । श्लक्ष्णया मधुरया ॥ ३४ ॥

विश्वरूप उवाच
विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्ययम् ।
कथं नु मद्विधो नाथा लोकेशैरभियाचितः ॥
प्रत्याख्यास्यति यः शिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥

सत्यधर्म – विगर्हितं कुत इत्यतो वक्ति । ब्रह्मवर्चउपव्ययमिति । समासान्तविधेरनित्यत्वान्नाच् । ब्रह्मवर्चस उपव्ययो नाशो यस्मात्तद्दुष्प्रतिग्रहस्यावर्जनीयत्वात्तेन च वर्चो विनश्यतीति भावः । ब्रह्म च तपश्च दीप्तिश्च तयोरुपव्ययो यस्मादिति वा । यद्वा वर्चसो रूपस्योपव्ययो वर्चउपव्ययो ब्रह्मणो वर्च उपव्ययो यस्मात्तत् गतम् । वर्चो दीप्तौ वर्चो रूपेऽपि च क्वचिदिति विश्वः । हे नाथा इदानीं मां विना

नेतरो रक्षक इत्यनाथा इति वा । यः शिष्यः शासनानुकूलानुबन्धः स मद्विधः कथं नेति प्रत्याख्यास्यति । तव किं प्रत्याख्यानं कुर्वित्यत आह ॥ स एव स्वार्थे मदर्थ इत्युच्यत इति ॥ ३५ ॥

चट्टी – निन्दितमपीदं युष्मद्याच्ञाभंगभयेन करिष्यामीत्याह ॥ विगर्हितमिति सार्धश्लोकेन । विगर्हितं पौरोहित्यम् । धर्मशीलैरधर्महेतुत्वात्किञ्च ब्रह्मवर्चउपव्ययं ब्रह्मवर्चसव्ययकरम् । प्रत्याख्यातुं च मादृशो नार्हतीत्याह ॥ कथं न्विति हे नाथाः । तच्छिष्यस्तेषां लोकेशानां शिष्यः शिक्षणार्हः । परकार्यत्वेन निराकार्यमिति तत्राह ॥ स एवेति । स एव प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

अकिञ्चनानां हि धनं शिलोञ्छनं स तेन निर्वर्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं तु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥

सत्यधर्म – एवमुपचारः कुतः कुतस्तव जीविकेत्यत एतावत्पर्यन्तमित्थं जीवितमित्याह ॥ अकिञ्चनानामिति । हि यतोऽकिञ्चनानां न विद्यते किञ्चनेश्वरव्यतिरिक्तं येषां ते तथा । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमित्यनुसन्धानवतां शिलोञ्छनं च शिलोञ्छनं सर्वो द्वन्द्व इति समाहारेण वोत्तरपदलोपसमासेन वैकवचनमुपपद्यते । उञ्छः कणश आदानं कणिशाद्यार्जनं शिलमित्यादेस्तदर्थो ज्ञेयः । सोऽहं तेन शिलोञ्छनेन निर्वर्तितसत्क्रियो निर्वर्तिता निष्पादिताः साधूनामकिञ्चनानां सत्यः क्रिया येन सः साधु सम्यगिति वा । येन पौरोहित्येन । दुर्मतिरशोभनबुद्धिः संसारानिर्वाहदुःखितमतिरिति वा दुरशोभनदुःखयोरित्यभिधानाद्दुर्दुःखमिति तात्पर्यात् । हृष्यति तत्पौरोधसम् । हायनान्तयुवादिभ्योऽणित्यण् । पौरोहित्यं हे अधीश्वराः कथं करोमीति सम्बन्धः ॥ ३६ ॥

चट्टी – ननु पौरोहित्येन धनलाभो धर्मः सिध्येत् । अन्यथा निर्धनस्य कुतो धर्मः । अत एव तेन लोको हृष्यतीति चेत्तत्राह ॥ अकिञ्चनानामिति । अकिञ्चनानां शिलोञ्छनं हि धनम् । क्षेत्रस्वाम्युपेक्षितकणिशोपादानं शिलाहस्तादापतितव्रीह्याद्युपादानम् उंछनं तेनैव निर्वर्तिता निष्पादिताः । साधूनां सत्क्रिया येन स तथोक्तः ॥ ३६ ॥

तथाऽपि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ।
भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥

सत्यधर्म – इयताऽऽयासेन यातानामाशाविनाश एव प्रायो भवेदिति तन्मानसीं शङ्कां परिहरन्प्रोत्साहयति विप्रः ॥ तथापीति । कियदित्यनेन स्वसामर्थ्यस्य सर्वस्य विना विनियोगं शक्यतां सूचयति । प्रार्थितमर्थितम् । भावे क्तः । प्रगतमर्थितं यत्र तदसङ्कल्पितं च साधये, साधये

आधिसहिताय महेन्द्राय चेत्यर्थः । अतो न प्रार्थितमिति पुनरुक्तिः । वक्ष्यमाणप्रकारेण मरणकारणमिति सूचयितुं प्राणैरिति तत्पुरस्करणम् । अर्थैर्भवदौपयिकार्थैः ॥ ३७, ३८ ॥

चट्टी – कियदेतत्प्रार्थनम् । अल्पमेवात्यधिकमपि करिष्यामीत्याह ॥ भवतामिति ॥ ३७ ॥

श्रीशुक उवाच
तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ।
पौरोहित्यं ततश्चक्रे परमेण समाधिना ॥ ३८ ॥

चट्टी – परमेण समाधिना । परमोद्यमेन ॥ ३८ ॥

सुरद्विषां श्रियं गुप्तामौशनस्याऽपि विद्यया ।
आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥

सत्यधर्म – औशनस्या शुक्रसम्बन्धिन्या गुप्तां रक्षितामाच्छिद्य बलाद्गृहीत्वा । तद्बलं लपति ॥ वैष्णव्येति । विद्ययेत्यानुपूर्व्याऽन्वयसम्भवे पुनर्विद्ययेति वचनेन यया स्वयं विज्ञानी विभुस्तया वैष्णव्या विद्ययेत्यप्यन्वयमसूचयदिति ज्ञेयम् ॥ ३९ ॥

चट्टी – औशनस्या शुक्रसंबन्धिन्या विद्यया गुप्तामप्याच्छिद्याहृत्य वैष्णव्या विष्णुदेवताकया नारायणकवचाख्यया विद्यया मायया ॥ ३९ ॥

यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ।
तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥ ४० ॥

सत्यधर्म – चमूः सेनाः ॥ ४० ॥

चट्टी – असुरचमूर्दैत्यसेनाः ॥ ४० ॥

यां प्रविश्यासुराञ्छश्वत् कक्ष्यां नारायणात्मिकाम् ।
अजैषीद् वृषभस्तात सिंहः क्षुद्रमृगानिव ॥ ४१ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे सप्तमोऽध्यायः ।

सत्यधर्म – कक्ष्यां श्रेष्ठ इन्द्रो वृषभः श्रेष्ठमात्रेऽपीति विश्वः ॥ ४१ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे सप्तमोऽध्यायः ॥ ६-७ ॥

चट्टी – कक्ष्यां कवचलक्षणां रक्षाम् ॥ ४१ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ६-७ ॥

।। अथाष्टमोऽध्यायः ।।

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रैलोक्यां बुभुजे श्रियम् ।। १ ।।

सत्यधर्म – हरिः ॐ । श्रुतैतन्मन्त्रतन्त्रस्वपितामहांशिमाहात्म्य एतेन वर्णितेन वर्मणा क्रियमाणकर्मणो बहिष्ठाहितहत्यादेरभावेऽपि स्वस्य मुमूर्षोरुद्दिधीर्षोरुपदेशापदेशेन निदेशवर्तिन इतरानयमनुयोगो युक्त इति युक्तिमान्परीक्षिच्छुकं पृच्छतीत्याह ।। राजेति ।। सहस्राक्षः सहस्रमक्षीणि यस्यासाविन्द्रः । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् । यया विद्यया गुप्तो रक्षितः सवाहान्वाहनसहितान्रिपुसैनिकान्रिपवो वैरिणश्च सैनिकाः सेनायां समवेताश्च तानर्थाद्रिपुसम्बन्धिता तेषामनुसन्धेया । अथवैकमत्येन रिपवश्च ते सैनिकाश्चेति तान् । सेनायां समवेता ये सैन्यास्ते सैनिकाश्च त इत्यमरः । क्रीडन्निवेति लीलेव किञ्चिदायाससम्पाद्या ततोऽपि सुलभताऽसूचि । क्रीडन्निवेति वा । इवौपम्ये धारण इति विश्वः । मृधे युद्धेऽसुरान्विनिर्जित्य त्रिलोक्यां त्रयाणां लोकानां समाहारस्त्रिलोकी तत्सम्बन्धिनी त्रैलोक्या ताम् । तद्धिता इति बहुवचनज्ञाप्यो ण्यप्रत्ययः । श्रियं सम्पदं बुभुजे । असुरासुहरणे स्फुटं निमित्तं प्रकटयन्वावदीति ।। सवाहानिति । सवाहान् । यज्ञः सवोऽध्वरो याग इत्यमरात्सवान् स्वोद्देशेन कृतानाहरति यज्ञान्हापयन्ति तेभ्य इति । हरतेर्जहातेर्वाङ्पूर्वाड्डुः । हरतेर्जहातेर्वा डः । द्वावप्याङ्पूर्वाविति स्वाहाशब्दव्याकृत्यवसरे सुधाभिधानात् । स्वाहा यज्ञमिति ऋग्भाष्यटीकयोः स्वाहा स्वभाग-गतिमान्स्मृतेः स्वभागगतिमानित्यनेनेत्याद्युक्तेश्च । परेषामिव स्वेषां भवतामनाहवानां वाहां विनाऽप-कारं मारणेऽमराणामकौशलमिति संशय एवमाशयवर्णनेनोत्तीर्ण इति प्रेक्षावत्समीक्षणीयम् ।। १ ।।

चट्टी – ।। हरिः ॐ ।। मुमुक्षूणां कामिनां च समस्तपुरुषार्थदम् । नारायणाख्य-कवचमध्यायेऽस्मिन्निरूप्यते । सैनिकान् सेनानायकान् । त्रैलोक्यां त्रिलोकसंबन्धिनीम् ।। १ ।।

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ।। २ ।।

सत्यधर्म – नारायणात्मकं नारायण आत्मा देवता यस्य तत् । तथौ प्राणात्मकाविति भाष्यतत्त्वप्रकाशिकायां प्राणात्मकौ प्राणदैवत्वाविति व्याख्यानात् । उपचारत आत्मा स्वरूपं यस्येति वा । वर्म ममाख्याहि । न केवलं वर्म किन्तु कर्माप्याख्याहीत्याह । यथा येन प्रकारेण येन वर्मणा गुप्त आततायिनः शत्रून्मृधे युद्धेऽजयत्तं प्रकारमप्याख्याहि । अथवा येन ज्ञानिना प्राचीनेन गुरुणा गुप्तो मृधे

आततायिनः शत्रूनजयत्तया विनिर्जित्य श्रियं बुभुज इत्यन्वयः । आत तायिन इति छेदः । जयन्सन् तायिनो व्याप्तान्सर्वशत्रून् आत आगच्छदिति वा । अततेर्लिट् । एतेन शत्रुपदेन वाऽऽततायिपदेन वाऽलमिति शङ्कितुरुत्कण्ठा कुण्ठितेति ज्ञेयम् । यथोक्तं सुधातट्टिप्पणीषु । प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिनो विस्तारिणः । ताय् सन्तानपालनयोः । तायिनः सन्तन्यमानस्येति । किमार्द्रकवणिजो वहित्रचिन्तयेति न मम संसारिणो मन एतद्विषय इति मेत्याह । हि तन्ममाख्येति । यतस्तव तन्ममाख्या तस्मिन्प्रवचने मम ममता यस्य स तन्ममः । स इत्याख्या ख्यातिरस्ति तस्मादाख्याहीत्यावृत्त्याऽन्वयो वा ॥ २ ॥

चट्टी – वर्मशब्दापेक्षया तदिति नपुंसकलिङ्गप्रयोगः । वर्मस्वरूपं दृष्ट्वा जयप्रकारं पृच्छति ॥ यथेति । आततायिन उद्यतशस्त्रान्येन वर्मणा गुप्तो रक्षितः । यथा येन प्रकारेणाजयत् । तं प्रकारं चाख्याहि ॥ २,३ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

सत्यधर्म – पुरोहितो वृतस्तत्त्वेन वृतः । अनुपृच्छते ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४ ॥

सत्यधर्म – तज्जपानामङ्गं सपरिकरं धौतेत्यारभ्याष्टभिः श्लोकैः स्पष्टयति ॥ धौताङ्घ्रिपाणिरिति । धौतं प्रक्षालितमङ्घ्रिपाणि यस्य स तथा । सपवित्रः पवित्रं बिभ्रदुदङ्मुख उत्तरदिगभिमुखः । कृतस्वाङ्गकरन्यासः कृतः स्वाङ्गे करयोर्न्यासो येन स तथाऽङ्गुल्यङ्गुष्ठपर्वस्विति वक्ष्यमाणप्रकारेण । मन्त्राभ्यामष्टाक्षरद्वादशाक्षररूपाभ्याम् । वाग्यतो वाक् यता नियमिता येन सोऽसम्भाष्यासम्भाषणमेव वाचोयमनं नामेति ज्ञेयम् ॥ ४ ॥

चट्टी – धौतेत्यारभ्य विष्णवे नम इत्यन्तेन ग्रन्थेनैतद्वर्मधारणे इत्थंभावमाह धौतेति ॥ मन्त्राभ्याम् । नारायणाष्टाक्षरवासुदेवद्वादशाक्षराभ्याम् । कृतः स्वांगेषु करयोश्च न्यासो येन स तथा । वाग्यतो मौनी ॥ ४ ॥

नारायणमयं वर्म सन्नह्येद् भय आगते ।
दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ॥ ५ ॥

सत्यधर्म – नारायणमयं नारायणसान्निध्यप्राचुर्यप्रापकम् । नारायणो मयः प्रधानो देवता यस्य तद्वा । मनोमयो ज्ञानमयः प्रधानमय उच्यत इति बृहद्भाष्योक्तेः । दैवभूतात्मकर्मभ्यो दैवं भयं मारिकादिजं भूतभयं धात्वादिविकारजं प्रस्तुतं वाऽऽत्मकर्मजं प्राचीनकर्मायत्तमपस्मारादिभयम् । आ अगत इति च्छेदः । आ निश्चयेन अगते एष्यति । वर्तमानेऽगत इत्यनुव्याख्याव्याख्यावसरे सुधायामगतेऽनागते तट्टिप्पणेन च तत्र भविष्यतीत्येतस्य कथं लाभ इत्यत आह । अगतेऽनागत इतीत्युक्तेः । वर्तमानसामीप्याद्वर्तमानवद्व्यपदेश इत्युक्तेर्वाऽऽगत इत्युक्तिः । सन्नह्येद्बध्नीयान्नारायणमयः ॥ ५ ॥

चट्टी – देवभूतात्मकर्मभ्यः । दैवेभ्योऽनावृष्ट्यादिलक्षणेभ्यो भये आगते सति । पुमान्नारायणमयं नारायणपरं वर्म संनह्येत् बध्नीयादित्यन्वयः । कीदृशः सन् । नारायणमयो भगवान्सर्वोत्तम इति ज्ञानवान् ॥ तदुक्तम् ॥ मयं प्रधानमुद्दिष्टं प्राधान्यं यैर्हरेर्मतम् । भगवन्मयास्ते विज्ञेयास्ते मुच्यन्ते न चापर इति ॥ ५ ॥

पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ।
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ॥ ६ ॥

सत्यधर्म – आनुपूर्व्यान्मन्त्रशास्त्रोक्तक्रममनुसृत्य । आनुपूर्व्या ॐकारादीनीति पाठोऽपि सुगमः ॥ ६ ॥

चट्टी – तत्राष्टाक्षरस्वरूपं दर्शयन्पादाद्यङ्गेषु तदक्षरन्यासमाह ॥ पादयोरिति सार्धश्लोकेन । प्रणवसंपुटितमोङ्काराद्येकैकमक्षरं पादाद्यष्टाङ्गेष्वानुपूर्व्यात् । यथा यथाक्रमं विन्यसेत् । संहारन्यासं कुर्यादित्यर्थः । विपर्ययं यथा भवत्येवं वा । शिरआदि पादान्तं वा विन्यसेत् । उत्पत्तिन्यासं वा कुर्यादित्यर्थः । अथाऽपीत्यनेन स्थितिन्यासमपि समुच्चिनोति । वाशब्दो न विकल्पार्थः । किन्तु समुच्चयार्थः । सर्वाश्रमिणामपि न्यासत्रयस्य कर्तव्यत्वात् ॥ तदुक्तं तन्त्रसारे ॥ सृष्टिस्थितिलयन्यासाः पतिलोम्यानुलोमतः । स्थित्यन्ता एव वर्णानां श्रेष्ठा एव चतुर्दश । संहृत्यन्ता मोक्षिणां च एकविंशतिरेव वेति ॥ ६ ॥

ओं नमो नारायणायेति विपर्ययमथापि वा ।
करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ॥ ७ ॥

प्रणवादियकारान्तमङ्गुल्यंगुष्ठपर्वसु ।
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि ॥ ८ ॥

सत्यधर्म – विपर्ययं शिरआद्यात्मकमिति विपर्ययं सृष्टिलयन्यासविशेषेणेत्यर्थः । प्राचि सङ्क्षिप्योक्तं विविच्य वक्ति ॥ करन्यासमिति । अङ्गुल्यङ्गुष्ठपर्वस्वङ्गुल्यश्चाङ्गुष्ठयोः पर्वाणि च तेषु । प्रणवसम्पुटीकरणेनैकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीष्वष्टाक्षराणि न्यस्योर्वरितवर्णानां चतुर्णामङ्गुष्ठयोः पर्वसु न्यासः कार्यः । ॐ ॐ ॐ वं ॐ ॐ ॐ इति न्यासविन्यासः । द्वादशाक्षरविद्यया वासुदेवद्वादशाक्षरमन्त्रेण । द्वादशाक्षर इत्यत्र विशेषणसमासः । अक्षरैः सहिता विद्याऽक्षरविद्या द्वादशभिरक्षरविद्या द्वादशाक्षरविद्ययेति वा । कावषेया वदन्ति हि नमस्कारसमायुक्तं जुहुमः प्राणमत्र हि । किमन्यैर्बहुभिः कार्यैरेतस्यैवाधिकत्वतः । एतदर्थानुसन्धानपूर्वं वेदानथाऽपि वा । अधीमहे यजामो वा नान्यथा तु कथञ्चन । एष एव हि सर्वेषां वेदानामर्थ ईरितः । विष्णुनामोदितो विष्णुर्योऽर्थस्तद्व्याख्यान्यद्यतोऽखिलमित्याद्यैतरेयभाष्योदाहृतप्रमाणप्रमितमाहात्म्यं किञ्चिन्नारायणवर्मेति शर्मसिद्धिवर्णाधिक्योपाधिभ्यां मन्त्रद्वयं निरूप्य विष्णुमन्त्रमिदानीमाह ॥ न्यसेदिति । अनु ॐकारं संयोज्य तदनु विकारं मूर्धनि न्यसेत् ॥ ७, ८ ॥

चट्टी – अङ्गन्यासमुक्त्वा करन्यासमाह ॥ करन्यासमिति । विद्यया मन्त्रेण द्वादशाक्षरमुच्चरन् । करन्यासमेवाह ॥ प्रणवादीति । अङ्गुल्यो दश । अङ्गुष्ठयोः पर्वाणि द्वे । एवं द्वादशस्थानानि । तत्र प्रणवसंपुटितमेकैकमक्षरं दक्षिणांगुष्टमारभ्य वामांगुष्टपर्यन्तमङ्गुलिषु । अवशिष्टं वर्णद्वयमङ्गुष्टपर्वणोश्च क्रमेण न्यसेदित्यर्थः । केचित्तु एकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलिषु परिशिष्टमक्षरचतुष्टयम् अङ्गुष्टयोराद्यन्तपर्वसु संन्यसेदित्याहुः ॥ मन्त्रान्तरन्यासमाह ॥ न्यसेदिति । षकारणकारयोर्विश्लेषेण प्रणवादिषडक्षराणि हृदयादिषु न्यसेत् । अनु ओंकारमनुगतमिति वेकारमित्यादिद्वितीयान्तैः प्रत्येकमन्वयः ॥ ७, ८ ॥

षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ।
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ॥ ९ ॥

सत्यधर्म – शिखया शिखायां प्रक्रमादिक्रमादस्त्रमुद्दिश्यास्त्रं परं चतुर्थ्यन्तं कृत्वा सोद्देशो भगवानपीति तन्त्रसारोक्तेः । राक्षसक्षोभणार्थं दिग्बन्धनं साधनमुद्दिश्येति वा ॐ अस्त्राय फडिति दिग्बन्धनं कुर्यादिति ॥ ९ ॥

चट्टी – शिखया शिखायाम् ॥ ९ ॥

मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ।
सविसर्गं फडन्तं तु सर्वदिक्षु विनिर्दिशेत् ॥ १० ॥

सत्यधर्म – मन्त्रमूर्तिः सदभिमानिदेवतासन्निहितिमद्देहः । सविसर्गं विसर्जनीयसहितम् । मः इत्यात्मकं फडित्यन्ते यस्य तत् । अस्त्रायेत्यन्वेति । सर्वासु दशसु ॥ १० ॥

चट्टी – मकारमस्त्रमुद्दिश्यास्त्रत्वेन ध्यात्वा मन्त्रमूर्तिः मन्त्रदेवतासंनिहितशरीरो भवेदिति न्यासफलकथनम् । बुध इत्यनेन मन्त्रवर्णदेवताऽनुस्मरणं सूचयति । मकारमस्त्रमुद्दिश्येत्युक्तं विवृणोति ॥ सविसर्गेति । विसर्गेण सहितं सविसर्गम् । फट्कारः अन्ते यस्य तत् फडन्तं तन्मकारास्त्रं सर्वदिक्षु विनिर्दिशेत् मः अस्त्राय फडित्येवं दिग्बन्धे विनिर्दिशेदित्यर्थः ॥ १० ॥

'ओं विष्णवे नमः'
इत्यात्मानं परं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिरिमं मन्त्रमुदाहरेत् ॥ ११ ॥

सत्यधर्म – षकारन्तु भ्रुवोर्मध्ये णकारं शिखया दिशेदित्यंशेन पदात्मकं विष्णुमन्त्रं प्रदर्श्य संहितात्मकं तमाह ॥ विष्णवे नम इति । यथोक्तम् । यद्धि सन्धिं विवर्तयीतेत्याद्यैतरेयोपनिषद्भाष्ये षणयोः सन्धिकरणात्संहिताध्ययनं भवेत् । विषणुं त्विति यो ब्रूयात्पदाध्यायी भवेत्सः । सन्ध्युक्तिश्च विभागश्च द्वयं व्याप्तं क्रमेण तु । तस्माद्द्विधाऽपि वचनात्क्रमाध्यायी भवेत्सः । भोगवृद्धिं च यो मोक्षे इच्छेद्वैष्णव इत्यसौ । मोक्षकामो विषणवे द्वयकामो द्वयं पठेत् । विष्णुनामात्मकत्वाच्चाथ संहितपदक्रमाः । सर्ववेदस्थिता मोक्षतद्योगद्वयसाधकाः । ज्ञानमेव सर्वेषामित्याद्याग्रन्थसमाप्ति । णकारं च षकारं चेत्यनुव्याख्यासुधायां च णकारो बलं षकारःप्राण आत्मेति विष्णुनामगतौ णकारषकारौ परमेश्वरबलचेष्टाप्रतिपादकौ वदन्वेदोऽनन्तरं स यो हेतौ णकारषकारावनुसंहिता ऋचो वेदेत्यृचामनु-संहितसर्वसंहितासु णकारषकारौ यो वेद णकारवत्तत्संहिताभिः प्रतिपाद्यो योऽर्थः स एव सर्वत्र पूर्वोत्तरवर्णतत्संहिताभिः प्रतिपाद्यत इत्याद्युक्तेरयं मन्त्र आचार्योद्धृततान्त्रसारिकमन्त्रत इतर एतन्मन्त्रस्यैवोङ्कारेण सह सप्ताक्षरता तस्य तु षडक्षरतेति विवेकः । विष्णुशब्दश्चतुर्थ्यन्तो हृदयेतः षडक्षरः । तारवत्सर्वमस्यापि श्यामो ध्येयो हरिः स्वयम् । वर्णा एव षडङ्गानि षणयोर्भेदयोगत इति टीकायाम् । अत्र षडक्षर इत्युक्त्या भगवता उक्तो विष्णुमन्त्र ॐकारसाहित्येन सप्ताक्षरः । न्यसेद्धृदय ॐकारमित्यादिना ॐकारादिसप्तवर्णानां न्यासोक्तेः । अष्टमहामन्त्रगणे पठितोऽयं विष्णुमन्त्र ॐकाररहितस्तद्भिन्नः षडक्षर इत्युक्तं भवति । यथा विश्वामित्रब्रह्मगायत्रीमन्त्रयोर्व्याहृतिसाहि-त्यासाहित्याभ्यां भिन्नयोर्मध्येऽष्टमहामन्त्रमध्ये व्याहृतिरहितस्यैव ग्रहणं तथोङ्कारसाहित्यासाहित्याभ्यां

भिन्नयोर्विष्णुमन्त्रयोर्मध्येऽष्टमहामन्त्रमध्ये ॐकाररहितस्यैव ग्रहणमिति भाव इति व्याख्यातत्वात् । इत्युच्चार्य ध्येयमात्मानं परमात्मानं ध्यायेत् । तत्र तन्त्रमाह ॥ षट्शक्तिभिरिति । षट्शक्तिरैश्वर्याद्या उत्साहप्रभुमन्त्रशासनक्रियेच्छाशक्तयो वामकररूपास्त्रेतरषड्वर्णवर्ण्यजाग्रदाद्यवस्थाव्यवस्थापकशक्तयो वा ताभिर्युतम् । आत्मनामित्येतद्यथास्थानं शुद्धविशेष्यपरं सन्न स्वरसम् । तद्यथा दीप्तानलार्कद्युतिमप्रमेयमिति प्रमेयदीपिकायां प्रमेयत्वस्य द्युतावन्वयकरणं तथाऽऽत्मपदं षट्शक्तिपदेनान्वेति । ततश्चात्मषट्शक्तिभिर्युतमिति योग्यतयाऽर्थो भवति । तेन च षण्णां शक्तीनामभिन्नतोक्ता भवतीति तृतीयाप्राप्तभेदो बाधित इति बोध्यत इति बोध्यम् । विद्या ज्ञानं वोक्तेतरतत्साधनं वा । यथोक्तं सुधायाम् । यथार्थज्ञानतत्साधनयोर्विद्याशब्दस्य योगरूढिभ्यां प्रवृत्तत्वादिति । भावकरणयोः क्यपि क्रमादर्थद्वयं बोध्यम् । तेजः प्रभावः प्रभा वा । तपोऽत्र शत्रुसन्तापनशक्तिः । तद्देवतासौमुख्यसम्पादनकालशक्तिर्वा । तन्मूर्तिर्विशेषसन्निधानपात्रगात्र इमं वक्ष्यमाणं मन्त्रमुदाहरेत् ॥ ११ ॥

चट्टी – मन्त्रोद्धारणपूर्वकं मन्त्रदेवताध्यानमाह ॥ ॐ विष्णवे नम इति । एतन्मन्त्रप्रतिपाद्यं परमात्मानं ध्यायेत् । कीदृशं षट्शक्तिभिर्भगवच्छब्दवाच्याभिः । ऐश्वर्यादिभिर्युतम् । इमं वक्ष्यमाणं श्रीनारायणकवचाख्यं मन्त्रम् । तत्फलमाह ॥ विद्येति । विद्यातेजस्तपसो मूर्तिः पात्रं भवति । यद्वा । एतद्विद्यायामधिकारिणमाह ॥ विद्येति । ईश्वरस्यात्मनश्चापि ज्ञानं विद्येहोच्यत इत्युक्तलक्षणा विद्या । तेजो ब्रह्मवर्चसम् । श्रुतमध्ययनं शीलं तप इत्युच्यते बुधैरित्युक्तलक्षणं तपः । तेषां मूर्तिराश्रयः सन् । इमं मन्त्रमुदाहरेदित्यर्थः ॥ ११ ॥

ओं ॥ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥

सत्यधर्म – तमेवाह ॥ हरिरिति । इडोपहूतं गेहेषु हरे भागं क्रतुष्वहम् । वर्णो मे हरितः श्रेष्ठस्तस्माद्धरिरिति स्मृत इति मोक्षधर्म इति गीताभाष्योक्तेर्यज्ञभागहारित्वादिना हरिः । अमरादिमात्रप्रमातृपामरविवक्षया वा वाय्वादिरिति प्राप्तावनन्यगं लिङ्गमवगमयति ॥ न्यस्ताङ्घ्रीति । न्यस्तं पतगेन्द्रपृष्ठे गरुडपृष्ठेऽङ्घ्रिपद्मं पादकमलं येन स न्यस्ताङ्घ्री च पद्मा पुरतो रमा च येन स इति वा। अनेन न पतगेन्द्रो हंसो न च न्यस्ताङ्घ्रिपद्मः पद्मासनः किन्तु कन्तुपिता नारायण एवेत्यवधारितमिति मन्तव्यम् । अष्टगुणः । जन्माद्यस्य यतः । ''यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति । त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो'' इत्यादिभ्य उक्ता अष्टौ गुणा यस्य सः । आन्तरङ्गिको भावस्तु प्रामाणिकव्याप्तगुण इति । अशू व्याप्ताविति धातुव्याख्यानात् । मुखत एवमुक्तिस्तु सर्वगुणानामेतन्मूलत्वात्स्वत एव तल्लाभो

भवतीति । सतोऽसतश्च महेश्वरेऽष्टावित्यादिदुर्निबन्धानुबन्धसाधनतया मोहयितुमिति मन्तव्यम् । अष्टबाहुः । तदायुधान्यभिधत्ते ॥ दरेति । दरः पाञ्चजन्योऽरिररवच्चक्रं चर्म फलकमसिर्नन्दको गदा कौमोदकी इषुर्वाय्वात्मा । पञ्चात्मको मारुत एष बाण इत्याचार्योक्तेः । चापः शार्ङ्गनामा पाशो रिपुबन्धनरज्जुः ॥ १२ ॥

चट्टी – हरिर्विदध्यादित्यारभ्य स्वतेजसा ग्रस्तसमस्ततेजा इत्यन्तं कवचस्वरूपम् । हरिर्हर्याख्यमूर्तिः सर्वरक्षां सर्वेषु देशेषु कालेषु सर्वापद्भ्यश्च रक्षामष्टगुणोऽणिमाद्यष्टैश्वर्ययुक्तः । सृष्ट्याद्यष्टगुणो वा । अष्टा व्याप्ताः पूर्णा गुणा यस्येति वा । अशू व्याप्ताविति धातोः ॥ १२ ॥

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थले च मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥

सत्यधर्म – जलेषु जलशैवलादौ । जले त्वित्यपि पाठः शोभनः । मत्स्यमूर्तिर्मीनतनुः स्वयं माद्यतीतरान्मादयतीति वा । मद हर्ष इत्यस्मादतन्वजीत्युणादिस्यः । यादोगणेभ्यो यादसां जलजन्तूनां गणाः सङ्घास्तेभ्यः स एष मत्स्यो मीनः । यादांसि जलजन्तव इत्युभयतश्चामरः । पाशो रज्जुविशेषः । पाशः पक्ष्यादिबन्धन इति विश्वः । यादसां गण एव वरुणस्य पाशस्तस्मादिति व्याख्यानं विना मानाख्यानं प्रवृत्तमिति चिन्त्यम् । अभिमानिदेवतां तु सर्वत्र मन्यामहे । एतच्चेतनता चादौ न । एतन्मात्रधार्यस्तथा चानुपपन्नः । अत्र भगवत इव महोदरो गजमुखः पाशदन्ताङ्कुशेति गणेशस्यापि पाशभृतश्च तद्भटानित्यत्र यमदूतानां चेत्येवमाद्यनेकत्रानेकेषां तद्धरत्वप्रतीतेश्च । दशमे च पाशोद्यतकरः पायात् । तत्र काश्यपपुत्रस्य कण्ठे पाशं जलेश्वर इत्यादेश्च चेतनत्वस्यैव असम्भवसम्भवत्वात् । अमरव्याख्यायां भानुदीक्षितो या प्रापणे बाहुलकादसुन् पाशोऽस्यास्तीति दर्शयामासैव न शशंस तदेकतां चेत्यलम् । मायया स्वेच्छया बटुर्यो वामनः । स्थले भूतले । स एव विश्वरूपो व्याप्तकायस्त्रिविक्रमनामा खे आकाशेऽवतु । भुवमारभ्य व्याप्तो दिवमित्येवमुक्तिर्युक्तमिति ॥ १३ ॥

चट्टी – यादांसि जलजन्तव इत्यतो वरुणपाशस्य यादोगणान्तर्भूतत्वेऽपि तद्ग्रहणस्य मरणाविनाभूतत्वेन तत्परिहारार्थं पृथग्गृहणम् ॥ मायया स्वेच्छया वटुरूपो वामनः । विश्वरूपो व्याप्तरूपः ॥ १३ ॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

सत्यधर्म – दुर्गेषु पर्वतादिष्वटव्यश्चारण्यानि चाजिमुखानि युद्धमुखानि चादयो येषां तेषु आजिश्च मुखं चादिनश्चेति वा। मुखं निःसरण इति विश्वाद्गमनविशेष इति यावत्। आदिनो राक्षसाः प्रोक्ता इति दशमतात्पर्योक्ते राक्षसाः। दुर्गेषु प्रभू राजराजेश्वरो वा पृथ्वाद्याविष्टरूपविशेषो वेति पृथग्रूपपरमिदमिति मन्तव्यम्। असुरयूथपो हि हिरण्यकशिपुस्तत्सङ्घस्वामी। यूथनाथस्तु यूथप इति करिपर्यायोक्तेर्नृसिंहस्य हिंसकत्वेन हिरण्यस्य स्वनत्वेनाप्युक्त्यानुरूप्यं ध्वन्यते। यथोक्तं सप्तमे नृसिंहं प्रति दैत्यकुञ्जर इति। गर्भाः सुरारिनारीणां यस्याट्टहासं विमुञ्चतो दिशो विनेदुस्तेनाट्टहासेन न्यपतन्नित्यन्वयः। अर्थादाट्टहासस्य गर्भपतनहेतुत्वं ज्ञेयम्॥ १४॥

चट्टी – अटवी आजिमुख्यं संग्रामोपक्रमश्चादिर्येषां तेषु दुर्गेषु संकटस्थानेषु। असुरस्त्रीणां गर्भाः॥ १४॥

रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजो माम्॥ १५॥

सत्यधर्म – यज्ञकल्पो यज्ञान्स्वाङ्गेभ्यः कल्पयतीति स तथा। अध्वनि मार्गे मा माम्। मा अध्वनि विरुद्धमार्गे वा तदगमकतैवावनमिति ज्ञेयम्। संस्थानविशेष इति वा। अध्वा वर्त्मनि संस्थान इति विश्वः। वराहावतारव्यापारमीरयति॥ स्वदंष्ट्रेति। उन्नीतोर्ध्वमानीता धराऽवनिर्येन सः। रामः परशुरामोऽद्रिकूटेषु माहेन्द्रसद्मत्वात्तस्य। आश्लेष्य महेन्द्राविति नवमस्कन्धोक्तेः। विप्रवासे ब्राह्मणानां वासे यथा तदपराधो न घटेत्तथेति विप्रवाच्यस्य तस्य। रामो दाशरथिरद्रिकूटेषु चित्रकूटवासात्। विप्रवासे प्रवासे बलरामः। सप्तमपञ्चिकब्राह्मणगतभार्गवेयरामव्यावृत्तये सलक्ष्मण इति। सोऽपि न यः कश्चित्सचिन्हो राम इत्याह॥ भरताग्रज इति। न सोऽपि लक्ष्मण इत्याचष्टे॥ सलक्ष्मण इति॥ १५॥

चट्टी – असौ प्रसिद्धो वराहो मामध्वनि रक्षतु। यज्ञान्स्वावयवैः कल्पयतीति यज्ञकल्पः। उन्नीता उद्धृता धरा येन सः। अद्रिकूटेषु गिरिशिखरेषु। रामो जामदग्न्यः। विप्रवासे विविधप्रवासे भरताग्रजो दाशरथी रामः॥ १५॥

मामुग्रधन्वा अखिलप्रमादान्नारायणः पातु नरश्च हासात्।
दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात्॥ १६॥

सत्यधर्म – उग्रधन्वा निखिलादिति निशठः पाठः। काचित्को धन्वा अखिलादिति। तत्र विवक्षाभावात्सवर्णदीर्घाभावः। धन्वचापे स्थलेऽपि चेति विश्वः। नरस्तन्नामा विष्णुर्हासादुन्मादहेतुकाद्दत्तस्तन्नामाऽयोगादनुपायादनणिमादेर्वा कर्मबन्धाद्गुणेशः कपिलः पायात्तपस्वित्वादित्याशयः॥ १६॥

चट्टी – उग्रधन्वा अखिलादिति संध्यभावः छन्दःसाम्यद्योतनाय । नारायणः । प्रमादाद्भग-वद्विस्मृतिः सदा विष्णोरन्यथाज्ञानवर्जनम् । शास्त्राभ्यासःसदोद्योगाच्छ्रवणाच्च विचारतः । निषिद्धकर्मणां त्यागः स्वधर्मस्य कृतिः सदा । अप्रमाद इति प्रोक्त इति । नरो नरान्तःस्थो भगवान् ''विष्णोर्वायोरनन्तस्य त्रिभिरंशैर्नरः स्मृत'' इति वचनात् । योगनाथोऽष्टाङ्गयोगप्रवर्तको दत्तो दत्तात्रेयोऽयोगाद्योगभ्रंशात् । गुणेशो गुणमयबन्धननिवर्तनसमर्थः ॥ १६ ॥

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षो मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषान्तरार्चनात् कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥

तात्पर्यम् – सनत्कुमारोऽवतु कामदेवात् । 'सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः । स मां योग्येतरात्कामात्पातु विश्वेश्वरः प्रभुरि'ति च । देवर्षिवर्यः पुरुषान्तरार्चनात् । विष्णोरपरिवारत्वदृष्ट्या देवान्तरार्चनात् । 'महिदासो देवऋषिः पातु मां विष्णुरव्ययः । तदनर्पितकर्मभ्यस्तदस्मरणतस्तथे'ति च ॥ १७ ॥

सत्यधर्म – सनत्कुमारोऽवतु कामदेवादिति श्लोके सनकादिचतुष्टयनिष्ठपरमेष्ठिसुत इति कामदेवो रतिपतिरिति काम इति भ्रमसन्देहं च प्रथमपादं प्रथमतोऽनूद्य प्रमाणेन निराकुर्वन्व्याकरोति ॥ सनदिति । सनत्कुमार इति नाम यस्य स तथा ब्रह्मचर्यवपुर्लोकदृष्ट्याऽपरं स्वेतरं चतुराननतनुजं य आविवेश सः। योग्येतरात् योग्यः काम इतरो यस्मादिति विग्रहे ''न बहुव्रीहाविति'' निषेधान्न सर्वनामता । परतरुण्यादिसङ्गमरूपात् कामात् मानिकयोग्येतरादिति मौलदेवपदार्थ इति मन्तव्यम् । इति तन्त्रभागवत इत्यर्थः । देवर्षिवर्यः पुरुषान्तरार्चनादित्यत्र देवर्षिर्नारदः पुरुषान्तरार्चनं तदितरार्चनमित्यन्यथाप्रतीतिं निवारयितुमनूद्य मानेन तदर्थमाह ॥ महिदास इति । तदनर्पितकर्मभ्यः स्वामी हि फलमश्नुत इत्यादेर्हर्यसमर्पितस्वफलकर्मभ्यस्तस्यास्मरणतोऽपि पात्वित्यन्वयः ॥ ततश्चेयं मूलार्थपरिष्क्रिया ॥ सनत्कुमारश्चतुर्मुखसुताविष्टः कामदेवाद्देवयति मादयतीति देवः । विशेषणस्य परनिपातः । कामश्चासौ देवश्च कामदेवस्तस्मान्मदकारिकामाद्दुष्टेति यावत् । दिवेः स्तुतिमोदमदेति तदर्थकत्वात् । हयशीर्षो हयग्रीवः पथिहेलनान्मार्गान्तर्वर्तिदेवादिवन्दनमविधाय धावनादिरूपा-सत्काराद्देवर्षिवर्यो महिदासः पुरुषान्तरार्चनात् । अर्चनशब्देन भगवदसमर्पणास्मरणे चोपलक्षण-याऽवगृह्येते । आ अर्चनादित्याङ्प्रश्लेषे आ सम्यगपरिवारदृष्ट्येति यावदिति लभ्यते । निरयान्निःशेषं विश्लेष्य निरयाद्दुर्दैवादिति वा ॥ १७ ॥

चट्टी – सनत्कुमारस्तन्नामा भगवान् कामदेवात्कामदेवकृतायोग्यकामनादवतु ॥ तदुक्तम् ॥ सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः । स मां योग्येतरात्कामात्पातु

विश्वेश्वरः प्रभुरिति। पथि यद्देवानां हेलनं नमस्कारमकृत्वा गमनं तस्मात्। देवर्षिवर्यो देवानां ब्रह्मादीनां ऋषीणां च वर्यः श्रेष्ठः। अनेन महिदास उक्तः। महितो महान्तो ब्रह्मादयो दासा यस्येत्यनेन समानार्थकत्वात्। पुरुषान्तरार्चनाद्भगवत्परिवारतां विना प्राधान्येन भगवदितरब्रह्मादिपुरुषपूजनात्। इदमुपलक्षणम्। भगवदनर्पितकर्मभ्यस्तद्विस्मरणतश्चेत्यपि ग्राह्यम् ॥ तदुक्तम् ॥ विष्णोरपरिवारत्वदृष्ट्या देवान्तरार्चनात्। महिदासो देवऋषिः पातु मां विष्णुरव्ययः। तदनर्पितकर्मभ्यस्तदस्मरणतस्तथेति ॥ १७ ॥

धन्वन्तरिर्भगवान् पात्वपथ्याद् द्वन्द्वाद् भयाद् ऋषभो निर्जितात्मा।
यज्ञश्च लोकादुत तत्कृतान्नो बलो गणात् क्रोधवशादहीन्द्रः ॥ १८ ॥

सत्यधर्म – धन्वन्तरिर्धन्वं पापं तरति, स्वयं तरणं नामात्र तदसंसर्गरूपं तारयतीतरानिति वा स तथा। धन्वमिति पापजो रोगो गृह्यते। तृधातोः स्व इरिति इः। धन्वमिति द्वितीयाया अलुगार्षः। अपथ्यान्मा गमो वा धर्मपथ्यर्थन्यायादनपेत इति यत् न पथ्यमपथ्यं तस्मात्फले ग्रहिरात्मम्भरिश्चेति चकारात्कुक्षिम्भरिरितिवन्मदेहाहिताशनादेः। द्वन्द्वात् शीतोष्णादिजातात् ऋषभो निर्जितात्मा यतचित्तः। प्रपञ्चितश्चैतत्प्रकारः पञ्चमे। द्वन्द्वादिसहनस्य मनोनियमननिदानकत्वादित्याशयः। यज्ञ आकूतिसूनुर्लोकाद्दुर्जनाद्रक्ष आदेरुत तत्कृतादुपद्रवात्। प्रथमतस्तदप्राप्तिप्रार्थनं कथञ्चिदागमने तत्राशासनमित्युक्तमिति वेदितव्यम्। रक्षोभिरुग्रैः सम्प्राप्तः खादितुं मोचितस्तदा "स्तोत्रं श्रुत्वैव यज्ञेन तान्हत्वाऽवध्यतां गतानि"त्यादीशावास्यभाष्योक्तेः। तत्कृताच्चेति चोऽन्वेति। बलो बलरामः। स किमाकार इत्यत आह ॥ अहीन्द्र इति। शेषांशः क्रोधवशात्तदादिसङ्घातात्तस्य च तदधिपत्वात् ॥ १८ ॥

चट्टी – ऋषभो ऋषभनामा भगवान्। द्वन्द्वात् शीतोष्णादेर्भयात्। यज्ञो यज्ञनामको भगवान्। लोकाज्जनापवादान्नोऽस्मान्। तत्कृताल्लोककृतोपघातात् बलो बलभद्राविष्टो भगवान् ॥ तदुक्तम् ॥ शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः। आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतमिति माहावाराहे। अहीन्द्रः शेषाविष्टो भगवान्। क्रोधवशाद्गणात्सर्पगणात् ॥ १८ ॥

द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाषण्डगणात् प्रमादात्।
कल्की कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥

सत्यधर्म – द्वैपायनो द्वीपोऽयनं यस्य स पराशरस्तस्यापत्यम्। ऋष्यन्धकेत्यण्। अनन्तरापत्येऽपि द्वैपायनवद्यञिञोश्चेति फक् स्यात्। तदपि न। अनन्तरापत्ये फकोऽदर्शनात्। द्वीपमयनं यस्य स द्वीपायनस्तस्यापत्यं ष्यञि द्वैपायन इति भानुदीक्षितलेखनात्। अप्रबोधाच्छास्त्रविषयाज्ञानात्।

सम्प्रमोहादिति पाठः स्फुटार्थः । तस्य वेदादिसच्छास्त्रप्रवक्ताचार्यत्वात् । पाषण्डगणाज्जिनादेः । यद्वा पाषण्डगणात्तद्धेतुकात्प्रमादात्त त्सहवाससम्भवादिति यावत् । प्रमादात्प्रमाया इति पाषण्डगुणविशेषणं वाऽन्यथाज्ञानसाधकोपदेशकादिति यावत् । कल्किः कल्कीति गाध्यादिशब्दवदिकारान्तं नकारान्तं च । कलेः कालमलादिति पदमेकम् । तत्र षष्ठ्या आक्रोशेऽलुक् । कलिस्वामिको यः कालस्तत्प्रयोजकं यन्मलं पापं तस्मात्प्रपातु समवतु । यवनहननपूर्वकं धर्मावनायोरुकृतावतार उरुभिर्विरिञ्चादिसुरैः कृतं प्रार्थनादिकर्म तेनावतारो यस्य स उरूणां कृतेन कर्मणोक्तरूपेणेति वा । पात्वित्यनेन पूर्ताविपि यत्प्राह प्रेति तेन मलपदानुकूल्यं च दर्शितम् । क्षालनोपयोगिप्रपारूपतां कल्किनो ध्वनयामास तुरेतत् । प्रपापानीयशालिकेत्यमरः । कालमलं प्राप्य प्रपातु रक्षत्वित्यन्वयो वा ।। १९ ।।

चट्टी – संप्रमोहो मिथ्याज्ञानम् । मोहश्चैव विपर्ययमिति भारतोक्तेः । अधर्मेच्छावासं प्रमोहो धर्मकामितेति वचनात् । पाषण्डगणात्प्रमादात् । पाशुपतादिदुःशास्त्रसमूहः पाषण्डगणस्तच्छ्रवणादिप्राप्तात्प्रमादात् । बौद्धपाशुपताद्यास्तु पाषण्डा इति कीर्तिता इति वचनात् । कालमलात् कालस्य मलात्कलेः कल्की धर्मावनाय धर्मरक्षणाय । उरुर्महान्कृतोऽवतारो येन स तथोक्तः ।। १९ ।।

मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गव आत्तवेणुः
नारायणः पातु सदाऽऽत्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ।। २० ।।

सत्यधर्म – घटिकाभिरहोरात्रं विभज्य षष्टिघटिकात्मकं कालं द्वादशसङ्ख्यं कृत्वा तत्रैकैकस्मिन्काले देवमेकैकं सप्रयोजनं चाह ।। मामिति । गदया कौमोदक्या सहितः प्रातः सूर्योदयानन्तरम् । प्रगे प्रातोऽतधातोरप्रत्ययः । गोविन्द आसङ्गवे सङ्गवक्षणादिपरिपतनं यस्मिंस्तत्कालं आ अभिव्याप्यासङ्गवे । तृतीयासप्तम्योर्बहुलमम्भाव इत्युक्तेरम्भावः । प्राह्णे सङ्गवमध्यान्हमध्येऽरीन्द्रपाणिश्चक्रधरोऽरीन्द्रा महावैरिणः पाणौ यस्येति वा वशीकृतशत्रुश्रेष्ठ इत्यर्थः । ननु छान्दोग्यद्वितीयाध्याये यत्पुरोदयात्स हिङ्कार इत्याद्युपनिषद्भाष्ये उदयात्पूर्वमेवासौ भवेत्प्रद्युम्ननामकः पश्चाधारस्तदात्माऽसौ वासुदेवस्तथोदये । आश्रयश्च नृणां तत्र वराहः सङ्गवे तु सः । तत्र पक्ष्याश्रयो विष्णुस्तथा नारायणाभिधः । मध्यन्दिने स आधारो देवानां च ततः परम् । अनिरुद्धः स आधारो गर्भस्थानां सदैव हि । ततः परं नृसिंहाख्यः स आरण्याश्रयो मतः । अथास्तमितवेलायां स सङ्कर्षण ईरितः । आश्रयः स पितॄणां च सप्तात्मकमुपास्यकम् । प्राप्नोति परमं स्थानं मुक्तः संसारसागरादिति चेत्याद्युक्तेरत्र कालद्वादशोक्तिस्तथैव भगवद्रूपाणां स्थानभेदनिरूपणं च कुत इति चेन्न । प्रतिपत्तृभेदेन वा विनिर्जित्य मृधेऽसुरानिति मुक्तः संसारसागरादिति फलवैलक्षण्याद्वा भगवद्रूपेषु विशेषाभावाद्वा द्वैसरण्यम् । यथोक्तं तत्रैव । न रूपाणां विशेषोऽस्ति गुणतो नामतोऽपि वेत्यादि । गोगणे दिग्बाण

इति विश्वोक्तेः । संयुज्यन्ते पक्षिणो गवि तदभिमन्यमाने गगने दिशामप्याका-शविशेषत्वात्तत्रेति वा सङ्गवशब्दार्थो बोध्यः । तिष्ठद्गुप्रभृतित्वतोऽव्ययीभावे टजन्तः शब्दः । केचिदासङ्गवमात्तवेणुरिति पठन्ति । आत्तशक्तिर्लक्ष्मीसहित इति वा शक्तियुक्त इति वा शक्तिरूपायुधधर इति वाऽर्थः ।। २० ।।

चट्टी – अत्रान्हो भागा मुनिमतभेदेन पञ्चधा विकल्प्यन्ते ।। तदुक्तं कालमाधवीये ।। द्विधा त्रेधा चतुर्धा पञ्चधा पञ्चदशधा वा । अहर्विभज्यत इति । पञ्च मतभेदा इति । तत्र द्वेधा विभागःस्कान्दे दर्शितः । आवर्तनात्तु पूर्वाण्हो ह्यपराण्हस्ततः पर इति च । आवर्तनं मध्यान्हस्त्रेधाविभागोऽपि तत्रैवोक्तः । ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्तानां च पञ्चकम् । पूर्वाण्हः पञ्चकः प्रोक्तो मध्यान्हस्तु ततः परम् । अपराण्हस्ततः प्रोक्तो मुहूर्तानां च पञ्चकमिति । चतुर्धा विभागस्तु गालवेनोक्तः । पूर्वाह्णः पञ्चकः प्रोक्तो मध्याह्नः प्रहरं तथा । आतृतीयादपराह्णः सायाह्नश्च ततः परमिति पञ्चधा विभागो व्यासेनोक्तः ।। मूहूर्तात्त्रितयं प्रातस्तावानेव तु संगवः । मध्यान्हस्त्रिमुहूर्तं स्यादपराण्हश्च तादृशः । सायान्हस्त्रिमुहूर्तस्तु सर्वकर्मसु गर्हित इति ।। पञ्चदशधा विभागश्च शङ्खेनोक्तः ।। शास्त्रश्चैत्रश्च मैत्रश्च तथा सालकटः स्मृतः । सावित्रश्च जयन्तश्च गांधर्वः कुतपस्तथा । रोहिणश्च विरञ्चश्च विजित्यो नैर्बुदस्तथा । महेन्द्रो वरुणश्चैव भेदाः पञ्चदश स्मृता इति । एवं च द्वेधेत्यादिमुनिमतचतुष्टयग्रहणाभिप्रायेणान्हो भागेषु रात्रौ च प्रदोषादिसंज्ञकेषु भागेषु रक्षा प्रार्थना क्रियते । मां केशव इति त्रिभिः । गदया युक्तः केशवः प्रातः सूर्योदयमारभ्य मुहूर्तत्रयात्मके कालेऽव्यात् । आत्तशक्तिरात्ता गृहीता शक्तिरायुधं येन स नारायणः प्राह्णे मुनिमतभेदेन त्रिविधे पूर्वाण्हेऽव्यात् ।। २० ।।

देवोऽपराण्हे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ।। २१ ।।

सत्यधर्म – उग्रधन्वोग्रं धनुर्यस्य स उग्रधन्वा । धनुषश्चेति नङ् । मधुहा मधुसूदनो देवः सायं सायं समये । सायंसन्ध्या पितृष्वसूरित्यमर व्याख्यायां सायः काण्डे दिनान्ते चेत्यभिधानमभिधायाव्ययवर्गे सायमित्युक्तत्वादिति भानुनोक्तेः । सायं साय इत्यव्ययामरः । प्राह्णापराह्णमध्याह्नास्त्रिः सन्ध्यमथ शर्वरीत्यमरः । त्रिधामा वैकुण्ठश्वेतद्वीपानन्तासनात्मकधामत्रयवान् । दोषे दोषास्ति प्रारभ्यत्वेनात्रेति दोषः प्रदोषस्तस्मिन् । दोषेति भाषितुं शक्ये यद्दोष इत्यभाषत तेनेन्द्रियकृतदुर्विषयद्रविणदोषे सत्यपीति ध्वनयामासेति ज्ञेयम् । दोषा नक्तं च रजनीत्यमरः । अर्धरात्रेऽर्धं रात्र्या अर्धरात्रः । अहः सर्वैकेत्यच् । अर्धं नपुंसकमिति तस्यैव समांशकतासमाशंसनात् । निशीथे पञ्चदशघटिकामारभ्यापररात्रपर्यन्तं निशेतेऽस्मिन् । शीङ् स्वप्ने । निशीथे गोपीथवत् । निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रक इति भानुदीक्षितः । अर्धरात्रिनिशीथयोरन्तरा बहुव्यवधायकविरहादैकस्वाम्यम् ।। २१ ।।

चट्टी – अरीन्द्रश्चक्रश्रेष्ठः पाणौ यस्य स विष्णुर्मध्यन्दिने त्रिविधे मध्यान्हे पातु । मधुं हन्तीति मधुहा । हन्तेः क्विप् । ब्रह्मभ्रूणवृत्रेषु क्विबिति नियमस्य प्रायिकत्वात् । यथा हन्या सकारः । प्रायिकश्चायं नियमः । कचिदन्यस्मिन्नप्युपपदे दृश्यते । मधुहेति प्रायिकत्वं च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यत इति । मधुसूदनो देवोऽपराण्हे चतुर्विधेऽव्यात् । अनन्तासनवैकुण्ठश्वेत-द्वीपाख्यानि त्रीणि धामानि यस्य स माधवः सायंकाले चरममुहूर्तत्रयात्मकेऽवतु । यत्तु श्रीधरेण व्याख्यातम् । दिनस्य बहुभागेषु क्रमेण प्रातरादिसंज्ञकेषु रक्षाप्रार्थनमिति । तन्न । तदुक्तप्रकारेण षोढा विभागस्य कुत्राप्यदर्शनादिति । दोषे हृषीकेशोऽवतु । अर्धरात्रपर्यन्ते काले निशीथे उत निशीथे च एक एव पद्मनाभोऽवतु ॥ २१ ॥

श्रीवत्सलक्ष्माऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विष्णुः श्रीमान् भगवान् कालमूर्तिः ॥ २२ ॥

सत्यधर्म – श्रीवत्सलक्ष्मा श्रीवत्सो लक्ष्म चिह्नं यस्य स तथा । चिह्नं लक्ष्म च लक्षणमित्यमरः । अपररात्रे ईया लक्ष्म्याः शं यस्मात्स लक्ष्मीसुखदः प्रत्यूषेऽहर्मुखे । ऊष रुजायां इगुपधकः । ऊषति योषिद्विश्लेषात्पुरुषोयशो न मनङ्ग इति स तथा । प्रत्यूषोऽहर्मुखमित्यमरः । असिधरो नन्दकभृज्जनार्द-नोऽव्यात् । दामोदरो, दामात्सिद्धिं परीप्सन्तो मां जनाः कामयन्ति हि । दिवं चोर्वीं च मध्यं च तस्माद्दामोदरोऽहमिति मोक्षधर्मे । प्रसिद्धः कृष्णश्च दामोदरकत्वात् । अनुसन्ध्यं सन्धिषु भवा सन्ध्या सन्ध्ययोर्मध्येऽनुसन्ध्यम् । सन्ध्या पितृप्रसूः सन्ध्या इत्यमरशब्दार्णवौ । भगवान् श्रीविष्णुः प्रभाते सवित्रुदय आसन्ने । पूर्वं विष्णवे नम इत्यारब्धत्वादन्ते तदेव देवनाम गृहीतं चेत्सम्पुटीभवतीति भवति विष्णुः श्रीमान् । भगवानिति पाठः श्रीमान्नपाङ्क्तःविश्वेश्वर इति पाठः । कालमूर्तिः प्रातरित्यारभ्य प्रभात इत्यन्तग्रन्थोक्तकालाकारः । ज्ञानतनुरित्यादिर्वाऽर्थः । कालशब्दो जगद्बन्धनज्ञानादिसर्व-भगवद्धर्मवाची । कलबन्धने कलज्ञाने कलकामधेनुरिति पठतीति गीताभाष्योक्तेः । कामधेनुर्यथा सर्वार्थान्ददाति तथाऽयमपि धातुः सर्वार्थवाचीत्यर्थः । तथा चास्मादण् कर्तरि घञ् वा । जगदिति च योग्यतया सम्बध्यत इत्यादिप्रमेयदीपिकोक्तेः । वचस इति मन्तव्यम् । कलकाम-धेनाविति पठित्वा व्याकुर्वन्तश्चैतदनवलोकका लोका इत्येव न किन्तु कामधेनुवाचकत्वेऽस्य प्रकृतोपयोगायोगेनासंश्लिष्टः ॥ २२ ॥

चट्टी – अपररात्रौ ईशः समर्थः श्रीवत्सलक्ष्मा श्रीवत्सो लक्ष्म्याभिमन्यमानो लक्ष्म चिन्हं यस्य स तथा । श्रीधर इत्यर्थः । प्रत्यूषे । ईशो जनार्दनोऽनुसंध्यं प्रतिसंध्यम् । कालमूर्तिः सर्वगुणात्मकदेहो विष्णुः। सर्वगुणोद्रेकात्काल इत्यभिधीयत इति वचनात् । विष्णुर्वासुदेवः । विष्णुर्योनिं कल्पयत्वित्यत्र

योनिक्लृप्तिर्वासुदेवादिति विष्णुशब्दस्य वासुदेवपरत्वेन भगवत्पादैर्व्याख्यातत्वात् । मध्यंदिने विष्णुरिति विष्णुरूपस्य प्रागुक्तत्वाच्च । प्रभाते सूर्योदयकालेऽव्यात् । नारायणः पातु सदाऽऽत्तशक्तिरिति क्वचित्पाठः । तत्र मुनिमतभेदेन दिनविभागविवक्षायां क्लेशो नास्ति । नारायणो मध्यन्दिने विष्णुरपराण्ह इत्यादिरन्वयः । एकोऽवतु पद्मनाभ इत्यत्रैकः सर्वोत्तम इति व्याख्येयम् । अन्यत्समानम् ॥ २२ ॥

चक्रं युगान्तानलतिग्मनेमि भ्रमत् समान्ताद् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २३ ॥

सत्यधर्म – दरारिचर्मेति यदायुधधारणेन रूपं व्यसितानि प्रार्थितवानिति प्रकृतकृतेस्तदायत्तत्वादिति प्रातिस्विकतया साम्मुग्ध्येन स चायुधानि सम्बोध्य तत्कार्यं प्रार्थ्यमित्याह । चक्रमिति । पूर्वं दरारीति दरपुरउदीरणादत्र कुतो व्युत्क्रमेणोक्तिरिति चेत् । अस्त्यत्र विशेषः । पूर्वं हरेश्चक्रमभूद्धि दुर्गा तमः स्थिता श्रीरिति यां वदन्ति । सत्त्वात्मिका शङ्खवरं रमैव खड्गं दुर्गात्मिका सैव च चर्मनाम्नी-त्याचार्यैर्निर्णयतृतीयाध्याय उक्तमिति द्वयोरप्यभिमानिकृतविशेषाभावबोधनाय पश्चादुक्तस्यापि चक्रस्यात्र पुरस्करणं तत्र दरपुरस्कृतिश्च सम्भवतः । अत्रानन्तरोक्तिश्च शङ्खस्य चक्रस्य प्रागुक्तिश्च वराद्रथाङ्गत्वमवाप कामः । तत्सूनुतामाप च सोऽनिरुद्धो ब्रह्मोद्भवः शङ्खतनुः पुमात्मेत्यादेरनिरुद्धा-भिमानिकतया चोचित इति वा सर्वायुधानां स्वरूपभूतानां सद्भावज्ञापनायैवैवमनेवमुक्तिरिति मन्तव्यमिति । प्राची दिग्जूः सहमाना दक्षिणा राज्ञी नाम प्रतीचीति छान्दोग्यभाष्ये सहमानेति सम्प्रोक्तो मानं वेदात्मकं यतः । शङ्खो वेदात्मकः सङ्ख्यसहितो दक्षिणाधरः । जुहोति चक्रेण शत्रूनित्यथवा जुहूः । प्रतीची दिग्दयितस्तस्य वामबाहुस्तथोत्तरः । राज्ञीत्युक्तगदायुक्तेः इत्याद्युक्तिरप्यभिमानिविवक्षयेति बोध्यम् । तत्र दरपुरस्कृतिश्चक्रस्यानन्तरमुक्तिश्च ध्वनिश्रवणेन द्रवदुर्वैरितप्राणापहाक्रमविवक्षयाऽत्र तु श्रेष्ठश्रेष्ठमारणकर्मणेति वा विशेषो ज्ञेयः । हे चक्रमिति सम्बुध्यन्तम् । तथैवोपक्रमो परममुक्तेः । न च तर्हि कथम् श्रवणमिति वाच्यम् । तदलोपे सम्बुध्यत्वस्यापि सम्भवात् । यथोक्तं सुधावाक्यार्थचन्द्रिकान्यायविवरणभावबोधेषु । कव रक्षण इत्यतः कवचं कव रक्षण इत्यस्य धातो रूपं कवचमित्येतदित्यर्थः । कवतेरच इत्येतावान्प्रत्ययः कवति रक्षतीति कवचम् । अरणमित्यपि सम्बोधनमिति । ननु कवतिरूपत्वे कवतेः पचाद्यचि सति कवेति भवितव्यं तत्कथं कवचमिति रूपनिष्पत्तिरित्यत उणादयो बहुलमिति बहुलग्रहणादच इत्येतावति प्रत्यये तत्सिद्धिरित्याशयेनाह ॥ कवतेरिति । अच इत्येतावानित्यच अम् इत्येतावानित्यर्थः । प्रयोजनाभावान्न मकारस्येत्संज्ञा । ततश्च मान्तत्वात्कृन्मेजन्त इत्यव्ययत्वमिति ध्येयम् । यद्वा अच इत्येतावानेव प्रत्ययः । तथा च कवचद्सु इति स्थिते लोपात्परत्वादतोमित्यमि कृते परत्वान्नित्यत्वाच्चामि पूर्वरूपत्वे च कृते

तस्यान्तवद्भावे तद्धृस्ववत्परस्य सम्बुद्धेः सम्बन्धिनो मकारस्य हे ज्ञानेत्यादिवदेङ्ह्रस्वादिति प्राप्तस्य लोपस्य बाहुलिकान्निवृत्तौ कवचमिति सम्बुध्यन्तरूपसिद्धिरिति । युगान्तस्य प्रलयस्यानलो वह्निस्तद्वत्तिग्मास्तीक्ष्णा नेमयोऽन्तभागा यस्य तत् । नेमिस्त्रिकायां चक्रान्त इति विश्वः । समन्तात्सर्वत्र भगवत्प्रमुक्तं, प्रयुक्तमिति द्वयमप्यद्वयम् । यथा वातसखो वातो वायुस्तस्य सखा मित्रम् । राजाहः सखिभ्यष्टजिति टच् । हुताशो हुतमश्नातीति सोऽग्निः । कक्षो वीरुत्तृणेषु चेति विश्वः । समन्तात्सर्वत्राशु शीघ्रमरिसैन्यं दन्दग्धि दन्दग्धि अतिशयेन दहति । रिप्वादिपदमनभिधाय निधायारिपदं चित्राङ्गदरीत्या तवापीदमावश्यकमिति ध्वनयति । दृष्टान्ते वा तव दार्ष्टान्तिक उत्तेजको भगवानिति ज्ञेयम् । युगान्तानलेत्यादिना सुदर्शनमहाज्वालेत्यादयः स्मृतयोऽत्र स्मर्तव्या इति सूचयति ।। २३ ।।

चट्टी – युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् । अरिसैन्यं दंदग्धि अतिशयेन दहति । तस्यायं स्वभावः । एवं न तु तत्प्रार्थनीयमित्यर्थः । यद्वा । दन्दग्धीति लोण्मध्यमपुरुषः । तत्र त्वमेवंभूतं चक्रमिति स्वरूपमुक्त्वा संबोध्य प्राथ्र्यते ।। अतिशयेन दहदहेति । कक्षं शुष्कतृणम् ।। २३ ।।

गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्डि निष्पिण्ड्यजितप्रियाऽसि ।
कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ।। २४ ।।

सत्यधर्म – चक्रोक्त्यनन्तरप्राप्ते शङ्खे वक्तव्ये वायुसख इत्युक्त्या गदा तु वायुर्बलसंविदात्मेत्याद्युक्तेर्वाताभिमानिकत्वेन प्रसङ्गसङ्गत्या गदां गदति । अशनिस्पर्शनविष्फुलिङ्गेऽशन्योर्निर्धातयोर्वा वज्रयोर्वा स्पर्शनं स्पर्शः सङ्घर्ष इति यावत् तस्य तस्माज्जाता विष्फुलिङ्गा इव विष्फुलिङ्गा अग्निकणा यस्याः सा तत्संबोधनम् । स्पर्शनो मारुते स्पर्शदानयोः स्पर्शनं मतमिति विश्वः । दम्भोलिरशनिर्द्वयोः । त्रिषु स्फुलिङ्गोऽग्निकण इत्युभयतश्चामरः । यतस्त्वमजितप्रियाऽसि । अनेन तव कदाऽपि पराजयो नास्तीति द्योत्यते । अजितस्य पराजितप्रियताऽनौचित्यात् । कूष्माण्डवैनायकयक्षरक्षोभूतग्रहान् । कूष्माण्डेत्यादौ यथासम्भवं गणसङ्ग्रहः । निष्पिण्डि निष्पिण्डि पेषय पेषय । राजीयुक्तगदायुक्तो राज्ञी नामेति छान्दोग्योपनिषद्भाष्योक्तेः । कौमोदकी राजीत्येकस्या एव नामनी इत्यवगमयितुं केवलं गदेत्यगददिति तात्पर्यम् ।। २४ ।।

चट्टी – अशनिवत्स्पर्शो येषां ते विष्फुलिङ्गा यस्यास्तस्याः संबोधनम् । हे गदे । त्वमजितस्य विष्णोः प्रियाऽसि । अहं च तस्य दासोऽतः कूष्माण्डादीन्निष्पिण्डि निष्पिण्डि । चूर्णय चूर्णय । अरींश्चूर्णय । सर्वत्र वीप्सा अतिशीघ्रत्वया ।। २४ ।।

त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरीन् हृदयानि कम्पयन् ॥ २५ ॥

सत्यधर्म – हे दरेन्द्र पाञ्चजन्य । यातुधाना राक्षसविशेषाः, प्रमथा हरपार्षदाः, प्रेता भूतविशेषा मातरो गणदेवताः, पिशाचाः, विप्रग्रहा ब्रह्मराक्षसा, घोरा दृष्टिर्येषां ते तान्करालललोचनान् । विप्रग्रहविशेषणं वा वालिवक्रदृष्टिमात्रपातेतरबलाकर्षणशक्तियुक्त उग्रग्रहविशेषो वा । पूर्वं हृदयानि कम्पयन्सन् अरीन्विद्रावय । पलायनस्य हृदयकम्पनकारणकत्वात् । घोरा दृष्टयो येषां सर्पाणां तानितरसर्पविलक्षणानिति वा । यथोक्तमादिपर्वणि सुपर्णामृतापहरणप्रस्तावे । चतुर्वृषौ महावीर्यौ नित्यक्रुद्धौ तरस्विनौ । तयोरेकोऽपि यं पश्येत्स तूर्णं भस्मसाद्भवेदिति । कृष्णपूरित इति हेतूक्तिः । अतो भीमस्वनः स्वन इत्यनेन पाञ्चजन्य निजध्वानेति मन्त्रमर्थत उज्जहारेति ज्ञेयम् ॥ २५ ॥

चट्टी – हे दरेन्द्र पाञ्चजन्य त्वं यातुधानादीन् विद्रावय । विप्रग्रहा ब्रह्मराक्षसा येऽन्ये च घोरदृष्टयः तान् ॥ २५ ॥

त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मञ्छतचन्द्र छादय द्विषामघं नो हर पापचक्षुषाम् ॥ २६ ॥

सत्यधर्म – हे असिवर नन्दक तिग्मा धाराऽन्तभागो यस्य तस्य सम्बुद्धिः । पट्टिशवदुभयत्र धाराभावाच्चर्मणोऽपि स्वावनरूपार्थकार्यकारित्वान्मिलित्वोक्तिरनयोरर्थार्थत इति ग्रन्थकृच्चातुर्यमनुसन्धेया । ममारिसैन्यं छिन्धि छिन्धि । छे चेति तुको आगमशासनस्यानित्यत्वादभावः । हे चर्मन् सम्बुद्धौ नपुंसकानां नलोपो वा वाच्य इति नलोपाभावः । फलक । शतं चन्द्रा यस्योपरि तदिति वा नाम वेति ज्ञेयम् । द्विषां चक्षूंषि छादयाच्छादय । तत्र निमित्तं पापचक्षुषामिति । नोऽघं च हर ॥ २६ ॥

चट्टी – तिग्मा धारा यस्य हे तिग्मधार असिवर खड्गश्रेष्ठ ममारिसैन्यं छिन्धि छिन्धि । शतं चन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र चर्मन् । द्विषतां चक्षूंषि छादय । नोऽस्माकमघं हरेत्यन्वयः। अत्र चक्राद्यायुधेषु स्थितश्चक्रादिनामको भगवानपि ग्राह्यः । तस्यैव तत्र तत्र स्थितत्वात्तत्-च्छक्त्युद्बोधकत्वेन मुख्यतः फलदातृत्वात् ॥ तदुक्तम् ॥ चक्रं चङ्क्रमणाद्विष्णुर्वर्जनाद्वज्र उच्यते । खण्डनात्खड्ग इत्युक्तो हेति नामा स्वयं हरिः । तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन् । एक एव महाशक्तिः कुरुते सर्वमञ्जसेति च ॥ २६ ॥

यं नो (येभ्यो)भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ २७ ॥

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु सङ्क्षयं सद्यो येऽन्ये श्रेयःप्रतीपकाः ॥ २८ ॥

गरुडो भगवांस्तोत्रस्तोमच्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥

सत्यधर्म – ग्रहेभ्यः पूतनादिभ्यः सूर्यादिभ्यो रणोद्योगेभ्य इति वा । ग्रहो रणोद्यमे सूर्यपूतनादौ चेति विश्वः । उत्पातेभ्यः केतुभ्यस्ते च ग्रहकृताः । केतुर्ग्रहोत्पात इति विश्वः । नृभ्यो दुर्वानृभ्योऽनृभ्यो राक्षसेभ्य इति वा । सभाराजामनुष्येति सूत्रवृत्तावमनुष्यशब्दो रक्षःपिशाचादीनाहेत्युक्तेः । सरीसृपेभ्यो द्रंष्ट्रिभ्यो वनवराहेभ्यः । स्तोत्रस्तोभेति स्तोमेति च पाठौ शुशुभाते । स्तोत्राणि सामभागविशेषः स्तोभो गीतिपूरकाक्षराणि स्तोमो हि सङ्घः । एतदात्मकं छन्दो वेदस्तन्मयस्तद्देवः । वाय्वनन्तरं शिवादय इति ऋग्भाष्यतात्पर्याद्युक्तेः । छन्दोमयेन गरुडेनेत्यष्टमे चोक्तेः । सुपर्णासिगरुत्मा-नित्यादेर्वेदवेद्य इति स्वनामभिः स्वस्वामिनामभिः स्वाख्यो भाव इति गीताभाष्यप्रमेयदीपिकायाम् । नन्वेवमपि स्वशब्दस्यात्मीयार्थत्वादीश्वरप्रसक्तिः । मैवम् । द्विष्ठो यद्यपि सम्बन्धः । षष्ठ्युत्पत्तिः प्रधानत इति वचनात्तस्यात्मीयत्वाभावात् षष्ठ्यन्तात्खल्वयं छ इत्युक्ते गरुडस्यैवं समासे प्राधान्यं प्रसक्तमिति चेन्न । मम स्वामीत्यादिवत्सम्बन्धसामान्यषष्ठ्याश्रयणे प्रतीतप्राधान्यस्य तद्वाहनत्वादि-नोपहतेरस्यापि सम्भवात् । स्वनामभिः क्षितिपादिनामभिर्वा स्वशब्दवाच्यस्येति वा । विष्वक् सर्वत्र सेनः स्वामिसहितः । अशेषकृच्छ्रेभ्यः समस्तपापेभ्यः पापेभ्यो वा । कृच्छ्रं कष्टसन्तापेत्यादिविश्वः । शेषादिकृतकृच्छ्राद्रक्षणं स्वतः विनाऽर्थनां पक्षिव्यापार एवात इतरकृच्छ्ररक्षणं प्रार्थनीयमिति व्यास एवं विन्यासेन ध्वनयामासेत्यवधेयम् । तत्पक्षवातस्पर्शाद्धि केवलं विनष्ट एषां स उरङ्गबन्ध इति श्रीमदुक्तेः ॥ २७, २८, २९ ॥

चट्टी – यद्येभ्यो भयं नोऽस्माकं माभूत् । एतानि सर्वाणि भगवन्नामरूपास्त्रकीर्तनात् । सद्यः संक्षयं प्रयांत्वित्यन्वयः । येभ्य इत्यस्यैव विवरणं ग्रहेभ्य इत्यादि । ग्रहेभ्यः केतुभ्य उत्पातेभ्यः । केतुर्द्युतौ पताकायां ग्रहोत्पातलक्ष्मसु इत्यभिधानात् । भूतेभ्य इतरप्राणिभ्यः । अघेभ्यः पापेभ्यः श्रेयःप्रतीपका इष्टविघातकाः । स्तोत्राणि बृहद्रथन्तरादीनि । स्तोमः सामाधारभूतो ऋक् स्तोमः । छन्दांसि वेदास्तन्मयस्तत्प्रतिपाद्यस्तदभिमानी च । विष्वक्सेनो नाम भगवत्पार्षदः स्वनामभिः स्वान्तर्यामिणो हरेर्नामभिरनुस्मृतैर्निमित्तेन सर्वापद्भ्यो रक्षतु ॥ २७, २८, २९ ॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥

सत्यधर्म – नामानि नारायणादीनि रूपाणि मत्स्यादीनि यानं गरुडः । यानं गतौ वाहनेऽपीति विश्वः । आयुधानि चक्रादीनि । पार्षदभूषणाः । भूष्यन्ते एभिरिति करणे ल्युटि कोऽसावनुमानो नामेति महाभाष्योक्तेस्त्रिलिङ्गो भूषणशब्द इति । भूषणा भूषयन्तीति ण्यासश्रन्थेति युचि बहवः कर्मकरणाः सन्तीति गीताभाष्याद्युक्तेः स्त्रीलिङ्गतया वा सम्भवात् । विस्तृतं चैतदयनशब्दोऽधिकरणे त्रिलिङ्ग इति पुंलिङ्गोपपत्तिः । नन्वत्र प्रमाणशब्दो भावसाधनः करणसाधनो वा । आद्येऽपि पिपीलिकालिपिः प्रमाणमिति सामानाधिकरण्यं न स्यात् । द्वितीयेऽनुप्रमाणीति भवितव्यमित्यादिस्थानद्वये सुधायामनुसन्धेयम् । यद्यपि धमण्डार्थेभ्यश्चेति पुंस्येव युज्विहितस्तथाऽपि धत्ते शक्तीरिति शक्तिपदमेवं व्याख्यातमित्यदोषः । पार्षदसहपाठाद्भूषणा इति निर्देशाच्च चेतने वाऽभिमानिस्त्रीपुंसकत्वं च ध्वन्यते । रमैव बहुरूपिणी । तत्कण्ठगं कौस्तुभमास धातेत्यादेः ॥ ३० ॥

चट्टी – हरेर्नामानि रूपाणि च यानानि वाहनानि च पार्षदभूषणाः पार्षदमुख्याः । पार्षदाश्च भूषणाश्चेति वा । लिङ्गव्यत्ययः छान्दसः । नो बुध्यादीन्पान्तु ॥ ३० ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥

तात्पर्यम् – 'यथा हि भगवानेव सदसन्नियामकतया सदसद्रूप उच्यते । सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुज' इति च 'एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः । तत्तच्छक्तिप्रदत्वेन स्वयमेव व्यवस्थितः । सत्येनानेन मां देवः पातु सर्वेश्वरो हरि'रिति ॥ ३१ ॥

सत्यधर्म – यथा हि भगवानेवेति श्लोके भगवान्यथा स्वयं स्वाभिन्नस्तथेदं सदसद्वस्तुतो न तद्भिन्नमस्तीत्यन्यथाप्रतीतिं श्लथयितुं स्वयमनूद्य किञ्चित्प्रमाणेन व्याकरोति ॥ यथा हि भगवानेवेति । सदसन्नियामकतया मूर्तामूर्तजगन्नियामकतया । मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यत इत्युक्तेः । कार्यकारणात्मप्रपञ्चो वा सदसद्रूप उच्यतेऽच्युतो न तु तत्ताद्रूप्येण । अनेनैवंविधेन सत्येन वचनेन तुष्टश्चतुर्भुजो विष्णुः सत्येन भुजमुद्धृत्य शपथेनेति वा । सत्यं तु शपथे तथ्य इति विश्वः । सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परमित्यादेः । शपथकरणे भञ्जनं भवेदिति ध्वनिताक्षेपस्य यतश्चतुर्भुजो तथा न कुर्यादिति ध्वनितोत्तरं ज्ञेयम् । यथा स्ववच्चतुर्भुजो मुक्तः सन्साररूप्यभाग्भवेयं तथा मां पात्विति वा मूलयोजनाऽपि भावनीया । मूलार्थस्तात्पर्ये । वस्तुतो

भावप्रधानो वस्तुत्वतः शक्तत्वात् । अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यते । तस्मादेकं परं ब्रह्म वस्तुशब्दोदितं सदेत्येकादशतात्पर्ये । वस्त्वप्रतिहतं नित्यम् । स्कान्दे च । वासनाद्वसनाद्वस्तु नित्याप्रतिहतत्वतः । वासनेदं यतस्तुन्नमतस्तद्ब्रह्म शब्यत इति प्रथमतात्पर्ये चोक्तेः । तन्नियमनसमर्थत्वादिति यावत् । एतेन तन्नियामकतयेति मानीयव्याख्यामूलं वस्तुत इति मूलपदमिति ज्ञापितं भवति । अनेन सत्येन सर्वे उपद्रवा नाशं यान्तु भगवानेव यथा वस्तुतो वस्तु पारमार्थिकसत्यः । तथा सदसदपि वस्तु पारमार्थिकमिति । भूषणायुधलिङ्गाख्या धत्ते शक्तीरिति श्लोके भूषणादिपदाभिधेयत्वमात्रं भगवतोऽभिधीयत इति तच्चोपचारेणेत्यन्यथाप्रतीतिमन्यथयितुं मानाभिमानेनैवाभिधानेनैव तत्तात्पर्यमाह ॥ एक एवेति । एको मुख्योऽद्वितीयो वाऽज उत्पत्तिरहितः परो भिन्न उत्तमश्च भूषा भूषणं हेतिरायुधं ध्वजाश्च पताका लिङ्गं चिन्हम् । लिङ्गं चिन्हेऽनुमाने चेति विश्वः । तेषु तत्तच्छक्तिरूपेण तास्ताश्च शक्तयो येन तत्तथा तच्च तत्स्वरूपं च तेन तत्तत्सत्तादिदातृतया तत्र स्वयमेव व्यवस्थितः । अतोऽयं भूषणायुधलिङ्गाख्या शक्तीर्धत्ते । प्रामाणिकध्वजपदव्याख्येयं लिङ्गपदं मूल इति ज्ञेयम् । अनेन सत्येन सर्वेश्वरो हरिः पात्वित्यन्वयः । अर्थस्तु पूर्व एव ॥ ३१ ॥

चट्टी – यथा सदसच्च मूर्त्तं चामूर्त्तं च यत्तत्सर्वं जगत् । वस्तुतः पारमार्थेन भगवानेव भगवन्नियम्यमेव । तथैव ज्ञातेन सत्येन कारणेनोपद्रवा नाशं यांत्वित्यर्थः ॥ तदुक्तम् ॥ सदसन्नियामकतया सदसद्रूप उच्यते । सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुज इति व्याख्यातश्चैतत्समानन्यायो ''रथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् । तेन सत्येन मां देवास्त्रायन्तु सह केशवा'' इति भाष्योदाहृतश्लोके जयतीर्थचरणैः । यथा सत्यभेदौ तथैव ज्ञातेन तेन सत्येन कारणेनेति ॥ ३१ ॥

यथैकात्म्यानुभावेन विकल्परहितः स्वयम् ।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥

सत्यधर्म – तर्हि तत्तत्स्थानस्थितस्य भेदः स्यादित्यतो नेत्याह ॥ यथेति । ऐकात्म्यानुभावेन तत्तद्वस्तुस्थित-रूपाणामेकत्वानुसन्धानेन स्वयं च विकल्परहितः स्वगतभेदवर्जितः स्वमायया स्वेच्छया स्वरूप-शक्त्या । निजेत्याद्यनभिधानेनाभिधानेन च स्वमाययेति सु अत्यन्तं न विद्यते माया यस्यामित्यर्थमनायासेन सूचयति । न स्थानतोऽपीत्यादिसिद्धोऽयमर्थः । ऐकात्म्यानुभावेनैकस्वाम्यप्रभावेन वा निश्चयेन वा । अनुभावः प्रभावे स्यान्निश्चय इति विश्वः । ऐकात्म्यं तादात्म्यम् । ज्ञानिनामनिपुणताभिधानात् । तथा हि तत्त्वनिर्णयमूलटीकयोः । ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणा इत्यारभ्य तेषां तमः शरीराणां तम एव परायणमित्यन्तेन ॥ ऐकात्म्यमिति । एकश्चासावात्मा च तस्य भाव ऐकात्म्यं सर्वात्मना ब्रह्मैक्यमिति यावत् । यदैकात्म्यं नामेदमनैपुणा अविद्यमाननैपुणाः केचिद्ब्रूयुरित्यादिना । विकल्परहितो निर्भ्रमः । विकल्पो भ्रान्तिपक्षयोरिति विश्वः । यथा सम्यगिति वा ॥ ३२ ॥

चट्टी – हरिः स्वयं विकल्परहितः स्वगतभेदशून्योऽप्यैकात्म्यानुभावेन एकश्चात्मा च एकात्मा मुख्यः स्वतन्त्रस्तस्य भाव ऐकात्म्यं तदेवानुभावः । तेन मुख्यतन्त्रत्वादिति यावत् । स्वमायया स्वेच्छयैव । भूषणायुधलिङ्गाख्या भूषणादिष्वभिव्यक्तत्वात्तच्छब्दवाच्याः शक्ती रूपाणि धत्ते ॥ ३२ ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

सत्यधर्म – तेनैव सत्यमानेन तदाख्यप्रमाणेन सत्यमानेन मदीयशफथज्ञानेन । को वक्ता तस्येत्यतो वक्ति ॥ सर्वज्ञ इति ॥ सर्वगः सर्वरुपैराविष्टानाविष्टरूपैर्नः सदा सर्वदा सर्वत्र देशसामान्ये पातु ॥ न केवलमत्रोक्तायुधादिमात्रमवस्थितः किन्तु सर्वगः इति सर्वाख्या शक्तीश्च धत्ते । सर्वत्रसर्वग इति पदमेकं वा । सर्वांस्त्रायत इति स तथा स चासौ सर्वगश्चेति सः । पद्मशङ्खाम्बरादि च किरीटकटकाद्या येऽप्यलङ्कारा मम श्रियः इत्याद्याः सत्त्वरूपाः स्युः । नित्यानि चक्रादीन्यायुधानि च । रजो रागेण तेषु स्यात्काले काले प्रदीयते स्वभावाद्विविधाकार इत्यादिविष्णुरहस्योक्तेरायुधादयश्चेतनाः, शुद्धसात्त्विका वा । भूषणानि द्विधेत्याचार्यवचनतो ज्ञेयम् । केचित्साम्प्रदायिकाः स्वरूपभूतानीश्वरस्यायुधानीतराणि च सन्ति । अत्र सप्तमे निजेतरायुधप्रवेकविद्रावितदैत्यदानवमित्याद्युक्तेरिति वदन्ति ॥ ३३ ॥

चट्टी – तेन तत्प्रकारविषयकेण सत्यमानेन यथार्थज्ञाननिमित्तेन सर्वगः सर्वज्ञश्च भगवान् सर्व-स्वरूपैः सदा सर्वेषु कालेषु सर्वत्र देशेषु नः पात्वित्यन्वयः । अनेन भूषणादीनां जडत्वात्फल-दानानुपपत्तेस्तत्प्रार्थनं व्यर्थमिति शङ्का परास्ता ॥ तदुक्तम् ॥ एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः । तत्तच्छक्तिप्रदत्त्वेन स्वयमेव व्यवस्थितः । सत्येनानेन मां देवः पातु सर्वेश्वरो हरिरिति ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान् नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥

सत्यधर्म – हरेरपीतरजनवज्जननादिमत्त्वेन स्वाम्यं साम्यं भजते । किञ्च स्थानाख्यानरूपवैचित्र्ये कथं सम्भावितमिति संशयं व्यंसयन् स्तम्भवन्नृसिंहादिकमन्यच्च दुरितादिनिवृत्तय इत्यादिनाऽर्थनीयत्वेन विहितमेतदनुगुणगुणकं श्रीनारसिंहमर्हणीयत्वेनाह ॥ विदिक्ष्विति । यो भगवान्स्वतेजसा स्वप्रभया ग्रस्तसमस्ततेजा ग्रस्तान्यन्तर्गमितानि समस्तानां गभस्तिमदादीनां तेजांसि येन सः। लोकभयं भूतभीतिं स्वनेन करणेन प्रहापयन् । हेतुमण्णिंच् । विदिक्ष्वादिग्रहणेन सर्वग इति विवृतम् । अनेन सत्येत्यादिकमादिवन्मां पात्वित्यन्वयः ॥ ३४ ॥

चट्टी – दुर्गेष्विति श्लोके प्रार्थितोऽपि श्रीनृसिंहोऽखिलदुरितपटुपाटनपटुत्वात् पुनरपि प्रार्थ्यते ॥ विदिक्ष्विति । पात्वित्यनुषङ्गः ॥ प्रहापयन्निति । स्वार्थिको णिच् । परिहरदित्यर्थः । स्वतेजसा ग्रस्तानि अभिभूतानि समस्तानि तेजांसि सूर्यादीनि यस्य स तथा ॥ ३४ ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥

सत्यधर्म – मघवन् धनवन् यज्ञादिमन्निति वा यशश्विन्निति वा । हे मघवन् मघपत इति वा । तं वा एतं मखवन्तं सन्तं मघवानित्याचक्षते । परोक्षेण परोक्षप्रिया इव हि वै देवाः प्रत्यक्षद्विषः । तेभिरिन्द्र चोदय दातवे मघम् । तन्न आयातु मघाय मघमनु प्रायत्सि आमामेतु मघमित्यादिश्रुतिभ्यः । पत इति मतुबर्थस्य सम्बन्धस्य विवरणं तृतीयोऽतिशय इति खकारस्य घकार इति कर्मनिर्णयभाष्यटीकोक्तेः । येन यच्छब्देन यदा वर्मणः परामर्शस्तदा विशिष्टवाचकनीत्या दंशितशब्दः सम्बन्धार्थकः । यदि नारायणात्मकमित्युक्तैतन्मात्रपरामर्शकस्तदा दंशितो वर्मितेऽपि चेति विश्वान्नारायणात्मकेन दंशितस्तदभिन्नकवचावृत इत्यर्थक इति विवेकः ॥ ३५ ॥

चट्टी – दंशितः कवचितः ॥ ३५ ॥

एतद् धारयमाणस्तु यो यः पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥

तात्पर्यम् – 'गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्तितः । अप्रसादाद्गुरोर्विद्या न तथोक्तफलप्रदे' ति च ॥ 'विद्याः कर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः । अन्यथा नैव फलदाः प्रसन्नोक्ताः फलप्रदा' इति च तन्त्रसारे ॥ ४३ ॥

सत्यधर्म – एतद्धारयमाण इति श्लोकोक्त्यैतद्विद्याधारणफलस्य प्रमात्रैतद्धारणेऽप्यनुपलम्भाद्विश्वसनीयं कथमिदमित्यतोऽन्वयव्यतिरेकाभ्यामुपाध्यायत्तकार्यकारणभावो व्यभिचारः क्वचिदिति प्रतिपादयता मानेनैव शङ्किनारङ्गीकरोति ॥ गुरुशिष्ययोरिति । गुरुशिष्ययोरयोग्यत्वाद्व्यभिचाराद्यनाचाराद्गुरुवृत्तेर्गुरोर्वृत्तेः । गुरोर्वृत्तेः सेवाया इति वोभयोर्ग्रहणम् । गुरोरप्रसादादप्रसादनादित्यर्थः । गुरोर्योग्यात् । अन्यथोभयत्रान्यतरस्मिंश्च योग्यताभावेनैव फलदाः । प्रसन्नोक्ताः प्रसन्नेन प्रसन्नं समाहितमानसं प्रत्युक्ता इत्यर्थः । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठतीत्यादेः फलप्रदाः । उक्तं चारणब्राह्मणे नैवं विदुषायान्तेवासिनावन्योन्यस्मद्द्रुह्यानां यो द्रुह्यति भ्रश्यते स्वर्गाल्लोकादिति । ततश्चायं श्लोकार्थः ॥ एतत्कवचं यो यः स स इत्युत्तरत्र ज्ञेयम् । साध्वसाद्भयात् ॥ ३६ ॥

चट्टी – सोऽपि साध्वसाद्भयाद्विमुच्यते। तस्य तु भयं न भवेदेव ॥ ३६,३७ ॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७ ॥

सत्यधर्म – राजदस्य्वादिभ्यः इत्यादिभ्यः कुतश्चिदित्यन्वयः। अथवा प्रेक्षोत्प्रेक्षितात्कुतश्चिदन्यस्मादित्यर्थः ॥ ३७ ॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८ ॥

सत्यधर्म – इयं विद्या सर्वथा सम्पाद्येति धियमुपजनयितुमाख्यायिकामाख्याति ॥ इमामित्यादिना। कौशिकः कुशिकगोत्रभवः मरुधन्वनि। समानौ मरुधन्वानावित्यमरव्याख्यायां म्रियन्ते भूतानीति भृमृशीत्युः। धविर्गत्यर्थः। युवृषीति कनिन्। इति व्याख्याय मरुर्ना गिरिधन्वनोः। धन्वा तु मरुदेशे ना क्लीबे चापि स्थलेऽपि चेत्यभिधानान्निर्जलाचलप्रदेशो वा तादृशस्थलं वेति ज्ञेयम्। अनेनैतन्मन्त्रतनुत्रवतो न क्षेत्रापेक्षा तस्यैव स्वधारकजनद्वारा पवित्रीकरणस्वरससुन्दरतामभिप्रैति। योगारूढस्य नीरनैरपेक्ष्यादिति भावः। यद्वा प्राक् स देशो मरुरनन्तरं मुनिवासतो जलकलित आसीदिति तात्पर्यं ज्ञेयम्। अन्यथाऽतथाभूतं भवेन्मनुमाहात्म्यवर्णनमिति ज्ञेयम्। न चास्थ्नां तथैवावस्थानस्य वक्ष्यमाणत्वान्नीरसामान्याभावो न्याय्य इति वाच्यम्। एतस्यैकान्तिकत्वेन प्रक्षेप्तुः प्रेक्षकस्याभावेन वा महानदीतीरत्वाभावेन वा तस्यान्यथयितुं शक्यत्वात्। मरुधन्वनीमां विद्यां धारयन्द्विजो योगधारणया स्वाङ्गं जहावित्यन्वयः ॥ ३८ ॥

चट्टी – एतद्विद्याप्रभावमितिहासेनाह ॥ इमामिति सार्धैस्त्रिभिः। कौशिकः कुशिकगोत्रे उत्पन्नः। योगधारणया योगाभ्यासेन। मरुधन्वनि निरुदके देशे। अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितम् ॥ ३८ ॥

तस्योपरि विमानेन गन्धर्वपतिरेकदा।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥

सत्यधर्म –यत्र द्विजक्षयस्तस्य स्थलोपरि ॥ ३९ ॥

चट्टी – यत्र द्विजस्य क्षयो देहत्यागः तस्योपरि ॥ ३९ ॥

साङ्गनो न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ।
(विद्यामिमां धारयतो मृतस्यास्थिविलङ्घनात्) ॥ ४० ॥

सत्यधर्म – साङ्गनः सयोषित्कोऽवाक्शिरा विना नमनं गमनादेवंपातो न्यायायात इति भावः । विद्यामिमां धारयतो मृतस्यास्थिविलङ्घनादिति प्रक्षिप्तमिति प्रेक्षावन्तः । यत्र द्विजक्षयस्तस्योपरीतीरणादुपर्येवमवक्तव्यत्वाच्चेति न व्याख्यातम् ॥ ४० ॥

स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ४१ ॥

सत्यधर्म – वालखिल्यवचनादित्यनेन चित्ररथकृतप्रश्नो वालखिल्यैरेतेनेदृशी दशा जाताऽतोऽस्थीनि सुस्थाने क्षिपतस्तव दुरवस्था दूरीभवतीति तदुत्तरं चोद्यमिति सूचयति । विस्मितोऽहो एतन्माहात्म्यं यदस्थ्नां इयं शक्तिरिति विस्मयः । प्राचीसरस्वत्यां प्रास्य क्षिप्त्वा स्वं धाम स्वगृहं नष्टमेतदेनसा तेजो वा । तेजः स्वरूपं च गृहं प्राज्ञैर्धामेति गीयत इत्युक्तेः । पावित्र्यमधिकमायातमिति स्वाङ्गशौद्ध्यसम्पादनार्थमिति बोध्यम् । तीर्थीकुर्वन्ति तीर्थानीत्यादेः ॥ ४१ ॥

य इदं शृणुयात् काले यो धारयति चादृतः ।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४२ ॥

सत्यधर्म – काले विहिते यः शृणुयाद्धारयति तं यः शृणुयाद्यो धारयति तं नमस्यन्ति स सर्वतो भयान्मुच्यते सर्वतो भयात्संसृतेरिति वा ॥ ४२ ॥

चट्टी – सद्यस्तत्क्षणमेव सांगनोऽङ्गनाभिः सहितः सन् । गगनान्न्यपतत् । वालिखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् । स्वं धाम गन्धर्वलोकं जगाम ॥ ४०,४१, ४२ ॥

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभजे विनिर्जित्य मृधेऽसुरान् ॥ ४३ ॥

इति श्रीमद्भागवते षष्ठस्कन्धेऽष्टमोऽध्यायः ।

सत्यधर्म – असुरान्विनिर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे भुक्तवान् ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायामष्टमोऽध्यायः ॥ ६-८ ॥

चट्टी – अधिगतः प्राप्तः सन् मृधे युद्धेऽसुरान्निर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे । एतद्विद्यानुष्ठानेऽपि क्वचित्फलादर्शनमंगवैकल्यात् । न तु विद्याया दुर्बलत्वात् । गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्तितः । अप्रसादाद्गुरोर्विद्या न यथोक्तफलप्रदा । विद्याः कर्माणि च सदा गुरोः प्राप्ताः फलप्रदाः । अन्यथा नैव फलदाः प्रसन्नोक्ताः फलप्रदा इति ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ ६-८ ॥

अथ नवमोऽध्यायः ।

श्रीशुक उवाच

तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ।
सोमपीथं सुरापीथमन्नादमिति शुश्रुमः ॥ १ ॥

सत्यधर्म – ॥ हरिः ॐ ॥ चतुर्मुखप्रमुखापरिहार्यापत्परिहारकमहामाहात्म्यानुसवनश्रवणसमेधमानासमानभक्तियुक्तस्य संसृत्यपसृतिर्भवतीत्यस्मिन्नध्याये निरूप्यते । तत्रादौ यदि क्षमिष्यध्वमुतास्य कर्मेति विधिना बोधितोऽपि विरोचनविश्वासवता विश्वरूपेणाननुरूपं कृतं कर्मेत्यसहमानो गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथे वर्तमानस्य कार्यं भवति शासनमित्याद्यनुशासनात्पाकशासन आत्यन्तिकस्ते वासितानधिवसितमानस इदं शासनमतनोदिति शुको वक्तीति वक्ति ॥ श्रीशुक इति । गुरवश्चैव, शिक्षणीयेषु भावेषु शिक्षणीयाः प्रयत्नतः । उन्मादे बन्धनाद्यैर्वा ताडनं न गुरोः क्वचिदिति गीतातात्पर्याद्युक्तयश्चापातकिगुरुपराः । अत एवोत्तरत्र श्रुतौ च ब्रह्महत्यासहस्राच्च गुरुहत्या विशिष्यत इति सति शास्त्रे ब्रह्महत्यामञ्जलिनेत्येतावदेवाभिधास्यतीत्यभिधत्त इति ध्येयम् । सोमपीथम् । पातृतुदिवचिरिचिसिचिभ्यस्थगिति थक् । घुमास्थेतीत्वम् । सोमं पिबतीति सोमपीथम् । एवं सुरापीथमन्नादमिति त्रीणि शिरांसि तस्य विश्वरूपस्यासन् । इति शुश्रुम इति सम्बन्धः । शुश्रुम इत्यनेनास्यार्थस्य श्रौतत्वं प्रत्यशृणोत् । अविसर्गपाठस्तु सरलः । सार्धश्लोकदशकव्याख्येया श्रुतिश्च द्वितीयाष्टकपञ्चमप्रश्नस्था विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्यासन्सोमपीथं सुरापानमन्नावसनं स प्रत्यक्षं देवेभ्यो भागमवदत्परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षभागं वदन्ति यस्मा एव परोक्षं वदन्ति तस्य भाग उदित सोऽस्मादिन्द्रो बिभेदीदृङ् वै राष्ट्रं विपर्यावर्तयतीति तस्य वज्रमादाय शीर्षाण्यच्छिनद्यत्सोमपानमासीत्स कपिञ्जलोऽभवद्यत्सुरापानं स कलविंको यदन्नादनं स तित्तिरिरिति तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात्तां संवत्सरमबिभस्तं

भूतान्यभ्यक्रोशन्ब्रह्महन्निति स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रगृह्याणेति साऽब्रवीद्वरं वृणे खातात्पराभविष्यतीमन्ये ततो मा पराभूवमिति पुरात इत्यादिका ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ विश्वरूपेन्द्रविमृतिर्वृत्रोत्पत्तिः सुरस्तुतिः ।
हरेरभयसंप्राप्तिश्चाध्यायेऽस्मिन्निरूप्यते ।

सोमस्य पीथः पानं यस्मिंस्तत्तथा । एवं सुरापीथम् । अन्नमत्तीत्यन्नादम् । अत्र विश्वरूपो वै त्वाष्ट्रः । पुरोहितो देवानामासीदित्यादिश्रुतिरनुसंधेया ॥ १ ॥

स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ।
अददाद् यस्य पितरो देवास्तं प्रश्नयन्नृ(सम्प्रश्रयं)प ॥ २ ॥

सत्यधर्म – बर्हिषि यज्ञे उच्चकैरिन्द्रायेदम् । प्रत्यक्षमिन्द्रागच्छेति । भागं हवीरूपं श्रौतमवदद्ददतीति छायया व्याकरोति ॥ अददाद्ददाविति । पितरो देवाश्च यस्य विश्वरूपस्य भागस्येति वा । तं प्रश्नयन् प्राश्नयन् ॥ २ ॥

चट्टी – तस्यासुरपक्षपातमाह ॥ स इति द्वाभ्याम् । स विश्वरूपः । बर्हिषि यज्ञे । प्रत्यक्षं प्रकटं यथा भवति तथा । सप्रश्रयं सविनयं देवेभ्यो भागं हविर्भागमिन्द्रायेदमग्र्य इदमित्यादौ ह्युच्चैरवदत् । तत्र हेतुर्यस्य पितरो देवा इति ॥ २ ॥

स एव हि ददौ भागं परोक्षमसुरान् प्रति ।
यजमानोऽवहद् भागं मातृस्नेहवशानुगः ॥ ३ ॥

सत्यधर्म – य एव प्रत्यक्षं देवादिभ्यो ददौ भागं स एव यजमानो विश्वरूप एव परोक्षमसुरान् प्रति भागमवहदित्यन्वयः । कुतोऽयमतिक्रमोऽस्येत्यत आह ॥ मातृस्नेहवशानुग इति । माता स्नेहवशा च तदनुगो मातृस्नेहवशा मातुला दानवास्तदनुग इति वा ॥ ३ ॥

चट्टी – असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ । तदेवाह । यजमानो देवान्भजमानोऽप्यसौ असुरान् प्रति भागमवहत् । केनाप्युपायेन प्रापयामास । यतो मातृस्नेहवशेनासुराननुगच्छतीत्यर्थः ॥ ३ ॥

तद् देवहेलनं तस्य धर्मालीकं सुरेश्वरः ।
आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद् रुषा ॥ ४ ॥

सत्यधर्म – श्रुतावीट्ग्वै राष्ट्रं पर्यावर्तयतीत्युक्तं मूलीकृत्य भारत उद्योगपर्वणीन्द्रविजये धर्मशल्यसंवादे चोक्ता भीतिहेतू राजेन्द्रपदापहारकामोऽप्युपलक्षणीय इव तत्राप्ययं प्रकार उपलक्षणीय

इति ज्ञेयम् । यथा हि तत्र शल्यः । शृणु राजन्पुरावृत्तमितिहासं पुरातनम् । सभार्येण यथा प्राप्तं दुःखमिन्द्रेण भारत । त्वष्टा प्रजापतिर्य आसीद्देवश्रेष्ठो महातपाः । स पुत्रं वै अङ्गिरसमिन्द्रद्रोहात्किलासृजत् । ऐन्द्रं सम्प्रार्थयं ज्ञानं विश्वरूपो महाद्युतिः । विषादमगमच्छक्र इन्द्रोऽयं मा भवेदित्यादि । मोक्षधर्मे च । ते देवाः सेन्द्रा ब्रह्माणमभिजग्मुरित्यारभ्य ब्रह्मास्थिसम्भूतेन विष्णुप्रविष्टेनेन्द्रो विश्वरूपं जघानेति दधीच्यस्थिभिर्वज्रकरणं तेन विश्वरूपहननोक्तिरत्र वृत्रहननकाल इति व्यत्यस्तिस्तु कल्पभेदकल्पकैकसमाधेया । मातृस्नेहेत्यादिना मोक्षधर्मोक्तः प्रकारोऽप्यत्रानुसन्धेय इत्यसूचि । तथा हि सः । अथ हिरण्यकशिपुं पुरस्कृत्य विश्वरूपमातरं स्वसारमासुरीवरमयाचत । हे स्वसो अयं ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरो देवानां पुरोहितः । प्रत्यक्षं देवेभ्यो भागमहरत्परोक्षमस्माकं ततो देवा वयं क्षीयामस्तदेनं त्वं वारयितुमर्हसि तथा यथाऽस्माद्भजेदिति । अथ विश्वरूपं नन्दनं वनमुपगतं मातोवाच । पुत्र किं परपक्षवर्धनस्त्वं मातुलपक्षं नाशयसि नार्हस्येवं कर्तुमिति । स विश्वरूपो मातुर्वाक्यमनतिक्रमणीयमिति सम्पूज्य हिरण्यकशिपुमगात् । अथ विश्वरूपो मातृपक्षवर्धनोऽभूदित्यादिः ॥ ४,५ ॥

चट्टी – देवहेलनं देवानामश्रेयस्करं तत् । धर्मालीकं कपटधर्ममालक्ष्य ॥ ४ ॥

> **सोमपीथं तु यत् तस्य शिर आसीत् कपिञ्जलः ।**
> **कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः ॥ ५ ॥**

चट्टी – कपिंजलः कलविंकस्तित्तिरिश्च पक्षिविशेषः ॥ ५ ॥

> **ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ।**
> **संवत्सरान्ते तदघं भूताशंसाविशुद्धये ।**
> **भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥**

सत्यधर्म – भूम्यम्बुद्रुमयोषिद्भ्य इति चतुर्धा व्यभजत् । अनेन यदपीश्वर इति सुस्मूर्षेति ज्ञेयम् । हरिरिन्द्रः ॥ ६ ॥

चट्टी – यदपि यद्यपीश्वरस्तां वारयितुं समर्थः । तथाऽपि जग्राह । संवत्सरं तथैव स्थित्वा संवत्सरान्ते भूताक्रोशभीतः सन् भूताशंसाविशुद्धये लोकापवादपरिहाराय हरिरिन्द्रो भूम्यादिभ्यस्तदघं चतुर्धा व्यभजद्विभज्य ददौ ॥ ६ ॥

> **भूमिस्तुरीयं जग्राह खातपूरवरेण वै ।**
> **ईरणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ७ ॥**

सत्यधर्म – तद्धारयितृधरादीनाह॥ भूमिरिति। खातपूरवरेण स्वत एव खातस्य पूरणरूपेण। तत्कलामाकलयन्ति जना इति जगादेरणमूषरमिति। ईरणं शून्यमूषरमित्यमरः। अर्तेः किदिचेतीनत्। इदादिरपि। ईरणं शून्यभाग इत्यजय इति भानुः। तत्स्थानेन जयादिकं स्थाने इत्यभिप्रायः॥ ७॥

चट्टी – तुरीयं चतुर्थं भागं खातस्य गर्तस्य पूरः पूरणं तेन वरेण। यदि खातपूरणं स्वत एव भविष्यति तर्हि गृहीष्यामीत्येवं भाषाबन्धेन जग्राहेत्यर्थः। ईरणमूषरं लवणोपरक्तरस इत्यर्थः। अत एवोषरेऽध्ययनादि निषिध्यते॥ ७॥

तुरीयं छेदरोहेण वरेण जगृहुर्द्रुमाः।
तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते॥ ८॥

सत्यधर्म – तुरीयता तु अन्तेषु रेमिरे धीरा न ते मध्येषु रेमिर इत्यत्रेव निरूप्यमाण-तत्तदर्थस्यावशिष्टत्रिकापेक्षया ज्ञेयेति ज्ञेयम्। छेदरोहेण विदारितोत्कृतप्ररोहणेन निर्यासः। निर्यासोऽपि कषायोऽस्त्रीत्यमरः। निर्यासकषाययोः परस्परवाच्यवाचकभाव इति नैतदमरानुदाहरणीयता भानुनैवमेव बहुस्थले कलविङ्कचटकादिके व्याकरणात्। निःसरद्रसस्तस्याभक्षिता ज्ञेया। न कार्यं वैचित्र्यस्यानु-भवसिद्धत्वात्॥ ८॥

चट्टी – छेदेऽपि पुनारोहः प्ररोहो भवत्विति वरेण। तेषां तेष्वत एव निर्यासो न भयः॥ ८॥

शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः।
रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते॥ ९॥

सत्यधर्म – शश्वत्कामवरेण गर्भसन्दर्भानन्तरमपि सुरतरतिनिश्चितात्मना पूर्वं च चार्वङ्गीणामर्वादि-वदेवेदानीं देवेन्द्रदत्तवरेणेत्थम्भावः। रजोरूपेण। रजः स्यादार्तवगुण इति विश्वः। अंहो ब्रह्महत्या तत्रापि तत्त्रिदिनकं त्याज्यं मासि मासि प्रतिमासमित्यर्थः। तदानीं तथैवावर्तत इति भावः। अथवा मासिमासि च दृश्यते। पद्दन्निति मासित्यादेशः। इदं मुद्रणं तु न कार्यं वैचित्र्यस्यानुभवसिद्धत्वात्॥९॥

चट्टी – शश्वत्कामवरेण यावत्प्रसवं गर्भा उत्पद्यन्ते नैव संभोगवरेण। अत एव रजोदर्शने तत्संगादि न कार्यम्॥ ९॥

द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम्।
तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरिकिल्बिषम्॥ १०॥

सत्यधर्म – आपो द्रव्यभूयोवरेण द्रव्येषु पञ्चसु भूतेषु भूयो भूयस्त्वं तद्रूपवरेण । भूयस्त्वाच्चापां तापापनोदो भूयस्त्वमित्यादेः । बुद्बुदादिकं चादृश्यम् । हरिकिल्बिषमिन्द्रकृतविश्वरूपहत्यारूपम् । भूम्यम्बुद्रुमयोषित्सु बुद्बुद इति प्रक्रमानुगुण्येनावनिनिरूपणानन्तरमापो निरूपणीयास्तथाऽपि सर्वाधारापोधरायाः सर्वोपजीविनां जीवानामध्यासीनोपजीव्यतावित्यै प्रथममेकं भूतं भूतमेकमन्ते चेद्भूतसम्पुटिका स्फुटोक्ता भवतीति निर्दिदेशैवमिति मननीयम् । श्रुतौ पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रतिगृहाणेति । वनस्पतीनुपासीददस्यै तृतीयं प्रतिगृह्णीष्वेति । स स्त्रीमुपासीददस्यै तृतीयं प्रतिगृह्णीतेति भागत्रैविध्यस्यैवोक्तेरापः कुतः सङ्गृहीतास्तद्ग्राहकत्वेनात्रेति चेत् । सत्यम् । सत्यवतीसुतस्यानन्तशास्त्रद्रष्टृत्वेनैतदर्थकप्रत्यूहेन व्याख्यानतो विशेषप्रतिपत्तिरित्यादिभ्यः श्रुतावुपलक्षणीयत्वाभिप्रायेण ता गृहीताः । तथा च मोक्षधर्मे । ब्रह्मवध्यां च चतुर्षु स्थानेषु वनिताग्निवनस्पतिगोषु व्यभजदिति । तत्रात्र च किञ्चित्स्थानव्यत्यासः कल्पभेदसमाधेयः ॥ १० ॥

चट्टी – द्रव्याणां पञ्चानां भूतानां मध्ये स्वभूयस्त्वलक्षणेन वरेण । तापापनोदभूयस्त्वमंभसो व्रत्तयस्त्विमामित्युक्तेः । यद्वा । यस्मिन्द्रव्ये क्षीरादावापो मिश्रा भवेयुस्तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण । यद्वा । स्वस्यैव निर्झरोद्गमनादिना भूयस्त्वं वरेण । हरिकिल्बिषमिन्द्रपापम् ॥ १० ॥

हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ।
इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥ ११ ॥

सत्यधर्म – नष्टपुत्रस्त्वष्टा किं तूष्णीकोऽभवदथवैतद्व्यथात इन्द्रमथकं किञ्चित्सम्पादयितुं यतेतेत्यतः साम्नायसम्मतिद्वितीयमूरीकृत्याह ॥ हतपुत्र इति । इन्द्रायेन्द्रं घातयितुम् । शत्रवे शातयित्र्यर्थं जुहाव हुतवान् । इन्द्रायशत्रव इति पदमेकं वा । इन्द्रस्यायो व्ययो येन स चासौ शत्रुश्च तदर्थम् । इन्द्रशत्रो इदन्तु श्रौतार्थसङ्ग्राहकं श्रुतिश्च यदब्रवीत्स्वाहेन्द्रशत्रुर्वधस्वेति तस्मादस्येन्द्र एव शत्रुरभवदित्येतज्जातीयका । तत्र स्वरसतः स्वरादिव्यत्यासतत्फलादिचिन्ता । पिपिष इन्द्रशत्रुरिति ऋग्व्याख्यावसरे यस्य योद्धेत्यारभ्य बहुव्रीहिर्हीति सूत्रं पुराणमित्यन्तभाष्ये इन्द्रशत्रुशब्दस्येत्यारभ्यान्यथासमासान्तोदात्तत्वं स्यादितीत्यन्तटीकायामिव चोदाहरणदर्शनादित्याह ॥ स्वाहेति । इत्याद्यारभ्य सविलासमयं संसार आहिताग्न्यादित्वाद्धेत्येतदन्तसानुव्याख्यसुधायां निरूपितमनुसन्धेयमिति नात्र पौरुषेये कृत्याभावात्साधितेति ज्ञेयम् । इन्द्रशत्रो इन्द्रः शत्रुर्यस्य तत्सम्बुद्धिः । वर्धस्वेत्यन्तो न मन्त्राणामयातयामत्वमुभयत्वमित्येतस्य नियम इति द्योतयति । पुत्रहंतृत्वात् मम भ्रातृहन्तृत्वात्तव च विद्विषम् । तव त्वधुनाऽनुद्भूतेरनुभवाभावो मम तु न तथेत्यप्याह ॥ विद्विषमिति । विदः सुतमृतिं जानतो मम विषं तत्तुलम् । विविना द्विषमिति भाषणेन पूर्तौ

यद्वीत्यवादीत्तेनावसरमेतदर्थस्य व्यतारीत्पाराशर्य इत्यार्यैर्विभावनीयम् । माचिरम् । आलस्यादमृतं विषमित्युक्तेः ॥ ११ ॥

चट्टी – इन्द्रायेन्द्रं हन्तुं शत्रवे शत्रूत्पत्यै । तदेवाह ॥ इन्द्रशत्रो विवर्धस्वेति । अत्र चेन्द्रशत्रु पदस्याद्युदात्तत्वाद्बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्मृतेः बहुव्रीहिलक्षणापत्त्या इन्द्र एव तस्य शत्रुरभूत् ॥ तदुक्तम् ॥ श्रुत्या यदब्रवीत्स्वाहेन्द्रशत्रुर्वर्धस्वेति । तस्मादस्येन्द्रः शत्रुरभवदिति । तथा च शिक्षायाम् । मन्त्रैर्हीनाः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स्ववाग्वज्रो यजमानं हिनस्ति तथेन्द्रशत्रुः स्वरतोऽपराधादिति ॥ ११ ॥

अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ।
कृतान्त इव लोकानां युगान्तसमये यथा ॥ १२ ॥

सत्यधर्म – अथाव्हानादनन्तरमेव । अनेन तस्यावन्ध्यसन्धता सूचिता । अन्वाहार्यपचनात् दक्षिणाग्नेः उत्थित इत्यन्वयः । कृतान्त इति वचनेन त्वष्टुर्न हि जहीति वचनं जिव्होपरितनं किन्तु तस्य सिद्धान्त एव तादृश इति मनःपूर्वकता च शरीरमारणप्रयत्नस्येति ध्वनयति । इव एव । कृतान्तो यमसिद्धान्तावित्यमरः ॥ १२ ॥

चट्टी – अन्वाहार्यपचनाद्दक्षिणाग्नेः ॥ १२ ॥

विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ।
दग्धशैलप्रतीकाशं सन्ध्याभ्रानीकवाससम् ।
तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १३ ॥

सत्यधर्म – इषुमात्रं बाणशतप्रमाणम् । प्रमाणे द्वयसजित्यादिनोक्तमात्रच्प्रत्ययान्तोऽयम् । इषुमात्रमिषुमात्रमिति श्रौतवीप्साविजिज्ञापयिषयाऽत्र दिने दिने इत्युक्तिः । श्लोकपञ्चकमखण्डान्वयि ॥ वासो वर्चोऽन्यतरपाठेऽप्यभ्रानीकशब्दः कलहवाची । सङ्घर्षेण कान्तिरुत्कृष्यत इति भावः । अनीकं तु रणे सैन्य इति विश्वः । चक्रं चानीकमस्त्रियामित्यमरव्याख्यायां हस्त्यादिबलसमूहनामेत्युक्तेः समूह इति वा ॥ १३ ॥

चट्टी – तं वीक्ष्य वित्रस्ता लोकाः । दशदिशो दुद्रुवुरिति पञ्चमेनान्वयः । कथंभूतं विष्वक्समन्ततः । इषुविक्षेपमात्रं प्रतिदिनं वर्धमानम् । दग्धशैलप्रतीकाशं कृष्णवर्णं संध्याकालाभ्रमालावत् कपिशं वासो यस्य तम् । तप्तताम्रवच्छिखाश्मश्रूणि च यस्य तम् । मध्यान्हार्कवदुग्रलोचने यस्य तम् ॥ १३ ॥

देदीप्यमानत्रिशिखे शूल आरोप्य रोदसी ।
नृत्यन्तमुन्नदन्तं च चालयन्तं पदा महीम् ॥ १४ ॥

सत्यधर्म – त्रिशिखे तिस्रः शिखा यस्य तस्मिन् । रोदसी द्यावापृथिव्यौ दिवि भूमौ पृथक् पृथक् । सहप्रयोगेऽप्यनयो रोदस्यावपि रोदसीति विश्वः । महीं चालयन्तं कम्पनं चलिरिति स्मरणादन्यथाकुर्वन्तमित्यर्थः ॥ १४ ॥

चट्टी – तिस्रः शिखाः शिरांसि यस्मिन् शूले ॥ १४ ॥

दरीगम्भीरवक्त्रेण पिबन्तं च नभस्तलम् ।
लिहन्तं जिह्वयर्क्षाणि ग्रसन्तं भुवनत्रयम् ॥ १५ ॥

सत्यधर्म – पिबन्तमित्यादाविवेति योज्यम् । नभस्थलमम्बराधोभागम् । तलं स्वरूपाधरयोरिति विश्वः । नभः पिबन्तमित्येव वाऽन्वयः । तन्नभः कीदृशमित्यतस्तलमिति । तलमिन्द्रनीलमिति सुधोक्तेस्तद्वद्भियमानम् । आकाशो नीलिमोदेतीति श्रुतेः । ऋक्षाणि नक्षत्राणि नक्षत्रमृक्ष-मित्यमरः ॥ १५ ॥

चट्टी – दरीगंभीरवक्त्रेण गुहावदगाधमुखेन ॥ १५ ॥

महता रौद्रदंष्ट्रेण जृम्भयन्तं मुहुर्मुहुः ।
वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १६ ॥

सत्यधर्म – महता । रुद्रे क्रूरे दंष्ट्रे यस्य तत्तदेव रौद्रदंष्ट्रम् तेन । अन्यथा रौद्रा दंष्ट्रं रोहीष्टनिति वा स्यात् ॥ १६ ॥

चट्टी – रौद्ररूपे दंष्ट्रे यस्य तेन । महता विस्तीर्णेन मुखेन जृंभयन्तं व्याददानम् ॥ १६ ॥

येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना ।
स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १७ ॥

सत्यधर्म – स इमांल्लोकानावृणोद्यदिमांल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वमिति श्रुत्यनुमत्या नाम निर्वक्ति ॥ येनेति । तमसा त्वाष्ट्रमूर्तिना मूर्तिर्मूर्तं त्वाष्ट्रं च तन्मूर्तं च त्वाष्ट्रमूर्तं तदस्यास्तीति त्वाष्ट्रमूर्ती तेन त्वाष्ट्रमूर्तिना । त्वाष्ट्री मूर्तिर्यस्येति विग्रहे त्वाष्ट्रीमूर्तिनेति वृद्धिनिमित्तेति पुंवद्भावनिषेधादिति ज्ञेयम् । त्वष्टैव त्वाष्ट्रः स्वार्थेऽण् तस्मान्मूर्तिर्यस्य तेनेति वा तमसेवेत्यर्थः । असुरावेशेन पितुरभि-निवेशेनासदाचारत्वात्काश्यपस्तु तामसोऽसुरश्च श्रुतावावृणोदित्येवोक्तेस्तमसोऽनभिधानाच्च । यथोक्तं नीचा वया इत्यृग्भाष्यटीकयोः । वृत्रो ह्यभूद्दनुजः कश्यपाच्च पापात्माऽसौ वैष्णवस्त्वष्टृजातः । ननु दनुः

कश्यपभार्या, न च वृत्रः कश्यपपुत्रः किन्तु त्वष्टुस्तत्कथं दनुर्वृत्रमातेत्यत आह ।। वृत्रो हीति । द्वौ वृत्रौ तत्रैकः कश्यपाद्दनुजोऽभूद्दैत्यत्वं च तामसत्वादपरस्त्वष्टृजात इत्यविरोधः । कुतो द्वयोः कल्पना । असौ दनुजः पापात्मा श्रूयते । दीर्घं तम अशयदिन्द्रशत्रुरिति । त्वष्टृजातस्तु वैष्णवः पुण्यात्मा प्रसिद्धोऽतो द्वौ कल्प्याविति । अहो धर्मिष्ठता तस्य वृत्रस्यामिततेजसः । अस्य विज्ञानमतुलं विष्णुभक्तिश्च तादृशीति मोक्षधर्मोक्तेस्त्वाष्ट्रो वैष्णवः । वृणोतीति वृत्रः । वृत्रञ् औणादिकप्रत्ययः । अहन्वृत्रमित्यृक्टीकायां वृणोते रूपमित्युक्तेः । वृत्रं जघन्वाँ अपतद्ववारेत्यृग्भाष्यटीकयोः । वृत्रं हत्वा तमहिं चाशु शुक्रस्तदा शक्रो जघन्वान् हत्वेति यावत् । अहिं च हत्वा तथोत्तरासुरधरः पुत्र आसीद्दानुः शये हतवत्सा न धेनुः । दानुर्वृत्रमाता दनुः सा तत्सुतोऽहिश्च तासाम् । वृत्रस्य सुतोऽहिर्यत्सुतः शीर्बभूवेति पितुः पातानन्तरमेव शेताऽभवदिति व्याख्यानादयं तदन्य इति स्पष्टं ज्ञायते । पापः स्वप्रविष्टपापिकत्वात् । परं अदारुण इति छेदः । तद्वृत्रवदत्यन्तदारुणस्तमःश्रमयोग्यः क्रूरो नेति स तथा । परमदो महामदः स चासावरुणश्च कोपेन देहारुणिमविस्मितघोरकारनिरीक्षणादिना अत्रैवोत्तरत्र च परीक्षित्प्रश्नोत्तरप्रस्तावे तथा वृत्रेन्द्रसंवादे च तद्योग्यतायाः स्पष्टयिष्यमाणत्वाद्वैष्णवता ज्ञेया ।।१७।।

चट्टी – निरुक्तिपूर्वकं निर्दिशति ।। येनेति । येन कारणेन त्वाष्ट्रमूर्तिना त्वाष्ट्रा त्वष्ट्रोदिता मूर्तिः शरीरं यस्य तेन । तमसा तमोगुणमयेनासुरेणेमा लोका आवृताः । तेन कारणेन स वृत्र इति प्रोक्त इत्यनेन विवृणोति । आवृणोति व्याप्नोतीति वृत्रः । वृञ् आवरण इति धातोः इत्युक्तं भवति । तथा च श्रुतिः। स इमांल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वमिति ।। १७ ।।

तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ।
स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत् तानि कृत्स्नशः ।। १८ ।।

सत्यधर्म – दिव्यानि च तानि अस्त्रशस्त्रौघानि चेति विग्रहः । अनेनोत्तरत्र तानीति नपुंसकलिङ्गेनौघपरामर्शः कथमिति परास्तं वेदितव्यम् । स वृत्रस्तानि कृत्स्नशोऽग्रसज्जग्राह ।। १८ ।।

चट्टी – अग्रसद्भक्षितवान् ।। १८ ।।

ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः(भ्रष्टचेतसः) ।
प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः ।। १९ ।।

सत्यधर्म – ग्रस्ततेजसो दीप्तिरहिता ग्रस्तपराक्रमा वा । प्रत्यञ्चं प्रतीचीस्थम् । प्रतिस्वमञ्चतीति प्रत्यञ्चम् । अन्तर्यामिणमिति केचित् । निहितेक्षणाः ।। १९ ।।

चट्टी – भ्रष्टचेतसः कर्तव्यविषयकज्ञानशून्याः । प्रत्यंमन्तर्यामिणम् । उपतस्थुरुपासीदितवन्तः । त्रिभुवनस्य तेन व्याप्तत्वात् क्वापि गमनासंभवात् । तत्रैव स्थित्वा तुष्टुवुरिति भावः ।। १९ ।।

देवा ऊचुः

वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ।
हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः ।। २० ।।

तात्पर्यम् – 'कालोऽन्तकः प्रधानं च मृत्युरव्यक्तमित्यपि । उच्यते प्रकृतिः सूक्ष्मा श्रीर्भूर्दुर्गेति नामभिः । सैव ब्रह्मादिभयदा विष्णोश्च वशवर्तिनी । अभयापि बिभेतीव तद्वशत्वादुदीर्यत' इति तु माहात्म्ये ।। २० ।।

सत्यधर्म – वाय्वम्बरेत्यादिपद्ये यमस्यैव ब्रह्मादिभयदत्वं शरणप्राप्यभगवद्भीतत्वमुच्यत इत्यन्यथाप्रतीतिं प्रमाणेन प्रच्यावयन्व्याचष्टे ।। कालोऽन्तक इति । सूक्ष्मा प्रकृतिः कालादिरित्युच्यते । श्रीभूर्दुर्गेति नामभिरपि श्रीरिति भूरिति दुर्गेति नामभिरुच्यत इति सम्बन्धः । यदर्थमन्त-कादिनामकत्वमुक्तं तदुक्तीकरोति ।। सैव श्रीः प्रकृतिरेवेति । स्वयं विष्णोर्वशवर्तिनी यद्यप्यभया बिभेतीवोदीर्यते तत्रापि निमित्तमुदीर्यते ।। तद्वशत्वादिति । अथवा तद्वशवर्तिनीति ब्रह्मादिभयदा भगवती कुत इत्यत आह ।। तद्वशत्वादिति । ब्रह्मादिभयदेत्यत्र ब्रह्मपदार्थान्वयः तेषां तद्वशत्वात् । ते वशे यस्याः सा तद्वशा । त्वे चेति ह्रस्वः । भागवांश्च तेऽङ्के च तच्चाव्यक्तं चेति तौ ते वा । त्यदादितः शेषे पुंनपुंसकतालिङ्गवचनानीत्युक्तेः । त्यदादीनि सर्वैर्नित्यमित्युक्तेस्तयोर्नित्यमुक्तत्वादतो वशवर्तिनीति वा तद्वशत्वादिति वाऽतिरिक्तमिति रिक्तोक्तिरिति ज्ञेयम् । तुशब्दो रमारमारसणो-भयभययुतताविशेषसूचकः। माहात्म्यं नाम ग्रन्थः ।। ततश्च श्लोको व्याक्रियते ।। वाय्वम्बराग्न्यप्क्षितय एतदभिमानिनः समेषामविशेषेण रमास्वामिकत्वावगत्यै कोऽपि क्रमो नादृत इति मन्तव्यम् । त्रिलोका विशेषेण समा ब्रह्मादयः ते वयमुद्विजन्तो भीताः सन्तो यस्मै बलिमर्चनोपचारं हरामः । लोटो लङ्वदिति लङ्वद्भावे नित्यं ङित इति समः सलोपः । असौ सोऽन्तकः श्रीर्यस्माद्बिभेति बिभेतीव । ततः सः । प्रथमान्तात्तसिः । नः शरणमरणमस्तु । ततोनस्तताव्याप्ताद्भगवत ऊनोऽव्याप्तोऽथवा सर्वतो न्यून इति । यस्मादन्तको बिभेति तस्माच्छ्रीरमादरणं रक्षणमस्त्विति वा ।। २० ।।

चट्टी – महाभयपरित्राणमन्यतो न भवेदिति । हरिमेव प्रपद्यन्ते सुराः शरणमातुराः । वाय्वादीनि पञ्चमहाभूतानि तैर्निमित्ताश्च त्रयो लोकाश्च तेषामधिपतयो ब्रह्मादयस्ततोऽर्वाचीना वयं सर्वे यस्मा अन्तकाय दुर्गारूपेण सर्वसंहर्तृत्वादन्तकशब्दवाच्याय श्रीतत्त्वाय । कालोऽन्तकः प्रधानं चेत्यादि वचनात् । उद्विजन्तः सन्तो बलिं वहामः । असावप्यन्तको यस्माद्बिभेति तदधीनत्वाद्बिभेति वा । ततः परमेश्वरादेव नोऽस्माकमरणं रक्षणमस्तु ।। २० ।।

अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ।
विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितित(पिप)र्ति सिन्धुम् ॥ २१ ॥

सत्यधर्म – अविस्मितं गर्ववर्जितं विश्वविस्मापकत्वं स्वस्यैवेत्येतत्कुतोऽकुतूहलं वा । प्रशान्तं रागादित्यागिनम् । स्वेनैव स्वरूपभूतेन लाभेनानन्दादिप्राप्त्या पूर्णकामं नाभिलषितम् । समं तत्तद्योग्यतामनुसृत्य निर्दोषं वा । विनाऽपरमावृतं वा तन्त्रं वाऽनुत्तमम् । तस्य दशैवमित्याख्याति ॥ उपसर्पतीति । स्वातन्त्र्येणायं तारक इति तारकमारकमाराधयति । श्वलाङ्गूलेन शुनः पुच्छेन करकलितेन सिन्धुं समुद्रमतितितर्ति तरितुमिच्छति । अपि माषं मषमिति नीत्या लाङ्गुलं ज्ञेयम् । अतिपिपर्तीति पाठे पारं गन्तुमिच्छतीत्यर्थः । हि स यथा बालिशो मूर्खस्तथाऽयं तदुपसर्पणेन संसृतिसिन्धुं तरितुमन्तरा हरिचरणपरिचरणतरीतारिकां काङ्क्षन्किल बालिश इति दृष्टान्तदार्ष्टान्तिकभावो ज्ञेयः ॥ २१ ॥

चट्टी – तत एवारणमित्यवधारणे हेतुमाहुः ॥ अविस्मितमिति । अविस्मितं निरहंकारम् । कुतूहलशून्यं वा । कुतः प्रशान्तं वागादिशून्यम् । तत्कुतः स्वेनैव लाभेन स्वरूपानन्दानुभवेनैव परिपूर्णकामम् । सममन्तर्याम्यादिसर्वरूपेष्वेकप्रकारम् । एवंभूतं परमेश्वरं विनाऽपरं यः शरणार्थमुपसर्पति स हि बालिशोऽज्ञः । यतोऽसौ शुनोलाङ्गुलेन पुच्छेन दीर्घाभावस्त्वार्षः । समुद्रमतिपिपर्ति तर्तुमिच्छतीत्यर्थः यथाऽनेन समुद्रतरणं न संभवति तथाऽनीश्वराश्रयणेन व्यसनार्णवतरणं न भवतीति भावः ॥ २१ ॥

यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाऽऽबध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद् दुरन्तात् त्राता श्रितान् वारिचरोऽपि नूनम् ॥ २२ ॥

सत्यधर्म – ननु कोऽपि देवदेवसेवनेन व्यसननिरसनं सम्पादितवान्वर्तेत चेदेव सत्यं व्रतमेतद्भवेदित्यतः सत्यव्रतादिरेवमित्यावेदयन्सन्देहं मन्दीकरोति ॥ यस्येत्यादिना । यस्य मत्स्यस्योरुशृङ्गे महति विषाणे । जगतीं भूमयीम् । जगती रत्नगर्भा भूरित्यमरः । स्वनावं स्वेनैव प्रकल्प्य प्रेषितां तरीम् । उपस्थास्यति नौः । काचिद्विशाला त्वां मयेरितेति वक्ष्यमाणत्वादष्टमे । बन्धोऽपि महाहिनेति वक्ष्यमाणत्वाच्च तत्रैव । अहिना ययाऽऽबद्ध्य मनुः सत्यव्रतो दुर्गं अपरोपायेन तरितुमशक्यमवान्तरलयलक्षणं ततार । स एव वारिचरो नीरसञ्चारी दुरन्ताद्दुष्पाराद्दुःसाधनिर्णयाद्वा । त्वाष्ट्रभयात् नोऽपि अस्मांस्त्राताऽस्तु । न च यूयं मदेकशरणा इत्यत ईरयन्ति ॥ नूनं श्रितान् इति । निश्चयेनाश्रितान् । ननु सत्स्वितरेष्ववतारेषु वारिचरः किमर्थमत्यर्थमर्थित इति चेन्न । अग्निसमुद्भूत-दुर्भूतघातस्योदकोदितदयोदयसाध्यता न्याय्येत्याचार्यैतैरेतत्परिचर्येत्यवेहि । त्राता रक्षिष्यति । नीरचर इत्यनीरयन्नीरयन्नेव वारिचर इत्येतर्हि तदन्तर्हितस्तत्तेजउत्तेजकोऽप्ययमेव । वा अरिचरः अरेरन्तरपि चरतीति स तथेति समुच्चयार्थो वाशब्दः । वा समुच्चय इति विश्वः । इति द्योतयामासेत्यवसेयम् ॥२२॥

चट्टी – भयवता पुरुषेण एव रक्षक इति दृष्ट इत्याहुः ॥ यस्येति द्वाभ्याम् । यस्य मत्स्योरुशृङ्गे जगतीं पृथ्वीमेव स्वां नावमाबद्ध्वा सम्यक् बद्ध्वा मनुः सत्यव्रतो यथावद्दुर्गं संकटं ततार । स एव वारिचरो मत्स्यावतारो नोऽस्मानप्याश्रितान्सतो नूनं त्राता रक्षिष्यति ॥ २२ ॥

पुरा स्वयम्भूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले ।
एकोऽरविन्दात् पतितस्ततार तस्माद् भयाद् येन स नोऽस्तु पारः ॥ २३ ॥

तात्पर्यम् – 'यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थिता । एकस्तत्राबिभेद्ब्रह्मा विचार्य भयमत्यगात् । अन्तर्गतो हरिस्तस्य ध्यातो भयमपानुददि'ति च ॥ 'जनिष्यतां जनानां तु स्वभावानां प्रसिद्धये । ज्ञानादिगुणपूर्णस्य ब्रह्मणोऽपि क्षणार्धगाः । भयादिका भवन्तीव कथं तस्मिन्स्थिरालया' इति च ॥ 'भगवत्प्रीतये नित्यं ब्रह्मणो ये भयादयः । न वृथा तस्य भावः स्यात्कश्चित्तेऽपि क्षणार्धगाः । अज्ञानं च चतुर्वारं द्विवारं भयमेव च । शोकोऽपि तावान्नान्यत्र कदाचिद्ब्रह्मणो भवेत् । तत्रापि भगवत्प्रीत्या उन्नत्यैवास्य तद्भवेदि'ति ब्रह्मतर्के ॥ २३ ॥

सत्यधर्मा – पुरा स्वयम्भूरपि संयमाम्भसीति श्लोके जलानिलजलजादयो जडभूता एवेति मतमवमतीकर्तुमादौ मानतीर्थो मानमाह ॥ यत्रेति । यत्र लये । आदिपदेनोर्मिरवादिपरिग्रहः । वायुरुद्मुदकम् । उदकवाच्ययमुदशब्दः स्वतन्त्रः । रोमकूपलयोदिनेत्यनुव्याख्यानव्याख्यानसुधायाम् उदमस्यास्तीत्युदीति एतद्वाक्यार्थचन्द्रिकायां च । उदकवाचिनोदन्तादुदशब्दादित्याद्युक्तेः । प्रकृती रमा । ब्रह्मा तत्रैक एव सन्बिभेत् लङ् भीतिमाप । विचार्य भयमत्यगात् । स्वसामर्थ्येन किमित्यतो नेत्याह ॥ अन्तर्गत इति । एतदन्तर्गतो हरिर्भयमेकाकितायातमपानुदत्परिहृतवान् । पद्मभवे भयं नास्मदादिवदिति वदति ॥ जनिष्यतामिति । जनानामजानमानानाम् । चोऽवधारणे क्षणार्धगा एवेति सम्बध्यते । लयेऽपीत्यपिरन्वेति । ज्ञानादिगुणपूर्णस्य योग्यतामनुसृत्य ज्ञानादिगुणः परमात्मा तेनैष पूर्णस्तस्य भयादिका भया ज्ञानशोकादयः क्षणार्धगास्तेऽपि तस्मिन् भवन्ति न स्थिराः । न केवलं लोकस्वभावप्रसिद्धिसिद्धिः फलं किन्तु श्रीप्रेष्ठप्रीतिरपीति प्रमाणत आह ॥ भगवत्प्रीतय इति । तस्य ब्रह्मणः कश्चिदपि भावो वृथा न । तेऽपि भयादय एतत्प्रदर्शनं भवतु भगवत्प्रीत्यै तदपि यद्द्वारमिति, शङ्कां प्रसक्ताप्रसक्तसङ्गत्यै तत्प्रमाणतो द्वाभ्यां पराह ॥ अज्ञानं चेति । एवेत्यर्थः संश्चतुर्वारमेवेत्यन्वेति । द्विवारमेव भयं शोकोऽपि तावान् । अव्यवहितद्विवारपरामर्शः । द्विवारं जात इत्यर्थः । अव्यवस्थान्यत्रेत्यस्य पश्चादिवारमन्यत्रेत्यर्थः । ब्रह्मणोऽन्यत्राधिकारिणि तावान्भवेदिति वा । तत्रापि तदवस्थायामपि तद्भयादिकं भगवत्प्रीत्या जनिताया उन्नत्यै उत्कर्षाय भवेत् । एवमन्वये भगवत्प्रीतय इति प्रागुक्तेः पुनर्भगवत्प्रीत्या इति कुत उक्तिरिति परास्तम् ।

अज्ञानं तु भावरूपं ज्ञानाभावरूपस्य भगवद्विषयत्वाच्चतुर्वारमिति नियन्तुमयोग्यत्वात्। जगद्विषये सदाऽप्यालोचननियमाभावेनानालोचनदशायां बहुवारमज्ञानसम्भवेन पूर्वोक्तदोषानिवृत्तेः । अज्ञानं भावरूपं दुःखस्पृष्टस्य दुःखस्पृष्टं तदस्पृष्टमिति द्वेधैव चेतनं मतम् । नित्याऽदुःखा रमाऽन्ये तु स्पृष्टदुःखाः समस्तश इति सहटीकातत्त्वसङ्ख्यानात्। ब्रह्मणोऽप्यल्पदुःखं स्यात्तदप्यनभिमानतः । तस्यात्मसम्बन्धितया भोगाभावात्कथञ्चनेति बृहद्भाष्ये विशेष्यदुःखस्पृष्टत्वोक्तेश्च । तच्चाज्ञानं ज्ञानं प्रतिबध्नाति । अन्ये त्वज्ञानसंयुक्ता मोहमीयुरित्यादेश्च । किञ्च तत्त्वोद्योते पुंगतमेव हि तम इति टीकणक्षणे तम इव तमो भावरूपमज्ञानं ज्ञानप्रतिबन्धकत्वादित्युक्तेः । अज्ञानं त्रिवारमेकवारं चेत्याहत्य चतुर्वारम् । उक्तं च भागवते तृतीये नवमेऽध्याये । कञ्जमु लोकतन्त्रं नात्मा-नमद्धाऽविददादिदेवः । क एष योऽसावहमब्जपृष्ट एतत्कुतो वाऽब्जमनन्यदप्सु इति । स्वाज्ञानं पद्मामतिरात्मामतिरित्यज्ञानं त्रिवारम्। उक्तं च द्वितीयतात्पर्ये। स ब्रह्माऽचिन्तयत्कुतो नु पद्मं ब्रह्मणः स्यादितीति। यज्ञादिज्ञानाभावश्च संवत्सरनाम्नो विधेः। यथोक्तं बृहद्भाष्ये। इच्छतो ब्रह्मयजनं ब्रह्मणः साधनास्मृतेः। श्रमात्तापाच्च तं देहं त्यक्तुमिच्छा बभूव हेत्यारभ्य महासंहितायामित्यन्तमेतत्संसरणम्।

भयं च द्विवारं तदपि स भाणमकरोदिति व्याख्यावसरे बृहद्भाष्ये। संवत्सरो ब्रह्मणोऽभाणिति वचो निस्सृतं भयतो मुखात्। तस्याभिमानिनीत्यादिनोक्तम्। द्वितीयं प्रस्तुतमेव। नन्वशरीरो वायुरिति श्रुतेस्तदात्मकस्य कस्य तनुरेव नास्ति कथं तन्निमित्तकशोकादिरिति । ब्रह्मा निरभिमानि-त्वाच्छरीर्यप्यशरीरवान् । नित्यानन्दोपयोग्यन्ये कामस्योज्झिततिस्तदा । बहिरर्थविनिर्मुक्तस्तथाऽपि तनुधारणात्। अमूढो मूढ इतिवदुच्यते। सर्वेषां ब्रह्मपदवीयोग्यानां पूर्वमेव तु। अभावस्त्वपरोक्षस्य मोहो ज्ञानस्य भण्यते। ब्रह्मणस्त्वंशरूपेषु ब्रह्मगायत्रिभावे तु नांशावतरणं क्वचित्। शतजन्मसु पूर्वं तु ज्ञानोदय इतीर्यते । आपरोक्ष्येण पारोक्ष्यात्पूर्णज्ञानं सदैव त्वित्येकादशसप्तमेऽध्याये । तथैव द्वितीयस्कन्धे नवमे कर्मणा विमोहित इत्यत्रेदं कार्यमित्यजानतीति ज्ञानाभावस्य । तथैवैकाद-शसप्तमाध्याये च ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीरिति प्रश्नोत्तराज्ञानप्रतीतिवारणाय प्रश्नो बीजोऽस्येति प्रश्नबीजं परिहारं गुणानां चेतसश्च कर्म कारणमिति मन्वानः कर्मधीः । ब्रह्मा पृष्टस्तु योगीन्द्रैः सनकाद्यैर्मनोगतैः । ब्रह्मा मनोजैः कारणं विषयेष्वद्धा कर्मेति प्रतिपद्यत । हेतुरन्योऽपि तत्रास्तीत्येवं जानन्नपि प्रभुः । विशेषतो मनस्तत्राद्धा जानन्हरेः प्रियम् । स्वात्मना परिहारोक्तिस्तदाद्धाऽऽसीद्धरेः प्रिया। अतः स तत्प्रियं जानन्नाकरोत्तद्विचारणम्। तमेवाचिन्तयद्देवः प्रश्ननिर्णयकारणात् । भ्रमतीव मनः क्वापि ब्रह्मणो विष्णुमायया । सर्वज्ञस्यापि यत्रात्मा वक्तुमिच्छेज्जनार्दनः । न ज्ञात्वा चिन्तितं तस्य चिन्तयत्यमुमेव तु । न स्वयं चिन्तयत्यर्थं स हि तद्भाववित्सदा। अन्ये त्वज्ञानसंयुक्ता मोहमीयुर्यथाक्रमम्। तस्य मध्यन्दिने सूर्ये क्षोभवत्क्षोभमात्रकम्।

नैवाज्ञानं यथा सूर्ये तमो नास्ति कदाचनेति भावविवेक इति । तत्रैव स्थानान्तरे । बहुलवमन्वेषणमियन्मनीषिणः किं कारणमित्याशङ्क्योक्तं तत्तात्पर्ये । ईश्वराभिप्रायविदा ब्रह्मणा तप तपेत्युपदेशलाभाय बहुकालमन्वेषणं कृतमित्याद्युक्त्या परिहरणीयम् ।

ननु भयद्वयहेत्वज्ञानद्वयमतिरिच्यतेऽतश्चतुर्वारमिति कथमिति चेत् । ज्ञानकार्यं मुख्यतो भयम् । सर्पज्ञानाद्भयदर्शनात् । तदज्ञानिनो भयाभावस्यानुभवसिद्धत्वात् । ननु च यस्य पद्मजविरिञ्चस्य भयं जातं स महाप्रलयानन्तरकालीनः कुतो ब्रह्मदिनप्रलयानन्तरसृष्टिकालिकपद्मस्य । उदकं वायुना शुष्कं भिन्नं पद्ममभूद्धरेरिति । तस्यासनविधानार्थं पृथिवी पद्ममुच्यत इति प्रमाणेन भगवत्पादैरुद-काद्यात्मकत्वस्योक्तत्वात् । अस्य पद्मस्य तु यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थितेति प्रमाणेनेतैरेव लक्ष्म्यात्मकत्वस्योक्तत्वात् । न ह्येकस्मिन्काल एकस्यैव पद्मस्य तूभयत्रोभयात्मकत्वं सम्भवति । न च यत्र वायूदपद्मादीति वाक्यं लक्ष्म्यभिमानिपरमिति वाच्यम् । अस्य वाक्यस्य भागवततात्पर्य-निर्णायकत्वेनार्थान्तरेऽनवकाशात् । न चोक्तसृष्टिद्वयातिरिक्तसृष्टिकाले विरिञ्चस्य पद्मजत्वमस्ति । तत्र मानाभावात् । अतो महाप्रलयानन्तरं सृष्टिकालीनपद्मजविरिञ्चस्य भयमिति प्रबोधिन्युक्तेरज्ञानं चतुर्वारं दिनप्रलयकालिकपद्मभवस्य । भयं च महाप्रलयकालिकसृष्टिकालिकपद्मभवविरिञ्चेरेकवारम् । संवत्सराख्ये चैकदेति द्विवारमिति विवेको द्रष्टव्यः ।

अथवाऽज्ञानं च चतुर्वारमिति दिनप्रलयकालिकाज्ञानविषयम् । लोकमपश्यमान इत्येकस्य । तत्र संवत्सरं नाम ब्रह्माणमसृजत्प्रभुः । तमत्तुं व्याददादास्यं तदाऽसौ विरुराव हेत्यपरस्य भयस्य हेतुभूतम् । तत्क्षणे भयजननेन नष्टमिति न निष्टङ्कयमित्युक्तिः । भयेनान्यथासिद्धत्वात्साक्षा-दधोक्षजप्रीत्याधायकेतरदित्यनुवृत्तिर्वा । अज्ञानभयादीनां पद्मस्योदकं वायुना शुष्कं भिन्नं पद्ममभूद्धरेः। तस्यासनविधानार्थं पृथिवी पद्ममुच्यत इत्युक्तस्यैवात्रोक्तलक्ष्म्यात्मकत्वस्यापि सम्भवात्तस्यैव वक्तुं शक्यत्वात् । न च मानाभावादिति वाच्यम् । एतद्वाक्यसांवलित्यस्यैव गमकत्वापत्तेः । ननु ऋजूनामेक एवास्ति परमोत्साहवर्जनमित्याद्यभिधानात्कथमज्ञानभयाद्युक्तिरिति चेत् । दुःखप्रापकस्य तस्या-भावभावकं तद्वचः । भगवत्प्रीत्याधायकस्य दग्धपटायमानकायस्यैवैवमादेरनिवारणात् ॥

तत इयं मूलयोजना ॥ विधिरपि यद्विधित एवंविधो भीतिमतीयाय स नोऽपि वृत्रत्रासतस्तारयेदिति स्तुवन्ति तमित्याह ॥ पुरेति । पुराऽऽदिसृष्टौ संयमाम्भसि सर्वोपरमसमयसलिले । उदीर्णत्वं च वातोर्मिवारणविशेषणम् । अम्भःसहितानां रमात्मकत्वात्तैः । आदिपदेन मानस्थेनोर्मिस्वरादिकं स्वरसं ग्राह्यम् । वातोर्मि वा वातवेगेनेति वोर्मिः । पीठाजनोक्तं कालस्वप्राकाश्यवीचिसङ्कोचलेखयोरिति हैमः। ऊर्मिस्तरङ्गवेगगताविति विश्वः । तरङ्ग ऊर्मिर्वेत्यमरः । कराले भीषणे । करालं भीषणेऽन्यवदिति विश्वः । एक एकाकी । अरविन्दात्पद्मात्मकपद्मात्स्वयम्भूरपि पतित इतरेषां का कथेति सूचयितुमपि

पतितोऽपीत्यन्वयः । तथा सम्भावित इत्यर्थः । अपिः पदार्थसम्भावनेत्याद्युक्तेः । येन तस्माद्भयात् तद्भयं ततार । स नः पारः पारगमकोऽस्तु । भयाद्येन आद्यं भयं भयाद्यं भययोरद्यं वा पतितस्तत्प्रायस्तस्मात्तं ततारेत्यान्तरङ्गिको मानिकोऽर्थो ज्ञेयः । स नः सर्वमित्याद्युक्तेः । षण सम्भक्तौ षण दान इति टिप्पणे विवरणात् ।। २३ ।।

चट्टी – न केवलं मनुरपि तु स्वयंभूरपि पुराऽऽदिसृष्टावुदीर्णवातैः प्रपञ्चवायुभिरुद्धूता ये ऊर्मयस्तेषां रवैः कराले भयंकरे संप्लवांभसि प्रलयोदके विद्यमानादरविंदात्पतित उद्भूत एक एकाकित्वेन भयोपेतः । तस्मादेकाकी बिभेतीति श्रुतिः । तस्माद्भयाद्येन ततार । स एव नः पारः पारकोऽस्त्वित्यर्थः । यद्वा संप्लवाम्भस्युदीर्णवातोर्मिरवैः कराले भयजनके सति ।। अरविन्दान्निपतितः स्वयंभूस्तस्माद्भयाद्येन ततारेत्यर्थः ।। भगवन्मुख्यानुग्रहपात्रत्वेन चतुर्मुखस्य वस्तुतो भयाद्यभावेऽपि स्वस्य भगवत्पारतन्त्र्य-ज्ञापनाय तत्प्रदर्शितमित्यविरोधः ।। तदुक्तम् ।। जनिष्यतां जनानां त्वित्यादि ।। २३ ।।

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ।
वयं च यस्यापि पुरः समेताः पश्याम लिङ्गं पृथगीशमानिनः ।। २४ ।।

तात्पर्यम् – लिङ्गमेव पश्यामः । 'कदाचिदभिमानस्तु देवानामपि सन्निव । प्रायः कालेषु नास्त्येव तारतम्येन सोऽपि त्वि'ति च ।। २४ ।।

सत्यधर्मा – य एक ईश इति श्लोके पृथगीशमानिनो वयं हरेर्लिङ्गं पश्याम इत्यन्वयमन्वितीकर्तुं वाञ्छिताध्याहारेण स्वयमन्वयमाह ।। लिङ्गमेवेति । लिङ्गं सामान्यतः श्रीमान्यज्ञापकमेव पश्यामः । एवेत्युदाहरणेन स्वरूपमिति मूलेऽध्याहारं सूचयति । तस्य च मूलस्थनञा सम्बन्धः । ईशमानिन इत्यनेनास्मद्वदेवानामभिमानो बहुकालवर्तीति प्राप्ते तं निवर्तयितुं प्रमाणमाह ।। कदाचिदिति । देवानामपि योऽभिमानोऽभिनाऽभ्यधत्त तस्य मानस्यावज्ञेयता गर्हितोऽभिमान इत्यपि सूच्यते । अभिप्रेयस इति काठकोपनिषत्खण्डार्थेऽभिरवज्ञानार्थ इत्यर्थापनाच्छ्रीराघवेन्द्रतीर्थश्रीपादैः । स च कदाचिदेव । प्रायः कालेषु बहुकालेषु । कालेष्वित्येवोक्ते त्रिचतुःपञ्चषा कालावयवग्रहणं स्यात् । तन्न भाव्यमिति प्राय इत्युक्तम् । प्रायस्तुल्यबाहुल्ययोरपीति विश्वः । नास्त्येव बहुलववर्ती न । तर्हि कीदृशोऽभिमानः किन्तु तारतम्येनैव सांसारिक्यां दशायामेवेत्याहुः । सोऽभिमानस्तारतम्येन स्वरूपतरतमभावेन प्रयोजक इत्यप्यर्थः । मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरित्यादेः ।।

तथा चायं मूलार्थः ।। एको य ईशः समर्थ ऐश्वर्यादिगुणको वा । निजमायया स्वेच्छया । बहुस्यां प्रजायेयेत्यादिश्रुतेः । सृज्यसृष्टावीक्षा बभूवेति श्रीमदाचार्योक्तेश्च । नः ससर्ज । येन प्रेरिता वयमपि विश्वं यथायोग्यं सृजामः । यस्य पुरोऽग्रे समेताः सङ्गता अपि ते वयं लिङ्गमेव पश्यामो न तु

स्वरूपविशेषं पश्यामः । किन्निमित्तो युष्मत्तोऽनवगमस्तस्येत्यत आहुः ।। पृथगीशमानिन इति । कादाचित्कः पृथक् तरतमभावेनेशा इति मानो दुरभिमानो येषामस्ति ते तथा ।। २४ ।।

चट्टी – किञ्च वयं भगवतैव सृष्टाः पालिताश्च बहुशः । अतस्तमेव पितरं शरणं व्रजेम इत्याहुः ।। य एक इति त्रिभिः । यच्छब्दानां तमेवेति तृतीयश्लोकस्थतच्छब्देनान्वयः । य ईशो निजमायया स्वेच्छया नोऽस्मान्ससर्ज । वयं येनानुग्रहीताः सन्तो विश्वं सृजामः । यस्य पुरोऽग्रतः स्थिताः समेता संगता अपि वयं लिङ्गं पूर्णानन्दत्वादिज्ञापकं जगत्सृष्टत्वादिलक्षणमेव पश्यामः । न तु पूर्णानन्दादि स्वरूपम् । अदर्शने कारणमाहुः ।। ईशमानिन इति । स्वस्वातन्त्र्याभिमानिनः । अभिमानोऽपि न सर्वेषामेकप्रकार इत्याहुः ।। पृथगिति । तारतम्येनेत्यर्थः ।। तदुक्तम् ।। कदाचिदभिमान-स्त्वित्यादि ।। २४ ।।

यो नः सपत्नैर्भृशमर्द्यमानात् देवर्षितिर्यङ्नृषु नित्य एव ।
कृतावतारस्तनुभिः स्वमायया कृत्वाऽऽत्मसात् पाति युगे युगे च ।। २५ ।।

सत्यधर्मा – यदा यदाऽस्माकमापदापतति तदा तदा त्वन्वगृह्णाद्भगवानिति स्वानुभूतभूतियुततया तं स्मारं स्मारं वर्णयाम्बभूवुरिति वर्णयति ।। य इति । सपत्नैः शत्रुपर्यायः सपत्नशब्दोऽखण्डः । रिपौवैरिसपत्नारिद्विष इत्यमरः । शत्रुभिर्भृशमत्यर्थमर्द्यमानानित्य एवोत्पत्त्यादिरहित एव सन्नपित् देवर्षितिर्यङ्नृषु देव उपेन्द्रः, ऋषिः परशुरामः, तिर्यङ् मत्स्यादिः कृष्णादिः, तिर्यङ्ना नृसिंहादि-रित्यपि । एवमादिहीनाहीनजातिषु तनुभिः कृतावतारः । अनेनाप्राकृततामभिप्रैति तच्छरीरस्येति ज्ञेयम् । स्वमायया स्वाधीनप्रकृत्या सु अमायया याथातथ्येनेति वा । अथवा मुख्यतो विष्णुमाहात्म्यं मायाशब्देन भण्यते । प्रधानत्वाच्च मातृत्वान्मेयत्वाच्चैव तस्य हीति द्वितीयनवमाध्यायतात्पर्योक्तेः । स्वमाहात्म्येने-त्यादिरर्थः । न आत्मसात् तदधीनवचन इति सातिः स्वाधीनान्कृत्वा युगे युगे प्रतियुगं पाति रक्षति । स पारोऽस्त्विति पूर्वपद्य इवात्रापि शेषः । युगे द्वन्द्वयुद्धेऽयुगे सैन्येन सह युद्ध इति केचित् । यश्च मध्ये मध्ये पातीति समुच्चये ।। २५ ।।

चट्टी – यो नित्य एव कृतादियुगेषु स्वमायया स्वेच्छया देवर्ष्यादिषूपेन्द्रव्यासादितनुभिः कृतावतारः सन् सपत्नैः शत्रुभिरत्यन्तपीड्यमानान्नोऽस्मान् आत्मसात्कृत्वा पाति च ।। २५ ।।

तमेव देवा वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमाद्यम् ।
व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ।। २६ ।।

सत्यधर्मा – आत्मदैवतं स्वामिभूतं दैवतम् । तमेव रक्षकं देवा वयं सर्वे परं प्रधानमत्युत्तमं पुरुषं विश्वं व्याप्तमाद्यं सर्वादिभूतं शरणं व्रजाम । सर्वोत्तमत्वविज्ञानपूर्वकं तन्मनः सदा । सर्वाधिकप्रेमयुक्तं सर्वस्यात्र समर्पणम् । अखण्डा त्रिविधा पूजा तद्रत्यैव स्वभावतः । रक्षतीत्येव विश्वासस्तदीयोऽहमिति स्मृतिः । शरणागतिरेषा स्याद्विष्णौ मोक्षफलप्रदेत्यादिविष्णुपुराण इति । भीतरक्षणाच्छरणमिति च गीतातात्पर्योक्तेः । केऽपि लोके न शरणमीयुः न तूदास्ते स इत्याहुः ।। स न इति । शमव्ययं वा शब्दो वा द्वितीयान्तः । महात्मा महाधीरो धास्यति विधास्यति ।। २६ ।।

चट्टी – तमेव शरणं व्रजामः । स इह महात्मा भगवान् स्वानां स्वभक्तानां नोऽस्माकं शं सुखं दास्यतीत्यन्वयः ।। २६ ।।

श्रीशुक उवाच

इति तेषां महाराज सुराणामुपतिष्ठताम् ।
प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ।। २७ ।।

सत्यधर्मा – उपतिष्ठतामुपतिष्ठमानानां स्तुवतामिति यावत् । आविरभूदिति सम्बन्धः । प्रादुरासीत् । प्रस्तुतस्तुताद्वस्तुनो नेतर इतीरयति ।। शङ्खेति ।। २७ ।।

चट्टी – प्रतीच्यां दिशि प्रत्यग्देशे । हृत्पद्ममध्य इति यावत् । प्रथममाविरभूत् ।। २७ ।।

आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।
पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ।। २८ ।।

दृष्ट्वा तममराः सर्वे ईक्षणाह्लादविक्लवाः ।
दण्डवत् पतिता भूमौ शनैरुत्थाय तुष्टुवुः ।। २९ ।।

तात्पर्यम् – 'श्रीवत्सः प्रकृतिर्ज्ञेया ब्रह्माख्यः कौस्तुभः पुमान् । तदतीतैः षोडशभिः स्वरूपैरप्युपास्यत' इति च । श्रीवत्सकौस्तुभौ विनाऽऽत्मतुल्यैः प्रकृतिपुरुषातीतत्वात्सप्तदशरूपाण्यपि तुल्यानीत्यर्थः । आत्मभूतैश्च तुल्यैश्च आत्मतुल्यैः । 'अपुंप्रकृत्यधीनत्वाद्वासुदेवादिका हरेः । तुल्याश्च केशवाद्याश्च न च भिन्नाः कथञ्चने'ति तन्त्रसारे ।। श्रीवत्सकौस्तुभाभ्यां तु विनाभावं प्रदर्शयेत् । पुंप्रकृत्यात्मकाभ्यां स धत्ते नित्यं जनार्दनः । यदस्याभ्यामतीतत्वं यद्वशो नानयोर्हरिः । श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एव त्वि'ति च ।। 'आत्मैव सप्तदशधा स्वयं भूत्वा जनार्दनः । मध्यस्थावृतिरूपेण क्रीडते पुरुषोत्तम' इति च ।। २८ ।।

सत्यधर्मा – आत्मतुल्यैः षोडशभिरिति श्लोके लोकेश्वरः सुनन्दनन्दादिभिः पार्षदेभ्यस्तेषामस्य च श्रीवत्सकौस्तुभभृत्वतदभृत्वकृत एव विशेष इति वा ताभ्यां रहित एवेति वा विपरीतप्रतीतिं प्रमाणेन प्रथयति ॥ श्रीवत्स इति । श्रीवत्सः प्रकृती रमा ज्ञेया तदभिमन्यमाना चित्प्रकृतिश्च । ब्रह्माख्यः पुमान् कौस्तुभो ज्ञेय इति विपरिणतमन्वेति । तदतीतैस्तावतीत्य वर्तमानैः षोडशसङ्ख्योऽस्य रूपैरभिन्नैर्वा-सुदेवादिभिः केशवादिभिर्वृतं हरिमुपासत इति पाठे ब्रह्मादय इति शेषः । उपास्यत इति पाठे ब्रह्मादिभिर्हरिरुपास्यत इत्यध्याहृत्य योजनीयम् । प्रमाणेन मूलं व्याकृत्याक्षरयोजनां सतात्पर्यां पर्यवसाययति ॥ श्रीवत्सकौस्तुभाविति । विनाऽऽत्मतुल्यैः प्रकृतिपुरुषातीतत्वात् । परिवाररूप-षोडशरूपाणि स्वयं चेति सप्तदशरूपाण्यपि तुल्यानि ज्ञानादिभिः समानि । आत्मतुल्यैरित्यत्रात्मना सदृशैस्तद्भिन्नैस्तद्गतभूयोधर्मवद्भिरित्यपार्थं व्यंसयितुं समासोऽयमुत्तरपदलोपीति दर्शयति ॥ आत्म-तुल्यैरात्मभूतैश्च तुल्यैरिति । ननु कथं भेदव्याप्त्या तुल्यता । साकल्येनाभिन्नभगवद्रूपेषु सम्भावितेति चेन्न । सयूथ्य भो आव इन्द्रमित्यृग्भाष्यटीकयोः कर्तारमीशमिति वा स्वदृष्टान्तो हरेर्भवेत् ।

नन्विन्द्रोऽपि यदा विष्णुस्तदा कथमित्यत आह ॥ स्वेति । हरेर्विवक्षायामयं स्वदृष्टान्तो भवेदित्युक्तेः । अपुंप्रकृत्यधीनत्वादित्याद्यत्रोक्तेरिव वरमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति तमहमेवाभिरूपः कैवल्यादयाख्योऽपि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुक्तं यद्विजत्केवलं कुलं तत आग्नीध्रीये क्षेत्रे वितरिष्यानि यम इत्यात्मतुल्यमनुपलभमान इति पञ्चमस्कन्धाभिधानादिव नायं विजानीहि । रे पर । किमेवं वदतस्तव भावो भाष्योक्ते माने कथमिदमिति प्रश्नस्योतायुष्मन्कैरपि नाङ्गीकृतोऽयं दृष्टान्तदार्ष्टान्तिकभाव इति । नाद्यः । साधोरिव तावतैवासाधोस्तवापि समाधेः । न द्वितीयः । अनन्वयालङ्कारमात्रविलोपापत्तेः । तथा च तमुदाजह्रुरालङ्कारिकाः । उपमानोपमेयत्वं यदेकस्यैव वस्तुनः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः । रामरावणयोर्युद्धं रामरावणयोरिव । गगनं गगनाकारं सागरः सागरोपममितिवद्विजानीहि । विरुद्धं च न लोकविरुद्धधर्मवत्त्वादिना । पुंप्रकृत्यात्मकाभ्यां श्रीवत्सकौस्तुभाभ्यामतीतत्वं अप्राकृतत्वमिति यावत् । प्रदर्शयेत् ।

ननु चिन्हापन्हवं कुत इत्यत आह ॥ धत्त इति नित्यमित्यनेन तद्वियोगायोगं सूचयति । तदतीतत्वमुक्तमुक्तेष्वप्यस्तीत्यत उक्तं यद्वशो नानयोरिति । रमातामरससम्मता यत उक्तानां मुक्तानामप्यस्तीति नास्त्यतिप्रसक्तिः । निगमयति । श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एव् त्विति । आत्मतुल्यैरित्यत्रात्मपदोत्तरं भूतपदं प्रस्थाप्य व्याख्यानं कृतं तदुपोद्बलयितुं प्रमाणं लपति ॥ आत्मैवेति । स्वयं स्वेनैव सप्तदशधा तावत्प्रकारेण । तृतीयाविभक्तिलोपः । मध्यस्थरूपेणावृत्तिरूपेण परिवाररूपेण चेत्यर्थः । सौभर्यादिवत्कर्मवर्मभेदनाय तद्वशत इति किन्नेत्याह ॥ पुरुषोत्तमः क्रीडत

इति। क्रीडति सप्तदशधा पुरुषोत्तमः स्वयम्भूत्वा स्थितोऽप्यात्माभिन्नः । एवम्भवने निमित्तमाह ॥ जनार्दन इति। जनानामर्दनं याचनं यस्य स तथा। मध्यस्थरूपमेकमितररूपं श्रीमदुक्तेः । मध्यस्थावृतरूपेण क्रीडते तस्मै नम इति वा। यद्यपि भूतपदमध्याहृत्यात्मभूततुल्यैरिति विवृत्यपेक्षयाऽऽत्मपदं मौलमावृत्त्याऽऽत्मात्मतुल्यैरिति लघुनोपायेन प्रस्तुतापायप्रस्तुतिर्भवति । तथाऽपि भूत्वेति मानपदमनुसन्दधान आत्मभूतैस्तुल्यैरिति विवृत्यपेक्षयाऽऽत्मविवरणमिति विशेषतापनाय गुरुवरो गौरवं किञ्चित्सोढ्वा कृतवानित्यूढ्वा स्थेयं स्वास्थ्यम् ॥

ततश्चायं मूलार्थः ॥ आत्मतुल्यैरात्मभूततुल्यैः श्रीवत्सकौस्तुभौ प्रकृतिपुरुषौ । वक्षोनिवासमकरोत्परमं विभूतेः । तत्कण्ठगं कौस्तुभमासधातेति श्रीमदुक्तेः । तौ विना तदतीतत्वेनात्मभूश्चान्यत्र तुल्यैर्गुणक्रियादिभिः समैः षोडशभिर्वासुदेवादिचतूरूपैः केशवादिद्वादशरूपैरेवमाहृत्य षोडशभिः पर्युपासितम् । मध्यस्थमेकमेवं सप्तदशधा स्थितम् । उन्निद्रे विकसिते शारदाम्बुरुहे शरदः शरत्कालस्याम्बुरुहे तत्कालिककमले इवेक्षणे नयने यस्य तम् । ईक्षणं नयने दृष्टाविति विश्वः । ईक्षणाल्हादविक्लवा विव्हलाः । विक्लवो विव्हलः स्यादित्यमरः ॥ २८,२९ ॥

चट्टी – पुनश्च तं पुरतो दृष्ट्वेक्षणाल्हादेन विवशा अवनौ दण्डवत्पतिताः सन्तः शनैरुत्थाय तुष्टुवुरित्यन्वयः । कथंभूतमात्मतुल्यैरात्मना मूलरूपेण तुल्यैरात्मभिः स्वरूपभूतैस्तुल्यैः परस्परं समानैश्च केशवादयो द्वादश वासुदेवश्चत्वार इति षोडशभी रूपविशेषैः पर्युपासितम् । परित आवर्णत्वेनोपासितम् । ननु मूलरूपस्यानादिनित्यत्वादवताराणांचौत्पत्त्यादिदोषत्वात्कथं तुल्यत्वमित्यत आह ॥ विनेति । श्रीवत्सकौस्तुभौ तदभिमानिनौ प्रकृतिपुरुषौ विना तदतीतत्वादित्यर्थः । प्रकृतिपुरुषातीतत्वेन तदनिर्मितशरीरत्वात्तुल्यत्वमुपपद्यत इति भावः ॥ तदुक्तम् ॥ श्रीवत्स इत्यादि । उन्निद्रशरदंबुरुहवदीक्षणे यस्य तम् ॥ २८,२९ ॥

देवा ऊचुः

नमस्ते यज्ञवीर्याय वयसे उत ते नमः ।
नमस्ते अस्तु चक्राय नमोऽस्तु पुरुहूतये ॥ ३० ॥

तात्पर्यम् – **'वयः सर्वस्य वयनाद्भगवान्पुरुषोत्तम'** इति च। **'मा तन्तुश्छेदि वयतो धियं म'** इति श्रुतिः ॥ ३० ॥

सत्यधर्मा – नमस्ते यज्ञवीर्यायेति श्लोके वयस इत्यस्य कालात्मनेऽस्य देवस्य मीळ्हुषो वया इति श्रुतौ श्रावयावभ्रकत्वेनान्धकरिपव इति वा नीचा वया इत्येतद्भाष्ये नीचस्थाने बन्धनं या

करोतीत्याद्युक्तेः कश्यपपत्न्यै दनव इति कस्मै च पक्षिणे वेति यः सन्दिग्धोऽर्थेन मानेन विमानयति ॥ वय इति । सर्वजगतो वयनाद्बन्धनाद्धेतोर्वय इत्युच्यत इति सम्बन्धः । सर्वस्येत्युक्त्या सामान्येनामान्यताकालकालगलदनुपक्षिपक्षाणां ज्ञेया । तत्रापि विश्वस्येत्यनुक्त्या सर्वस्येत्युक्त्या सर्वो ह्येष रुद्र इति श्रुतेः सर्वः शर्वः कालञ्जलः शिव इति नामनिधानोक्तेश्च । अर्वषर्व हिंसायामिति हिंसकत्वयोगाच्च किञ्चित्साद्दश्येन विशेषतो नामनिर्देशपूर्वकं पुरहरपराकृतिं सूचयामासेति ज्ञेयम् । वय बन्धन इति धातोः । श्रुतिप्रयोगोऽप्यस्तीत्याह । मा तन्तुच्छेदि वयतो धियं म इति च श्रुतिरिति च । मा तन्तुच्छेदि वयतो धियं मे मा मात्राशार्यपसः पुरुरुतेरिति श्रुतेरयमर्थः । हे वरुण वरानन्दहरे । त्वयि धियं वयतो बिभ्रतो मे मम तन्तुः सन्ततिर्मा छेदि उत्सन्ना मा भूत् । नापुत्रस्य लोकोऽस्तीति श्रुतेः । ज्ञानं सर्वथाऽपेक्षितमित्याह ॥ मात्रेति । अपसः कर्मणः । अप्शब्दस्य कर्मशर्मसु पाठात् । तस्मिन्नपो मातरिश्वा दधातीत्यादौ तन्नामत्वेन स्वपरसाधारण्येन व्याकरणात् । गत्यर्थज्ञानार्थनीत्या ऋतेर्ज्ञानात् ऋतेः पुरा तदुत्पत्तेः प्राक् अपसः कर्मणो मात्रा परिकरोंऽशो वा । मात्राऽल्पेऽपि परिच्छद इति विश्वः । मा शारि मा शीर्णं भवतु । अकार्यकारि न नश्येत् । कर्मणा ज्ञानमातनोतीति श्रुतेरिति ॥

अथ मूलार्थः ॥ नमनेन मनःप्रसाद इव मान्येनेति किञ्च लक्ष्म्यञ्चितचरणस्य किमस्य कृत्यमितरदिति नम इति प्रव्हत्वमेवार्हणमित्याह ॥ नमस्त इति । हे यज्ञ । वृत्रस्य त्वष्टुः पुत्रतया वीतिहोत्रे सत्रसम्बन्धिनि ज्ञातत्वादेतत्कालोचितालोचिताश्चतुरा अमरा इति सूच्यतेऽनया वाचोभङ्ग्येति तात्पर्यम् । उत्तरत्र तत्र तत्पराकरणकारणमाहुः ॥ वीर्यायेति । तदात्मने । यद्वा यज्ञस्य ज्योतिरादेर्वीर्यं सर्वस्य प्रसादादिप्रदानशक्तिता येनेति । हे यज्ञ तन्नामक । यज्ञो विष्णुर्देवतेति हि श्रुतेः । वीर्ये विर्गरुड ईर्यः प्रेर्यो वाह इति येन स इति विविधमीर्यं प्रेर्यमस्येति वा तस्मै ते । विः श्रेष्ठातीतनानार्थे विः स्यात्पक्षिष्विति विश्वः । तव वीर्याय नम इत्यादिरप्यन्वयो नमस्ते रुद्र मन्यव उतोत इषव इत्यादिवदवधेयः । वयसे सकलबन्धकाय । वयसे उतेति सन्ध्यकरणेन प्रथमापञ्चम्याद्यनवकाशदानमिव परिवयसे पशूनिवेति श्रुतिगीतागृहीतश्रुतिं स्मारयति । पशुप्रायानपि सर्वस्य देवानामभिप्रायव्याप्तेत्येवं वचनेन सूचयति । चक्राय चक्रं चङ्क्रमणादेष इत्यादेस्ते चक्रायेति वा चक्राय ते त्वदात्मकैतत् षोडशसङ्ख्यारूपसङ्घायेति वा । चक्रो गणे चक्रं सैन्यरथाङ्गयोरिति विश्वः ।

ननु कथमायुधत्वेन कथनमिति चेत् । समानव्यवहारसमानविभक्त्यादीनामेतदनावेदकत्वस्य यजमानप्रस्तर इत्यादौ दृष्टेर्न तन्मात्रेण तन्मात्रता । यथोक्तं छान्दोग्यभाष्ये । विष्णुरूपाणि गण्यन्ते पररूपेण वै सह । एवं भूतानि गण्यन्ते भिन्नान्यपि पदैःसह । मूर्तामूर्ते यथा रूपे ब्रह्मणस्तु तथैव च । भिन्नान्यपि तु भूतानि पदानि स्वपदैः सहेति प्राथम्ये । सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क्त तदपि त्रिपादित्यादि । सन्ध्यकरणेन महामन्त्रतामेतस्य सूचयति । तदरातिशरीरसन्धिरन्धनं वा सूचयति ।

मूलकृच्चात्र चक्रादिशब्दवाच्योऽच्युत इत्यत्र हेतुमाह ॥ पुरुहूतय इति । पुरवः सर्वा हूतयो हूतिराकारणाव्हान इत्यमरादिन्द्र आगच्छेत्याद्याव्हानानि यस्य नामानि वा यस्य तस्मै । नामानि सर्वाणि, यो देवानां नामधा इत्यादिश्रुतेः । नचैवं गतिभ्रष्टास्त्वत्स्तुतिकृतः किन्तु बहव इदंवर्त्मरता इतीरयन्ति ॥ पुरुहूतय इति । पुरुभिर्महात्मभिर्बहुभिश्च शिष्टं स्पष्टमिति वा । पुरुहुः श्रुतिरभिप्रायो यस्य स तस्मै । अनेन तारको न प्रतारक इत्युक्तं भवति । पुरुहुः श्रुतिरुच्यत इत्यभिधानात् ॥ ३० ॥

चट्टी – प्राचीना स्तुतिर्भगवदपरोक्षायेदानीं स्वाभीष्टसिध्यै स्तुवन्ति ॥ नम इति । यज्ञवीर्याय यज्ञस्य विहितकर्मणो वीर्यं सामर्थ्यं यस्माज्ज्ञाता स तथा । तस्मै । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेः । यद्वा । यज्ञोत्पादकाय । स कारयेत्पुण्यमिति श्रुतेः । वयसे जगद्बन्धकाय । वय बन्धन इति धातोः । ॥ तदुक्तम् ॥ वयः सर्वस्य वयनाद्भगवान्पुरुषोत्तम इति । उतशब्दो विशेषणसमुच्चये । आत्तचक्राय दुष्टनिग्रहार्थं स्वीकृतचक्राद्यायुधाय । नमस्तेऽस्तु चक्रायेति पाठे । चक्रमस्यास्ती चक्रः । तस्मै । पुरुहूतये । अनन्तनाम्ने । नामानि सर्वाणि यमाविशन्तीति श्रुतेः ॥ ३० ॥

यत् ते गतीनां तिसृणामीशितुः परमं पदम् ।
नार्वाचीनो विसर्गस्य धातुर्वेदितुमर्हति ॥ ३१ ॥

तात्पर्यम् – 'देवलोकात्पितृलोकान्निरयाच्चापि यत्परम् । तिसृभ्यः परमं स्थानं वैष्णवं विदुषां गतिरि'ति माहात्म्ये ॥ ३१ ॥

सत्यधर्मा – यत्ते गतीनां तिसृणामिति श्लोके सदसन्मोक्षनरकादिगतित्रिकभ्रममतिक्रामयितुं प्रमाणमाह ॥ देवलोकादिति । देवलोकान्महरादेः पितृलोकात्स्वर्गान्निरयाद्रौरवादेरिति तिसृभ्यो गतिभ्यो यत्परमं स्थानम् । अनेन मूले गतीनां तिसृणामित्यत्र सकाशादिति पूरणीयमिति सूचयति । विदुषामपरोक्षज्ञानिनां गतिर्गम्यमित्यर्थः ॥ तथा चेयं मूलयोजना ॥ ईशितुः तृना स्वभावतामीशनस्य सूचयन् लोकवत्तु लीलाकैवल्यमित्युक्तं स्मारयति । तिसृणां देवगतिपितृगतिनरकगतीनां सकाशात्परममुत्तमं पदम् । तच्च नान्यदित्याह ॥ वैष्णवमिति । वैकुण्ठादिस्थानम् । धातुर्विधातुः । सर्गस्य नानाकर्मायत्ततां वेदयितुं वीत्युक्तम् । विविधसृष्टेः । अर्वाचीनोऽन्तरार्जितजन्माऽधुनातनो मानवो वेदितुं ज्ञातुं नार्हति । यल्लोक एवैतादृशो यदा तदा तदोकाश्च न वेदयितुमर्हतीति किं वक्तव्यमिति ॥ ३१ ॥

चट्टी – ईशितुस्ते वयं तिसृणां गतीनां देवलोकपितृलोकनिरयसंज्ञानां सकाशात् । परममुत्कृष्टं वैकुण्ठादिस्थानं तद्धातुश्चतुर्मुखस्य विसर्गस्य विशिष्टसृष्टेर्देवादेः सकाशादार्वाचीनो नीचोऽज्ञ इति यावत् । वेदितुं लब्धुं प्राप्तुं नार्हति । विद्वानेव त्वत्पदप्राप्तियोग्य इति भावः ॥ ३१ ॥

ओं नमस्ते भगवन् नारायण वासुदेवादिपुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटितपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारेणापावृते आत्म-लोके स्वयमुपलब्धो निजसुखानुभवो भवान् दुरवबोध इव तव विहारयोगो यदशरणोऽशरीर इदमनपेक्षितास्मत्समवायः स आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हंसि ॥ ३२ ॥

सत्यधर्मा – प्राङ्गणे शस्त्रास्त्रग्रामस्य रिपुणा कृततयोत्तरत्र त्वत्कृपामपहायेन्द्रवज्रादिछन्दस्कृत्य-मिति गुणगणनामगणितत्वेन पद्यपद्यया च गणितगुणयालमिति निरालोच्य गद्येनाद्यमुपश्लोकयाम्ब-भूव। तत्रादौ सर्जकोऽब्जजो मारको मारहरः पालयिता गोपाल इति व्यवस्थां कैश्चिदविपश्चिद्भिः कृतां दुरवस्थीकरोति ॥ ॐ नमस्त इत्यादिना।

श्रीव्यासव्यासशेमुष्यामुष्यां निष्कास्य संरसम्।
सुवर्णस्याभ्यधान्मूर्तिं पूर्णवित् षोडशीवृताम् ॥ १ ॥

भगवन्निति प्रमुखीकृत्य कृष्णान्त्यसम्बुध्यन्तपदानि परिसज्यागतानि सप्तदशसङ्ख्यानि व्यासेनोप-सङ्गृहीतानि हंसायेत्यतः प्राक्तनग्रन्थेन। इममभिप्रायं दुरवगमं प्राय इतरैः प्रायोमतीन्विनेति दीनदयापरो विदितैतदर्थ आनन्दतीर्थश्रीचरण इदं व्याजेन न्यभांत्सीत्। एकस्य भगवन्नित्यस्यैतन्मध्य-मध्यासीनश्रीनाथसम्बोधनता। उर्वरितभगवद्द्वयं वासुदेवादिव्यूहस्य केशवादिव्यूहस्य सम्बोधकं सत्सार्थकमिति मन्तव्यम्। अत एव विशेषणकृत्यान्वेषणं मानसायासव्यसनमपि नेति मन्तव्यम्। हे भगवन्सद्गुण नारायण दोषरहित गुणगणसहित उदकाश्रय मुक्ताश्रय। सुधादिबोधितोऽर्थः सर्वोऽप्यनु-सन्धेयः। वासनाद्वासुदेवोऽसीत्यादेरर्थविशेषो बोध्यः। वसुदेवसुतेति वा। अनेनैतद्युक्तव्यूहस्फोरणमपि कृतं वेदितव्यम्। आदिपुरुषेत्युक्त्या वासुदेवाद्यादिपुरुषः केशवस्तत्सम्बुद्धिः। उपलक्षणया व्यूहसङ्ग्रहः। महापुरुषोत्तमपुरुष। महानुभाव महाप्रभाव। परममङ्गल। स्वयं परमकल्याण। परमा रमादयस्तेषां कल्याणं मङ्गलं येन तत्सम्बुद्धिः। परमकारुणिक परमत्वं योग्यतया करुणायामन्वेति। परमहंसपरिव्राजकैः परमहंसाः परिशुद्धा गृहिणः। परिव्राजका यत्याश्रमे तुरीये वै प्रीतिर्मम गरीयसीत्यादावुदीरिताः। ते च चत्वारः कुटीचको बहूदो हंसः परमहंसश्चेति। अन्त्यस्यैव निष्क्रिय इत्यपि संज्ञा। गृहस्थोऽयमयं यतिरिति सङ्कुच्य व्यवहारः। वस्तुतस्तु भक्तिरेव मुख्या। यथोक्तं गीतातात्पर्ये। एतस्मान्न्यासिनां लोकं संयान्ति गृहिणोऽपि हि। ज्ञानमार्गः कर्ममार्ग इति भेदस्ततो न हि। तस्मादाश्रमभेदोऽयं कर्मसङ्कोचसम्भव इति व्याससमृताविति।

आत्मयोगसमाधिना आत्मयोगः प्रसन्नभगवत्सम्बन्धस्तेन यः समाधिश्चेतसोऽचाञ्चल्यं तेन परिभावितः सुशीलितः पर्यालोचितः । ननु परौ भुवोऽवज्ञान इति परिपूर्वकभूधातोरवज्ञानार्थकत्वात्तस्य च प्रकृतेऽनुपपत्तेरर्थान्तरस्यैतदादावेवानुशासनात्कथमिदमर्थतेति चेन्न । परीत्यस्य भावित इति णिजन्ता-द्योगात्केयं कथन्ता । यथोक्तं परिभाव्येति कौमुदीव्याख्यावसरे तत्त्वसुबोधिन्यां पर्यालोच्येत्यर्थः । न च परिपूर्वकस्य भवतेस्तिरस्कारार्थकत्वात्कथमत्र ज्ञानार्थतेति सख्यम् । परीत्यस्य भाविति चुरादिणिजन्तेन योगात् । केचिदत्र भवतिना योगमभ्युपेत्याप्यर्थमाहुः । परौ भुवोवज्ञान इति सूत्रे परौ भुव इत्यस्यावज्ञान इति सूत्रेण परौ णविशेषणान्न तिरस्कारार्थतानियमः । मनसा परिभाव्य किञ्चिदित्यादिश्रीहर्षप्रयोगाच्च । अत एवात्र तत्प्रयुक्तदोषशङ्काऽपि नास्तीति । अन्ये त्वनादरः परिभवः परीभावस्तिरस्क्रियेति कोशात्परिपूर्वकाद्भवतेर्घञन्तादेव तिरस्कारप्रसक्तिर्नान्यस्मादित्याहुस्तन्मन्दम् । परिभूय परिभवतीत्यतोऽपि तिरस्कारप्रतीतेरिति शेखरे च । मुनित्रयोक्तीर्विचार्येति वा । परीभावस्तिरस्क्रियेति कोशात्तिरस्कारार्थस्य धातोर्विचारार्थकत्वेऽपि न बाधकम् । धातूनामनेकार्थत्वात् । अनेन परौ भुवोऽवज्ञान इति सङ्गच्छते । अत्र त्वपरिभावितेत्यकारप्रश्लेषेणातिरस्कृतेत्यर्थयोग्यताऽस्तीति सुमङ्गलतया शङ्कातङ्क एव नास्तीति सन्तोष्टव्यम् ।

परिस्फुटोऽतिव्यक्तः । पारमहंस्यधर्मो ज्ञानं तेनोद्घाटितं तमःकपाटद्वारं येन स तथा । तेनापावृते प्रकाशिते आत्मलोके वैकुण्ठादिके । स्वयं स्वेनैवोपलब्धः प्राप्तो निजः स्वरूपभूतो व्यक्त इति यावत् सुखानुभवो यस्य सः । दुरवबोधः प्रसादमन्तरेण । तस्य तव विहारयोगो जन्मादिक्रीडासम्बन्ध उपायो वा । इव एव । तत्र निमित्तं यदशरणमिति । स्वातिरिक्ताधाररहितः तत्कुतो यद्यतोऽशरीरः प्राकृतशरीररहितः । अत एवाहास्मत्समवायोऽनपेक्षितः कार्यनिष्पादनेऽस्माकं समवायः समूहो येन सः । असहाय एव कार्यपर्यवसायकः । किं तस्य शत्रुहनने कपयः सहायाः । अनपेक्षितसहाय इत्यादेः । वयं तत्प्राया दयया त्वमेव पुरस्करोषीति भावः । अविक्रियमाणेनात्मनैव स्वभावेनैव अविक्रियमाणेनात्मनेति निमित्तकारणभूतेनेति वा । अनेनोपादानतावादोऽपहस्तितो बोध्यः । सगुणं स्वोपादानीभूतगुणमिदं जगत् । स्वयमगुणः सत्त्वादिगुणविकलः प्रधानो वा सृजसि पासि हंसि तस्मै ते नम इत्यर्थः ॥ ३२ ॥

चट्टी – पद्यैर्मिताक्षरैः स्तोतुं न शक्यंते हरेर्गुणाः इति पद्यैरतुष्यन्तो देवा गद्येन तुष्टुवुः । भक्त्युद्रेकेण बहुधा संबोधयन्तो दुर्ज्ञेयत्वमाहुः ॥ भगवन्नित्यादिना । हे भगवन् षड्गुणपूर्ण । ऐश्वर्यं च तथा वीर्यं तेजः शक्तिरनुत्तमा । ज्ञानं बलं यदेतेषां षण्णां भग इतीरितः । एभिर्गुणैः पूर्तिमान्यः स एव भगवान्हरिरिति वचनात् । वासुदेव व्याप्त्यादिगुणक । छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततोऽस्म्यहमिति वचनात् । आदिपुरुष आदिः सर्वजगतः

पुराख्यशरीरेष्ववस्थानात्पुरुषः । पुरुषः पूर्षु शयनादिति वचनात् । कुटीचकबहूदकहंसपरमहंसभेदेन चतुर्विधेषु ये परमहंसाख्याः परिव्राजकास्तैः परमेणोत्तमेनात्मयोगेनं यः परमात्मध्यानेन समाधिश्चित्तै-काग्र्यं तेन परिभावितः प्रवर्धितः परिस्फुटितः प्रकाशितश्च यः पारमहंस्यः परमहंससंबधिधर्मो ज्ञानाख्यस्तेन । कीदृशेनोद्घाटितं तमोऽज्ञानाख्यं कवाटं येन स चासौ द्वारं मोक्षसाधनं च तादृशेन परमहंस्यधर्मेणापावृते प्रकाशिते आत्मलोके वैकुण्ठादिधाम्नि स्वयमुपलब्धोऽप्रयत्नेन दृष्टो यो भवान्स्वरूपसुखानुभवरूपस्तस्य तव विहारयोगो जगत्सृष्ट्यादिलक्षणक्रीडोपायो दुःखबोधो ज्ञातुमशक्यः । तदनुग्रहेण यथायोग्यं ज्ञायमानत्वादेवमुक्तिः । कुतोऽबोध इत्यत आह ॥ यदिति ॥ यद्यस्मादशरणोऽधिष्ठानरहितोऽशरीरः प्राकृतदेहस्तद्देहरहितः । अगुणः सत्त्वादिगुणलेपरहितः । त्वं वाऽनपेक्षितोऽस्माकं समवायो मेलनं सहाय्यं येन तादृशःसन्नेव सगुणं सत्त्वादिगुणमयमिदं जगदविक्रियमाणेन विकारमनुपगच्छता । अनेन ब्रह्मण उपादानत्ववादो निराकृतो भवति । आत्मना स्वभावेनैव न तु स्वप्रयोजनमपेक्ष्य सृजसि पासि हंसि । तस्माल्लोकविलक्षणकर्तृत्वाद्दुःखबोध इत्यर्थः । आत्मयोगसमाधिना परिभावित ध्यातेति सबोधनं च ॥ ३२ ॥

अथ तत्र भगवान् किं देवदत्तवदिह गुणविसर्गापतितः पारतन्त्र्येण स्वकृतकुशलाकुशलफलमुपाददाति आहोस्विदात्माराम उपशमशीलः समञ्ज-सदर्शन उदास्त इति ह वाव न विदामः ।

न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वर अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणदुरवग्रह-वादिनां च विवादानवसरे उपरतसमस्तमायामये केवलस्वात्ममाया-मन्तर्धाय को नु दुर्घट इव भवति स्वरूपद्वयाभावात् । समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् । स एव नः सर्ववस्तुषु वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥

अथ ह वाव तव महिमामहामृतरससमुद्रविप्रुषाऽसकृल्लीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परम-भागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि निरन्तरनिर्वृ-तमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपरिवर्तः ।

**त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूत-
योऽभूवन् दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया
सुरनरमृगमिश्रितजलचराकृतिभिः यथाऽपराधं दण्डं दधर्थावतीर्य ॥ ३३ ॥**

तात्पर्यम् – 'अथ तत्र भगवान् किं देवदत्तवदित्याक्षेपः । अचिन्त्यशक्तेरनन्तगुणस्य कुतः पारतन्त्र्यादिकमित्यभिप्रायः । उपरतसमस्तमायामये प्राकृतस्वभाववर्जिते । केवलं स्वात्ममायां निजसामर्थ्यम् । स्वरूपद्वयाभावादित्यादि समाधानम् । 'स्वतन्त्रः परतन्त्रो वा ज्ञोऽज्ञो दुःखी सुखी नु किम् । इत्यादिसंशयः क स्याज्ज्ञानिनां पुरुषोत्तमे । तस्यानन्तगुणत्वाच्च पूर्णशक्तित्वतो हरेः । स्वातन्त्र्यादिकमेवास्य विदो जानन्ति निश्चयात् । घटकत्वाद्दुर्घटस्य दुर्ज्ञेयत्वाच्च सर्वशः । तच्छक्तेरविदो जीवं परतन्त्रं वदन्त्यमुम् । एवं दुर्घटया शक्त्या ज्ञोऽज्ञानां परमेश्वरः । यथा रज्जुः सर्पधिया रज्जुबुध्यावगम्यते । तथा यथार्थबुध्या च मिथ्याबुध्याऽवगम्यते स्वेच्छयैव महाविष्णुः फलदश्चानुसारत' इति तन्त्रभागवते । त्रिनयनो नृसिंहरूपी । 'विष्णोर्नृसिंहनामानि त्रिनेत्रो-ग्रादिकानि त्वि'ति शब्दनिर्णये । 'विविधं भावपात्रत्वात्सर्वे विष्णोर्विभूतय' इति च ॥ ३३ ॥

सत्यधर्मा – अथ तत्र भगवान् किं देवदत्तवदित्यादीत्येक एव पर्यवशेषित इत्यन्तगद्येषु भगवतः गुणसर्गपतितपारतन्त्र्यं कुशलाकुशलकर्मफलोपलब्धिर्नास्त्येतत्सर्वमिति न विदाम इति देवानामविज्ञानं, तथेतरत्र दुर्घटस्यैवमादेः सौघटयघटिका मायेत्याद्यनुचितार्थप्रच्युत्यै स्वयमग्रे स्ववचनेन व्याकृत्य तत्स्थिरतायै मानमपि तन्त्रसारस्थमुपन्यस्यति ॥ अथ तत्र भगवान्किं देवदत्तदवदित्याक्षेप इति । देवदत्तवत्किमिति दुराशयसंशयं स्वमुद्घाटयात्र भगवन्नित्यारभ्य को नु दुर्घटश्च भवतीति पर्यन्तं सुराः शङ्कन्ते ॥ स्वरूपद्वयाभावादिति । सिद्धान्तग्रन्थ इत्याशयः । अचिन्त्यशक्तियुक्ततायां हेतुरनन्त-गुणस्येति परस्परं तद्भाव इति वा । परमफलमालपति ॥ इत्यादीति । समाधानं पूर्वपक्षस्येत्यर्थः । स्वतन्त्र इत्यादिसंशयाकारः ॥ ज्ञानिनां कुतः पारतन्त्र्येत्यादिना । उपरतमायामय इत्यस्य स्वाधिष्ठानाध्यस्तसमस्तमायिकजगत्को भवतीति प्रतीतिं निवारयति ॥ प्राकृतेति । केवलस्वात्म-मायापदार्थमाह ॥ निजसामर्थ्यमिति । स्वरूपद्वयाभावादित्यप्याक्षेपार्थमिति प्रतिक्षिपति । देवादीनां पुरुषोत्तमे तद्विषयः। विदोऽस्येति वा ज्ञानिन इति वाऽर्थः । अनन्तगुणत्वादिरपरिगणितगुण इत्यर्थः । दुर्घटस्येतरनिरीक्षया सर्वशः साकल्येनाविदो मिथ्याज्ञानिनोऽमुं हरिं परतन्त्रं जीवं वदन्ति । यथा रज्जुभ्रान्तानां रज्जुबुद्ध्याऽवगम्यते विषयीकृता भवति तथाज्ञैर्यथार्थबुद्ध्याऽस्वतन्त्रोऽविश्वविलक्षण इत्यवगम्यते । अज्ञै रज्जुः सैव सर्पधिया सर्पोऽयमिति बुद्ध्या । इयं कीदृशीत्यत आह ॥ मिथ्याबुध्येति । मिथ्यासाधनजया । बुध्यतेऽनयेति गीताभाष्योक्तेः । अतो न धीरिति पुनरुक्तिः । तस्यैवं प्रेरणे किं फलमित्यत आह ॥ स्वेच्छयैवेति । सारो गत्यर्थादिन्यायेन ज्ञानम् । तमनुसृत्य फलद इति ॥

ततश्चायं गद्यार्थः ।। सत्सु सति पूर्वपक्षे न ज्ञानाङ्कुरोपजननं कुशकं स्यादिति तत्खण्डनं विना न तन्मण्डनं सम्भवतीति तं वितत्य दर्शयन्ति ।।· अथेति । अथ सृष्ट्युत्तरं तत्र सृष्टमध्ये देवदत्तवद्भगवान्गुणविसर्गापतितः संसृत्यन्तःपाती । ततश्च किमित्यतस्तत्प्राप्यमनर्थं वदन्ति ।। इह पारतन्त्र्येणेति । कुशलः स्वकृतं कुशलः क्षेमपर्याप्तस्वकृतेष्विति विश्वः । अकुशलं पापं शुभमशुभं चोपाददति भुङ्क्ते किम् । आहोस्विदित्यादिना प्रथमपक्षक्षेपकाणि विशेषणानि दर्शयति । आत्मारामः स्वस्मिन्नेव क्रीडन्स्वरमण उपशमशीलः शान्तमूर्तिः समञ्जसदर्शन इत्युदास्ते न भुङ्क्ते किमिति न विदामः । ह वावेत्यनूहागोचरता श्रौतीति द्योतयति । अनिर्धारणेन भुङ्क्ते । न भुङ्क्त इति पक्षधारणेऽपि न विरोध इतरं नैवेत्याहुः ।। न हीति । उभयमुभयस्मिन्पक्षे न हि विरोधः । शामाकनियामकं भगवतीत्यादि । भगवति को नु दुर्घट इव भवति न कोऽपीत्यर्थः । अपरिगणितगुणत्वं कुत इत्यत आह ।। ईश्वर इति । ऐश्वर्येऽपीन्द्रादिवत्स्यात्साधारण इत्यत आह ।। अनवगाह्यमाहात्म्य इति । अबुद्ध्यारोहमाहात्म्ये ।

अर्वाचीनोऽसाधको विकल्पपूर्वको वितर्को विरुद्धानुमानं परमात्मा दुःखी चेतनत्वादहमिव जगदन्तःपातित्वादित्यादि । एतन्मूलको यो विचारो दुर्मीमांसा च प्रमाणानि तत्त्वेनाभासमानानि । वस्तुतस्त्वनेवंविधानि कुतर्कशास्त्राणि पाशुपतादीनि तैः कलिलं व्याकुलमन्तःकरणं येषां ते तथा ते च ते दुरवग्रहा दुःसाध्यप्रतिबन्धास्ते च ते वादिनः । निन्दार्थकेनिप्रत्ययार्थविवरणपरः प्राक्तनो ग्रन्थः । एतेन संशयो विपर्ययो वा येषां ते तरतमभावेनाज्ञानिन एव देवानां न स्वाशयमनुसृत्यायं प्रवृत्त इत्याक्षेपाशयः सूचितः । वादिनामित्युपहासो वा । विवादानवसरे तददत्तावकाशे केवला निस्सीमा स्वात्मा निजा स्वस्वरूपभूता सा च सा माया सामर्थ्यं च तामन्तर्धाय निगूह्य । निगूहनहेतोरेवोपरमहेतुतेति समानकर्तृकता । उपरतसमस्तमायामये प्राकृतस्वभावरहिते एतादृशेशे दुर्जनजल्पितकुशलाकुशलभोगं न विद्मः । सुगणनिर्गुणरूपद्वैरूप्यप्रयोजकं भोक्तृत्वं चेति हृदयं भोक्तृत्वं चेति चेन्न । अनन्तरूपे विशेषबलतो रूपद्वयं क्षम्यते न क्षम्यते च शबलाशबलकबलनेनेत्याह ।। स्वरूपद्वयाभावादिति । स्वं स्वात्मकं स्वं स्वकीयं चेति तन्त्रेण रूपद्वयाभावादित्यर्थः । सर्वं स्वात्मकमेवेति भावो रूपद्वयाभावादित्येवावदतामात्मात्मीयसाधारणस्वशब्दं प्रयुञ्जानेन सूचित इति, ज्ञेयम् । एकमेवाद्वितीयं निरनिष्टो निरवद्यः शुभं पिबत्यसौ अनश्नन्नन्य इत्यादेः । अग्निस्तम्भवतो दह्यमानगेहवसत्सहवासोऽपि यथा न दाहस्तथेश्वरस्य न भोगादिरिति समविषममतिमज्जनानुसारेणेत्थं दर्शनस्यात्मानमिति-वत्प्रयोजकमर्थाद्दर्शयन्ति ।। समेति । अधिकारिणां समविषममतिकत्वेन तत्प्रसञ्जितं यन्मतं तदनुसञ्चरसि । तत्तदुचितायाचितगतिवितरणेन सदसती तन्मती चेत्थमिति सदृष्टान्तमाचष्टे ।। यथेति । रज्जुखण्डः सर्पादिधियां सर्पकुसुममालादिमतीनां यद्वा रज्जुखण्डस्तदादिः

सर्पादिधियाम् । रज्जुधियां रज्जौ सर्पधियां सर्पे रज्जौ सर्पधियां रज्जुरिति यथा यथा मती अदोषिदोषिभ्यो जायेते तथा रज्जुना सहितः खण्डः, शकलं तेन शुक्तिशकलग्रह आदिपदानुगुण्यात् । स एव भगवान्सर्ववस्तुषु ब्रह्मादियवसावसानेषु वस्तुस्वरूपो व्याख्यातचरमिदम् । वस्तुषु सु अत्यन्तमृषभोऽतद्रूप इत्यान्तरङ्गिको भावः । किं कारणं तत्रेत्यत आह ॥ सर्वेश्वर इति । एष सर्वेश्वर एष सर्वपाल इत्यादिश्रुतिमनुकरोति । ततश्च प्राचीनानुमानस्य श्रुतिसहकृतिरहितत्वाच्छुष्कत्वमिति नाविष्करणीयतां द्योतयति । भगवान् जीवभिन्नः सर्वेश्वरत्वाद्विलक्षणचेतनत्वाद्व्यतिरेकेण नरवदिति श्रुतिमूलमानमप्युक्तं भवति ।

धाता यथा पूर्वमित्यादौ चतुराननादीनां कारणता श्रूयत इत्यत आह ॥ सकलेति । सकलकारणानां तत्त्वेनाभिमतानां सरसिजपुरहरादीनां कारणभूतः । तथा च नामानि सर्वाणि यो देवानामित्यादि-भिर्मानैर्हरिरेतदभिधेय इति स वादोऽनवधेय इति ज्ञेयम् । भगवान्किं बहिष्ठः करोति सर्वमुतान्तरस्थ इति चेत् । वैशकलित्येनैकैकं न क्षमामहे । उभयमपि सर्वदा भगवतश्चेच्चिरञ्जीव । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । परिच्छिन्नताशाऽपि तव छिन्ना । अर्भकौकस्त्वादिना सूत्रकृतैवेति नो यतस्व । सर्वप्रत्यगात्मत्वात्सर्वान्तर्यामित्वात् । सर्वगुणाभासोपलक्षितः सर्वे गुणास्तेषामाभासो ज्ञानं येषां तैरुपलक्षितो दृष्टः । सर्वेभ्यो गुणा अप्रधाना अधमाधिकारिणस्तेषामभासोऽनवभासश्चोपलक्षितोऽनुमित इति वा । सर्वे च ते गुणाभासास्त्वद्गुणप्रतिबिम्बगुणकास्तैरुपलक्षित इति वा । न स्थानतोऽपीत्या-द्युक्तेर्न तत्कृतं वैचित्र्यमित्याह ॥ एक एवेति । निर्भेद इत्यर्थः । एक एव न लयेऽन्य इति वा । तत्कुत इत्यत आह ॥ पर्यवशेषित इति । अनेन स वा एष आत्मा नेति निषेधशेषो जयतादशेष इत्यादिश्रुतिरमृत्यादेरेक एव परिशिष्ट एवेति निर्णयमवर्णयत् ।

अथ ह वावेति गद्ये त्रिनयनेति तथा विभूतयो दितिदनुजादय इति वासुदेवेत्यादिभग-वन्नाम्नामेव स्तुतिप्रस्ताव आम्नातस्तथैव नान्यसञ्ज्ञानां लिङ्गानां पूर्वत्रेवात्राभिधीयमानत्वान्यथाऽनुपपत्त्या न त्रिनयनोऽत्र सदाशिवो विभूतय इति तादात्म्याभिप्रायेण किन्तु नानाभवनाभिप्रायेणेति किञ्चित्स्ववचनप्रमाणादिद्वैरूप्येण नृमृगाद्यात्मद्विरूपी नृहरिरेवेतीरयति ॥ त्रिनयनो नृसिंहादिरूपीति । त्रीणि नयनानि यस्य स त्रिनयनः । विष्णोः नृसिंहनामानीति मानेऽभिधीयमाननृसिंहेति नलोपः । नलोपः प्रातिपदिकान्तस्येत्यत्रेव लुप्तषष्ठीकम् । तथा च विष्णोर्नृसिंहस्येति सामानाधिकरण्येनान्वयः । शब्दनिर्णयो हि निबन्धः । तेन पुराणान्तरस्थं ''सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थलं योगारूढमतिप्रसन्नवदनं भूषासहस्रोज्वलम् । त्र्यक्षं चक्रपिनाकसाभयवरान् बिभ्राणमर्कच्छविं छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे'' इत्यादिकं समुच्चिनोति । ''उग्रो भस्मधरो नग्नः कपालीति शिवस्य च । विशेषनामानि ददौ स्वकीयान्यपि केशव'' इति विशेषनामत्वेन

शिवस्योक्तस्योग्रनाम्नोऽत्र ग्रहणं किमभिप्रायमिति चेन्न। तत्रापि भगवतः सर्वथा तदवाच्यत्वमभिप्रेतं स्वकीयेत्युक्तिस्वारस्यात्। किन्तूग्रत्वादितच्छब्दाभावादिति भाष्यसहितस्य मानस्य "गुणैरपि न तूपास्यो ये पूर्णत्वविरोधिन" इत्युक्तेस्तदादित्वेनोपास्यत्वाभाव एव तात्पर्यमित्यवश्यं वक्तव्यत्वान्न तदुक्तिरयुक्तेति मन्तव्यम्। नृसिंहादीति भाष्योक्तया मानस्थया च विष्णोरित्युक्त्या शृङ्गिग्राहिकया नृसिंहेत्युक्तिः सर्वेषां भगवद्रूपाणामविशेषेणेति ज्ञेयम्। उग्र उग्राभिरित्यादौ उग्रो दुष्टानामिति टीकोक्त्यादयः समञ्जसा ज्ञेयाः। हिसि हिंसायामित्यस्य हिनस्तीति पृषोदरादित्वेन वर्णविपर्ययेण सिंह इति भवति। अथवा तत्त्वप्रकाशिकायामतिसहनवति पुंसि सिंहशब्दप्रयोग इत्युक्तेः षह मर्षण इत्यस्येदं रूपम्। सर्वः संसारः पृषोदरादिरेव। अतीति चार्थस्तृतीयेकारस्येति गुर्वर्थदीपिकोक्तेरयं विशेषस्ततो "नृसिं हन्ता नृसिंहोऽसाविति" माननिरुक्तिरप्यनुसन्धेया। तत्र नृसिंहमानवोपलक्षितयोग्यसर्व-बन्धनम्। षिञ् बन्धन इति स्मरणात्। हन्तीति स तथेत्यर्थो बोध्यः। विविधमिति तादात्म्येन भवनविशेषणम्। विविधं यद्भवनं भावस्तत्पात्रत्वात्तद्योग्यत्वात्। सर्वे दनुजादयो न तु मस्त्यादिवदिति भावः॥

अथ गद्यार्थः॥ पूर्वोक्तसर्वार्थेषु प्रमाणमुदाहरन्ति॥ अथेति। महिमैव महामृतसमुद्रः। आकारान्तस्त्रीलिङ्गो महिमाशब्दः। समुद्रस्य या विप्लुट् बिन्दुरसकृदनवरतं लीढया स्वादितया। असकृदित्यधिकारिविशेषविवक्षया वा महिमामहत्त्वलाभलोभेनेति वा ज्ञेयम्। निष्यन्दमानेति वदता रसशब्दाव्याहार्यता वा। सुखस्यैव रसता भक्तिरस इत्यादाविव सूच्यते। सुखं वैषयिकं कुटुम्बनिकुरम्बादिसम्बन्धि। प्रियसुहृदि प्रियाप्रिये सुहृदि शोभनमनसि प्रिये चेति। भेदस्त्वनयोः पूर्वं समानाभिधानमुदीरितोऽस्माभिरनुसन्धेयः। निर्वृतमनसः सन्तुष्टचित्ताः। तदत्यागेऽयं योग इत्याहुः॥ स्वार्थेति। यत्र योऽस्मिन्सवितस्त्रिभुवनात्मभवन। त्रिभुवनमेव भवनं सन्निधानधाम यस्य स तत्सम्बुद्धिः। त्रिनयन नरहरे। इदानीं तदानीतभीतितो दितिजाद्युदीरणम्। विभूतयो विविधभवनपात्राणि। चापीत्यनेन वयमपि किं वक्तव्यं तथेति सूचयन्ति। अनुपक्रमयो यथापराधं प्रतीपकारि दराङ्कुरप्ररोहणानवसरोऽतदवनसमय इति मत्वा सुरनरमृगमिश्रितजलचराकृतिभिरवतीर्य दण्डं शिक्षां दधर्थ धृतवाननुगुणम्॥ ३३॥

चट्टी – ननु सृजसीत्यादिनोक्तं सृष्ट्यादिकर्तृत्वमनुपपन्नम्। भगवतः कर्तृत्वे कर्तृदेवदत्तस्येव पारतन्त्र्येण शुभाशुभभोगापत्तेरित्याशङ्कां परिहर्तुमज्ञानिनां संशयरूपं पूर्वपक्षं तावदनुवदति॥ अथ तत्र भगवानिति। अथ यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते। एवं भगवान् गुणविसर्गपतितः। गुणैः सत्त्वादिभिर्विसर्गो विविधसृष्ट्यादिस्तत्र पतितः प्रवर्तमानः पारतन्त्र्येण स्वकृतकुशलाकुशलफलम्। कुशलं सृष्ट्यादि लक्षणमकुशलं संहारादिलक्षणं च यत्कर्म तयोः फलं

सुखदुःखलक्षणमुपादत्तेऽनुभवति किम् । अथवाऽऽत्मारामः स्वमहिम्नि स्थित उपशमशीलः पूर्णानन्दानुभवः समंजसदर्शनः शुद्धज्ञानश्च यतस्तस्मादुदास्ते नोपादत्ते इति ह वाव न विदामो न निश्चिनुमः । ननु कः संशयः स्वातन्त्र्यं पारतन्त्र्यं चेत्युभयमपि भगवति स्वीक्रियतामित्यत आह ॥ न हीति । विरोधे सहानवस्थानलक्षणे विद्यमाने सति उभयं न ह्यंगीकर्तुमुचितम् । न ह्येकैव कोटिर्निर्धारयितव्येति चेन्न । किमनन्तगुणपरिपूर्णत्वाद्भगवतस्तद्विरोधिपारतन्त्र्यासंभवेन स्वातन्त्र्यमेकमेवाङ्गीकार्यम् । उत दुर्घटघटनासमर्थत्वादुभयमपीति पुनः संशयानिस्तरादित्याहुः ॥ भगवतीति । अपरिगणिता अनन्ता ये गुणाः स्वातन्त्र्यादयस्तेषाम् । अत एवानवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् । तदेवाह ॥ अर्वाचीनेति । विकल्प एवं वा एवं वेति । किमत्र युक्तमिति विचार इत्थमेवेति । तत्र ये प्रमाणाभासास्तदनुग्रहाः कुतर्काश्चार्वाचीना वस्तुस्वरूपासंस्पर्शिनो ये विकल्पादयो येषु शास्त्रेषु तैर्दुरागमैः कलिलं व्याकुलं यदन्तःकरणम् । तदाश्रिता यो दुरवग्रहो दुराग्रहस्तेन वदन्ति प्रतिपादयन्ति अभिलषितार्थमिति तथोक्तास्तेषाम् । विवादानवसरे विरुद्धधर्मवादागोचरे केवलस्वात्ममायां केवलामद्वितीयां स्वात्ममायां स्वरूपसामर्थ्यमन्तर्धायावष्टभ्योपरतसमस्तमायामये उपरतं नित्यनिवृत्तं समस्तमायामयं प्रकृतिगुणकार्यं यस्मिन्नीश्वरेऽघटितघटनासमर्थ ईश इत्युक्तस्तत्परत्वात्त्वमीश्वर इति वचनात् । भगवति को नु धर्मः पारतन्त्र्यादिलक्षणो दुर्घटो भवतीत्यर्थः । अनवगाह्यमाहात्म्यादिति पारतन्त्र्यासंभवाद्दुर्घटघटनाशक्तिमति तत्संभवाच्च संशय इति भावः । दुर्घटो भवतीत्यनन्तरं इत्यज्ञानिनो वदन्ति । तदयुक्तमिति शेषः । कुत इत्यत आहुः ॥ स्वरूपेति । स्वातन्त्र्यपारतन्त्र्यभेदेन ब्रह्मणि द्वैविध्यस्याप्रमाणत्वादित्यर्थः । ननु तथा प्रतिपत्तॄणां प्रतीतिरेव द्वैविध्ये प्रमाणं भविष्यतीत्याशङ्क्य सा भ्रान्तिरित्याहुः ॥ समेति । सममतीनां ज्ञानिनां विषममतीनामज्ञानिनां च मतं मतिमनुसरसि । ज्ञानिनां यथार्थज्ञानविषयो भवसि । अज्ञानिनां तु मिथ्याज्ञानविषयो भवसीत्यर्थः । तत्र दृष्टान्तः ॥ यथेति । रज्जुखण्डः सर्प इति रज्जुखण्ड इति च धीर्येषां तेषां मतिं यथाऽनुसरति तथेत्यर्थः । भगवान् ज्ञानिनां सम्यग्ज्ञाने विषयो भवतीत्युक्तम् । किं प्रकारावच्छिन्नो विषयो भवतीत्यतस्तत्स्वरूपं निरूपयन्ति ॥ स एव हीति । स एव सृष्ट्यादिकर्ता भगवान् । सर्ववस्तुषु सृष्टेषु वर्तमानेषु वस्तुषु वस्तुस्वरूपोऽप्रतिहतस्वरूपस्तद्विकारेण विकाररहित इति यावत् । वासनाद्वासयेद्वस्तु नित्याप्रतिहतत्वत इत्यादेः । विकारवस्तुनिष्ठस्य विकाराभावः कुत इत्यत आह ॥ सर्वेश्वर इति । पूर्णशक्तिरित्यर्थः । पूर्णशक्तित्वं च सर्वजगत्कारणत्वान्यथाऽनुपपत्त्या सिद्धमित्याह ॥ सकलेति । ननु ब्रह्मादीनां जगत्कारणत्वात्कथं सर्वकारणत्वं भगवत इत्यत आह ॥ सर्वेति । सर्वान्तर्यामित्वादित्यर्थः । न भगवतो जगत्कारणत्वं प्रयोजनापेक्षं पूर्णत्वादित्याह ॥ सर्वगुणेति । सर्वे पूर्णा गुणा आनन्दादयस्तेषामाभासोऽनुभवस्तेनोपलक्षितो युक्तः । जगत्कारणत्वोपयोगिपूर्वभावित्वमाह ॥ एक एव प्रलये पर्यवशेषित इति ।

यद्वा । नेति नेतीत्यादिश्रुतिभिः पर्यवशेषित इत्यर्थः । अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याहुः ॥ अथेत्यादिना संसारपरिवर्तः इत्यन्तेन । हे मधुमथन मधुसूदन । यस्मादेवंभूतस्त्वं अथ ह्वाव अत एव परमभागवता एते त्वच्चरणांबुजानुसेवां कथं मुहुः पुनर्विसृजन्तीत्यन्वयः । हि यस्मात्स्वार्थे पुरुषार्थे कुशला निपुणा अत एवात्मा त्वमेव प्रियः सुहृच्च येषां ते । साधवो रागादिशून्याः । अत्र हेतुः । तव महिमैवामृतरससमयः समुद्रस्तस्य विप्लुषा बिन्दुमात्रेण सकृदपि लीढया स्वादितया स्वमनसि निष्यंदमानमतिशयेन स्रवद्यदनवरतं सततं सुखं तेन विस्मारिता दृष्टश्रुता ये विषयजन्याः सुखलेशाभासा अत्यल्पसुखानि येषां ते । अत एव भगवति त्वय्यनवरतं सततं निवृत्तं सुखितं मनो येषां ते । यत्र यस्यामनुसेवायां कृतायां सत्यां परिवर्तः परिभ्रमणम् । प्रस्तुतं विज्ञापयन्ति ॥ त्रिभुवनेत्यादि, यावत्समाप्तिः । हे त्रिभुवनात्मभवन त्रिभुवनस्यात्मा स्वामी भवनं च । यद्वा । त्रिभुवनस्यात्मा मुख्यप्राणः स एव भवनम् मुख्याधिष्ठानं यस्य । परमं ब्रह्म धामेति श्रुतेः । त्रिभुवनमात्मनः स्वस्य भवनं यस्येति वा । अनेन त्रिभुवनोपद्रवोऽवश्यं परिहरणीय इति सूचितम् । इतरविशेषणान्येवमेवाभिप्रायगर्भाणीति ज्ञातव्यानि । त्रिषु वेदेषु प्रतिपाद्यो विक्रमो यस्य । त्रिरित्येवं त्रयो वेदाः कीर्तिता मुनिसत्तमैः । क्रमन्नेतांस्तु सर्वांस्त्रिविक्रमोऽस्ति जनार्दन इति वचनात् । त्रयो विक्रमो यस्येति वा । त्रेधा निदधे पदमिति श्रुतेः । त्रीणि नयनानि यस्य त्रिनयन । नृसिंहरूपिन् । विष्णोर्नृसिंहनामानि त्रिनेत्रोग्रादिकानि चेति वचनात् । त्रयाणां लोकानां मनोहरोऽनुभावो यस्य । एवं चतुर्धा संबोध्याहुः ॥ तवैवेति । विविधं विविधगुणप्रयोजिका भूतिः सत्ता एषु ते विभूतयः । विविधं भावपात्रत्वात्सर्वे विष्णोर्विभूतय इति वचनात् । अपिशब्देन स्वरूपविभूतित्वं गर्हयति । उपक्रमो विक्रमः । उपक्रमस्तु प्रारंभे चिकित्सायां च विक्रम इत्यभिधानात् । नोपक्रमोऽनुपक्रमः । पराजय इति यावत् । ततश्च हे भगवन् ये विभूतिशब्दवाच्या दितिजादयोऽभवन् तेषामनुपक्रमसमयः पराजयकालोऽयमिति मत्वा पूर्वं स्वात्ममायया । शुक्लशोणितसंबन्धमन्तरेण स्वसामर्थ्येनैव मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेदित्युक्तेः । प्रकटिताभिः सुरनरमृगमिश्रितजलचराकृतिभिः । उपेन्द्रकृष्णनृसिंहमत्स्याद्याकृतिभिः । यथाऽऽपराधं त्रैलोक्यहरणादिलक्षणापराधमनुसृत्य बल्यादीनां दण्डं दधर्थ धृतवानसि ॥ ३३ ॥

एवमेनमपि भगवन् जहि त्वाष्ट्रं वृत्रासुरं यदि मन्यसे । अस्माकं तावकानां तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगाडानां स्वलिङ्गविधारणेनात्मसात्कृतानामनुकम्पानुरञ्जितविशदरुचिरशिशिरस्मितावलोकनेन विगलितमधुरमुखरितवचसाऽमृतकलया चान्तस्तापमनघार्हसि शमयितुम् ।

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमाया-विनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्म प्रत्यगात्म-स्वरूपेण प्रधानरूपेण यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भक-तयाऽनुभवतः सर्वप्रत्ययसाक्षिणः आकाशशरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद् विस्फुलिङ्गादिभिरिव हिरण्यरेतसः । अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसन्नानां वयं यत्कामेनोपसादिताः ।

अथो ईश जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम् ।
ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च ।। ३४ ।।

सत्यधर्मा – एवं स्तुतं भगवन्तं प्रति प्रस्तुतं श्रावयन्तीत्याह ।। एवमेनमपीति । यदि मन्यस इति सुकुमारोक्तिर्बहिः । हृदयं तु बालादपि कारयिष्यामः । तव भक्तवत्सलतामवलम्ब्येति । एतत्संसारमेव प्रसारयन्ति ।। अस्माकमित्यादिना । हृदयरूपनिगडानां शृङ्खलासहितानाम् । अनेन त्वमन्तर्बद्ध इति सूच्यते । स्वलिङ्गविधारणेन स्वरूपभूतं यल्लिङ्गं साधुत्वप्रयोजकं चिन्हं भक्तिमत्त्वादिकं बहिः शङ्खचक्रादिकं तस्य विधारणेनात्मसात्स्वाधीनत्वेन कृतानाम् । अन्तस्तापं पापप्रयोजकम् । समर्थत्वे हेतुरनघेति । पापोत्थतापापकदेहे । स्मितेन सहितं च तदवलोकनं च तेन । अनुकम्पेत्यादिरुचिरेत्यन्तं द्वयोरपि शिशिरत्वं चावलोकन एव विशेषणमिति विशेषो ज्ञेयः । विगलितेत्यनेन निरायासेन निःसारितोऽपि सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरमित्युक्तेरस्मत्प्रयोजनजनकताऽस्तीति मन्वत इति द्योत्यते । मधुरमुखरितं मनोहरस्वरस्तेन तद्रूपयाऽमृतकलया । अस्माभिरित्यस्य कियानर्थविशेषो विज्ञापनीयः स्यादित्यनेनान्वयः । निमित्तमित्ययमाना ज्ञायमाना । अयतेः शानच् । कर्मणि यग्यकारलोपश्छान्दसः । निमित्तत्वं अयमाना गच्छन्तीति कर्तरि वा सः । संज्ञानार्थः । दिव्या माया स्वेच्छा तया विनोदलीला यस्य तस्य तेषां हृदयेषु तत्राप्यन्तर्निमित्तवदाचरतीत्यन्यथाप्रतीतिरनेन निवारितेति ज्ञेयम् ।

प्रत्यगात्मस्वरूपेण साक्षितया प्रतिजीवमवस्थितेन बहिर्ब्रह्मरूपेण यथा देशे काले तदानुगुण्येन प्रधानरूपेण तदन्तर्गततदुत्तेजकरूपेण देहावस्थानविशेषम् । एतेन कर्मणैतादृशेन भाव्यमिति विशेषम् । अवस्थानमिति विशेषं च । तदुपादानोपलम्भकतया तदुपादानत्वप्रापकतयाऽनुभवतो जानतः। सर्वप्रत्ययसाक्षिणः सर्वः प्रत्ययोऽपि साक्षी तदात्मक एव यस्य तस्य । आकाशशरीरस्य व्याप्तशरीरस्य

वा सूक्ष्मशरीरस्येति वा । आकाशशरीरं ब्रह्मेत्यादेः । असङ्गाङ्गस्येति वा । साक्षादिति लक्ष्मीव्यावृत्त्यर्थम् । विष्फुलिङ्गादिभिर्हिरण्यरेता वन्हिः । त्रिषु स्फुलिङ्गोऽग्निकणः । हिरण्यरेता हुतभुगित्युभयतश्चामरः । सुषामादित्वम् । वयं त्वत्पुरतोऽग्निपुरतः स्फुलिङ्गनीतय इति कियन्त इति द्योतयन्ति । विज्ञापनाऽनुचित्रस्य कर्मफलस्य छाया वासवनीलेत्यादिवदयं शब्दो बोध्यः । चरणशतपत्रयोश्छायेति करणेऽपि न छायाबाहुल्य इति विरुणद्धीति मन्तव्यम् । वयं यत्कामेनोपसादिता उपसत्तिं प्राप्तास्तदुपकल्पय । सर्वज्ञं प्रत्यशक्तस्य न वक्तार इति त्वमेव तत्त्वतो गतिरत एवं त्वया दया विधेयेति विज्ञापयन्ति ।। अत इति । शतपलाशस्य उपसादिता इत्यनेन सद्गुरुत्वं तच्छिष्या वयं सदेति सूचयद्भिरौपसदवदिति सूत्रतदुपात्तनानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्मधियां विरोधः । दोषाभावाद्गुरुशिष्यादिभावाल्लोकेऽपि नासौ किमु तेषां विमुक्तिरिति चेति श्रुत्यर्थोऽप्यर्थात्सङ्गृहीत इति ज्ञेयम् ।

इत उत्तरमस्मत्सद्वृत्तोच्छित्तिर्नासीच्छन्दःसिद्धिरभूदेव देवेत्युत्तमश्लोकमुपश्लोकयति ।। अथो इति । तस्य तदङ्गसन्धेश्च निपातो निश्चयेन भविष्यतीति देवाश्च सप्रकृतिका भवन्तीति सूचयितुमयं निस्सन्धिको निपातो निबद्धः प्रथमत इति तात्पर्यम् । तेजांसि ग्रस्तानि भीत्युद्भावनद्वारा सामर्थ्यानि ग्रस्तप्रायाणीत्यभिप्रायः ।। ३४ ।।

चट्टी – एवमेनं त्वाष्ट्रमपि जहि । यदि मन्यसे हन्तुं यदिच्छसि । हे अनघ । प्रथमं तावत् त्वदीयानामस्माकमन्तस्तापं शमयितुमर्हसि । तावकानामित्यत्र हेतुः । तव चरणनलिनयुगल-ध्यानेनैवानुबद्धो हृदयो मनः सनिगडः शृङ्खलो येषाम् । स्वलिङ्गानां शङ्खचक्रादिलांछनानां धारणेनात्मसात्कृतानां स्वकीयत्वेन परिग्रहीतानाम् । केन तापोपशम इत्याहुः ।। अनुकंपया । कृपया । अनुरंजितं सानुरागं च तद्विशदं निर्मलं च रुचिरं मनोहरं च । शिशिरमतिशीतलं च यत्स्मितं मन्दहासस्तत्सहितेनावलोकनेन कटाक्षवीक्षणेनानुकंपयैव विगलितं निर्गलितं मधुरं मुखरितं मन्द्रं च यद्वचस्तल्लक्षणयाऽमृतकलया च । किंचास्मदभिप्रायस्त्वया ज्ञायत एव किमत्रास्माभिर्वि-ज्ञापनीयमित्याहुः ।। अथेति । अथ हे भगवन् । तवास्मभिरिह कियान्वाऽर्थविशेषो विज्ञापनीयः स्यादित्यन्वयः । यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते । तथा तवास्माभिः कार्यार्थः प्रकाशो न कार्य इत्यर्थः । तत्र हेतुगर्भाणि विशेषणानि । अखिलजगतामुत्पत्त्यादिषु निमित्तायमानो दिव्यमायया स्वरूपेच्छया विनोदो लीला यस्य तस्य । सर्वजीवराशीनामन्तर्हृदयेषु । प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण स्थित्वा सुरनरादिदेहविशेषं जाग्रदाद्यवस्थाविशेषं बहिरपि ब्रह्मस्वरूपेण । व्यक्तरूपेण देशविशेषं कालविशेषं च । तदुपादानो-पलंभकतया तेषां देहादीनामुपादानं प्रकृतिस्तस्या उपलंभकतयोद्बोधकत्वेन तथा । यथावत् ।

साक्षादनुभवतः साक्षात्कुर्वत इति बुध्या विवेकेनान्वयः । सर्वप्रत्ययसाक्षिणः सर्वेषां जीवानां ये प्रत्यया ज्ञानानि । तेषां साक्षादीक्षितुः । आकाशशरीरस्याकाशवद्व्याप्तं निर्लेपमतीन्द्रियं च शरीरं यस्य स तथा तस्य । अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापितास्तदस्माकं कार्यं स्वयमेवोपकल्पय संपादय । कीदृशानामस्माकं विविधैर्वृजिनैर्दुष्कर्मभिर्यः संसारपरिश्रमस्तस्योपशमनीमुपशामनकरीं तव चरणमेव शतपलाशं कमलं तस्य छायामुपसन्नानां प्राप्तानाम् । स्वकामं कथयन्ति ।। अथो इति । अथोऽनन्तरमेव । अविलंबेनेति यावत् ।। ३४ ।।

हंसाय दभ्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ।
सत्संग्रहाय भवपान्थनिजाश्रयाय शश्वद् वरिष्ठगतये हरये नमस्ते ।। ३५ ।।

तात्पर्यम् – 'निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेदि'ति च ।। ३५ ।।

सत्यधर्मा – हंसायेति श्लोके निरुपक्रमायेत्यनेन सर्जनादिव्यापृतिवर्जितायेति विपरीतप्रतीतिं वारयितुं मानेन तदर्थं निर्धारयति ।। निरुपक्रम इति । अप्रयत्नः श्रमजनकप्रयत्नस्तस्याभावान्निरुपक्रमो हरिरुच्यते । अप्रयत्नः प्राक् सहितो य उपक्रमेदुपक्रमेत । नित्यमप्रयत्न इत्येकं पदम् । नित्य इति मा ज्ञानं यस्य स प्रयत्नो यस्य स नित्यमप्रयत्नः । इतरो हि नित्यं यथा तथाऽप्रयत्नोऽत उपक्रमेदिति वा ।। अथ मूलार्थलापनम् ।। हंसाय तद्वत्क्षीरनीरसमसदसदार्जनवर्जनकारिणे शुद्धाय वा । दभ्रनिलयायार्भकौकसे । निरीक्षकाय साक्षिणे साकल्येन स्वेक्षकरहिताय वा । मृष्टयशसे शुद्धदिग्व्याप्तश्रवसे । दिक्षुयानाद्यश इति छान्दोग्यभाष्योक्तेः । निरुपक्रमाय सहजप्रयत्नवते श्रमसमवायकृतप्रयत्नरहिताय । सत्सङ्ग्रहाय सतां सङ्ग्रहो येन स तस्मै । भवपान्थाः संसारपथिकास्तेषां निजाश्रयस्तस्मै । शश्वद्वरिष्ठगतिरूपाय वरिष्ठास्तत्त्वेन सम्प्रतिपन्ना ब्रह्माद्यास्तेषां शश्वच्छाश्वतिकी गतिर्येन तस्मै वा हरये । स्तोत्रान्तेऽपि मङ्गलं कृतमिति व्याजेनेति ज्ञेयम् ।। ३५ ।।

चट्टी – शीघ्रं तद्वधाय पुनः प्रणमन्ति ।। हंसायेति । हंसाय शत्रुहंत्रे । हन्तृत्वाद्धंसनामाऽसाविति वचनात् । दभ्रनिलयाय दभ्रं सूदनं हृदयाकाशं निलयो निवासस्थानं यस्य तस्मै । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति श्रुतेः । अत एव निरीक्षकाय सर्वबुद्धिसाक्षिणे । कृष्णाय सदाऽऽनन्दरूपाय । कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति निरुक्तेः । मृष्टयशसे मृष्टं शुद्धं यशो यस्य तस्मै । निरुपक्रमाय श्रमजनकप्रयत्नमन्तरेण जगत्कर्त्रे । निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेदिति वचनात् । सद्भिः संगृह्य इति सत्संग्रहस्तस्मै । भवपांथनिजाश्रयाय संसाररूपे पथि वर्तमानानां नित्याश्रयाय । निजमात्मीयनित्ययोरित्यभिधानात् । शश्वद्वरिष्टगतये शश्वत्पुनरावृत्तिशून्याऽत एव वरिष्टा स्वर्गाद्युत्तमा गतिर्मोक्षलक्षणा यस्मात्स तथा । तस्मै हरये आर्तिहराय तुभ्यं नम इत्यर्थः ।। ३५ ।।

श्रीशुक उवाच

अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः ।
स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ॥ ३६ ॥

सत्यधर्मा – स्वमुपस्थानं स्वोपास्तिगर्भितां स्तुतिम् ॥ ३६ ॥

चट्टी – स्वमुपस्थानं स्वविषयां स्तुतिम् । अभिनन्दितः सन्तोषितः ॥ ३६ ॥

श्रीभगवानुवाच

प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ।
आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ३७ ॥

सत्यधर्मा – मदुपस्थानविद्यया करणेन । हे सुरश्रेष्ठाः । व उपर्यहं प्रीतो यया विद्यया यया मत्प्रीत्येति वा । पुंसामधिकारिणाम् । आत्मैश्वर्यस्मृतिरात्मन ऐश्वर्ये सकलविस्मारके सत्यपि स्मृतिर्मत्स्मरणम् । आत्मनः परमात्मनः सकाशादैश्वर्यमस्माकमिति स्मृतिर्वा । मयि भक्तिश्च भवत इति शेषः । तया मदुपस्थानविद्ययाऽहं प्रीतस्तादृशप्रीतिमानिति वाऽर्थः ॥ ३७ ॥

चट्टी – मदीयमुपस्थानं स्तोत्रं तल्लक्षया विद्यया यया विद्यया पुंसामात्मैश्वर्यस्मृतिः । आत्मनो ममैश्वर्यस्य माहात्म्यलक्षणस्य स्मृतिर्ज्ञानं भवति । मयि भक्तिश्च भवति ॥ ३७ ॥

किं दुरापं मयि प्राप्ते तथापि विबुधर्षभाः ।
मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्ववित् ॥ ३८ ॥

सत्यधर्मा – हे विबुधर्षभाः । मयि प्राप्ते फलोन्मुखे सति । अप्रतारके भीतितारकत्वे सतीति वा दुरापं दुर्लभं किं न किञ्चित् । एकान्ताऽव्यभिचारिणी मतिर्यस्य स पुमान्मत्तो मम सकाशादन्यन्न वाञ्छति । कुतो यतस्तत्त्ववित् ईश्वरादतिरिक्तं सर्वं नश्वरमिति जानन् । मयि प्रसन्नेऽन्यन्न वाञ्छतीति तर्हि सर्वेऽप्येवमेव किं नेत्यप्याह । मत्तोऽविदशो वायुमां शतवः तु विशेषेण वाञ्छति योऽन्यद्वाञ्छति सोऽविन्मतश्चेति वा ॥ ३८ ॥

चट्टी – भक्तिमभिनन्दन्नैवैकान्तिनामस्माकं भगवद्भक्तिकामनां विहाय शत्रुहननलक्षणवरकामना कथं युज्यते । एकान्तानां न कस्यचित् । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमित्युक्तेरिति देवानां लज्जां परिहरति ॥ किमिति । मयि प्राप्ते भक्त्या वशीकृते सति किं दुरापं किं दुर्लभम् । न किमपि । सर्वं सुलभमेव । तथाऽपि सौलभ्येऽपि । तत्त्ववित् । विष्णुनाऽर्थेष्वीरितानि मन आदीनि सर्वशो वर्तन्तेऽन्यो

न स्वतन्त्र इति जानन् हि तत्त्वविदित्युक्तलक्षणस्तत्त्वज्ञानी । अत एवैकान्तमतिर्भगवदेकनिष्ठः । उत्तमाधिकारीति यावत् । अन्यत्तत्प्रीतिविषयादन्यत् । मत्तो न वांछन्ति । किन्तु मत्प्रियमेव वांछन्ति । अतो युष्मत्कामो मत्प्रिय एव । अन्यथा न दद्यामिति भावः ॥ तदुक्तम् ॥ विष्णोः प्रियमित्यादि ॥३८॥

न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ।
तस्य तानिच्छतो यच्छे यदि सोऽपि तथाविधः ॥ ३९ ॥

स्वय निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्मभिः ।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ॥ ४० ॥

तात्पर्यम् – यदि सोऽपि तथाविधः अत्युत्तमो न भवति चेत् । युष्मत्कामो मत्प्रिय एव । अन्यथा न दद्यामिति भावः । 'विष्णोः प्रियं कामयन्ति देवा नैवाप्रियं क्वचित् । यद्यप्रियं कामयन्ति न रातीशो हितो हि स' इति तन्त्रभागवते ॥ ३९,४० ॥

सत्यधर्मा – न वेद कृपण इति श्लोके प्राक् सप्रकाशं भक्तस्यैवोक्तेः स एवात्र तथाविध इत्यनेन परामृश्यत इति भायान्न भाव्यं तथेति स्वयमनूद्य तद्विवक्षितार्थमाह ॥ यदि सोऽपि तथाविध इति । अत्युत्तमो न भवतीति चेन्मदन्यद्वाञ्छति तर्हीयता समयेन बधिरस्य धुरि सङ्गीतवदस्माभिरनुष्ठितं सर्वं वृथैव जातमित्यतोऽयं कामो ममापि काम इति सान्त्वयन्ति ॥ युष्मत्काम इति । अन्यथा प्रियेतरत्वेन दद्यामभयमिति शेषः । देवा विष्णोः प्रियं कामयन्ति क्वचिदप्यप्रियं नैव कामयन्ति । कदाचित्कश्चिदप्रियं यदि कामयन्ति तर्हि ईशो यतो यस्माद्धितो हितमस्यास्तीति हितस्तद्धितवान्हितकर्तेत्यर्थः । अतस्तद्वाञ्छितं स्वाप्रियं नैव राति न ददातीत्यर्थः । यद्वा यदि मां भजन्नपि तथाविधो नश्वरफलयोग्यस्तर्हि तस्मै तदुचितानेव दद्यां स चानुत्तमो ज्ञेयः । युष्मान्भजतोऽपि तथाविधाय दद्यां तादृशं फलम् । कुतस्तेषां तदपीत्यतो येऽप्यन्यदेवताभक्तास्तेऽपि मामेवेत्यादेर्युष्मद्दाक्षिण्येन तद्वितरणं नान्यथेत्याह । युष्मत्कामो युष्मदपेक्षितो युष्मद्भक्त इति यावत्स मत्प्रिय एवेति । नो चेच्चेतःपूर्वं तदपि न दद्यामित्यपि योजयन्ति ॥

अथ मूलविवृतिः ॥ पूर्वं सूचितं विशदयति ॥ नेति । यः कृपणो नश्वरकाम्यकामुकः श्रेयो नित्यमङ्गलमपवर्गं किञ्चिच्चिरप्रायमात्मनः स्वस्येति वा मम परमात्मनः सकाशादिति वा न वेद न जानाति । गुणवस्तुदृगिति तत्र हेतुकथनम् । गुणाः शीघ्रलाभा अनन्तरं दुर्लभविषयाः स्वर्गादयस्तेष्वेव वस्तूनि चिरस्थायीनीति पश्यति स तथा । गुणेष्वप्रधानेषु युष्मदादिषु वस्तुषु दृक् शक्तत्वमतिमान्वा । तानेवेच्छतस्तस्य तत्रापि न यूयं स्वतन्त्रा इति भावः । ते भवन्तु तथा तव निरपेक्षस्य दक्षस्यापयश

इयादेवैवं वितरण इत्यत आह ।। यदीति । स मां युष्मद्द्वारावपरिचरं तथाविधात्युत्तमो मोक्षयोग्यो न भवति भवति चैतन्मात्रं चेत्तादृशं यच्छे तत्कर्मानुसारेण न शर्म दातुर्मम निर्ममस्य कान्वपकीर्तिरिति भावः । तथाविधमैदिकादिकमित्यपि तदधिकारिण इत्यपि केचिद्वर्णयन्ति । यो न कृपणो निपुणो गुणवस्तुदृक् । बहिरन्तर्ज्ञस्तस्मा अज्ञाय कर्मभिः । बहुवचनमाद्यर्थे । कर्मादिभिर्नेति वक्ता दीनदयालुवान् । तत्काले तस्याज्ञस्य तदरुचितं चेदप्युचितमग्रतो भायादित्यत्रापीदं निदर्शनम् । अपथ्यं तत्त्वेन प्रतीयमानं न इव राति रोगिणो वाञ्छितः किञ्चिदुदञ्चितगुणस्य काङ्क्षतः स वैद्यो भिषकृतमस्तथेति वाऽर्थः । आत्मनो मम गुणैर्ज्ञानानन्दादिभिर्निमित्तैर्वस्तुत्वदृक् शक्तत्वज्ञानी । अगुणमप्रधानं वस्तु शक्तम् । विश्वस्मिन्विश्वे वसदिति पश्यन् श्रेयो नित्यपुमर्थं वेद स्वत एव प्राप्यमिच्छतः पुंसो यथा तथैकान्तिकस्य । अनेन मोक्षोऽप्यवान्तरवैचित्र्यवानिति सूचयति । इच्छतस्तान्प्रतीव तस्य श्रेयो यच्च इति वाऽन्वयः । यदि स तादृश एकान्तिकोऽपि तथाविधो न किञ्चन परिलषन्ति । तांस्तथैव भजाम्यहमित्यादेरिति वा योजना ।

उत्तमादुत्तमादिस्थितिमाह ।। स्वयमिति । निःश्रेयसं न विद्यते श्रेयो यद्यस्मान्मोक्षलक्षणं स्वयं स्वत एव भविष्यतीति विद्वान् । अनेन वेदनेन विद्वान् तद्विशेषणीभूतज्ञानेनैव निःश्रेयसं भवतीति धृतिमानिति तात्पर्यम् । यो न विद्वांस्तस्मा अज्ञाय कर्मभिर्निःश्रेयसमिति वक्ति । तर्हीशोऽन्यथोपदेशेन प्रत्यवेयादित्यतोऽज्ञायेत्युदितम् । न बुद्धिभेदं जनयेदज्ञानामित्यादेः । यदि ह्यहमित्यादि कथमित्यतो वाऽऽह ।। स्वयमिति । स्वयमपि न वक्ति विद्वानपि न वक्ति । तथैव स प्रवर्तनीयः । अन्यथा तदति को गच्छेदिति भावः । अज्ञाय अं भगवन्तं जानाति यस्तस्मै कर्मभिस्तद्धेतुं स्वयं सु शोभनं प्राचीनापरोक्षरूपं यदयं ज्ञानं तं निमित्तीकृत्य निःश्रेयसं मोक्षमिति निःश्रेयसं तत्साधनमिति यावत् । विद्वान्वक्ति । अचतुरनिपातः । निःश्रेयसं तु कल्याणे चण्डचूडापवर्गयोरिति विश्वः । स्वयं सु शोभनोऽयः शुभावहविधिस्तमवधीकृत्य निःश्रेयसमिति पूर्वमपूर्वस्य साधनसम्पत्तिसम्पादनसाधनत्वेन याऽभिधेयता । ततोऽपि फलोपलम्भकत्वेन शुभतर इति ज्ञेयम् । निदर्शनमनुरूपं दर्शयति ।। न रातीति । रोगिणो ज्वराद्यार्तस्य तदुत्तेजकमपथ्यं दधित्रपुसं प्रत्यक्षो ज्वर इति सुधाभिधानाद्दधित्रपुसं वाञ्छतोऽपि तस्य न राति । वेदनायाः परिज्ञानं पुनस्तस्य निरोधनम् । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषामिति मानाद्भिषकृतमः । भिषज्यतीति भिषगिति कण्ड्वादियक् । भिषग्वैद्यश्चिकित्सक इत्यमरः । तद्वरिष्ठोऽन्यो भिषकृतमः धात्वाद्यज्ञानं निमित्तीकृत्येति । प्रथमा तृतीयार्थे वा । हे नरेति । अतिरोगिणोऽपथ्यं राति न तथा विद्वानिति व्यतिरेको वा ।। ३९, ४० ।।

चट्टी – उत्तमाधिकारिणां स्थितिमुक्त्वा प्रसंगादनुत्तमाधिकारिणामाह ।। न वेदेति । गुणेषु शब्दादिविषयेषु वस्तुदृक् नित्यत्वज्ञानवान् । अत एव कृपणोऽवशीकृतेन्द्रियः । विषयेष्वदोषबुद्धिः

सन्निन्द्रियाणां वशे स्थितः । कृपणः स तु संप्रोक्त इति वचनात् । अत एवात्मनः स्वस्य श्रेयो मोक्षलक्षणं न वेद । अत एवेच्छतो मदप्रियकामानप्याकांक्षमाणस्य तस्य तान्कामान् । यच्छे प्रयच्छामि । सोऽभिलाषुकः । तथाविधो यदि । अनुत्तमाधिकारी चेत्यर्थः । सोऽपि तथाविध इत्यनेन यद्यपि केषाञ्चिदुत्तमाधिकारिणामपि प्रारब्धवशादश्वत्थाम्नो दुर्योधनक्षेत्रेऽपत्योत्पादनकामवदसत्कामः संभवति । तथाऽप्यहं न ददामि । हितकारित्वादित्युक्तं भवति । तथा चोक्तम् ।। यद्यप्रियमित्यादि । उत्तमानां मदप्रियकामं न प्रयच्छामि । अनुत्तामानां तु प्रयच्छामीत्युक्तम् ।।

तत्र दृष्टान्तावाह ।। स्वयमिति । विद्वानित्येतदावर्तनीयम् । ईहमानायेति शेषः । यथा विद्वान् ज्ञानी स्वयं निःश्रेयसं मोक्षसाधनं विद्वान् जानन्नपि कर्मभिरीहमानायाज्ञायाज्ञानिने न वक्ति नोपदिशति । प्रत्युत तमेवानुसरति । न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्निति वचनात् । एवमहमप्यनुत्तमं मदप्रियकामान्न निवर्तयामि । यथा च भिषक् वांछतोऽपि रोगिणोऽपथ्यं न राति न ददाति । एवमेवाहमप्युत्तमाधिकारिणं मदप्रियकामान्नि-वर्तयामीत्यर्थः ।। ३९, ४० ।।

मघवन् यात भद्रं वो दध्यञ्चमृषिसत्तमम् ।
विद्याव्रततपःसारं गात्रं याचत मा चिरम् ।। ४१ ।।

तात्पर्यम् – 'समर्था अपि याचन्ते देवा मुन्यादिकान्कचित् । आज्ञयैव हरेस्तेषां यशोऽर्थमपि नान्यथे'ति च ।। ४१ ।।

सत्यधर्मा – मघवन्यात भद्रं व इति श्लोके लोकेशो न न्याय्यं नान्यान्प्रति तत्प्रेषणं तत्रापि तत्परतन्त्रमृषिविशेषं प्रति तु तत्कथमित्याशङ्कां मानेनैव विमानितां करोति ।। समर्था अपीति । देवाः समर्थास्तेभ्योऽपि शक्ता मुन्यादिकान् ततोऽप्यशक्तानपि याचन्ते । न सदेत्याह ।। क्वचिदिति । कुत इत्यतोऽपि हेतुमाह ।। तेषां क्वचिदिति । तेषां मुन्यादीनां चित् त्रिदशसदृशी क्व । न क्वापीत्यर्थः । या च याचना न स्वमनसा किन्तु हरेराज्ञयैव । सोऽप्येवम्भावो वासुदेवस्य कौतस्कुत इत्यत आह ।। यशोर्थमिति । तेषामृषीणां यशोर्थं स्वदेहमपि तदीहानां महात्मनोऽर्पयामासुरिति यशोर्थम् । अन्यथोपायान्तरमन्तरेणापायगमनासमर्थतया नेति तन्त्रभागवतोक्तेर्न देवानां न वासुदेवस्याचतुरतेति ज्ञेयम् ।। ततश्चायं श्लोकार्थः ।। हे मघवन् व्याख्यातचरम् । इन्द्रप्रधानत्वेतराप्रधानत्वस्फोरणायैक-वचनेनैकमात्रं सम्बोध्य वो यातेत्युक्तिरिति ज्ञेयम् । दध्यञ्चं नाम्ना । न सोऽज्ञ इत्याज्ञापयति ।। ऋषिसत्तममिति । गत्वा किं कार्यमित्यत आह ।। गात्रं याचतेति । याचने तस्य निमित्तं विद्याव्रततपःसारमिति । विद्या च व्रतं च कृच्छ्रचान्द्रायणादिकं तप आलोचनं चैतेषां सारः स्थिरांशो बलं वा यस्य तत् ।। ४१ ।।

चट्टी – वृत्रहननलक्षणकामस्य स्वप्रियत्वज्ञापनाय तदुपायं कथयति ॥ मघवन्नित्यादिना । विद्यया व्रतैस्तपसा च सारं दृढं गात्रं शरीरं याचध्वम् ॥ ४१ ॥

स वै ह्यधिगतो दध्यङ् अश्विभ्यां ब्रह्म निष्कृतम् ।
तद् वा अश्वशिरं नाम तयोरमरतां व्यधात् ॥ ४२ ॥

सत्यधर्मा – दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमुवाच । अथर्वणायाश्विनौ दधीचेऽश्व्यं शिरः प्रत्यैरयतम् । स वां मधु प्रवोचदृतायन् । त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति प्रमुखश्रुत्यर्थगर्भोऽयं श्लोकः । स दध्यङ् अधिगतोऽधि अधिका गतं गतिर्यस्य सः । अश्विभ्यां पुनः प्राप्त इति वा । निष्कृतं स्वेन गुरुमुखतः सम्पादिता । प्रारब्धं परिसमाप्य वक्ष्यामीति प्रतिज्ञातमिति वा । ब्रह्मैव तन्मन्त्रविशेषं निष्कृतं प्रवर्ग्याख्यं कर्मोक्तवान् । तच्छिर उत्कृत्यान्यत्र प्रस्थाप्याश्वशिरः संयोज्य तेन विद्याग्रहणात्तदश्वशिरं नामतोऽभूत् । तत्सामर्थ्यमाह । तयोरमरतां यद्व्यधात्तदश्वशिरनाम प्रसिद्धमिति वाऽर्थः ।

इदं वैतन्मधुदध्यङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्तद्वां नरासनयेदंस उग्रमाविष्कृणोमि तन्यतुर्वृष्टिम् । दध्यङ् हयन्मध्वाथर्वणो वाम इवास्य शीर्ष्णा प्रयदीमुवाचेति । इदं वैतन्मधु दध्यङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । अथर्वणायाश्विनौ दधीचेश्व्यं शिरः प्रेरयतं स वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति बृहदारण्यकोपनिषच्चतुर्थाध्यायखण्डद्वयभाष्ये । दध्यङाथर्वणोऽश्विभ्यामेतां विद्यामदात्पुरा । हयग्रीवब्रह्मविद्या तेषां ब्रह्मादिभिर्धृतेति । प्रत्यैरयतं प्रतिसमाधत्तम् । ऋतायन्सत्यं कुर्वन् कक्ष्यं नारायणकवचं त्वाष्ट्रं त्वष्टृपुत्रेण विश्वरूपेणेन्द्रायोक्तम् । सनये लाभाय दंसः कर्म स्तनयित्नुर्वृष्टिमिव । तस्यां विद्यायां परस्योक्तायां तव शिरश्छेत्स्यामीतीन्द्रेण दधीचं प्रत्युक्ते सोऽश्विभ्यामावाभ्यां ब्रूहीत्युक्त इन्द्रेणोक्तमाह । तदाऽश्विभ्यामाव इत्युक्त्वा तच्छिरश्छित्वाऽन्यत्र निधायाश्वशिरः सन्धितम् । तेन विद्यायामुक्तायां तस्मिन्निन्द्रेण छिन्ने पूर्वशिरः सन्धितम् । पूर्वं जानन्नपीन्द्रः पश्चाद्विश्वरूपाच्छुश्रावेति पुनर्नवत्वायेति न विश्वरूपत्वाष्ट्रोऽश्विभ्यामित्यनेन विरोध इत्युक्तेरर्थविशेषो बोध्यः ॥

ततश्चायमुदाहृतखण्डद्वयभागार्थः । अत्रैवार्थे मन्त्रान्तरं वक्तुमाह ॥ इदमिति । किमवोचदित्यतो मन्त्रं पठति ॥ आथर्वणायेति । हे दस्रौ शत्रुभेदकौ । अश्विनौ युवामाथर्वणाय तद्गोत्रोत्पन्नाय दधीचयेऽश्व्यमश्वसम्बन्धि शिरः । प्रत्यैरयतं सन्धितवन्तौ स्थः । स सन्धिताश्वशिरा ऋतायन् युवयोः समयान्तरे मधुविद्यां प्रवक्ष्यामीति प्राक् प्रतिज्ञातं सत्यं कुर्वन् । वा युवाभ्यां मधु मधुविद्यायां त्वाष्ट्रं त्वष्टृपुत्रेण विश्वरूपेणेन्द्रायोक्तं कक्ष्यं नारायणकवचं तदपि प्रवोचत् । अडभावश्छान्दसः । इन्द्रो हि

दधीचं प्रतीमां विद्यां परस्मै ब्रूयाच्चेत्तव शिरश्छेत्स्यामीत्युक्तत्वादश्विभ्यां दधीचिं प्रतीमां विद्यामावाभ्यां ब्रूहीत्युक्ते दधीचिरिन्द्रोक्तमुक्त्वा तूष्णीमासीत्। तदाऽश्विनौ तर्हि त्वामावो रक्षयिष्याव इत्युक्त्वा तस्य शिरश्छित्वाऽन्यत्र प्रस्थाप्याश्वशिरः समादाय दधीचेः सन्धित्वाऽश्वशिरसा तेन विद्यायां प्रोक्तायामिन्द्रेण च तदश्वशिरसि छिन्ने पुनर्यथापूर्वं तदीयमेव शिरः सन्धितवन्ताविति। चतुराननशासनः पाकशासनो येन विश्वरूपेण स्वानधीतनिरूपितैतत्केनापि तु तन्मन्त्रस्य नूतनतासिद्धय एव विपश्चिदपि पश्चाच्छुश्राव। नो चेदन्यस्मै ब्रूयाच्चेदित्यादि न ब्रूयात्। अमुमेवाभिप्रायं द्वैपायनोऽपि प्राक् पृच्छत इत्येतावता पूर्तौ यदनुपृच्छत इत्युक्तवांस्तेनानु पश्चादपि पृच्छते। पश्चात्सादृश्ययोरन्विति विश्वादिति द्योतयामासेममन्वर्थमवेत्य भाष्यकृच्चरणोऽपि पूर्वं जानन्नपीन्द्रः पश्चाद्विश्वरूपाच्छुश्रावेत्युक्तवानिति नैतद्विरोधः प्राग्ग्रन्थस्येति सर्वं चतुरस्रम्॥ ४२॥

चट्टी – तत्र तदीयं वीर्यातिशयमाह॥ स वा इति द्वाभ्याम्। एवं ह्यत्र प्रसिद्धा कथा, निशम्याथर्वणं दक्षं प्रवर्ग्य ब्रह्मविद्ययोः। दध्यंचं समुपागम्य तमूचतुरथाश्विनौ॥ भगवन् देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत्। कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छताम्॥ तयोर्निगदतोरेव शक्र आगत्य तं मुनिम्। उवाच भिषजोर्विद्यामावादीरश्विनोर्मुने॥ यदि मद्वाक्यमुल्लंघ्य ब्रवीषि सहसैव ते। शिरसंधानसंदेह इत्युक्त्वा स ययौ हरिः॥ इन्द्रे गते तदाऽभ्येत्य नासत्यावूचतुर्द्विजम्। तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः॥ आवां तव शिरश्छित्वा पूर्वमश्वस्य मस्तकम्। संधास्यावस्ततो ब्रूहि तेन विद्यां द्विजोत्तमः॥ तस्मिन्निन्द्रेण च पुनः पुनः संधाय मस्तकम्। निजं ते दक्षिणां दत्वा गमिष्यावो यथागतम्॥ एतत्श्रुत्वा तथोवाच दध्यङ्थर्वणस्तयोः। प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतो गतशङ्कित इति॥ ततश्चायमर्थः। स दध्यङ् ब्रह्मपरं नारायणकवचं निष्कृतं नितरां कृतं भवति। येन तं प्रवर्ग्यं चाधिगतो ज्ञातवान्। ततोऽश्विभ्यामुभयमुपदिदेशेति शेषः। कथंभूतं ब्रह्म यद्वै अश्वशिरसा प्रोक्तत्वादश्वशिरं नाम प्रसिद्धम्। तयोरमरतां मृतिराहित्यं व्यधात्। वेत्यनेनाश्वस्य शीर्ष्णा प्रयदीमुवाचेति श्रुतिप्रसिद्धिं सूचयति॥४२॥

कृत्स्नं चाथर्वणं त्वाष्ट्रं वर्माभेद्यं मदात्मकम्।
विश्वरूपाय यत् प्रादात् त्वाष्ट्राय त्वमधास्ततः॥ ४३॥

सत्यधर्मा – तं प्रत्येव तव चुचोदयिषा यातेति किं पातिरिति चेत्तव विद्यानुबन्धायानुबन्धा। किञ्च मन्मन्त्रस्य नान्यत्रैवमयातयाममश्विभ्यां याचिते यथा स्वशिरादिघातं दत्तवान् तथेति ममाभिप्राय इत्याशयेन किञ्चित्प्राश्नमुदञ्चयति॥ कृत्स्नमिति। मदात्मकं नारायणकवचरूपमत एवाभेद्यमाथर्वणं दधीचाऽधीतवान्कृत्स्नं साङ्गम्। त्वाष्ट्रं दधीचात्तेन सम्पादितत्वात्। त्वाष्ट्राय विश्वरूपाय प्रादाच्च त्वं

विश्वरूपात्तो धृतवानसि । नन्वश्विभ्यां कथने बिभ्यद्दध्यङ् कथं त्वाष्ट्राय त्वं चाकथयदिति चेत् । पाकशासनशासनात्पूर्वमेवावादीदिति वा पुनः स्वमनु नवतासिकामश्च क्षम इति पुनः परम्पराप्रसरेण नान्ते तस्यायुष्ह्वादिति मत्वा वा वादयोग्यायान्यस्मै कस्मैचनेति का कथन्ता ॥ ४३ ॥

चट्टी – किञ्चाथर्वणेन दधीच्या त्वष्ट्रे विश्वरूपपित्रे प्रोक्तत्वादाथर्वणं त्वाष्ट्रं चेति प्रसिद्धम् । मदात्मकं मत्परम् । अत एवाभेद्यं यन्नारायणकवचं कृत्स्नं सांगोपांगं त्वष्टा विश्वरूपस्स्वपुत्राय प्रादात् । उपदिदेश । यत्कवचं ततो विश्वरूपात् । त्वमधा धृतवानसि । तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः ॥ ४३ ॥

युष्मभ्यं याचितो दध्यङ् धर्मज्ञोऽङ्गानि दास्यति ।
ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ।
येन वृत्रशिरोहर्ता मत्तेजउपबृंहितः ॥ ४४ ॥

सत्यधर्मा – अदाने नो मानहानिरित्यतो नेत्याह ॥ युष्मभ्यमिति ॥ न याचितो युष्माभिर्युष्मभ्यम् । अङ्गानि पत्यपत्याद्यङ्गान्यपि किं स्वाङ्गानीति ध्वनयितुं यद्वक्ष्यति स्वज्ञातिविग्रहैरिति । नैकस्याङ्गुल्यादेरङ्गस्य स्वजीवनाविरोधिनो दानमपि तु सर्वशरीरस्येति द्योतयितुं वा बहुवचनम् । तन्मात्रेण किं भवतीत्यतोऽहमपि तदन्तःसन्निहितो भवानीत्यप्याह ॥ अङ्गानीति । अगिर्गत्यर्थः लोट् । अहमङ्गानीति सूचयितुं वा । मत्तेजउपबृंहितो भगवत्तेजसाऽन्वित इत्युत्तरस्वारस्यात् । को वा कायदाता भवेत्स्वामिन्किमस्मान्वञ्चयसीत्यत आह ॥ धर्मज्ञ इति । याञ्चाविच्छेदो न कर्तव्य इति वोत्तरत्रैतद्भाविमहापुण्यज्ञ इति वा । दास्यति । ततस्तैस्तदङ्गावस्थितैरस्थिभिः करणैर्विश्वकर्मणा कर्त्रा विनिर्मित आयुधश्रेष्ठः भवतु स कीदृग्गुण इत्यत आह ॥ येनेति । परस्परमियदस्मद्यापनं कुतो भवत इत्यत आह ॥ मत्तेज उपबृंहित इति । आयुधश्रेष्ठे इन्द्रे चान्वेति ॥ ४४ ॥

तस्मिन् विनिहते यूयं तेजोऽस्त्रायुधसम्पदः ।
भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥ ४५ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे नवमोऽध्यायः ।

सत्यधर्मा – तद्ग्रस्तानामस्माकं समस्तानामस्त्रशस्त्राणां तेजसां च गतिः केत्यत आह ॥ तस्मिन्निति । भूयस्तेन ग्रस्ताः पुनः प्राप्स्यथ । मत्परान्मद्भक्तान्केऽपि न हिंसन्ति । वो भद्रमस्तु । न हिंसन्तीति बहुवचनेन नैकलेनानेन चिन्तातातातान्तिः सम्पादनीया कियानयमिति सूचयति । अनेकेषां भवद्द्विषां दशेदृशीति सूचयतीति मन्तव्यम् ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे नवमोऽध्यायः ॥ ६-९ ॥ छ ॥

चट्टी – तेजश्चास्त्राणि चायुधानि च संपदश्च भूयः प्राप्स्यथ । महाकायस्त्रिभुवनग्रासि स एवास्मान् हन्यादिति शङ्काकुलचित्तान् प्रत्याह ॥ नेति । मत्परांश्च न हिंसति केऽपीति शेषः । अतो युष्माकं भद्रमेवेति । अत्र समर्थानामपि देवानां हर्याज्ञया नीचमुन्यादियाचनं न विरुद्धम् ॥ तदुक्तम् ॥ समर्था अपीत्यादि ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ ६-९ ॥

अथ दशमोऽध्यायः ।

श्रीशुक उवाच

इन्द्रमेवं समादिश्य भगवान् विश्वभावनः ।
पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ॥ १ ॥

सत्यधर्मा – हरिः ॐ ॥ अत्र शत्रुसंहरणं हरिकरुणाकरणं भवत्परम्परया साम्परायसाधनमिति वृत्रगोत्रभिदो युद्धं हरिहयतस्तद्धननं च कतिपयैरध्यायैर्वदन्नादौ दधीचिः किं शचीशाय शरीरं व्यतारीदथवा तं प्रातारीदिति राज्ञः संशयं शमयञ्छुको वक्तीति वक्ति ॥ श्रीशुक इति । विश्वमेतदीप्सितं सर्वं भावयतीति विश्वभावनः । अनिमेषाणां निर्लोचनमीलनानाम् । निमेषोऽक्षिनिमीलन इति विश्व । देवेन्द्रादीनामिति शेषः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ संवादव्याजतो धर्मस्वरूपं च निरूप्यते ॥ १ ॥

तथाऽभियाचितो देवैर्ऋषिराथर्वणो महान् ।
मोदमान उवाचेदं प्रहसन्नेव भारत ॥ २ ॥

सत्यधर्मा – तथेश्वरेरितरीत्या मोदमानः अहो हेयस्यापि देहस्य पततो देहस्यास्य महदुपयोगयोगसमय आयात इति तुष्यन्प्रहसन्नेव । क्लृप्तकालप्राप्त्यैव तन्मुखतो धर्मश्रुत्यैव चरमे समये सत्सम्भाषणमुन्नत्यै कारणमिति वाऽऽह ॥ २ ॥

चट्टी – मोदमान एव ॥ २ ॥

अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ।
संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥

सत्यधर्मा – देहधारिणां दशेदृशीति वक्ति ।। अपीति । हे वृन्दारका देहैः शरीरिणां संस्थायां नाशे तद्विषये शरीरस्य योऽभिद्रोहः परिचरितोपद्रवश्चेतनापहः संविद्भ्रंशकरो दुःसहोऽपि यूयं किन्न जानीथ तत्त्वेशानां ज्ञानमस्तीति भावः । संस्था स्थितौ चरे नाशे । चेतना संविदि प्रोक्ता । अपि सम्भावनाप्रश्न इति विश्वस्मिन्विश्वः। संस्थायां तदर्थं योऽभिद्रोहः परकृतपीडा चेतनापहो दुःसहश्चैते यूयं न जानीथापि। तथा सम्भाव्यते । अमर्त्यत्वादिति वा । उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यत त्यादेः ।। ३ ।।

चट्टी – तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाणमुवाच । अपीति द्वाभ्याम् । हे वृन्दारकाः । अपि किं संस्थायां मत्यौ योऽभिद्रोहो दुःखं तन्न जानीथ चेतनापहो बुद्धिभ्रंशकरः ।। ३ ।।

जिजिविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ।
क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ।। ४ ।।

सत्यधर्मा – स्वदार्ढ्यं प्रकटयितुं किञ्चिद्दुस्त्यजतोपपादनं नटयति ।। जिजीविषूणामिति । जीवनेच्छावतां जीवानां मदादीनामात्मा देहो य इहैतैरीप्सितो युष्माकमपेक्षितः प्रेष्ठोऽतिप्रियः । इष्ठनि परतः प्रियस्थिरेति प्रादेशः । तं को दातुमुत्सहेत उत्साहवान्भवेत् । यदि मधुसूदनो याचेत तदा कथमित्यत आह ।। भिक्षमाणाय विष्णव इति । विष्णवेऽपि । आत्मा यत्ने धृतौ देह इति विश्वः । तत्प्रेरणयैत आयाता इत्येनं निदर्शनमनुपदर्श्य यन्मम सुकृतदातेति वदन्विष्णव इति तं कटाक्षितवानिति ज्ञेयम् । सामान्यतो जीवानां जिजीविषूणामिति वदन्नन्तरङ्गतो नाहं तथेति ध्वनयति ।। ४ ।।

चट्टी – आत्मा देहो न केवलमीप्सितः किंत्विह प्रियसमस्तवस्तुषु प्रेष्ठोऽतिशयेन प्रियः । वयं जानीम एव । किन्तु विष्णुरस्मन्मुखेन ब्रूत इति चेत्तत्राह विष्णवेऽपि दातुं क उत्सहेत ।। ४ ।।

देवा ऊचुः

किन्नु तद् दुस्त्यजं ब्रह्मन् पुंसां भूतानुकम्पिनाम् ।
भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ।। ५ ।।

सत्यधर्मा – न नाभित इदमभिहितमिति जानन्तोऽप्यन्यापदेशेन स्वाभिलषितं दातुं तं प्रोत्साहयन्ति। पुंसां किन्नु तद्दुस्त्यजं दुःखसाध्यत्यागमिति । ते च कीदृशाः पुमांस इत्यतो भूतानुकम्पिनां प्राणिभृन्मात्रदयायुजां शिखादिरनुकम्पीति । ते च लोके के वेत्यत आह ।। भवद्विधानामिति । भवतो विधा प्रकार इव प्रकारा येषां ते तथा । एतदौपम्यस्यान्यात्रोक्त्या मुख्यत्वमेतस्यैव ध्वनयामासुः । पुण्यश्लोकेड्यकर्मणां पुण्यश्लोकैर्महायशस्विभिरीड्यानि स्तुत्यानि कर्माणि येषां तेषाम् ।। ५ ।।

चट्टी – पुण्यश्लोकैरीड्यानि कर्माणि येषां ते तथा ।। ५ ।।

नूनं स्वार्थपरो लोको न वेद परसङ्कटम् ।
यदि वेद न याचेत नेति नाह यदीश्वरः ।। ६ ।।

तात्पर्यम् – 'आज्ञयैव महाविष्णोः कार्यार्थमपि च क्वचित् । नीचानपि च याचन्ते स्वात्मनो गुणवत्तराः । नीचवाक्यं वदेयुश्च सुरा नैतावता क्वचित् । तेजःक्षतिर्भवेदेषां जनकस्य यथार्भकादि'ति तन्त्रमालायाम् ।। ६ ।।

सत्यधर्मा – ननु स्वभावत उत्तमानाममराणां स्तवननमननीचयाचनादि न मम सुरुचिरमित्यत ऊचे ।। आज्ञयैवेति । स्वात्मनः कार्यार्थमित्यन्वयः । स्वयं गुणवत्तरा अपि तेभ्यः किञ्चन नीचवाक्यमवाच्यं स्वनैच्यमपि सुरा वदेयुः । एतावतैतेषां तेजःक्षतिर्मानहानिः क्वचिदपि न भवेत् । अर्भके स्वगर्भजे बाले पितुः पितः स्वामिन्निति वचो यथा न नीचतावहं तथाऽमराणामवरान्प्रति वचनं न मानभङ्गावहमिति भावः ।। अथ मूलार्थः ।। युष्माकमस्माकं चैतदनुभवसिद्धं तथाऽपीश्वरेण त्वदादिना नैवम्भाव्यमित्याहुः ।। नूनमिति । परसङ्कटं त्वद्देहादानेऽमरमरणदं सङ्कटं स्वार्थपरो लोको न वेद । परसङ्कटं त्वच्छरीरवितरणक्षणे तव जायमानं सङ्कटं च परोऽस्मदादिर्न वेद नूनं निश्चितम् । केनैवं निश्चय इत्यतोऽन्वयव्यतिरेकाभ्यामित्याहुः ।। यदीति । यदि वेद तर्ह्येवं न याचेत । याचते चातो न वेदेत्यर्थः । यदीश्वरः सन्नपि नेत्याह यः स न वेद परसङ्कटम् । अथवा यो नेत्याह स ईश्वरोऽपि नश्वर इत्यर्थः । अतस्त्वमीश्वरो वयं याचका एकमृतितोऽनेकमृतिर्गरीयसीति लघीय एव कर्तव्यमिति तात्पर्यमवसेयम् ।। ६ ।।

चट्टी – याचको यदि न वेद तर्हि न याचेत । यदीश्वरो दानसमर्थो भवेत्तर्हि सोऽपि नेति नाह । अतो यथा तव संकटं वयं स्वार्थपरा न जानीमः । एवं प्रत्याचक्षाणस्त्वमप्यस्मत्संकटं वयं स्वार्थपरा न जानासीति भावः । उत्तमानामपि देवानां दैन्यवचनपूर्वकं नीचप्रार्थनेऽपि न तेजोभङ्गः । विष्ण्वाज्ञामूलत्वात् ।। तथा चोक्तम् ।। आज्ञयैव महेत्यादि ।। ६ ।।

ऋषिरुवाच

धर्मं वः श्रोतुकामेन यूयं वै प्रत्युदाहृताः ।
एष वः प्रियमात्मानं त्यजन्तं सन्त्यजाम्यहम् ।। ७ ।।

सत्यधर्मा – श्रोतुकामेन तुं काममनसोरपीति तुमुनो लोपे श्रोतुं कामो यस्य स श्रोतुकामस्तेन । मया प्रत्युदाहृताः प्रत्याख्याता इवोक्ताः । एषोऽहं अद्य वाऽब्दशतान्ते वा देहोऽयं क्षणभङ्गुर इत्यादेरात्मानं मां त्यजन्तं वर्तमानसामीप्ये तत्त्वेन व्यपदेशः । शतृ कालंसामान्यार्थकः इति तव प्रियं कृत्वा सन्त्यजामि ॥ ७ ॥

चट्टी – वः सकाशात् । धर्मं श्रोतुकामेन मया प्रत्युदाहृता प्रत्युक्ताः । एषोऽहं त्यजन्तं मां त्यक्त्वाऽऽयातमात्मानं देहम् ॥ ७ ॥

योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् ।
ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥

सत्यधर्मा – योऽध्रुवेणाशाश्वतेन । हे अनाथाः कदाऽप्ययाचमानाः । नञ्द्वयस्य धर्मयशोद्वये-नान्वयः । नेहेत नेच्छेत् । स पुमान्स्थावरैस्तत्समैर्विवेकविकलैरपि शोच्यः । हे नाथा इति वा ॥ ८ ॥

चट्टी – अध्रुवेणानित्येनात्मना देहेन हे नाथा नेहेत न संपादयत ॥ ८ ॥

एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ।
यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥

सत्यधर्मा – पुण्यश्लोकैः शिबिप्रभृतिभिः । आत्मा स्वयं तत्समसुखदुःख इत्येतावानव्ययो धर्म उपासितः ॥ ९ ॥

चट्टी – यो भूतानां शोचेनानुशोचति ॥ हर्षेण हृष्यति । तस्य यो धर्म एतावानेवाव्ययः ॥ ९ ॥

अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः ।
यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥

सत्यधर्मा – पारक्यैः श्वशृगालभक्ष्यैः परसम्बन्धिभिः। अस्वार्थैः । एवमनियोजने त्वस्वयोजनैः स्वज्ञातिविग्रहैः स्वज्ञातिभिःस्वजनैः स्वविग्रहैः स्वदेहैश्च यद्यो मर्त्यो नोपकुर्यात्तस्य दैन्यमहो कष्टं चाहो चित्रमित्यर्थः । यदि नोपकुर्यात्तर्ह्ययं मर्त्यो देहः । अस्वार्थैरेतत्कृतस्वप्रयोजनहीनैः स्वज्ञातिकलहै-र्निमित्तैः पारक्यै रिपुसम्बन्धिभिश्च क्षणभङ्गुरैः क्षणा उत्सवा भङ्गुरा यैस्तैर्नास्माकमुपकुर्यादिति यत्तस्मिन्दैन्यं तद्विषयो लोभः कष्टमहो इति वा । कालविशेषोत्सवयोः क्षणः । भञ्जभासमिदो धुरच् । चजोः कुघिण्यतोरिति कुत्वम् । भङ्गुरो हृदयार्तिकृदिति भागुरिः ॥ १० ॥

चट्टी – पारक्यैः सृगालादिभक्ष्यैः । अस्वार्थैरात्मोपयोगशून्यैः स्वज्ञातिविग्रहैः । ज्ञातयःपुत्रादयः । विग्रहो देहस्तेनोपकुर्यादिति यत् तत्कष्टम् ॥ १० ॥

श्रीशुक उवाच
एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं संनयन् जहौ ॥ ११ ॥

सत्यधर्मा – कृतव्यवसितः कृतनिश्चयो दध्यङ् दधीचिस्तस्यैवैतानि नामानि । परे भगवति ब्रह्मणि आत्मानं मनो नयंस्तत्रैव योजयंस्तनुं जहौ । पूर्वं गात्रमङ्गानीत्येव प्रस्तुतत्वेऽपि तनुमिति स्त्रीलिङ्गनिर्देशेन स्त्रीपरित्यागस्तु कियानित्यलक्षतां ध्वनयामास व्यासः ॥ ११ ॥

चट्टी – कृतं व्यवसितं निश्चयो येन स तथा । आत्मानं मनो ब्रह्मणि संनयन्सम्यक् स्थापयन् । यद्वा आत्मानं स्वान्तर्यामिणं ब्रह्मणि व्याप्तरूपे संनयन् एकीकुर्वन् । हरौ हरेर्भवेन्नीतिस्तदेकत्वस्य चिन्तनादिति वचनात् । तनुं जहौ ॥ ११ ॥

यत्ता(ता)क्षासुमनोबुद्धिस्तत्वदृग् ध्वस्तबन्धनः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥

सत्यधर्मा – यत्ताऽक्षासुमनोबुद्धिर्नियमिता इन्द्रियाणि मनो बुद्धयो येन सः । तत्त्वं भगवन्तम् । तथा ध्वस्तबन्धो नष्टसंसारः परमो योगो यत्र यत्र यस्य यस्य लयचिन्तनं प्राणादीनां सङ्ग्रहोपायस्तमास्थितो गतं देहं न बुबुधे न व्यज्ञासीत् । गतं स्वान्तःप्रतिबिम्बितं नदेहं नदे क्षीरनीरदावीहा चेष्टा यस्य तम् । क्षीरशरधिविहारश्रीहारतन्मात्रं बुबुध इति चार्थः ॥ १२ ॥

चट्टी – यता नियता इन्द्रियमनोप्राणबुद्धयो येन स तथा । तत्त्वं शश्वदेकप्रकारं भगवन्तं पश्यतीति तथा । अतीतानागते काले यत्तादृशमुदीर्यते । कुतश्चिदन्यथा नेयात्तत्तत्त्वं न त्वनो विदुरिति वचनात् । ध्वस्तानि गतानि बन्धनानि पुत्रादिस्नेहलक्षणानि यस्य स तथा ॥ १२ ॥

अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ।
मुनेस्त्वस्थिभिरुत्सिक्तो भगवत्तेजसाऽन्वितः ॥ १३ ॥

सत्यधर्मा – मुनेरस्थिभिर्विश्वकर्मणा उत्सिक्त उत्सुकं प्राप्तोऽशोभतेत्यन्वयः ॥ १३ ॥

चट्टी – अथेन्द्रोऽशोभतेत्युत्तरेणान्वयः । अस्थिभिर्निर्मितम् । उत्सिक्त ऊर्जितः ॥ १३,१४ ॥

युतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥

सत्यधर्मा – गजेन्द्रोपरि ऐरावतस्योपरि । पूरणगुणसुहितार्थसदव्ययतव्येत्यत्र पूर्वोत्तरसाहचर्यात्कृदव्ययस्यैव समासनिषेधाद्गजेन्द्रोपरीति सम्भवति । तेन तदुपरीत्यादि सिद्धमिति रक्षित इत्युक्तेः । त्रैलोक्यं त्रिलोकीभवं जनम् ॥ १४ ॥

वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः ।
परीतं तेजसा राजन् क्रुद्धो रुद्र इवान्तकम् ॥ १५ ॥

सत्यधर्मा – परीतं पर्यस्तं तेजसा भागवतेन तेजसा निरस्तप्रायमिति वा । असुरानीकयूथपैः सहेति वा । रुद्रोऽन्तकं मृत्युम् । अत एव मृत्युञ्जय इति नाम । उक्तं च स्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे । अपश्यमन्तिके काले...... । स पाशपरशुव्यग्रं खण्डशूलधनुर्धरम् । मदाज्ञोल्लङ्घनं पुत्र दृष्ट्वा क्रोधमुपेयिवान् । मम क्रोधाग्निना कालो भस्म रोषाद्बभूवेति ॥ १५ ॥

चट्टी – असुरानीकानां यूथपैः पर्यस्तं परिवृतम् ॥ १५ ॥

ततः सुराणामसुरै रणः परमदारुणः ।
त्रेतामुखे नर्मदायामासीद् वै प्रथमेऽन्तरे ॥ १६ ॥

सत्यधर्मा – कालादिकमालपति ॥ त्रेतामुख इति । अन्तरे वैवस्वतमन्वन्तरे तत्रापि प्रथमे प्रथमचतुर्थयुगे तत्रापि त्रेतामुखे त्रेतायुगारम्भे नर्मदायां तत्तीरे । रणस्त्वत्र मरणं समुद्रतीर इति विशेषः । अथोक्तेर्ज्ञेयः ॥ १६ ॥

चट्टी – अन्तरे वर्तमाने वैवस्वतमन्वन्तरे प्रथमे चतुर्युगे । त्रेतायुगस्य मुखे आरंभे । नर्मदायां नर्मदातीरे । रण आसीदिति शेषः ॥ १६ ॥

रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ।
मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥

सत्यधर्मा – रुद्रादयो गणाः ॥ १७ ॥

चट्टी – मरुत्पतिं मरुतां देवानां पतिं नामृष्यन्नासहंत ॥ १७-२१ ॥

दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया ।
नामृष्यन्नसुरा राजन् मृधे वृत्रपुरःसराः ॥ १८ ॥

सत्यधर्मा – स्वया प्राक्तन्याश्रिया ततोऽधिकया भगवत्या चेत्यर्थः ॥ १८ ॥

नमुचिः शम्बरोऽनर्वा द्विमूर्धा वृषभोऽम्बरः ।
हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥ १९ ॥

पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कचः ।
व्योमकेशो विरूपाक्षः कपिलोऽथ विभावसुः ॥ २० ॥

इल्वलो बल्वलश्चैव दन्दशूको वृषध्वजः ।
कालनाभो महानाभो भूतसन्तापनो वरः ॥ २१ ॥

सत्यधर्मा – वरस्तन्नामा ॥ २१ ॥

दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ।
सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥ २२ ॥

प्रतिषिध्येन्द्रसेनाग्र्यं मृत्योरपि दुरासदम् ।
अभ्यद्रवन्नसम्भीताः सिंहनादेन दुर्मदाः ॥ २३ ॥

सत्यधर्मा – कार्तस्वरपरिच्छदा हेममयरथादिमन्तः । कार्तस्वरादिकं सुवर्णसामान्यं विशेषस्य विशेषणीयत्वात् । यथोक्तं बृहदारण्यकभाष्ये । मयं तु मानुषं स्वर्णं पीतं गान्धर्वमेव च । इन्द्रगोपनिभं नाम्ना जाम्बूनद इति स्मृतम् । दैवं चामीकरं नाम प्रोद्यदादित्यसन्निभम् । तेजोविशेषः स्वर्णानामेतेषां सर्वदैव च । नाग्न्यादिनाऽपि साम्यतां यान्ति तानि कथञ्चनेति ॥ २२,२३,२४ ॥

चट्टी – कार्तस्वरपरिच्छदाः सुवर्णालङ्काराः ॥ २२,२३ ॥

गदासिपरिघैर्बाणैः पाशमुद्गरतोमरैः ।
शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुण्डिभिः ।
सर्वतोऽवाकिरन्नस्त्रैः शस्त्रैश्च विबुधर्षभान् ॥ २४ ॥

चट्टी – शतघ्नी तु चतुर्हस्ताल्लोहकण्टकसञ्चिका । भुशुंडी सर्वतो लोहकण्टकानुक्रमात्रतेत्य-भिधानात् ॥ २४ ॥

न तेऽदृश्यन्त सञ्छन्नाः शरजालैः समन्ततः ।
पुङ्खानुपुङ्खैः पतितैः प्रावृषीव नभो घनैः ॥ २५ ॥

सत्यधर्मा – पुङ्खानुपुङ्खैः पुङ्खान् पूर्वमुक्तबाणपुच्छभागाननुसृत्य स्वपुङ्खाग्रभागा येषां ते तथा तैः । पुङ्खः स्यान्मङ्गलाचारे शराग्राननयोरिति विश्वः । त्वरया पश्चान्मुक्तानामपि तत्समगमनमिति ज्ञेयम् । प्रावृषि वर्षाकाले ॥ २५ ॥

चट्टी – पुंखो मूलदेशस्तस्य पुंखमनु तत्सल्लग्नोपरस्य पुंखा यथा भवति तथा । आसमन्तात्पतितैरित्यर्थः । प्रावृषि वर्षाकाले ॥ २५ ॥

न ते शस्त्रास्त्रवर्षौघा व्या(ना)सेदुः सुरसैनिकान् ।
छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २६ ॥

सत्यधर्मा – व्यासेदुरासादितवन्तः । लघुहस्तः क्षिप्रहस्तः ॥ २६,२७ ॥

चट्टी – शस्त्राणामस्त्राणां च यानि वर्षाणि तेषामोघा लघुहस्तैः शीघ्रवेधिभिः सिद्धपथे आकाशे । स्वप्राप्तेः पूर्वं मध्यमार्ग एवच्छिन्नाः सन्तो नासेदुर्न प्रापुः ॥ २६ ॥

अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः ।
अभ्यवर्षन् सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २७ ॥

चट्टी – क्षीण अस्त्राणां शस्त्राणां चोघो येषां ते । गिरिशृङ्गैर्द्रुमैरुपलैश्च ॥ २७ ॥

तानक्षतान् स्वस्तिमतो निशम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ।
द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरथाक्षिपंस्तत्र सुरेन्द्रसैनिकान् ॥ २८ ॥

सत्यधर्मा – स्वस्तिमतः सुखिनोऽक्षतानायुधछेदात् । वृत्रो नाथो येषां ते तथा तान् ॥ २८ ॥

चट्टी – वृत्रो नाथो येषां ते दैत्यास्तान्सुरेन्द्रस्य सैनिकान् । शस्त्राणां पूगैः समूहैः । द्रुमैर्दृषद्भिः पाषाणैः । विविधाद्रिशृङ्गैश्चाक्षतान्क्षतशून्यान् । स्वस्तिमतः सुखिनश्च निशम्य निरीक्ष्य । अथानन्तरमपि तत्सुरेन्द्रसैनिकेष्वस्त्रशस्त्रादीनक्षिपन्नित्यन्वयः ॥ २८ ॥

सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः ।
कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥ २९ ॥

सत्यधर्मा – विमोघाः व्यर्थाः । कृष्णानुकूलेषु कृष्णोऽनुकूलः सहायो येषां ते तथा तेषु । रुशत्यः हिंस्राः । रिषरुष हिंसायामिति स्मरणात् । रूक्षा उल्बणास्त्वङ्कारपूर्विकाः । महत्सु गुरुषु निस्पृहेष्विति वा ॥ २९ ॥

चट्टी – कृताः कृताः पुनः पुनः कृताः । कृष्णोऽनुकूलो येषां तेषु देवगणेषु । रुशती रुशत्यो हिंसत्यः । रु हिंसायामिति धातोः । रूक्षाः परुषा वाचो यथा महत्सु क्षोभकार्यो न भवति ॥ २९ ॥

ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ।
पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरस्तसाराः ॥ ३० ॥

सत्यधर्मा – पतिं सेनानाथं वृत्रं अस्तसारा निर्बला विसृज्य पलायनाय मतिं दधुः ॥ ३०,३१ ॥

चट्टी – हतो युद्धदर्पो येषाम् । अस्तसारा निर्धैर्यास्तेऽतिप्रसिद्धा अपि दैत्या आजिमुखे युद्धारंभे पतिं विसृज्य पलायनाय मनो दधुर्यतो हरावभक्ता इत्यन्वयः ॥ ३० ॥

वृत्रोऽसुरांस्ताननुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ।
पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥ ३१ ॥

चट्टी – प्रधावतः पलायमानान्प्रेक्ष्यादावेव तीव्रेण भयेन पलायितं भग्नं च यद्बलं सैन्यं च प्रेक्ष्यैतद्वक्ष्यमाणं बभाषे ॥ ३१ ॥

कालोपपन्नां रुचिरां मनस्विनीमुवाच वाचं पुरुषप्रवीरः ।
हे विप्रचित्ते नमुचे पुलोमन् मयानर्वन् शम्बर मे शृणुध्वम् ॥ ३२ ॥

सत्यधर्मा – मनस्विनामिति पाठः सरलः । तेषां रुचिरां मनोहराम् । मय तक्षन् शृणुध्वम् । वच इति शेषः ॥ ३२ ॥

चट्टी – तदेव विशिनष्टि ॥ कालेति । कालोपपन्नामवसरोचितां मनस्विनां रुचिराम् । हे मय । हे अनर्वन् मे वाचं शृणुध्वम् ॥ ३२ ॥

जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ।
लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम् ॥ ३३ ॥

सत्यधर्मा – अन्यत्र पलायनेन निलीनानां किं कालमृत्यूत्थापनं घटेत नानेन कृत्यं प्रत्युत प्राप्यफललय एवातो न कुरुतैवमित्याह ॥ जातस्येति । सर्वतः प्रतिक्रिया परिहारो यस्य मृत्योर्न क्लृप्ता ।

यतो मृत्योः सकाशाल्लोको हतो वा प्राप्स्यसि स्वर्गमित्यादेः परत्र स्वर्गोऽत्र यशश्च ततो हेतोरमुं तं युक्तं शास्त्रशंसितं को नाम न वृणीत न वरयेत् ।। ३३ ।।

चट्टी – ततो मृत्योरिह यशो लोकः स्वर्गश्च यदि स्यादथ तर्ह्यमुं मृत्युं युक्तम् समीचीनं वा प्राप्तं वा को नाम न वृणीत ।। ३३ ।।

द्वौ सम्मताविह मृत्यू दुरापौ यद् ब्रह्मसंधारणया जितासुः ।
कलेवरं योगरतो विजह्याद् यदग्रणीर्वीरशयेऽनिवृत्तः ।। ३४ ।।

इति श्रीमद्भागवते षष्ठस्कन्धे दशमोऽध्यायः ।। १० ।।

सत्यधर्मा – द्वौ मृत्यू इह लोके दुरापौ असुलभलाभौ सम्मतौ प्रार्थनीयतयाऽनुमतौ । तौ कावित्यतो विविच्योचे । यद्ब्रह्म संधारणया खण्डखण्डनाय संपदम् । अखण्डध्यानेन जितासुर्निगृहीतप्राणो योगरतस्तदुपायचिन्तकः कलेवरं जह्यादिति । वीरशये रणाङ्गणेऽनिवृत्तोऽपराङ्मुखः कलेवरं जह्यात्तमिति द्वौ मृत्यू शास्त्रसम्मताविति वा ।। ३४ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे दशमोऽध्यायः ।। ६-१० ।।

चट्टी – ब्रह्मसन्धारणया परब्रह्मध्यानेन कलेवरं जह्यादिति यत्स एको मृत्युर्वीरशये रणभूमावनिवृत्तोऽपराङ्मुखो जह्यादिति यत्स चैकः । तौ द्वाविह शास्त्रसंमतौ । तथा च स्मृतिः । द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राज्यात्मयुक्तश्च रणे चाभिमुखे हत इति ।। ३४ ।।

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ।। ६-१० ।।

अथैकादशोऽध्यायः ।

श्रीशुक उवाच
त एवं शंसतो धर्मं(र्म्यं) वचः पत्युरचेतसः ।
नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ।। १ ।।

सत्यधर्मा – ।। हरिः ॐ ।। अचेतसोऽनवस्थितमनस एवं धर्मं शंसतः पत्युर्वृत्रस्य वचस्ते पलायनपरायणा नैवागृह्णन् । भयेभ्यो घोरेभ्यो त्रस्ता भीताः । भयं प्रतिभये घोरे प्रसून इति विश्वः।।१।।

चट्टी – ।। हरिः ॐ ।। शंसतः कथयतः पत्युर्वचः । धर्मादनपेतं धर्म्यम् । अचेतसोऽमनस्विनः ।। १ ।।

विशीर्यमाणां पृतनामासुरीमसुरर्षभः ।
कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥

सत्यधर्मा – कालानुकूलैः कालो हि भगवान्सोऽनुकूलो येषां ते । काल्यमानामनाथवदनाथमिव हिंस्यमानाम् ॥ २ ॥

चट्टी – कालो भगवान् । कालः कलितसंपूर्णसद्गुणत्वाज्जनार्दनः । संहारात्सर्ववित्वाद्वा सर्वविद्रावणेन चेति वचनात् । सोऽनुकूलो येषां तैः । काल्यमानां विद्राव्यमाणाम् । दृष्ट्वेति शेषः ॥२॥

दृष्ट्वाऽतप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः ।
तां(तान्) निवार्यौजसा राजन् निर्भर्त्स्येदमुवाच ह ॥ ३ ॥

सत्यधर्मा – अमर्षितोऽसहमानः सङ्क्रुद्धः स्वयमनव्यद्धः । अनन्तरमोजसा स्वावष्टम्भनशक्त्या तां पृतनां निवार्य नो द्रवति तथाऽपि गन्तुमुद्यतान्निर्भर्त्स्य तान्द्रावयतो देवान्निर्भर्त्स्येति वा । इदं वक्ष्यमाणमुवाच ॥ ३ ॥

चट्टी – अमर्षितोऽसहमानः । ओजसा राजन्दीप्यन् वृत्रस्तां काल्यमानां स्वसेनां निवार्य देवान्निर्भर्त्स्येदं वक्ष्यमाणमुवाच ॥ ३ ॥

वृत्र उवाच

किं व उच्चरिता मातुर्धावद्भिः पृष्ठतो हतैः ।
न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥

सत्यधर्मा – हे देवा यूयं मातुरदितेरुच्चरिताः पुरीषसदृशाः । तृतीयान्तपाठे दैत्यविशेषणम् । धावद्भिः पृष्ठतो हते । तैर्दैत्यैः किं न किञ्चित्प्रयोजनम् । नैतावदेव किन्तु प्रकृतव्यापारो न श्लाघ्यस्तेषामिति भाषते । शूरमानिनां तथाऽभिमानवतां भीतवधो न श्लाघ्यो न प्रशस्यत इति । भवत्वैहिकहिताभावः पारत्रिकं स्यादित्यतो न स्यादित्याह । न स्वर्ग्यः स्वर्गसाधनभूतोऽपि न चेत् न्याये च नीरेत्यमरविश्वौ ॥ ४ ॥

चट्टी – यदेवाह द्वाभ्याम् ॥ मातुरुच्चरिताः पुरीषप्राया इति देवानां संबोधनम् । पृष्ठतो हतैर्दैत्यैर्वः किं न किञ्चित् । न यशो नापि धर्मः । तदेवाह ॥ नहीति ॥ ४ ॥

यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ।
अग्रे तिष्ठत मात्रं मे न चेद् ग्राम्यसुखे स्पृहा ॥ ५ ॥

सत्यधर्मा – धने च सारमिति । प्रधने युद्धे । हे क्षुल्लकाः क्षुद्राः । यदि वः श्रद्धासारम् । स्वल्पमपि । अक्षरावयवे स्वल्पे क्लीबमित्यमरः । हृदि कृत्वा मे ममाग्रे तिष्ठत । तत्रापीतिकर्तव्यतामाह ॥ न चेदिति । ग्राम्यसुखे वैषयिकसुखे स्पृहा वाञ्छा न चेत् । अनेन पुनर्न जीवतां भवतां गमनमिति द्योतयति । स्त्रीस्पर्शः स्त्रियैव कार्यो न तु पुरुषेणेति धर्ममर्मविद्भन्नेमां धाटीमटीकत । भार्याभागो वाम इति प्रसिद्ध इत्यादेः ॥ ५ ॥

चट्टी – प्रधने संग्रामे । सारं धैर्यम् । हे क्षुल्लकाः क्षुद्रा मात्रं क्षणमात्रं मेऽग्रे तिष्ठत न चेदिह लोकभोगे स्पृहाऽस्ति ॥ ५ ॥

एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥

सत्यधर्मा – महाप्राणो महाबलो विचेतसः सहमोहाः ॥ ६ ॥

चट्टी – सुरगणान् रिपून् । महान्प्राणो बलं यस्य । येन नादेन विचेतसो बभूवुरिति शेषः ॥ ६ ॥

तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ।
निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥

सत्यधर्मा – विस्फोटनेन कण्ठमुद्धृत्य निःसृताह्वानेन । मूर्छिताः सञ्जातमूर्च्छाः । मूर्च्छिताः पथिकाङ्गना इत्यादेः ॥ ७ ॥

चट्टी – तदेव विवृणोति ॥ तेनेति । वृत्रस्य विस्फोटनेन नादेन ॥ ७ ॥

ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः ।
गां कम्पयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥

सत्यधर्मा – निमीलिताक्षं वृत्रारभटीनिरीक्षणसामर्थ्येन नालं नलानां कमलानामिदं नालं तत्सम्बन्धि वनम् । समूहार्थत्वेऽचित्तहस्तीति ठक् स्यात् । अनुदात्तादित्वप्रयुक्तघञन्तं वा । नलिनं तु नलं मतमिति विश्वः । यूथपतिर्गज उन्मद उत्कृष्टाहङ्कार उद्गतो मदो दानोदकं यस्य स वा । हर्षेभदानयोरिति विश्वः ॥ ८ ॥

चट्टी – उद्यतं शूलं येन स तथा। नलानां तृणविशेषाणाम्। पद्मानां वा संबन्धि वनम्। उद्गतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति तथेत्यर्थः ॥ ८ ॥

विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम्।
चिक्षेप तामापततीं सुदुस्सहां जग्राह वामेन करेण लीलया ॥ ९ ॥

सत्यधर्मा – अभिद्रवते स्वमवज्ञाय गच्छते। आपततीमापतन्तीं सुदुस्सहामितरैः। वामेन करेण। तत्रापि लीलयेति महानादरो द्योत्यते ॥ ९ ॥

चट्टी – अभिद्रवतेऽभ्यागच्छत इत्यर्थः ॥ ९ ॥

स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोरुविक्रमः।
जघान कुम्भस्थल उन्नदन् मृधे तत्कर्म सर्वे समपूजयन् नृप ॥ १० ॥

सत्यधर्मा – महेन्द्रवाहमैरावतं। सोऽन्यत्रावर्ततेन्द्रोऽन्यत्र नेति सूचयितुं महेन्द्रवाहमित्युक्तिः। अनेन चोपरि तस्येन्द्रे सत्यपि जघानेति तदलक्ष्यताऽपि ध्वन्यते। सर्वे सौवाः असौवाश्चेति सर्वे ॥१०॥

चट्टी – महेन्द्रवाहमैरावतम्। कुंभस्थले जघान ॥ १० ॥

ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा।
अपासरद् भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक् सप्तधनुर्भृशार्तः ॥ ११ ॥

सत्यधर्मा – वृत्रगदाऽपि वृत्रकरगृहीतत्वाद्वृत्रगदेति गदनमिति ज्ञेयम्। विघूर्णितो बलवत्कलेवरः। सप्तधनुस्तत्प्रमाणमपासरत्पृष्ठतोऽगच्छत् ॥ ११ ॥

चट्टी – अभिमृष्टोऽभिहतः सप्तधनुः प्रमाणं देशम्। अपासरदर्वाग्गतः ॥ ११ ॥

न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा।
इन्द्रोऽमृतस्यन्दिकराभिमर्षवीतव्यथः क्षतवाहोऽवतस्थे ॥ १२ ॥

सत्यधर्मा – स वृत्रो गदां गजकुम्भभेदनं कृत्वा पतिताम्। अमृतस्यन्दिनौ यौ करौ ताभ्यामभिस्पर्शस्तेन वीता गता व्यथा यस्य स चासौ। प्राक् क्षतो वाहो हस्ती यस्य स तथाऽभितस्थे। रणधुरीणेन रणे शोकादि न प्रदर्शनीयमिति हास इति भावः ॥ १२ ॥

चट्टी – स वृत्रः सन्नवाहाय सन्नोऽवसन्नो वाहो यस्य तस्मा इन्द्राय पुनः गदां न प्रायुंक्त। यतो महात्मा धर्मिष्ठः। अमृतस्यंद्यमृतस्रवीयः करस्तेनाभिमर्शः तेन वीतव्यथो गतदुःखः। क्षतः वाहो यस्येन्द्रस्य स तथाभूतोऽभितस्थेऽभिमुखेन स्थितवान् ॥ १२ ॥

स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ।
स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसञ्जगाद ॥ १३ ॥

सत्यधर्मा – आहवकाम्यया युयुत्सया भ्रातृहणं विश्वरूपहन्तारं नृशंसं तत्कर्म तत्प्राप्तमंहश्च स्मरन् शोकेन मोहेन वैचित्येन । हसन्बहिरुवाच ॥ १३-१८ ॥

चट्टी – स वृत्रः । हे नृपेन्द्र । आहवकाम्यया युद्धेच्छया । अवस्थितमिति शेषः । भ्रातृहणं भ्रातरं विश्वरूपं हतवन्तं नृशंसं क्रूरं तदेवांहः पापं तस्य कर्म स्मरन् ॥ १३ ॥

वृत्र उवाच
दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ।
दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ॥ १४ ॥

चट्टी – यो ब्रह्महा ब्राह्मणं हतवान् । विशेषतः स्वगुरुं मम च भ्रातरम् । भवान् अग्रतः समुपस्थितः । तद्दिष्ट्या भद्रं जातम् । दिष्ट्येत्यव्ययमानन्दार्थम् । दिष्ट्या समुपजोषन्तेत्यानन्देत्यमरः । हे असत्तम मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन त्वया निमित्तभूतेन । अद्याचिरादेव भ्रातुरनृणोऽहं स्याम् । एतच्च दिष्ट्या ॥ १४ ॥

यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ।
विस्रभ्य खड्गेन शिरांस्यवृश्चः पशोरिवाकरुणः स्वर्गकामः ॥ १५ ॥

चट्टी – विस्रभ्य पौरोहित्यवरणेन विश्वास्य स्वर्गकामो यो भवानवृश्चत । स्वर्गकामो याज्ञिकपशोरिव ॥ १५ ॥

ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम् ।
कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदन्तु गृध्राः ॥ १६ ॥

चट्टी – श्रीः त्रिवर्गसंपत्तिः । लक्ष्म्यां त्रिवर्गसंपत्तौ श्रीरिति विश्वः । न्हीरकार्यकरणे लज्जा । ह्रीरकार्यनिवर्तनमिति वचनात् । दया प्राणिनां सुखप्रार्थनम् । दया सर्वसुखैषित्वमिति वचनात् ॥ कीर्तिश्च ताभिरुज्झितम् । स्वकर्मणा गुरुवधलक्षणेन पुरुषादैरपि निन्द्यम् । त्वामस्पृष्टवन्हिं अदग्धदेहमित्यनेन वह्निप्रदाभावोक्त्या निःशेषसुरसंहारं करिष्यामीति सूचयति । समदन्तु भक्षयन्तु ॥ १६ ॥

अन्ये तु ये त्वाऽनु नृशंसमज्ञा यद्युद्यतास्त्राः प्रहरन्ति मह्यम् ।
तैर्भूतनाथं सगणं निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १७ ॥

चट्टी – अन्येऽप्यज्ञास्त्वा त्वां नृशंसं घातकमनु अनुसृत्य मह्यमुद्यतास्त्राः सन्तो यदि प्रहरन्ति तैर्भूतनाथान् भैरवादीन् वक्ष्यामि । कथंभूतैः । निशातं तीक्ष्णीकृतं यन्मम त्रिशूलं तेन निर्भिन्नो गलो येषां तैः ॥ १७ ॥

अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्येह शिरो यदीह ।
तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥

चट्टी – अथोऽथवा । हे हरे इन्द्र । यदि भवानेव । इह युद्धे प्रमथ्य मां निष्पीड्य मम शिरो हर्ता हरिष्यति । तत्र तथाऽपि । अनृणो विमुक्तकर्मबन्धः सन् । बलिं विधाय मनस्विनां पादरजः प्रपत्से । धीराणां पदं प्राप्स्यामि ॥ १८ ॥

सुरेश कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघम् ।
मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याञ्चा ॥ १९ ॥

सत्यधर्मा – जीवितादपि ममानुमता मृतिरिति स्वाशयं शंसति ॥ सुरेशेति । न हिनोषि न मुञ्चसि । स्यादिदमपि गदेवेति न गदेति गदति ॥ अमोघमिति । मा त्वं संशयिष्ठाः संशयं मा च कार्षीः । गदेवेति पाङ्क्तः पाठः । गदपक्षे व्यतिरेकश्च गुणातिरेक इति तोष्टव्यम् । गदेव प्राक् यथा गदाऽकार्यकरी तथैवेदं स्यादिति न गदेत्यावर्त्यान्वयो वा । निष्फलम् । कृपणार्था दीनविषयिणी याञ्चाऽन्वयाचनं यथा निष्फलेति । निष्फलमिति विपरिणतं सदन्वेति ॥ १९ ॥

चट्टी – जीवितादपि मृत्युरेव ममाभिमत इत्याशयवानाह ॥ सुरेन्द्र इति । भगदेव कीर्त्यादिगुणशालिन् । भग ऐश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु । वीर्यप्रयत्नेषु श्रीधर्मरविमुक्तिष्वित्यभिधानात् । न हिनोषि न निक्षिपसि । कृपणादर्थः प्रयोजनं यस्याः सा याञ्चा यथा निष्फला तथा वज्रं निष्फलं स्यात् तदिति मा संशयिष्ठाः संशयं मा कार्षीरित्यर्थः ॥ १९ ॥

नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः ।
तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥

सत्यधर्मा – तदमोघताहेतूक्तिपूर्वकं मघवन्तं प्रोत्साहयति ॥ नन्विति । हे शक्र तवैष वज्रो हरेस्तेजसा दधीचेस्तपसा तेजसा चोत्तेजितो निशातः । हे वज्रस्तव वज्रेणायुधेन स्तवो यस्येति वज्रस्य स्तवो येनेति तत्सम्बुद्धिरिति वा । ते तवाजितोऽपारभूत इति वा । तेनैव शत्रुं मां जहि । सामान्यव्याप्तिं

चाह ।। यतो विष्णुयन्त्रित इति । विष्णुवशो यत्र ततस्तत्र हरिः स्वयमेव वर्तते । ततः किमित्यतो वक्ति । विजयः परपराकृतिः, श्रीः सम्पत् ,गुणाः एतदितरे स्युरिति शेषः । यत्र योगीश्वरः कृष्णस्तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्ममेति गीताप्रगीतेः ।। २० ।।

चट्टी – अमोघत्वे हेतुं वदन्प्रोत्साहयति ।। नन्विति । हे शक्र । एषः, तव वज्रो हरेस्तेजसा दधीचेस्तपसा च तेजितस्तीक्ष्णीकृतो ननु । शत्रुं मां जहि । हनने शक्तिर्न शङ्कनीयेत्याह ।। विष्णुना यन्त्रितः प्रेरित इति । यतो यत्र ततस्तत्र ।। २० ।।

अहं समाधाय मनो यथाऽऽह संकर्षणस्तच्चरणारविन्दे ।
त्वद्वज्ररंहोतु(लु)लितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ।।२१।।

सत्यधर्मा – आजौ सज्जीभूतः सज्जीव एवमिति ग्रन्थकृतः स्वभावमाविष्कर्तुं भाषते ।। अहमिति । सङ्कर्षणः श्रीहरिर्यथाऽऽह जहि वज्रेणेति तच्चरणारविन्दे मनः समाधाय त्वद्वज्रस्य रंहो वेगस्तेन तुलितो ग्राम्यपाशो वैषयिको बन्धो यस्य स सन् । अपविद्धलोकस्त्यक्तो तद्भूलोको वैतच्छरीरो वा । अस्माल्लोकात्प्रेत्येति श्रुतेः । मुनेर्गतिं ज्ञानप्राप्यां वैकुण्ठादिस्थलीं यामि । मुनेर्विश्वरूपस्येति वा ।।२१।।

चट्टी – हननेन मम पीडा स्यादित्यपि मा संशयिष्ठा इत्याह ।। अहमिति । संकर्षणो मत्पतिर्यथाऽऽहोपदिदेश तथा तस्य चरणारविन्दे मनः समाधाय तव वज्रस्य रंहसा वेगेन लुलितश्छिन्नो ग्राम्यपाशो विषयभोगलक्षणो यस्य । अपविद्धलोकस्त्यक्तदेहः तिरस्कृतस्वर्गादिलोको वा मुनेर्योगिनो गतिमहं यास्यामि ।। २१ ।।

पुंसां किलैकान्तधियां स्वकानां याः संपदो दिवि भूमौ रसायाम् ।
न राति यस्माद् भयमुद्वेग आधिर्मदः कलिर्व्यसनं सम्प्रयासः ।। २२ ।।

सत्यधर्मा – भगवद्भागवतक्रियामवगमयति ।। पुंसामिति । एकान्तधियामेकान्तमतीनामेकान्तिनां स्वकानां स्वकीयत्वेन वृत्तानामस्मत्पतिर्हरिरस्मत्स्वामी दिवि स्वर्गे भूमौ रसायां रसातले याः सम्पदः सन्ति ता न राति न वितरति किल सत्यम् । यस्मात्कारणाद्भयं परकृतं, उद्वेगः कृतभयप्रति-भयमाधिर्मनोव्यथा मदोऽहङ्कारः कलिः कलियुगं व्यसनं तिरस्क्रिया सम्प्रयासो व्यथायास इत्येते स्युरिति हेतोः ।। २२ ।।

चट्टी – ननु भगवता दीयमानस्वर्गादिसंपदोऽपरिहार्यत्वात्कथमपविद्धस्वर्गादिलोकत्वमित्यत आह ।। पुंसामिति । स्वर्गे भूमौ च याः संपदस्ताः किल निश्चितम् । न राति न ददाति । तत्र हेतुः । यस्मात्संप्रदानाद्भयादयो भवन्ति ।। २२ ।।

त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ।
तेनानुमेयो भगवत्प्रसादो यो दुर्लभोऽकिञ्चनगोचरोऽन्यैः ॥ २३ ॥

सत्यधर्मा – अस्मत्पतिः पुरुषस्य स्वभक्तजनस्य त्रैवर्गिको धर्मार्थकामरूपविषयसम्बन्धी य आयासस्तत्सम्पादनश्रमस्तस्य घातं विनाशं विधत्ते करोति । *तेनैतद्धा तेजसा तेन (*अत्र एतद्धातेन वा एतद्धाततेजसा वा इति भाव्यमिति भाति) भगवत्प्रसादोऽनुमेयः । घातस्य तत्कार्यसुलभ एवेत्यत आह ॥ य इति । अकिञ्चनगोचरो भगवत्प्रसादोऽन्यैस्तदितरैर्दुर्लभः । तद्व्यतिरेकेण न किञ्चनास्ति येषां तेषामेव गोचरो विषयः ॥ २३ ॥

चट्टी – ताःस्वभक्तस्य किं विधत्त इत्यतस्तदाह ॥ त्रैवर्गिकेति । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते । तेनायासोपरमेणैव भगवत्प्रसादोऽनुमेयः । न त्वैश्वर्यादिना । यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहमित्यादेरित्यर्थः ॥ २३ ॥

अहं हरे तव पादैकमूलदासानुदासो भविताऽस्मि भूयः ।
मनः स्मरेता(सु)त्मपतेर्गुणान् नो गृणीत वाक् कर्म करोतु कायः ॥ २४ ॥

सत्यधर्मा – हरे । हर इत्यरिं सम्बोधयतो यतोऽयं स्वभावस्तद्भगवद्भक्तिसिन्धुस्तमःपारवश्येनास्य हरिस्मरणलहरीपरिवाहेनेत्थं मतिरतितरामाविरभूदित्याह ॥ अहमिति । तव पादावेवैकं मुख्यं केवलं वा मूलं येषां ते च ते दासाश्चताननु अनुसृत्य दासः । असङ्ख्यार्थत्वात्पूर्वकालैकेत्यस्यावकाशः । एकं मूलमिति मूलपदान्वये सङ्ख्यार्थकत्वेन पूर्वनिपातो ज्ञेय इति वा । मन आत्मपते-र्निजराजस्य स्मरेत स्मरेत् । अधीगर्थदयेशां कर्मणीति षष्ठी । वाग्वाणी गुणान्गृणीत नः कायः कर्म तन्नामादिकं करोतु ॥ २४ ॥

चट्टी – एवमिन्द्राय स्वाभिप्रायं निवेद्य भगवन्तं प्रार्थयते ॥ अहमिति । तव पादावेवैकं मूलं मुख्याश्रयो येषां तेषां दासानामनुदासो भूयो भविताऽस्मि भविष्यामि । भवेयम् । असुपतेः प्राणनाथस्य ते तव गुणान् मम मनः स्मरेत स्मरतु । वागपि तानेव गृणीत कीर्तयतु । कायस्तवैव कर्म करोतु ॥२४॥

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा समञ्जसं त्वां विरहय्य कांक्षे ॥ २५ ॥

सत्यधर्मा – अहं रसाधिपत्यं रसातलस्वाम्यं न काङ्क्षे न काङ्क्षामि । सार्वभौमं सर्वभूमिपृथिवीभ्यामणञावित्यणि तस्या ईश्वरः सार्वभौमः । अनुशतिकादित्वादुभयपदवृद्धिश्च-क्रवर्तित्वम् । योगसिद्धीरणिमादिका नाकपृष्ठं स्वर्गतलं पारमेष्ठ्यं सत्यलोकाधिपत्यमपुनर्भवं

पुनरुत्पत्तिरहितं मोक्षमपि । यथायोग्यं तरतमभावो बोध्यः । समञ्जसं सर्वापेक्षया समीचीनं त्वां विहाय त्यक्त्वा । एकान्तानां न कस्यचिदर्थे नारायणो देवः सर्वमन्यत्तदर्थकमित्यादेः ॥ २५ ॥

चट्टी – ननु किं दास्येन किन्तु तुभ्यं महाफलानि दास्यामीति चेत्तत्राह ॥ नेति । नाकपृष्ठं स्वर्गं तदुपरितनमहरादिलोकं च पारमेष्ठ्यं च सत्यलोकं, सार्वभौमं भूमण्डलाधिपत्यं रसातलस्वामित्वम् । योगसिद्धीर्योगलभ्या अणिमादिसिद्धीः । अपुनर्भवं मोक्षं वा । हे हरे समंजसं निखिलसौभाग्यनिधिं त्वां विहरय्य विहाय न कांक्षे नेच्छामीति । नञः प्रत्येकं क्रिययाऽन्वयः । ननु मोक्षस्य प्रधानफलत्वात् सर्वसाधनं च तदर्थत्वात् तदनाकांक्षणं कथमिति चेत् । इत्थम् । मोक्षो हि द्विविधः सम्यक् स्वरूपाभिव्यक्तिरभावो जननस्य चेति वचनात् । तत्र सम्यगानन्दाभिव्यक्तिलक्षणमोक्षापेक्षया पुनरुत्पत्तिराहित्यमात्रलक्षणस्य नीचत्वात्तथोक्तिर्युज्यत इति ॥ २५ ॥

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेवाध्युषितं विषण्णा(ण्णं) मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥ २६ ॥

सत्यधर्मा – वत्सतराः केवलतर्णकाः । वत्सस्तर्णकपत्रादिवर्षे इति विश्वः । स्तन्यं स्तनभवं क्षीरम् । प्रिया नवोढा भार्या । अध्युषितं प्रवासितम् । प्रियं स्वभर्तारं विषण्णा विषादयुता । इव तथा । हे अरविन्दाक्ष कमललोचन । नो मनस्त्वां दिदृक्षते विषयीकर्तुमुत्सुकं भवति ॥ २६ ॥

चट्टी – ननु पारमेष्ठ्यादिकं नेच्छसि चेत्तर्हि किमिच्छसीत्यत आह ॥ अजातपक्षा इति । अजातपक्षाः खगा यूकादिभिः पीडिता यथा मातरम् । यथा च दाम्ना बद्धा वत्साः स्तन्यम् । यथा चाध्युषितं दूरदेशं गतं प्रियं कामेन विषण्णाः प्रियास्तथा मे मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च प्रियं परमप्रेमास्पदं त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः ॥ २६ ॥

ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्माययाऽऽत्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥ २७ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे एकादशोऽध्यायः ॥

सत्यधर्मा – कर्म संसारचक्रे स्वकर्मभिर्भ्रमतो निमित्तमात्रम् । वस्तुतस्तु स्वकर्मभिस्तव रूपविशेषैर्भ्रमतः । कर्मनामा तु भगवान्फलकर्तृत्वतो हरिरिति बृहद्भाष्योक्तेः । त्वन्मायया बन्धकशक्त्या । आत्मा देहश्चात्मजाः पुत्राश्च दारा भार्या च गृहं च तेष्वासक्तं तद्ध्यानपरं चित्तमन्तःकरणं यस्य तस्य मम । हे नाथ सख्यं पुनर्नभूयात् । तर्हि क्व तत्स्यादित्यत आह । उत्तमश्लोकजनेषु । निरुपपदादपि जनेर्डः । जो जेतरि समाख्यातः कलत्रे जननेऽपि जमिति विश्वः ।

यद्वा श्लोके कीर्त्यर्थं जायत इति सप्तम्यां जनेर्डः तत्सम्बुद्धिः उत्तमश्लोकज । त्वत्सेवकलोकेषु सख्यं भूयादिति । न इषुसख्यमिति वा छेदः । उत्तमोजनो यं ननाथायाचत । अनाशीरर्थत्वात्परस्मैपदम् । श्लोकज भो । पद्ये यशसि च श्लोकश्चेत्यमरः । तत इषुसख्यं शरवत्सख्यम् । शरवत्तन्मयो भवेदित्याद्युक्तं केवलं लग्नं भूयात् । आत्मादिषु च न भूयादिति ॥ २७ ॥

इति सत्यधर्मकृतायां श्रीभागवतटिप्पण्यां षष्ठे एकादशोऽध्यायः ॥ ६-११ ॥

चट्टी – हे नाथ । उत्तमश्लोकस्य तव जनेषु भक्तेष्वेव सख्यं मम भूयात् । त्वन्मायया त्वच्छक्त्या देहादिष्वासक्तं चित्तं येषां तेषु भगवद्विमुखेषु न भूयात् ॥ २७ ॥

इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ ६-११ ॥

अथ द्वादशोऽध्यायः ।

ऋषिरुवाच

एवं जिहासुर्नृप देहमाजौ मृत्युं परं विजयं मन्यमानः ।
शूलं प्रगृह्याऽभ्यपतत् सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥

सत्यधर्मा – ॥ हरिः ॐ ॥ वृत्रहावृत्रसंवादव्यपदेशेनेशस्य वासुदेवस्यानीशजीवाभेदबोधोऽन्धन्तमःसाधनमित्येतद्बोध्यतेऽस्मिन्नध्याये । तत्रादौ युद्धे सन्नद्धयोः किं सन्धिः किं वैकविजयः किं वोपरमः श्रमेणेत्यतस्तच्छेषं भाषते ॥ ऋषिरिति । परं विजयं मन्यमानः पराभाव्यव्यवस्थित्यपेक्षया मृत्युमेवात्युत्तमं विजयं जानन्परमरिं विजयं विशिष्टजयं बलं वा । विना श्रीहरिणैव जयो यस्य स तं वा मन्यमान इति । भाविज्ञत्वान्निश्चयोक्तिः । अत एव महापुरुषं हरिमप्सु जले मरणकारणकर्मसु सत्स्विति कैटभोऽभ्यपतत्तथेति गन्थकृन्निदर्शनमनुरूपं निरूपितवानिति ज्ञेयम् ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ श्रीविजयादिकं मृत्युम् । वरं श्रेष्ठं महापुरुषं श्रीविष्णुम् । अप्सु प्रलयोदकेषु ॥ १ ॥

ततो युगान्ताग्निकठोरजिह्वमाविद्ध्य शूलं तरसाऽसुरेन्द्रः ।
क्षिप्त्वा महेन्द्राय विनद्य धीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥

सत्यधर्मा – आविद्ध्य भ्रामयित्वा ॥ २ ॥

चट्टी – युगान्ताग्निवत्कठोरा जिव्हाः शिखा यस्य तत् । आविद्ध्य भ्रामयित्वा । विनद्य सिंहनादं कृत्वा ॥ २ ॥

ख आपतन्तं ज्वलितं महोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः ।
वज्रेण वज्री शतपर्वणाऽच्छिनद् भुजं च तस्योरगराजभोगम् ॥ ३ ॥

सत्यधर्मा – खे आकाशे आपतन्तं शूलम् । शीलमूलेत्यारभ्य खलशूलाः पुंसि चेति लिङ्गानुशासनोक्तेरापतन्तमित्युपपन्नम् । महोल्कवत् महत्य उल्का यस्य तत्तद्वह्निमिव । अतो न उल्का स्यान्निर्गतज्वालेत्यमरे स्त्रीलिङ्गनिर्देशात्कथं महोल्कवदिति ज्ञेयम् । भुजं चाच्छिनत् । उरगराजस्य सरीसृपोत्तंसस्य भोगः शरीरं तद्वद्विद्यमानम् । यद्यपि भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययो- रित्यभिधानात्केवलं भोगपदमेव तदवगमकम् । तथाऽप्यत्र विशिष्टवाचकनयेन स कीचकैर्मारुत- पूर्णरन्ध्रैरित्यादिवच्छरीरमात्रपरो ज्ञेयः । उरगराजस्य भोगः पीनतेव पीनता यस्य स तमिति वा । भोगः पीनसर्पशरीरयोः । वर्तुलः स्थूलतायां चेत्यादेः । उरगराजस्य शेषस्य भेव भा शुभ्रकान्तिर्यस्य सः । यस्तेन वज्रेण । अगं, शैलवृक्षौ नगावगावित्यमरात्पर्वतमिवाच्छिनदिति वा । उरगराजवद्भोगः पीन इति वा ॥ ३ ॥

चट्टी – वज्रीन्द्रः । खे आकाशे । आपंतन्तमागच्छन्तम् । ज्वलितमत एव महोल्कवद्दुष्प्रेक्ष्यम् । तच्छूलं निरीक्ष्य । अजातविप्लवोऽभ्रान्तः सन् । शतं पर्वाणि यस्य तेन । उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारम् ॥ ३ ॥

छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम् ।
हनौ तताडेन्द्रमथाऽमरेशं वज्रश्च हस्तान्न्यपतन्मघोनः ॥ ४ ॥

सत्यधर्मा – हनौ चुबुके । हनुः प्रहरणे मृत्यौ कपोलावयव इति विश्वः । मरणार्थमिति वा । परिघेण । इन्द्रं मथ्नातीतीन्द्रमत् तेनेन्द्रमथा तत्वेन मतेन परिघेण । परिघो योगभेदे मुद्गर इति विश्वान्मुद्गरेणामरेशमिन्द्रम् । आसाद्येत्यनेनैव भावित्वस्योत्सर्गतो विनाऽथेत्यनेन स्फोरणात् अथेत्यस्यात्यनवश्यकत्वशङ्काशूकपरासोऽप्येवमर्थापने भवतीति मन्तव्यम् । तथैवेन्द्र इति वाऽमरेश इति वाऽतिरिच्यत इत्यपि शङ्कनस्यापि प्रकारान्तरेणातङ्कनं कृतं चेति । यद्यप्यथ वज्रः हस्तान्न्यपतदित्यन्वयः सम्भवति तथाप्यतिरेकदृष्टचैवं व्याहृतमिति मन्तव्यम् । मघोन इन्द्रस्य ॥ ४ ॥

चट्टी – संरब्धःकुपितः हनौ कपोलप्रान्ते ॥ ४ ॥

वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसंघाः ।
अपूजयंस्तत् पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥

सत्यधर्मा – सुरासुराः सुरैः सहिताश्च तेऽसुराश्च । कदाचित्स्नेहस्यापि देवदानवेषु दर्शनात् येषां शाश्वतिको विरोधः शश्वद्विष्टताभावाद्वाऽसुरमध्ये प्रल्हादादिसदसुराणां भावात्तेषामेषामित्यनेन ग्रहणासम्भवाद्वैकवद्भावाभाव इति ज्ञेयम् । हाहेति सुरपक्षे शोकसूचकमसुरपक्षेऽपहाससूचकमिति विवेकः ॥ ५ ॥

इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ।
तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥

सत्यधर्मा – पुनररिसन्निधावित्यतिलज्जोज्जृम्भकमिति मन्तव्यम् । विषादकालो न समरे विषादो नोचित इति भावः । हे हरे स्वशत्रुं स्वः स्वकीयस्त्वत्प्रतिपक्षत्वेन तावकश्चासौ शत्रुस्तं मद्रूपं रिपुमित्यर्थः । शत्रुः शातयिता यस्य तमिति वा । स्वस्य शत्रुमरिमात्रमिति वा जहि संहर ॥ ६ ॥

चट्टी – हे हरे इन्द्र । स्वशत्रुं माम् ॥ ६ ॥

युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै पराजयः ।
विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥

सत्यधर्मा – नित्यं विष्णुर्विष्णुरेक एव त्वदादयो मदादयश्च न तथाविधा इति नायुधत्यागे कारणमिति विपश्चित्कैश्चित्पदैर्गदति वृत्रः स्वशत्रुम् ॥ युयुत्सतामिति ॥ सदा एकत्रैकस्य जयोऽपि सदा नैकस्येति वै प्रसिद्धम् । निर्णीतजयः कः । को वर्णयेदित्यतो वर्णयति ॥ विनैकमिति । उत्पत्तिश्च लयश्च स्थितिश्च तासामीश्वरं स्वामिनम् । उत्पत्तेरभ्यर्हिततया पुर उदीरणम् । याऽगौणस्य स्थितिशब्दस्यान्ते स्थितिस्तस्या उत्पत्ताविव लयेऽपि सत्तारूपिण्याः अपेक्षितत्वादिति ज्ञेयम् । सनातनमेवंरूपेण वेदगम्यम् ॥ ७ ॥

चट्टी – कुत्रचित्कुत्रापि । आततायिनां शस्त्रपाणिनाम् । युयुत्सतां योद्धॄणां जयः सदा नियमेन न वै नैव स्यात् । किं त्वेकत्रैकदा । कदाचिदिति यावत् । पराजयोऽपि स्यात् । उक्तस्यापवादमाह ॥ विनेति । परमपुरुषस्य विष्णोरेकस्यैव सर्वदा जय इति भावः ॥ ७ ॥

लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ।
द्विजा इव सिचा बद्धाः स काल इह कारणम् ॥ ८ ॥

सत्यधर्मा – यस्य वशे सन्तः श्वसन्ति सप्राणधारणा भवन्ति । सिचा तन्त्या बद्धा विवशाः परवशा द्विजाः पक्षिण इव । द्विजो विप्रेऽण्डज इति विश्वः । स कालो हरिरिह जयापजययोः कारणं न यूयं नापि वयमिति न लज्जा युक्तेति भावः ॥ ८ ॥

चट्टी – स भगवत एव सार्वकालिको जयोऽन्येषां तु कदाचिदित्येतत्कुत इत्याशङ्क्य तस्य स्वतन्त्रत्वादन्येषां तदधीनत्वाच्चेत्याह ॥ लोका इति सप्तभिः । यस्य वशे स्थिता एव स्वयं विवशा भगवदधीनत्वमजानन्तः सन्तः श्वसन्ति चेष्टन्ते । द्विजाः पक्षिणः । सिचा जालेन । कालः कलयति । भगवानिह जयादौ कारणम् ॥ ८ ॥

ओजः सहो बलं प्राणममृतं मृत्युमेव च ।
तमज्ञाय जनो हेतुमात्मानं मन्यते जडः ॥ ९ ॥

सत्यधर्मा – ओजआदिकं विस्तारयन्तं ददतमिति यावत् । अज्ञायाधिकारिणे । विनेत्याकृष्यते । आत्मानं हेतुमोजसामादिकारणं मन्यते जानाति । कुत इत्यत आह ॥ जड इति । जडो मूर्खः इति विश्वः । अज्ञायेति ल्यबार्षः । अनञ्पूर्व इति प्रतिषेधात् ॥ ९ ॥

चट्टी – ननु भगवतो जयादिकारणत्वं न युज्यते । जितोऽहं पराजितोऽहमिति जीवस्यैव तद्धेतुत्वोपलंभादित्याशङ्क्य सा भ्रान्तिरित्याह ॥ ओज इति । प्राणं पूर्णानन्दम् । ओज आदि ददतं भगवन्तं जयादिहेतुमविज्ञाय जन आत्मानं स्वात्मानं हेतुं मन्यते । यतो जडोऽज्ञ इत्यर्थः ॥ ९ ॥

यथा दारुमयी नारी यथा यन्त्रमयो मृगः ।
एवं भूतानि मघवन् ईशतन्त्राणि विद्धि भोः ॥ १० ॥

सत्यधर्मा – यथा दारुमयी नारीति सर्वावस्थासु न स्त्री स्वातन्त्र्यमर्हतीत्युक्तेरुक्तिः एवं जानन् जनो जडप्राय इति सूचयितुम् । यथा यन्त्रमयो मृग इति । सूत्रात्मा दारुमृगपुत्तलिका । भूतानीति नपुंसकनिर्देशेन सर्वथा सामर्थ्यवैकल्यं सूचयति । भोः हे मघवन् । भो भो इति पाठौ सुमङ्गलौ ॥१०॥

चट्टी – भूतानां भगवदधीनत्वं दृष्टान्ताभ्यामाह ॥ यथेति । ईशतन्त्राणि भगवदधीनानि ॥ १० ॥

पुरुषः प्रकृतिर्व्यक्तमात्मभूतेन्द्रियाशयाः ।
शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहम् ।
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ ११ ॥

तात्पर्यम् – मन्यतेऽनीशमीश्वरम् । 'अनीशं जीवरूपेण परमात्मानमीश्वरम् । ये मन्यन्ते तान्समीक्ष्य स्नेहान्निरयभाग्भवेदि'ति च । 'हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः । शेषोऽव्यक्तस्तथैवेन्द्र आशयः समुदाहृत' इति च ॥ ११ ॥

सत्यधर्मा – पुरुषः प्रकृतिरिति पद्ये किञ्चिदनूद्य प्रमाणेनैव पुरुषादिपदार्थमाह ॥ मन्यतेऽनीशमीश्वरमिति । अनीशोऽप्रेरकः सामर्थ्यहीनो यो जीवस्तद्रूपेण तदात्मकतया । ईश्वरमीशत्वेनान्येभ्योऽप्युत्तमं ये मन्यन्ते तान् । स्नेहात्समीक्ष्य स्नेहपूर्वकमवलोक्य स्थितो लोको निरयभाक् नरकदुःखभुग्भवेत् । तत्स्नेहः सुखावह इति भागवतैस्ते दूरनिरसनीया इति साक्षात्तेषां नरक इति किं वक्तव्यमिति च भावः । हिरण्यगर्भो ब्रह्मा पुरुषो वायुरात्मा उदाहृत इति द्वाभ्यामत्रैवोत्तरत्राप्यन्वेति । शेषोऽव्यक्तः तथैवेन्द्र आशयः इति तन्त्रमालायामित्यन्वयः ॥ अथ श्लोकार्थः ॥ पुरुषो हिरण्यगर्भः प्रकृती रमा । मूले प्रकृतिं पुरुषोऽव्यक्तमिति सुपाठम् । अव्यक्तः शेष आत्मा वायुर्भूतानि तदभिमानिन इन्द्रियाणि तद्देवता आशय इन्द्र एते यदनुग्रहं यस्येश्वरस्यानुग्रहं प्रसादं विनाऽस्य जगतः सर्गादौ न शक्नुवन्ति तमीश्वरमात्मानमादानादिकर्तारमनीशमनीशजीवाभिन्नं मन्यते । कोऽसावित्यत आह ॥ अविद्वानिति । एवं तत्स्नेहकृदपीति प्रामाणिकोऽप्यर्थोऽप्यनुसन्धेयः ॥ ११ ॥

चट्टी – ननु भूतानां प्रकृतिपुरुषादिपरतन्त्रजन्मादिमत्त्वात्कथमीशतन्त्राणीत्युच्यत इत्यत आह । पुरुष इति । पुरुषो हिरण्यगर्भः प्रकृतिश्चेतनो व्यक्तः शेष आत्मा वायुर्भूताभिमानिनश्चेन्द्रियाभिमानिनश्चाशय इन्द्रश्च ॥ तदुक्तम् ॥ हिरण्यगर्भः पुरुष इत्यादि । एते हिरण्यगर्भादयो यस्य भगवतोऽनुग्रहं विनाऽस्य जगतः सर्गादौ न शक्नुवन्ति । ॥ तदुक्तम् ॥ द्रव्यं कर्म च कालश्चेत्यादि । ननु यदुक्तं हिरण्यगर्भादयो न शक्नुवन्तीति । तदयुक्तम् । तेषां भगवदभिन्नत्वादित्यत आह ॥ अविद्वानिति । एवमुक्तप्रकारेणात्मानं सर्वान्तर्यामिणमीश्वरमनीशं जीवाभिन्नं यो मन्यते सदाऽविद्वान्मिथ्याज्ञानीत्यर्थः । जीवेश्वराभेदे विरोधस्फुरणायानीशमीश्वरमिति चोक्तम् । तथा चोक्तम् । अनीशं जीवरूपेण परमात्मानमीश्वरम् । ये मन्यन्ते तान्समीक्ष्य स्नेहान्निरयभाग्भवेदिति ॥ ११ ॥

भूतैः सृजति भूतानि ग्रसते तानि वै स्वयम् ॥ १२ ॥

सत्यधर्मा – यदि तदितरो हरिः स्रष्टृहर्त्रादिस्तर्हि तत्स्रष्टृत्वादिवादस्य गतिः केत्यत आह ॥ भूतैरिति । भूतैरस्वतन्त्रभूतैश्चतुराननादिभिः सृजति तैरेव भूतानि तत्तत्काले स्वयमेव ग्रसते ग्रसति ॥ १२ ॥

चट्टी – ननु पित्रादयः सृष्टारो दृश्यन्ते । व्याघ्रादयश्च हन्तारो दृश्यन्ते । अतः कथं भगवानेव सर्वकारणमित्यत आह ॥ भूतैरिति । स्वयमीश्वरः ॥ १२ ॥

आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ।
भवन्त्येव हि ते काले यथाऽनिच्छोर्विपर्ययाः ॥ १३ ॥

सत्यधर्मा – श्रीः कीर्तिराशिषश्चेति पुरुषस्य याः, आयुरैश्वर्यं चेति ते काले तस्मिन्भवति सत्येव भवन्ति। परलिङ्गत्वमित्युत्पूर्वं या इति सम्भवतीति वा । एवमन्वयलापनेन नपुंसकमनपुंसकेनेति स्मरणात्कथं या इत्येकशेष इति परास्तम् । यथाऽनिच्छोर्विन्दुरिच्छुरित्युप्रत्ययान्तस्य निपातनात् अपेक्षारहितस्य । विपर्ययो मृत्यादिः सुखं चेन्मत्सामर्थ्येन दुःखं चेद्भगवानेवं कारयामासेति किं कृतं वैषम्यमिति भावः ॥ १३ ॥

चट्टी – ननु त्वया पराजितस्य मम जयादिशङ्कैव नास्ति। किन्तु बलाद्युद्धे प्रवर्तयसीत्यत आह ॥ आयुरिति। काले जयादिकाले यथा विपर्यया अकीर्त्यादयः ॥ १३ ॥

तस्मादकीर्तियशसोर्जयापजययोरपि ।
समः स्यात्सुखदुःखाभ्यां मृत्युजीवनयोस्तथा ॥ १४ ॥

सत्यधर्मा – अकीर्तिरप्रत्यक्षस्तुतिर्यशो दिग्व्याप्ता स्तुतिः । दिक्षु यानाद्यशो व्याप्तं कीर्तिः प्रत्यक्षतः स्तुतिरिति छान्दोग्यभाष्योक्तेरर्थविशेषो ज्ञेयः । समः स्यात्तथा मृत्युजीवनयोरिति । स्वसर्वस्वं नैकमिन्द्रमात्रं लक्षीकृत्येति ज्ञेयम् ॥ १४ ॥

चट्टी – यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्यात् हर्षविषादहीनो भवेत् ॥ १४ ॥

सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥ १५ ॥

सत्यधर्मा – अहंममाभिमान एव दुःखादिकारणमित्याह ॥ सत्वमिति । आत्मनो जीवस्य न गुणाः किन्तु प्रकृतेस्तत्रात्मानं परमात्मानं साक्षिणं साक्षाद्द्रष्टारमेव तदसम्बद्धं मोचकं च यो वेद सोऽहंममतातीतः । न बध्यते यस्तत्रात्मगुणेष्वपि साक्षिणमात्मानं स्वं मन्यते स न बध्यत इति नेत्यप्यन्वयेऽन्वयव्यतिरेकाभ्यां चावश्यकतैव ज्ञानस्य सूक्ता भवतीति ज्ञेयम् ॥ १५ ॥

चट्टी – समदृष्टावुपायमाह ॥ सत्त्वमिति । सत्त्वादिगुणाः प्रकृतेः स्वरूपभूता नात्मनो जीवस्य । तस्य चिदानन्दमयत्वात् । तत्र गुणत्रयातीते जीवे साक्षित्वेन वर्तमानमात्मानं परमात्मानं यो वेद सः हर्षादिभिर्न बद्ध्यत इत्यर्थः ॥ १५ ॥

पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे ।
घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥

सत्यधर्मा – इयता तव किलेयती लज्जा मां पश्यतोऽपीति तं युद्धसन्नद्धं कर्तुं स्वयमेव निर्दिशति ॥ पश्येति । वृक्णौ छिन्नावायुधभुजौ यस्य स तम् ॥ १६ ॥

चट्टी – हर्षविषादनिवृत्तेन चाहमेव गुरुरित्याह ॥ पश्येति । वृक्णमायुधं शूलं भुजश्च यस्य तम् ॥ १६ ॥

प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः ।
अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥ १७ ॥

सत्यधर्मा – समरस्वरूपमन्यापदेशेनोपदिशति ॥ प्राणेति । प्राण एव ग्लह आपणद्रव्यम् । पणोऽक्षेषु ग्लाहोसासु देवनापाशकाश्च त इत्यमरः । यस्मिन्स । इष्वक्षः इषवो बाणा अक्षाः पाशा यस्मिन्स वाहनासनो वाहनान्यश्वादीन्यासनं षण्णवतिमण्डलविलसदासनं यस्मिन्सः । वाहन-माहितादिति निपातनाद्वाहनेति साधुः । तत्र समरेऽमुष्य जयोऽमुष्य पराजय इति न ज्ञायत इति पृथगन्वयः ॥ १७ ॥

चट्टी – जयपराजययोरनित्यत्वं द्यूतरूपणोपसंहरति ॥ प्राणग्लह इति । प्राणा एव गूलहायनो यस्मिन् । इषव एवाक्षा यस्मिन् । वाहनान्येव ततश्चाल्पमानान्यासनानि पलका यस्मिन् ॥ १७ ॥

श्रीशुक उवाच
इन्द्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ।
गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥

सत्यधर्मा – गतालीकं गताप्रियमनृतं वा गतविस्मयो गताहङ्कारस्तं वृत्रम् ॥ १८ ॥

चट्टी – गतालीकं निष्कपटम् । गतविस्मयो गताहंकारः ॥ १८ ॥

इन्द्र उवाच
अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी ।
भक्तः सर्वात्मनाऽऽत्मानं सुहृदं जगदीश्वरम् ॥ १९ ॥

भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ।
यद् विहायासुरं भावं महापुरुषतां गतः ॥ २० ॥

सत्यधर्मा – दानव दनुतनूज । सिद्धो जीवन्मुक्तः सर्वात्मना सर्वप्रकारेणात्मानं भगवन्तं यथा भजन् यस्य ते मतिरीदृशी अहो सिद्धोऽसीत्यन्वयः । अथवा श्लोकद्वयमखण्डान्वयि । भजञ्जनमो-हिनीमज्ञमोहिकां वैष्णवीं भागवतीं मायां भवानतार्षीत् । कथमेवं भगवन्नवगतं त्वयेत्यतोऽवगमयति ॥ यदिति । महापुरुषतामेकान्तिकताम् ॥ १९,२० ॥

चट्टी – सिद्धो जीवन्मुक्तः । जीवन्मुक्ते जातिभेदे सिद्धः स्यात्साधितेऽपि चेत्यभिधानात् । आत्मानं परमात्मानं भक्तः सेवितवानसि । भज सेवायामिति धातोः । वैष्णवीं विष्णुपत्नीं ज्ञानमोहिनीं भवत्प्रसादाभावे ज्ञानविलोपकरीं मायां प्रकृतिगुणप्रवर्तकत्वेन तच्छब्दवाच्यां श्रीभूदुर्गारूपिणीं चित्प्रकृतिं भगवानतार्षीत् भगवदनुग्रहं संपाद्याभिमुखीकृतवानसीत्यर्थः । वैशब्दस्तूक्तार्थस्य प्रमाण-प्रसिद्धिद्योतकः॥ तदुक्तम् ॥ श्रीभूदुर्गेति या भिन्नेत्यादि । महापुरुषतामुत्तमभक्तत्वम् ॥ १९,२० ॥

खल्विदं महदाश्चर्यं यद् रजःप्रकृतेस्तव ।
वासुदेवे भगवति सर्वात्मनि दृढा मतिः ॥ २१ ॥

सत्यधर्मा – रजःप्रकृतेस्तत्प्रचुरसत्त्वस्य भावस्य यद्दृढा सात्त्विक्येव मतिर्जातेति तदिदं महद्बहुलमाश्चर्यम् । महतां अस्मदादीनामाश्चर्यमिति वा । खलु मामपि सान्त्वयसि चेत्यर्थः । खलु सान्त्वन इति विश्वः ॥ २१ ॥

चट्टी – रजःप्रकृतेरसुरजातेः । सर्वात्मनि सर्वान्तर्यामिणि ॥ २१ ॥

यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥ २२ ॥

सत्यधर्मा – अन्तर्निलीनेन लोचनेन छादितेन वाऽनाच्छादितेन वा किन्न्यायेन श्रीजगन्नाथ-भजकस्य तवेतरसुरपरिचरणापरिचरणाभ्यां किमायव्ययावित्यनुरूपेण निदर्शनेन निरूपयति । यस्येति ॥ अथवा निर्गलापवर्गमार्गे सति किं त्रैवर्गिकस्वर्गादिभिरिति शंसति ॥ यस्येति । निःश्रेयसेश्वरे हरिरूपेऽमृतम्भोधावमृतसमुद्रे विक्रीडत आशु शुष्यद्भिः क्षुद्रैः खातकोदकैस्तटाकाद्युदकैः प्राप्तैरितरैः सुरैः स्वर्गादिभिर्वा किं कृत्यमिति क्रामिकोऽर्थः ॥ २२ ॥

चट्टी – खातकोदकैर्गर्तादिजलोपमैः । स्वर्गादिभिः किम् ॥ २२ ॥

श्रीशुक उवाच
इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ।
युयुधाते महावीर्याविन्द्रवृत्रौ युधाम्पती ॥ २३ ॥

सत्यधर्मा – धर्मजिज्ञासया भगवत्स्वरूपज्ञीप्सया ब्रुवाणौ । अन्योन्यमित्यत्रैवोत्तरत्र युयुधात इत्यनेनाप्यन्वयि । कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलमिति बहुलग्रहणादन्यपरयोर्न समासवदितरशब्दस्य तु नित्यम् । असमासवद्भावे पूर्वपदस्य सुपः स्थाने सुर्वक्तव्य इति

कौमुद्याद्युदीरणात्पूर्वान्यशब्दीय सुपः सोरुत्वे गुणे पूर्वरूपत्वेऽन्योन्यमिति ज्ञेयम् । एवं परस्परं कस्कादित्वाद्विसर्जनीयस्य सोऽधिक इत्यनुसन्धेयम् । युधां युधसम्प्रहार इत्यतः कर्तरि क्विप् योद्धृणां पती प्रभू ।। २३ ।।

चट्टी – युधां संग्रामाणां पती मुख्यौ ।। २३ ।।

आविध्य परिघं वृत्रः कार्ष्णायसमरिन्दम ।
इन्द्राय प्राहिणोद् घोरं वामहस्तेन मारिष ।। २४ ।।

सत्यधर्मा – वामहस्तेन च्छिन्नभिन्नेन ।। २४ ।।

चट्टी – आविद्ध्य भ्रामयित्वा । काष्र्ण्यायसं लोहमयम् । हे मारिष श्रेष्ठराजन् ।। २४ ।।

स तु वृत्रस्य परिघं करं च करभोपमम् ।
चिच्छेद युगपद् देवो वज्रेण शतपर्वणा ।। २५ ।।

सत्यधर्मा – युगपदेकदा । करभोपमं हस्तिहस्तसमं करिकायः करभकः करिपोतेऽपि तत्कर इत्यभिधानात् । वेदव्यासेन वज्रेण शतपर्वणेति वेदपादो निबद्धः ।। २५ ।।

चट्टी – करभोपमं करिकरसदृशम् । करिकाये तु करभः करिपोतेऽपि तत्करमित्यभिधानात् ।।२५।।

दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ।
छिन्नपक्षो यथा गोत्रः खाद् भ्रष्टो वज्रिणा हतः ।। २६ ।।

सत्यधर्मा – गोत्रं पर्वतः गोत्रक्षोणीधरे स्मृत इति विश्वः । खादम्बराद्भ्रष्टोऽधः पतितः । वज्रिणा हत इत्यत्र हननकर्तृत्वेनेन्द्रकरत्वेन वज्रं विवक्षित्वा वाच्यमिति ज्ञेयम् ।। २६ ।।

चट्टी – उत्कृन्तं छिन्नमूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा । छिन्नपत्रः छिन्नपक्षः । गोत्रः पर्वतः ।। २६ ।।

कृत्वाऽधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ।
नभो गम्भीरवक्त्रेण लिलेहोल्बणजिह्वया ।। २७ ।।

सत्यधर्मा – दिव्यन्तरिक्षे । गम्भीरेण गभीरेण वक्त्रेण सहितो वृत्र उल्बणजिव्हया क्रूररसनया नभो लिलेह आस्वादितवानिवाभूदिति शेषः ।। २७ ।।

चट्टी – अधरां हनुं अधरोष्ठं भूमौ कृत्वा । उत्तरां हनुमूर्ध्वोष्टं दिवि कृत्वा नभोवद्गंभीरेणागाधेन वक्त्रेण कालकल्पाभिर्मृत्युतुल्याभिर्दंष्ट्राभिश्च जगत्त्रयं ग्रसन्निव दृश्यमानो दैत्य उल्बणया जिव्हया हनुद्वयं लिलेहेत्यन्वयः ॥ २७ ॥

दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ।
अतिमात्रं(त्र)महाकाय आक्षिपंस्तरसा गिरीन् ॥ २८ ॥

सत्यधर्मा – कालकल्पाभिः यमसमाभिर्दंष्ट्राभिरतिमात्रमत्यर्थं महाकायो विपुलकलेवरः । अतिमात्रमहाकाय इति पाठे बहुप्रमाणात्पदार्थादपि महाकाय इति वा । भृशात्यर्थातिमात्रेत्यमरः । तरसा बलेन वेगेन वा । तरो बले च वेगे चेति विश्वः । गिरीन्क्षिपन्निरस्यन् । महाकाय इति गिरिनिरासहेतुः ॥ २८ ॥

चट्टी – अतिमात्रोऽत्युच्छ्रितो महान्कायो यस्य स वृत्रः । तरसा वेगेनाक्षिपन् चालयन् निर्दरयन् विदारयन् ॥ २८ ॥

गिरिराट् पादचारीव पद्भ्यां निर्दरयन् महीम् ।
जग्रास तं समासाद्य वज्रिणं सहवाहनम् ।
महाप्राणो महावीर्यो महासर्प इव द्विपम् ॥ २९ ॥
वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ।
हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ ३० ॥

सत्यधर्मा – सहवाहनं वज्रिणमिन्द्रम् । महासर्पोऽजगरः ॥ २९,३० ॥

चट्टी – जग्रास निजगार ॥ महाप्राणो महाबलो महावीर्यो महाप्रभावः । महासर्पोऽजगरः ॥ २९ ॥

निगीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः ।
महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥

भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद् विभुः ।
ऊच्चकर्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा ॥ ३२ ॥

सत्यधर्मा – उदरं गतो न ममार निगीर्णो न ममार । उदरं संशयं मम मरणं निःसरणं वा स इति न गतः । उदरं संशयः प्रोक्त इति तात्पर्यान्तरोक्तेः । तत्र वित्रासे हेतुमाह ॥ महापुरुषसन्नद्ध इति । महापुरुषो भगवांस्तेनैव सन्नहनसहितो योगेन योगबलेन चाणिमादिप्राधानिकबलेन ॥ ३१, ३२ ॥

चट्टी – महापुरुषेण कवचरूपेण श्रीनारायणेन सन्नद्धो दंशितः । योगमायाबलेनाणिमादि-योगमहिमाबलेन । बलभिदिन्द्रः । उच्चकर्त चिच्छेद ॥ ३१, ३२ ॥

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन्समन्तात् परिवर्तमानः ।
न्यपातयत् तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥

तात्पर्यम् – सन्धितः समयेनेन्द्रो वृत्रेणाथो करग्रहः । समुद्रतीरे विचरन्फेनेन वधमस्य तु । नर्मणा जहि फेनेन वाचयित्वा सुरेश्वरः । पादस्पर्शविवादं च कृत्वा युद्धाय दंशितः । फेने वज्रं समावेश्य विष्णुयुक्तं व्यसर्जयत् । अपानुदच्छिरस्तस्य ध्यायतो वत्सरेण स' इत्याग्नेये ॥ ३३ ॥

सत्यधर्मा – वज्रस्तु तत्कन्धरमिति श्लोकस्य मानेनैव यथावस्थितमर्थमाह ॥ सन्धित इति । समयेन वृत्रेण सन्धिं प्राप्तोऽथोऽनन्तरं करग्रहो गृह्णातीति ग्रहः करस्य ग्रहः । अनेन वृत्रकरप्ररोहः सूच्यते । करेण गृह्णातीति करग्रहो वा । न शुष्केण नाप्यशुष्केणेति वरात्फेनस्यानुभयरूपत्वादनेनैनं हन्मीत्यालोच्य समुद्रतीरे विचरन्निति नर्मदातो भिन्नस्थानाभिधानम् । विचरन्सञ्चरन्विचारं कुर्वंश्च केन तव मरणं भवेदिति नर्मणा तन्मुखेन मां फेनेन जहीति वाचयित्वा सुरेश्वर इन्द्रः । रे अरे किं पादस्पर्शोऽकारि त्वया मयि तवेति विवादं कलहं कृत्वा दंशितः पूर्वोदीरितवर्मवान्फेने वज्रं समावेश्य । अनेन फेनभागो बहुल इति ज्ञायते । विष्णुयुक्तमन्तःसन्निहितभगवत्कं वज्रं विससर्ज । तेन ध्यातो भगवद्ध्यानं कुर्वतस्तस्य वृत्रस्य शिरः संवत्सरेण कालेनापानुदत् । सन्धानानन्तरं गतः कालस्तद्धननपर्यन्तं वत्सरात्मेति ज्ञेयमित्याग्नेयपुराणोक्तेरयं विशेषो ज्ञेय इति भावः ॥ अथ मूलार्थः ॥ आशुवेगो महावेगो यस्य स तत्कन्धरं कन्धराम् । ग्रीवायामपि कन्धरेति विश्वात् । कं शिरः धारयतीति कं धरं गलमिति वाऽर्थः । समन्तात्परितः परिवर्तमानः संवत्सरपर्यन्तर इव कार्यान्तरेऽप्यप्रेरणादि-यमुक्तिः। वार्त्रहत्ये वृत्रहत्या वृत्रहननं तदीये युद्धे वा समये ज्योतिषामयने दक्षिणोत्तरायणे तावान्योऽहर्गणः षष्ट्युत्तरशतत्रयदिनलक्षणस्तेन न्यपातयत्फेननिलीनः पातयामास पयसां निधेस्तीर इत्यर्थः ॥ ३३ ॥

चट्टी – आशुवेगोऽतिवेगवान् । वज्रस्तस्य वृत्रस्य कंधरं समन्तात्परितः परिवर्तमानश्चक्रवद्भ्रमन् कृंतन् छिन्दन् सन् ज्योतिषां सूर्यादीनामयने दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः । षष्ठ्युत्तरशतत्र-यात्मकः । तावताऽहर्गणेन वार्त्रहत्ये वृत्रहत्यायोगे काले न्यपातयत् । यद्वा । स्वार्थे तद्धितः । वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः ॥ तथा चोक्तम् ॥ संबन्धितः समयेनेन्द्र इत्यादि ॥ ३३ ॥

तदा च खे दुन्दुभयो विनेदुर्गन्धर्वविद्याध्रमहर्षिसिद्धाः ।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥

सत्यधर्मा – यदा न्यपतत्तदा दुन्दुभयो विनेदुः स्वयमेव । यथोक्तं हरिवंशे प्रस्तावान्तरे । स्वयमेव प्रवाद्यन्ते तूर्याण्यनेकश इति । गन्धर्वाश्च विद्याध्राश्च विद्याधराश्च । यथोक्तमेतत्सजातीयप्रकरणे ऋग्भाष्यटीकासु । आध्रस्य चित् आसमन्ताद्धारकस्यापि महीध्र इति यथेति । धृ धारण इत्यस्मान्मूलविभुजादित्वात्कप्रत्यये कित्त्वाद्गुणाभावे ऋकारस्य यणादेशे च विद्यां धरन्तीति विद्याध्रा इति मन्तव्यम् । महर्षयश्च सिद्धाश्च ते । वार्त्रघ्नलिङ्गैरिन्द्रलिङ्गयुक्तैर्मन्त्रैः । इन्द्रो वै वृत्रं हत्वा महानभवदितीदं जातीयकैर्मुनिभिस्तमिन्द्रमभिष्टुवाना मुदा कुसुमैः पुष्पैरभ्यवर्षन् । कर्मणां कुसुमानां करणत्वमौपचारिकम् ।। ३४ ।।

वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिन्दम ।
पश्यतां सर्वलोकानां स्वलोकं समपद्यत ।। ३५ ।।

इति श्रीमद्भागवते षष्ठस्कन्धे द्वादशोऽध्यायः ।।

सत्यधर्मा – वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिर्ज्योतीरूपो जीवः सन् सर्वलोकानां ज्ञानिनां पश्यतां सतां स्वलोकं स्वविद्याधरशरीरं स्वांशिनमिति यावत् । समपद्यत प्राप ।। ३५ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे द्वादशोऽध्यायः ।। ६-१२ ।।

चट्टी – वार्त्रघ्नलिङ्गैर्वृत्रहन्तृवीर्यप्रकाशकैर्मन्त्रैः । वारहत्याय श्रवसे पृतना सहाय्याय चेत्याद्यैः । तमिन्द्रमभिष्टुवाना अभितः स्तुवन्तः । आत्मज्योतिर्जीवाख्यं तेजः स्वलोकं स्वेनाधिकृतं विद्याधरलोकम् ।। ३५ ।।

इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ।। ६-१२ ।।

अथ त्रयोदशोऽध्यायः ।

श्रीशुक उवाच
वृत्रे हते त्रयो लोका विना शक्रेण भूरिद ।
सपाला ह्यभवन् सद्यो विज्वरा निर्वृतेन्द्रियाः ।। १ ।।

चट्टी – ।। हरिः ॐ ।। क्षपयेन्महदप्यंहो हरिभक्तैः कृता क्रिया । अश्वमेधो यथेन्द्रस्येत्यध्यायेऽस्मिन्निरूप्यते । हे भूरिदार्थिनां बहुप्रद । निर्वृतेन्द्रियाः स्वच्छचित्ताः ।। १ ।।

देवर्षिपितृभूतानि दैत्यदेवानुगाश्च ये ।
प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः ॥ २ ॥

सत्यधर्मा – ॥ हरिः ॐ ॥ सत्कर्मैवासत्कर्मभेदकमिति बोधयत्यस्मिन्नध्याये । तत्रादौ भूप्रभोर्बुभुत्सातिशयसम्पत्तये किञ्चित्संशयसाधनमपि द्रष्टुमायातानित्यनुवादाज्ज्ञायते । ततः समुद्रतीरात् ॥ २ ॥

चट्टी – ततः समुद्रतीरात् ॥ २ ॥

राजोवाच
इन्द्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ।
येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥ ३ ॥

सत्यधर्मा – यदर्थमियानत्यर्थमर्थनादिव्यापारो व्यापादितेऽस्मिन्कुतो विपत्तिराकस्मिकी वासवस्येति शङ्कते ॥ इन्द्रस्येति । अनिर्वृतेर्दुःखस्य । येन वृत्रवधेन । इन्द्रस्यानिर्वृतेर्हेतुमित्यनेन शङ्कापर्यवसानेऽपि यत्पुनर्हरेर्दुःखं कुतोऽभवदिति वचनं चित्रतापारवश्येन स्मरणाभावादिति ज्ञेयम् । अथवेन्द्रस्य दुःखं कुतोऽभवदिति श्रोतुमिच्छामीत्यन्वयः । अनिर्वृतेरेतच्छङ्काप्रयुक्तचित्तकार्यस्य हेतुं बुद्धिमान्द्यं हरिरपहरेत् तच्छक्त इति न शङ्कनमिति भावः । अतो नेन्द्रहर्यन्यतरातिरेकः ॥ ३ ॥

चट्टी – येनेन्द्रेण तस्य हरेरिन्द्रस्य । अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरंगसिंहशीतांशु-यमाश्च हरयो दशेत्यभिधानम् ॥ ३ ॥

श्रीशुक उवाच
वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ।
तद्वधायार्थयन्निन्द्रं नैच्छद् भीतो बृहद्वधात् ॥ ४ ॥

सत्यधर्मा – तद्वधाय आर्थयन्निति छेदः । प्रार्थयामासुः । बृहद्वधाद्ब्रह्महत्याया एतदार्य-विश्वरूपाचार्यवधाद्भीत इति नैच्छदिति वा ॥ ४ ॥

चट्टी – दुःखहेतुं वक्तुं प्रस्तावकथामाह ॥ वृत्रविक्रमेत्यादिना । अर्थयन्प्रार्थयन् । ब्राह्मणवधात् भीतः सन्नैच्छत् । हन्तुमिति शेषः ॥ ४ ॥

इन्द्र उवाच

भूस्त्रीजलद्रुमैरेनो विश्वरूपवधोद्भवम् ।
विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माज्म्र्यहम् ॥ ५ ॥

सत्यधर्मा – स्पष्टमाचष्टे ॥ भूस्त्रीति । अनुगृह्णद्भिरेनः पापं भ्वादिभिर्विभक्तं विभज्य गृहीतम् । वृत्रहत्यां क्वाहं मार्ज्मि शोधयामि । पदपङ्केरुहं पङ्के प्रस्थाप्य पुनः प्रक्षालनापेक्षया दूरतो वरं परिसरणमिव वृत्रं हत्वा कृत्वेतरवरणं ब्रह्महत्याविभजनापेक्षया वरमुपेक्षणमितीन्द्रभावोऽवसेयः ॥ ५ ॥

चट्टी – ननु विश्वरूपं हतवतो तव वृत्रहनने का भीतिरित्यत आह ॥ भूरिति । अनुगृण्हद्भिर्मय्यनुग्रहं कुर्वद्भिः स्त्र्यादिभिः । विश्वरूपवधोद्भवमेनः पापं विभक्तं विभज्य गृहीतं वृत्रहत्यां क्व मार्ज्मि शोधयामि । सोऽब्रवीदिति शेषः ॥ ५ ॥

श्रीशुक उवाच

ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन् ।
मार्जयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥ ६ ॥

सत्यधर्मा – स्म निन्दनेन । स्म पादपूरणेऽतीते सामनिन्दार्थयोर्मतमिति विश्वः । मा भैर्भयं मा कार्षीः ॥ ६ ॥

चट्टी – मा स्म भैर्भयं मा कार्षीः स्म ॥ ६ ॥

हयमेधेन पुरुषं परमात्मानमीश्वरम् ।
इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥

सत्यधर्मा – जगद्वधादपि मोक्ष्यसे किमु तदन्तर्गतवृत्रमात्रहत्याया इति भावः ॥ ७ ॥

ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाऽघवान् ।
श्वादः पुल्कसको वाऽपि शुध्येरन् यस्य कीर्तनात् ॥ ८ ॥

सत्यधर्मा – यन्नामस्मरणादेवैतादृशा अपि पापतः पूता भवन्ति किं वक्तव्यं तद्यजनेनेति भावेनाहुरित्याह ॥ ब्रह्महेति । अघवानुक्तेतरदुरितवानेतदादिसर्वाघवानेक इति वा । यस्य हरेः ॥ ८ ॥

चट्टी – यस्य हरेर्नामसंकीर्तनादेव ते शुध्यन्ति किं पुनस्तद्यजनेनेति भावेनाहुः ॥ ब्रह्महेति । श्वादः श्वपचः । यस्येत्यस्य तमित्यनेनान्वयः । दृष्ट्वेति शेषः ॥ ८ ॥

तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन ।
हत्वाऽपि सब्रह्म चराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥

सत्यधर्मा – तर्हि लघीयसि श्लाघितोपाये सति गरीयसो मां प्रति स वादे बोधनं कुत इत्यतस्तव तत्राधिकारः शतमन्यो इति स्वोक्तकारिताव्यवस्थित्यै पुनरुक्तमेव व्यक्तं वदन्ति । तमिति । अनुष्ठितेनानुष्ठापितेन सब्रह्म भूतानि विष्णुर्भुवनानि विष्णुः सर्वं व्याप्य नारायणः स्थित इत्यादेर्ब्रह्मसन्निधानस्थानं सचराचरं चेतनाचेतनं जगद्धत्वाऽपि न लिप्यसे लिप्तो न भवसीति किं लिप्यमिति भावः ॥ ९ ॥

चट्टी – अनुष्ठितेन कारितेन । सब्रह्मेति ब्राह्मणजातेश्चरात्पृथग्ग्रहणं तद्वधस्य दोषाधिक्य-ज्ञापनार्थम् ॥ ९ ॥

श्रीशुक उवाच
एवं सञ्चोदितो विप्रैर्मरुत्वानहनद् रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥

तात्पर्यम् – 'प्रारब्धकर्मणैवैषां क्लृप्तदुःखस्य सूचकम् । इदानीन्तनकर्म स्याद्व्रणहेतुर्यथा रणः । देवादीनां स्थितप्रज्ञभावान्नैवान्यथा भवेत् । प्रारब्धमपि तु क्वापि किञ्चिद्विघटितं भवेदि'ति च ॥ १० ॥

सत्यधर्मा – ब्रह्महत्या हते तस्मिन्निति श्लोके तेजीयसो नैव दोषः । तदधिगम उत्तरपूर्वा-घयोरश्लेषविनाशौ तद्व्यपदेशादित्यादेरपरोक्षज्ञानिनः कथं व्यथा कथ्यत इत्यतः प्रमाणेनैवोपपत्तिमाह ॥ प्रारब्धेति । प्रारब्धकर्मणा भोक्तुमारब्धकर्मणैव यत्क्लृप्तं दुःखं तस्येदानीन्तनं ज्ञानानन्तरमनुष्ठीयमानं कर्म सूचकं न तु नूतनदुःखकारकम् । तत्र निदर्शनमाह ॥ व्रणहेतुरिति । यथा रणो युद्धं व्रणहेतुरश्वत्थाम्नो यावज्जीवव्रणहेतुस्तथा नान्यस्य । दुर्गन्धयुक्तो व्रणसञ्चिताङ्ग इति श्रीमदुक्तेः । सामान्यरणः सामान्यव्रण इति वदन्त्यपि । किं कृतो विशेष इत्यत आह ॥ देवादीनामिति । स्थितप्रज्ञभावात्तत्त्वात् स्थिता प्रज्ञा ज्ञानं यस्येति गीताभाष्योक्तेः । अन्यथा नूतनखेदोत्पादि नैव भवेत् । तर्ह्यहल्याभिहितप्रायश्चित्तोक्तिरयुक्तेत्यत आह ॥ प्रारब्धमिति । किञ्चिद्विघटितं भवेदिति । विघटनं च फलह्रासेन न तु कर्मनाशेनेति । उपमर्दं च । प्राप्तस्याप्यनिवृत्तस्य किञ्चिद्भुक्तस्य संविदा । उपमर्द इह प्रोक्तश्चतुर्थेऽलेप इष्यत इत्यानुव्याख्यानिकसुधायाम् । क्लृप्तस्य हानिर्न ह्यनुवर्तत इत्यारभ्य तथा च ज्ञानाग्निः सर्वकर्माणीति सर्वशब्दोऽप्यपीडितः स्यादित्यन्तेनात्यन्तविस्तृत्योक्तमनुसन्धेयम् । अथ

मूलार्थः ।। अश्वमेधादिभिस्तदुपरोधो यदि तदा न व्यासेधामोऽनुज्ञया वर्तामह इति महेन्द्र इदं व्यातनोदित्याह ।। एवमिति । मरुत्वान्मरुतोऽस्य सन्तीति मरुत्वान् । तसौ मत्वर्थ इति भत्वाज्ज-श्त्वाभावः । झ इति मतुपो वत्वम् । मघवानहनदहन् । वृषाकपिमिन्द्रं वृषाकपिर्हरे शक्रे हरीतक्यां जनार्दन इत्यभिधानात् । यथा वृषाकपिं रुद्रं ब्रह्महत्याऽऽससादेति वा । हरविष्णू वृषाकपीत्यमरः । वृषाकपिः शिवे कृष्ण इति विश्वः । ब्रह्महत्यानिमित्तेन कपाल्यास्तेऽधुना हर इत्यादेः ।। १० ।।

चट्टी – रिपुं वृत्रम् । तस्मिन्वृत्रे । वृषाकपिमिन्द्रम् । वृषाकपिर्हरौ शक्रे हरीतक्यां जनार्दन इत्यभिधानात् ।। १० ।।

तयेन्द्रं स्म ह सन्तप्तं निर्वृतिर्नामुमाविशत् ।
ह्रीमतां वाच्यतां प्राप्तं(ह्रीमन्तं हत्ययाख तप्तं) सुखयन्त्यपि नो गुणाः ।।११।।

सत्यधर्मा – तया वृत्रहत्यया । स्महेति रात्रिदृष्टगर्ते दिवावपातनीतिवदेकदाऽनुभूतेऽपि पुनः प्रवृत्तिर्मम किं भगवन्महिमेत्याश्चर्यं सूचयति । सर्वापकारणमारणे तदुपकारपुण्यं ख्यातिश्चेत्येवमादि-गुणानामसङ्ख्यानां सत्त्वात्किं दौर्मनस्यं सुमनोनायकस्येत्यतो न कस्यारणे कस्यैतादृशे कृते कर्मणि शर्मेति सामान्यमुखेनोङ्कयति ।। ह्रीमतामिति । लज्जावतां वाच्यतां निन्द्यतां प्राप्तं जनं गुणाः शौर्यादयश्च नापि सुखयन्ति ।। ११ ।।

चट्टी – तया ब्रह्महत्यया । नात्र तेजस्विन इन्द्रस्य हत्यालेपस्तस्याः श्रेष्ठापराधत्वाभावात् । किन्तु प्रारब्धसूचकत्वमेवेतीममर्थं प्रसिद्धिवाचकेन स्म हेति निपातसमुदायेन सूचयति ।। तथा चोक्तम् । प्रारब्धकर्मणैवैषां क्लृप्तदुःखस्य सूचकमित्यादि । ननु धैर्यादिगुणयुक्तस्य कुतो न निवृत्तिरित्यत आह ।। ह्रीमन्तमिति । लोकनिन्दयेति शेषः ।। ११ ।।

तां ददर्शानुधावन्तीं चण्डालीमिव रूपिणीम् ।
जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम् ।। १२ ।।

सत्यधर्मा – असृक्पटां मनःशिलादिरक्तिमवस्त्रां जरया वेपमानाङ्गीम् । यक्ष्मग्रस्तामि-त्युक्तिरेतत्पात्रमेव कर्तुमिति रजस्वलामिव ज्ञेयम् ।। १२ ।।

चट्टी – रूपिणीं मूर्तिमतीं यक्ष्मग्रस्ताम् । असृक्पटां रक्तरंजितवस्त्रां रजस्वलामिव ।। १२ ।।

विकीर्य पलितान् केशांस्तिष्ठ तिष्ठेति भाषिणीम् ।
मीनगन्ध्यसुगन्धेन कुर्वतीं मार्गदूषणम् ।। १३ ।।

सत्यधर्मा – मीनानां गन्धो हिंसा यत्र तत्स्थानं मीनगन्धि तद्वद्सुगन्धेन दुर्गन्धेन मार्गदूषणम् । अध्वनीनामसह्यतया मीनस्येव गन्धो येषाम् । उपमानाच्चेतीत्वम् । ते मीनगन्धयस्ते चासवः श्वासवायवस्तेषां गन्धे सुरभिण इति वा ॥ १३ ॥

चट्टी – मीनस्य गन्धो यस्य स मीनगन्धी । स चासावसुश्च निःश्वासवायुस्तस्य गन्धेन ॥ १३ ॥

नभोगतो दिशः सर्वाः सहस्राक्षो विशाम्पते ।
प्रागुदीचीं दिशं दृष्ट्वा प्रविष्टो नृप मानसम् ॥ १४ ॥

सत्यधर्मा – गत इति सर्वान्वयि । प्रागुदीचीमान्तरालिकीं दिशं दृष्ट्वा तां प्रविष्टो मानसं सरः प्रविष्टः । मानसशब्देन मानसं प्रविष्टः कुत्र गमने न त्रासो मम भवेदिति मनसाऽऽलोच्येत्यपि सूच्यते । मोक्षधर्मे नलिनीं प्रतिपेद इत्यारभ्यैवाभद्रो ब्रह्मतेजः प्रभावोपबृंहितं शत्रुवधं कृत्वा स्वस्थापित इत्यन्तेन विस्तृत्योक्तमनुसन्धेयम् ॥ १४ ॥

चट्टी – प्रागुदीचीमैशानीं मानसं नाम सरः ॥ १४ ॥

स आवसत् पुष्करनालतन्तुमलब्धभो(भा)गो यदिहाग्निदूतः ।
वर्षाणि साहस्रमलक्षितोऽन्तः सञ्चिन्तयन् ब्रह्मवधाद् विमोक्षम् ॥ १५ ॥

सत्यधर्मा – पुष्करनालतन्तुमावसत् । मातरपितरौ तदगाराविति तत्र वासो वासवस्याभिमतः । यत्र पद्मवनानि च तत्र सन्निहितो हरिः । लक्ष्मीः पद्मालया पद्मेत्यादेः । उपान्वध्याङ्वस इति कर्मसंज्ञायां तन्तुमिति द्वितीया । अलब्धभोगोऽप्राप्तस्वापादिसुखः । अग्निदूतमग्निर्दूतो भृत्यो यस्य स तथा । बृहस्पतिप्रार्थनानन्तरमिन्द्रं विचिन्वतोऽग्नेर्दूतत्वं ज्ञेयम् । यथोक्तमुद्योगपर्वणि । हुत्वाग्निं सोऽब्रवीद्राजन्नित्यारभ्याणुमात्रेण वपुषा पद्मतन्त्वाश्रितं प्रभुम् । तथैव महाभोगेत्यारभ्याथ मामस्पृशन्मूर्ध्नि पादेनेत्याद्यन्तरीकृत्य ध्वंसपापपरिभ्रष्टः क्षीणपुण्यो महीतले । दशवर्षसहस्राणि सर्परूपधरो महान् । विचरिष्यसि पूर्णेषु पुनः सर्वमवाप्स्यसीत्यन्तेनागम्योक्त्यनुवादरूपेण । साहस्रं सहस्रमपि साहस्रमिति द्विरूपकोशः । सहस्रवर्षाण्यलक्षितोऽज्ञातोऽन्तर्मनसि ब्रह्मवधात्तदायातपात-कतोऽप्राप्तहविरादिभागः । भाग इति पाठेऽप्यसौ सौभगवहः ॥ १५ ॥

चट्टी – स इन्द्रः । सहस्रवर्षाणि पुष्करनालस्य पद्मनालस्य तन्तुष्ववसत् । उपान्वध्याङ्वस इति तन्तूनां कर्मत्वम् । कथंभूतः । अलब्धो भागो येन सः । कुतः । यद्यस्मादिह जले वसन् । अग्निदूतश्च स्वयमग्निश्च स्वदत्तस्य हविर्भागनेतुर्जले प्रवेशाभावात् । न लब्धभोग इत्यर्थः । पाठान्तरे न लब्धो यज्ञभोगो येन सः । अद्भिर्देवैरलक्षितोऽज्ञातः । देवानामप्शब्दवाच्यत्वं च आप इत्येव देवानां सर्वेषां

प्रददौ हरिः । स्वकीयमेवमन्यानि पृथक् पृथगदात्प्रभुरिति प्रमाणसिद्धम् । अद्भिरावृतत्वादलक्षित इति वा । ब्रह्मवधात्तज्जन्यात्पापाद्विमोक्षं विमोक्षोपायम् ॥ १५ ॥

तावत् त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ।
स सम्पदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चां गतिमिन्द्रपत्न्या ॥ १६ ॥

सत्यधर्मा – किममरराज्यमराजकं जातं किञ्च देवेष्वेवैकः कोऽपि जात उतान्यः कोऽप्यवन्यधीश इत्यत आह ॥ तावदिति । त्रिनाकं तृतीयो नाको न विद्यतेऽकं दुःखं यस्मिन्स पुण्यलोकः स्वर्ग इति यावत् । त्रिशब्दस्य तृतीयार्थता तु त्रिदशपदव्याख्यायां भानुदीक्षितेन तृतीया यौवनाख्या दशा सदा येषां ते । तृतीयार्थता त्रिशब्दस्येत्युक्तम् । तत्त्वसुबोधिन्यां त्रिभाग इतिवत्त्रिशब्दस्य तृतीयार्थकतेत्युक्तेः । तावच्च नाकमिति पाठोऽतिसरलः । आयुकायजो नहुषः तावद्वासवागमनावधि । ननु मनुजतनुजस्य कथं नाकनायकतेत्यतस्तदनुगुणगुणवत्त्वादस्येत्याह ॥ विद्येति । विद्या च तपश्च योगबलं च तैरनुभावः सामर्थ्यं यस्य स तथा । सम्पत्सौभाग्यमैश्वर्यस्वामित्वमेताभ्यां जातो यो मदोऽहङ्कारस्तेनान्धा समीचीना समीचीनरूपिणी बुद्धिर्यस्य स तथा । तत्फलं लपति ॥ नीत इति । तिरश्चां तिर्यग्जन्तूनां गतिं स्थितिमाजगरीमिन्द्रपत्न्या शच्या तत्कामनयेति यावत् । नीतोऽगस्त्यमुखात् ॥ १६ ॥

चट्टी – त्रिनाकं न अकं दुःखं यस्मिन्निति नाकः पुण्यलोको भूलोकापेक्षया तृतीयं स्वर्गलोकम् । त्रिदिवशब्दवदयं शब्दो ज्ञातव्यः । यद्वा । त्रिशब्दवाच्यैर्देवैरधिष्ठितम् । नाकं स्वर्गम् ॥ तदुक्तम् ॥ आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः । मरुतश्चैव विश्वे च साध्याश्चैव तु तद्गताः । अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृता इति स्कान्दे । यद्वा । त्रिनाकं लोकत्रयम् । त्रिशब्दस्थाने चशब्दं केचित्पठन्ति । स चावधारणार्थस्तावदित्यनेन संबध्यते । तावदेवेन्द्रागमनपर्यन्तमेव शशास न सर्वकालमित्यर्थः । यद्वा । नहुष एव शशास न देवाः । तेषां तादृशव्रतसद्भावादित्यर्थः ॥ तथा चोक्तम् ॥ नान्यस्य पदमाप्स्यन्ति तद्देवानां व्रतं परम् । तस्मात्तं नहुषं शक्रपदे निदधुरीश्वरा इति । ननु मनुष्यस्य कुतः स्वर्गराज्यमित्यत आह ॥ विद्येति । विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः । तर्हि तस्मिन्सति कथमिन्द्रस्य पुनः स्वर्गप्राप्तिरित्यत आह ॥ स इति । स नहुषः संपदैश्वर्याभ्यां यो मदस्तेनांधबुद्धिर्यस्य सः । इन्द्रपत्न्या च शच्या तिरश्चां गतिं सर्पयोनिं नीत उपायेन प्रापितः । अत्रेयमनुसन्धेया कथा पौराणिकी बुधैः । कदाचिन्नहुषः प्राह शचीमैश्वर्यगर्वितः । इन्द्रं मां भज कल्याणीत्यथ शच्याऽतिभीतया । समावेदितवृत्तान्तो बृहस्पतिरुवाच तम् । शिबिकां ब्राह्मणैर्वाह्यामारुह्य त्वां समागतम् । भजिष्यामीति तं ब्रूहि ततोऽसौ कुपितैर्द्विजैः । शप्तः पतिष्यति क्षिप्रमित्युक्ता सा ययौ नृपम् । तयोक्तं नहुषः श्रुत्वा प्रतिजग्राह सादरम् । वाहयामास शिबिकामगस्त्यादीन्महामुनीन् । तदा

क्षिप्रं सर्प सर्पेत्यगस्त्यं स्वपदाहनत् । सर्पो भवेति तं शप्तो मुनिना नहुषः क्षणात् । पापात्माऽजगरो भूत्वा जनानां पश्यतामिति ॥ १६ ॥

ततो गतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारितांहः ।
पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपद्या ॥ १७ ॥

सत्यधर्मा – ब्रह्मगिरा बृहस्पतिवचनेन । ब्रह्माऽपि तन्न जानातीति व्याख्यावसरे ब्रह्मा बृहस्पतिरिति गीताभाष्योक्तेः । चतुर्मुखवचनेन वा । यथोक्तं मोक्षधर्मे । पितामहमुपागम्य शिरसा प्रत्यपूजयन् । मुच्यतां त्रिदशेन्द्रोऽसौ मत्प्रियं कुरु भामिनीत्यादि । तदप्यग्निमुखेनेति ज्ञेयम् । ततो मानससरोवरात् ऋतम्भरा ऋतं सत्यं ज्ञानं वा बिभर्तीति स तथा विश्वम्भर इतिवदृतम्भर इति विभागवती संज्ञा । ततश्च संज्ञायां भृतॄयुजीति खच् अरुर्द्विषेति मुम् । तस्य भगवतो ध्यानेन निवारितमंहो यस्य स तथा । हूत आकारितो गतः स्वर्गं प्राप्तः । पूर्वमपि ऋतम्भरध्यानरतमेव तस्येत्यत आह ॥ पापस्तु दिग्देवतयेति । दिग्देवतया रमारूपिण्या । दिशां वत्सं वेदेति छान्दोग्यभाष्ये प्राचीदिक् संस्थितेत्यारभ्य दिङ्नामानश्चैते प्रोक्ता धर्मज्ञानातिदेशनादित्यन्तेनोक्तप्रकारेण दिक्शब्दवाच्यबाहुयुक्ता देवता विष्णुस्तेनेति वा । रूपान्तरात्पृथगुक्तिः । हतमोजो बिडौजसो बाधकं यस्य स पापो ब्रह्महत्या तदन्तर्गतश्च दुरात्मा विष्णुपद्या नाम विष्णुसरोऽन्तर्निविष्टसमपद्या गङ्गया च । अवितं रक्षितमिति तं नाभ्यभूत् नाभ्यभवत् । ब्रह्मगिरा गतः । उपहूतऋतम्भर इत्यादिपदमेकम् । उपहूतो ऋतम्भर इत्युपहूतऋतम्भर ऋतंभर इत्याकारितो नृसिंह इत्यर्थः । ब्रह्म ऋषिरितिवदृत्यक इति प्रकृतिभाव उपहूतऋतम्भर इति भवति । सत्यं विधातुं निजभृत्यभाषितमिति सप्तमोक्तेः । ऋतुम्भर इत्यपि प्रियङ्करपाठः । तृतीयोऽतिशय इत्युक्तेर्ऋत्वित्युक्तिः । अनन्याधीनत्वमतिशयितमृतस्य द्योतयति । उग्र ऊर्ज ऋतुम्भरा इति तन्त्रसारोक्तेः । न च तत्र विनिगमकं किं तत्राप्येवं शक्यं पठितुमिति वाच्यम् । ऋतुं ऋतूपलक्षितकालं बिभर्तीति ऋतुम्भरः ॥ १७ ॥

चट्टी – तत इन्द्रः स्वर्गं गतः प्राप्तः । कथंभूतः । ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः सन् । ऋतंभरध्याननिवारितांहः श्रीहरिः सर्वगत इति प्रल्हादोक्तवचनं सत्यं कर्तुं स्तंभादाविर्भूतत्वादृतंभरः सत्यपालकः श्रीनृसिंहः । तस्य ध्यानेन निवारितमघं येन सः । उपमर्दितप्रारब्ध इत्यर्थः ॥ तथा चोक्तम् ॥ स्मरणात्तु नृसिंहस्य शक्रो मुक्तो बृहद्वधादिति । इन्द्रस्य प्रारब्धोपमर्द एव तदन्यस्याश्लेषात् । श्रेष्ठापराधान्नान्यदोषस्य लेपस्तेजीयसां निर्णयोऽयं हि शास्त्रमित्युक्तेरिति भावेनाह ॥ पापस्त्विति । पापो ब्रह्महत्याभिमानी पुरुषस्तमिन्द्रं नाभ्यभूत्तस्याभिभवं नाकरोत् । कुतः । दिग्देवतया प्रागुदीच्यां दिशि स्थितेन रुद्रेण तदन्तर्यामिणा श्रीनरसिंहेन च । विष्णुपद्या श्रीविष्णुपादावलंबिन्या महालक्ष्म्या मानससरे मिलितया गङ्गया चावितं रक्षितं सन्तमत एव पापपुरुषो हतौजा नष्टबलः ॥ १७ ॥

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ।
यथावद् दीक्षयाञ्चक्रुः पुरुषाराधनेन हि ॥ १८ ॥

सत्यधर्मा – हतौजा इत्येव व्याजहार । तेन न सामस्त्येनास इति पुनः कालान्तरान्तरप्रेप्सुना सुनासीरमुपद्रुत्योपद्रवः क्रियत इत्यत आह ॥ तं चेति । ब्रह्मर्षयो मरीच्याद्याः पुरुषाराधनेन सह हयमेधेन दीक्षां चक्रुः । दीक्षायां चक्रुरिति द्वे पदे । तथाऽपि तुङ्गभद्रेतिवत्संश्लिष्टे पठनीये । तं पातयां प्रथममासेत्यादयोऽपभ्रंशा इति नवीनवैय्याकरणाः । मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वं करोति निश्छिद्रमनुसङ्कीर्तनं तवेत्युक्तेः । पुरुषस्यैतस्य जगतो ह्यग्र आसीन्नारायणः पुरः । एक एव श्रिया सार्धं तमात्मा पुरुषेत्यपि । आहुस्तस्मादिति बृहद्भाष्योक्तेः पुरुषो विष्णुस्तस्याराधनं तेन सहेत्यनेनाहं हि सर्वयज्ञानां भोक्तेत्यादिमानसिद्धत्वमर्थस्य द्योतयति ॥ १८ ॥

चट्टी – अधिकार्युत्तमस्य त्रिलोकरक्षणे भगवता नियुक्तस्येन्द्रस्य तत्कण्टकोद्धारेण पापलेपा-भावेऽपि लोकसङ्ग्रहार्थं तत्प्रायश्चित्तत्वेनाश्वमेधानुष्ठानप्रकारमाह ॥ तमित्यादिना । ब्रह्मर्षयो ब्रह्मज्ञानसंपन्नाः । मुनयः । ब्रह्मपदस्य ऋषिपदेन संध्यभावो वा । तत्सद्भावेऽपि तत्सप्ताक्षरपादत्वं छान्दसम् । न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामिति श्रुतेः । पुरुषस्य हरेराधानं यस्मिन् ॥ १८ ॥

अथेज्यमाने पुरुषे सर्वदेवमयात्मनि ।
अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥ १९ ॥

सत्यधर्मा – सर्वदेवमयात्मनि सर्वदेवमयः सर्वदेवप्रधानश्चात्मान्तर्यामी चेति स तथा तस्मिन्निज्यमाने ब्रह्मादिभिः कारयितृभिर्महेन्द्रेण विततेऽश्वमेधे ॥ १९ ॥

चट्टी – सर्वदेवानां प्रधानश्चान्तर्यामी च तस्मिन् । मयं प्रधानमुद्दिष्टमिति वचनात् । सर्वभूतमयात्मनीति पाठेप्ययमेवार्थः । ब्रह्मवादिभिर्विततेऽनुष्ठितेऽश्वमेधे महेन्द्रेणेज्यमाने पुरुषे सति ॥ १९ ॥

स वै त्वाष्ट्रवधो भूयानपि पापः परन्तप ।
नीतस्तेनैव शून्याय नीहार इव भानुना ॥ २० ॥

सत्यधर्मा – स वै त्वाष्ट्रवधो भूयान् पापस्तत्फललक्षणस्तेनैव मखेनैव पुरुषाराधनेनैव शून्याय नष्ट इति वाच्यत्वाय नीतः ॥ २० ॥

चट्टी – तेनैव पुरुषेणैव । शून्याय नीतो नाशित इत्यर्थः ॥ २० ॥

स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ।
दृष्ट्वाऽपि यज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः ॥ २१ ॥

सत्यधर्मा – अपरोक्षज्ञानिनां ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेत्याद्युक्तेर्नाविने सवनाद्युपयुक्तमित्यतः सत्यम् । तथाऽपि भाव्यानन्दोन्नाहादिहेतुरिति तत्कर्तव्यताऽऽवश्यकीति वक्ति ॥ स इति । मरीचिमिश्रैस्तन्मिलितैरज्ञैर्यज्ञं पुरुषं पुराणं दृष्ट्वेन्द्रो विधूतपापो महान् ज्ञानादिनाऽस । नैक एवेन्द्रः स्वार्थं ततान यज्ञादिकं किन्तु लोकोपकृत्यै इति मरीचिमिश्रैरित्युक्तम् । महान्तोऽनुष्ठितं तथैवानुष्ठापितवन्तश्चेति लोका इतरेऽध्वरे रता भवन्त्यतो लोकोपकारः सम्पादितो भवतीति भावः । तद्गर्भितवृत्रगीता इत्येतद्वृत्रमाश्रित्य शक्रस्यात्यद्भुतं महत्कथितं कर्म ते तात किं भूयः श्रोतुमिच्छसीत्यन्तग्रन्थकथितकथा चैतदनुरूपिणी कल्पभेदसमाधेयेति मन्तव्यं धन्या धन्या इति इतीत्यारभ्य मोक्षधर्मे ॥ २१ ॥

चट्टी – मरीचिमिश्रैर्मरीचिमुख्यैः । अधियज्ञं सर्वयज्ञाभिमान्युत्कृष्टत्वप्रवर्तकत्वादेरधियज्ञ-शब्दवाच्यम् । सर्वान्तर्यामिणम् । प्राणिनां देहगो विष्णुरधियज्ञ इतीरित इति वचनात् । नात्राव्ययीभावः किंत्वधिगतो यज्ञमिति प्रादिसमासः । अधिष्ठितो यज्ञोऽनेनेति बहुव्रीहिर्वा । अतो न कश्चित्क्षुद्रोपद्रव इति बोध्यम् । इन्द्रो महानासेत्यनेन इन्द्रो वै वृत्रं हत्वा महानभवदित्यादिश्रुतिरुक्तार्थसंवादिनीति सूचयति ॥ २१ ॥

इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ।
भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥

सत्यधर्मा – मखमुखाचरणाक्षमाणामप्येतन्मात्रेणालमिति विधत्ते ॥ इदमिति । अशेषपाप्मनां ब्रह्महत्यादिमहापापानां प्रक्षालनं मार्जकमिदं महाख्यानं तीर्थपदस्य भगवतोऽनुकीर्तनं स्मरणं यस्मिंस्तत् । भक्त्युच्छ्रयं भक्तेरुच्छ्रयो येन तत् । भक्तजनानामप्यनुवर्णनं यस्मिंस्तत् । महेन्द्रस्य मोक्षो ब्रह्महत्यातो यस्मिंस्तत् । तथा मरुत्वत इन्द्रस्य विजये विशिष्टो जयो वृत्रजयो यस्मिंस्तत् ॥ २२ ॥

चट्टी – पाठादि विधातुमाख्यानं स्तौति ॥ इदमिति । प्रक्षाल्यतेऽनेनेति प्रक्षालनम् । तीर्थपदस्यानुकीर्तनं यस्मिन् । भक्तेरुच्छ्रयो यस्मिन् यस्माद्वा भक्तजनानामनुवर्णनं यस्मिन् । महेन्द्रस्य मोक्षः । मरुत्वतः इन्द्रस्य विशेषेण जयः यस्मिन् ॥ २२ ॥

पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम् ।
धन्यं यशस्यं निखिलाघमोचनं रिपुञ्जयं स्वस्त्ययनं यथाऽऽयुषम् ॥ २३ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे त्रयोदशोऽध्यायः ।

सत्यधर्मा – इदमपेक्षितदं धन्यं धनदं यशस्यं तत्प्रदं निखिलाघमोचनं समस्तपापमोचकं खिलं दुर्बलं न भवतीति निखिलं च तदघं तन्मोचकं वा । रिपुञ्जयं छान्दसः खश् द्वितीयाया अलुग्वा । शत्रुजयदं स्वस्त्ययनं मङ्गलमोक्षाद्यायतनमायुषं आ आयुषा नित्यायुर्मोक्षो यस्मात्तत् । आयुषं टाबन्तता हलन्तत्वात् ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे त्रयोदशोऽध्यायः ॥ ६-१३ ॥

चट्टी – इन्द्रियं तत्पाटवकरम् । इन्द्रियसंबन्धीति वा । आयुषमायुष्यम् । अनेनेन्द्रोपाख्यानश्रोतॄणामपि सर्वानिष्टनिवृत्त्युक्तत्वान्महात्मन इन्द्रस्य न पापलेपोऽस्ति । किन्तु लोकसङ्ग्रहायैव प्रायश्चित्तानुष्ठानमित्येतद्दृढीकृतं वेदितव्यम् ॥ तथा चोक्तिः । इन्द्रोऽप्यवाप स्वस्थानमिष्ट्वा विष्णुं विपापकः । धर्मवृध्यर्थमेवैतत्पापमासीच्छचीपतेः । न हि लोका वनं प्राप्तं त्रैलोकेशस्य वज्रिणः । वृत्रं हत्वा महानासेत्यादि वेदपदं च यत् । क्वचित्पापं च पुण्यानां वृद्धये भवति स्फुटम् । वृत्रं हत्वा यथेन्द्रस्य जना धर्माभिवृद्धये । देवानां वा मुनीनां वा भवेदेवं न वै नृणाम् । पापं यत्पुण्यमेतच्चासुराणां विलोमतः । एवं हि स्कान्दवचनं न पापं तच्छचीपतेरिति ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ ६-१३ ॥

अथ चतुर्दशोऽध्यायः ।

परीक्षिदुवाच
रजस्तमस्स्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः ।
नारायणे भगवति कथमासीद् दृढा रतिः ॥ १ ॥

सत्यधर्मा – ॥ हरिः ॐ ॥ अत्र श्रोत्रपुटीसम्भृतवृत्रचरित्रो गोत्रातो निस्सारसंसारहारिकंसारिचरणनलिनयुगलभक्तियुक्तः कथमभूदयमभूतपूर्वेयं रीतिरिति स्वयमयं न तथाविध इति जानन्नपि स्वसमीपोपासीनदीनजनमन्दारस्तत्सन्देहमुद्धृत्योत्तरं वाचयितुं वाचं यमं पृच्छत्यतुच्छहृदय इति वदति ॥

परीक्षिदिति । पाप्मनः पापिष्ठस्य । अथवा पाप्मनः पापात्कारणाद्रजस्तमःस्वभावस्येति ज्ञानस्य । दृढा रतिर्निश्चला भक्तिः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ चित्रकेतुप्रसङ्गोक्तिरितोऽध्यायचतुष्टये । पुत्रादिममता चित्रकेतोरिव शुचां पदम् ॥ तस्माद्बुभूषुणा त्याज्येत्यध्यायेऽस्मिन्निरूप्यते । नन्वहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूय इत्यादिवृत्रवाक्यपर्यालोचनया तस्य भगवद्भक्तत्वं प्रतीयते । भक्तत्वं च द्विविधम् । नारायणायनत्वं नारायणपरायणत्वं चेति । वृत्रस्यासुरजातित्वेन नोभयमपि संभवतीति भावेन राजा पृच्छति ॥ रजस्तमःस्वभावस्येति सप्तभिः । तत्र तावन्नारायणपरायणत्वासंभवं कैमुत्येनाह द्वाभ्याम् । शुद्धं सत्त्वं शरीरोपादानत्वेन येषामत एवामलात्मनामदुष्टमनसामेतादृशानामपि देवाना-मृषीणां च मुकुन्दचरणे भक्तिर्नारायणपरयणत्वं नोपजायते । ब्रह्मादीनां केषाञ्चिन्नारायणपरायण-त्वात्तद्व्यावृत्त्यर्थम् प्रायेणेति । रजस्तमःस्वभावो यस्यासुरजातेरित्यर्थः । अत एव पाप्मनो दुष्टस्य वृत्रस्य नारायणे दृढा रतिरखण्डितभक्तिः । नारायणपरायणत्वं कथमभूत् । न युज्यत इत्यर्थः ॥ १ ॥

देवानां शुद्धसत्वानामृषीणां चामलात्मनाम् ।
भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ २ ॥

सत्यधर्मा – देवादीनामपि सा दुर्लभा किम्वस्येत्याह ॥ देवानामिति । स भगवानिति श्रीभगवत्पादोक्तेः । वा इत्यनेनैतदादिप्रसिद्धिमवगमयति । शुद्धसत्त्वानाममलात्मनामिति देवर्ष्यन्वयि । शुद्धप्रकृतीनां निर्दुष्टमनसां देवानामृषीणां मुकुन्दचरणे प्रायेण बाहुल्येन भूयसीति यावत् । रतिर्नोपजायते सैतस्य कथमभूत् । यद्वा देवादीनां भक्तिरुपजायते न तद्वत्कथं दृढा रतिरासीदित्यन्वयः । चक्रं न वृत्तमित्यत्रेव वाऽर्थ इति तद्वदित्युपपद्यते । उत्तरत्रोच्यमानोत्तररुच्युत्पादनार्थं वाऽतिचित्रताप्रदर्शनार्थं वेति प्रायेणेत्युक्त्यभिप्रायो ज्ञेयः ॥ २ ॥

रजोभिस्समसंख्याताः पार्थिवैरिह जन्तवः ।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ॥ ३ ॥

सत्यधर्मा – पार्थिवै रजोभिरिह कर्मभूमौ जन्तवः प्राणिनः ख्याता यावन्ति भूमे रजांसि तावन्तो जन्तवः । अथवा रजःशब्देन परमाणवो गृह्यन्ते । पार्थिवशब्दोऽप्युपलक्षणयाऽऽप्यादिपरो व्याक्रियते । ततश्च सर्वपरमाणुभिर्गणितैर्या तदीया सङ्ख्या तदपेक्षया समत्यन्तमसङ्ख्याता जन्तवः सृष्टाः सृज्याश्चेह सृष्टेषु मनुजादयः श्रेयः क्षेमं स्वर्गादिकं वोद्दिश्येहन्ते चेष्टन्ते । तेषां मध्ये केचनाल्पीयांस एव । परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशय इत्याम्नाताः सदेहाः । अतीतानागताश्चैव यावन्तः परमाणवः ।

ततोऽप्यनन्तगुणिता जीवानां राशयः पृथगितीरिताश्च निश्शरीरजीवराशय इति विवेकः । निर्देहकान् ॥ ३ ॥

चट्टी – नारायणपरायणत्वाभावेऽपि नारायणायनत्वं भविष्यतीत्याशङ्क्य नारायणपरायणत्ववत्तदपि दुर्लभमित्याह ॥ रजोभिरिति त्रिभिः । पार्थिवै रजोभिः परमाणुभिः समा असंख्याता अनन्ता इत्यर्थः । जन्तवो जीवास्तेषां मध्ये ये केचन कतिपया मनुजादय एव श्रेयो धर्ममीहन्ते कुर्वन्ति । असुरादीनां धर्मविमुखत्वादिति भावः ॥ ३ ॥

प्रायो मुमुक्षवस्तेषां केचनेह द्विजोत्तमाः ।
मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिद्ध्यति ॥ ४ ॥

सत्यधर्मा – तेषां मध्ये केचन केऽपि द्विजोत्तमा इह संसारे मुमुक्षवः । मुमुक्षूणां सहस्रेषु कश्चिदेव सिध्यति ज्ञानी भवति । अथ च मुच्यते । यद्वा मुच्येत । लिङ्गशरीरानन्तरं सिध्यति राद्धो भवति आविर्भूतस्वरूपानन्दो भवति । सिध्यति सहस्रेष्वित्यनेन मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धय इति स्मारयति ॥ ४ ॥

चट्टी – प्रायो मुमुक्षव इत्यत्र स आत्मा तत्त्वमसीत्यत्रेवाकारप्रश्लेषेणापि पदच्छेदोऽभिप्रेतः । मुमुक्षुशब्देन चापरोक्षज्ञानित्वलक्षणजीवन्मुक्तीच्छा विवक्षिता । ततश्चायमर्थः । तेषां मनुजादीनां मध्येऽमुमुक्षवः प्रायो बाहुल्येनामुमुक्षवस्तु केचनैव । मनुजानां प्रायः प्रवृत्तिधर्मरुचित्वादिति भावः । मुमुक्षूणां जीवन्मुक्तेच्छूनां सहस्रेषु केचिदेव प्रयतंते । प्रयतमानेष्वपीति वाक्यशेषः । कश्चिदेव मुच्यते जीवन्मुक्तो भवति ॥ ४ ॥

मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥ ५ ॥

वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ।
इत्थं दृढमतिः कृष्ण आसीत् संग्राम उल्बणे ॥ ६ ॥

तात्पर्यम् – 'नवकोट्यस्तु देवानामृषयः शतकोटयः । नारायणायनाः सर्वे ये केचित्तत्परायणा' इति च । 'नारायणायना देवा ऋष्याद्यास्तत्परायणाः । ब्रह्माद्याः केचनैव स्युः सिद्धो योग्यसुखं लभन्नि'ति तन्त्रभागवते ॥ ५ ॥

सत्यधर्मा – मुक्तानामपि सिद्धानामिति पद्ये मुक्तानामप्युक्तनारायणत्वमिति भ्रमभ्रंशं प्रमाणेन करोति ॥ नवकोट्यस्त्विति । सर्व इत्येते नारायणायना नारायणोऽयनमाश्रयो येषां ते तथा । ये

केचित्तत्परायणाः स परं मुख्यमयनं येषां ते तथा परशुक्लादिवाच्याः । प्रमाणान्तरेणाधिकारिविशेष-व्यवस्थापकेन श्लोकं प्रकारान्तरेण योजयति ।। नारायणायना इति । देवऋष्याद्या नारायणायना ब्रह्माद्यास्तत्परायणाः सांसारिक्यां दशायामपि । अन्यस्तु योग्यं स्वरूपभूतं सुखं लभन् लभमानः सिद्ध इत्युच्यत इति तत्त्रैविध्यं ज्ञेयम् । एकवचनं च परममुख्यया ब्रह्मविवक्षया । ते सिद्धा अपि तरतमभावेन भूयांस इति ज्ञेयम् । प्रकृतमनुसरति । उल्बणे सङ्ग्रामे सकलविस्मारकरक्षणक्षणे इत्थं एवमुक्तप्रकारेण दृढमतिः । बहुव्रीहिः । कथमासीदिति ।। ५,६ ।।

चट्टी – मुक्तानां जीवन्मुक्तानां सर्वेषामपि सिद्ध्यति । सिद्धिपदोदिता स्वयोग्यानन्दप्राप्तिलक्षणा मुक्तिर्भवति । सिद्धिं गताः सर्वेऽपि नारायणायनाः । शान्तात्मानश्चेति मध्ये ग्राह्यम् । प्रेत्युपसर्ग-स्वारस्यात् । नारायणविषयकमयनं ज्ञानं येषां ते तथोक्ताः । शान्तो भक्तिपूर्णः । आत्मा मनो येषां ते तथोक्ता इत्यर्थः । सिद्धानामुक्तविशेषणद्वयोपेतमुक्तानां कोटिष्वपि नारायणपरायणः प्रशान्तात्मा सुदुर्लभः । कश्चिदेव ब्रह्माद्याः केचिदेव नारायणपरायणाः प्राशान्तात्मानश्चेति यावत् ।। तथा चोक्तं गीतायाम् ।। मनुष्याणां सहस्रेषु कश्चिद्यततीत्यादि ।। ब्राह्मे च ।। अनन्तानां तु जीवानां यतन्त केचिदेव तु । मुक्त्यै तेषु च मुच्यन्ते केचिन्मुक्तेषुच स्फुटम् । केचनैव हरिं सम्यग्ब्रह्मरुद्रादयो विदुः । अन्येषां यावता मुक्तिस्तावज्ज्ञानं हरौ परमिति ।। सत्तत्त्वे च ।। सर्वे मुक्ता हरौ भक्तास्तेषु ब्रह्मैव मुख्यतः । विष्णोः परमभक्तस्तु तस्माज्जीवघनो मत इति ।। तात्पर्ये च ।। नवकोट्यस्तु देवानामित्यादि । नारायणायना देवा इत्यादि । एतन्निर्धार्य मनसि निधायैव व्याख्यातं च गीतातात्पर्यटीकायां जयतीर्थचरणैः । जीवन्मुक्तानां सर्वेषामपि सिद्धिपदोदिता मुक्तिर्भवति । सिद्धिं गताः सर्वेऽपि नारायणायनास्तज्ज्ञानादिमत्त्वात् । नारायणपरायणस्तु सुदुर्लभ इत्यर्थः । अनुव्याख्याने मुक्तानां वैराग्यभक्त्यादिसाधनतारतम्यपरत्वेनोदाहृतोऽयं श्लोकः सुधायां प्रकारान्तरेण व्याख्यातः । मुक्तानां शरीराद्यभिमानरहितानां सिद्धानां ज्ञानिनां कोटिष्वपि नारायणपरायणः प्रशान्तात्मा सुदुर्लभः कश्चिदेव । नारायणायनाः शान्तात्मानस्तु सर्वेऽपीति स्फुटं तारतम्यं प्रतीयते । अत्र विशेषणद्वयेन वैराग्यभक्ती कथ्येते इति ।। सन्न्यायरत्नावल्यां तु । मुक्तानां मध्ये ये उद्योगातिशयेन सम्यगाविर्भूत-स्वयोग्यानन्दसिद्धास्तेषां कोटिष्वपि नारायणैकायनत्वेन नारायणपरायणो यः सुदुर्लभः स च ब्रह्मादिरेव भवितुमर्हति । अन्ये तु नारायणायना एव । एषः श्लोको जीवन्मुक्तानामपि ज्ञानादीनां तारतम्यप्रतिपादकत्वेन योजितव्य इति । अत्र गतासूनगतासूंश्च नानुशोचन्ति पण्डिता इतिवद्यथा सिद्धेषु नारायणपरायणो दुर्लभः । एवं चेतनेषु नारायणायनोऽपि दुर्लभ इति बुद्ध्या विविच्य दृष्टान्तदार्ष्टान्तिकभावेन व्याख्येयम् । अन्यथा देवानामिति श्लोकेनैव नारायणपरायणदौर्लभ्यस्योक्तत्वेन पौनरुक्त्यापातात् । प्रकृतानुपयोगाच्च ।। उपसंहरति ।। वृत्र इति । तुशब्देनात्यन्तानुपपत्तिं सूचयति ।

तामेवाह ।। पाप इत्यादिविशेषणद्वयेन । दृढमतित्वोपपादनार्थमुल्बणे सङ्ग्रामे इति । अल्पाधिकारिणो महापदि भगवद्विस्मरणसंभवादिति भावः ।। ५-६ ।।

अत्र नः संशयो भूयान् श्रोतुं कौतूहलं प्रभो ।
यः पौरुषेण समरे सहस्राक्षमतोषयत् ।। ७ ।।

सत्यधर्मा – नोऽस्मदादीनां भूयान्संशयस्ततः श्रोतुं कौतूहलं कौतुकम् । कौतूहलं कौतुकं च कुतुकं च कुतूहलमित्यमरः । तदेवाश्चर्यतः पुनरेव वदति ।। य इति । यः पौरुषेण भगवत्स्तोत्रेण समरे युद्धे सहस्राक्षं सहस्रनेत्रं बहुज्ञमिति च कटाक्षयति । अतोषयत्तोषयामास । स च गतालीकमपूजयदित्यादि तद्भाषणेनैव ज्ञायते ।। ७ ।।

चट्टी – न चेन्द्रभिया श्रीकृष्णं शरणं गत इत्याह । पौरुषेण पराक्रमेण । यद्वा । परमात्मविषयकस्नेहेन । अहो दानव सिद्धोऽसीत्युक्तत्वात् । वृत्रस्य शापवशेनासुरदेहस्य संभवेऽपि स्वभावतो देवत्वेन नारायणायनत्वलक्षणं भक्तत्वं युज्यत एव ।। ७ ।।

सूत उवाच
परीक्षितोऽथ संप्रश्नं भगवान् बादरायणिः ।
निशम्य श्रद्दधानस्य प्रतिनन्द्य वचोऽब्रवीत् ।। ८ ।।

सत्यधर्मा – श्रद्दधानस्य परीक्षित इति सामानाधिकरण्यम् । प्रतिनन्द्य बहुसमीचीनमित्यनुमोद्य ।। ८ ।।

श्रीशुक उवाच
शृणुष्वावहितो राजन्नितिहासं पुरातनम् ।
श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ।। ९ ।।

सत्यधर्मा – पुरातनं श्रवणमात्रेण दुर्गात्रिगमकं द्वैपायनमुखान्नारदादेवलादपि । झडिति न विश्वासो भवेदतो गहनप्रमेय इति स्वबोधकत्रयोक्तिः ।। ९ ।।

चट्टी – देवाः शापाभिभूतत्वात्प्रल्हादाद्या बभूविरे । अतस्तद्वतिरेतेषां नान्यथा व्यत्ययो भवेदित्याशयवान् शुकस्तस्य पूर्वजन्मवृत्तान्तमाह ।। शृणुष्वेत्यादिना । यथा यथावत् श्रुतं ।। ९,१० ।।

आसीद् राजा सार्वभौमः शूरसेनेषु वै नृप ।
चित्रकेतुरिति ख्यातो यस्यासीत् कामधुङ् मही ।। १० ।।

सत्यधर्मा – शूरसेनेषु देशविशेषेषु । कामं दोग्धीति सा तथा ॥ १० ॥

तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ।
सान्तानिकश्चापि नृपो न लेभे तासु सन्ततिम् ॥ ११ ॥

सत्यधर्मा – भार्यासहस्राणां सहस्राणि दश कोट्यभवन् । सान्तानिकः सन्तानेच्छुश्चेदपि तास्वेतत्सङ्ख्यासु सन्ततिं न लेभे नाप ॥ ११ ॥

चट्टी – भार्यासहस्राणां दशसहस्राणि कोटिरित्यर्थः । सान्तानिकः स्वयं सन्तानार्होऽपि तासु सन्ततिं न लेभे । सर्वास्ता वंध्या एव । दैवयोगेन मिलिता इति भावः ॥ ११ ॥

रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ।
सम्पन्नस्य गुणैस्सर्वैश्चिन्ता वन्ध्यापतेरभूत् ॥ १२ ॥

सत्यधर्मा – चिन्ताऽभूत् । अनेनैतावद्गुणजातमकिञ्चित्करं नरवरस्येति भावः सूच्यते । श्रियादिभिः यणागमः ॥ १२ ॥

चट्टी – तदेवाह ॥ वन्ध्यापतेरिति ॥ १२,१३,१४ ॥

न तस्य सम्पदः सर्वा महिष्यो वामलोचनाः ।
सार्वभौमस्य भूश्चेयं नाभूवन् प्रीतिहेतवः ॥ १३ ॥

सत्यधर्मा – ता भवन्प्रीतिहेतव इति पाठे नतस्य सर्वनमस्कृतस्येत्यर्थः । भूश्चेयमभवन्निति पाठे न व्याख्यापनम् ॥ १३ ॥

तस्यैकदा तु भवनमङ्गिरा भगवान् ऋषिः ।
लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥

सत्यधर्मा – यदृच्छया यदृच्छा तु तदिच्छा स्यादित्युक्तेर्भागवतेच्छया ॥ १४ ॥

तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ।
कृतातिथ्यमुपासीदत् सुखासीनं समाहितः ॥ १५ ॥

सत्यधर्मा – समाहित एकाग्रचित्त उपासीदत् उपोपविष्टोऽभूत् । समं सर्वं पूर्वोदीरितमहित-मसन्तोषदं यस्येति वा ॥ १५ ॥

चट्टी – उपासीदत्तत्समीपे उपविवेश। समाहित:संशयत: ॥ १५ ॥

महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ।
प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥ १६ ॥

सत्यधर्मा – प्रतिपूज्य राज्ञोऽपि प्राज्ञागमने प्रवणतादिगुण इयानहो इति सम्मान्य ॥ १६ ॥

अङ्गीरा उवाच
अपि तेऽनामयं स्वस्ति प्रकृतीनां तथाऽऽत्मनः ।
यथा प्रकृतिभिर्गुप्तः पुमान् राजा च सप्तभिः ॥ १७ ॥

आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ।
राज्ञस्तथाप्रकृतयो नरदेवाहितादयः ॥ १८ ॥

सत्यधर्मा – तपोबलेनावलोकितलोकवृत्तान्तोऽप्यङ्गिरा गिरं श्रोतुमना अनामयमादौ पृच्छति ॥ अपीति । अपिरयं कच्चिदर्थे । अपिः सम्भावनाप्रश्न इति विश्वः । अनामयं नीरोगता स्वस्ति क्षेमो मङ्गलम् । स्वस्तीत्यावर्तिते सु अस्तीति छेदः । सम्यगस्ति किमित्यर्थः । आत्मनस्तथा प्रकृतीनां चानामयं स्वस्तिता चास्तीति किमित्यर्थः । ताश्च स्वस्तिप्राप्तिर्जनपदो दुर्गं द्रविणसञ्चयः । दण्डो मैत्रीति सप्तैतास्तस्य प्रकृतयो मता इति स्मृता ग्राह्याः । त आत्मनस्तव मनसः प्रकृतीनां मनस इति वा। प्रस्तुतं मामेव स्तुत्यप्रकृतप्रकृतिविचारेण किमङ्गिरा इत्यत ईरयति ॥ यथेति । अनेनान्त-रङ्गतोऽङ्गिराः कार्यकारणशब्दानां गोभिः श्रिणीतमत्सरमित्यादौ सङ्कीर्णतया प्रकृतिपदेन भूतपञ्चकं महानहङ्कारश्चेति द्वयमाहत्य सप्तभिः प्रकृतिभिर्गुप्तं पुमान् जीवः । तास्वेव प्रकृतिष्वात्मानमद्धानिधाय तत्तज्ज्ञातस्य तत्र प्रवेश इति चिन्तनपूर्वकं निधाय श्रेयस्तन्मोक्षानन्तरिकमोक्षरूपमङ्गलं प्राप्नोति यथा तथा राजा सप्तभिः प्रकृतिभिर्गुप्तस्तास्वद्धा विश्वासपूर्वकमात्मानं मनो निधाय श्रेय आप्नुयादिति दृष्टान्तदार्ष्टान्तिकभावमभिप्रैति । त एवावमानिता मानवाधीशा हिताय घटन्त इति सङ्ग्राह्या इत्याह ॥ राज्ञ इति । अप्रकृतय इति । न विद्यते प्रकृतिः स्वभावः प्राग्वदेषां तथा मनोविषादादिमन्त इति यावत् । हे नरदेव राज्ञ अद्धा निधायालोचनसूचनादिभिर्द्वेषपदे स्वयमहितादयोऽहितस्यादयोऽकारणानि भवन्ति तथा प्रकृतयो यथा वर्तितव्यं तादृशस्वभावश्चेद्राज्ञोऽद्धा कदाऽपि न प्रवचनमेव निधाय कारागारं नरदेव आहितादयस्तदा सम्यग्घितकारणानि भवन्ति । अतोऽग्रत एव जाग्रता राज्ञा भवितव्यमित्यन्व-शाशदित्याशयः ॥ १७, १८ ॥

चट्टी – तथाशब्दः समुच्चये। ते तवात्मनो भवतः प्रकृतीनां चानामयमारोग्यं स्वस्ति शुभम् । अपि किं प्रकृतिविषयककुशलप्रश्नेन किं प्रयोजनमित्याशङ्क्य प्रकृत्यधीनमेव हि राज्यमिति सदृष्टान्तमाह ॥

यथेति । यथा महदहंकारपृथिव्यादिभिः सप्तभिः पुमान् जीवो नित्यं गुप्तो भवति । न तु तद्व्यतिरेकेण क्षणमपि तिष्ठति । एवं राजा च । सप्तभिः स्वाम्यामात्यो जनपदं दुर्गं द्रविणसंचयः । दण्डो मित्रं च तस्यैता सप्तप्रकृतयो मता इत्युक्तलक्षणाभिर्नित्यं गुप्तः सन् । आत्मानं प्रकृतिष्वद्धा साक्षान्निधाय तदन्तर्वर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः । स्वामी गुरुः स्वयं वा मन्त्रसहायो मन्त्री कर्मसहाय अमात्य इति भेदः ॥ प्रकृतीनामपि राजानुवर्तनमेव श्रेयः साधनमित्याह ॥ राज्ञ इति । हे नरदेव प्रकृतयोऽपि राज्ञ आसमन्तात्प्रीतिहेतवो भवन्ति चेच्छ्रेयः। आप्नुयुरित्यस्यानु-कर्षणार्थस्तथाशब्दः ॥ १७, १८ ॥

अपि दाराः सुतामात्या भृत्याः श्रेण्योऽथ मन्त्रिणः ।
पौरा जानपदा भूपा आत्मा च वशवर्तिनः ॥ १९ ॥

सत्यधर्मा – दाराः पत्न्यः सुता अपत्यानि अमात्या मन्त्रिण श्रेण्यश्चेति तद्विशेषा भूपाः समीपवर्तिनो राजान आत्मा मनो देहश्च । अचाञ्चल्येन नीरोगतया चैते वशवर्तिनः किम् । सुत इति कथने एकस्य सुतस्य भविष्यत्त्वेऽपि न बहवः सूनवो मम भूयासुर्ऋषेर्वृथा भाषित्वादिति मनुयान्मनु-जेन्द्र इति सोऽङ्गिराः सुतश्चामात्याश्चेति विग्रहमर्हीं रचयन् जागर्ति । अन्यथा सुता अमात्या इत्यवक्ष्यत् ॥ १९ ॥

चट्टी – दाराश्च सुताश्च अमात्याश्च श्रेण्यो राज्ञः समानवयसः श्रेणयस्त्वंगरक्षका इत्युक्तलक्षणाः पौराः पुरवासिनः । जनपदस्तत्तद्देशाधिकारिणः । आत्मा मनः ।

यस्यात्माऽनुवशश्चेत् स्यात् सर्वे तद्वशगा इमे ।
लोकाः सपाला यच्छन्ति सर्वे बलिमतन्द्रिताः ॥ २० ॥

आत्मनः प्रीतयेऽप्यात्मा परतः स्वत एव वा ।
लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ॥ २१ ॥

सत्यधर्मा – यस्येति सामान्यवचनेन सर्वे हिंसायां प्राप्तायां तद्वशगा नु निश्चयेन । सपालाः संसंरक्षकाः सर्वे समस्ता बलिं यच्छन्ति । अतन्द्रिता अनालस्याः । स्वतः प्रीतये वा परत इतरतो वाऽऽत्मनः स्वस्यात्मा मन एव कारणम् । नापणिका इव क्रय्यप्रसारकाज्ञानिनो ज्ञानेनाच्छाद्य पृच्छन्तीति द्योतयितुमूह्यामुवाहेत्याह ॥ लक्षय इति । चिन्तया यतो मुखं शबलं स्वतो गौरवाधिकपाण्डुरतया श्यामतया वा मिश्रमिति शबलम् । कल्माषशबलता च कर्बुर इत्यमरः । इत्यलब्धकाममप्राप्तवाञ्छितं लक्षये ऊहयामि ॥ २०, २१ ॥

चट्टी – एते सर्वे वशवर्तिनोऽपि मनोजयप्रश्ने किं कारणमित्यत आह ॥ यस्येति । यस्यात्मा मनोऽनुवशोऽनुवर्ति अधीनं स्यात्तथा चेत् । इमे सर्वे तस्य वशगा भवन्ति । क्रोधलोभाद्यभिभूतत्वेन मनोजयशून्यस्य सर्वे भूत्यादयः प्रतिकूला भवन्तीति भावः । किञ्च सपालाः साधिपतयः । लोकाः प्रजा अतन्द्रिता अप्रमुक्ताः सन्तस्तस्य बलिं करं प्रयच्छन्ति । आत्मा भवान् आत्मनो न प्रीतये भवति न तुष्यति । तत्किं परतो वा स्वतो वा किञ्चालब्धकामं त्वां लक्षये । कुतः । येन चिन्तया शबलं विच्छावं मुखं लक्षये ॥ २१ ॥

श्रीशुक उवाच–
एवं विकल्पितो राजन् विदुषा मुनिनाऽपि सः ।
प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ॥ २२ ॥

सत्यधर्मा – किं मन्दाक्षतो नावादीत्किंवाऽवसरभणिता वाणीति वाण्या किञ्चिदुदञ्चितवान्वाञ्छितमिति परीक्षकपरीक्षितं पक्षं द्वितीयं कटाक्षयञ्छुको वदति ॥ एवमिति । अभ्याह तद्विकल्पमभ्युत्तरत्वेनाह । मुनिं तावदुक्त्वा तूष्णीकं एवं वक्ष्यमाणरीत्या ॥ २२ ॥

चट्टी – विदुषा सर्वज्ञेनापि त्वया विकल्पितः पृष्ठः ॥ २२ ॥

चित्रकेतुरुवाच–
भगवन् किं न विदितं तपोज्ञानसमाधिभिः ।
योगिनां ध्वस्तपापानां बहिरन्तः शरीरिषु ॥ २३ ॥

सत्यधर्मा – शरीरिषु देहिषु तन्मध्य इति यावत् । ध्वस्तपापानामतीतानागतानामिति प्रतिबन्धकरहितानां योगिनामुपाययुजां तपोज्ञानसमाधिभिः । तपः कृच्छ्रचान्द्रायणादिकमालोचनं वा समाधिश्चित्तैकाग्र्यं ज्ञानं तत्साधनमेतैः करणैर्बहिरन्तः किं विदितं न सर्वं विदितमेव । भगवन्निति पूजार्थः । अथवा शरीरिषु मदादिषु बहिरन्तश्च विद्यमानं किन्न विदितमित्यन्वयः । हे तपोज्ञान तपसेव ज्ञानं यस्य । अनेनान्तः किन्न विदितं समाधिभिर्मन्मथोव्यथाभिर्बहिरूहितैः किन्न विदितमिति वा ॥ २३ ॥

चट्टी – अलब्धकामत्वं कथयन् पुत्रं याचते ॥ भगवन्निति चतुर्भिः ॥ २३ ॥

तथाऽपि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिन्तितम् ।
भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥

सत्यधर्मा – भवतो विदुषः पृच्छत आत्मनि मनसि यच्चिन्तितम् । तथाऽपि विदितत्वेऽपि लोकमनुकुर्वतस्तव त्वदनुज्ञया ब्रूयामित्यन्वयः । आतुरतया भवतो विदुषश्चर्येति पुनर्वचनम् । भवतः संसारात्पारमिति शेषः । अविदुषो ममात्मनि किमिति पृच्छतस्तव त्वया चिन्तितमेव ब्रूयामिति वा ॥ २४ ॥

चट्टी – आत्मनि मनसि ॥ २४ ॥

लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः ।
न नन्दयन्त्यप्रजं मां क्षुत्तृट्क्षाममिवापरे ॥ २५ ॥

सत्यधर्मा – न नन्दयन्ति न सुखयन्ति । अप्रजामित्यनेन पुत्राच्छतगुणन्यान्येन च कन्योदिता बत कुलद्वयतारिणीति स्त्र्यपत्यमपि नास्तीति ध्वनयति । नित्यमसिच् प्रजामेधयोरिति तु समासान्तविधेरनित्यत्वान्न प्रवृत्तमिति ज्ञेयम् । प्रजा अस्यास्तीति प्रजः स नेत्यप्रजस्तं वा । नायं नञ् किन्तु निषेधार्थोऽकारः । अ न प्रजा यस्य तमिति वा । क्षुत् क्षुधा तृट् पिपासा ताभ्यामेव क्षामम् । अपरे स्रगादय इव ॥ २५ ॥

चट्टी – अप्रजमपुत्रम् । क्षुत्तृड्भ्यामन्नपानकामम् । अपरे स्रक्चन्दनादयो यथा न सुखयन्ति तथा तत्तस्मान्नः पाहि ॥ २५ ॥

तन्नः पाहि महाभाग पूर्वैः सह गतं तमः ।
यथा तरेम दुस्तारं प्रजया तद् विधेहि नः ॥ २६ ॥

सत्यधर्मा – पूर्वैः पित्रादिभिस्तमो नरकं गतं तत्प्रायं निश्चित्यैवमुक्तिर्वा । आगच्छदित्यर्थः । मन्मुखत एव दशैतादृशी तेषां समेषामिति द्योतयितुं गतं न इत्याद्येकवचनबहुवचने । नः पाहि । कथमवनमेवावनीनाथेत्यत आह ॥ यथेति । यथा प्रजया तरेम तथा नो विधेहि कुरु । नापुत्रस्य लोकोऽस्तीत्यादेः । रीत्यन्तरेण तरीतुं दुःशकमित्याह ॥ दुस्तारमिति । यद्यपि ऋदोरबित्यप्प्रत्यये तरेति भाव्यं तथाऽपि स्वार्थिके प्रज्ञाद्यणि कृते तर एव तारः । दुःसाधस्तारो यस्येति । साम्पराये तर्तव्याभावादिति भगवदुक्त्यनुरोधेन तृधातुरेकोऽस्तीत्यूहनेन तस्येदं रूपमिति घञः सम्भवात् । तत्र ताराऽथ मूलत्वमित्यनुव्याख्याव्याख्यायां तरन्त्यनेनानिष्टनिचयमिति ओङ्कारस्तार इति सुधापरिमले तथा तन्त्रदीपिकायां चोक्तेः । आख्यातद्वयान्वयविवक्षया अ न इति पदद्वयम् । तादृशशेमुषीना-मस्माकमित्याह ॥ अतद्विधेहिन इति । तद्विधा पुत्रोत्पत्तिप्रकारो यस्यां सेहा चेष्टा येषामस्ति ते तद्विधेहिनः । ते नेत्यतद्विधेहिनो न इति वाऽन्वयः । श्रपयित्वा पक्वप्रजया पाहि । महाभागश्च ते पूर्वे च तैः सहेति वा ॥ २६ ॥

चट्टी – तदेवाह ॥ पूर्वैरिति । पूर्वैः पित्रादिभिः सहागतं प्राप्तं तमो नरकं प्रजया यथा तरेम तत्तथा विधेहि ॥ २६ ॥

श्रीशुक उवाच–
इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ।
श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद् विभुः ॥ २७ ॥

सत्यधर्मा – कृपालुः कृपां लात्यादत्त इति । ला आदान इत्यस्मान्मितद्वादित्वात् डुः । गर्गयालुर्गलन्तिकेत्यमरात्कृपापूर्णकलशसदृशा इति वाऽर्थः । श्रपयित्वा पक्त्वा चरुं हव्यान्नम् । चरुर्भाण्डे च हव्यान्न इति विश्वः । स च किंदेवत इत्यत आह ॥ त्वष्टृदेवताकं त्वाष्ट्रमिति । त्वाष्ट्रं तमेवायजन् । उत्तरत्र तत्पुत्रीभवनभावकमिदमिति मतिमानङ्गिरा इति मन्तव्यम् ॥ २७ ॥

चट्टी – त्वाष्ट्रं त्वष्टृदेवताकम् ॥ २७ ॥

ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणाञ्च भारत ।
नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद् विभुः ॥ २८ ॥

सत्यधर्मा – ज्येष्ठा वयस्तः श्रेष्ठा गुणैर्महिषी पट्टाभिषिक्ता च । महिषी नृपपत्न्यां चेति विश्वः । कृताभिषेका महिषीत्यभिधानात् । राज्ञ इति वचनेन विशिष्टवाचकनीत्या पत्नीत्यर्थकता महिषीपदस्येति ज्ञेयम् । नाम्नैव कृतद्युतिः अर्थतस्तु अकृताऽपर्याप्ता कान्तिर्यस्याः सेति कान्तिमतीत्यर्थः ॥ २८ ॥

चट्टी – ज्येष्ठा प्रथमोढा श्रेष्ठा गुणैः । यज्ञोच्छिष्टं यज्ञशेषम् ॥ २८ ॥

अथाऽह नृपतिं राजन् भवितैकस्तवाऽत्मजः ।
हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥ २९ ॥

सत्यधर्मा – हर्षशोक इत्युक्त्युत्तरक्षणे तत्रापि इतिवद्धर्षेत्येतावन्मात्रं श्रोत्रयोः पतितं न पतितं च शोकेतीति चोह्यम् । अन्यथा किमर्थमेवमिति करं धृत्वा नरपतिः पृच्छेन्न त्यजेदिति ज्ञेयम् ॥ २९ ॥

चट्टी – जन्मना हर्षं मरणेन शोकं प्रददातीति तथा इति । एवमुक्त्वा ययौ ॥ २९ ॥

साऽपि तत्प्राशनादेव चित्रकेतोरधारयत् ।
गर्भं कृतद्युतिर्देवी कृत्तिकाऽग्नेरिवात्मजम् ॥ ३० ॥

सत्यधर्मा – प्राशनाद्भक्तिपूर्वं भोजनात् । कृत्तिकाऽग्नेरात्मजं षण्मुखम् । देवी कृताभिषेकायामित्यमरः । निदर्शनानन्तरं प्रदर्शनं विनाऽग्नेरिवात्मजमिति दर्शयता केतुरग्रेः शुनोऽपि वेत्युक्तेः शीघ्रं तस्यैव वा जातद्विजत्वाद्योग्य इवायमिति सूचितमिति ज्ञेयम् ॥ ३० ॥

तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ।
ववृधे शूरसेनस्य तेजसा शनकैर्नृप ॥ ३१ ॥

सत्यधर्मा – शुक्लपक्ष इवोडुप इत्यपि नाननुरूपं कृष्णपक्षे क्षैण्यादिति मन्तव्यम् । शूरसेनस्य चित्रकेतोस्तेजसा रेतसा । प्रभावरेतसोस्तेज इति विश्वः ॥ ३१ ॥

चट्टी – शूरसेनस्य शूरसेनाधिपतेः । तेजसा वीर्येण यो गर्भः स ववृधे ॥ ३१ ॥

अथ काल उपावृत्ते कुमारः समजायत ।
जनयन् शूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥

सत्यधर्मा – शूरसेनानां तद्देशिनाम् ॥ ३२ ॥

चट्टी – शूरसेनानां शूरसेनविषयस्थानां प्रजानाम् ॥ ३२ ॥

स राजा सुकुमारस्य स्नातः शुचिरलंकृतः ।
वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम् ॥ ३३ ॥

सत्यधर्मा – जातकं जातकर्म ॥ ३३ ॥

चट्टी – जातकं जातकर्म ॥ ३३ ॥

तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ।
ग्रामान् हयान् गजान् प्रादाद् धेनूनामर्बुदानि षट् ॥ ३४ ॥

सत्यधर्मा – धेनूनां गवाम् ॥ ३४ ॥

ववर्ष कामानन्येषां पर्जन्य इव देहिनाम् ।
धन्यं यशस्यमायुष्यं कुमारस्य महात्मनः ॥ ३५ ॥

सत्यधर्मा – महात्मन आयुष्यमिति तद्वर्षणस्वरूपकथनम् । नित्यायुर्मोक्षदमिति वा ॥३५॥

कृच्छ्रलब्धेऽस्य राजर्षेस्तनयेऽनुदिनं पितुः ।
यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्धत ॥ ३६ ॥

सत्यधर्मा – निःस्वस्य निर्धनस्य । स्वं ज्ञातावात्मधनयोरिति विश्वः ॥३६ ॥

मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ।
कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥

सत्यधर्मा – मोहो ममेदमित्यज्ञानं तस्मात्समुद्भवतीति तथा । मोहमिच्छन्ति मूर्छायामविद्यायां च सूरय इति विश्वः । सपत्नीनां समानपतिकानां नित्यं सपत्न्यादिष्विति निपातनात्समानस्य सभावः । प्रजाकामज्वरः पुत्रेच्छोपतापः ॥३७॥

चित्रकेतोररतिप्रीतिः यथा दारे प्रजावति ।
न तथाऽन्येषु सञ्जज्ञे बालं लालयतोऽन्वहम् ॥ ३८ ॥

सत्यधर्मा – अथ पुंभूम्नि दारा इत्यमरात् दार इत्येकवचनमार्षमिति वदन् श्रीहर्षः न श्रीहर्षहर्षद इत्युपेक्ष्यः । यथा समीचीना न भवन्तीतरे दारा यस्य । गमकत्वान्नञन्वयः । इति यथादारास्तत्सम्बुद्धिः । हे यथादार प्रजावति यथा प्रीतिर्न तथाऽन्येषु दारेषु प्रीतिः सञ्जज्ञ इति वा । दारेप्रजावतीति पदमेकं वा । दाराश्च ते इ प्रजाऽपेक्षितापत्यमस्यास्तीति इप्रजावती च । तत्सम्बुद्धिः । यथा दारे विधुरे प्रजावति पुंसि प्रजायामिति विशेषः । बालं लालयतोऽन्येषु विषयेषु न प्रीतिः सञ्जज्ञ इति वा । बहुत्वं प्रायिकम् । एका च सिकता तैलदाने समर्था । एकामप्सरामित्यादिमहाभाष्यप्रयोगादेकवचनं सुवचमिति दार इत्युदारोक्तिरिति ज्ञेयम् । श्रीहर्षोऽपि द्विरूपकोशे भवेद्दाराश्च दारोऽपि जलोकाश्च जलौकस इत्यूचे ॥ ३८ ॥

चट्टी – कीदृशं जातकर्म । धन्यं धनकरं यशस्यं यशस्करम् । आयुष्यं आयुष्यकरम् । निःस्वस्य दरिद्रस्य । मोहस्य समुद्भवो यस्मिन्प्रजाकामरूपो ज्वरस्तापः । प्रजावति पुत्रसंपन्ने । दार इत्येकवचनमार्षम् ॥ ३४, ३५, ३६, ३७, ३८ ॥

ताः पर्यतप्यन्नात्मानं गर्हयन्त्योऽभ्यसूयया ।
अनपत्येन दुःखेन राज्ञश्चानादरेण च ॥ ३९ ॥

सत्यधर्मा – अनपत्येन दुःखेनापत्याभावोद्भूतेन । अनपत्येनेति क्वचित्पाठस्तत्रापुत्रनिमित्तेनेत्यर्थः । ब्राह्मणादित्वादनपत्यशब्दाद्भावे ष्यञ् ॥ ३९ ॥

चट्टी – अनपत्येनापुत्रत्वनिमित्तेन ॥ ३९ ॥

धिगप्रजां स्त्रियं पापां पत्युश्चागृहसम्मताम् ।
सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥

सत्यधर्मा – अगृहसम्मतामगृहिणीत्वेनाभार्यात्वेनेति यावत् । गृहिणी गृहमुच्यत इत्यादेः । धिग्भर्त्सनहिंसयोरित्यभिधानात्तर्जनीयतां प्राप्तमित्यर्थः । सपत्न्या एकस्या एव सतोकत्वेन शोककारणत्वेऽपि सपत्नीभिरिति व्यथा बाहुविध्याद्बहुवचनमिति ज्ञेयम् ॥ ४० ॥

चट्टी – गृहिण्येव गृहं दारेष्वपि गृह इत्यमरः । पतिसंमता न भवतीत्यागृहसंमता ताम् ॥ ४० ॥

दासीनां को नु सन्तापः स्वामिनः परिचर्यया ।
अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥

सत्यधर्मा – दासीमिव तिरस्कृतामित्युत्प्रेक्षितं स्वयमालोच्य तिरस्कुर्वन्ति ॥ दासीनामिति । स्वामिनः साक्षात्परिचर्यया लब्धमानानां प्राप्तसत्काराणामतो राजस्नेहपात्रत्वात्तत्त्वेन नोत्प्रेक्षणं युक्तम् । तर्हि भवत्यः *किन्तु लाल (*भवत्यः किंनु विलपन्तीति स्यात् ।) इत्यतो लपन्ति । दुर्भगा दुर्दैवा दरिद्रा भूमीन्द्रवक्त्रानवलोकिनी दास्या दासीवेति ॥ ४१ ॥

चट्टी – स्वामिनः स्नेहाभावे दासित्वमप्रयोजकमित्याह ॥ दासीनामिति । दास्या दासी यथा तथा वयं दुर्भगाः ॥ ४१ ॥

एवं सन्दह्यमानानां सपत्न्याः पुत्रसम्पदा ।
राज्ञोऽसम्मतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२ ॥

सत्यधर्मा – अनभिमतस्वाचाराणामसम्मतवृत्तीनाम् ॥ ४२ ॥

चट्टी – न संमता वृत्तिर्जीवनं यासां तास्तथोक्तास्तासां वंध्यत्वादिति भावः ॥ ४२ ॥

विद्वेषान्नष्टमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय विद्वेषान्नृपतिं प्रति ॥ ४३ ॥

कृतद्युतिरजानन्ती सपत्नीनामघं महत् ।
सुप्त एवेति सञ्चिन्त्य निरीक्ष्य व्यचरद् गृहे ॥ ४४ ॥

सत्यधर्मा – नष्टमतयो दारुणचेतसः किं कठिनं स्त्रीहृदयमित्यादेः । नृपतिं प्रतीत्यप्रतिमः पाठः । सञ्चिन्त्य मनसा निरीक्ष्यागत्य ॥ ४३,४४ ॥

चट्टी – विद्वेषेण नष्टा मतिर्यासां ताः । क्रूरचित्तत्वे हेतुः स्त्रिय इति । गरं विषम् । दुर्मर्षा असहमानाः ॥ ४३,४४ ॥

शयानं सुचिरं बालमुपधार्य मनीषिणी ।
पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ॥ ४५ ॥

सत्यधर्मा – धात्रीं धात्री जनन्यामलका वसुमत्युपमातृष्वित्यमरः । उपमातरं चोदयद-चोदयत् ॥ ४५ ॥

चट्टी – धात्रीं स्तनपायिनीम् ॥ ४५ ॥

सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ।
प्राणेन्द्रियात्मभिस्त्यक्तं हताऽस्मीत्यपतद् भुवि ॥ ४६ ॥

सत्यधर्मा – प्राणाः पञ्च इन्द्रियाणि दशात्मा मनश्च तैस्त्यक्तम् । उत्तारे ऊर्ध्वीकृता तारा नेत्रमध्यं ययोस्ते उत्तारे नेत्रे लोचने यस्य तम् । नक्षत्रे नेत्रमध्ये च तारा स्यात्तार इत्यपीति व्याडिः ॥ ४६ ॥

चट्टी – उद्गते तारे कनीनके ययोस्ते लोचने यस्य तम् ॥ ४६ ॥

तस्यास्तदाकर्ण्य भृशातुरस्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि ।
प्रविश्य राज्ञी त्वरयाऽऽत्मजान्तिकं ददर्श बालं सहसा मृतं सुतम् ॥ ४७ ॥

सत्यधर्मा – तस्या धात्र्या राज्ञ इयं राज्ञी सहसाऽतर्किते तु सहसेत्यमराद्रोगाद्य-भावेनाकस्मात् ॥ ४७ ॥

पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा ।
ततो नृपान्तःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम् ।
आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः ॥ ४८ ॥

सत्यधर्मा – तुल्यव्यसनाः समानाशुभाः । व्यसनं त्वशुभ इति विश्वः । सुदुःखिताः । कृतागस एकोनदशकोटिसङ्ख्यागरनिगरणादागस्कृतः । ताश्च व्यलीकमनृतं यथा भवति तथा रुरुदुः ॥ ४८ ॥

चट्टी – विभ्रष्टाः शिरोरुहा अंबरे च यस्याः सा तथा ॥ ताश्च सपत्न्योऽपि व्यलीकं मृषैव रुरुदुः ॥ ४८ ॥

श्रुत्वा मृतं पुत्रमलक्षितान्तकं विनष्टदृष्टिः प्रपतन् स्खलन् पथि ।
स्नेहानुबन्धैतया शुचा भृशं विमूर्छितोऽनुप्रकृतिर्द्विजैर्वृतः ॥ ४९ ॥

सत्यधर्मा – अलक्षितान्तकमलक्षितो नीरोगतयाऽन्तको मृत्युर्यमस्तम् । अनुप्रकृतिः प्रकृतिजनमनु द्विजैर्वृतः ॥ ४९ ॥

चट्टी – न लक्षितोऽज्ञातोऽन्तको मृत्युहेतुर्यस्य तम् । अनुगताश्च ते प्रकृतय आमात्या द्विजाश्च तैर्वृतः । अनुप्रकृतिरिति पाठेऽनुगताः प्रकृतयो यस्य ॥ ४९ ॥

पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः ।
दीर्घं श्वसन् बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम् ॥ ५० ॥

सत्यधर्मा – बालस्य पादमूले पपात । अनेन कर्तव्याकर्तव्यमतिरहितता द्योत्यते ॥ ५० ॥

चट्टी – बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः संवृतत्वेन निरुद्धो कण्ठो यस्य ॥ ५० ॥

पतिं निरीक्ष्योरुशुचाऽर्पितं तदा मृतं च बालं सुतमेकसन्ततिम् ।
जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५१ ॥

सत्यधर्मा – एका च सा सन्ततिश्च तां सुतं तदात्मिकां तदात्मकं सुतं वा । हृद्रुजं हृदयामयम् । स्त्री रुग्रुजा शोकतापेत्यमरः ॥ ५१ ॥

चट्टी – उरुशुचाऽर्पितं बहुशोकेन व्याप्तम् । एकसन्ततिमेकमेव सन्ततिरूपम् ॥ ५१ ॥

स्तनद्वयं कुंकुमपङ्कमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः ।
विकीर्य केशान् विगलत्स्र(विमलसृ)जः सुतं शुशोच चित्रं कुररीव दुष्करम् ॥५२॥

सत्यधर्मा – साञ्जनाः सकज्जलाः । अञ्जनं कज्जलं प्रोक्तमिति विश्वः । विगलत्स्रजः केशानित्यन्वयः । विगलन्त्यः स्खलन्त्यः स्रजो माला येभ्यस्तान् । कुररस्योत्क्रोशस्य स्त्री कुररी । पुंयोगादिति ङीष् । उत्क्रोशकुररौ समावित्यमरः ॥ ५२ ॥

चट्टी – विमलाः स्रजो येषु तान्केशान् ॥ ५२ ॥

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्टयप्रतिरूपमीहसे ।
परे तु जीवत्यपरस्य या मृतिः विपर्ययश्चेत् त्वमसि ध्रुवं परः ॥ ५३ ॥

तात्पर्यम् – 'सन्तापक्रोधरागादिष्वनर्थकवचः क्वचिदि'ति शब्दनिर्णये ॥ ५३ ॥

सत्यधर्मा – अहो विधातस्त्वमतीव बालिश इति श्लोके महाभगवद्भक्तस्य चित्रकेतोर्नियतकलत्रं कृतद्युतिरकृतधृतिः सती सा कथं चतुराननस्य चातुरीमातुरा बालिश इति लपितवतीति शङ्कितारं मूकयितुं मानमानन्दतीर्थमुनिराह ॥ सन्तापक्रोधेति । सन्तापक्रोधरागादिषु । अनर्थज्ञवचोऽनर्थस्याज्ञस्य वच इव वचः क्वचिद्भवेत् । कोपपारवश्येनोक्तस्य नानर्थप्रापकतेति भावः ॥ ततो विव्रियते पद्यम् ॥ हे विधातः अतीवात्यन्तं त्वं बालिशो मूर्खः । पञ्चमस्कन्धे च का त्वं चिकीर्षसि वने मुनिवर्यशैल इति श्लोकतात्पर्ये परिहासप्रलापादिष्वनर्था वागपीष्यत इत्युक्तेर्बाला बालिश इति ब्रह्माणं प्रत्युक्तवत्यपि न पापमाप प्रलापकालत्वादिति तात्पर्यं ज्ञेयम् । आत्मसृष्टे जगत्यप्रतिरूपमीहस इति बालिशः । ममापत्यं तु त्वदपत्यं दत्तवत् तद्गौरवमपि त्वया नावलोकीति बालिश । आत्मसृष्टे त्वत्पुत्रेऽङ्गिरसि तेन सूनुदानं त्वया तु तद्धानिदानमित्यज्ञ इत्यालपति । अप्रतिरूपमीहस इति वा । चापल्यादुक्तमेव बालिशत्वं तवैतत्प्रणाड्येति सुदती विविच्य वदति ॥ परे त्विति । परे कालकृतपरत्ववति वृद्ध इति यावत् । जीवति धृतासौ सति । अपरस्याल्पकालिकस्य बालकस्यानन्तरमुत्पन्नस्य या मृतिः सा विपर्ययो व्युत्क्रम इति चेत्त्वं ध्रुवं निश्चयेन परः शत्रुरसि । अतो बालिश इति । विपर्ययश्चेत्तस्मिन्सति चास्मन्मृतिरितीदानीन्तनं न कार्यं विपर्ययश्च त्वं परो बालिशोऽविज्ञोसि ध्रुवमिति वा । परे तु त्वदपत्यात्सम्पादिते तद्भरे महति चित्रकेतौ सत्यपरस्य तनुतरतनोश्चेतया मृतिस्तया त्वं ध्रुवं परः । न तत्स्वकीयः पिता नेति यावत् । विपर्ययोऽसि । कार्यत आर्यताननुरूपोऽसीति बालिश इति वा । आत्मसृष्टयप्रतिरूपमिति पाठेऽयमेवार्थः ॥ ५३ ॥

चट्टी – शोकप्रकारमेवाह ॥ अहो इति । हे विधातः । जगत्कारण परमेश्वर । त्वमात्मन् । तव सृष्टेरप्रतिरूपमननुरूपमीहसे चेष्टसे । तदेवाह । अनु परे वृद्धे जीवति सति । अपरस्य बालस्य वा मृतिस्तथा हि । वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते सति तव सृष्टिर्नष्टा स्यादित्यर्थः ॥ सांप्रतं स्वसृष्टेर्विपरीतोऽस्ति चेत्तत्राह ॥ विपर्यय इति । विपर्ययो विपरीतोऽस्ति चेत्तर्हि । त्वं प्राणिनामतिदुःखकारित्वात् । ध्रुवं परः शत्रुरसि । न तु कृपालुरित्यर्थः । यद्वा । अननुरूप-मीहमानत्वादतिबालिशो जडादपि जड इत्युक्तम् । कथं तर्हि बालिशो न स्यामित्यत आह ॥ विपर्यय इति । विपर्ययश्चेदुक्तादन्यथा चेत् । पूर्वतनस्य पूर्वमृतिः पश्चात्तनस्य पश्चान्मृतिश्चेदिति यावत् । तर्हि तं ध्रुवं निश्चितम् । परो बालिशादन्यः प्राज्ञोऽसि । स्वसृष्टिप्रातिकूल्यानाचरणादित्यर्थः । अत्र

परमविवेकिनो भवतः पुत्रशोकवशादापद्यमानं बालिशत्वादिकं न वास्तवं मन्तव्यमिति विशेषं तुशब्देन सूचयति ॥ तथा चोक्तम् ॥ सन्तापक्रोधेत्यादि ॥ ५३ ॥

न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥ ५४ ॥

सत्यधर्मा – क्रोधेनान्धैवं प्रलशमाशर्म यच्छतो ममकानच्छतीति चेत्तद्वदसि तर्हीयान्नयो वा त्वयोन्नेयः सोऽपि त्वया नाचारीति रीत्याऽनया बालिश इति लपति ॥ न हीति । न हि मृत्युजन्मनोः प्रकृतविवक्षयाऽभ्यर्हिततया वा जन्मनो मृत्योः पुरत ईरणम् । क्रमो जन्मन्यपि पूर्वस्यैव मृत्युर्न परस्येति क्रमः । जन्मन्यपि पूर्वापेक्षया चिरञ्जीविनैव सूनुनोत्पत्तव्यं नोत्पत्तव्यमल्पायुषेति क्रमोऽपि यदि न हि चेत्तर्हि तदात्मकर्मभिः शरीरिणामस्तु न तेन ते बालिशतेति भावः । तर्हि को ममानय इत्यतोऽयमित्याह ॥ य इति । निजसर्गवृद्धये पुत्राभिवृद्ध्यर्थं स्वयं ते त्वया कृतः कारितो यः स्नेहपाशस्तमिमं वृश्चसि छिनत्सीति त्वं बालिशः । एवं लवलवेन मरिष्यति । तोके स्तोकमतिना त्वया स्नेहो नोत्पादनीयः । स चोत्पादित इति बालिश इति भावो भामिन्याः । इदमपि कर्मभिरिति वदता चतुरेण चतुराननेन प्रच्यावितमचतुरत्वं तथाऽपि प्रलापकालत्वाल्ललनायाः स्मरणरहितत्वादीरणामिति मन्तव्यम् । अस्मत्कर्म तिष्ठतु त्वत्पुत्रो वा कटाक्षयितव्य इति वदति ॥ य इति । यः स्वयं कृतः किमर्थं निजसर्गविवृद्धये पुत्रत्वे कृतस्तस्मिन्यः स्नेहपाशः स्वयं कृते त्वया कृतः पुत्र इति तमिमं विवृश्चसि ततोऽपि बालिश इति । ग्रहिज्येति सम्प्रसारणम् ॥ ५४ ॥

चट्टी – ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराध इत्यत आह ॥ न हीति । पुत्रे जीवत्येव पिता म्रियते । पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति । कर्माधीनत्वादिति चेत्तर्ह्यात्मकर्मभिरेव तज्जन्मादिकमस्तु । किं त्वया कृत्यम् । ननु मयेश्वरेण विना जीवैः कर्मभिः कथमिदं सिद्ध्येदिति चेत् । भवतु नाम । तथाऽपि निजसर्गवृद्धये ते त्वया यः स्नेहपाशः कृतस्तमिममेव स्वयं विवृश्चसि भिनत्सि । इत्याक्रोश इति । न ह्येवंविधदुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्यतीति भावः ॥ ५४ ॥

त्वं तात नार्हसि च मां कृपणामनाथां
त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ।
अञ्जस्तरेम भवताऽप्रजदुस्तरं यद्
ध्वान्तं न याह्यकरुणेन यमेन दूरम् ॥ ५५ ॥

सत्यधर्मा – अङ्गस्मृतिभङ्गेनाङ्गनाङ्गजमनया भङ्ग्या माता तातेति सुतं सुप्तमिव प्रति प्रतिवक्ति ॥ त्वं तातेति । विचक्ष्व पश्य । अप्रजदुस्तरमनपत्यदुःसाध्यतरणं ध्वान्तं नरकादिकं संसार

इवाज्ञानभूयिष्ठत्वाद्ध्वान्तमित्युक्तिः । अकरुणेन निर्घृणेन यमेन नीत इति शेषः । दूरं पन्थानं न याहि न गच्छ ।। ५५ ।।

चट्टी – अप्रजानां पुत्राणां दुस्तरमकरुणेन यमेन सह । यद्वा । दूरं न याहि । कुतोऽकरुणेन यमेन यस्य यमस्याकरुणत्वादित्यर्थः ।। ५५ ।।

उत्तिष्ठ तात त इमे शिशवो वयस्या-
स्त्वामाह्वयन्ति नृपनन्दन संविहर्तुम् ।
सुप्तश्चिरं ह्यशनया च भवान् परीतो
भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ।। ५६ ।।

नाहं तनूज ददृशे हतमङ्गला ते
मुग्धस्मितं मुदितवीक्षणमाननाब्जम् ।
किं वा गतोऽस्यपुनरन्वयमन्यलोकं
नीतोऽघृणेन न शृणोमि कला गिरस्ते ।। ५७ ।।

सत्यधर्मा – ते वयस्याः सवयसः सखाय इति यावत् । अशनया अशनायया भोजनवाञ्छया । शुचः शोकान् । अशनं यस्या अस्ति कार्यतयाऽर्श आद्यचि भवत्यशनाशनेच्छा तयेति वा । अशनाया बुभुक्षा क्षुदित्यमरोऽपि नीरोगः । वयसा तुल्यः । नौवय इति यत् । वयस्यः सवया इत्यमरः । हतं मङ्गलं श्रेयः सर्वार्थलक्षणं वा । मङ्गलं श्रेयसि सर्वार्थलक्षण इति विश्वः । यस्याः सा । मुग्धं सुन्दरं स्मितं हासो यस्य तत् । मुग्धं सुन्दरमूढयोरिति विश्वः । अहं मुदितवीक्षणं मुदितं मोदयुक्तं विकस्वरमिति यावत् । ईक्षणं यस्य तत् । त आननाब्जं मुखकमलं न ददृशे । पारोक्ष्योक्तिस्तु सुप्तोऽहं किल विललापेतिवत्प्रलापकालत्वादुचिता । पुनरन्वयः पुनः प्रत्यावृत्तिस्तद्रहितमन्यलोकं लोकान्तरं गतो नीतोऽसि । केनोहस्येवं मोहितेत्यत आह ।। कला अव्यक्तमधुरारावयुताः । कलोऽव्यक्त-मधुरध्वनाविति विश्वः । ते तव गिरो वाचो न शृणोमीति यावदिति ।। ५६,५७ ।।

चट्टी – अशनया क्षुधात्तनूज हे पुत्र । नाहं प्रथमं त्वत्पार्श्वमागता सती तव मुग्धं सुन्दरं स्मितं यस्मिन् । मुग्धः सुन्दरमूढयोरिति विश्वः । मुदिते प्रसन्ने वीक्षणे यस्य तद्वक्त्रं ददृशे दृष्टवत्यस्मि ।। इदानीमपि कला अव्यक्तमधुरा गिरो न शृणोमि । ध्वनौ तु मधुरास्फुट इत्यमरः । तर्हि किमपुनरन्वयं पुनरागमनं यथा न भवति तथाऽन्यलोकं गतोऽसि । कीदृशोऽघृणेन यमेन नीतः सन् ।। ५६,५७ ।।

श्रीशुक उवाच–
विलपन्त्यां मृतं पुत्रमिति चित्रविलापनैः ।
चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह ॥ ५८ ॥

सत्यधर्मा – मृतं पुत्रमुद्दिश्य ॥ ५८ ॥

चट्टी – अचेतनं बुद्धिशून्यम् । अनायकं बोधकरहितम् ॥ ५८,५९,६० ॥

इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ ६-१४ ॥

तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः ।
रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ५९ ॥

सत्यधर्मा – तयोर्दम्पत्योः । जाया च पतिश्चेति दम्पती राजदन्तादिः । दम्भावो जम्भावश्च निपात्यत इति प्रौढवादः । दं कलत्रं च दाने चेति विश्वात् । दं कलत्रे नपुंसकमिति चामरमालायाः । पत्न्यां जंदमलिङ्गत्व इति नामप्रपञ्चाच्च स्वातन्त्र्येण जंदंशब्दयोरेव भार्यावाचकतायाः । जं च पतिश्च दं च पतिश्च जंपती दम्पती इति रूपनिरूपणसौलालित्यान्निपातपक्षपातस्यागतिकगतित्वादिति नैघण्टिकाः । जायापती । सर्वमिति समस्तं चेतनमचेतनं तत्प्रायमासीत् ॥ ५९ ॥

एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ।
ज्ञात्वाऽङ्गिरो नाम मुनिराजगाम सनारदः ॥ ६० ॥

इति श्रीमद्भागवते षष्ठस्कन्धे चतुर्दशोऽध्यायः ।

सत्यधर्मा – कश्मलं कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् चेति कलप्रत्ययः प्रत्ययस्य मुडागमश्च । अनायकं राजभिन्नमिव विद्यमानमितरदनायकं वक्तृश्रोतृरहितत्वात् । महर्षिरित्यनेन स्वयं ज्ञात्वैवाजगामेति ध्वन्यते ॥ ६० ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे चतुर्दशोऽध्यायः ॥ ६-१४ ॥

अथ पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच –
ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम् ।
शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ॥ १ ॥

सत्यधर्मा – ॥ हरिः ॐ ॥ भगवदवगमतो मतं संसारनिःसरणं स च निरन्तरतच्चरण-परिचरणादिलभ्य एवमादिसर्वस्यापि मूलं तदनुग्रहमिति निरूप्यतेऽत्राध्याये । तत्रादावङ्गिरोनारदावागत्यापत्यमृत्यार्तिमन्तं चित्रकेतुं सान्त्वयामासतुरित्याह ॥ ऊचतुरिति । मृतकोपान्ते शवसमीपे मृतकोपमं तत्तुलं सदुक्तिभिः सत्यः समीचीना निर्दुष्टा वोक्तयस्ताभिर्बोधयन्तौ सन्तावूचतुरित्यन्वयः । ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ सत्संगतिश्चित्रकेतोरिव सन्तापहारिणी ।
संसारदावदग्धस्येत्यध्यायेऽस्मिन्निरूप्यते ।

तत्राङ्गिरोनारदावागत्य किं चक्रतुरित्यत आह ॥ ऊचतुरिति । मृतकोपान्ते शवसमीपे ॥ १ ॥

कोऽयं स्यात् तव राजेन्द्र भवान् यमनुशोचति ।
त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम् ॥ २ ॥

सत्यधर्मा – लोकेश न शोकेन कार्यमिति निदर्शनप्रदर्शने हेतुः द्वाभ्यां श्लोकाभ्यां । यमनुशोचस्ययं तव को नु स्यात् । अस्य बालस्य त्वं वा कतमः केष्वेकः सृष्टावादिकालिक्यां पुराऽतीतकाले इदानीमेतर्हि । अतःपरमुत्तरत्र को वा भविष्यः । अथवाऽतीतादिकालाननुबन्धित्वादिदानीमपि तथैवेति वा ॥ २ ॥

चट्टी – यमनुशोचस्ययं तव कः कीदृशो बन्धुः स्यात् । त्वं चास्य बन्धूनां मध्ये कतमः सृष्टौ प्रवाहरूपायाम् । अयं च मम पुत्रोऽहं चास्य पितेति चेत्तत्राहतुः ॥ पुरेति । ये पूर्वे जन्मनि यं पित्रादिरूपेण संयुक्ता आसन् । त एव मरणेन ततो विमुक्ताः सन्तो वर्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवन्ति । अतो नायं नियम इति भावः ॥ २ ॥

यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः ।
संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥ ३ ॥

सत्यधर्मा – स्रोतोवेगेन प्रवाहवेगेन वालुकाः सिकताः प्रयान्ति संयान्ति संयुज्यन्ते वियुज्यन्ते च । अत्र कालः प्रसिद्धः । देहिपक्षे कालेन तच्छब्दवाच्येन हरिणा स्रोतोवेगेन कर्मप्रवाहेन । स्रोतोऽम्बुवेगाङ्घ्रिपयोरिति विश्वः । प्रयान्ति मात्राद्युदरादितः संयान्ति मरणादितः संयुज्यन्ते चातः कुत्र आर्तिरिति भावः ॥ ३ ॥

चट्टी – तमेवाभिप्रायं प्रकटयतः ॥ यथेति । स्रोतसः प्रवाहस्य वेगेन वालुका वियुज्यन्ते । संयान्ति संयुज्यन्ते । यथा कालेन कालवेगेन तत्प्रेरकेण श्रीहरिणा च निमित्तेन देहिनो जीवा अपीत्यर्थः ॥ ३ ॥

यथा धानासु वै धाना भवन्ति न भवन्ति च ।
एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥

सत्यधर्मा – त्यक्तकायाः पुनराप्नुवन्ति शरीराण्युत लीना यत्र क्वापि भवन्ति किमित्यत आह ॥ यथेति । धानासु बीजभूतासूप्तास्विति शेषः । धानाः पुनरावापयोग्या भवन्ति । न भवन्ति ऊषराद्यासूप्ताः स्वोपादानमेव निविशन्ते । ईशमायया भगवदिच्छाचोदितानि प्रेरितानि भूतेषु प्राणिषु भूतानि पुनरुत्पादका भवन्ति । तावत्युत्पत्तिमन्ति त्वद्वन्न भवन्ति त्वत्पुत्रवत् ॥ ४ ॥

चट्टी – तथाऽप्येतावन्तं कालं मम पुत्रो नाभूत् । वार्धिके च जातो मृत इति दुःखमिति चेत्तत्राहतुः ॥ यथेति । धानासु बीजेषु धाना बीजान्तराणि भवंत्युत्पद्यन्ते । कासुचित्कदाचिन्न भवन्ति नोत्पद्यन्ते नश्यन्ति च । न तु भवंत्येवेति वा नियमः । एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु । अतो धानानां जन्यजनकभावेऽपि यथा पितृपुत्रादिभावो नास्ति । एवमत्रापीत्यतो न शोकः कार्य इति भावः ॥ ४ ॥

वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ।
जन्ममृत्योर्यथा पश्चात् प्रागेवमधुना विभो ॥ ५ ॥

सत्यधर्मा – यावत्क्लृप्तिरैशी तावत्पर्यन्तं सदसन्मिश्राणां विश्रमश्रममिश्रफलमैहिकं भुक्त्वोपादेयस्योपादानप्रवेशानन्तरमनन्तानुग्रहनिग्रहैः स्वस्वगतिरिति वक्तुमुत्तरो ग्रन्थः । वयं च त्वं चेमे उपोपविष्टा ये चराचरा ज्ञा अज्ञाश्च तुल्यकालवर्तमानकालिकास्तेषामस्माकं प्राग्जन्म पश्चान्मृत्युर्यथा तथाऽधुनाऽपि । एवमुत्तरत्रापि ॥ ५ ॥

चट्टी – पितृपुत्रादिभावाभावमेव स्पष्टयतः ॥ वयमिति । भो राजन् । तुल्यकाला वर्तमानकालीना अस्मदादयो जन्मनः प्राक् मृतेः पश्चाच्च यथा न पित्रादिभावापन्ना एवमधुनाऽपीति विद्धीत्यर्थः ॥ ५ ॥

भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः ।
आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥

सत्यधर्मा – भो भूप कस्य के पुत्राद्या मोह एव हि केवलमित्यादेरसत्त्वेन तर्ह्यभिमानोऽस्य किं कृत इत्यत आहतुः ॥ भूतैरिति । भूतैः पञ्चभिर्भूतानि प्राणिदेहान्भूतेशो निमित्तभूतः सन्सृजति । अवति हन्ति । स्वयमनेवंविध इति बोधयतः ॥ अज इति । सोऽभिमानः प्रकृतिसम्बन्धकृतो ममाधीना इति मोहो न तु मिथ्यात्वं मानिकमोहपदार्थ इति भावः । तान्यपि भूतानि किं जातानीत्यत आह ॥ आत्मसृष्टैरिति । व्यक्तैः सूक्ष्मैः सृष्टैः स्थूलतया । इदमस्वातन्त्र्ये हेतुः । प्रयोजनेच्छेत्येतत्तुच्छीकरोति ॥

अनपेक्ष इति । भूतानि तानि । स्रष्टा कोऽपि तं नियम्यैतं नियामकोऽस्ति न किमित्यतोऽस्तीत्यप्याहतुः ।। अनपेक्ष इति । अनपो मुख्यप्राणस्तत एव पितामहश्च तस्येक्षा दयापात्रतयेक्षणं यस्येति स तथा । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इत्यादेः कथं निरर्था प्रवृत्तिः पारमेश्वरीत्यत ईरयतः।। बालवदिति । यथा बालः प्रयोजनशून्योऽपि क्रीडादौ प्रवर्तते तथा भागवती प्रवृत्तिरिति ज्ञेयम् । यथोक्तं सूत्रकृता लोकवत्तु लीलाकैवल्यमिति । अजः सृजत्यवति हन्ति । बालवत्पुत्रवदित्यप्यन्यार्थो ज्ञातव्यः।। ६ ।।

चट्टी – यद्येवं तर्ह्यहमस्य जनकः पालक इत्यभिमानो भूतानां कथमुपपद्यत इत्याशङ्क्य भगवता निमित्तेन स्वीकृतत्वादित्याहतुः ।। भूतैरिति । नन्वीश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेदपूर्णकामता प्राप्ता । नास्ति चेत्कुतस्तत्र प्रवृत्तिरित्यत्राहतुः ।। अनपेक्षोऽपीति । निरपेक्षो बाल इव लीलाः करोतीत्यर्थः । एवं सर्वकारणाद्भगवत एव भजनीयो न शोकेन प्रयोजनमिति भावः ।। तथा च श्रुतिः ।। नाना ह्येनं व्यपदिशन्ति पितेति पुत्रेति भ्रातेति ।। वाराहे च ।। पुत्रभ्रातृसखित्वेन स्वामित्वेन यतो हरिः । बहुधा गीयते देवैर्जीवांशस्तस्य च त्विति ।। ६ ।।

देहेन देहिनो राजन् देहाद् देहोऽभिजायते ।
बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ।। ७ ।।

सत्यधर्मा – कथं परमात्मसृष्टैर्भूतैरस्वतन्त्रैः स्वतन्त्रः सृजतीत्यतस्तं प्रकारमाहतुः ।। देहेनेति । देहेन पितृदेहेन संयुक्ताद्देहान्मातुर्देहित्वेनोत्पत्स्यमानस्यास्य देहोऽभिजायते । अभीत्यनेन नानाप्रकारतां जनेरसूचयत् । देहिनो नित्याप्राकृतप्रशस्तदेहवतो निमित्ताद्देहेन पितुर्देहान्मातुर्देहोऽभिजायत इति वा । देहेनदेहिन इति पदमेकम् । देहस्येनः सुखदुःखादिभोक्तृत्वेन पतिश्चासौ देही च तस्य देहान्मातुः पितुश्चेति मिलिताद्देहोऽभिजायत इति वा । देहिन इति पदमेव दृष्टान्तं दर्शयतः ।। बीजादिति । बीजात्पूर्वं सञ्चिताद्बीजमङ्कुरप्ररोहोपयोगि यथा जायत तथेति । शरीरनाशे जीवस्य नाशश्चेद्भोक्ता क इत्यतो न तस्य नाश इति शंसतः ।। देहीति । देही जीवोऽर्थ इव भगवत्पदार्थ इव शाश्वतः सदैकरूपो नित्य इति यावत् । अर्थो जीवः शाश्वत इव भगवदायत्तनित्यत्व इति वा । नित्यो नित्यानामिति तस्यापि नित्यतानिर्धारणात् ।। ७ ।।

चट्टी – ननु भूतैर्भूतानि भूतेशः सृजतीत्याद्युक्तम् । चेतनानां नित्यत्वान्नित्यो नित्यानां चेतनश्चेतनानामित्यादिश्रुतेरित्याशङ्क्यायं जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्याहतुः ।। देहेनेति । देहिनः पितुर्देहेनैव देहिनः पुत्रस्य देहो मातुर्देहादभिजायते । यथा बीजादेव बीजं जायते । देही तु शाश्वत एव । अर्थो भूम्यादिर्यथा तद्वदित्यर्थः ।। ७ ।।

देहदेह्यविभागोऽयमविवेककृतः पुरा ।
जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥

सत्यधर्मा – ननु देहस्य हानिर्देहिनो न हानिरिति कुत उभयोर्नाशः किन्न स्यादित्यतः शंसतः ॥ देहदेहीति । देहश्च देही चेत्यनयोरविभाग ऐक्यं पुराऽविवेककृतमनाद्यविद्याकार्यं ततो न ज्ञानिना मन्तव्यमेवेति भावः । यथा वस्तुनि । वासनाद्वासयेद्वस्तु नित्याप्रतिहतत्वतः । वासेनेदं यतस्तुन्नं तस्मात्तद्ब्रह्म भण्यते । अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यते । तस्मादेकं परंब्रह्म वस्तुशब्दोदितं सदेति प्रथमैकादशतात्पर्याभ्यां भगवति जातिर्धर्म आनन्दादि व्यक्तिर्भगवानिति विभागो भेदो यथा कल्पितः शास्त्रशंसितो न तथेति । विष्णोस्तदीयधर्माणां भेददर्श्यधरन्तमः । एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावतीत्यादिविरुद्धत्वादिति भावः । अथवा वैशेषिकमनेन दूषयति ॥ वस्तुनीति । वस्तुनि घटादौ जातिव्यक्तिविभागो घटत्वादिर्जातिर्घटादिर्व्यक्तिरिति विभागोऽविवेकोऽज्ञानं तेन कृतः । न चायं कथं कल्पितो जातिमङ्गीकृत्य तस्याः क्वचित्सम्भवमसम्भवं च वदन्तो महान्तो दृश्यन्ते गौतममतावलम्बिनो व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह इत्यादेः समूलत्वादिति वाच्यम् । नैकया जात्याऽङ्गीकृतया सर्वत्र निर्वाहोऽत एव सामान्यादौ धर्मे स्वीकर्तव्ये धर्मिवत्तत एव सर्वत्र निर्वाहे गौरवात्किं तयेति । किञ्च नित्यता च तस्या आमरपामरं नौ-मर्हा । मासेन शूद्रो भवति ब्राह्मणो नरत्वादिकमित्यादिव्याख्यानसमये सुधायां सपरिष्कारमीरणात् । अपि पामराः सुरापाय्यादिकस्य जातिभ्रंशोऽस्य जात इति न जातुचिन्नाचकथन्निति का कथन्तेति । भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपीत्यादेरनुगतिरपि दुर्गतिमगमत् । सति घटे तत्र विशेषणतया प्रतीयमानत्वं घटत्वमसति तस्मिन्क गतमिति कृतेऽनुयोगस्वलक्षणारिरक्षया विषमानं काल इत्युड्डीनं वा कर्तव्यं मूकता वा शरणीकरणीयेति जल्पनं कल्पनत एवाल्पमतीनामित्यलम् । देहदेह्यविभागो भगवति देहोऽयं देह्ययमिति अविभागो भागाभावो विभजनमिति यावत् । अयमविवेककृतः । अयम इति असदृश इति यो विवेको ज्ञानमसदृशो यो विवेक इति वा तेन कृतः । अयं जीवसङ्घोऽपि पुरा शरीरेण सह जातिव्यक्तिविभागः* तद्वा तु (*अत्र किमपि त्रुटितमिति भाति) । कदेत्यतस्तदप्याह ॥ पुरेति । लिङ्गभङ्गात्पूर्वम् । तत्रापीत्थमित्याहतुः ॥ यथा वस्त्विति । खण्डिते भेद ऐक्यं चेत्येवमाद्युक्तेस्तत्तद्वस्त्वनुसारेण मानिकोऽयं विभाग इति न कल्पनमिति वदतो विकल्पित इति न कल्पितो विकल्पित इति वा ॥ ८ ॥

चट्टी – ननुं जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्येतदयुक्तम् । देहव्यति-रिक्तस्यात्मनोऽभावात् । न च तं स्वशरीरात्प्रवृत्तिरिति श्रुतिविरोधः । स्थूलोऽहं कृशोऽहमिति

देहात्मैक्यग्राहिप्रत्यक्षविरोधेन तस्या उपचारसंभवादित्याशङ्क्यैक्यप्रतीतिर्भ्रान्तिरित्याहतुः ।। देहीति । देहदेहिनोरविभागोऽभेदोऽविवेककृतोऽज्ञानकल्पितः । नायं शुक्तिरूप्यवदागन्तुक इत्याह ।। पुरेति । पुरा पुरातनोऽनादिरित्यर्थः । अविभागापरो विभागारोपं दृष्टान्तमाहतुः ।। जातीति । अत्र जातिशब्दो गुणादेरप्युपलक्षकः । यथा वस्तुनि गवादिलक्षणे गोत्वादिजात्यादेर्गवादिव्यक्तिश्च विभागो भेदोऽसन्नपि कणादीनामज्ञानेन कल्पितस्तथेत्यर्थः ।। तथा चोक्तम् ।। गुणक्रियाजातिपूर्वधर्माः सर्वेऽपि वस्तुनः । रूपमेव द्विधं तच्च यावद्वस्तुनि खण्डितमिति । कुतो भस्मत्वयाप्तस्य नरत्वं पुनरिष्यत इति वचनाच्च ।। ८ ।।

नानात्वं जन्मनाशश्च क्षयो वृद्धिः क्रियाफलम् ।
द्रष्टुश्च भान्त्यतद्धर्मा यथाऽग्नेर्दाह्यविक्रियाः ।। ९ ।।

सत्यधर्मा – ननु गौरोऽहं कृशोऽहमित्याद्यनवद्यानुभवात्कथं कल्पितोऽयमिति वैय्यात्यात् गर्जतस्तर्जतः ।। नानात्वमिति । नानात्वं सुरोऽहं नरोऽहमिति जन्माहं जात इति नष्टो मृतः स इति क्षयः क्षीणोऽहमिति वृद्धिः पुष्ट इति सर्वं क्रियाफलं कर्मफलम् । तथात्वेऽपि द्रष्टुर्भाति व्यवहारतः । वस्तुतस्त्वयं कीदृश इत्याहतुः ।। अतद्धर्मेति । स धर्मो यस्यासौ स तथा न तथेत्यतद्धर्माणामत्र व्यवहाराणामिति भावः । तत्र निदर्शनं दर्शयतः ।। यथेति । अग्नेर्दाह्यस्य काष्ठस्य विक्रिया महत्त्वादिना महत्त्वमणीयस्त्वेनाणुत्वमिति व्यवहारौपयिको विकारस्तथा । यथोक्तं भक्तिपादीय क्व च प्रत्यक्षतः प्राप्तमित्याद्यनुव्याख्याव्याख्यासुधायां प्रत्यक्षतः प्राप्तमिति साक्षात्कारसिद्धमित्यादीकृत्य क्वचित्प्रतीतेरे-वाभावात्क्वचित्प्रतीतिसद्भावेऽपि प्रत्यक्षजत्वाभावात्क्वचित्प्रत्यक्षप्रतीतिभावेऽप्ययथार्थत्वात्क्वचिद्यथार्थ-त्वेऽपि प्रबलप्रत्यक्षेणैव बाधादित्यर्थः । अत एव क्वापीत्युक्तम् । अन्येनेत्यनुपजीव्येन मानादिनेत्यर्थः । तदेवं स्वभावत इत्यन्तेन । अतद्धर्माः न तद्धर्मा अतद्धर्मा इति । क्रिया कर्म । फलं ऐहिकम् । द्रष्टुर्नित्यैकप्रकारदर्शनवतः । अतद्धर्मा जीवधर्मा न भवन्तो भान्ति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते । द्रष्टुर्दर्शयतः । अन्तवन्त इमे देहा इत्यादिशास्त्रादतद्धर्मा भान्ति । एतेन कृशोऽहमित्यादि देहविवक्षया न जीवविवक्षया तथाज्ञानं भ्रम इति वा ।। ९ ।।

चट्टी – देहदेह्यविभागप्रतीतेरेव देहधर्मा नानात्वादय आत्मन्यारोपितव्या इत्याहतुः ।। नानात्वमिति । क्रियाफलं जीवगतपुण्यपापलक्षणं कर्मफलं नानात्वं सुरनरत्वादिलक्षणं जन्माद-यश्चातद्धर्मा अपि अनात्मधर्मा अपि द्रष्टुर्देहाभिमानिन आत्मनो भान्ति । यथाऽग्निना दाह्यस्य तृणादेर्विक्रिया विकारा अग्नेर्भान्ति तद्वदित्यर्थः ।। ९ ।।

त इमे देहसंयोगादात्मन्याभान्त्यसद्ग्रहात् ।
स्वप्ने यथा तथा नान्यद् ध्यायेत् सर्वं भयं च यत् ॥ १० ॥

सत्यधर्मा – शोककालत्वान्न विविशेत्तन्मनस्तत्रेति पुनर्वदतः ॥ इमे पूर्वोक्ता इति । आत्मनि जीवे भान्ति । तत्र निमित्तं देहसंयोगादिति । असद्ग्रहाद्दुरभिमानादात्मन्येवं दातरि भगवति सत्याभान्ति । इदं कुत इत्यत आहतुः । असद्ग्रहादिति । एतस्य सत्त्वस्य सामर्थ्येनासत्प्रायत्वज्ञानात् । तत्रानुरूपं दृष्टान्तमाहतुः ॥ स्वप्न इति । यथा स्वप्ने तदवस्थायां सर्वं जाग्रत्कालिकसर्पाद्यनुभवसंस्कारवशाद्भयम् । यत् । इणोन्तर्हितणिचो रूपम् । एति प्रापयतीति यत् । यथोक्तम् । यतश्च यदिति व्याख्यावसरे गीताभाष्यतात्पर्यप्रमेयदीपिकासु । यतश्च यत् यतो याति प्रवर्तत इति । यतो यस्य प्रेरणया । यदितीणो लडादेशशत्रन्तस्य रूपं इणो यातेश्चानतिभिन्नत्वादिति । भयमित्युपलक्षणम् । भयाभयहर्षाहर्षादिकम् । सत्यमेव तथा सांसारिक्यां दशायामिति तरणमीरयतः ॥ नान्यदिति । भगवदन्यन्न ध्यायेत् । तथा चेत्सरति संसार इति भावः । कर्ता स एव हर्ता च सन्ध्ये निर्माता चेति सन्ध्ये निर्मातारम् । न तत्र रथा न रथयोगा इत्यादिसूत्रश्रुतिसिद्धत्वान्नाविश्वसनीयमिति द्योतयितुं तं ध्यायेदित्यनुक्त्वा निषेधमुखोक्तिरिति मन्तव्यम् । असद्ग्रहात् सन्सर्वदा सर्वत्र तत्र तत्र चेति भगवाञ्जीवश्च तद्ग्रहस्तज्ज्ञानं तदभावादसद्ग्रहात्तथा देहसंयोगाच्च । तेऽतदीया अपीमे ममेति भ्रान्तिः क्वेत्यत आत्मनि मनसीति । स्वप्ने यथा तदेवेति तथेति । ननु कथङ्कारं ज्ञेयमित्यतस्तदप्याहुः ॥ स्वप्नेति । यथातथा न किन्तु भातं सर्वं भयमभयं चेति यत्तदन्यत्तदाऽवलोकितं पूर्वावलोकिताद्भिन्नं भगवत्सृष्टं सत्यमिति तथा । त इमे देहस्यैव न मे । यच्छरीरं तदन्यदिति ध्यायेदिति दृष्टान्तदार्ष्टान्तिकतया वा योज्यम् ॥ १० ॥

चट्टी – उक्तमेव विशदयतः ॥ त इम इति । ते देहनिष्ठत्वेन प्रसिद्धा इमे जन्मादयो देहसंयोगनिमित्तात् । आत्मन्याभान्ति तन्निष्ठत्वेन प्रतीयन्ते । देहसंयोगसद्भावेऽपि ज्ञानिनां तथा प्रतीत्यभावात्तत्र मुख्यकारणमाह ॥ असद्ग्रहादिति । देहोऽहमिति दुराभिमानत्वादित्यर्थः । तत्र दृष्टान्तः ॥ स्वप्न इति । यथा स्वप्नावस्थायां जाग्रत्वमाभाति तथेत्यर्थः । मिथ्याज्ञानस्य फलं वदन्तौ तन्निषेधतः ॥ नेति । यदन्यद्वस्तु स्वरूपादन्यथाभूतं देहात्मैक्यादिकं तत्सर्वं न ध्यायेन्न जानीयात् । यतो भयं भयप्रदमित्यर्थः ॥ तथा चोक्तम् ॥ यत्किञ्चिदन्यथा संस्थमन्यथा ध्यातमंजसा । अनर्थकारणं लोके किमु सर्वेश्वरो हरिरिति ॥ १० ॥

प्रसु(सुषु)प्तस्यानहम्मानान्न घोरा भाति संसृतिः ।
जान(जीव)तोऽपि यथा तद्वद् विमुक्तस्यानहम्मतेः ॥ ११ ॥

सत्यधर्मा – अनन्यध्यानं विहितं तत्किं फलकमित्यतो लपति ।। प्रसुप्तस्येति । अनहम्मानान्निरभिमानाज्ज्ञानतश्चेतनस्य संसृतिस्तदानीं यथा घोरा न भवति । मन आदेर्बहिरर्थानुपयोगितयोपरतेः । तथा जानतो मम स्वर्गमीश्वरतन्त्रमिति ज्ञानवतः सांसारिक्यां दशायामपि संसृतिर्घोरा न भवति । स्वाप्नपदार्थदर्शनस्य कालान्तरफलप्रापकता वर्तते तद्वद्विदुषोऽपि समयान्तरे संसारः पुनरुपसर्गदः किमित्यरुच्या दृष्टान्तान्तरमुच्यते ।। यथेति । यथा विमुक्तस्य लिङ्गभङ्गप्राप्तस्य संसृतिर्न घोरा तद्वत् । अनहम्मतेर्जानतः सनकादेर्जनकादेरिव न घोरेति । स कीदृशः संसार इत्यतस्तत्स्वरूपं निरूपयति ।। संसृतिरिति । भया भगवज्ज्ञानेनातिसंसृतिरतिक्रान्ता संसृतिर्येन जीवन्मुक्त इति यावत् । अतिक्रान्तः संसृतिमिति स तथा । अत्यादयः क्रान्ताद्यर्थे द्वितीययेत्युक्तेरिति वा ।। ११ ।।

चट्टी – एवमभिमानस्यानर्थकारणत्वेन योऽवश्यं परिहरणीय इति बोधयितुं तत्परिहारफलं तावत्सदृष्टान्तमाहतुः ।। सुषुप्तस्येति । यथा सुषुप्त्यवस्थापन्नस्य पुरुषस्याहमित्याभिमानाभावाद्विषयव्यावृत्तिलक्षणा संसृतिर्नाभाति । तद्वदेव जीवस्य जीवतो देहावच्छिन्नस्य सतोऽप्यनहंमतेरहमभिमानशून्यस्यात एव जीवन्मुक्तस्य घोरा संसृतिर्नाभातीत्यर्थः ।। ११ ।।

तस्मादन्यन्मनोमात्रं जह्यहम्ममतातमः ।
वासुदेवे भगवति मनो धेह्यात्मनीश्वरे ।। १२ ।।

सत्यधर्मा – यदर्थमियानायासस्तं निगमयति ।। तस्मादिति । अन्यत् पुत्रादिकं सर्वमन्यत् । तत्किं भावि न किं भावि त्वं तस्य किं तवापि । तर्हि क्लेशहेतुः क इत्यत आहतुः ।। मनोमात्रमिति । मनःशब्देन तत्कारणकोऽभिमानो ग्राह्यः । मनोमात्रमभिमान एवेत्यर्थः । मात्रं वाव धृतौ कात्स्न्यर्च इति विश्वः । अहंममतातमस्तद्रूपमन्यथाज्ञानं जहि त्यज । तद्धातुर्निदानं किमित्यत आह ।। वासुदेव इति । आत्मनीश्वरे ब्रह्मादिभ्यो वरे भगवति वासुदेवे स्वबिम्बे मनो धेहि निधेहि । निधानमेव तत्तम उत्तारकमिति भावः ।। १२ ।।

चट्टी – एवमभिमानत्यागस्य संसारनिवृत्तिफलकत्वादभिमानं त्यक्त्वा श्रीहरिं भजस्वेति बोधयतः ।। तस्मादिति । तस्मादभिमानत्यागस्य संसारनिवृत्तिफलकत्वादन्यत्पुत्रादिविषयम् । मनोमात्रं रागद्वेषदुष्टमनःकारणम् । अहंममताभिमानत्वलक्षणं तमो जहि परिहर । तत्परिहारे उपायमाहतुः ।। वासुदेव इति । अत्र देहदेह्यविभागोऽयमविवेककृतः । पुरेत्यारभ्य तत्र तत्र देहात्मैक्यप्रतीतिरुक्ता स्फुटतरविवेकाभावादित्यभिप्रायः । मम देह इति भेदस्यैव सर्वैरनुभूयमानत्वेनैक्यप्रतीतेः कस्याप्यभावादिति ज्ञातव्यम् ।। तदुक्तमनुव्याख्याने ।। मम देह इति ह्येव न देहोऽहमिति भ्रमः । इत्यारभ्य व्याप्तत्वादात्मनो देहे व्यवहारेष्वपाटवात् । भेदज्ञानेऽपि चांगारवन्हिवत्स्वाविविक्तवत् । भवं च

व्यवहारश्च न हि प्रत्यक्षगानपि । अर्थान्यथाऽनुभवतः प्रतिपादयितुं क्षमा इति ॥ सुधायां च ॥ भेदे ज्ञानेऽप्यात्मनो देहे व्याप्तत्वादंगारवन्हिवल्लोकानां व्यवहारेष्वपाटवादत्यन्तविविक्तवेदनेष्व सामर्थ्यात्तुरादिव्यवहारश्च स्वाविविक्तवद्भवन्ति विषयविवेकाभावविवक्षयैव ते व्यवहारा इत्याशयः । अत एव विवेकार्थानामुपदेशानां च सार्थ्यक्यमुपपद्यते । विशदो हि विवेकः पुरुषार्थाय कल्प्यते । न त्वौत्पत्तिकः । आत्मनो देहे व्याप्तत्वादत्यन्तप्रेमास्पदत्वाद्रागादयोऽपि युज्यन्त एवेति ॥ १२ ॥

श्रीशुक उवाच–

एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ।
विमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ १३ ॥

सत्यधर्मा – इयताऽपि तापोपशमनं नाभूत्किं भूपस्येति परीक्षिन्मानससंशयं शुकोऽपाकरोतीतीरयति ॥ शुक इति । द्विजयोरुक्तिभिर्द्विजाभ्यां कर्तृभ्यामुक्तिभिः करणैरिति वा द्विजोक्तिभिः । आधिम्लानमाधिना मनोव्यथया । पुंस्याधिर्मानसी व्यथेत्यमरः । म्लानं क्षीणहर्षे । आधिम्लानो यथा भवति तथाऽभाषतेत्यन्वयो वा । विमृज्य पाणिनेति वाणीविलासात् यद्यप्यङ्गिरा दृष्टचरस्तथाऽपि व्यथयाऽतिकथितमनसोऽङ्गस्मृत्यभावादित्थं प्रश्न इति मन्तव्यम् ॥ १३ ॥

चट्टी – आधिना म्लानं वक्त्रम् ॥ १३ ॥

राजोवाच–

कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम् ।
अवधूतेन वेषेण गूढाविह समागतौ ॥ १४ ॥

सत्यधर्मा – महीयसां तद्रूपौ सन्तौ काविति वा । महिष्ठौ बहुमहत्तमौ । अथवाऽवधूतेन वेषेणेति भाषणेन परिचितौ रचितायामपि तस्याङ्गिरसो परिस्फूर्तिसम्भवसम्भवत्वकः प्रश्न इति वा । समागतौ समं मिलित्वागतौ युवां कौ नौ जायापत्योर्ज्ञानसम्पत् ॥ १४ ॥

चट्टी – अवधूतेन वेषेण धूलीरूषिताकारेण ॥ १४ ॥

चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ।
मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः ॥ १५ ॥

सत्यधर्मा – ज्ञानवतां महतामयं स्वभाव इति कांश्चिद्विपश्चित इदं छलप्रायश्चित्तेन प्रायश्चित्तशुद्धिरिति बुद्ध्वा नामनिर्देशपूर्वकं तेषु कौ युवामिति विकल्प्य भूपः पृच्छंस्तदवधृतवेष

एवंविधोऽनुभूतपूर्व इतीरयति ।। चरन्ति ह्यवनाविति । ब्राह्मणा अपरोक्षप्रेक्षा भगवत्प्रिया भगवान्प्रियो येषां त इति वा भगवतः प्रिया इति ते तथा । कामं यथेच्छमवनौ चरन्ति हि । जवात्पठन्ति नात्मार्थं भास्करा इव भास्वरा इत्यादेः प्रसिद्धिमिति सूचयति । स्वप्रयोजनाभावे चरणं चरणश्रमणेन कुतस्तेषामित्यतो भाषते । मादृशाम् । अस्मादृशामित्यनुक्त्वोक्त्वा च मादृशामिति मा दृक् न विद्यते येषामिति मादृशस्तेषां मादृशामित्यनन्तर्गर्भं स्फोरयामास । यद्वक्ष्यति ग्रामपशोर्मुग्धधियेति । मद्विधानां बोधाय ज्ञानोद्बोधनार्थमिति स्वस्वरूपं निरूपयति । ग्राम्यबुद्धीनां सुरतादिरतचेतसामत्र लीनमनसां वा । ग्राम्यमश्लीलबन्धयोरिति विश्वः । तर्हि ज्ञातावेव किमर्थं काविति शङ्केत्यत आह ।। उन्मत्तलिङ्गिन इति । उन्मत्तस्योन्मादवतो लिङ्गं येषां ते तथा । सामान्यतोऽवगमेऽपि नेत्थङ्कारं मतिरिति युक्ताऽनुयुक्तिरित्याशयः ।। १५ ।।

चट्टी – अवनौ भूमौ । बोधनायैते उन्मत्ता इति ज्ञापनायोन्मत्तस्यैव लिङ्गं येषां ते तथा ।

।। १५,१६,१७,१८ ।।

कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः ।
अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः ।। १६ ।।

सत्यधर्मा – ते च कुमारः सनत्कुमारो नारदोऽङ्गिरा देवलोऽसितोऽसितदेवल इत्येकस्य नाम इति केचित् । विश्वामित्रोऽसितो गृत्समदोऽसितः । अपान्तरतमः कश्चिदिति कश्चित् । उत्तरत्रात्रे-वापान्तरप्राग्यतमः पुरोगा इति सङ्ग्रहरामायणोक्तेः साक्षाद्भगवानेव । मेधातिथिर्देवल इत्यत्रैव वैशकलित्यनामनी श्रुते इति भिन्नौ मुनी धृत्याहुः । मोक्षधर्मे । जैगीषव्यस्य संवादमसितस्य च भारत । जैगीषव्यं महाप्राज्ञं धर्माणामागतागतम् । अक्रुद्ध्यन्तमधृष्यन्तमसितो देवलोऽब्रवीत् । तथैव तत्रैवान्यत्र । उवाचासितदेवल इत्युक्तेः । भागवते च सामानाधिकरण्येनान्वयेनोभयैक-कण्ठ्यसम्भवात् ।। १६ ।।

वसिष्ठो भगवान् रामः कपिलो बादरायणिः ।
दूर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽऽरुणिः ।। १७ ।।

सत्यधर्मा – भगवानिति व्यासादिसर्वभगवद्रूपविशेषणम् । रामः परशुरामः । कपिलः । सुखं पिबन् लीलयैव कपिलो व्यास एव च । विशिष्टत्वादिति । विशिष्टः सर्वस्मादासमन्तात्स एवेति व्यास इति गीतातात्पर्योक्तेस्तदर्थो ज्ञेयः । कृष्णव्यासौ रामकृष्णौ रामकपिलौ यज्ञप्रमुखाः स्वयं स इति गीताभाष्योक्तेः । कपिलव्यासकृष्णाद्यं प्रत्यक्षं वैभवं स्मृतमिति च गीताभाष्योक्तेः । तथा

चाग्नेयशाखायाम् । स व्यासो वीति तमं सवै वि सोऽधस्तात्स उत्तरतः स पश्चात्स पूर्वस्मात्स दक्षिणतः स उत्तरत इतीति च । कपिलो वासुदेवांशस्तन्त्रं साङ्ख्यं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थपरिबृंहितम् । सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहित इत्यादिप्रथमतात्पर्योक्तेः । कपिलो वासुदेवाख्य इत्यारभ्य सत्तत्त्व इत्यन्तेन सविस्तरमुक्तमिदं छान्दोग्यभाष्येऽनुसन्धेयम् । कपिलो नेतरः । बादरायणिः शुकः ॥ १७ ॥

रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः ।
पराशरोऽथ मैत्रेयो भरद्वाजश्च आरुणः ।
ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिखस्तथा ॥ १८ ॥

सत्यधर्मा – आसुरिः सन् ॥ १८ ॥

हिरण्यनाभः कौशल्यः श्रुतदेवः क्रतुध्वजः ।
एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥ १९ ॥

सत्यधर्मा – ज्ञानहेतवो ज्ञानवदितरान्कुर्वन्तीति ते तथा ॥ १९ ॥

चट्टी – अज्ञानिनां ज्ञानहेतवः ॥ १९ ॥

तस्माद् युवां ग्राम्यपशोर्मम मुग्धधियः प्रभू ।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥ २० ॥

सत्यधर्मा – फलितमभिलपति ॥ तस्मादिति । अन्धयतीत्यन्धमज्ञानं तमस्तस्मिन्निमग्नस्य ज्ञानदीपः । प्रभू युवां प्रभुभ्यां युवाभ्यां ज्ञानदीपो ज्ञानरूपो दीप उदीर्यतामुच्यताम् ॥ २० ॥

चट्टी – मुग्धधियो मूढबुद्धेर्मम युवां प्रभू रक्षकावुभावपि समाविति वा । अतो युवाभ्यां ज्ञानदीपक उदीर्यतां प्रवर्त्यताम् ॥ २० ॥

अङ्गिरा उवाच–

अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप ।
एष ब्रह्मसुतस्साक्षान्नारदो भगवान् ऋषिः ॥ २१ ॥

सत्यधर्मा – प्रत्ययार्थं प्राक् प्रत्यक्षतोऽनुभूतं स्मारयितुमेक एव वक्ति ॥ अहमिति । पुत्रद इति परिचायकोक्तिः । ब्रह्मसुत इत्युभयान्वयीति ज्ञेयम् । अस्माभिः स्वयमेव स्वायम्भुवोऽहमिति वक्तुं किञ्चित्सङ्कोचेन द्वितीयार्धे उक्तवानिति ज्ञेयम् ॥ २१ ॥

चट्टी – कौ तु युवामित्यस्योत्तरमाह ॥ अहमिति ॥ २१ ॥

इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ।
अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥ २२ ॥

सत्यधर्मा – दुस्तरे आवाभ्यां विना दुष्पारे अस्मत्तमआवरणे भवतः किमित्यत आह ॥ अतदर्हं तत्तमोयोग्यमिति । तत्रापि नारदान्न विशेषणतया । तत्र हेतुर्महापुरुषगोचरं भगवत्प्रियम् । महापुरुषाणां त्वया कीर्तितानां तदितरेषां सत्पुरुषाणां विषयो बोधयितुमिति तं वा ॥ २२ ॥

चट्टी – अतदर्हत्वे हेतुर्महापुरुषगोचरं श्रीहरिभक्तमनुस्मृत्य विचिन्त्य ॥ २२ ॥

अनुग्रहाद् भगवतः प्राप्तावावामिह प्रभो ।
ब्रह्मण्यो भगवद्भक्तो नावसीदतुमर्हति ॥ २३ ॥

सत्यधर्मा – भगवतो हरेरनुग्रहादुदिततया त्वयि सतः । मय्येवानुग्रहाद्दूहागमनमिति तव मतिर्मा भूद्भगवद्भक्तमात्रं पात्रमस्मदुपदेशस्येति सामान्येन शंसति ॥ ब्रह्मण्य इति । ब्रह्मणि भगवति अः दुर्जनोऽभगवद्भक्त इवावसीदितुं दुःखमनुभवितुं नार्हतीतीह प्राप्तावावामित्यन्वयः । ब्रह्मण्यो ब्राह्मणप्रियो भगवद्भक्त इति वा ॥ २३ ॥

चट्टी – भगवद्भक्तिमतो न नाशः । न मे भक्तः प्रणश्यतीति भगवता प्रतिज्ञातत्वादिति भावेनाह ॥ ब्रह्मण्य इति ॥ २३ ॥

तदैव ते परं ज्ञानं ददामि गृहमागतः ।
ज्ञात्वाऽन्याभिनिवेशं ते पुत्रमेवाददामहम् ॥ २४ ॥

सत्यधर्मा – पुरा गृहमागतः किमिति नानुजग्राह भगवानित्यतः सोऽसमय इति तथैव समयाशिषमित्याह ॥ तदैवेति । संसारतारकं ज्ञानं ददामीत्युपदिशामीति गृहमागतः । तथाऽपि तवान्याभिनिवेशमन्यस्मिन्पुत्राद्यशाश्वतविषयेऽभिनिवेशमाग्रहं ज्ञात्वा पुत्रमेव ददामीत्यददामिति शेषेण वा । क्रियाप्रबन्धे लडित्युक्तेर्ददामीत्यस्यैवाददामित्यर्थतया वा लट् । स्म इत्युक्ते न हीति स्मशब्दाध्याहारेणैवोपपत्तिर्ज्ञेया ॥ २४ ॥

चट्टी – यद्यहमनुग्राह्यस्तर्हि पूर्वमेव ज्ञानं कुतो नोपदिष्टमित्याशङ्क्य ज्ञानांगभूतवैराग्याभावादिति भावेनाह ॥ तदैवेति । यद्यपि तदैव पूर्वागमनसमय एव ज्ञानं न ददामि तथाऽपि तं पुत्रविषयकम् । अभिनिवेशमाग्रहं ज्ञात्वा पुत्रमेव ददामीत्यर्थः ॥ २४ ॥

अधुना पुत्रिणां तापो भवतैवानुभूयते ।
एवं दारा गृहा रायो विविधैश्वर्यसम्पदः ॥ २५ ॥

तात्पर्यम् – 'मनसो द्वेषरागाभ्यां पुण्यपापसमुद्भवः । पुत्रादि पुण्यपापाभ्यां तस्मात्सर्वं मनोभवमि'ति नारदीये ॥ २५ ॥

सत्यधर्मा – अधुना पुत्रिणां ताप इत्यारभ्य मनोभवा इत्यन्तानि पद्यानि पुत्रादीनां मनोभवत्वं मे तादृशमिति प्रमाणेन प्रदर्शयन्व्याचष्टे ॥ मनस इति । मनसो जाताभ्यां द्वेषरागाभ्यां रागद्वेषाभ्यां पुण्यपापसमुद्भवः । रागात्पुण्यस्य पापस्य द्वेषात्समुद्भवः । रागद्वेषाभ्यामिति वक्तव्ये द्वेषपुरस्कृतिरे-तन्मात्रपर्यवसायिनः पुण्यस्यानिष्टतां स्फुटयितुमिति बोध्यम् । तस्मान्मनोजातरागद्वेषजातत्वेन पुत्रादिसर्वं मनोभवमित्युच्यत इति भावः ॥ ततश्चायं श्लोकार्थः ॥ पुत्रिणां भावी तापः प्रशस्तपुत्रवता भवतैवेदानीमनुभूयते । एवं पुत्रवदेव स्ववियोगाद्दारा भार्या गृहा आगाराणि रायो वित्तानि विविधैश्वर्यसम्पदस्तापापादिकाः ॥ २५ ॥

चट्टी – इदानीं विषयदोषदर्शनेन विरक्तस्य तव ज्ञानाधिकार इत्याशयेनाह ॥ अधुनेति । दारादीनामनित्यत्वादिकमतिदिशति ॥ एवमिति । एवं पुत्रवद्रायोऽर्थाश्चला अनित्याः । किञ्च हे शूरसेन । इमे राज्यादयः सर्वे शोकादिप्रदाः ॥ २५ ॥

शब्दादयश्च विषयाश्चला राजन् विभूतयः ।
राज्यं मही बलं कोशो भृत्यामात्यसुहृज्जनाः ॥ २६ ॥

सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ।
गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २७ ॥

दृश्यमाना विनाऽर्थेन न दृश्यन्ते मनोभवाः
कर्माभिध्यायतो नाना कर्माणि मनसोऽभवन् ॥ २८ ॥

सत्यधर्मा – स्वप्नः स्वाप्निकः पदार्थो मायामनोरथा माययेशेच्छया मनसा स्वस्य रथाः । बहुवचनमाद्यर्थे । रथाः पन्थाश्चेत्येतदादयः स्वप्नो हरिस्तेनैव कर्त्रा माययेच्छया करणेन । मनसः

सकाशाद्रथा रथादयो मनोरथास्तत्सदृशा इति वा । स्वप्नो भूत्वा स्वापकोभूत्वा । स्वापं नयतीति स्वप्न इति च व्युत्पत्तिरिति बृहद्भाष्योक्तेश्च शब्दादयश्च विषयाश्चला अस्थिरा राजी राज्ञि सति । कालबलतो राज्यं मही बलं सेना कोशो धनस्थानं भृत्या दासा अमात्या मन्त्रिणः सुहृज्जना बान्धवा इति सर्वेविभूतयो विभोः प्रभोर्भूतयोऽभिप्रेतार्थास्ते न । यैस्तादृशाः संशोकमोहभयार्तिदा इति चला गन्धर्वनगरप्रख्या यथा मेघमण्डले गन्धर्वनगरवद्दृश्यते पुनर्न दृश्यत इति तस्य प्रख्येव प्रख्या शोभा येषां ते तथा । यद्वा गान्धारयन्वर्तते यद्गन्धर्वस्तेन केशव इति ऋग्भाष्यटीकायां गोपदोपपदाभ्यां धृञ् अवस्थाने वृतु वर्तन इत्याभ्यां डः उपपदस्य च गंभावः । गां वाचमित्युक्तेर्गन्धर्वो हि भगवांस्तेनैव नगरममृतं तत्काले तत्प्रख्यास्तद्वद्दातास्त्रैगुण्याख्यविषं यापयन्ति त्रैगुण्यविषहारिण इति गीतातात्पर्योक्तेः । एतत्कर्मानुरोधेन विषविषमेऽपि विषये पीयूषशेमुषीमीदृशो ददातीति भावः । प्राचीनार्थक्षेपशून्यप्रयाताप्रतीतानां निदर्शनारतग्रदर्शनेनादर्शनीयां तनोति स्वप्नमायामनोरथा इति । स्वप्नो मायया भगवदिच्छया मनोरथा मनोगताः पूर्वानुभूतसंस्कारद्वाराऽर्थेन तत्क्षणवीक्षणादिरूपप्रयोजनेन विना दृश्यन्ते पुनर्जागरणे न दृश्यन्त इति मनोभवा अतश्चला अस्थिरा न मिथ्याभूताः । सार्धश्लोकत्रिकान्वयः । न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत इत्यादेरिति वा । विशिष्टमाचष्टे ॥ कर्मेति । कर्म तत्फलमभिध्यायतश्चिन्तयतस्तत्कालेऽपि पुनः कर्माणि

शुभाशुभफलदानि मनसः सकाशादभवन्भवन्ति । त इमे दारादयः सर्वे मानसाश्चला इति तेषु नात्यन्तमभिलाषः कार्य इति भावः ॥ २६, २७, २८ ॥

चट्टी – किञ्चागमापायित्वेन गन्धर्वनगरतुल्याः । गन्धर्वनगरं ह्यकस्मादेव क्वचिदायाति वाऽपैति चेति प्रसिद्धम् । नन्वयं पुत्रदारादिरूपो बन्धः किंमूल इत्यत आह ॥ मनोभवा इति । मनोजन्या इत्यर्थः । तर्हि किमयं बन्धः स्वप्नादिवन्मिथ्येत्यत आह ॥ स्वप्नेति । स्वप्नः स्वप्नजाग्रत्वं माया ऐन्द्रजालिकम् । मनोरथो मनोरथस्थायित्वम् । दृश्यमानाः प्रतीतमात्रशरीराः स्वप्नादय इवेमे पुत्रादयोऽर्थेन पारमार्थिकस्वरूपेण विना न दृश्यन्ते प्रत्यक्षादिप्रमाणैः सत्यत्वेनैव ज्ञायन्त इत्यर्थः । ननु पुत्रादयः पुण्यापुण्यकृता इति केचिदाहुः । तत्कुतो मनोभवत्वमित्यत आह ॥ कर्मेति । कर्मेप्सिततमम् । अभिध्यायतो रागाद्युपहतान्मनस एव निमित्तान्नानाकर्माणि पुण्यपापलक्षणान्यभवन् । कर्मणामपि रागद्वेषद्वारा मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः ॥ तथा चोक्तम् ॥ मनस इत्यादि नारदीये ॥ २६, २७, २८ ॥

अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ।
देहिनो विविधक्लेशसन्तापकृदुदाहृतः ॥ २९ ॥

तात्पर्यम् – 'द्रव्यात्मकः स्थूलदेहः क्रिया कर्मेन्द्रियाणि च । ज्ञानेन्द्रियाणि च मनो ज्ञानात्मकमुदाहृतमि' ति ब्रह्मवैवर्ते ।। 'कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदि' ति शब्दनिर्णये ।।२९।।

सत्यधर्मा – अयं हि देहिनो देह इति श्लोके देहस्य द्रव्यात्मकत्वमुच्यते तत्किंरूपमित्यतो निरूपयितुं मानमाह ।। द्रव्यात्मकमिति । द्रव्याणि पञ्चभूतानि तदात्मकस्तदुपादानक इति द्रव्यमित्युच्यते । ज्ञानशब्देन ज्ञानेन्द्रियाणि मनश्च क्रियापदेन कर्मेन्द्रियाणि चोच्यन्ते । इदं ज्ञानक्रियात्मकमुदाहृतमित्यन्वयः । ज्ञानक्रियापदाभ्यां कथं ज्ञानेन्द्रियकर्मेन्द्रियेति व्याख्यानमित्यतः प्रमाणमाख्याति ।। कार्यकारणयोरिति । ज्ञानक्रिययोर्ज्ञानेन्द्रियकर्मेन्द्रियकार्यत्वात्कार्यवाचकपदेनैवं कारणवाचकेन च यथायथमेकशब्दव्यवहृतिर्भवेत् । अत एताभ्यां पदाभ्यां तद्ग्रहणं युक्तमिति भावः ।। अथ मूलप्रथनम् ।। नश्वरतयैव गन्धर्वनगरादिनिदर्शनप्रदर्शनं न मिथ्यात्वेनार्थक्रियोपलब्धेरित्याह ।। अयं हीति । देहिनो नो देहि । अपेक्षितमिति वोपचितिमत इति वा । दिह उपचय इति स्मरणात् । देहाभिमानवतो जीवस्यायं देहो विविधक्लेशसन्तापकृत् विविधा एवमादिनानाविधाः क्लेशास्तैर्जनितो यः सन्तापोऽन्तस्तापस्तत्कृत् । उदाहृतः क्लेशद आस देह इत्यादावुदाहृत इत्यर्थः । देहशब्देन स्थूलशरीरमेवात्र विवक्षितमित्यत्र विनिगमकमाह ।। द्रव्यज्ञानेति । द्रव्याणि पञ्चमहाभूतानि ज्ञानं ज्ञानेन्द्रियाणि मनश्च क्रिया कर्मेन्द्रियाणि चेत्येतदात्मकः ।। २९ ।।

चट्टी – तदेवं ममताऽऽस्पदानां पुत्रादीनां दुःखादिहेतुत्वमुक्तम् । तत्र च देहसंबन्धो मूलमित्याह ।। अयं हीति । हिशब्दोऽवधारणे । अयं द्रव्यज्ञानक्रियात्मको द्रव्यं पञ्चभूतानि ज्ञानं ज्ञानजनकेन्द्रियाणि त्रीणि कर्मकारकेन्द्रियाणि । एतद्रूपो देह एव देहिनो देहोऽहमिति मन्यमानस्य देहिनो जीवस्य विविधान्क्लेशान्सन्तापांश्च करोतीति विविधसन्तापक्लेशकृत् । उदाहृत इत्यर्थः ।। तथा चोक्तम् ।। द्रव्यात्मक इत्यादि ब्रह्मवैवर्ते ।। २९ ।।

तस्मात् स्वस्थेन मनसा विमृश्य गतिमात्मनः ।
द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ।। ३० ।।

तात्पर्यम् – 'अनन्यापेक्षि(क्ष)तस्त्वेको हरिरन्यद्द्वयं स्मृतम् । अन्यापेक्षत्वतस्तेन प्राप्तत्वाद्द्वैत-मुच्यत' इति च ।। ३० ।।

सत्यधर्मा – तस्मात्स्वस्थेन मनसेति श्लोके द्वैते जीवभेदे विश्रम्भं त्यजेत्यन्यथाप्रतीतिं प्रमाणेन पराभावयन्ति ।। अनन्येति । अन्योऽपेक्षितो येन स न भवतीत्यनन्यापेक्षितः । अनन्यापेक्षत इति पाठेऽनन्यापेक्षत्व इत्यर्थः । अन्यद्भगवद्भिन्नम् । ध्रुवार्थविश्रंभं ध्रुववत् ध्रुवराजवत् । अर्थे भगवति

विश्रंभमाविश । अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुव इत्यादेः । उपशमं तात्कालिकम् । शमं त्यज । यद्वोपशमं समाधानमितरेषां त्यज । देहि गतम् । एकवचनस्य जात्यादिपरत्वं मत्वा बहुला एवमनन्याभिलाषा इति कोऽपि वदेदिति तन्मुखबन्धार्थमेक इति । एको न श्रीकान्तादन्य इति बोधयितुं हरिरिति । अन्यापेक्षत्वतो द्वयमित्युच्यते । द्विना द्वयेनेतं द्वितं तदेव स्वार्थिकेणि द्वैतमित्युच्यते । इति च शब्दनिर्णय इति शेषः ।। ततश्चायं श्लोकार्थः ।। पूर्वं सर्वेऽपि साक्षाद्वा परम्परया वेत्युक्तं तन्नियमनेनैतच्छमनमनायासेन भवतीत्यत इदं कुर्विति वदन्ति ।। तस्मादिति । स्वस्थेन विषये द्वैतेऽन्यापेक्षे स्वतन्त्रे देहादौ तत्रैते ध्रुवार्था नित्यभूता विषया इति विश्रम्भं विश्वासं त्यज । उपशमं तत्स्पृहाभावं भगवन्निष्ठां वा । आविश । एवं तत्त्यागेन स्वत एवावेशो भवतीति द्योतनार्थमाविशेत्युक्तिः ।। ३० ।।

चट्टी – उपसंहरति ।। तस्मादिति । तस्मात्पुत्रादेः सन्तापहेतुत्वात्स्वस्थेनाव्यग्रेण मनसाऽऽत्मनः परमात्मनो गतिं तत्त्वं विमृश्य नित्यत्वादिना निश्चित्य परापेक्षत्वात्तद्वयशब्दापरपर्यायद्विशब्दवाच्येन जीवेनेतं प्राप्तम् । शरीरादिकं द्वितं द्वितमेव द्वैतम् । अनन्यापेक्षतस्त्वेक इत्यादिवचनात् । तस्मिन्द्वैते ध्रुवोऽयमर्थ इति विस्रंभं विश्वासं प्रणयं वा त्यज विरक्तो भव । ततश्चोपशमं भगवन्निष्ठमाविशाश्रयेत्यर्थः ।। ३० ।।

भोजो नाम नृपः स्वप्ने शत्रुग्रस्तान्नभोजनः ।
दुःखं दुर्विषहं प्राप्तः शोकमोहभयार्दितः ।। ३१ ।।

सत्यधर्मा – विषयेच्छातुच्छीकरणेन सम्पत्स्यते सर्वा सम्पदितीतीहासतः शंसति ।। भोज इति । शत्रुग्रस्तान्नभोजनः शत्रुणा ग्रस्तं तन्मुखकवलितं यदन्नं तदेव भोजनं यस्य स तदुच्छिष्टमिति यावत् । शोकमोहभयार्दितः सन् प्राप्तः दुर्विषहं दुःखम् । भयार्दितमिति पाठे तैः प्रापितमित्यर्थः । अर्द गतौ याचने चेति स्मृतेः ।। ३१ ।।

चट्टी – ज्ञानार्थिनां वैराग्यमवश्यं संपादनीयमित्यभिप्रायेण तत्रेतिहासमाह ।। भोज इति । शत्रुणा ग्रस्तं कवलितं यदन्नं तदेव भोजनं यस्य स तथा । शत्रूच्छिष्टान्नभक्षण इत्यर्थः ।। ३१ ।।

केचिद् विलुलुपुर्भोगानपरेऽवधिषुः श्रितान् ।
पूर्ववैरग्रहैर्जाया अन्य आत्मशिरोऽहरन् ।। ३२ ।।

सत्यधर्मा – विलुलुपुरलोपयन् । श्रितान्समीपवर्तिन अवधिषुःहिंसितवन्तः । स्वतन्त्रस्य वध-धातोर्वा हनो वध लिङि लुङि चेति स्मृतेरादेशस्य वा रूपम् । पूर्ववैरग्रहैः पुरातनवैरस्मरणादिभिः ।

अन्य इत्युत्तरान्वयि । आत्मशिरः स्वशिरः । अहरन्निति च पूर्वान्वयि । दृष्टस्य उद्यतायुधदोर्दण्डाः पतितैः स्वशिरोऽक्षिभिः । पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन्युधीत्यादेः । श्रुतस्यापि च दर्शनं सम्भवतीत्यवलोकनं सम्भवति ॥ ३२ ॥

चट्टी – केचिच्छत्रवस्तस्य भोगान् भोगसाधनानि प्रासादोद्यानानि विलुलुपुर्विनाशितवन्तः । अपरे शत्रवो विधिषु स्थितान् राजनियोगेषु वर्तमानान्पुरुषान् । आहरन्केचिज्जायामहरन् । अन्ये शत्रव आत्मनो भोजस्य शिरोऽहरन् । सर्वत्रापि कारणमाह ॥ पूर्वेति । पूर्ववैरानुस्मरणैरित्यर्थः । पूर्वं वैरं गृण्हातीति तथा तैः । कर्मभिरितिवा ॥ ३२ ॥

इत्थं दुरन्तदुःखौघादुत्थितस्तद(म)नुस्मरन् ।
तावद् भृशं सुनिर्विण्णो निर्जगाम ततो गृहात् ॥ ३३ ॥

सत्यधर्मा – शिरःपरामर्शेन तदित्युपपत्तिर्वा । तदनुस्मरन्निति पदमेकम् । तमनुस्मरन्निति समासेन वा समाधिरिति केचित् । तन्मते गम्यादित्वात्समासोपपत्तिः ॥ ३३ ॥

चट्टी – दुरन्तदुःखानामोघो यस्मिन्स तथा । तस्मात्स्वप्नादुत्थितः सन् । तं स्वप्नानुभूतमनुस्मरन् । भृशं निर्विण्णोऽतिविरक्तः सन् । तावत्तदानीमेव ॥ ३३ ॥

दर्शयन्नात्मनाऽऽत्मानं निस्सङ्गः शान्त(न्ति)विग्रहः ।
प्रविष्टो ब्रह्म निर्वाणं कुलायं नाविदच्च तम् ॥ ३४ ॥

सत्यधर्मा – आत्मानं स्वशरीरं नात्मनाऽशरीरत्वेन निरभिमानेन दर्शयन् लोकानां निर्वाणं मोक्षमुद्दिश्य ब्रह्म प्रविष्टो ध्यानेन । न लोकानामेवानात्मत्वेन प्रदर्शनमपि तु स्वयमप्यसम्प्रज्ञात-समाधिमधितिष्ठन् कुलायं तं देहं नाविदच्च न बुबोध ॥ ३४ ॥

चट्टी – निःसङ्गो मुक्तदुःसङ्गः । शान्तिविग्रह उपशान्तवैर आत्मना स्वेच्छयाऽऽत्मानं स्वात्मानं दर्शयन् । जडोन्मत्तादिवदिति शेषः । ग्रहान्निर्जगाम प्रवव्राज । यदहरेव विरजेत्तदहरेव प्रव्रजेदित्युक्तेरित्यर्थः । तत आत्मना मनसा । निर्वाणमप्राकृतशरीरं परब्रह्म प्रविष्टः सन् । स्वयं यस्मिन्कुलाये देहे स्थितस्तं कुलायं देहं नाविददसंप्रज्ञातसमाध्यवस्थापन्नः सन् । देहाभिमानादु-न्मुक्तोऽभूदित्यर्थः ॥ ३४ ॥

नारद उवाच–
इमां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम ।
यां धारयन् सप्तरात्रद् द्रष्टा संकर्षणं विभुम् ॥ ३५ ॥

सत्यधर्मा – इयन्तं समयं गिरमङ्गिरसः श्रुत्वा ज्ञात्वा तं चोपदेशयोग्यं योगी कृपापरवशो नारद इति स्वाभिधामन्वर्थां विधातुं विधातृजो वसुधाधिपमाहेत्याह ।। नारद इति । इमां मन्त्रोपनिषदं मम सकाशात्प्रयतो निगृहीतचित्तः प्रतीच्छ । मन्त्रमित्येवानुक्त्वोपनिषदमिमामित्युक्त्या दारादित्यागो झडिति कार्य इत्युक्तौ न तद्रुचेः रुचिः स्यादिति यदि ता न त्याज्यास्तर्हि इमां स्वीकुर्विति भूयः सान्त्वयामास नारद इति ज्ञेयम् । विरक्तिरमणीं संश्लिष्यत इत्यादिमहाकव्युक्तेः । उपनिषदमिति रहस्यस्याप्युपदेश्यत्वप्रतिज्ञानेन ज्ञानितामेतस्य ध्वनयामासेति च मन्तव्यम् । सङ्कर्षणं वासुदेवादीनादिमान्विहाय सङ्कर्षणचित्तकर्षणोपदेशे किन्निमित्तमिति चेत् । पृच्छा तवाच्छा लक्षय सूक्ष्मेक्षिकयोत्तरं वदिष्यामः । प्राग्वृत्रासुरोऽहिशब्दवाच्यः । तस्यैव चित्रकेतुत्वादिति । अहिर्वृत्रासुरे सर्प इति विश्वः । अनन्तान्तर्गतं भगवन्तं सप्तरात्रात् । चात्सङ्कर्षणाख्यरूपेण विवेशानन्तमेव च । तं ध्यायति सदानन्तस्तस्मान्मुक्तिपदेच्छयेति तत्त्वनिर्णयगीतायामिति बृहद्भाष्योक्तेः । यां मन्त्रोपनिषदं धारयन् द्रष्टा फलं लघीयसि लवे लभ्यत इति सत्त्वाल्लक्षणीयेति भावः ।। ३५ ।।

चट्टी – अङ्गिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मन्त्रविद्यां नारद उपदिशति ।। इमामिति । इमामुत्तराध्याये वक्ष्यमाणामुपनिषदं परं श्रेयोस्यामिति । उपनिषन्मन्त्रमेवोपनिषत्तां प्रति इच्छाग्रहणाल्लिप्सामुत्पादयितुं विद्यायाः क्षिप्रफलत्वमाह ।। यामिति । यां मन्त्रोपनिषदं सप्तरात्रं धारयन् । संकर्षणं शेषान्तर्यामिणं संकर्षणनामकं भगवन्तं द्रष्टा द्रक्ष्यसि भवानित्यर्थः ।। ३५ ।।

यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे
शर्वादयो भ्रममिमं द्वितयं विसृज्य ।
सद्यस्तदीयमतुलानधिकं महित्वं
प्रापुर्भवानपि परं न चिरादुपैति ।। ३६ ।।

इति श्रीमद्भागवते षष्ठस्कन्धे पञ्चदशोऽध्यायः ।

तात्पर्यम् – 'रुद्राद्याः शेषदेहस्थं विष्णुं संकर्षणाभिधम् । शेषान्तर्यामिणं ज्ञात्वा स्वपदं प्रापुरञ्जसेऽति तन्त्रभागवते । 'द्वैतेन बन्धसंत्यागाद्वैतत्यागी भवत्युते'ति शब्दनिर्णये । देहाद्येऽहंममाभिमानो भ्रमः । 'तेषान्तेषां पदान्येव वैष्णवानि पदानि तु । तेषां महित्वं च तथा हरेस्तद्वशगं यतः । अतुल्यानधिकं चैव तस्य तस्यैव मुक्तिगम् । स्वस्यैव पूर्वमाहात्म्यमपेक्ष्य न हरेः

कचित् । माहात्म्यमन्यप्राप्यं स्यान्न ते विष्णविति श्रुतेरि'ति तन्त्रभागवते ।। 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते । तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरिरि'ति स्कान्दे ।। तत्प्रसादलभ्यत्वात्तदीयमपि तेनातुलमनधिकं चान्यमाहात्म्यम् ।। ३६ ।।

सत्यधर्मा – यत्पादमूल इति श्लोकैतत्पूर्वश्लोकयोश्च पूर्वे सर्वे शर्वाद्या दर्वीकरोर्वीवरवरिवश्यया महत्त्वमापुरिति प्रतीयते तच्च द्विजफणिपमृडा इति वचनात्किञ्चित्सङ्कुचितमहत्त्वस्य महत्तानुपयोगिनः सत्त्वेऽपि समत्वात्कथमुपास्योपासकतेत्येतदतन्त्रयितुं तन्त्रभागवतवचनं पठति ।। रुद्राद्या इति । रुद्राद्या इति सोऽप्यादिपदग्राह्यः । देहस्थमित्युक्ते देहेऽपि सन्ति तद्वन्नेति वक्तुं शेषान्तर्यामीति । अञ्जसा ज्ञात्वेत्यन्वयः । द्वितीयं भ्रममिमं विसृज्येत्यनेन देहादेर्मिथ्यात्वमुच्यत इति प्रतीयते । तद्वारयितुमादौ मानमुदाहृत्य स्वयं व्याकरोति ।। द्वैतेनेति । अहंममतारूपबन्धसन्त्यागाद्वैतत्यागी भवति तथोच्यत इति भावः । भ्रमत्वमित्याह ।। देहाद्ये इति । तदीयमतुलानधिकं महत्त्वं नापुरिति तत्साम्येन वा तत्तादात्म्येन वेति भाति तद्धानहान्यै मानमाह । तेषान्तेषामिति पदमेकम् । रुद्रादीनां पदान्येव वैष्णवानि विष्णुसम्बन्धीन्येव तेषां महित्वं च तत्सम्बन्ध्येव । तत्र निमित्तं तद्वशगं यत इति । सदा तथैवेत्यतुल्यानधिकम् । कर्मधारयः । इदानीं तथा चेत्तदानीं कथमित्यतः कथयति । स्वस्यैव पूर्वमाहात्म्यं योग्यतारूपमपेक्ष्य तस्यैव मुक्तिगमिति । कुत एतदिति मन्दसन्देहमन्दतायै श्रुतिमुदाहृत्य मानं वदति ।। न ते विष्णवितीति । न ते विष्णो जायमानो न जातो देवमहिम्नः परमन्तमापेति श्रुतिरनेनोपात्तेति ज्ञेयम् । बहुप्रमाणसंवादश्च दार्ढ्यहेतुरेवेत्युक्तेः । स्वोक्तस्थेम्ने विधिमप्यवधीकुर्वत्स्कान्दवचनमुदाहरति ।। ब्रह्मेति । हे हरे यद्यस्माद्यत्प्राप्तुं नैव शक्यते तत्कैवल्यं तव स्वभावः स तादृशो भवान् केवलो भवतीति योजना । विशिष्टं स्ववचनेन पर्यवसाययति ।। तत्प्रसादेति । अन्यमाहात्म्यमन्येषां ब्रह्मरुद्रादीनाम् ।। अथ मूलार्थः ।। यत्पादमूलं यस्य पादावेव मूलं शर्वाद्यैः पादसमीपमिति वा । मूलमाद्यन्तिकेऽपि चेति विश्वः । उपसृत्य सेवित्वा शर्वादयः पूर्वे प्राचीना महित्वं सद्यः प्रापुः । तदेव व्यनक्ति । अतुलानधिकं स्वसदृशव्यतिरेकेण । असदृशमनधिकं च । न वेतरसम्बन्धि तदित्याह ।। तदीयमिति । तदीयं तदधीनत्वाद्भगवदीयं च तदेवोच्यते । तत्प्राप्ताविति- कर्तव्यमाह ।। भ्रममित्यादिना । द्वितीयमस्वातन्त्र्येऽपि स्वतन्त्रताद्यन्यथाज्ञानजमिमं प्रायोऽनुभवसिद्धभ्रमं देहाद्यहंममाभिमानं विसृज्य त्यक्त्वा । ननु ते प्राप्नुवन्तु मम तु किमित्यतो वदति ।। नरेन्द्र भवानिति । परं शेषान्तर्गतम् । न चिराच्छीघ्रम् । उपैत्यतस्तच्छरणं नृप कुर्विति भावः ।। ३६ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे पञ्चदशोऽध्यायः ।। ६-१५ ।।

चट्टी – संकर्षणस्य पुरुषान्तरसाधारणत्वे किं तद्दर्शनेनेत्याशङ्क्य तन्महिमानमाह ।। यदिति । नरेन्द्र हे चित्रकेतो । पूर्वे पदप्राप्तेः पूर्वकालीनाः शर्वादयो रुद्रादिपदप्राप्तियोग्या यस्य सङ्कर्षणस्य पादमूलम् ।

उपसृत्योपास्य महिमत्वं शेषादिपदप्राप्तिलक्षणं मुक्तिगतस्वयोग्यानन्दप्राप्तिलक्षणं च माहात्म्यं प्रापुरित्यन्वयः ।। तथा चोक्तम् ।। रुद्राद्या इत्यादि । नन्वज्ञानादिलक्षणप्रतिबन्धकसद्भावेन कथं महिमत्वप्राप्तिरित्यत आह ।। भ्रममिति । भ्रमं देहाद्यहं ममाभिमानलक्षणमिमं तन्मूलं द्वितयं देहादिबन्धं च विसृज्य परित्यज्येत्यर्थः ।। तदुक्तम् ।। द्वैतेनेत्यादि शब्दनिर्णये । देहाद्यहं ममाभिमानो भ्रम इति च । कीदृशं महत्वं प्रापुरित्यत आह ।। तदीयमिति । संकर्षणसंबन्धीत्यर्थः । ननु तदीयमहत्वप्राप्तिः कथमुपपद्यते । न ते महित्वमन्वश्नुवन्ति । ब्रह्मेशानादिभिरित्यादिश्रुतिस्मृति विरोधादित्यत आह ।। अतुलेति । तत्प्रसादलभ्यत्वेन तदधीनत्वात्तदीयमित्युच्यमानमपि तन्महिम्ना नातुल्यमनधिकं चेत्यर्थः । यद्वा । रुद्रादेरेव मोक्षात्पूर्वतनमाहात्म्यापेक्षया मोक्षे विद्यमानमाहात्म्यमतुलानधिकमित्यर्थः ।। रुद्रादेर्मोक्षात्प्राचीनमाहात्म्यस्य साधनोपचयेन प्रतिक्षणं वर्धमानत्वाद्तुलस्य तदधिकस्य वा प्राप्तिरस्ति। मुक्तौ तु प्राप्तादधिकस्य समस्य वा प्राप्त्यभावान्मुक्तिगतं माहात्म्यमतुलानधि-मकाहात्म्यमित्यर्थः ।। तथा चोक्तम् ।। तेषां तेषामित्यादिश्रुतेरिति । अस्त्वेवं संकर्षणोपासकानां महित्वप्राप्तिः । प्रकृते किमायातमित्यत आह ।। भवानिति । यत्पादमूलमुपसृत्येत्यादेरनुकर्ष-णार्थोऽपिशब्दः । भवानपि परं महित्वं न चिरादविलंबेनैवोपैत्युपैष्यसीत्यर्थः ।। ३६ ।।

इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ।। ६-१५ ।।

।। अथ षोडशोऽध्यायः ।।

श्रीशुक उवाच–

अथ देवऋषी राजन् सम्परेतं नृपात्मजम् ।
दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ।। १ ।।

सत्यधर्मा – ।। हरिः ॐ ।। इत्युक्तेऽपि न नियतमानसान्सावनीशान्विलोक्य नित्या जीवाः परमनित्यंतु देहस्ततो नाशान्न शोको युज्यतेऽनादौ संसारे कियन्तः पितरः कियत्यो मातरोऽहं कस्त्वं क इति तं मृतदेहं मन्त्रबलेनोत्थाप्य तन्मुखेन वाचयित्वा समाधत्ते नारद इति वदति ।। अथेति । दर्शयित्वोत्थाप्येति शेषः । ज्ञातीनामनुशोचतां सतां तं प्रतीत्युवाच ह ।। १ ।।

चट्टी – ।। हरिः ॐ ।। जातवैराग्यदार्ढ्यस्य चित्रकेतोः सुतोक्तिभिः ।
देवर्षेरुपदेशेन श्रेयः प्राप्तिर्निरूप्यते ।। १ ।।

नारद उवाच–

जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते ।
सुहृदो बान्धवांस्तप्तान् शुचा त्वत्कृतया भृशम् ॥ २ ॥

सत्यधर्मा – हे आत्मन् जीव । ते भद्रं मङ्गलमस्तु । ते मातरं पितरं पश्य । जीव अन्तर्णीतण्यन्तः जीवय त्वत्कृतया त्वन्निमित्ततया ॥ २ ॥

चट्टी – आदौ तावत्तत्पुत्रमुखेनैव पितृपुत्रादिसंबन्धोऽनित्य इति दर्शयितुं योगबलेन तमेव ज्ञातिनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ २ ॥

कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ।
भुङ्क्ष्व भोगान् पितृप्राप्तानधितिष्ठ नृपासनम् ॥ ३ ॥

सत्यधर्मा – शेषं शिष्टं पितृप्राप्तान्परम्परागतान् ॥ ३ ॥

चट्टी – शेषमवशिष्टमायुरस्ति । अपमृत्युना मृतत्वादिति भावः । पितृप्राप्तान्पितृदत्तान् ॥ ३ ॥

जीव उवाच–

कस्मिन् जन्मन्यमी ब्रह्मन् पितरो मातरोऽभवन् ।
कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥

सत्यधर्मा – जीव उवाच किमित्यत उवाच ॥ कस्मिन्निति । कर्मभिर्भ्राम्यमाणस्य । क्वेत्यत आह ॥ देवेति । द्वन्द्वान्ते श्रूयमाणयोनिशब्दस्य सर्वत्र सम्बन्धः । ममामी कस्मिन्कतमस्मिञ्जन्मनि मातरः पितरश्चाभवन् । अमूश्चामी चेत्येकशेषः पुमांस्त्रियेत्यनेनेति ज्ञेयम् । जन्मनामानन्त्यादेतत्सदृशानां जननीजनकानामनेकेषां जातत्वात्कं कं कथं कथय सान्त्वयामि । क सोऽहं केति जीवभाव इति भावः । ननु तव नित्यत्वादत्रैव गात्रे वसतिरहङ्कृत इति वा च्छेदः । तत्पक्षे स्वभावोक्तिः ॥ ४ ॥

चट्टी – तदेव कलेवरं प्रविश्योपस्थितो जीव उवाच । यद्वा । अन्तराले प्रेतशरीरे स्थित्वोवाचेति ज्ञेयम् । ब्रह्मन् हे नारद ॥ ४ ॥

बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ।
सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथः ॥ ५ ॥

सत्यधर्मा – अरिर्वधादिकर्ता । विद्विषः कुलपारम्पर्येण वैरिणो । मिथः परस्परम् ॥ ५ ॥

चट्टी – मयि मृते पुत्रदृष्ट्या शोकश्चेच्छत्रुदृष्ट्या हर्षः किं न क्रियत इत्याशयेन संबन्धस्यानित्यत्वमाह ॥ बंध्विति । बन्धवो विवाहादिसंबन्धिनो ज्ञातयः सपिंडा अरयो बन्धादिकर्तारः । कर्तव्यमुपकारमपकारं ये कुर्वन्ति ते मध्यस्थाः । मित्राणि स्वयमेव क्लेशस्थानं निरूप्योपकर्तारः । कर्तव्ये उपकारेऽपकारे च ये उदासते ते उदासीनाः । विद्विषोऽवासितकर्तारः । अप्रियं कर्तार इति यावत् ॥ तथा चोक्तम् ॥ द्वेष्योऽवासितं कृत्वाऽयं मात्रकारी तु मध्यमः । प्रियकृत्प्रियो निरूप्यापि क्लेशं यः परिरक्ष्यति । स मित्रमुपकारं त्वनपेक्ष्योपकारकृत् । यस्ततः सुहृत्प्रोक्तः शत्रुश्चापि वधादिकृदिति ॥ नारदीये च ॥ अनिमित्तस्नेहवांस्तु सुहृत्ज्ञात्वोपकारकृत् । मित्रवधादिकृदरिर्द्वेषस्त्वप्रियमात्रकृत् । उदासीनः स्नेहवतोऽस्नेहस्तत्कृतानुकृत् । मध्यस्था इति विज्ञेयो सुहृदेषु विशिष्यत इति ॥ ५ ॥

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ।
पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥

सत्यधर्मा – पण्यानि व्यवहारार्हाणि । अवद्यपण्येति यत् । नरेषु कर्तृषु विक्रेतृषु पर्यटन्ति ततस्ततः क्रयद्वारा । एवं जीवो योनिषु पर्यटति ॥ ६ ॥

चट्टी – कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तमाह ॥ यथेति । यथा पण्यानि क्रयविक्रयार्हाणि सुवर्णरजतादीनि । कर्तृषु व्यवहर्तृषु नरेषु पुरुषेषु पर्यटन्ति । एवं जीवोऽपि योनिषु जनकेषु परिभ्रमतीत्यर्थः ॥ ६ ॥

नित्यस्यार्थस्य संबन्धो ह्यनित्यो दृश्यते नृषु ।
यावद् यस्य हि संबन्धो ममत्वं तावदेव हि ॥ ७ ॥

सत्यधर्मा – तनु तोषमित्यतोऽङ्गसङ्गो भङ्गुर इत्याह ॥ नित्यस्येति । नित्यस्य चेतनस्य । अर्थस्य देहादेः सम्बन्धोऽनित्योऽशाश्वतिकः । नृषु संसारदशापन्नेषु दृश्यते । अनेनानुभवः प्रमाणीकृत इति ज्ञेयम् । यस्य जीवस्य यावत्सम्बन्धः शरीरे सत्ता तावदेव तन्ममत्वं पुत्रादिरिति ममता ॥ ७ ॥

चट्टी – एकस्मिन्नपि जन्मनि संबन्धस्यानित्यत्वं सदृष्टान्तमाह ॥ नित्यस्येति द्वाभ्याम् । यथा नित्यस्य जीवतोऽप्यर्थस्य पश्वादेः । नृषु संबन्धोऽनित्योऽनियतः क्रयविक्रयादिना संबन्धनिवृत्तेः । अस्य पश्वादेर्नृषु संबन्धो यावत्कालं वर्तते तावत्कालमेव ममत्वं ममायं पशुरित्याभिमानो भवति ॥ ७ ॥

एवं योनिगतो जीवः स नित्यो निरहंकृतः ।
यावद् यत्रोपलभ्येत तावत् स्वत्वं हि तस्य तत् ॥ ८ ॥

सत्यधर्मा – एवं योनिगतो जीवः स नित्यो यावद्यत्र योनौ अनिरहङ्कृतोऽभिमानवानुपलभ्यते तत्र तस्य स्वत्वं स्वकीयतावियोगे न किमपीति भावः ॥ ८ ॥

चट्टी – एवं योनिगतः पित्रादिसंबन्धं प्राप्तोऽपि स जीवो नित्यः । देहं जन्मादिना तस्य जन्माद्यभावात् । अत एव वस्तुतो निरहंकृतोऽहमस्य पुत्र इत्यभिमानशून्यः । यत्र पित्रादौ संबन्धिनि । यावदुपलभ्येत कर्मवशेन वर्तेत तावदेव तस्य पित्रादेस्तत्तस्मिन्स्वत्वम् । न तु विक्रयाद्युत्तर-कालेऽपीत्यर्थः । अथवैवं संबन्धः । यदुक्तं कलेवरं स्वमाविश्येति तत्र तस्मिन्कलेवरे ममेदानीं स्वत्वं निवृत्तमिति सदृष्टान्तमाह ॥ नित्यस्येति । नित्यस्य चिरकालावस्थायिनः सुवर्णादेः । योनिगतो देहं प्रविष्टः । यत्र देहे तस्य जीवस्य तत्तस्मिन्देहे स्वत्वं न तु मरणोत्तरकालमपीत्यर्थः। शेषं समानम् ॥८॥

एष नित्योऽव्ययः सूक्ष्म एकः सर्वाश्रयः स्वदृक् ।
आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥

तात्पर्यम् – एष नित्योऽव्ययः । 'अनित्यसम्बन्धयुताः पित्राद्या नित्ययुग्घरिरि'ति च । आत्मानं चावताररूपेण सृजते ॥ ९ ॥

सत्यधर्मा – एष नित्योऽव्यय इत्यत्रैतच्छब्देन व्यवहितजीवपरामर्श इत्यपविमर्शप्रतीतिं वारयितुं किञ्चित्स्वयमनूद्य मानमुदाहरति ॥ एष नित्योऽव्यय इति । अनित्यो यो देहसम्बन्धो देहादिना तेन युताः पित्राद्या नित्ययुक् नित्यं युज्यत इति स तथा । तर्हि नित्ययुक्ते आत्मानं स्वं सृजत इति कथं कथयेत्यतः कथयति । आत्मानं चावताररूपेण मत्स्यादिरूपेण सृजते सृजति प्रादुर्भावयति तेऽपि न विसदृशाः । यथोक्तं बृहद्भाष्ये । सर्वगुणैः पूर्तिरपि मत्स्यादिरूपिण इति प्रमुखीकृत्य सर्वावताररूपाणामपि चित्सुखरूपतेत्यन्तेन ॥ अथार्थापनं पद्यस्य ॥ एषोऽव्ययः । नित्य इति ध्वंसव्यावृत्तये प्रागभावा-प्रतियोगित्वं नित्यपदार्थः । एको मुख्यो यदा सदाऽवियोगिनीमपि रमां वियुक्तामिव करोति तदैक इत्युच्यत इत्येको वा । यथोक्तं बृहद्भाष्ये । विद्यमानामपि सदा भोगार्थं पुरुषोत्तमः । नित्यत्वेऽप्युभयोर्देवो वियुक्तस्तु यदा तदा । एक इत्युच्यत इत्यादि । तर्हि जना न जानते कुत इत्यत आह ॥ सूक्ष्म इति तस्याप्येक आश्रयोऽस्ति चेत्स जानीयादित्यत आह ॥ सर्वाश्रय इति । जीववर्गस्य ज्ञानवर्जने नास्त्येव स इति किन्नोच्यत इत्यतः स्वदृगिति । आत्मानं वेद स स्वयमित्यादेः । आत्ममायागुणैर्निजाधीनप्रकृतिगुणैर्विश्वं जगत्सृजति यथायथमुत्पादयति । आत्ममायागुणैरात्मन

इच्छया गुणैरप्रधानैर्ब्रह्मादिभिस्तत्प्रार्थनयेति यावत् । आत्मानं स्वयं च सृजति प्रादुर्भावयति । कुत एवं द्वैविध्यमित्यतः प्रभुरिति । प्रादुर्भावतया ये च तदन्यान् जानते विभोः । तेऽपि यान्ति तमो घोरं तस्मान्नैवं विदो विदुरित्यारभ्य प्रादुर्भावाः प्रकीर्तिता इत्यन्तेन कीर्तितं बृहद्भाष्येऽनुसन्धेयम् । श्रीपतिनानात्वे तत्पित्रादितेति भावः ॥ ९ ॥

चट्टी – एवमनित्यसंबन्धेषु पुत्रादिषु ममतां विहाय नित्यसंबन्धो भगवानेव भजनीय इत्यभिप्रेत्य भगवतो जीवेन सह नित्यसंबन्धमाह ॥ एष इति । य आत्ममायागुणैः स्वेच्छानियतप्रकृतिगुणैर्विश्वं परापरं जगत्सृजति । तन्नियामकत्वेन स्वात्मानं च सृजति प्रादुर्भावयति । एषो भगवान् । अव्ययो न व्येति जीवं विहाय नापगच्छतीत्यव्ययः । नित्यसंबन्ध इति यावत् । कुत इत्यत आह ॥ नित्य इति । चतुर्विधनाशरहित इत्यर्थः । संबन्धस्यानित्यत्वं त्रिधा संभवति । स्वरूपनाशेन वा देहहान्या वा परिच्छिन्नत्वेन वा तदेतत्त्रयं भगवतो न संभवति । अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता । नाशश्चतुर्विधो ज्ञेयस्तदभावो हरेः सदेति वचनात् । जीवस्वरूपस्य च नित्यत्वं प्रागेवोक्तम् । अतस्तयोः संबन्धो नित्य इति भावः ॥ तथा चोक्तम् ॥ अनित्येत्यादि । भगवतो नित्यसंबन्धित्वं नाकाशवत् । किन्तु सर्वोपजीव्यत्वेनेत्याह ॥ सर्वाश्रय इति । धारणपोषणादिकर्तेत्यर्थः । नन्वेवं भगवान्नित्य-संबन्धश्चेत्संनिहितोऽपि कुतो नोपलभ्यत इत्यत आह ॥ सूक्ष्म इति । अव्यक्तस्वभाव इत्यर्थः ।

सर्वनियामकत्वेनात्मानं सृजतीत्यनेन प्राप्तां भेदशङ्कां निराकरोति ॥ एक इति । स्वरूपेष्वित्यर्थः ॥ तथा चोक्तम् ॥ एकोऽपि स्थोऽपि नानात्वान्नानेव हरिरीर्यते । सर्वान्तर्यामिणस्तस्य न भेदो विद्यते क्वचिदिति ब्रह्मवैवर्ते । जगत्सर्जनोपयोगिन्यौ ज्ञानशक्ती आह ॥ स्वदृक् प्रभुरिति । स्वयमेव सर्वं पश्यतीति तथा । स्वतन्त्रज्ञान इत्यर्थः । प्रभुः समर्थः ॥ ९ ॥

न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ।
एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥ १० ॥

सत्यधर्मा – ननु प्रियेण सह सदा सम्बन्धोऽप्रियेण नेति तत्सम्बन्धो नित्य इत्यसम्बद्ध-भाषणमित्यतो भाषते ॥ न हीति । अस्य भगवतोऽतिप्रियो बहुप्रियः कश्चित्कश्चिदप्रियोऽप्रेमपात्रं न । तत्र हेतुर्न स्वः परश्चेति । कर्तॄणां जनानां तत्सम्बन्धिनीनां सर्वधियां चैक एव द्रष्टा साक्षी । योग्यतामतिक्रम्य प्रियादिकं नास्तीति भावः । यथोक्तं सप्तमतात्पर्ये । स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः । अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम् । देशकालौ गुणांश्चैवेत्यारभ्यातस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोरिति तन्त्रनिर्णय इत्यन्तेन ॥ १० ॥

चट्टी – ननु यदुक्तं भगवान् स्वदृगिति तदयुक्तम् । तथात्वे सर्वजगत्सर्जनानुपपत्तेः । न हि सर्वज्ञस्य स्वप्रतिकूलदैत्यादिसर्जनं युक्तिमदित्यत आह ।। न हीति । अस्य भगवतः कश्चिदपि पुरुषः प्रियो मित्रम् । अप्रियः शत्रुः स्वः स्वकीयः परः परकीयो वा नास्ति कुत इत्यत आह ।। एक इति । हि यस्माद्भगवानेक एकप्रकारः सर्वसमः । न हि सर्वसमस्य शत्रुमित्रादिविभागबुद्धिः संभवतीति भावः । नन्वेवं तर्हि कंसः शत्रुः पाण्डवो बन्धुरित्यादिव्यवहारः कथमित्यत आह ।। सर्वेति । कर्तॄणां जीवानां याः सर्वा विचित्राः सात्विकादिलक्षणा धियो बुद्धयस्तासां गुणदोषयोः पुण्यपापयोश्च द्रष्टा साक्षीत्यर्थः । भगवतः समत्वेऽपि जीवानामनादियोग्यताकर्मानुसारेणाविषमफलदातृत्वादुक्तव्यवहारो युज्यत इति भावः ।। १० ।।

नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम् ।
उदासीन इवासीनः परावरदृगीश्वरः ।। ११ ।।

तात्पर्यम् – 'भोक्ता सद्गुणभोक्तृत्वान्न भोक्ता तदवृद्धितः । अचिन्त्यशक्तितस्तच्च युज्यते परमेशितुरि'ति च ।। ११ ।।

सत्यधर्मा – नादत्त आत्मेति श्लोके गुणभोक्तृत्वं भगवतो नास्तीत्युच्यत इति प्रतीयते । सा च गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यादिमानविरुद्धेत्यतो मानेनैव तदभिप्रायमाह ।। भोक्तेति । गुणभोक्तृत्वात् । तदवृद्धितः तद्भोजनप्रयुक्तवृद्धिरहितत्वादिति यावत् । नन्वेकवस्तुस्थितयोः शुभाशुभयोरेकस्य भोगो न भोगोऽन्यस्येति कथमित्यत ऊचे ।। अचिन्त्यशक्तित इति । तच्च शुभात्तृत्वं युज्यते । कुतोऽचिन्त्यशक्तिस्तस्येत्यतो वक्ति ।। परमेशितुरिति । हेतुहेतिमता विपर्ययेण वा ज्ञेया ।। इयं ततः श्लोकव्याकृतिः ।। आत्मा परमात्मा गुणवृद्धिदं नादत्ते न भुङ्क्ते । दोषं सर्वात्मना । क्रियाफलं तदपि नश्वरम् । तर्हि कथङ्कारं वर्तनं भगवत इत्यत आह ।। उदासीन इव इति । यथोक्तं गीताभाष्यप्रमेयदीपिकयोः । उदासीनवन्न तूदासीनः । तदर्थमाह ।। असक्तमिति । यस्यासनयैव सर्वकर्मशक्तिः कुतस्तस्य कर्मबन्ध इति भावः । न कर्मणा वर्धते नो कनीयानिति हि श्रुतिः । यः कर्मापि नियामयति कथं च तन्निबध्नाति । उदासीनवदिति चेन्न । स्वयमेव प्रकृतिः सूयत इत्यत आह । स्वतः कर्तृत्वे कथमुदासीनत्वमुच्यत इति चेन्न । वतिना तस्य निषिद्धत्वादित्यादीकृत्य तदज्ञात्वा क्रियाभाव एवोक्त इति मत्वा शङ्कितमित्यन्तेन । कुतो नैतस्य तदबन्धः कुतश्चोदासीनत्व इत्यतो हेतुमाह ।। परावरदृगिति । अतीतानागतं करतलामलकवदवलोकयतीति स तथा । स्वरूपासिद्धिं विरूपयितु-मीश्वरोऽनन्याधीन इति ।। ११ ।।

चट्टी – ननु विश्वं सृजत इति यद्भगवतो जगत्कर्तृत्वमुक्तं तदयुक्तम् । कर्तृत्वे देवदत्तवत्कर्म-फलभोगापत्तेरित्यत आह ।। नेति । आत्मा परमात्मा क्रियाफलं सुखदुःखलक्षणं कर्मफलं नादत्ते नानुभवति । गुणं शुभविषयं क्रीडयाऽऽददन्नपि वृद्धिप्रयोजकत्वेन नादत्ते । नित्यपूर्णस्य गुणभोग-प्रयुक्तवृध्यसंभवात् ।। तदुक्तम् ।। भोक्त्येत्यादि । दोषमशुभविषयं तु सर्वात्मना नादत्ते । एतत्सर्वं कुत इत्यत आह ।। उदासीन इति । हि यस्मादुदासीन इवासीन उदासीनपुरुषवद्वर्तमानः । अनादरेण सृष्टयादौ वर्तमान इति यावत् । यस्यानायासेनैव जगत्सर्जनशक्तिः कुतस्तस्य कर्मबन्ध इति भावः । एतदेव स्पष्टमाह ।। ईश्वर इति । अचिन्त्यशक्तिरित्यर्थः । परापरदृक् अतीतानागतद्रष्टा । तस्मादेवं महामाहात्म्येऽपि तस्य भगवतो नित्यसंबन्धित्वात्पितृत्वात्सखित्वाच्च स एव भजनीयः । युष्माकं मम च संबन्धाभावान्न शोकः कर्तव्य इति प्रघट्टिकार्थः ।। ११ ।।

श्रीशुक उवाच–
इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ।
विस्मिता मुमुचुः शोकं(स्नेहं)छित्वाऽऽत्मस्नेहशृङ्खलाम् ।। १२ ।।

सत्यधर्मा – जीवः किं निविवेश शरीरे चिरं किंवाऽचिरेण गत इति चेतोनिकेतं राज्ञः संशयमपनुदति ।। श्रीशुक उवाचेति । तस्य ज्ञातयस्तद्देहानुबन्धसहिताः । आत्मस्नेहशृङ्खलामात्मनां मनः पूर्वको यः स्नेहस्तद्रूपां शृङ्खलां निगडं छित्वा । शृङ्खला पुंस्कटीवस्त्रे निगडेऽपि चेति विश्वः । विस्मिता अहो हरीहेति शोकं मुमुचुः ।। १२ ।।

चट्टी – आत्मनां स्वेषां पुत्रस्नेहाख्यां शृङ्खलां छित्वा स्नेहं स्नेहकार्यं शोकं मुमुचुः । क्वचिच्छोकमित्येव पाठः ।। १२ ।।

निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ।
तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ।। १३ ।।

सत्यधर्मा – श्मशानवैराग्यं सर्वसाधारणं धामगमने पुनः शोको विवेककृतोऽकारि किं तैरित्यतो न तथेति वक्तुं दुस्त्यजं तत्त्यजुरिति पुनर्जगादेति ज्ञेयम् । उचिताः क्रिया अनुपनीतयोग्यकर्माणि ।। १३ ।।

बालघ्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ।
बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ।
यमुनायां महाराज स्मरन्त्यो द्विजभाषितम् ।। १४ ।।

सत्यधर्मा – बालघ्यो गरनिगारणेन ब्राह्मणैर्यन्निरूपितं तद्बालहत्याव्रतं तत्पापापनोदकं प्रायश्चित्तं चेरुश्चक्रुः । द्विजभाषितं द्विजाभ्यामङ्गिरोनारदाभ्यां ब्राह्मणाभ्याम् । ब्रह्मणो ब्राह्मणत्वात् । यथोक्तं बृहद्भाष्ये । विष्णोर्ब्राह्मणजातिः सन्ब्रह्मा जज्ञे चतुर्मुख इति । अद्विजभाषितं निर्दन्तसुतोदितोदन्तमिति वा । दन्तविप्राण्डजा द्विजा इत्यमरः ॥ १४ ॥

चट्टी – द्विजभाषितमङ्गिरसा प्रोक्तम् । पुत्रादीनां दुःखहेतुत्वं स्मरंत्यः पुत्रकामनाशून्या निर्मत्सराः सत्य इति भावः ॥ १४ ॥

स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ।
गृहान्धकूपान्निष्क्रान्तः सरःपङ्कादिव द्विपः ॥ १५ ॥

सत्यधर्मा – चित्रकेतुः किं निकेतन एवासीदुत किं भवनं त्यक्त्वा वनं गत इति शङ्कां पराकरोति द्वाभ्याम् ॥ स चित्रकेतुरिति । सरःपङ्कात्सरोवरसम्बन्धिपङ्कात् । द्विपो गजः ॥ १५ ॥

चट्टी – ततश्चित्रकेतुः किं चकारेति तत्राह ॥ स इत्थमिति । निबिडपंकतुल्यगृहं विहाय निष्क्रमणमतिर्धीरस्य तस्यैव योग्यं नान्यस्येति दृष्टान्तेनाह ॥ सरसः पंकाद्द्विपो गज इवेति ॥ १५ ॥

कालिन्द्यां विधिवत् स्नात्वा कृतपुण्यजलक्रियः ।
मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ॥ १६ ॥

सत्यधर्मा – कृतपुण्यजलक्रियः कृता अनुष्ठिताः पुण्यानि तत्साधनानि यानि यामुनानि जलानि तैः क्रियास्तर्पणादिरूपिण्यो येन स तथा । मौनेनासम्भाष्यासम्भाषणरूपेण । संयतप्राणो निगृहीतश्वासादिः । ब्रह्मपुत्रावङ्गिरोनारदौ । रूढोऽयं पुत्रशब्दः । अक्षणं पुदिति छिद्रं पुत्रस्तत्त्राणतो भवेदिति बृहद्भाष्ये । तथा पुन्नाम्नो नरकात्त्राता पुत्र इत्यभिधीयत इत्यन्यत्रोक्तस्य निर्वचनस्या-निर्वचनीयत्वाद्विधिविषये इति ॥ १६ ॥

चट्टी – कृताः पुण्या जलक्रियाः पितृतर्पणाद्या येन स तथा । संयतप्राणो नियतेन्द्रियः ॥ १६ ॥

अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ।
भगवान् नारदः प्रीतो विद्यामेतामुवाच ह ॥ १७ ॥

सत्यधर्मा – तत्कालोचितमालोचितं नारदेनाचरिततदन्तरवन्दनं दन्धनीकृतं किमित्यत आह ॥ भगवान्नारदः प्रीत इति । इयतः समयस्य यापनं तु तस्याशुचित्वादेव न तु तस्यानधिकारादिति मन्तव्यम् ॥ १७ ॥

चट्टी – इमां मन्त्रोपनिषदं प्रतीच्छेत्युक्तविद्यामिदानीमुपदिशतीत्याह ॥ अथेति । प्रपन्नायेत्यादिना शिष्याधिकारनिरूपणाद्विवक्षितार्थतत्त्वज्ञानदार्ढ्यादिवाचकभगवच्छब्देन गुर्वधिकारनिरूपणात्प्रीत इत्यनेन गुरुप्रसादकथनाच्चाङ्गवैकल्याभावेन विद्या संपूर्णफलप्रदाऽभूदिति सूचितम् ॥ तथा चोक्तं प्राक् । गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्तितः । अप्रसादाद्गुरोर्विद्यान यथोक्तफलप्रदा इति ॥ १७ ॥

नारद उवाच–

नमस्तुभ्यं भगवते वासुदेवाय धीमहि ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥ १८ ॥

सत्यधर्मा – इमां मन्त्रोपनिषदं प्रतीच्छेति प्रतिज्ञामवन्ध्यसन्ध्यो नारदः पारयितुमारभते ॥ नम इति । मन्त्रोपनिषद आपरोक्ष्यं श्रीपतेर्भवति न सन्देहोऽत्रेति तुभ्यमिति वदन्ध्वनयति । वासुदेवाय वासनाद्वासुदेवोऽसि वासितं ते जगत्त्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते । नमः इत्यादेरेतदर्थो बोध्यः । प्रद्युम्नः प्रकृष्टद्युतिमान् अनिरुद्धः । सङ्कर्षणः शेषोऽन्तर्गतः । भगवते नारायणायेति पञ्चरूपायेति वा । भगवान्सर्ववसिष्ठो यत्सदैव हि । रूपमाहुः पञ्चविधं तस्य विष्णोर्महात्मनः । शुक्लं तु वासुदेवाख्यमनिरुद्धं तु नीलकम् । सङ्कर्षणं पिङ्गलं च प्रद्युम्नं हरितं स्मृतम् । नारायणं लोहितं स्यात्पञ्चरूपाण्यजे हराविति बृहदारण्यकभाष्योक्तेस्तदवान्तरविशेषो वयं धीमहि ध्यायामः । वासुदेवाय धीमहीति विष्णुगायत्र्यनुवादः ॥ १८ ॥

चट्टी – चित्तसंनिहितत्वात्तुभ्यमिति । नमो धीमहि ध्यायेम । मनसा नमस्याम इत्यर्थः । भगवते षड्गुणपूर्णाय । लक्ष्मीसमेताय वा जगत्सृष्ट्यादिकर्त्रे वा ॥ तथा चोक्तम् ॥ गुणवान्भगवानेव सृष्टिसंहाररक्षकः । द्वौ द्वौ गुणावधिष्ठाय सर्गाद्यमकरोत्प्रभुः । प्रद्युम्नश्चानिरुद्धश्च संकर्षण इतीरितः । भगवान्वासुदेवोऽसौ सृष्ट्याद्यमकरोत्स्वयम् । ऐश्वर्यं वीर्यवान्सर्गे प्रद्युम्नः प्रत्यपद्यत । तेजः शक्तिं समाविश्यानिरुद्धो ह्यपालयत् । बलज्ञाने तथा द्वे तु संकर्षणाधिष्ठितः । अकरोद्भगवानेव संहारं जगतोऽस्य तु । एवं षड्गुणपूर्णत्वादपि च श्रियः । सर्गादिकारणत्वाच्च भगवानिति चोच्यत इति भारते । वसति स्वयं सर्वत्र वासयति च सर्वं स्वस्मिन्निति वासुः । स चासौ देवः क्रीडादिगुणशाली च तस्मै ॥ तदुक्तम् ॥ सर्वत्रासौ समस्तं च सत्यं चेति च वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यत इति विष्णुपुराणे । प्रद्युम्नाय प्रकृष्टद्युतिरूपाय ॥ तदुक्तमैतरेयसंहितायाम् । प्रद्युम्नो द्युतिस्वरूपत्वाद्विष्णुरेव प्रकीर्तित इति । न केनापि क्वापि निरुद्ध इत्यनिरुद्धः । अनिभिः प्रयत्नवद्भिः मुख्यप्राणदासैर्वा हृदि निरुद्ध इति वा । तस्मै । सं सर्वेषां जीवानां कर्षणाद्योग्यतानुसारेण शुभाशुभगतिप्रापणात् संकर्षणस्तस्मै ॥ १८ ॥

नमो विज्ञानमात्राय परमानन्द(मूर्तये)रूपिणे ।
आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ॥ १९ ॥

सत्यधर्मा – विज्ञानमात्राय विज्ञानमयाय। परमानन्दात्मकायेति परमानन्दरूपिणे परमा ब्रह्माद्या आनन्दरूपिणो येनेति वा तस्मै । आत्मारामाय स्वरमणाय । शान्ताय विकोपाय सुखस्य तरतमभावनिर्णायिकायेति वा। निवृत्तद्वैतदृष्टये निवृत्तं द्वैतं स्वरूपेषु भित् येषां ते तेषु दृष्टिर्यस्य तस्मै । स्वसमाधिकवस्त्वन्तरदृष्टिरहितायेति वा ॥ १९ ॥

चट्टी – विज्ञानमात्राय पूर्णज्ञानस्वरूपाय । परमानन्द एव मूर्तिः शरीरं यस्य तस्मै । सज्ज्ञानानन्दशीर्षोऽसौ सज्ज्ञानानन्दबाहुक इत्यादेः ॥ आत्मारामाय स्वरमणाय ॥ शान्ताय पूर्णसुखाय। निवृत्ता द्वैतदृष्टिः स्वावतारेषु भेदज्ञानं यस्मात्तस्मै। यद्वा। द्वैतदृष्टिर्भेददर्शनम् अन्यथा-ज्ञानमिति यावत्। विद्यमानाकारापेक्षया द्वितीयाकारविषयत्वात्। सा निवृत्ता यस्मादित्यर्थः ॥ तथा चोक्तं स्कान्दे । भिन्नस्याभेदतो दृष्टिरपि भेददृशिर्मता । वस्तुयाथ्यात्म्यतस्तस्य भिन्नत्वादिति सूरिभिः। अन्यथा ज्ञानमेवातो भेदज्ञानं विनिन्दितम्। न विद्यमानभेदस्य दर्शनं निन्दितं क्वचिदिति। निवृत्तद्वैतवृत्तय इति पाठे द्वैतमन्यथाज्ञानम् । अन्यथा मतयो द्वैतमिति वचनात् । निवृत्तद्वैतत्वेन वृत्तिरवस्थानं यस्य स तथा। तस्मै। यद्वा अन्यथाज्ञानवाचिना द्वैतशब्देन तत्कारणमविद्या लक्ष्यते। ततश्च निवृत्ता द्वैतवृत्तयोऽविद्याः पञ्चपर्वाणि यस्मादित्यर्थः ॥ तदुक्तं भारते ॥ तमस्तु शार्वरं प्रोक्तं मोहश्चैव विपर्ययः। तदाग्रहो महामोहः तामिस्रं क्रोध उच्यते। नरकं त्वंधतामिस्रमविद्या पञ्चपर्विकेति ॥ तृतीयस्कन्धे च। योऽविद्ययानुपहतोऽपि दशार्थवृत्येति। यद्वा। द्वैतमशुभम्। एकं तु शुभमुद्दिष्टमशुभं द्वैतमुच्यत इति भारतवचनात् । ततश्च निवृत्ता द्वैतदृष्टिर्द्वैतवृत्तिर्वा यस्मात्तस्मै शुभदृष्टये शुभव्यापारायेत्यर्थः ॥ १९ ॥

आत्मानन्दानुभूत्यैव सम्यक्त्यक्तोर्मये नमः ।
हृषीकेशाय महते नमस्तेऽनन्तमूर्तये ॥ २० ॥

सत्यधर्मा – आत्मानन्दानुभूत्या स्वस्वरूपानन्दानुभवेन कारणेन त्यक्ता अनङ्कुरिताः षडूर्मयो जन्मदयो येन। सम्यक् स्वासम्बन्धेनैव त्यक्ताः षडूर्मयः येन स तस्मै। अशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्युक्तषडूर्मय इति वा। ऊर्मिरिति सामयिकी संज्ञा। हृषीकेशाय सकलेन्द्रियस्वामिने। हृषीकाणीन्द्रियाण्याहुरित्यादेः। अनन्तमूर्तये शेषान्तर्गताकाराय वा। अनन्ता तत्सामर्थ्येन मात्रबद्धा मूर्तिर्गात्रं यस्येति दामोदरस्तस्मा इति वा ॥ २० ॥

चट्टी – सम्यक् त्यक्ता जननादिषडूर्मयो येन तस्मै । अशनायादिषडूर्मिरहितायेति वा । अशनाया पिपासे शोकं मोहं जरां मृत्युमत्येतीति श्रुतेः । तत्र हेतुः ॥ आत्मेति । स्वरूपानन्दानुभवेनेत्यर्थः । हृषीकाणामिन्द्रियाणामीशः प्रेरकस्तस्मै । यद्वा । हृष्या हर्षहेतवः केशा अस्येति हृषीकेशः । अग्न्यादिषु स्थित्वा स्वकेशनियतैस्तदंशुभिर्जगतो बोधनस्थापनाभ्यां हर्षणाद्धृषीकेश इत्यर्थः ॥ तदुक्तं मोक्षधर्मे ॥ सूर्याचन्द्रमसौ शश्वत्केशैर्मेऽशुसंज्ञितैः । बोधयन्स्थापयंश्चैव जगदुत्पद्यते पृथक् । बोधनात्स्थापनाच्चैव जगतो हर्षसंभवात् । अग्निषोमकृतैरेभिः कर्मभिः पाण्डुनन्दन । हृषीकेशोऽहमीशानो वरदो लोकभावन इति ॥ २० ॥

वचस्युपरते प्राप्य य एको मनसा सह ।
अनामरूपचिन्मात्रः सोऽव्ययः(व्यान्नः) सदसत्परः ॥ २१ ॥

तात्पर्यम् – बाह्यमनस्युपरते चिन्मात्रमनसा सह प्राप्यः ॥ २१ ॥

सत्यधर्मा – मनस्युपरते प्राप्य इति श्लोके मनस उपरमानन्तरं प्रापकाभावात्केन प्राप्य इत्यतः स्वयं तदुपपत्तिमुपपादयति ॥ बाह्येति । बाह्ये स्थूले जडे मनसि । सहेतरेन्द्रियैरिति शेषः । उपरते सति चिन्मात्रमनसा स्वरूपमनसा प्राप्यः । अतो न प्रापकाभावापदिति भावः ॥ अथ मूलार्थः ॥ मनसि सहेतरेन्द्रियैःबाह्यैरुपरते व्यापारे । एको मुख्यः । मनसा चिन्मात्रमनसा यः प्राप्यो गम्यः । तल्लक्षणमनामरूपचिन्मात्र इत्यादि । अनामाऽसावप्रसिद्धत्वादरूपो भूतवर्जनादित्यादेर्न सर्वथा नामरूपवैकल्यं तत्पदार्थ इत्यर्थः । अत एव चिन्मात्र इत्युक्तिः । अव्ययो निर्नाशः । सदसती मूर्तामूर्तजगती कारणात्मके वा तत्परस्तदतीतो यः स इत्युद्देशविधेयभावो यथायथमिति भावः । वचसीति नाचार्यवचसि दृश्यते पाठ इत्यदृश्यः । सोऽव्यान्न इति पाठोऽपि दिव्यः ॥ २१ ॥

चट्टी – वचोमनःशब्दौ सर्वेन्द्रियोपलक्षणे । मनसा बाह्यमनसा सह वचसि वागादिबाह्येन्द्रियजाते । उपरते विलीने सति । मनसा मनआदिचिन्मात्रेन्द्रियैः सह यो भवान् प्राप्यो भवति सोऽव्यादित्यन्वयः । नामप्रवृत्तिनिमित्तानामनन्तत्वेन ज्ञातुमशक्यत्वात्प्राकृतरूपरहितत्वाच्चानामरूपः ॥ तदुक्तम् ॥ अप्रसिद्धेस्तद्गुणानामनामाऽसौ प्रकीर्तितः । अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्यत इति । स चासौ चिन्मात्रश्च । सदसत्परः कार्यकारणविलक्षणः । कार्यकारणयोः कारणं वा ॥ २१ ॥

यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ।
मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥

तात्पर्यम् – मृन्मयेष्विव मृज्जातिः । 'पृथिवीपर्वताश्चैव मृन्मयाः समुदीरिताः । तेषु मृज्जातयः सर्वे जायन्ते स्थावरादय' इति च ॥ २२ ॥

सत्यधर्मा – यस्मिन्निदमिति श्लोके उपादानत्वमुपादाय ब्रह्मणो जगत्प्रति प्रवृत्त इत्यन्यथाप्रतीतिं किञ्चिदनूद्य मानतोऽपमानयति ॥ मृन्मयेष्विव मृज्जातिरिति । पृथिवी पर्वता एतदादयो मृन्मयाः समुदीरिताः । तेषु पृथिवीपर्वतादिषु मृज्जातयो मृत्त्वरूपसामान्यसदृशसामान्यकाः । जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोरिति विश्वः । सर्वे स्थावरादयो वृक्षादयो जायन्त इति मृन्मयपदेन पृथिवीपर्वतादिग्रहणात्तेषु स्वस्वबीजजन्मनां मृज्जातिपदेन स्थावराणां तर्वादीनां ग्रहणान्नोपादानोपादेयभावेनैकीभावगमकमिदं निदर्शनमिति भावः ॥ ततो मूलमर्थाप्यते । यस्मिन्भगवतीदं जगत्तिष्ठति यदाधारतया यतो यन्निमित्ताज्जायतेऽप्येति नश्यति च । मृन्मयेषु पृथिवीपर्वतादिषु मृज्जातिः स्वस्वबीजोपादानकानामपि वृक्षादीनां सङ्गो मृदि जातिरुत्पत्तिर्यस्येति स तथा । तत्रैव तिष्ठत्यप्येति च तथेति । एतेन नोपादानोपादेयता भगवज्जगतोः किन्तु सहकारी हरिरिति निदर्शनाननुरूपता प्रामाणिकी ज्ञेया । अन्यथा तद्वैय्यर्थ्यं स्यादिति भावः ॥ २२ ॥

चट्टी – तदेवाह ॥ यस्मिन्निति । यस्मिन्निदं कार्यकारणात्मकं जगत्तिष्ठति । अप्येति च यतश्च जायते । तत्र दृष्टान्तमाह ॥ मृण्मयेष्विति । मृज्जातिर्यथा मृदा जातिर्जन्म यस्य सो वृक्षादिमृण्मयेषु पृथिवीपर्वतादिषु तिष्ठत्यप्येति । तेभ्यो जायते च तद्वदित्यर्थः । एतेन मृण्मयेष्विव मृज्जातिरिति दृष्टान्तबलान्मृद्घटयोरिव ब्रह्मप्रपञ्चयोरप्युपादानोपादेयभाव इत्येतन्निरस्तम् । उपादानोपादेयभावशून्यानामेव दृष्टान्तत्वेन विवक्षितत्वात् ॥ तथा चोक्तम् । पृथिवी पर्वता इत्यादि ॥ २२ ॥

यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रयासवः ।
अन्तर्बहिश्च विततं व्योमवत् तं नतोऽस्म्यहम् ॥ २३ ॥

सत्यधर्मा – मनोबुद्धीन्द्रियासवः पूर्वव्याख्यानरीत्या मनआदिशब्दवाच्या रुद्रादयो देवा यं न स्पृशन्ति । असङ्गत्वात् । न विदुः साकल्येन । तदस्पर्शनमेवमिति निदर्शनप्रदर्शनेन दर्शयति ॥ व्योमवद्गगनवदन्तर्बहिश्च व्याप्तमिति ॥ २३ ॥

चट्टी – यदुक्तं सदसत्पर इति कार्यकारणात्मकप्रपञ्चवैलक्षण्यं तत्कुत इत्यतो लोकप्रमाणविषयत्वादित्याह ॥ यदिति ॥ व्योमवदन्तर्बहिर्विततमपि यं भगवन्तमसवः प्राणाः कर्मेन्द्रियाणि क्रियाशक्त्या न स्पृशन्ति । मन आदीनि च ज्ञानशक्त्या न विदुः । यद्वा । मनआदि ज्ञानकर्मेन्द्रियाणि न स्पृशन्ति । न विषयीकुर्वन्ति तदभिमानिनो रुद्रादिदेवाश्च न विदुरित्यर्थः ॥ २३ ॥

देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिव प्रतप्तं स्थानेषु तद् द्रष्ट्रपदेशमेमि ॥ २४ ॥

सत्यधर्मा – कुतो न जानते ते न स्पृशन्ति चेत्येतत्सङ्कुच्य परिहृतमित्येतत्प्रायं मन्वानो मूलकृद्विविच्य स्वयमेवाह ॥ देहेन्द्रियेति । यदंशविद्धा यस्य हरेरंशैर्विद्धाः प्रेरिता देहेन्द्रियप्राणमनोधियः तदभिमानिनो देवाः कर्मसु स्वस्वव्यापारेषु प्रवर्तन्ते । अन्यदा तदंशेशनाभावे न प्रचरन्तीत्यन्वयः । यथा प्रतप्तं वह्निना लोहं स्वर्णादि दाहादिहेतुरन्यदाऽनग्निलग्नतादशायां न तत्कारणं तथेति । स्थानेषु देहेन्द्रियादिषु, वृत्तिः सप्तम्यर्थः, स्थितं तद् ब्रह्म तद्द्रष्ट्रपदेशं द्रष्टा साक्षीत्यपदेशोऽपदिश्यते इत्यपदेशो नाम यस्य तत्तदेमि । शरणमिति शेषः प्राप्नुयामिति वा । साक्षी चैतदादेः ॥ २४ ॥

चट्टी – तेषां तदज्ञाने हेतुमाह ॥ देहेति । अमी देहेन्द्रियादयो यस्य परब्रह्मणोंऽशै रूपविशेषैर्विद्धाः प्रेरिताः सन्तः कर्मसु स्वविषयेषु प्रचरन्ति जागृत्स्वप्नयोः । अन्यदा सुषुप्तिमूर्च्छादौ नैव प्रचरन्ति ॥ तत्प्रेरणाभावात् । यथा प्रतप्तं लोहं न दहति । अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं न दहति । एवं ब्रह्मशक्त्युद्बोधितज्ञानक्रियाशक्तिभ्यां प्रवर्तमानदेहादयश्च तदभिमानिनो देवाश्च यं न स्पृशन्ति न विदुश्चेति भावः । स्थानेषु जागरादिषु देहेन्द्रियादिषु वा । द्रष्टरपदेशं साक्षिसंज्ञं तत्परब्रह्म । शरणमेमि ॥ २४ ॥

ओं नमो भगवते महापुरुषाय महानुभावाय महाविभूतये सकलसात्वतपरिवृढनिक-रकरकमलकुड्मलोपलालितचरणारविन्दयुगल परम परमेष्ठिन् नमस्ते ॥ २५ ॥

सत्यधर्मा – सात्त्वता भक्ता अखण्डोऽयं सत् भगवांस्तद्भन्तः सात्वता इति तकारान्ताद-कारान्तः ॥ २५ ॥

चट्टी – ज्ञानशक्त्यादिगुणैः शोभमानाः सात्वताः । सत्त्वं तु शोभनं स्यात्तद्युक्ताः सात्वता मता इति वचनात् । सकला ये सात्वतपरिवृढाः सात्वतश्रेष्ठास्तेषां करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविन्दयुगलं यस्य तस्य संबोधनम् । परमोत्कृष्ट । परमेष्ठिन् सर्वेश्वर ॥ २५ ॥

श्रीशुक उवाच–
भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ।
ययावङ्गिरसा साकं धाम स्वायम्भुवं विभो ॥ २६ ॥

सत्यधर्मा – नारदो भक्ताय हरेः । प्रपन्नाय स्वशरणागताय । एतां विद्यामादिश्योपदिश्येमां मन्त्रोपनिषदमिति गदनपूर्वं मध्ये ते च विद्यामिति रहस्यतां द्योतयितुमिव विद्याधराभिधां चामुधा विधातुमिति बोध्यम् । स्वायम्भुवं धाम सत्यलोकम् । पूर्वं नारदोऽङ्गिरा इति गिरा गिरा चात्र नारदोऽङ्गिरसा साकं ययाविति च ब्रह्मपुत्राविशेषान्न तरतमभाव इति वाक् ।। २६ ।।

चट्टी – पूर्वं सनारदाङ्गिरसावाजगामेत्यङ्गिराः प्राधान्येनोक्तश्चित्रकेतोः पुत्रप्रदत्वेन तस्य प्रथमगुरुत्वात् । इह तु नारदोऽङ्गिरसा साकं ययाविति नारदस्य प्राधान्यनिर्देशः । तदुपदेशेन तस्य परवैराग्योत्पत्तेः । प्रभो हे समर्थ ।। २६ ।।

चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् ।
धारयामास सप्ताहमब्भक्षः सुसमाहितः ।। २७ ।।

सत्यधर्मा – अब्भक्ष्योऽसाधारण्यन्यायेन तन्मात्रप्राशकः ।। २७ ।।

चट्टी – यथा यथावद्धारयामास ।। २७,२८ ।।

ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया ।
विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृपः ।। २८ ।।

सत्यधर्मा – अप्रतिहतमप्रच्युतमवान्तरं फलम् ।। २८ ।।

ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ।
जगाम देवदेवस्य शेषस्य चरणान्तिकम् ।। २९ ।।

तात्पर्यम् – अन्यान्तर्यामिणं विष्णुमुपास्यान्यसमीपगः । भवेद्योग्यतया तस्य पदं वा प्राप्नुयान्नर' इति नारदीये ।। २९ ।।

सत्यधर्मा – ततः कतिपयाहोभिरिति श्लोके नारदोक्तविद्याया विष्णुविषयत्वादुचिताच्युतचरण-प्राप्तिस्तत्कथं शेषसमीपप्राप्तिर्न चान्यविद्ययाऽन्यप्राप्तिर्दृष्टा वेत्यतः प्रमाणेनैव तं कोलाहलं शान्तीकरोति ।। अन्यान्तर्यामिणमिति । उपास्य पूर्वमन्यसमीपगो भवेत् । नरस्तद्द्वारा भगवदाप्तियोग्यश्चेत् । तस्य शेषस्य पदं प्राप्नुयात् ।। अथ मूलार्थः ।। कतिपयाहोभिः कतिपयाहैः । अनित्यः समासान्ताट्टच् । इद्धाऽभिवृद्धा मनोगतिर्ज्ञानमार्गो यस्य स तथा ।। २९ ।।

चट्टी – कतिपयैरहोभिर्विद्ययेद्धेन दीप्तेन मनसा गतिर्यस्य स तथा । अत्र विद्याया भगवद्विषयकत्वेऽपि तथा शेषान्तिकप्राप्तिर्युज्यते । शेषान्तर्यामिण एवोपास्यत्वादिति ज्ञातव्यम् ॥ तदुक्तम् ॥ अन्यान्तर्यामिणमित्यादि नारदीये ॥ २९ ॥

मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणम् ।
प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥ ३० ॥

सत्यधर्मा – शेषस्येत्युक्तशेषस्वरूपं कतिपयश्लोकैरुपश्लोकयति ॥ मृणालगौरमिति । मृणालवत् । मृणालं बिसमित्यमरः । बिसवद्गौरं धवलम् । गौरोऽरुणे सित इत्यमरः । सितिवाससं सिति नीलं वासो वस्त्रं यस्य स तथा तम् । कटित्रं काञ्चीगुणः । कटिसूत्रं कटित्रं कटिभूषणमित्यभिधानम् । प्रसन्नानि वक्त्राणि सहस्रमरुणानि लोचनानि द्विसहस्रसंख्यानि यस्य तम् । सिद्धेश्वरमण्डलैर्वृतं ददर्श ॥ ३० ॥

चट्टी – मृणालवद्गौरम् । शितिवाससं नीलांबरम् । स्फुरन्ति किरीटादीनि यस्य तत्कटित्रं कटिसूत्रम् । प्रसन्नानि वक्त्राणि यस्यारुणानि लोचनानि यस्य तं च । सिद्धेश्वराणां मण्डलैः समूहैर्वृतं ददर्श ॥ ३० ॥

तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छा(स्था)मलान्तःकरणोऽभ्ययान्मुहुः ।
प्रवृद्धभक्त्याऽऽप्रणयाश्रुलोचनः प्रहृष्टरोमा तमनादिपूरुषम् ॥ ३१ ॥

तात्पर्यम् – अनेन प्रकारेण मुहुस्तत्सकाशमभ्ययात् । 'शेषान्तर्यामिणं विष्णुं चित्रकेतुरुपास्य तु । शेषाविष्टहरेश्चापि वरान्प्राप्याप तद्गतिमि'ति तन्त्रमालायाम् ॥ ३१ ॥

सत्यधर्मा – तद्दर्शनध्वस्तसमस्तकिल्बिष इति श्लोके श्लोके चोत्तरस्मिन्ननादिपुरुषं परमात्मानं मुहुरभ्ययादिति तथाऽव्यवधानेन भगवत्प्राप्तिरिति प्रतीयत इति स्वयमन्वयं प्रदर्श्य मानं चोदाहरति ॥ अनेनेति । अनेन प्रकारेण चित्रकेतुर्मुहुस्तत्सकाशं तत्पार्षदवदभ्ययात् । शेषचरणान्तिकप्राप्तिरप्यनेन प्रकारेणोपास्तिद्वारत्वादित्यत्राप्यन्वेति । शेषाविष्टश्चासौ हरिश्च तत्सकाशाद्वरान्प्राप्य तद्गतिं तत्समीपं गमनमिति वैष न्यायेनायनं वा प्राप्तवान् ॥ अथ श्लोकार्थविवेकः ॥ स्वच्छोऽमलो मुमुक्षूपास्यस्त-स्मिन्नन्तःकरणं मनो यस्य सः । अनेन प्रकारेण मुहुस्तत्सकाशमभ्ययात् । आप्रणयाश्रुलोचन इति च्छेदः । ईषत्तोषाश्रुलोचनस्तेषामवशतः प्रवहितम् । बहुलत्वेऽपि महत्सन्निधानेऽप्रदर्शनीयतया स्थगनेनैवमिति ज्ञेयम् । उत्तरलेशपदस्वारस्यात् । अथवा तस्मादेव बहुत्वेऽपि तन्महाकारे तान्यल्पीयांसीति आसम्यगिति पूर्वपद्येवार्थ इति मन्तव्यम् । अनिच्छया गच्छतः स्थगनाभावोऽपि युक्तियुक्तः । अनादिपुरुषमनादिः पूरुषो भगवान्यस्मिन्यस्य स्वामित्वेन वा तम् ॥ ३१ ॥

चट्टी – तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य । स्वस्थं विक्षिप्तममलं रागादिदोषरहितमन्तःकरणं मनो यस्य । प्रवृद्धया पूर्णया भक्त्या प्रहृष्टानि रोमाणि यस्य । प्रणयेन स्नेहेनाश्रुयुक्ते लोचने यस्य स चित्रकेतुः । अनेनैव प्रकारेणेति शेषः । इदानीं शेषान्तर्यामिणं विद्ययोपास्य यथा तत्सकाशं प्राप्तोऽनेनैव प्रकारेण मुहुस्तमभ्ययात् । असकृत्तत्सकाशमभ्यगादित्यर्थः ।। ३१ ।।

स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपसेचयन् मुहुः ।
प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत् तं प्रसमीडितुं चिरम् ।। ३२ ।।

सत्यधर्मा – उत्तमश्लोकस्य हरेः पदाब्जयोर्विष्टरमासनरूपम् । विष्टरं ज्ञेयमासनमिति नानार्थध्वनिमञ्जरी । प्रेम्णाऽश्रुलेशैरुपसेचयन्नभिषिञ्चन् । अखिलवर्णानां सामस्त्येनार्थबोधकतया निर्गमो बहिर्निःसरणं प्रेम्णोपरुद्धः प्रतिबद्धो यस्य स तथा । चिरं नाशकन्न शशाक । उपमेहयन्निति पाठस्त्वश्राव्यः ।। ३२ ।।

चट्टी – सः तं प्रसमीडितुं स्तोतुं चिरं नैवाशकन्न शशाक । तत्र हेतुः । उत्तमश्लोकस्य पादाब्जयोर्विष्टरमासनम् । प्रेम्णा जातैरश्रुबिन्दुभिरुपसेचयन् अभिषिञ्चन् । प्रेम्णोपरुद्धोऽखिलानां वर्णानां निर्गतं उच्चारणं यस्य स तथा ।। ३२ ।।

ततः समाधाय मनो मनीषया बभाष एतत् प्रतिलब्धवाग्रसः ।
नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ।। ३३ ।।

सत्यधर्मा – मनीषया धृतिहेतुभूतमिति विशेषणम् । प्रतिलब्ध आविर्भूतो वाग्रसो रहस्योपनिषद्रूपो यस्मिन्सः । सात्त्वतानां भक्तानां शास्तीति शास्त्रमन्तर्नियामको विग्रहो यस्य तम् । अन्तर्यामिविवक्षयेदम् । यद्वा सात्वतशास्त्रं भगवांस्तस्य विग्रहरूप इति । शास्त्रमन्तर्यामी । संविच्छास्त्रं परं पदमिति भाष्यात् । सात्वतां रमादीनामिमे सात्वता इति । सात्वतां नवमूर्तीनामित्याद्येकादशस्कन्धतात्पर्ये विष्णोः श्रिय इत्यारभ्य सुपर्णो नवधा प्रोक्त इत्यन्तेनोक्तः सात्वतपदार्थोऽनुसन्धेयः । सात्वच्छब्दादर्श आद्यच्प्रत्यये सात्वतशब्दनिष्पत्तिर्ज्ञेया ।। ३३ ।।

चट्टी – मनीषया बुद्ध्या मनः समाधायैतद्वक्ष्यमाणं बभाषे । प्रतिलब्धो वाग्रसो वचनवीर्यं येन स तथा । सर्वेषामिन्द्रियाणां बाह्येषु विषयेषु वर्तनं व्यापारम् । सात्वतानां स्वभक्तानां शास्ता सन्मार्गशिक्षको विग्रहोऽवतारो यस्य तम् ।। ३३ ।।

चित्रकेतुरुवाच

अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ।
विजितास्तेऽपि च भजतामकामा(त्म)नां य आत्मदोऽतिकरुणः ।। ३४ ।।

सत्यधर्मा – सममतिभिः समबुद्धिभिर्जितात्मभिर्जितमनस्कैरत एव साधुभिः । अजित सर्वाजित त्वं जितो वशीकृतः । सममतिभिः सं अत्यन्तं अमतिभिः, ममतया सहिताः सममतास्ते विद्यन्ते येषां तैरतिममतावद्भिरिति वा अजित त्वं जितात्मभिः साधुभिर्जित इति वा । तेऽपि त्वज्जयिनोऽपि भवता विजिताः स्वाधीनीकृताः । केनोपायेनेत्यत आह ।। अकामानामविषयेच्छूनां भजतामात्मदः सायुज्यादिप्रदः । तन्निमित्तमतिकरुण इति । चस्त्वर्थः । संस्तवतत्पराभावनं स्वाभाविकं तत्कर्तृकत्वाज्जयस्तु नटनमात्रमिति विशेषसूचकः ।। ३४ ।।

चट्टी – भक्तवात्सल्याख्यगुणानुस्मरणेन भगवान् क्षिप्रमनुगृहीष्यतीत्यभिप्रेत्य तदेव प्रथमतोऽनुस्मरति ।। अजितेति । हे अजित । अन्यैरजितोऽपि भवान् साधुभिर्भक्तैर्जितो वशीकृत एव । यद्यस्माच्च भगवानतिकरुणः । तद्भक्तिस्तत्करुणा चेत्युभयमपि वशीकरणे हेतुरिति भावः । ते साधवोऽपि निष्कामा अपि च भवता विजिताः । यो भवान् अकामनां आत्मानमेव ददाति यस्मादित्यर्थः ।। ३४ ।।

तव विभवः खलु भगवन् जगदुदयस्थितिलयावनादीनि ।
विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धन्ति पृथगभिमत्या ।। ३५ ।।

सत्यधर्मा – तल्लक्षणमाचष्टे । तव विभव इति । जगदुदयस्थितिलयादीनि । उदयश्चोत्पत्तिः स्थितिश्च पालनं च लयश्च नाशश्चैतेषामावनं सम्यक् सम्भजनं वियदधिकरणादिव्युत्पादितप्रकारेण यथायोग्यं चैतदादिर्येषां नियमादीनां तानि । जन्माद्यस्य यतः । यतो वा इमानि । सृष्टिस्थितिश्चेत्यादि सूत्रश्रुत्यागमाश्चात्र भवन्ति । स्थितिरिति मध्यस्थं स्थानत्रयान्वयि वा । उदयस्थितिर्लयस्थिति रवनस्थितिर्वेति । यद्वोदयावनमित्यवनं सर्वत्रापेक्षितमिति सर्वान्वयि । अवनं ज्ञानं वा । तर्हि चतुराननादयोऽपि कर्तारो धर्तारो हर्तारश्च प्रतीयन्ते कथमत इदमसाधारणं लक्षणमित्यत आह ।। विश्वसृज इति । प्रजापतयस्तेंऽशांशाः स्वरूपाविष्टभिन्नांशाः । तत्रैतद्विषये शास्त्रशंसितेऽपि पृथगभिमत्याऽभिमानेनाहं कर्तेत्यादिप्रकारेण मृषा त्वद्गतं कर्तृत्वं किंचिद्दत्तं स्वात्मन एवेति वृथा स्पर्धन्ति स्पर्धन्ते । स्पर्धा येषामिति स्पर्धास्तद्वदाचरन्तीति वा । अनेन महतां तेषां तद्वदाचरणमेव न स्वाभाविकं स्पर्धनमिति भावो द्योतितो भवति । स्वांशश्चातो विभिन्नांश इति द्वेधांऽश इष्यते ।

विभिन्नांशोऽल्पशक्तिः स्यात्किञ्चित्साद्दश्यमात्रयुक् । विष्ण्वादीनि तु रूपाण्येवान्यानि तु तेजोयुक्तानि । तथा च पैङ्गिखिलेषु । विशेषका रुद्रवैन्येन्द्रदेवराजन्याद्या अंशयुता अन्यजीवाः । श्री भूदुर्गाऽम्भ्रणीत्यारभ्य तेनाविष्टा इत्यन्तेन सूत्रभाष्यगीताभाष्यबृहद्भाष्योक्तेर्विभिन्नांशाः प्रजेशा इति ज्ञेयम् ॥ ३५ ॥

चट्टी – अजितेति भगवतोऽनन्याधीनत्वमुक्तम् । तत्कुत इत्याशङ्क्य सर्वस्यापि तदधीनजन्मादि-मत्त्वादित्याह ॥ तवेति । इयं स्तुतिर्न शेषमात्रविषया । किन्तु तदंतर्यामिविषया च । जगत्कारण-त्वादिगुणानां शेषेऽसंभवादिति ज्ञातव्यम् ॥ तदुक्तम् ॥ शेषान्तर्यामिणमित्यादि । क्रियन्ते स्तुतयोऽन्यत्र तदन्तर्याम्यपेक्षया । न जीवेषु गुणाः पूर्णा यथायोग्यं हि तद्गत इति च । हे भगवन् । जगत उत्पत्त्यादीनि तवैव विभवो महिमा । क्रीडेति यावत् । आदिशब्देन नियमादीनि गृह्यन्ते । कथं तर्हि ब्रह्मादीनां स्रष्टृत्वाद्यभिमानस्तत्राह ॥ विश्वसृज इति । विश्वसृजो ब्रह्मादयो नेश्वराः किन्तु ते तव येंऽशा जीवबिंबभूतास्तेषामंशाः प्रतिबिम्बाः । त्वदधीना इति यावत् । तत्रैवं स्थितेऽपि पृथक् पृथगीश्वरा वयमित्यभिमानेन वृथैव स्पर्धन्ते ॥ ३५ ॥

परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः ।
आदावन्ते च सत्त्वानां यद् ध्रुवं तदेवान्तरकालेऽपि ॥ ३६ ॥

सत्यधर्मा – यज्जगाद जगदुदयेत्यादिना तदुपलक्षितगुणपूर्णतामधुना कालानन्त्यं चानन्तायाह ॥ परमाणुपरममहतोरिति । त्वं तु त्रयविधुरः । अणुमहामध्यमपरमाणुवानेवेति तद्विधुरस्तद्रहितः । गुणत्वेन व्यवहृते तत्प्रयोजकसत्त्वादित्रयरहित इति वा ॥ परमाणुरिति । नित्ये तयोरादिः प्रथमभागोऽन्तेऽन्तिमभागः । अन्तरं मध्यभागः सदेति यावत् । वर्तितुं शीलमस्यास्तीति स तथा । णिनिरयं ताच्छील्ये । केचिदवनं तव सकाशात्सृष्टिनष्टी अम्बुजभवभवाभ्यामित्याचक्षते । ते च न प्रेक्षावन्त इत्याह । यदन्तरालेऽपि स्थितिसमयेऽपीति । यदन्तरालेऽपि ध्रुवं नियतं तदेव सत्त्वानाम् । सत्त्वं द्रव्यस्वभावयोरिति विश्वाद्द्रव्यस्य पदार्थसार्थस्यादावन्ते च ध्रुवं सत्त्वानां यदादावुत्पत्तेः प्राक् यच्चान्ते नाशानन्तरं ध्रुवं नित्यं तदेव नान्यत् । अन्तराले मध्येऽपीति योजना ॥ ३६ ॥

चट्टी – त्वमेव सृष्ट्यादिकर्तेत्येतदुपपादयति ॥ परमाण्विति । परमाणुः सूक्ष्मं मूलकारणम् । परमं महत् अन्तिमं कार्यम् । तयोस्त्वमेवाद्यन्तवर्ती आदावंत्ये चान्तरे मध्ये च वर्तितुं शीलं यस्य सः । अत एव त्रयविधुर आद्यन्तमध्यशून्यः ध्रुवः । ब्रह्मादयस्तु त्वया सृज्यन्ते । न तु ध्रुवाः । कुत इत्यत आह ॥ आदाविति । सत्त्वानां सत्त्वशब्दोपलक्षितगुणत्रयकार्याणामादावन्तेऽपि च अन्तराले मध्येऽपि च यदस्ति तदेव ध्रुवमित्यर्थः ॥ ३६ ॥

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः ।
यत्र भगवत्यणुभ्योऽणुकल्पः सहाण्डकोटिभिस्तदनन्तम् ॥ ३७ ॥

सत्यधर्मा – देशानन्त्यमप्यादिशति । क्षित्यादीति । य अण्डकोशोऽण्डकोशोऽण्डस्य ब्रह्माण्डस्य सम्बन्धी स चासौ कोशश्चेति वा । दशगुणोत्तरैः क्रमाद्दशगुणाधिकैः सप्तभिः क्षित्यादिभिः किलेत्यनेनाबग्नीरनभोहङ्कृदित्याद्युक्तनवावरणपक्षोऽप्येकः सम्भावितोऽस्तीति ध्वनयति । किलशब्दस्तु वार्तासम्भावन इति विश्वः । सोऽप्येषः स्वसदृशोऽण्डकोटिभिरेकदा सह सम्भूयागतोऽपि तत्र भगवति त्वय्यणुभ्योऽतिसूक्ष्मेभ्यः परमाण्वादिभ्योऽप्यणु कल्पोऽत्यणुसदृशस्तत्तस्मात्त्वमनन्तोऽपरिच्छिन्न-स्तत्ततोऽणुभ्योऽणुकल्प इति वा । यद्रोमकूपमपि पूरयितुं न शेकुर्ब्रह्माण्डखर्परशतायुतकोट-योऽपीत्यादेः ॥ ३७ ॥

चट्टी – एवं भगवतो ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तम् । देशतोऽप्यपरिच्छेदमाह ॥ क्षित्यादिभिरिति । पूर्वस्माद्दशगुणमुत्तरोत्तरैः क्रमेणाधिकैः । क्षित्यादिभिरतद्गुणसंविज्ञानबहुव्रीहिः । जलादिभिरित्यर्थः । क्षितेर्दशगुणोत्तरत्वाभावात् । क्षितिसाहित्येऽष्टत्वापत्त्या सप्तभिरित्यनुपपत्तेश्च । क्षितिशब्दोपादानं तु जलनिष्ठदशोत्तरत्वं प्रति क्षितेरवधित्वसूचनार्थम् ॥ तदुक्तम् ॥ अबग्नी नभोहंकृन्महत्तत्त्वगुणत्रयैः । क्रमाद्दशोत्तरैरेतदावृतं परतस्तत इति । दशगुणोत्तरैः सप्तभिरित्यनेन गुणत्रयं मिलितमेव दशगुणोत्तरम् । न तु प्रत्येकमित्युक्तं भवति । एतदभिप्रायेणैवाबग्निरिति श्लोके गुणैरिति वक्तव्ये । त्रयशब्दोपादानं गुणानां परस्परं द्विगुणत्वेन प्रसिद्धेश्च ॥ तदुक्तम् ॥ तमसो रजसस्तु द्विगुणं रजसः सत्त्वमेव च । परिमाणत एवं स्युस्त्रयं प्रकृतिजा गुणा इति । केचित्सत्त्वादीनां प्रत्येकं दशगुणोत्तरत्वमङ्गीकृत्य द्विगुणोक्तिविरोधमाशङ्क्य तदुक्तिः संभवाभिप्रायेत्याहुः तदप्येतेनैव परास्तम् । सप्तभिरित्यनेन विरोधात् । एतैः सप्तभिरावृतः । एषः वर्तमानो ब्रह्माण्डकोशो ब्रह्माण्डकोटिभिः सह यत्र यस्मिन्भगवति त्वयि अणुभ्योऽप्यणुकल्पः परमाणुतुल्यो दृश्यते । तत्तस्मात् । त्वद्रूपमनन्तमपरिच्छिन्नमित्यर्थः ॥ ३७ ॥

विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ।
तेषामाशिष ईश तदनु विनश्यन्ति यथाऽराजकुलम् ॥ ३८ ॥

सत्यधर्मा – हरितदितरावरताज्ञानफलमालपति ॥ विषयतृष इति । नरपशवः । तत्पशुत्वे निमित्तं विषयतृट्त्वं भगवदितरोपासकत्वं चेति ज्ञेयम् । ये विषयतृषः शब्दादिविषयतृष्णावन्तो विभूती रमा तामरससम्भवादीनुपासते परं तदुत्तमं त्वां न ते नरपशवः । तेषामुपासकानां तेषां दातॄणां सकाशाद्या

आशिषः स्वर्गाद्यभिलषितार्थास्तदनु तत्पश्चात्तरतमभावेन योग्यतया विनश्यन्ति । किञ्चिद्भोगानन्तरम् । क्षीणे पुण्य इत्यादेः । यथाऽराजकुलं राजरहितो जनपदजनो नश्यति तथा । ये विषयतृषः । नित्यविषयो हि भगवान् भवान् । तत्र तृड्वन्तो ये विभूतीः परमत्यन्तं मुख्यत्वेनोपासते । परं तन्त्रमुत्तमं त्वामुपासते । हे नर अचल अविनाशिन्वा । ईश । नरशब्दोऽमरशब्दपर्याय इति नरपशवः । पूर्वं मनुष्यपशव इदानीं देवपशव इति विवेकः । यथोक्तं बृहद्भाष्ये स न वेद यथा पशुरिति व्याख्यानावसरे । अहेयोऽन्यो हरिश्चान्य इति मत्वाऽन्यमेव वा । य उपास्ते न स ज्ञानी मनुष्याणां पशुर्हि सः । सम्यग्ज्ञानी तु देवानां पशुरित्यभिधीयत इति चेति । धिया नरेति ऋग्व्याख्याभाष्ये नरशब्दस्याचलौ नरौ तावविनाशित्वादुपचारः क्वचिद्भवेत् । अमरत्ववदिति । तट्टीकायां नरौ तावित्यनूद्याचलाविति व्याख्यानं निर्विकाराविति । ला परिवर्तने ततो नञ्पूर्वात्कः । अविनाशित्वादित्यर्थान्तरम् । रीङ् क्षये रिष हिंसायां ततो डः । किमेवं नरशब्दव्याख्यानं सर्वत्र नेत्याह ॥ उपचार इतीत्यादि । तट्टिपणे च । ला परिवर्तन इति । यद्यपि ला आदाने इति धातुपाठे लातेरादानार्थत्वमुक्तम् । उत्तरधातुवृत्तौ तु राति लातीति द्वावपि पदार्थाविति चान्द्रा इति दानार्थत्वमुक्तं न तु परिवर्तनार्थत्वं तथाऽपि धातूनामित्यारभ्य बीजमाहेत्यर्थ इत्यन्तेन व्याख्यानं कृतमनुसन्धेयम् । तेषां सतां देवपशूनामनु मोक्षेऽपि यत्तन्नावृतिर्न विनश्यन्ति । अनु मोक्षे दानकर्मणि दर्शत इति विश्वः । यथा राजकुलम् । सराजजनपदजनः । कुलं जनपदे गृह इति विश्वः ॥ ३८ ॥

चट्टी – यस्मादेव परमेश्वरस्त्वमेवान्ये देवास्तव विभूतयः । अतस्त्वां विहाय विषयकामनयाऽन्योपासका मन्दा इत्याह ॥ विषयेति । विषयेषु तृट् तृष्णा येषां ते नराकाराः पशवः । कुतः । ये विभूतीर्विविधा नामरूपत्वेनोत्पादितत्वाद्विभूतिशब्दवाच्यानिन्द्रादीनुपासते । न तु परं त्वाम् । ततः किं तत्राह ॥ तेषामिति । तदनूपास्यानन्तरम् । यथा राजकुलमनु राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति तद्वत् । अयं च परमो विधिमर्ध्येऽपि नश्यन्त्येवेति ज्ञातव्यम् ॥ ३८ ॥

कामधियस्त्वयीश रचिता न पुनारोहन्ति यथा करम्भबीजानि ।
ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ॥ ३९ ॥

सत्यधर्मा – ज्ञानात्मनि ज्ञानशरीरेऽगुणमये सत्त्वादिगुणकृतविकाररहिते सर्वप्रधानप्रधाने । मयं प्रधानमुद्दिष्टमित्यादिवचनात् । याः कामधियस्तास्त्वद्विषये रचिताश्चेत्पुनर्न रोहन्ति संसारापादिका न भवन्ति । ढ्रलोप इति पुना रोहन्तीति दीर्घः । तत्र निदर्शनमाह ॥ यथेति । करम्भबीजानि भर्जितधानाः । यद्यपि करम्भा दधिसक्तव इत्यमरस्तथाऽपि करभादिति पूषणामिति चतुर्थाष्टकाष्टमाध्याय द्वाविंशतिवर्गीयप्रथमर्चव्याख्यायां घृतमिश्रयवाः सक्तव इति यथाऽष्टमाष्टक

द्वितीयाध्यायत्रयोविंशवर्गीयद्वितीयर्चव्याख्यायां सक्तुमिव तितउनेति धाना भ्रष्टयवाः । अत्र माधवोक्तेश्चेति भर्जितयवादिबीजानीति न निर्बीजव्याकरणमिति मन्तव्यम् । धाना भ्रष्टयवास्त्रिया-मित्युपयुक्तामरः । यथोप्तानि गुप्तान्येव भवन्ति न भवन्त्यङ्कुरात्मना तथेति । अस्य त्वदधियो गुणगणतः कामादेर्गुणकार्यतः । द्वन्द्वजालानि रागद्वेषादियुग्मसङ्घः । द्वन्द्वं रहस्ये द्वन्द्वं मिथुनयुग्मयोरिति विश्वः ॥ ३९ ॥

चट्टी – विषयकामेनापि कृता त्वत्सेवा मोक्षफलैव । ध्रुवादिषु तथा दर्शनादित्याह ॥ कामधिय इति । कामधियो विषयकामना अपीह । ईश । त्वयि रचिताः कृताश्चेन्न पुनरारोहन्ति देहान्तरावृत्तये न भवन्ति। करंभबीजानि भर्जितबीजानि यथा तद्वत् । कीदृशे त्वयि । ज्ञानात्मनि ज्ञानशब्दोप-लक्षितकल्याणगुणस्वरूपे । अत एवागुणमये न विद्यते गुणमयं प्रकृतिगुणविकृतं देहेन्द्रियादिकं यस्य तस्मिन् । यतोऽस्य जीवस्य सत्त्वादिगुणसंबन्धादेव सुखदुःखादिलक्षणद्वन्द्वसमूहा भवन्ति । त्वं तु निर्गुणस्ततः कामेनापि निर्गुणस्य तव भजनाच्छनैर्नैर्गुण्यं भवति । तं यथा यथोपासते तदेव भवति । यादृशो भावितस्त्वीशस्तादृशो जीवो भवेदिति श्रुतिभ्य इति भावः ॥ ३९ ॥

जितमजित तदा भवता यदाऽऽह भागवतं धर्ममनवद्यम् ।
निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥

सत्यधर्मा – अद्वन्द्व द्वन्द्वजालविलय इयतोपायेनेत्याह ॥ जितमिति । हे अजित अपराजित । निष्किञ्चनाः । मयूरव्यंसकादिः । न विद्यते किञ्चन त्वद्व्यतिरिक्तं येषां ते तथा मुनयो मननशीला आत्मारामा आत्मनि भगवति त्वय्यारमन्त इति ते तथा । यं धर्ममपवर्गाय मोक्षार्थमुपासते । यं च भगवान्भागवतमनवद्यं निर्दुष्टं धर्मं यदाहोपदिष्टवान् । तद्द्वन्द्वजालम् । अभवता अः तच्छब्दवाच्यो भवान्यस्य सः, आ समीचीनो भवान्यस्य तेन भक्तेन जितं पराभूतम् । तदा भवता निमित्तभूतेनेति वा। तेन धर्मेण तैर्मुनिभिर्जितमिति वा । यं धर्मं भवान्यान्प्रति यदा यस्मादाह तदा तस्मात्तैर्जितं द्वन्द्वजालं भवतैव जितमुपदेशकत्वात्तवेति वा ॥ ४० ॥

चट्टी – फलकामनयाऽपि त्वदाराधनं यदा मोक्षहेतुस्तदा । किं वक्तव्यं भागवतधर्ममाहात्म्यमिति वक्तुं तत्संप्रदायप्रवर्तकत्वेन भगवन्तं स्तौति ॥ जितमिति । हे अजित । यथा भवान् भागवतं धर्मं निवृत्तिधर्ममाह । तथा भवता जितं सर्वोत्कर्षेण स्थितम् । यद्वा । भवान् भागवतं धर्मं यथा यथावदाहोपदिदेश । तथाशब्दः समुच्चये । भवता जितं चेत्यर्थः । तत्र हेतुः । ये निष्किञ्चनाः सनकादिमुनयस्ते यं भगवन्तमपवर्गाय सेवते । तेन भवता जितं यद्धर्ममिति वा ॥ ४० ॥

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च योऽन्यत्र ।
विषमधिया रचितः स ह्यशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥

सत्यधर्मा – यत्र त्वदुपदिष्टे निवृत्तधर्मेऽनुष्ठीयमाणे नृणामधिकारिणां त्वमहं तवेदं ममेदमिति विषममतिरभिमान रूपा बुद्धिर्न भवति । तर्हि स धर्मः क इत्यतो वक्ति ॥ य इति । अन्यत्रास्मिन्कामुके विषमधिया लघुफलस्वर्गादिकामनाविवशया रचितः कृतः स हि यतोऽधर्मबहुलः सङ्गताभङ्गात् । बहुलोऽधर्म एवाकर्मघटक इति क्षयिष्णुस्तादृशनश्यत्फलको ये तवाविशुद्धस्त्वमहं तवेदं ममेदमिति तदनर्होऽनभिमतिश्च भवतीति स सता नानुष्ठेय इति भावः । हे नयत्र नयं नीतिं त्रायत इति तत्सम्बुद्धिः । न यत्रेत्यावर्तते । यत्राधिकारिणि त्वन्न विषममतिः सन् त्वं मम सदा दासोऽहं तव स्वामीत्यविषममतिः । तेषां नृणां यो धर्मः सह्यश्चाहेयश्च विशुद्धः स्वयं शुद्धिदश्च । अन्यत्र मद्भिन्नो विषमधिया त्वया तद्योग्यतया तत्त्वेन प्रतीयमानेन रचितः कारितो बोधितो वा स धर्मो धर्मबहुलः क्षयिष्णुश्चेति वा । धर्मच्छलं पापजनेषु धर्म इत्यादिश्रीमदुक्तेः ॥ ४१ ॥

चट्टी – अनवद्यानामेवाह ॥ विषमेति । यत्र यस्मिन्भागवतधर्मेऽनुष्ठिते सति त्वं कर्ताऽहं कर्तेति ममेदं तवेदमिति च विषमबुद्धिर्नृणां न भवति । किन्तु भवानेव सर्वकर्ता सर्वस्वामीति च बुद्धिर्भवतीत्यर्थः । अनवद्यपदव्यावृत्त्यमाह ॥ य इति । अन्यत्र भगवदविषयकः । विषमधिया स्वर्गादिफलकामनया स्वस्वातन्त्र्यभ्रमेण विरचितोऽनुष्ठितो यो धर्मो ज्योतिष्टोमादिलक्षणः । स ह्यविशुद्धः । रागादिमत्वात् । क्षयिष्णुश्च । नश्वरफलत्वात् । अधर्मबहुलश्च । अहिंसादि-बाहुल्यादित्यर्थः ॥ ४१ ॥

कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ।
स्वद्रोहात् तव कोपः परसम्पीडया च तथाऽधर्मः ॥ ४२ ॥

सत्यधर्मा – काम्यं कर्म न धर्मसाधनमपि तु बाधनं स्वस्यास्वस्येति बोधयति ॥ क इति । निजपरयोः स्वस्य परस्य चेति तयोः कः क्षेमः किं कुशलम् । ननु भवति किल स्वर्गादिरित्यत आह ॥ अर्थः कियानिति । कतिपयसमयवर्ती । स्वपरद्रुहा स्वस्मै कायक्लेशादिना परस्मै पश्वादये हिंसादिना द्रुह्यतीति स तथा तेन । स्वधर्मेण सु अत्यन्तमधर्मेणेत्यान्तरङ्गिको भावः । स्वद्रोहात् वृथा कायायासमयं सम्पादयतीति तवकोपोऽधर्मश्चभवत इत्यन्वयः । कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयानिति गीतागीतेः । इन्द्रियाणि जयन्त्याशु निराहारा मनीषिण इत्यादिभाषणं सद्धर्मपरमिति न विरोधः ॥ ४२ ॥

चट्टी – एतदेव प्रपञ्चयति ॥ क इति । धर्म्येण काम्यकर्मणा निजपरयोः स्वस्य परस्य च कः क्षेमः किं कुशलं न किञ्चित् । न केवलं क्षेमाभावः । किंत्वनर्थो भवेदिति भावेन धर्मं विशिनष्टि ॥ स्वेति । स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेनेत्यर्थः ॥ तदुक्तं प्रकाशिकायाम् ॥ स्वकामं तु तपः क्रूरं लोकानां क्षोभकृद्भवेत् । इतरच्छान्तये सर्वलोकानां भवति ध्रुवमिति । भवतु काम्यकर्मिणः स्वपरद्रोहः । ततः किं तत्राह ॥ स्वेति । स्वद्रोहात्परपीडया चाधर्मो भवति । तेन च तव कोपो भवतीत्यर्थः । अतो भागवतधर्मा एवानवद्य इति भावः ॥ ४२ ॥

न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ।
स्थिरचरसत्वकदम्बेष्वपृथग्धियो य उपासते त्वार्याः ॥ ४३ ॥

सत्यधर्मा – पाशुपताद्युदितो धर्म आशु पातयत्यनुष्ठातारं तारयति च त्वयोदित इति तद्विशेषं भाषते ॥ नेति । ययेक्षया धर्मस्त्वयाऽभिहितो बुद्धिपूर्वमभिहितोऽभितो हितं येनेति स इव ते वा न जिनादीनामिवेति भावः । एष मोहं सृजामीत्यादेः । स भागवतः । स्थिरचरसत्त्वकदम्बेषु स्थावरचेतन सत्त्वसङ्घेषु अपृथग्धियः सर्वत्र भगवान्सन्निहित एक एवेति समबुद्धयः । शुनि चैव श्वपाके च पण्डिताः समदर्शिन इत्यादेः । य उपासते त आर्याः सा तादृशी न व्यभिचरतीत्यर्थः । अग्र्या वर्या इत्यादि पदमनभिधायाभिधाय चार्या इति प्राक्तनी नवश्लोकी चानेन सहाहत्य दशश्लोकीचार्यावृत्तेति सूचयामास व्यास इत्यवसेयं च । सूचनमात्रस्य यत्र कुत्र वाग्रथनमलङ्कार एवेति नादावन्ते वा कुतो निबन्ध इति शङ्काऽनवकाशः ॥ ४३ ॥

चट्टी – ननु काम्यधर्मोऽपि भगवतैवाभिहित इति कुतो नानवद्य इत्याशङ्क्य त्वया रागाद्यमपि कथञ्चिद्वेदमार्गे प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या । भागवतधर्मस्तु तत्त्वदृष्ट्योक्त इत्याह ॥ नेति । यया भागवतधर्माभिहितः सा तवेक्षा दृष्टिर्न व्यभिचरति परमार्थं न जहातीत्यर्थः । अव्यभिचारे हेतुमाह ॥ स्थिरेति । स्थावरजंगमप्राणिसमूहेषु आर्या यं धर्मं सेवन्ते । अन्यथा तन्न स्यादित्यर्थः । के ते आर्या इत्यत आह । अपृथग्धिय इति । विद्यमानप्रकारापेक्षया भिन्नः प्रकारः पृथक् तद्विषयिणी बुद्धिः पृथक् बुद्धिः । मिथ्याज्ञानमिति यावत् । सा न विद्यते येषां ते तथोक्ता इत्यर्थः ॥ तदुक्तं गारुडे ॥ विष्ण्वधीना जगत्सत्ता प्रतीतिश्चेष्टितं गतिः । इति यन्निश्चितं ज्ञानमपृथग्दर्शनं स्मृतम् । मिथ्याज्ञानं पृथग्ज्ञानं तत्पृथग्दृष्टिरुच्यत इति ॥ ४३ ॥

न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ।
यन्नामसकृच्छ्रवणात् पुल्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥

सत्यधर्मा – नृणां त्वद्दर्शनात्त्वदपरोक्षेक्षणादखिलपापक्षयः । तदधिगम उत्तरेत्यादिनयेन सर्वाघनाशादिः । न इतरस्मात् । खिलानि दुर्बलान्यनिजफलोपलम्भकानि न भवन्ति तानि पापान्येतन्मात्रविनाश्यतामनेन कटाक्षयति । इति यदिदं त्वय्यघटितं दुर्घटं न हि । त्वज्ज्ञानस्य सर्वमेतत्सुघटमिति भावः । सकृदेकवारं यद्यस्मान्नामश्रवणात्त्वन्नामश्रवणमात्रेण पुल्कसेष्वन्त्य-जेष्वधमः कुत्सित इत्यर्थः । बहिरदृश्यमानान्तरङ्कुरितज्ञान इति तात्पर्यम् । संसारान्मुच्यते तस्मात्किं वक्तव्यं परिदृश्यमानज्ञानवतामखिलपापक्षयो भवतीति ॥ ४४ ॥

चट्टी – एवं भूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह ॥ न हीति ॥ ४४ ॥

अथ भगवन् वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ।
सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥

सत्यधर्मा – ते ते स्वस्वयोग्यतया तथा तथा भवन्तु किमार्द्रकवणिजो वहित्रचिन्तयेति तव किमित्यत आह ॥ अथेति । त्वदवलोकेन त्वज्ज्ञानेन परिमृष्टं मार्जितमाशमलं संसारापादकं पापं येषां ते तथेति । अस्मदो द्वयोश्चेति वयमिति सविशेषणत्वप्रयुक्तनिषेधस्याविधेयविशेषणपरत्वात् । अत्र शैवा वयं पञ्चाक्षरीजपपरा इत्यादिवत्सम्भवतीति ज्ञेयम् । तावकेन युष्मदस्मदोरन्यतरस्यां खञ्च तवकममकाविति युष्मच्छब्दमपर्यन्तस्य तवकादेशेऽणि च तवायं तावकः तेन । सुरऋषिणा नारदेन यदुदितं तत्कथमन्यथा फलानाधायकं भवति । सफलमेवेत्याशयः । तावकेनेति फलानन्वयी-भावनहेतुत्वमुच्यते ॥ ४५ ॥

चट्टी – अतोऽहं कृतार्थोऽस्मीत्याह ॥ अथेति । अतो हेतोर्वयम् । हे भगवन् । तवावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते तथाभूता इत्यर्थः । त्वद्दर्शनं च मम नारदोपदेशेन जातमित्याह ॥ सुरर्षिणेति । तावकेन यदुदितमुद्दिष्टं तत्कथमन्यथा भवति वृथा न भवतीत्यर्थः ॥ ४५ ॥

विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम् ।
विज्ञाप्यं परमगुरोः कियदिह सवितुरिव खद्योतैः ॥ ४६ ॥

सत्यधर्मा – विस्तरतो वद तव वार्तामित्यत आह ॥ विदितमिति । हे अनन्त अनन्तजनैराचरितं समस्तं तव विदितम् । तत्र निमित्तं जगदात्मन इति । जगदन्तर्यामिणः । परमगुरोरस्माभिर्विज्ञाप्यं कियत् ? ज्ञानसर्वस्वस्य विज्ञापनमिदमित्याह ॥ सवितुरिवेति । सवितुः प्रकाशात्मिकस्य सूर्यस्य पुरतः खद्योतैः स्वप्रकाशवर्णनं यथा न गुणप्रदं तथेति भावः । खद्योतो ज्योतिरिङ्गण इत्यमरः ॥ ४६ ॥

चट्टी – यथा चाहं पूर्वमतिमूढ आसम् । यथा नारदेनानुगृहीतोऽस्मि । तत्सर्वान्तर्यामिणस्तव मया किं प्रकाशनीयमित्याह ॥ विदितमिति । हे अनन्त । जनैराचरितं समस्तं तव विदितम् । अतः परम गुरोर्गुरूणामपि गुरोः सर्वज्ञस्य तव विशेषेण ज्ञाप्यं प्रकाशनीयं कियदिदं न किमपीत्यर्थः । तत्र दृष्टान्तः । सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वदिति ॥ ४६ ॥

नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ।
दुरवसितात्मगतये कुयोगिनां नमः परमहंसाय ॥ ४७ ॥

सत्यधर्मा – तर्हि किं भवदर्हणमित्यत आह ॥ नम इति । जगत्स्थितिलयोदयेशाय तुभ्यम् । कुयोगिनामसदुपायानाम् । दुरवसितात्मगतये । अन्तर्णीतस्वगतये परमहंसाय नमो नम इत्यन्वयः ॥ ४७ ॥

चट्टी –उक्तलक्षणं भगवन्तं प्रणमति ॥ नम इति द्वाभ्याम् । सकलस्य जगतः स्थित्यादीनामीशाय । समर्थाय । दुरवसिताऽविज्ञाताऽऽत्मगतिर्निजतत्त्वं यस्य तस्मै । केषां कुयोगिनाम् ॥ ४७ ॥

यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति
यं चेकितार(न)मनुवृत्तय उच्चकन्ति ।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि
तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥ ४८ ॥

सत्यधर्मा – नम इति वचनेऽपि न वयं प्रभवामस्त्वां विनेति वदति ॥ यं वा इति । श्वसन्तं प्राणंतं विश्वसृजोऽजाद्याः प्राणन्ति चेष्टन्ते । प्राणंतमनु प्राणन्तीति श्रुतिर्वैशब्देन प्रसिद्धिद्योतकेन सूचिता । यं चेकितारं ज्ञातारमनु वृत्तिमनुसृत्य वृत्तयो येषां ते तथा । उच्चकन्त्युत्कृष्टं जानन्ति । यस्य मूर्ध्नि भूमण्डलं सर्षपवदाचरति सर्षपायति । आचारार्थे क्यच् । अकृत्सार्वेति दीर्घः । तस्मै भगवते । भगवद्भिन्नाय शेषाय भगवते नारायणाय च सहस्रमूर्ध्ने । इतरत्स्पष्टम् । सहस्रशीर्षेति श्रुतेरिवानन्तशीर्षोऽनन्ताक्ष इति स्मृतेश्च भगवतोऽपि सहस्रशीर्षता ज्ञेया ॥ ४८ ॥

चट्टी – विश्वसृजो ब्रह्मादयः श्वसन्तमनुश्वसन्ति चेष्टन्ते । चेकितानं पश्यन्तमनुवृत्तयो ज्ञानेन्द्रियाण्युच्चकंति स्फुटं पश्यन्ति । सर्षपायति सर्षपवद्वर्तते ॥ ४८ ॥

श्रीशुक उवाच
संस्तुतो भगवानेवमनन्तस्तमभाषत ।
विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥

सत्यधर्मा – श्रीशुकः किमनन्तस्ततान स्तुतिश्रुतिसमनन्तरमिति परीक्षित्संशयमपनुदतीत्याह ॥ श्रीशुक इति ॥ ४९ ॥

श्रीभगवानुवाच
यन्नारदाङ्गिरोभ्यां ते व्याहृतं मम शासनम् ।
संसिद्धोऽसि यथा राजन् विद्यया दर्शनाच्च मे ॥ ५० ॥

सत्यधर्मा – अनन्तरमनन्तः किमभाषतेत्यतो भाषते ॥ यदित्यादिना । वासुदेवे भगवति मनो धेहीत्यात्मनीश्वर इति विनान्तर्गर्भं हरिविषयत्वेन ज्ञातयाऽङ्गिरस उपदिष्टया विद्यया सह बहिः शेषविषयत्वेन प्रतीयमाननारदविद्याया अपि ममानुशासनमित्येकयोक्त्या ग्रहणेनेयमपि भागवती विद्येत्यावेदयामासानन्त इति मूलकृत्सूचयामास व्यास इत्यवसेयम् । विद्यया संसिद्धो ज्ञानयोग्यो, मे दर्शनात्संसिद्धो मुक्तियोग्यश्चासीत्यर्थः ॥ ५० ॥

चट्टी – मम शासनं मद्विषयिणी विद्या । तया विद्यया मम दर्शनाच्च । संसिद्धोऽसि जीवन्मुक्तोऽसि ॥ ५० ॥

अहं वै सर्वभूतानि भूतात्मा भूतभावनः ।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥

तात्पर्यम् – 'हरिस्तु सर्वभूतानि तदन्तर्याम्यपेक्षया । तिङ्पदान्यपि सर्वाणि सुप्पदानि तथैव च । तस्मिन्नेव प्रवर्तन्ते मुख्यवृत्त्या विशेषत' इति च ॥ ५१ ॥

सत्यधर्मा – अहं वै सर्वभूतानि भूतात्मेति श्लोके सर्वाधिपतेः सर्वभूततादात्म्यमुच्यत इति प्रतीतिं प्रमाणेन निस्त्राणयति ॥ हरिरिति । हरिः सर्वभूतानीत्युच्यते । तत्र तन्त्रमाह ॥ तदन्तर्याम्यपेक्षयेति । तेषां भूतानामन्तर्यामित्वमपेक्ष्य इदं सर्वं, सोऽहमास्मि, यत्र त्वस्य सर्वमात्मैवाभूदित्याद्य-भेदवेदकवेदस्य विद्यमानत्वात्कथमन्तर्यामित्वादिप्रयुक्तव्यवहृतिरित्यत आह ॥ तिङ्पदानीति । तिङन्तपदानि तथैव सुप्पदानि । अन्तर्यामिणमीशेशमपेक्ष्याहम् त्वमित्यपि । सर्वे शब्दाः प्रयुज्यन्ते सति भेदेऽपि वस्तुषु । अस्मीत्यस्तितामाह । अहेयत्वादहं नामेत्यादि मानमुदाहृत्य व्याकृतिः कृता तत्त्वनिर्णयादावनुसन्धेया । तस्मिन्नेव प्रवर्तन्त एवेति वैवाऽन्वयः । मुख्यवृत्त्या । निर्वचनलभ्यार्थ-पौष्कल्यनिमित्तकया । विशेषत एव तद्रूपविशेषेणाविशेषतः सामान्यतस्तिङन्तसुबन्त-पदैरित्यसङ्कुचितत्वेनेत्यर्थः ॥ ततश्चायं मूलार्थः ॥ नारदोऽङ्गिरोगिरि विश्वासं जनयन्ननन्तः स्वयं किञ्चिद्वितत्य वक्ति ॥ अहमिति । सर्वभूतान्यहमिति स्वोक्तं किं तत्स्वरूपत्वेनेत्यतः स्वयमेव

व्यनक्ति। भूतानामात्माऽन्तः स्थित्वाऽऽदानादिकर्तेति तथा कथनमिति भावः। यदधीना यस्य सत्ता तत्तदित्येवेत्यादेः । उत्पादकत्वाच्च तद्व्यपदेश इत्यप्युपदिशति । भूतभावन इति । भूतानि भावयत्युत्पादयतीति स तथा । स एव भगवान्द्रोणः प्रजारूपेण वर्तते । कार्यकारणयोरेक इत्यादिपूर्वोदाहृतमानाच्च तत्त्वव्यपदेश इत्ययमर्थः प्रामाणिक इत्यर्थः स्वीकार्य इति। प्रसङ्गसङ्गत्या वेदादिमानस्य स्वतस्त्वं निरूपयन्वाङ्मनसदेवतायाः स्वाधिष्ठानरमायास्तत्त्वमाह ॥ शब्दब्रह्मेति । शब्दब्रह्म वेदादिः । परंब्रह्म महद्ब्रह्म लक्ष्मीरित्युभे । मम शाश्वती तंनुर्नित्यमधिष्ठानत्वात्तत्त्वेन व्यपदिश्यत इत्यर्थः । ममेति पदस्वारस्यात् । मम योनिर्महद्ब्रह्म प्रकृतिः परमं ब्रह्मेत्यादेः । महद्ब्रह्मशब्दपर्यायः परंब्रह्मशब्द इत्येतन्मात्रं सोढव्यम्। शब्दब्रह्म वेदस्तदभिमानिनी रमा च परं ब्रह्म नारायणख्यं परं ब्रह्म च ममोभे तनू। एकत्र मम तनुरिति प्रतिमात्वमपरत्र राहोः शिर इत्यादिवदभेदेन ममेत्युक्तिरुपपद्यत इति वाऽर्थः ॥ ५१ ॥

चट्टी – तदुपदिष्टविद्यया वीर्यातिशयाय स्वयमप्युपदिशति ॥ अहमित्यादिना। अहं भूतानामात्मा स्वामी। स्वामित्वं च न राजादिवत्तत्स्थत्वेन किं त्वंतर्यामित्वेनेत्याह ॥ अहमिति। अहं सर्वभूतानि भूतान्तर्यामी । वैशब्दोऽनुक्तार्थप्रमाणसिद्धिं सूचयति ॥ तदुक्तम् ॥ हरिस्तु सर्वेत्यादि । इतोऽपि राजादिवैलक्षण्येन स्वामित्वमित्याह ॥ भूतभावन इति । भूतानां प्रकाशकः कारणं चेत्यर्थः । ननु शब्दब्रह्म प्रकाशकं परं ब्रह्म कारणं च प्रकाशकं चासत्यम्। ते उभे मम रूपे इत्याह ॥ शब्दब्रह्मेति। वेदादिशब्दराशिलक्षणं शब्दब्रह्म सच्चिदानन्दलक्षणं परंब्रह्मेति चेत्युभेऽपि ब्रह्मणी मम शाश्वती शाश्वत्यौ तनू इत्यर्थः । परं ब्रह्म साक्षाद्रूपं शब्दब्रह्म तु प्रतिमारूपं प्रतिपाद्यत्वेन भगवतस्तत्र संन्निहितत्वादिति भावः ॥ तदुक्तम् ॥ तिङ्पदान्यपीत्यादि ॥ ५१ ॥

लोकेऽविततमात्मानं लोकं चात्मनि सन्ततम् ।
उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥

तात्पर्यम् – लोकं चात्मनि सन्ततं वासनारूपेण ॥ ५२ ॥

सत्यधर्मा – लोके विततमात्मानमिति श्लोके लोकं मनसि सन्ततं पश्येति भाति। नाणीयसि सम्भावितं तदित्यतस्तद्घटयति। लोकं चात्मनि सन्ततं वासनारूपेणेति। लोकावलोकजनितसंस्काराणां मनोगतत्वात्तत्कारणकानां मनोनिष्ठता युक्तेति भावः ॥ तत इयं मूलव्याख्या ॥ लोके विततं मनः पूर्वरूपं मनसा वाऽग्रे सङ्कल्पयतीत्यादेरर्थग्रहणहेतुतया व्याप्तम्। अविततं वस्तुतस्तु सूक्ष्ममिति वा। आत्मनि मनसि लोकं च वासनामयतया संततं जानीहि। उभयं लोक आत्मेत्युभयं म य व्याप्तम्। समनेत्याद्युक्तेरीशवदीशिन्या अपि देशकालव्याप्तेस्तस्या अपीति मयेति कथयन्ध्वनयामासेति ज्ञेयम्।

मया चेति चान्वयः । एतदुभयमपि मया कृतम् । मयि मदधिकरणकत्वेन । मयेत्यावर्तते । तेन कृतं सम्बध्यते । मयैव मयि कृतं विहितमवेहीत्यर्थः । मयि मया रमया कृतं निवेशितमिति वा । तथा चोक्तं गीताभाष्ये नवमेऽध्याये निधानशब्दव्याख्यावसरे । संहारकाले प्रकृत्या जगदत्र निधीयत इति निधानम् । तथा ह्यृग्वेदखिलेषु । अपश्यमप्यये मायया विश्वकर्मण्यदो जगन्निहितं शुभ्रचक्षुरितीति ॥ ५२ ॥

चट्टी – अस्तु भगवानेतादृशमाहात्म्योपेतः किं तत इत्याशङ्क्य जाग्रदाद्यवस्थाऽनुभवितृत्वलक्षणबन्धस्यानादिविषयवासनाऽवसितान्तःकरणमूलत्वात्तयोश्च मदधीनत्वात्तन्निवृत्त्यर्थं मामेवोक्तवक्ष्यमाणमाहात्म्योपेतमनुस्मर इत्यभिप्रेत्याह ॥ लोक इति चतुर्भिः । आत्मानं मनो लोके स्वविषयप्रपञ्चे विततं व्याप्तम् । लोकं चात्मनि मनसि । संततं वासनारूपेण व्याप्तम् । उभयमात्मानं लोकं च मया ब्रह्मरूपेण व्याप्तं उभयमप्याश्रितं मदधीनं च स्मरेदिति तृतीयेनान्वयः । पश्येत्यध्याहारो वा ॥ तथा चोक्तमेकादशस्कन्धे सनकादिप्रश्ने ॥ गुणेष्वाविशते चेतो गुणश्चेतसि च प्रभो । कथमन्योन्यसंत्यागो मुमुक्षोरतितीर्षोरिति । तत्समाधाने च गुणेष्वाविशते चेतो गुणश्चेतसि वः प्रजाः । जीवस्य देह उभयं गुणश्चेतो मदात्मन इति । तात्पर्ये च । विष्णुस्था विषयाः सर्वे विष्णावेव मनो मम । इति मय्यर्प्य तत्सर्वं त्यजेत्तत्तन्न बाधत इति । अविततमिति पदं विच्छिद्यात्मानं जीवं लोकेऽविततमव्याप्तं जानीहीति व्याख्यानं प्रकृतेऽनुपयुक्तम् । प्रकरणाननुगुणं च । अस्मत्पक्षे तु लोकं चात्मनि सन्ततमित्युक्तवासनाकारणीभूतानुभवप्रतिपादकत्वेन सार्थक्यमुक्तं समाख्याऽनुकूलं चेति ज्ञातव्यम् ॥ ५२ ॥

यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥

सत्यधर्मा – मनउपादानकलोकावलोकः क इत्यत आह ॥ यथेति । पुरुष एतच्छरीरसम्बन्धी जीवः प्रसुप्तः स्वप्नावस्थास्थः सन् आत्मन्यात्मनेति स्वप्ने स्वप्नादिति च विपरिणतमन्वेति । आत्मना मनसा विश्वं वासनामयं स्वाप्नं यथैकदेशस्थं स्वेन सहैकस्थानस्थितं प्रपश्यति । तथा स्वप्नादुत्थितः सन्नात्मना विश्वमेकदेशस्थम् । एको देशः स्वाधिष्ठितभिन्नस्तत्र तिष्ठतीति स तथा । आत्मानं तद्भिन्नदेशस्थं न मन्यते । स्वाप्निकपदार्थस्य प्रागुत्तरं चानुपलब्धेरिति भावः ॥ ५३ ॥

चट्टी – जाग्रदाद्यवस्थानां भगवदिच्छाधीनत्वं संप्रतिपन्नदृष्टान्तेनाह ॥ यथेति द्वाभ्याम् । यथा सुषुप्तो निद्रितः पुरुषो जीवः स्वप्ने स्वप्नावस्थायामात्मनि मनसि विद्यमानं विश्वं वासनामयप्रपञ्चं पश्यति । स्वप्नादुत्थितश्चैकदेशस्थं शयानदेशस्थितं स्वात्मानमेव पश्यति न तु स्वाप्नप्रपञ्चम् । तेन च स्वप्नं मायामात्रं मन्यत इति ग्राह्यम् । दार्ष्टान्तिकानुसारात् । एवमेव जागरणादीनि जाग्रत्सुषुप्तिमूर्छादीनि

जीवानां स्थानान्यवस्था आत्मनः परमात्मनो माययेच्छया निमित्तभूतया तन्नियतयोपादानभूतया प्रकृत्या च मात्राणि निर्मितानि । मा निर्माण इति धातोः । विज्ञाय तेषां जीवस्थानानां द्रष्टारं दर्शयितारम् । जाग्रदादिभिर्जीवबन्धकमिति यावत् । स्वतन्त्रे कर्तृशब्दः स्यात्प्रज्ञस्यावेदनं यथा । सर्वप्रदर्शके चैव तुरीये सर्वदर्शितमिति ब्रह्मतर्कवचनात् । प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक् सदेति श्रुतेश्च । यद्वा । द्रष्टारं स्वातन्त्र्येण जीवावस्थासाक्षिणं विश्वादित्रिरूपम् । परं तद्विलक्षणम् । मोक्षप्रदं तुर्यरूपं भगवन्तं स्मरेदुपासीतेत्यर्थः ॥ तथा च श्रुतिस्मृती । कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिद्ध्यत इति । कार्यकारणस्य बन्धस्य तदधीनत्वतो विभुः । विश्वादिरूपो भगवान् बद्ध इत्युच्यते श्रुतौ । कुतो बन्धः परस्यास्य बन्धेशस्य चिदात्मन इति च । यद्वा । स्वप्ने सुषुप्तः पुरुष आत्मनि वासनारूपेण वर्तमानं विश्वं गिरिवनादिरूपं देशान्तरस्थं पश्यति । स्वप्नमध्ये सुप्तिस्वप्नं च पश्यतीत्यर्थः । तदा स्वप्न एवोत्थितः सन् आत्मानमेकदेशस्थं शयनदेशे स्थितं मन्यते । जाग्रदवस्थामनुभवति । तानि च सुषुप्त्यादिस्थानानि तदा जीवस्य स्वातन्त्र्याभावेन यथा मायामात्राणि । एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि आत्मनः परमात्मनो माययेच्छया मात्राणि निर्मितानीति विज्ञायेत्यर्थः । शेषं पूर्ववत् ॥ तदुक्तम् ॥ मायेतीच्छा समुद्दिष्टा मायामात्रं तदुद्भवमिति । विश्वं पश्यति चात्मनीत्यनेन मनोगतवासनामयपदार्थावलोकनं स्वप्न इति स्वप्नलक्षणमुक्तम् । मनोगतांस्तु संस्कारान्स्वेच्छया परमेश्वरः । प्रदर्शयति जीवाय स स्वप्न इति गीयत इति वचनात् । आत्मानमेकदेशस्थं मन्यत इत्यनेन बाह्यपदार्थदर्शनं जाग्रदिति जाग्रल्लक्षणमुक्तम् ॥ ५३,५४ ॥

एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥

तात्पर्यम् – मायामात्राणि प्रकृतिनिर्मितानि ॥ ५४ ॥

सत्यधर्मा – एवं जागरणादीनिति श्लोके मायामात्राणीत्यनिर्वचनीयानीति संशयं व्यंसयितुं स्वयमनूद्य व्याख्याति ॥ मायामात्राणि प्रकृतिनिर्मितानीति । प्रकृतिश्च भगवान्भगवती च तदभिमाना चिच्च ॥ अथ श्लोकार्थः । मनोगतांस्तु संस्कारान्स्वेच्छया परमेश्वरः । प्रदर्शयति जीवाय स स्वप्न इति गीयत इत्याद्युक्तेर्यथा स्वप्नार्थनिर्माता च प्रदर्शको मायामात्रमित्यादिना हरिः प्रमितस्तथा जागरणाद्यवस्था । अतः प्रबोधोऽस्मादित्यादिमानतः सर्वेश्वरायत्तेत्याह ॥ एवमिति । जीवस्थानानि स्वयं सुखदुःखादिभोगव्यवस्थापकस्थलान्यात्मनो मनःसम्बन्धीनि मायामात्राणि भगवदिच्छया तदनुगृहीतप्रकृत्या च निर्मितानि ज्ञात्वा तद्द्रष्टारं स्वात्मानं परं तद्विलक्षणं स्मरेत् । द्रष्टारं साक्षादीक्षमाणं दर्शयितारं वा परं हरिं स्मरेदिति वा ॥ ५४ ॥

येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ।
सुखं च निर्गुणं ब्रह्म तमात्मानमवैहि माम् ॥ ५५ ॥

सत्यधर्मा – येनेत्यनेन प्रसुप्त इति पदमन्तर्णीतण्यर्थमिति सूच्यते । येन भगवता प्रसुप्तः प्रस्वापितः पुरुषो जीवस्तदा सुप्तिसमये आत्मनः स्वापमियन्तं कालं किञ्चन नावेदिषमिति स्वाज्ञानं कालं सुखं चानुभवितारमात्मानं च वेद नान्यत्किञ्चित् । एतावन्तं कालं सुखमहमस्वाप्स-मित्यौत्तरिकस्मरणस्य विनावेदनामनुपपत्तेस्तज्ज्ञानमस्तीति ज्ञायते । स्यादिदं यदि स्याज्जीववैलक्षण्यं ब्रह्मणस्तदेव कुत इत्यत आह ॥ निर्गुणमिति । सत्त्वादिगुणरहितं भिन्नगुणहीनं ब्रह्म गुणपूर्णं तमात्मानं मामवेहि । एतेन स्वयमतदवस्थस्तदवस्थं जीवं कर्तुं समर्थ इति सूचयति ॥ ५५ ॥

चट्टी – इदानीं सुषुप्तिस्वरूपं निरूपयन् जाग्रदादिनियामकस्य विश्वादिचतूरूपस्य भगवतः स्वभिन्नत्वशङ्कां परिहरति ॥ येनेति । पुरुषो जीवो येन प्राज्ञनामकेन भगवता प्रसुप्तः प्रस्वापितः सन् । तदा स्वापकाले आत्मनः स्वस्य स्वापं सुप्त्यवस्थां तत्कारणाज्ञानं च स्वापकालं च निर्गुणविषयजन्यम् स्वरूपभूतमिति यावत् । सुखं चात्मानं स्वस्वरूपं चेत्येतत्तदेव वेद नान्यत् । एतावन्तं कालं सुखमहमस्वाप्सं नान्यत्किञ्चिदवेदिषमिति सुप्त्युत्तरकालीनस्मरणात् ॥ तथा चोक्तम् । नात्मानं न परांश्चैव न सत्यं नापि चानृतम् । प्राज्ञः स वेदयेत्किञ्चिज्जीवकालतमो विना । सुप्त्यवस्थां सुखं चापि विना नान्यत्प्रदर्शयेत् । सर्वं तु दर्शयेन्मुक्तौ तुरीयः परमेश्वर इति । येन प्रसुप्त इत्युपलक्षणम् । येन जाग्रदादिकं प्रापितो भवति । तं निर्गुणं गुणकार्यावस्थाऽतीतम् । ब्रह्म संपूर्णगुणम् । आत्मानं चतूरूपं परमात्मानं मामवैहि । मदभिन्नं जानीहीत्यनेन विश्वादीनां चतुर्णामपि परस्परं कार्यभेदप्रयुक्तभेदशङ्का परास्ता ॥ तथा चोक्तम् ॥ विश्वादिरूपो यः स्वात्मा स विज्ञेयो मुमुक्षुभिः । निर्विशेषोऽपि भगवांश्चतुर्धा समुदीरित इति ॥ ५५ ॥

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत् परम् ॥ ५६ ॥

तात्पर्यम् – प्रतिबोधेऽन्वेति स्वयमपि प्रतिबुद्धः । सुप्तावस्वपन्व्यतिरिच्येत ॥ ५६ ॥

सत्यधर्मा – उभयं स्मरतः पुंस इति श्लोके प्रस्वापप्रतिबोधयोरन्वेति व्यतिरिच्येतेति यथाक्रममन्वये स्वापाप्तिः प्रबोधव्यतिरेकश्चेति भाति भगवत इदं चानुपपन्नमिति स्वयमुपपन्नमन्वयमाह ॥ प्रतिबोध इति । प्रतिबोधे जीवजागरणक्षणे स्वयमपि प्रतिबुद्धः सन्नन्वेति । सुप्तौ तस्य स्वापे स्वयमस्वपन्स्वा-पमनवाप्नुवानः सन्व्यतिरिच्येत । जीवाद्विलक्षणः सन्वर्तेतेत्यर्थः । अन्वेति व्यतिरिच्येतेत्यन्वय

व्यतिरेकतो विज्ञायते इत्यर्थभ्रमोऽपि निवारितोऽनेनेति ज्ञेयम् । अथ मूलार्थः ॥ परं स्मरेदित्याद्युदितं परत्वं पुनरुपपादयति ॥ उभयमिति । उभयं प्रबोधः प्रस्वापश्चेत्येतदुभयं स्मरतोऽनुभवतः पुंसो जीवजातस्य स्वापप्रतिबोधयोः प्रतिबोधप्रस्वापयोः प्रबोधे जागरिते यदन्वेति सम्बध्यते तदुद्बोधकतया । यच्च स्वापे मतिवैकल्यकारिदशायां व्यतिरिच्येत । तज्ज्ञानं तस्यामवस्थायामनुभवतो पुंसो ज्ञानं यस्य तत् । साक्षाद्दृष्ट्टसज्जीवविविक्तं स्यात्तस्मात्तद्ब्रह्म परं तदुत्तमम् । अथवा तज्ज्ञानमिति परं तद्विलक्षणमिति वा । तस्याज्ञानं ज्ञानमेतस्य जागरणं चैतदधीनं तज्ज्ञानं चेति सर्वं परताहेतुरिति ज्ञेयम् ॥ ५६ ॥

चट्टी – न केवलं भगवतो जाग्रदादिनियामकत्वज्ञानमेव बन्धनिवर्तकम् । किन्तु भेदज्ञानमपीत्यभिप्रेत्य जीवेश्वरभेदं सयुक्तिकं निरूपयति ॥ उभयमिति । तज्जाग्रदादिजीवावस्थानियामकं ब्रह्म विश्वादिचतूरूपं परं ब्रह्म उभयं प्रस्वापं प्रतिबोधं च स्मरतोऽनुभवतः पुंसो जीवस्य प्रतिबोधे जाग्रदवस्थायामन्वेति जीवमनुसरति । जीववत्स्वयमपि प्रतिबुद्धं वर्तत इति यावत् । प्रस्वापे सुषुप्त्यवस्थायां स्वप्नावस्थायां च । सुषुप्तिस्वप्रयोश्चैव स्वर्गव्योम्नोस्तथैव च । अन्योन्यनामता ज्ञेया मनोबुध्योस्तथैव चेति शब्दनिर्णयवचनात् । व्यतिरिच्येत व्यतिरिच्यते । जीववन्नानुसरति । जीववत्सुप्तं न भवतीति यावत् ॥ तथा च श्रुतिः । स्वप्नेन शारीरमप्रहत्यासुप्तसुप्तानभिचाकसीतीति । यद्वा । प्रतिबोधः सम्यग्ज्ञानम् । प्रस्वापोऽज्ञानमन्यथाज्ञानं च । अज्ञानंसुप्तिशब्दोक्तमिति वचनात् । तथा चोभयं प्रस्वापं प्रतिबोधं च स्मरतः प्राप्तवतः पुंसः प्रतिबोधे सम्यग्ज्ञानदशायां तद्ब्रह्म अन्वेति प्रतिबुद्धं वर्तते । प्रस्वापेऽज्ञानदशायां मिथ्याज्ञानदशायां च व्यतिरिच्यते तद्रहितं वर्तत इत्यर्थः । अत एव ज्ञानं पूर्णज्ञानस्वरूपम् । अत एव तत्परं तस्मादल्पज्ञानाज्जीवात्परं भिन्नमित्यर्थः । तदेवंभूतं ब्रह्म मामवैहीत्यनुषङ्गः ॥ ५६ ॥

यद्येष विस्मृतः पुंसो मद्भावो भिन्न आत्मनः ।
ततः संसार एतस्य(एकस्य) देहाद् देहो मृतेर्मृतिः ॥ ५७ ॥

तात्पर्यम् – 'सर्वभिन्नं परात्मानं विस्मरन्संसरेदिह । अभिन्नं संस्मरन्याति तमो नास्त्यत्र संशय' इति च ॥ ५७ ॥

सत्यधर्मा – यद्येष विस्मृत इत्यत्र देवजीवाभेदः प्रतिपाद्यत इति प्रतीयते तां प्रमाणेन प्रच्यावयति ॥ सर्वभिन्नमिति । सर्वभिन्नं स्वादिविलक्षणं परमात्मानं विस्मरन् भिन्नत्वेनाननुसन्दधान इह संसरेत्पुनः पुनः संसारमाप्नुयात् । अभिन्नं संस्मरन् समा तदभेदवेदनाया अनिवर्त्यतां द्योतयति । तमो याति । अत्रैतत्प्रमेये संशयो नास्ति । इतिच तन्त्रमालायामित्यन्वयः ॥ अथ मूलं विव्रियते ॥ यदि एष

हरिरहं भिन्न इति पुंसो विस्मृतस्तत एतस्यात्मनो देहाद्देहो देहावसितिर्न हि भवति । नित्यसंसारीति सारांशः । मद्भावः मम भावस्तादात्म्यं यस्य स इति विस्मृतो विशेषेण स्मृतोऽहं चैतस्य पुंसो मृतेर्मृतिः कदाऽप्युत्थानहीना तमो भवतीति पक्षद्वयेऽपि विशेषः । वीतिप्रमाणस्थसम्पदस्य व्याख्येयं मूलमिति ज्ञेयम् । एकस्येति पाठो नानेकपुस्तकस्थस्तथाऽपि भिन्न एष इति विस्मृतोऽहं येन तस्यैकस्य देहाद्देहः । एकस्यैव मद्भावो मदात्मेति येनैकेन विस्मृतस्तस्यैकस्य मृतेर्मृतिस्तमो भवतीति व्याख्येयः । संसरेदिति तमो यातीति तात्पर्ये विलक्षणफललब्धत्वेनालापानुकूल्यात् ॥ ५७ ॥

चट्टी – भेदज्ञानं बन्धनिवर्तकमित्युक्तम् । विपक्षे बाधकमाह ॥ यदिति । आत्मनो जीवाद्भिन्न एषः पूर्वोक्तो मम भावः स्वरूपं यदि विस्मृतः स्यात् । जीवेश्वरभेदो विस्मृतश्चेदिति यावत् । ततस्तर्हि पुंसः संसारोभवति । संसारस्वरूपमाह ॥ देहाद्देह इति । जन्मान्तरं पुनर्जन्मेत्यर्थः । ऐक्यज्ञाने तु तम एवेत्याह ॥ एकस्येति । एकस्य जीवेश्वरैक्यमनुसंदधतः पुंसो मृतेर्मृतिः । दुःखानन्तरं पुनर्दुःखमंधन्तमो भवतीत्यर्थः ॥ तथा चोक्तम् ॥ सर्वभिन्नमित्यादि ॥ ५७ ॥

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न बुध्येत न क्वचित् क्षेममाप्नुयात् ॥ ५८ ॥

सत्यधर्मा – योग्यां तनुं प्राप्यापि परं परमात्मानं स्वं चाविजानतो जनस्य नात्र क्षेमः परत्र मोक्षश्च भवत इत्याह ॥ लब्ध्वेति । ज्ञानं सामान्यज्ञानं विज्ञानं विशेषज्ञानं तयोः सम्भवो यस्यां सा ताम् । मानुषीं मनुष्यसम्बन्धिनीं योनिमिह कर्मभूमौ लब्ध्वाऽऽत्मानमियदात्मस्वामिनं भगवन्तम् । आ आत्मानमिति यावत् । दासं स्वं च न बुध्येत विबुध्येत च स न क्वचित् इह परत्र क्षेमं स्थितस्य परिपालनरूपं मोक्षं च नाप्नुयात् । यो न बुध्येत सामग्र्यां सत्यामपि स एव कचित्कौ भूमौ न विद्यते विद्यस्य स उपलतुल इत्यर्थः । य आत्मानं न बुध्येत तस्य चिज्ज्ञानरूपी भगवान्क स दूरे भवतीति भावः । स क्षेमं नाप्नुयादिति वा ॥ ५८ ॥

चट्टी – तदेवमुक्तमाहात्म्योपेतस्य मम ज्ञानार्थमत्रैव प्रयतितव्यम् । भोगादिसंपादनं तु योन्यन्तरेऽपि शक्यमित्याह ॥ लब्ध्वेति । इह कर्मभूमौ ज्ञानविज्ञानसंभवां ज्ञानं शास्त्रोत्थं विज्ञानमपरोक्षम् । श्रवणान्मननाच्चैव यत्ज्ञानमुपजायते । तत्ज्ञानदर्शनं विष्णोर्विज्ञानं शंभुरब्रवीदिति वचनात् । तयोः संभवो यस्यां तां मानुषीं योनिं लब्ध्वाऽऽत्मानं सर्वगुणपरिपूर्णं परमात्मानम् । नित्याततगुणत्वात्स आत्मेति श्रुतिषूदित इति वचनात् । तथाऽऽत्मानं जीवस्वरूपं भगवत्पारतन्त्र्यादिना यो न बुध्येत । सः क्वचिदपि क्षेमं नाप्नुयादित्यर्थः ॥ तथा च श्रुतिः । इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति ॥ ५८ ॥

स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ।
नोभयं चाप्यनीहायां पश्यंस्तद् विरमेत् कविः ॥ ५९ ॥

सत्यधर्मा – अज्ञोऽपि यज्ञादिकं कृत्वा क्षेमं यायादित्यत आह ॥ स्मृत्वेति । ईहायां वृत्तकर्मणि परिक्लेशं कायशान्त्यादिभवं दुःखम् । ततस्तत्कर्मणः प्राप्तस्य फलस्य स्वर्गादेर्विपर्ययं प्रच्युतिं च पश्यंस्तत्तस्मात्प्रवृत्तकर्मणो विरमेत् । व्याङ्परिभ्यो रम इति परस्मैपदता । तन्न कुर्यादित्यर्थः । अनीहायां निवृत्तकर्मणि प्रवृत्ते नोभयं परिक्लेशः पर्यावृत्तिश्चेत्येतदुभयं नो नास्तीति कविर्जानन् तत्रैव रमेतेत्यर्थः ॥ ५९ ॥

चट्टी – प्रवृत्तिमार्गे वैराग्यार्थं प्रवृत्तिनिवृत्तिमार्गयोर्विवेकमाह ॥ स्मृत्वेति । ईहायां प्रवृत्तिमार्गे परिक्लेशमत्यायासम् । तत ईहतः फलविपर्ययम् । फलं सुफलं सुखप्राप्तिर्दुःखनिवृत्तिश्च तयोर्विपर्ययो व्यत्यासः । दुःखनिवृत्तिः सुखप्राप्तिरितियावत् । तं च स्मृत्वा विचिन्त्यानीहायां निवृत्तिमार्गे तूभयमपि परिक्लेशफलविपर्ययश्च नास्तीत्येवं पश्यन् । यद्वा । भयं पुनः पुनर्जननमरणलक्षणसंसारभयं नो भवति । किंतु नित्यसुखप्राप्तिलक्षणमोक्षो भवतीति पश्यन् । तत्तस्या ईहाया विरमेद्विरज्येतेत्यर्थः ॥ ५९ ॥

सुखाय दुःखमोक्षाय कुर्वाते दम्पती क्रियाः ।
ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥

सत्यधर्मा – अपत्नीकोऽप्यग्निहोत्रमाहरेदित्याद्युक्तेर्विधुरस्य कामनयाऽनुष्ठितेष्ट्यादेः क्लेशाद्यापादकत्वेऽपि पत्नीसहितस्यान्धपङ्गुन्यायेन तत्कृतक्रत्वादेरक्षयिष्णुफलोपलम्भकता भवेदित्यतस्तदपि नेत्याह ॥ सुखायेत्यादिना । दम्पती क्रिया दुःखमोक्षाय तत्प्रहाणाय सुखाय च शाश्वतिकानन्दाय कुर्वाते । ततोऽनिवृत्तिर्दुःखस्याप्राप्तिः सुखस्य चेति न ताः कर्तव्या इति भावः ॥ ६० ॥

चट्टी – तदेव विवृणोति ॥ सुखायेति त्रिभिः । दंपती अग्निहोत्रादिक्रियाकरणयोग्यौ स्त्रीपुरुषौ सुखप्राप्तये दुःखनिवृत्तये च क्रियाः प्रवृत्तिधर्मान्कुर्वाते । ततः प्रवृत्तिधर्मेभ्यो दुःखस्यानिवृत्तिः सुखाप्राप्तिश्च भवति ॥ ६० ॥

एवं विपर्ययं बुध्वा नृणां विद्याभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥ ६१ ॥

दृष्टश्रुताभिर्मात्राभिः विमुक्तः स्वेन तेजसा ।
ज्ञानविज्ञानसन्तृप्तो मद्भक्तः पुरुषो भवेत् ॥ ६२ ॥

सत्यधर्मा – विद्याभिमानिनामविद्यायां विद्येत्यभिमानवतां नृणामेवमुक्तस्य विपर्ययं बुद्ध्वा ज्ञात्वाऽऽत्मनः स्वस्य सूक्ष्मां बहुसंविधानलभ्यां स्थानत्रयविलक्षणां वैकुण्ठादिस्थानत्रयेण तद्वत्त्वेनेति यावत् । विलक्षणामक्षयिष्णुफलत्वेन स्वर्गादिविरुद्धलक्षणवर्ती गतिं गम्यस्थानं लब्ध्वा दृष्टश्रुताभिर्मात्राभिः शब्दादिविषयैः स्वेन तेजसेन्द्रियलौल्यवैकल्यजनितसामर्थ्येन विमुक्तः सन् ज्ञानविज्ञानसन्तृप्त इदमेवालमिति तृप्तः पुरुषो मद्भक्तो भवेत् । स्वेन तेजसा स्वरूपभूतधाम्ना सहितः । तेजो धाम्नि पराक्रम इति विश्वः । मुक्तो भवेदिति वा । विमुक्त इत्यावर्त्यान्वयो ज्ञेयः ॥ ६१-६२ ॥

चट्टी – तस्मात्पुरुषोऽधिकारी जीवो विद्याभिमानिनां पण्डिताभिमानिनां न तु पण्डितानाम् । प्रवृत्तिधर्मिणामिति यावत् । नृणामेवमुक्तलक्षणफलविपर्ययं बुध्वा । तथाऽऽत्मनः परमात्मनः स्थानत्रयविलक्षणम् । जाग्रदाद्यवस्थात्रयातीतम् । अत एव सूक्ष्मम् । दुर्ज्ञेयं गतिं स्वरूपं च बुध्वा । स्वेन तेजसा विवेकबलेन दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैर्विमुक्तः । तत्र विरक्त इति यावत् । ज्ञानविज्ञानाभ्यां सन्तुष्टः सन्मयि भक्तिमान्भवेदित्यर्थः ॥ ६१-६२ ॥

एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः ।
स्वार्थः सर्वात्मना ज्ञेयो यत् परात्मैकदर्शनम् ॥ ६३ ॥

सत्यधर्मा – योगनैपुण्यबुद्धिभिः । नैपुण्येन स्वार्थे ष्यञ् । यद्वा योगस्य यन्नैपुण्यं निपुणता कौशल्यं यत्र बुद्धिस्तत्सम्पादनविषयिणी येषां ते तैः । अथवा करणरूपाभिस्ताभिः । मनुजैः कर्तृभिरेतावानेव स्वार्थः सर्वात्मना ज्ञेयः । स क इत्यत आह ॥ यत्परात्मेति । एति वत्सं गौरिवेति यन्स चासौ परत्मा चेति । सः श्रुतं चेदागमिष्यतीति ऋग्भाष्योक्तेः । ज्ञेय इति प्रस्तुतं ज्ञानं स्तौति ॥ एकदर्शनमिति । मुख्यं ज्ञानमिदमित्यर्थः । यत्परत्मैकदर्शनं समाभ्यधिकरहित एक इति ब्रह्मज्ञानं यद्येन भवति स सर्वात्मना स्वार्थो ज्ञेय इति वा । यत्परात्मैकदर्शनं तेनाहमेक इति ज्ञानम् । हे स्व स्वकीय चित्रकेतो अर्थः नाशरूपम् । तथा सर्वात्मनो न ज्ञेयो हरिरिति । सर्वमुर्वरितं पूर्ववदिति वा ॥ ६३ ॥

चट्टी – मज्ज्ञानादन्यः परमपुरुषार्थो नास्तीत्याह ॥ एतावानिति । योगेन नैपुण्यं यस्याः सा बुद्धिर्येषान्तैर्मनुजैः परस्य सर्वोत्तमस्यात्मनो ममैवैकं दर्शनमिति यावत् । एतां भवानेव सर्वात्मना स्वार्थो ज्ञेय इत्यर्थः ॥ ६३-६५ ॥

इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः ॥ ६-१६ ॥

त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ।
ज्ञानविज्ञानसम्पन्नो धारयन्नाशु शुध्यति ॥ ६४ ॥

सत्यधर्मा – एतद् ब्रह्म त्वमन्यद्भिन्नम् । त्वत्वावन्यपर्यायावित्युक्तेः । लोके वेदे च ब्रह्मा त्वो वदतीत्यादेः । वचो विद्यारूपं भगवान्मदन्य इत्यादिरूपमन्तः शुध्यति । शुध्यतीति कथं शुध्यसीति वक्तव्यमिति शंका पराकृता । अथवा त्वं विष्णो प्रथमो मातरिश्वन् आविर्भूत्वेत्यृग्भाष्यटीकायां ह्युपपदेऽपि त्वं देवशक्त्यामित्यादौ प्रथमपुरुषो दृष्ट इत्युक्तेर्नियमो वैय्याकरणानां प्रायिक इत्युपपत्तिर्ज्ञेया । बभूवुरिति बहुवचनमेकवचनार्थ इत्येतावता समाधिसम्भवे गुरुसरणिमुररीकुर्वन्पराचकार नियमनैर्भर्यं परेषामिति ज्ञेयम् ॥ ६४ ॥

श्रीशुक उवाच
आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ।
पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ॥ ६५ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे षोडशोऽध्यायः ।

सत्यधर्मा – चित्रकेतुमित्थमाश्वास्य चित्रकेतुं च कृत्वा चित्रः केतुः स्वविषयकं ज्ञानं यस्य तं कृत्वा । केतुं कृण्वन्नकेतव इति व्याख्यावसरे तथैवोक्तेः ॥ ६५ ॥

इति श्रीसत्यधर्मतीर्थकृतायां श्रीभगवतटिप्पण्यां षष्ठे षोडशोऽध्यायः ॥ ६-१६ ॥

अथ सप्तदशोऽध्यायः ।

श्री शुक उवाच
यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः ।
विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥ १ ॥

सत्यधर्मा – हरिः ॐ । अत्र भगवान्ज्ञातो ददाति मुक्तिमिति वक्तुं तदुपयुक्तं दर्शयन् चित्रकेतोरियदनन्तप्रसक्तिमतोऽपि प्रारब्धवशतो दुःशकशापप्रकारमादौ वदति ॥ यत इति । गगनेचरः । हलदन्तात्सप्तम्याः संज्ञायामिति सप्तम्या अलुक् । संज्ञात्वविप्रतिपत्तौ तत्पुरुषे कृति बहुलमित्यलुग्वा । यतो यस्यां दिशि तस्यै दिशे नमः कृत्वा चचारेत्यन्वयः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ रुद्रावमानकोपोत्थपार्वतीशापतोऽभवत् ।
चित्रकेतोर्वृत्रजन्मेत्यध्यायेऽस्मिन्निरूप्यते ।

यतो यस्यां तस्यै दिशे नमस्कृत्वा ॥ १ ॥

सलक्षं लक्षवर्षाणामव्याहतबलेन्द्रियः ।
स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥ २ ॥

सत्यधर्मा – अव्याहतं बलमिन्द्रियाणि च यस्य । अव्याहतबलानीन्द्रियाणि यस्य स वा ॥ २ ॥

कुलाचलेन्द्रद्रोणीषु नानासङ्कल्पसिद्धिषु ।
रेमे विद्याधरस्त्रीभिर्गापयन् हरिमीश्वरम् ॥ ३ ॥

सत्यधर्मा – कुलाचलेन्द्रस्य द्रोण्यो दर्यः । द्रोणी काष्ठाम्बुवाहिन्यां ग्रावदर्यामिति विश्वात् । अत्राचलेन्द्रपदस्य सत्त्वात्केवलदरीमात्रपरता ज्ञेया । सङ्कल्पस्य मनसा सङ्कल्पितस्य सिद्धिर्यासु तासु । सङ्कल्पमात्रेण सिद्धिः फललब्धिर्यासु तासु वा गापयन् गानं कारयन् । अर्तिह्रीत्यादिनादन्तपुक् ॥ ३ ॥

चट्टी – स विद्याधरस्त्रीभिर्हरिं गापयन् रेम इति द्वयोरन्वयः । अव्याहतं बलमिन्द्रियपाटवं च यस्य स तथा । नानाविधाः संकल्पत्वेनैव सिद्धयो यासु । कुलाचलेन्द्रस्य द्रोणिषु निम्नतेटषु ॥ २,३ ॥

एकदा स विमानेन विष्णुदत्तेन भास्वता ।
गिरिशं ददृशे गच्छन् परीतं सिद्धचारणैः ॥ ४ ॥

सत्यधर्मा – विष्णुदत्तेन तन्नाम्ना । अथवाऽनन्तदत्तेन । अनुवादात्प्रागपि तादृशः । सिद्धचारणैः परिवृतं सिद्धचारणैः सह गच्छन्निति वा ॥ ४ ॥

चट्टी – इदानीं चित्रकेतोरसुरजन्मप्राप्तौ कारणमाह ॥ एकदेत्यादिना ॥ ४ ॥

आलिङ्ग्याङ्की(ङ्के)कृतां देवीं बाहुना मुनिसंसदि ।
उवाच देव्यां शृण्वन्त्यां जहासोच्चैस्तदन्तिके ॥ ५ ॥

सत्यधर्मा – अनङ्काऽभूषणरूपा भूषणत्वेन कृताऽङ्कीकृता । अङ्कश्चित्रयुद्धे विभूषण इति विश्वः । अङ्के कृतामिति पाठो निरङ्कः । अङ्क उत्सङ्गोऽस्यास्तीति सा तथा । अङ्काङ्कत्वेन कृतां तामिति वा । हृदयसंश्लिष्टात्सङ्गत्वात्तथोक्तिरिति वा । तत्रापि मुनिसंसदि तपस्विसभायां तदन्तिके रुद्रसमीपे । उच्चैर्जहासोवाच चेत्यन्वयः ॥ ५ ॥

चट्टी – अंके उत्संगे कृतामुपवेशितां देवीमालिंग्य स्थितमुवाच । तस्यान्तिके स्थितः सन् जहास च ॥ ५ ॥

चित्रकेतुरुवाच
एष लोकगुरुः साक्षाद् धर्मं(र्मं)वक्ता शरीरिणाम् ।
आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥

सत्यधर्मा – साक्षाल्लोकगुरुस्तारकोपदेष्टृत्वात् । न केवलं तावानेवानुबन्धः किन्तु धर्मवक्ता । सभायां मुख्यः प्रधानः सन्नपि भार्यया मिथुनीभूय । मिथुनं दम्पतीयुग इति विश्वः। तत्त्वेन भूत्वा ॥६॥

चट्टी – धर्मं वक्ता वदति । भार्यया मिथुनीभूय चास्ते ॥ ६ ॥

जटाधरस्तीव्रतपा ब्रह्मवादी सतां पतिः ।
अङ्के कृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥

सत्यधर्मा – कृत्य कृत्वा । सतां पतिर्नक्षत्राणामधिपतिश्चन्द्रमा अङ्के चिन्हस्थाने यस्यास्ते स इति वाऽन्वयः । प्राकृतो जडो गतह्रीर्निर्लज्जः ॥ ७ ॥

चट्टी – प्राकृतो मूढः ॥ ७, ८ ॥

प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ।
अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥ ८ ॥

सत्यधर्मा – प्राकृता अपि प्रकृतकृतिकर्तार इति स्वोहनं गूहयति ॥ प्राकृता अपीति ॥ ८ ॥

भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप ।
तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥

सत्यधर्मा – मनोनियन्तुर्नो मनोविकारः सम्भवति भवस्येति भाषते । भगवानपीति । तदनुवृताः सभ्याः सभाया इति यः । तत्र साधवः । तूष्णीं बभूवेत्येतत्तूष्णीं बभूवुरिति विपरिणतं सदन्वेतीति ज्ञेयम् ॥ ९ ॥

चट्टी – अगाधा गम्भीरा धीर्यस्य स तथा ॥ ९ ॥

इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम् ।
रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥ १० ॥

सत्यधर्मा – मन्निमित्तं मन्नाथनिन्दनं मत्तः कृतवानत इतःपरं तूष्णीका अहं चेत्प्रत्यवेयान्नेयादयं दयापात्रं भगवतो निरयं देवकार्यं यत्तद्देवकार्यमिति चार्या विचार्य प्रायश्चित्तरूपोऽस्मै शापो देय

इत्यधिककोपमुपाददे देवीति बादरायणिरादरवते महीपतये वदति । इतीति । तद्वीर्यविद्वान् जानन् जनो नेत्यतद्वीर्यविद्वांस्तस्मिंश्चित्रकेतौ । बह्वशोभनमालिङ्ग्याङ्कीकृतामित्यादिना ब्रुवाणे सति । धृष्टाय वियाताय निर्जितात्माभिमानिने निर्जितोऽपराभावितश्चासावात्मनः स्वस्याभिमानो गर्वश्च सोऽस्यास्तीति स तथा । न बहुव्रीहीत्यादेर्गतिः प्रागुपपादिताऽनुसन्धेया । रुषैतदर्थमुपात्तया देव्याह ॥ १० ॥

चट्टी – न तस्य वीर्यं प्रभावं विद्वान् तस्मिन् । धृष्टाय प्रागल्भाय निर्जितात्माभिमानिने जितेन्द्रियोऽहमित्यभिमानवते रुषा क्रोधेनाह ॥ १० ॥

पार्वत्युवाच

अयं किमधुना लोके शास्ता दण्डधरः प्रभुः ।
अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् (निषेधकृत्) ॥ ११ ॥

सत्यधर्मा – अयं चित्रकेतुः शास्ता शासिता वचनतः । दण्डधरस्ताडनादिना । अधुना दण्डधरो यमः किं तथा प्राप्ताधिकारः किमिति यावदिति वा । निर्लज्जानां दुष्टानामस्मद्विधानां विप्रकृद्विरोधकर्ता ॥ ११ ॥

चट्टी – किमयं शास्ता । यतोऽस्मद्विधानां निषेधकृन्निवारको जात इत्यर्थः ॥ ११ ॥

न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ।
न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम् ॥ १२ ॥

सत्यधर्मा – पद्मयोनिर्धर्ममेतद्वदन्न वेद किल । किलेत्युपहासः । यदि वेद विधिरेतर्हि मदधियं धिक्कुर्वन्नधिवक्रकार तेनैतज्ज्ञानहीनः स इत्युपहासप्रकारप्रदर्शनम् । एवमुत्तरत्रापि ज्ञेयम् । अतिवर्तिनं हरं ये विध्यादयो नो निषेधन्ति वै । अतस्तेषु वेदधर्मं वेदावेदितं धर्मं श्रेयस्तज्ज्ञानं नास्तीति वा । स्याद्धर्ममस्त्रियां पुण्यश्रेयसीत्यमरः । वेदेत्येतद्बहुवचनान्तं सन्न य इत्यनेनान्वेतीति वा ज्ञेयम् । कुमारः सनत्कुमारः । कपिलो हरेरितरो मुनिर्हरिर्वा । विष्णुर्ब्रह्मेत्याद्युदाहरिष्यमाणप्रमाणगतविष्णुपदस्वारस्यात् ॥ १२ ॥

चट्टी – ब्रह्मादयो धर्मं न विदुः किं यतोऽतिवर्तनं शास्त्रमतिक्रम्य वर्तमानशीलं हरं नो निषेधन्ति न वारयन्तीत्यर्थः ॥ १२ ॥

एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम् ।
यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः ॥ १३ ॥

तात्पर्यम् – एषां पक्षे तदवराणामनुध्येयपदाब्जयुग्मम्। 'विष्णुब्रह्मप्राणवीन्द्रस्तद्दारानप्यृते हरः। ध्येयो हरेः पार्षदाद्यैर्ध्यायन्हरिचतुर्मुखौ । प्राणमेषां तथा दारान्न स्वतन्त्रतया क्वचिदि'ति तन्त्रमालायाम्॥ १३ ॥

सत्यधर्मा – एषामनुध्येयपदाब्जयुग्ममिति श्लोके प्राक् प्रकृतचतुराननादिध्येयपदतोयजत्वं स्मरहरस्य प्रतीयते सा न सामञ्जस्यं वहतीति किञ्चिदध्याहृत्य तदसङ्गत्यपनुत्त्यै प्रमाणं चोदाहरति ॥ येषां पक्ष इति। येषां चतुराननादीनां सुज्ञानानामिति यावत्। पक्षे मते। तदवराणामित्यध्याहृतस्यानुध्येयपदाब्जयुग्ममित्यनेनान्वयः। तथा च स्वावरानुध्येयपदाब्ज द्वन्द्वमित्यर्थः सम्पन्नो ज्ञेयः। अनेनैषामित्यनेनान्वयोऽध्याहृतपक्षपदस्येति मन्तव्यम्। यद्वा येषां पक्षे चतुर्मुखादेः प्रमुखानामिदंपदेन ग्रहणपक्षे प्रसक्ते तदवराणामिति सङ्कोचनीय इदंपदार्थ इत्यर्थः। एतेन पक्ष इत्येव शेषस्तदवराणामिति सामान्यत उत्तमादिसर्वोपस्थापकेदंपदस्य पर्यवसितिसूचकमिति ज्ञेयम्। यद्वा येषामित्यनेनोत्तमग्रहणपक्षे तद्व्याहृततदवराणां ग्रहणपक्षे चेति पक्षेऽनुध्येय पदाब्जयुग्ममित्यत्र विग्रहः कर्तव्य इति शेषः। अनुध्येयानि पदाब्जयुग्मानि येन सोऽनुध्येयं पदाब्जयुग्मं यस्य स इति च। कांश्चिदुत्तमतया समतया च त इत्युक्तिः। पार्षदाद्यैरिति पाठे स्वावरैरित्यर्थः। पार्षद इति पाठोऽपि हर्षदः। रुद्रविशेषणम्। न स्वतन्त्रतयेति पक्ष एकस्मिन् हरिं विहायेति द्वितीये स्वस्यास्वतन्त्रतयेत्यन्वेति।

विद्यमानगुणवर्णनस्यैव स्तुतित्वादित्यवेहि ॥ ततश्च पद्ययोजना ॥ सन्तः सततं सम्मानयन्ति यं तमयं वामदेवमवमेन इत्युन्मत्तो दण्ड्य इति वदति ॥ एषामिति ॥ एषां पक्षे तदवराणामनुध्येयपदाब्जयुग्मम्। मूल एभिरिति विहायैषामिति षष्ठीनिर्देशेन सम्बन्धसामान्यं विषयीकुर्वतोपासकोपास्यत्वानुबन्धं तात्पर्यमूलं सूचितमिति ज्ञेयम्। अनेनैव जगद्गुरुमित्युदितार्थम्। मङ्गलमङ्गलं मङ्गलानां मध्ये मङ्गलम्। अहं तु सर्वमङ्गलाऽयं तु मङ्गलमङ्गल इति मन्त्रार्थो भवनयोग्यो भव इत्यभिप्रैति पार्वतीति ज्ञेयम्। यः क्षत्रबन्धुः क्षत्रियाभासः सूरीन् हरानिराकर्तृन्ज्ञानिनः। धीमान्सूरिः कृती कृष्टिरित्यमरः। परिभूयासमयज्ञत्वेन भावयित्वा तिरस्कृत्य वा। स्वयमित्यनेनान्या सम्मतिमाह ॥ स्वयं महादेवं महादेवं प्रशास्तीति यत्तत्तस्मादयं चित्रकेतुर्दण्ड्यो दण्डार्हः। स च वीन्द्रो दाराः प्रकृतविष्ण्वादिदारास्तान्। दारपदेन न सौपर्णीपरिग्रहः। शिवावच्छिवसेवायोग्यत्वात्॥ १३ ॥

चट्टी – एवं काकूक्त्या विनिंद्य तस्य दण्डयत्वं निश्चिनोति ॥ एषामिति। पक्ष इति शेषः। अनुध्येयेत्यतः पूर्वं रुद्रावराणामिति शेषः। यः क्षत्रबन्धुः क्षत्रियाधमः सूरीन् ब्रह्मादीन्परिभूयाज्ञान्कृत्वा एषां पूर्वोक्तानां ब्रह्मादीनां पक्षे रुद्रावराणामनुध्येयं पदाब्जयुगलं यस्य तम्। मङ्गलमङ्गलं परममङ्गलमूर्तिजगद्गुरुं रुद्रं प्रशास्ति। हि यस्मात्तस्मादयं दण्ड्य इत्यर्थः। अत्र रुद्रस्य

ब्रह्मध्येयत्वाभावेन रुद्राणामित्यध्याहारो न दोषायेति ज्ञातव्यम् ॥ तथा चोक्तम् ॥ विष्णुब्रह्मेत्यादि तन्त्रमालायाम् ॥ १३ ॥

नायमर्हति वैकुण्ठपादमूलोपसर्पणम् ।
सम्भावितमतिः(तात्माऽ)स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥

सत्यधर्मा – नालीकलोचनां लोचनां चित्ते चकारैवमित्यावेदयति ॥ नायमिति । वैकुण्ठपादमूलोपसर्पणं वैकुण्ठस्य नारायणस्य यत्पादमूलं तस्योपसर्पणं प्राप्तिं नार्हति । साधुभिः पर्युपासितमित्येतस्य पादमूलपदार्थे योग्यतयाऽन्वयः । साधुभिः पर्युपासितं यद्वैकुण्ठपादमूलं तदुपसर्पणमिति तदर्थः । यद्वोपसृप्यत इत्युपसर्पणं पादमूलं च तदुपसर्पणं च । साधुभिः पर्युपासितमिति यथावस्थितमन्वेति । अयं वैकुण्ठपादमूलं नार्हति चेदर्हति किल पार्वतीत्यत आह । साधुभिः पर्युपासितम् । अप परीवर्जन इत्युक्तेस्तद्वर्जितोपासितं तं निन्दितमिति यावत् । उत्तरदृष्ट्यासुरं जन्मेति शेषः । अर्हतीति । सम्भावितमतिरात्मसम्भावितात्ममतिः । सम्भावितं महादेवं साधुभिः पर्युपासितं हरम् । अतिस्तब्धः प्रशास्तीत्यन्वयो वा । सम्भावितमतिश्चासौ स्तब्धश्चेति पदमेकं वा ॥ १४ ॥

चट्टी – ननु भगवद्भक्तो न दण्डार्ह इति चेत्तत्राह ॥ नायमिति । अयं साधुभिः पर्युपासितं परिसेवितं वैकुण्ठस्य श्रीहरेः पादमूलोपसर्पणं नार्हति । यतः संभावितात्माऽहमधिक इति कृता मतिर्येन । अत एवास्तब्धोऽनम्रः ॥ १४ ॥

अतः पापीयसीं योनिमासुरीं याहि दुर्मते ।
यथेह भूयो महतां न कर्ताऽमुत्र किल्बिषम् ॥ १५ ॥

सत्यधर्मा – परोक्षत एवमुत्प्रेक्ष्यापरोक्षतः किञ्चकार त्र्यक्षपद्माक्षीत्यतोऽध्यक्षीकरोति ॥ अत इति । अत एतत्पातकफलत्वेन । अमुत्र मुदं त्रायत इति मुत्रः स न भवतीत्यमुत्रस्तत्सम्बोधनम् । अनन्तोपसत्त्या या न सन्तोषापादका महतां तां मह । एतं लोके भूयः पुनः किल्बिषं तदापादकमेतदादिकर्म यथा न कर्ता तथा । अथवाऽमुत्र परत्र किल्बिषं तत्फलं न भोक्तेति शेषः । इतरत्समम् ॥ १५ ॥

चट्टी – तदेवं स्वयं दण्ड्यत्वं तं प्रत्याह ॥ अत इति । तत्फलमाह ॥ यथेति । तेनेति शेषः । तेन दण्डेनेहास्मत्समीपे यथा तथा भूयोऽन्यत्र स्थलान्तरेऽतिमहतां किल्बिषमपराधं न कर्ता न करिष्यतीत्यर्थः ॥ १५,१६ ॥

श्रीशुक उवाच
एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ।
प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ॥ १६ ॥

सत्यधर्मा – नम्रेण मूर्ध्ना सतीमम्बिकाम् । प्रसादनं नैतच्छापापनुत्त्यै किन्तु रुडुन्नहनप्रतिबन्धार्थमिति मन्तव्यम् ॥ १६ ॥

चित्रकेतुरुवाच -
प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनाऽम्बिके ।
देवैर्मर्त्याय यत् प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥ १७ ॥

सत्यधर्मा – अम्बिके ते तव शापमञ्जलिना गृह्णामि ॥ ॐमिति वदामीति तात्पर्यम् । अम्बिक इत्यनेन माता यदि विषं दद्यादित्यादिनीतिं कटाक्षयतीत्यनुसन्धेयम् । कुत इत्यतः सामान्येन देवमान्यतामाह ॥ देवैरिति । मर्त्याय एतद्विषय इति यावत् । देवैर्यत्प्रोक्तं तत्तस्य मनुष्यसदृशाय पूर्वदृष्टं पूर्वं कारणं दिष्टं दैवं यस्य तत्कारणमदृष्टमित्यर्थः । अनेन न तदपायोपयो विनाऽनुभवमित्यभिप्रैति ॥ १७ ॥

चट्टी – न मम शापदात्र्यामपि भवत्यां कोपस्तस्य भगवतैव क्लृप्तत्वादित्याह ॥ देवैरिति । यद्वरशापादिकं प्रोक्तं भवति तत्तस्य मर्त्यस्य पूर्वदिष्टं हि प्राचीनकर्मोद्बोधकेन श्रीहरिणा क्लृप्तमेव । यत्तद्भगवता क्लृप्तं तदेव नियतं भवेत् । अतोऽन्येषां वरःशापो गुणदोषप्रकर्तृता इत्यर्थः ॥ १७ ॥

संसारचक्र एतस्मिन् जन्तुरज्ञानमोहितः ।
भ्राम्यन् सुखं च दुःखं च भुङ्क्ते सर्वत्र सर्वदा ॥ १८ ॥

सत्यधर्मा – भगवद्भक्ता यदृच्छयार्छत्सुखदुःखाभ्यां न प्रसीदन्ति न च सीदन्तीति पारोक्ष्येण षड्भिः श्लोकैर्वक्ति ॥ संसारचक्र इति ॥ भ्राम्यन् जन्तुरित्यन्वयः । सर्वत्र प्रतिजन्म ॥ १८ ॥

चट्टी – अयं च संसारचक्रे स्वभाव एव न चित्रमित्याह ॥ संसारचक्र इति ॥ १८ ॥

नैवात्मा न परश्चापि कर्ता स्यात् सुखदुःखयोः ।
कर्तारं मन्यतेऽत्रा(प्रा)ज्ञ आत्मानं परमेव च ॥ १९ ॥

सत्यधर्मा – तर्हीयज्ज्ञानी किमर्थमिममनर्थं सम्पादितवानासीदित्यतो न स्वतन्त्रो जन इत्याह । नैवेति । आत्मा देवदत्तः परो यज्ञदत्तादिः सुखदुःखयोस्तत्साधककर्मणोः कर्ता न स्यात् । तथाऽप्यत्राज्ञ एतद्विषयज्ञानहीन आत्मानं परं च कर्तारं मन्यत एवेति वा कर्तारमेवेति वैवान्वयः॥१९॥

चट्टी – ननु यदुक्तं पूर्वदिष्टमिति भगवतः सुखादिकर्तृत्वं तदयुक्तम् । जीवस्यैव तत्कर्तृत्वानुभवादित्याशङ्क्य सः भ्रान्तिरित्याह ।। नैवेति । अत्रैवंस्थितेऽपि अप्राज्ञ आत्मानमन्यं च कर्तारं मन्यत इत्यर्थः ।। १९ ।।

गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः ।
कः स्वर्गो नरकः को वा किं दुःखं सुखमेव च ।। २० ।।

सत्यधर्मा – गुणप्रवाहेऽनुपरतसत्त्वादिगुणकार्ये । अनेन कः शाप इत्यादिसम्भवत्वं सङ्गतमिति ज्ञेयम् । सर्वेषां तत्कर्मानुरोधेनेश्वरपरतन्त्रतया सम्भवत्येतानि च फलानीति न क्लेशादिकृत्त्वमिति भावः ।। २० ।।

चट्टी – शापादेर्भगवन्नियतत्वं न भवत्यां कोप इत्युक्तम् । इदानीमशेषानर्थमूलगुणप्रवाहपतितस्य तदपेक्षया शापादेरल्पत्वान्न तत्प्रयुक्तशोकादिरित्याह ।। गुणेति । किंशब्द आक्षेपे । गुणानां सत्त्वादीनां प्रवाहे संसारे शापादिकः कियान्न कियानप्यल्प इत्यर्थः ।। तथा चोक्तम् ।। आक्षिप्यते किमेतद्यत्राल्पफलता भवेत् । वस्तुषु यस्य चाल्पत्वं पुंसो वा नेति चोच्यत इति प्रकाशसंहितायाम् ।। २० ।।

एकः सृजति भूतानि भगवानात्ममायया ।
एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः ।। २१ ।।

सत्यधर्मा – स्वातन्त्र्यमीश्वरस्येतरस्यास्वातन्त्र्यमिति स्फुटमाटीकते । एक इति । एषां बन्धं च मोक्षं सुखं दुःखं चेत्येतानि च सृजति तानि च भूतानि सृजतीत्यन्वयः । अन्यथा बन्धं मोक्षमिति निरन्वयि भूयादिति मन्तव्यम् । निष्कलो भिन्नांशविकलः । एक इत्युक्त्या कालकर्मादिकास्वातन्त्र्यं ध्वनयति ।। २१ ।।

चट्टी – ननु शापादिकं भगवन्नियतमित्युक्तम् । तत्कुत इत्याशङ्क्य तस्यैव सर्वकारणत्वादित्याह ।। एक इति । भगवानेक एवात्ममायया स्वेच्छया निमित्तभूतया स्वाधीनप्रकृत्या चोपादानभूतया भूतानि प्राणिनः सृजति । एषां बंधादिकं च सृजति । निष्कलः स्वयं बन्धादिशून्य इत्यर्थः ।। २१ ।।

न चा(त)स्य कश्चिद् दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः ।
समस्य सर्वत्र निरञ्जनस्य कुतोऽनुरागः कुत एव रोषः ।। २२ ।।

तात्पर्यम् – **'सेवायोग्यातिरेकेण स्वानामपि न दास्यति । अपराधातिरेकेण नान्यस्यातः समो हरिरि'ति माहात्म्ये ।। २२ ।।**

सत्यधर्मा – न तस्य कश्चिद्दयित इत्याद्ये पद्ये भगवत इष्टद्विष्टसमत्वमुच्यत इत्यन्यथाप्रतीतिं श्लथयति ।। सेवेति । स्वानां सतामपि सेवातिरेकेण तद्योग्यतातिरेकेण तदाधिक्येनेति यावत् । न दास्यति फलमिति शेषः । तथाऽन्यस्य स्वभक्तस्यापराधोत्तरं योग्येति पूर्वोक्तं योग्यपदमध्याहृत्य योग्यान्वयि । तथा चापराधयोग्यतातिरेकेण न दास्यति यतोऽतः समो हरिरिति योजना भवति । सेवायां योग्यस्तदतिरेकेणेत्यपि केचित् । यावत्सेवा परे तत्त्वे तावत्सुखविशेषतेत्यादेः ।। अथ मूलार्थः । अस्य दयितो दयापात्रं प्रेमपात्रम् । एवमेव प्रतीपादिः इति । समस्य । न विषमः कुत इति संशयं शमयति । निर्गतोऽञ्जनेभ्यो दोषेभ्यो द्वेषादिभ्य इति स तथा । वैषम्यस्याञ्जनमूलकस्य तदभावादेवाभाव इति भावः ।। २२ ।।

चट्टी – नन्वेवं भूतविषमसृष्टौ तस्य किं कारणम् । प्रियादिवैषम्याभावादित्याशङ्क्य यद्यपि प्रियादयो न सन्ति । तथाऽपि तत्तद्योग्यताकर्मवशात्सर्वं घटत इत्याह ।। न तस्येति द्वाभ्याम् । प्रतीपोऽप्रियो न । ज्ञातिर्बन्धुश्चेत्यर्थः । तत्र हेतुः । सर्वत्र समस्य । तत्कुतः । निरंजनस्य निःसंगस्य । अत एव तन्निमित्ते सुखे रागो नास्ति । रागानुबन्धी तु रोषः कुतः स्यात् ।। २२ ।।

तथाऽपि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ।
बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतये च कल्पते ।। २३ ।।

सत्यधर्मा – तथाऽपि साम्येऽपि तच्छक्तिविसर्गस्तस्य हरेः शक्तिर्विचित्राः शक्तयोऽस्य हीत्याद्यावेदितास्तस्या विसर्गो लीलामूलक एतत्कर्ममूलक आविर्भावः । हिताहिताय हितेन सहितमहितं वृद्धिसहिताऽवृद्धिस्तस्मै । हि गतौ वृद्धौ चेति स्मरणात् । एतेन सुखाय दुःखायेत्यनेन सुखेन विशेषः सम्पादित इति ज्ञेयम् । येषां शरीरिणामित्यन्वयः । इति संसृतये अथ मोक्षाय कल्पत इत्यन्वयः । बन्धाय निबन्धाय तमसि तामसानामिति वा । निबन्धाय संसृतये मोक्षाय चेत्येतत्क्रमादधम मध्यमोत्तमाधिकारिविवक्षया फलत्रितयोक्तिरिति वा ।। २३ ।।

चट्टी – यद्यप्येवं तथाऽपि तस्य भगवतः शक्त्या सामर्थ्येन नियतो विसर्गः पुण्यपापादिलक्षणं कर्म । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति गीतावचनात् । किञ्च विविधः सात्विकादिलक्षणो विसर्गो निसर्गः । स्वभावयोग्यतेति यावत् । येषां शरीरिणां सुखाद्यर्थमेव कल्पते समर्थो भवतीत्यर्थः । भगवतो योग्यताद्यनुसारेणैव फलप्रदत्वात्समत्वं न विहन्यते । वैषम्यनैर्घृण्ये न सापेक्षत्त्वात्तथाहि दर्शयतीति सूत्रादिति भावः ।। तथा चोक्तम् ।। सेवायोग्यातिरेकेण स्वानामपि न दास्यति । अपराधातिरेकेण नान्यस्यातः समो हरिरिति । भगवतो योग्यतादिपारतन्त्र्यपरिहाराय तच्छक्तीत्युक्तम् । न च पुनर्वैषम्याद्यापातः । तादृशवैषम्यादेरिष्टत्वात् । उपपद्यते चाप्युपलभ्यते चेति सूत्रादिति भावः ।।

तथा चोक्तम् ॥ वैषम्यं निर्घृणत्वं च वेदाप्रामाण्यकारणम् । नाङ्गीकार्यमतोऽन्यत्तु न वैषम्यादिनामकमिति ॥ २३ ॥

अथ प्रसादये न त्वां शापमोक्षाय भामिनि ।
यन्मन्यसे असाधूक्तं मम तत् क्षम्यतां सति ॥ २४ ॥

सत्यधर्मा – अस्तु वस्तुतः सर्वं वस्तु भगवदधीनं मां प्रति किं वदसीत्यत एतावदर्थनीयमित्याह ॥ अथेति । शापदानानन्तरं । हे भामिनि । शापविमोक्षाय विशापं दत्वा मां मोचयेतीति यावत् । त्वां न प्रसादये । अपराधेन महत्त्वात्तन्महाफलम् । भगवत्क्लृप्तेऽन्यथा भवत्यपि न कर्तुं शक्तेति किमर्थमनयेति भावः । हे सति मम मया यदुक्तमसाधु मन्यसे तत्क्षम्यताम् ॥ २४ ॥

चट्टी – यत एवमथ तस्मात् । तस्मादथो अथेत्येतद्धेत्वर्थे समुदीरितमित्यभिधानात् । हे भामिनि । कोपने त्वां केवलं प्रसादयामि । न तु शापमोक्षाय । तर्हि किं प्रसादेनेत्यत आह ॥ यदिति । यद्यस्मान्ममोक्तमुक्तिमसाधु मन्यसे । तत्तस्मात्त्वया क्षम्यतामिति प्रसादयामीत्यन्वयः । तत्रभवत्या मनसि कोपादिवृत्तौ ज्ञानादिविलोपलक्षणो महाननर्थो भविष्यतीत्यतस्त्वां प्रसादयामीति भावः॥२४॥

बादरायणिरुवाच
इति प्रसाद्य गिरिशौ चित्रकेतुररिन्दम ।
जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥

सत्यधर्मा – भार्याकोपेन कोपस्तच्छान्त्या च शान्तिः पत्युरिति गिरिशावित्याद्युक्तिः । गिरिशा च गिरिशश्च एवमुत्तरत्रापि पुमेकशेषो ज्ञेयः । स्मयतोः स्मयमानयोः सतोः ॥ २५ ॥

चट्टी – गिरिशौ पार्वतीपरमेश्वरौ प्रसाद्य स्मयतोर्विस्मयं कुर्वतोः ॥ २५,२६ ॥

ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् ।
देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥ २६ ॥

सत्यधर्मा – ततश्चित्रकेतुगमनानन्तरं रुद्रो रुद्राणीं पार्वतीमिदं वक्ष्यमाणमब्रवीत् । इयत्यनर्थे वा कान्तामेकामेकान्ततो नीत्वाऽवादीत्किमित्यतो नेत्याह ॥ देवर्षीत्यादिना । तेऽपि नानवधानमानसा इति वदति ॥ शृण्वतां चेति । काव्यप्रकाशिकायां सप्तमोल्लासे दोषकथनप्रस्तावे तत्रापि विरुद्धमतिकृदुदाहरणेऽकाय मित्रमेकोऽसौ । कान्ता कान्तस्य सहसा विदधाति गलग्रहम् । न त्रस्तं यदि नाम भूतकरुणा सन्तानशान्तात्मनस्तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः । पापाद्धः सोऽम्बिकारमण

इत्याद्युक्तेः । तथैव परमानन्दचक्रवर्तिकृतव्याख्यासंहितायां तथैव चालङ्कारशिरोभूषणे इन्द्राणीरमणमुखैरित्याद्युदाहृत्यात्रेन्द्राणीरमणपदं विरुद्धमतिकृत् । इन्द्रस्य पत्नीन्द्राणीति यौगिकत्वादिन्द्राणीरमणशब्देन शच्याः पत्यन्तरोपस्थितिर्जायत इत्याद्युक्तेश्च तत्सजातीये रुद्रो रुद्राणीमित्यत्रेन्द्रवरुणेत्यादिनाऽऽनुकि ङीषि च रुद्रस्य स्त्री रुद्राणीति यौगिकत्वाद्रुद्राणीं रुद्रोऽब्रवीदित्युक्ते रुद्राणीं प्रति वचनकर्ता रुद्रोऽन्यः प्रतीयत इति चेन्न । तत्रोपपत्तिस्तु शब्दोऽयमखण्ड इति वा । वाचकनीत्या वा । वेदस्थम आणीस्थेत्याद्यैतरेयोपनिषद्भाष्येण शब्दस्य गतिवाचकत्वाच्चलमाणमुच्यत इत्युक्तेराणं चलं मनस्तदस्यास्ति नियम्यतयेति साणी । अरुद्रा किञ्चिच्छान्तिमतीति वा । क्रूरेति वा सा च सा च तामब्रवीदिति वा । मनो दुर्निग्रहं चलमित्यादेस्तच्चलम् । प्राणो वा आशाया भूयानिति छान्दोग्योपनिषद्भाष्ये प्राणनामा ण इत्येव ह्यानन्दः समुदीरितः । आणा सरस्वती प्रोक्तेत्युक्तेराणो हि वायुर्विधिस्तस्येयं स्नुषाऽऽणी तामिति वा । आणा सरस्वती अस्या अभिमानित्वेनास्तीत्याणी वाणी । अस्मिन्पक्षे इदं कामितदमिति क्रियाविशेषणं ज्ञेयम् । तामब्रवीदिति वा । मत्वर्थे इकारः । वस्तुतस्त्वस्य काव्यदोषत्वेन महाशास्त्रे दोषत्वाभावादिति वाऽनुसन्धेया ॥ २६ ॥

देवदेव उवाच

दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः ।
माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७ ॥

सत्यधर्मा – भृत्यभृत्यानां दासदासानामुपदेवकूटघटितत्वादेतदिदानीमिति भावः । भृत्यर्थमुदरपोषणार्थं भृत्या न भवंतीति वा तेषाम् । निस्पृहाणां दारागारादिषु माहात्म्यं दुर्जातिप्रापकशापप्रदानेऽपि न प्रसादय इत्येतद् दृष्टवत्यसि ॥ २७ ॥

चट्टी – हरेर्भृत्यानामपि ये भृत्यास्तेषां माहात्म्यमित्यर्थः ॥ २७ ॥

नारायणपराः सर्वे न कुतश्चन बिभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥

सत्यधर्मा – आश्चर्यविलोकनपरवशो हरः आर्यां प्रति सूचितं विविच्य वदति । नारायणपरा इति । कुतश्चन कस्मादपि भीतिहेतोर्न बिभ्यति भीतियुता न भवन्ति । कुत इत्यत आह ॥ स्वर्गेति । यदैतदाद्यन्यतमस्स्यादुपायातस्तदा तस्मिन्नस्मत्तुल्योऽयमर्थ इति द्रष्टुं शीलमेषामस्तीति ते तथा । तत्प्रयुक्तहर्षाद्ययुक्ता भगवन्मात्रनिभृतमतय इति भावः ॥ २८ ॥

चट्टी – किं तन्माहात्म्यमित्यत आह ।। कुतश्चन शापादेर्न बिभ्यतीति । स्वर्गादौ तुल्य एवार्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते तथोक्ताः । नन्वस्तु स्वर्गनरकयोः प्रयोजनसाम्यम् । नरकवत्स्वर्गस्याप्यनित्यत्वात् दुःखसंभिन्नत्वाच्च । अपवर्गे तु कथं साम्यम् । तस्य दुःखासंभिन्ननित्यसुखरूपत्वेन परमपुरुषार्थत्वादित्यत आह ।। नारायणपरा इति । नारायण एव परः पुरुषार्थो येषां ते तथोक्ता इत्यर्थः । तादृशानामपवर्गेऽप्यनादरात्सर्वत्रापि तुल्यार्थदर्शित्वोक्तिरुपपद्यत इति भावः । यद्वा । अपवर्गो जीवन्मुक्तिः । ततश्च न कश्चित्क्षुद्रोपद्रव इति ज्ञातव्यम् ।। २८ ।।

देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया ।
सुखं दुःखं मृतिर्जन्म शापानुग्रह एव च ।। २९ ।।

अविवेककृतः पुंसो ह्यर्थभेद इहात्मनि ।
गुणदोषविकल्पश्च भिदेव स्वप्नकल्पिता ।। ३० ।।

तात्पर्यम् – 'यत्तद्भगवता क्लृप्तं तदेव नियतं भवेत् । अतोऽन्येषां वरः शापो गुणदोषप्रकर्तृता । स्वतः प्राप्ता भेदकृतिर्वासनारूपिणो यथा । विद्यमानस्य मनसि पुनः स्वप्नेषु दर्शनम् । भगवद्वशता यस्मात्सर्वेषां ज्ञेयमेव तदि'ति प्रकाशसंहितायाम् ।। ३० ।।

सत्यधर्मा – देहिनां देहसंयोगादिति श्लोकं तथैवाविवेककृतः पुंस इति श्लोकं चाप्रतिपत्तिविप्रतिपत्तिभ्यां मानेन विवृणोति ।। यत्तदिति । यत् तद्भगवता स चैतदादिदासकश्चासौ भगवांश्च तेन । यत्क्लृप्तं तन्नियतमित्येवार्थविवरणम् । भगवतैवेत्यन्वयो वा । द्वन्द्वानीत्यादेरर्थो वरः शाप इत्यादिनोच्यते । अत एतस्मादन्येषां भगवदितरेषाम् । अन्याश्चान्ये चान्ये । पुमांस्त्रियेत्येकशेषः । प्रस्तुतत्वात्त्वदाद्या मदाद्याश्चेत्येतेषां वरोऽनुग्रहो शापः गुणदोषप्रकर्तृता गुणदोषाधायकता स्वतः स्वतन्त्रतया तच्छब्दवाच्याद्भगवत एव प्राप्तौ प्राप्ता च । वरः शाप इत्येतद्रूपगुणदोषयोः प्रकर्तृतेति वा । तत्र स्वातन्त्र्यं हरेरेवेति भावः । तत्र दृष्टान्तमाचष्टे ।। वासनारूपिणो यथेति । मनसि वासनारूपिणो वासनयैव रूपं यस्यास्ति तस्य । मनसि विद्यमानस्य पदार्थस्य पुनः स्वप्नेषु दर्शनम् । तस्याभेदकृतिं स राजगज एवायमिति विशेषकरणमन्यत्र स्वस्वातन्त्र्यानुसन्धानमित्यर्थः । इदं मिथ्याज्ञानमिति सर्वोपसंहारेणाह ।। भगवद्वशतेति । यस्मात्सर्वेषां भगवद्वशता तस्माद्भगवता यद्यत्क्लृप्तं तदेव भवतीत्यादिकमेवं ज्ञेयमिति योज्यम् ।। तत इयं श्लोकव्याकृतिः ।। ईश्वरलीलयेत्यनेन न प्रयोजनमिति सूचयति । देहसंयोगात्तत्सम्बन्धात्तदभिमानादिति यावत् । द्वन्द्वानीत्युक्तं कानि तानीत्यत आह ।। सुखमित्यादिना । भवन्तीति शेषः । इह प्रत्यक्षसिद्ध आत्मनि स्वस्मिन्निव परस्मिन्नपि गुणदोषविकल्पो वरशापादिवितरणोपयुक्तगुणादियुक्तोऽयं नायमिति विकल्पोऽर्थभेदः । हरिं विना स्वस्वेतरानेश्वर इति

तत्त्वज्ञानं चेत्येतदादिरविवेककृतो भगवत्स्वस्वरूपज्ञानाभावेन कृतः । तत्र दृष्टान्तः स्वप्नकल्पितभिदा जाग्रद्रजाद्यात्मको विशेषः कल्पितो यथा तथेत्यर्थः ॥ २९-३० ॥

चट्टी – ननु न कुतश्चन बिभ्यतीत्युक्तम् । तत्कुत इत्याशङ्क्य शापादीनामीश्वरेच्छाक्लृप्तत्वेनापरिहार्यत्वादिति भावेनाह ॥ देहिनामिति ॥ देहिनामपि देहसंयोगान्निमित्तात् सुखं दुःखमित्यादि-द्वन्द्वानीश्वरस्य लीलयेच्छया भवतीत्यर्थः । ननु यदुक्तमीश्वरस्य सुखादिकर्तृत्वं द्वन्द्वानीश्वरलीलयेति तद्युक्तम् । देवदत्तः सुखयति यज्ञदत्तो दुःखयतीति जीवस्यैव कर्तृत्वप्रतीतिरित्याशङ्क्य सा भ्रान्तिरित्याह ॥ अविवेकेति । अर्थभेदोऽर्थानामीश्वरकर्तृकाणां सुखादिपदार्थानां भेदो वैलक्षण्यम् । जीवकर्तृकत्वमिति यावत् । गुणदोषविकल्पश्च गुणदोषाणामीश्वरकर्तृकाणां सुखादिकारणी-भूतपुण्यपापानां भेदो जीवकर्तृकत्वं पुंसोऽविवेकेन कृतो भ्रान्तिकल्पितः । स कारयेत्पुण्यमथाऽपि पापम् । सुखं दुःखं भवो भाव इत्यादि श्रुतिस्मृतिभ्य इत्यर्थः । तत्र दृष्टान्तमाह ॥ भिदेवेति । आत्मनि मनसि विद्यमाने । इत्येवं वासनामयत्वेन प्रमिते प्रपञ्चे भिदा भेदः । वासनामयप्रपञ्चवैलक्षण्यं बाह्यत्वमिति यावत् । स्वप्ने स्वप्नावस्थायां यथा कल्पिता । तद्वत् । यदन्यथात्वं जाग्रत्वं सा भ्रान्तिस्तत्र तत्कृतेति कौर्मोक्तेरित्यर्थः ॥ तथा चोक्तम् ॥ यत्तद्भगवता क्लृप्तमित्यादिप्रकाशसंहितोक्तेरयमर्थः । आत्मनि जीवे प्रतीयमानोऽर्थभेदः सुखादिभागः पुण्यपापविभागश्च स्वप्नकल्पिता भिदेव करितुरगादिभेद इवाविवेककृतोऽविद्याकल्पित इति । जगन्मिथ्यात्वप्रतीतिवारणाय श्लोकं समाख्यया व्याचष्टे ॥ यत्तदिति । भगवता यत्क्लृप्तं संकल्पितं तदेव नियतं नियमेन भवेत् । भगवानेकः । सर्वकर्तेति यावत् । तत्तस्मात्कारणादन्येषां भगवदितरेषामतोऽस्माद्भगवत एव वरादयो भवन्ति । भगवानेव सर्वेषां वरदातेति यावत् । कर्तुर्भावः कर्तृता कर्मगुणदोषप्रकर्तृता पुण्यपापलक्षणकर्मेत्यर्थः । इदमुपलक्षणम् । सुखादिकं च ग्राह्यम् । यद्वा । तद्भगवता तेन स्वतन्त्रतया प्रसिद्धेन भगवता यत्क्लृप्तं तदेवातोऽन्येषां भगवद्व्यतिरिक्तानां भवेत् । यच्छब्दार्थमाह ॥ पर इति । ननु यदुक्तं भगवानेव सर्वकर्तेति तद्युक्तम् । देवदत्तः शपति यज्ञदत्तोऽनुगृण्हातीति वरादीनां जीवकर्तृत्वेन प्रतीतेरित्याशङ्क्य सा भ्रान्तिरित्याह ॥ स्वत इति । स्वतः प्राप्ता स्वतन्त्रभूतभगवत्संकल्पप्राप्ता । भेदकृतिर्विभागकरणम् । भ्रान्तिरिति शेषः । शापादिकं भगवत्कर्तृकं न भवति किन्तु जीवकर्तृकमिति ज्ञानं भ्रान्तिरित्यर्थः । तत्र दृष्टान्तमाह । स्वप्नेषु स्वप्नावस्थायां मनसि यथा यथार्थतया विद्यमानस्य । तत्र हेतुः । वासनारूपिणो वासनोपादानकस्य प्रपञ्चस्य दर्शनं बाह्यत्वेन ज्ञानं यथा भ्रान्तिस्तद्वदित्यर्थः । अस्त्वेवं भगवान्सर्वकर्ता । किं तत इत्यत आह ॥ भगवदिति । यस्मात्सर्वेषां शापादीनां भगवद्वशता तस्मात्तद्भगवत्स्वरूपं स्वतन्त्रत्वादिना ज्ञेयमित्यर्थः ॥ ३० ॥

वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ।
ज्ञानविज्ञानवीर्याणां न हि कश्चिद् व्यपाश्रयः ॥ ३१ ॥

सत्यधर्मा – अविवेकप्रतियोगिनं विवेकं स्वयमालम्ब्य वक्ति ॥ वासुदेव इति ॥ ज्ञानविज्ञानवीर्याणां ज्ञानविज्ञानयोर्वीर्यं येषां तेषां कश्चिदीश्वरेतरः । व्यपाश्रयो न हीतीश्वरस्य वशे लोक इत्यादिप्रसिद्धिं द्योतयति ॥ ३१ ॥

चट्टी – स्वर्गादिषु तुल्यार्थदर्शिन इत्युक्तं तद्विवृणोति ॥ वासुदेव इति । ज्ञानविज्ञानयोर्वीर्यं बलं येषां तेषां व्यपाश्रयो विशिष्टबुद्ध्याऽऽश्रयणीयोऽर्थो नास्तीत्यर्थः ॥ ३१ ॥

नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्राः मुनयः सुरेशाः ।
विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥

सत्यधर्मा – सम्पादनीयत्वेन वेदितं वेदनं यथायोग्यमेव न साकल्येन सुशकमेतदादिभिरित्यावेदयितुं स्वस्येदानीं धर्मप्रवक्त्राचार्यत्वात् पत्न्याः मुख्यश्रोतृत्वेन स्वद्वारकत्वात्तज्ज्ञानस्येति वा विरिञ्चत आत्मानमादावुदाजहार सदाशिव इति नाहमित्यस्य भावोऽवसेयः । कुमारनारदयोर्भगवदावेशविशेषपात्रतया ब्रह्मपुत्रत्वेऽपि पृथगुक्तिः । ईहितं चेष्टितम् । तत्स्वरूपं न विदाम । अंशांशका भिन्नांशकाः पृथगीशमानिनो वयमीशाः समर्था इत्यभिमानवन्तः । एतच्च विरिञ्चविषये छत्रिन्यायेन प्रवृत्तम् । मान एव निमित्तमिति भावः ॥ ३२ ॥

चट्टी – अस्य श्रीहरिदासत्वेन तत्प्रभावत्वान्नैतच्चित्रमिति वक्तुं श्रीहरेर्माहात्म्यमाह ॥ नाहमिति द्वाभ्याम् । पृथक् तारतम्येन । ईशमानिनो लोकेशा इत्यभिमानवन्तो वयं सर्वे सुरेशा ब्रह्मपुत्राः सनकादयस्तदन्ये मुनयश्च यस्यांशकांशाः प्रतिबिम्बानामपि प्रतिबिम्बाः । तत्तस्य भगवत ईहितमभिप्रायं लीलां वा । स्वरूपं च न विदामेत्यर्थः । सुरेशा इति साम्येनोक्तं विशिष्याह ॥ नाहमित्यादि ॥ ३२ ॥

न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ।
आत्मत्वात् सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥

सत्यधर्मा – आत्मत्वादन्तर्यामित्वात् । सर्वभूतप्रियस्तत्तरतमभावेन ॥ ३३ ॥

चट्टी – एवं देवाद्यवेद्यत्वलक्षणमाहात्म्यमुक्त्वा सर्वसमत्वादिलक्षणं च माहात्म्यमाह ॥ न हीति । अस्य भगवतः कश्चिदपि जीवोऽपि योग्यतातिक्रमेण प्रियादिर्नास्ति । सर्वसम इत्यर्थः ॥ तदुक्तम् ॥ सेवाया योग्यतातिरेकेणेत्यादि । तत्र हेतुमाह ॥ आत्मत्वादिति । स्वामित्वादित्यर्थः ।

न हि सर्वभूतस्वामिनस्तेषु स्वकीयः परकीय इत्यादिविभागबुद्धिः संभवतीति भावः । हेत्वन्तरमाह ॥ सर्वेति । यतो हरिः सर्वेषां भूतानां प्रियः प्रियतमश्चेत्यर्थः । न हि विष्णोः सर्वभूतानि प्रीयन्त इति भावः ॥ ३३ ॥

तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ।
सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः ॥ ३४ ॥

सत्यधर्मा – शान्तस्त्वदनुभवारूढ एव तच्छम इति भामिनीं कटाक्षयितुमियमुक्तिः । स्वयं स्वकोपानुत्पादने कारणमीरयति ॥ अहं चेति ॥ ३४ ॥

चट्टी – एवंभूतस्य श्रीहरेरनुचरत्वादयमपि तादृश एव न चित्रमित्याह ॥ तस्येति द्वाभ्याम् । प्रियोऽनुगः प्रीतिविषयोऽनुचरः । अहं चाच्युतः प्रियो यस्य । अच्युतप्रियश्च तस्मादस्मिन् क्रोधो मा भूदिति भावः ॥ ३४,३५,३६ ॥

तस्मान्न विस्मयः कार्यः पुरुषेषु महत्सु च ।
महापुरुषभक्तेषु शान्तेषु समदर्शिषु ॥ ३५ ॥

सत्यधर्मा – स्वल्पस्यापि प्राप्तज्ञानस्यानुत्पन्ना वयमभि महापुरुषभक्तेषु तत्त्वादेव महत्सु ॥३५॥

श्रीशुक उवाच
इति श्रुत्वा भगवतः शिवस्योमाऽभिभाषितम् ।
बभूव शान्तधी राजन् देवी विगतविस्मया ॥ ३६ ॥

सत्यधर्मा – शान्तधीः समाधानबुद्धिः ॥ ३६ ॥

इति भागवतो देव्याः प्रतिशप्तुमलन्तमः ।
मूर्ध्ना सञ्जगृहे शापमेतावत् साधुलक्षणम् ॥ ३७ ॥

तात्पर्यम् – प्रतिशप्तुमलंतमः । 'देवा एव तदन्येभ्यः शक्ता नास्त्यत्र संशयः । अशक्ता अपि शक्तानां शक्ताः शापादिषु स्फुटम् । तथाप्यशक्तैर्विहिताः शापाद्याः शक्तिमत्सु वै । अत्यल्पाश्चाल्पकालाश्च न सम्यक्प्रभवन्ति च । यत्नेनापोहितुं शक्या उत्तमैस्तु न संशयः । उत्तमेषु कृताः शापाः कर्तॄणां ज्ञानपुण्ययोः । निःशेषेण निहन्तारस्तदनुग्रहमन्तरा । सदारयोर्ब्रह्मविष्ण्वोर्वरशापादयोऽखिलाः । तदन्येन कृताः सर्वे निष्फला एव निश्चयात् । न चाप्यवान्तराः शापा भवन्त्येषां तु कुत्रचित् । वरा विष्णोः श्रियश्च स्युर्ब्रह्मणश्च यथाक्रमम् । उत्तमैरधमानां तु वराः शापा यथोदितम् । सम्पूर्णफलदा एव नात्र कार्या विचारणे'ति स्कान्दे ॥ ३७ ॥

सत्यधर्मा – इति भागवतो देव्याः प्रतिशप्तुमलंतम इति श्लोके लोकैश्वर्यासमसामर्थ्यं वा कथञ्चिदतिरेको वेति चित्रकेतोर्ज्ञायतेऽतः किञ्चिदनूद्य प्रमाणद्वारा तद्वारयति ॥ प्रतिशप्तुमिति । अलं क्षम इति पठितुमप्यलं क्षमम् । देवास्तदन्येभ्यः स्वभिन्नेभ्यस्तेऽन्येऽशक्ताः सामर्थ्यविकला अपि शक्तानां शापादिषु तद्दाने स्फुटं झडित्यपरामर्शेनेति यावत् । शक्ताः । तत्रापीयान्विशेष इति भाषते ॥ तथाऽपीति । अत्यल्पाः फलतः । अल्पकाला आशु विनाश्या इति सम्यक् प्रभवन्ति स्वकार्यकारिणो न भवन्ति । उत्तमैरल्पेन साधनेनापोहितुं विफलीकर्तुम् नैतावदेवापि तु दातॄणामनुत्तमानामनर्थोऽयं भविष्यतीत्याह । उत्तमेषु कृता इति । शापाद्या इति पूर्वं प्रक्रान्तत्वेऽपि वक्ष्यमाणकार्यमनुसृत्यैकोक्तिरिति ज्ञेया । तस्याप्यपवादं वदति ॥ तदिति । तेषां शप्तानामुत्तमानाम् । एतेन निहन्तार इत्यस्य तत्त्वेन भविष्यन्त इत्यर्थो ज्ञेयः । तदनुग्रहे तु न हानिस्तयोरिति भावः । उत्तमेष्वपीत्येतदपवदति ॥ सदारयोरिति । सदारयोः सभार्ययोर्विषये । सरस्वती ब्रह्मसमत्वाद्भारतीमारुतावपि व्याख्याताविति ज्ञेयम् । महाहान्यभावेऽपि किञ्चिदैहिकदैहिकादिश्रमादिसम्भवात्फलमित्यतो नेति लपति ॥ न चापीति । यद्वा मूलरूपे शापवैकल्यं सम्मतं न सम्मतं चावताररूपेषु तदित्यपवदति ॥ न चापीति । अवान्तरा अवतारे वितरिताः । उच्यते च भृगूणां भार्यादिशापफलम् । अत्रेवान्यत्रापि पुराण इत्यत आह ॥ कुत्रचित्त्विति । निश्चयादेषामित्यत्राप्यन्वेति । येषां हर्याद्यवताराणामेव निश्चायादधुनेत्थं नटयामीत्ये-वंरूपाः कुत्रचित्तथा भवन्ति । तुरेतद्विशेषसूचकः । वरादिप्राप्तावपि तरतमभावमावेदयति ॥ वरा इति । विष्णोः श्रियो ब्रह्मणश्च यथाक्रमम् । विष्णुमात्रतो रमायाः । उभयोरम्भोजभवस्य । वायुसरस्वती-भारत्यादीनां भवस्य चैतेभ्य इति क्रममनुसृत्य । यथा येन प्रकारेण । केचित्त्ववान्तरा वरा इत्यपि योजयन्ति । तद्वदल्पफला अल्पकालाश्च नेत्यर्थः ॥ अथ मूलार्थालपनम् । देव्याः प्रतिशप्तुम-लन्तमोऽतिशक्तः । क्षम इति पाठेऽलमत्यन्तं क्षम इत्यर्थः । अतिशयेनालं शक्तोऽलन्तम इति विग्रहः । इति चेदपि मूर्ध्ना शापं जगृहे । अनेन स्वपुण्यादिहानिज्ञानमस्य ध्वन्यते । सोऽयमेक एवैतादृश इति नेति सामान्यार्थान्तरन्यासमुखेन शंसति ॥ एतावदिति । साधूनां लक्षणं स्वभावं चिन्हं स्वभाव इति यावत् ॥ ३७ ॥

चट्टी – प्रतिशप्तुं प्रतिशापं दातुमलंतमः समर्थतमोऽपीत्यर्थः । अत्र प्रतिशप्तुमलंतम इत्युक्तिर्न चित्रकेतोः पार्वत्यपेक्षयाऽऽधिक्याभिप्रायः । किंत्वधमानामुत्तमान्प्रत्यपि शापदानसंभवाभिप्राय इति ज्ञातव्यम् ॥ तथा चोक्तम् ॥ देवा एव तदन्येभ्य इत्यादि । परैरपकृता अपि न प्रतिकुर्वन्ति । इत्येतावदेव साधूनां लक्षणम् ॥ ३७ ॥

जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ।
वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥

सत्यधर्मा – दानवीम् । यद्यपि न त्वष्टा दानवी तद्भार्या ततोऽप्यजातत्वाच्चास्य सा न सम्भाविनी। तथाऽपि देवीशापमाहात्म्यतस्तत्त्वमिति तत्त्वं ज्ञेयम् । ज्ञानविज्ञानसंयुतस्तदाचारात्ते ज्ञायेत इति भावः ॥ ३८ ॥

चट्टी – कुत्रास्य जन्माभूदित्यत आह ॥ जज्ञ इति ॥ ३८ ॥

एतत् ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥

सत्यधर्मा – वृत्रस्य तत्सम्बन्धिन्याः असुरजातेर्भगवन्मतेश्च कारणं यत्परिपृच्छसि पर्यपृच्छस्ते तत्सर्वमाख्यातमित्यन्वयः ॥ ३९ ॥

चट्टी – परमप्रमेयमुपसंहरति ॥ एतदिति । वृत्रस्यासुरजातेरसुरस्वभावेनोत्पत्तेर्भगवन्मतेश्च यत्कारणं परिपृच्छसि पृष्टवानसि । तदेतदाख्यतमित्यन्वयः । यद्वा असुरजातेश्चासुरजात्युत्पन्नस्यापि वृत्रस्य या भगवन्मतिस्तस्याः कारणमित्यर्थः ॥ ३९ ॥

इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ।
माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद् विमुच्यते ॥ ४० ॥

सत्यधर्मा – माहात्म्यं तदस्यास्तीति स तमितिहासमित्यन्वयः । तद्वर्णकत्वात्तद्व्यपदेशो वा । चित्रकेतोरन्येषां विष्णुभक्तानामितिहासं च ॥ ४० ॥

चट्टी – एतच्छ्रवणफलमाह ॥ इतिहासमित्यादिना ॥ चित्रकेतोर्विष्णुभक्तानामङ्गिरोनारदादीनां च माहात्म्यमेतदेवम् ॥ ४०,४१ ॥

इति श्री भागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ ६-१७ ॥

य एतत् प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् ।
इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे सप्तदशोऽध्यायः ।

सत्यधर्मा – एतदित्यव्ययम् । इतिहासमित्यन्वयः । पठेद्धरिं स्मृत्वेत्युक्त्या हरिस्मरणपूर्वभाव-कारणभाव इति स्मरणस्य परमगतिप्राप्तेश्च कार्यकारणभावोऽवगमित इति ज्ञेयम् ॥ ४१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठे सप्तदशोऽध्यायः ॥ ६-१७ ॥

अथ अष्टादशोऽध्यायः ।

पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीम् ।
अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥

सत्यधर्मा – ॥ हरिः ॐ ॥ दक्षस्त्र्यपत्यान्ववायनिरूपणेऽदित्यपत्यादीनि द्वादश । विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः । धाता विधाता वरुणो मित्रः शक्र उरुक्रम इति प्रोक्तानि । तत्राष्टमाध्यायान्तमारभ्यैतदतीताध्यायपर्यन्तं विश्वरूपवृत्रचित्रकेतूपाख्यानैराख्यातस्त्वाष्ट्रो वंश इदानीं सवितुर्वंशं शंसति ॥ पृश्निस्त्विति । व्याहृतित्रयीं प्रणवार्था व्याहृतयः । व्याहृतिस्त्रिगुणात्पुनरित्यादि तन्त्रसारसुधादौ व्याहृतिव्याख्या गायत्रीत्याद्युक्तेर्व्याहृतित्रयार्थीभूतगायत्र्यभिमानिनीं सरस्वतीम् । अग्निहोत्रादिपदेनाभिमानिनो ग्राह्याः । महामखान्पञ्चमहायज्ञाभिमानिनः प्रासूतेत्यन्वयः ॥ १ ॥

चट्टी – ॥ हरिः ॐ ॥ त्वष्टुर्वंशः स संप्रोक्तो वर्णितोऽथ यथाक्रमम् ।
तदन्यादित्यवंशोऽत्र दैत्यवंशश्च वर्ण्यते ॥ १ ॥

सिद्धिर्भगस्य भार्याऽङ्ग महिमानं विभुं प्रभुम् ।
आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥

सत्यधर्मा – भगस्य सिद्धिस्तन्नाम्नी । वरारोहामाशिषं तन्नाम्नीं कन्यामिति वाऽऽशिषं पुमपत्यं सुव्रतां तन्नाम्नीं कन्यां प्रासूत । सर्वत्राप्यभिमानिनो ग्राह्या अभिमन्यमानैः सहेति ग्राह्यम् ॥ २ ॥

चट्टी – दक्षकन्याऽन्वयकथनेऽदित्यां द्वादशपुत्राः प्रोक्ताः । विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः । धाता विधाता वरुणो मित्रः शक्रः उरुक्रम इति । तत्र षष्ठाध्यायान्तमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टृवंशमनुवर्ण्येदानीं सवितुर्वंशमाह ॥ पृश्निरिति । सावित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषङ्गः । पशुं पशुयागं महामखान् पञ्चयज्ञान् ॥ १,२ ॥

धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥

सत्यधर्मा – धातुः कुहूः सिनीवाल्याद्याश्चतस्रो भार्याः । सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः । कलाहीने सानुमतिः पूर्णे राका निशाकर इत्यमरः । सायम्प्रातः पदार्थः पूर्वमुक्तः साभिधानाभिधानमनुसन्धेयः । दर्शपूर्णमासं तन्नामानौ चेति चतुरः पुत्रान्क्रमात्कुहूः । सायं सिनीवाली

दर्शं राका प्रातरनुमतिः पूर्णमासमित्यनुक्रमादसूत । दर्शः सूर्येन्दुसङ्गमः । पूर्णमासं पूर्णो माश्चन्द्रो यस्मिन्स तं तदभिमानिनम् । माश्चन्द्रः समुदाहृत इति नामनिदानम् ॥ ३ ॥

चट्टी – धातुर्भार्या कुहूः सायं पुत्रमसूत । एवं शिनीवाली दर्शमित्यनुक्रमादित्यर्थः ॥ ३ ॥

अग्निं पुरीष्यमाधत्त क्रियायां समनन्तरः ।
चर्षणी वरुणस्यासीद् यस्यां जातो भृगुः पुनः ॥ ४ ॥

सत्यधर्मा – समनन्तरस्तत्साक्षाद्धाता । विधाता क्रियायां तन्नाम्न्यां भार्यायां पुरीष्यं दक्षिणाग्निं प्रोष्यागमनसमयेऽग्निहोत्रिभिर्दक्षिणाग्न्युपस्थापनविषये पठनीये मन्त्रे पुरीष्यपदस्य दक्षिणाशुशुक्षणिरर्थतया व्याख्यातः । मन्त्रस्त्वयमग्निः पुरीष्यो रयिमान्पुष्टिवर्धन इत्यादि । चर्षणी वरुणस्य । आसीत्पत्नीति शेषः । पुनरित्यनेन पूर्वं चतुराननतनयत्वं सूचयति । पुनरेव वरुणं पितरमुपसासरेति श्रुतिप्रसिद्धिं द्वितीयं जन्म तस्य वरुणत इति ज्ञेयम् ॥ ४ ॥

चट्टी – समनन्तरो विधाता क्रियायां भार्यायां पुरिष्याख्यानग्नीन्पञ्चविंशतिम् । पुरिष्यासोग्नय इति श्रुतेः पञ्च वा एतेऽग्नयो याचित इति श्रुतेश्च । चर्षणी वरुणस्य भार्याऽऽसीत् । पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः ॥ ४ ॥

वाल्मीकिश्च महायोगी वल्मीकादभवत् किल ।
अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी ॥ ५ ॥

सत्यधर्मा – वल्मीकाद्वरुणवीर्योत्सिक्ताद्वामलूरोः । वल्मीको वामलूरः स्यादिति विश्वः । वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकमित्यमरः । अपत्यत्वं चौपचारिकम् । इञन्तः । किलेत्यागमसम्मतिं सूचयति ॥ ५ ॥

चट्टी – वाल्मिकिश्च वल्मीकाद्वरुणस्यैव पुत्रो भवेत् । एतौ वरुणस्यैवासाधारणपुत्रौ तथोत्सर्गादयो मित्रस्यासाधारणाः । तयोरेव साधारणौ द्वौ पुत्रावाह ॥ अगस्त्य इति ब्रह्मजो वसिष्ठश्च । पुलस्त्यजोऽगस्त्यश्च द्वावृषी पुनर्मित्रावरुणयोरभवताम् ॥ ५ ॥

रेतः सिषिचतुः कुम्भे उर्वश्या सन्निधौ स्रुतम् (द्रुतम्) ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ ६ ॥

सत्यधर्मा – यौ ऊर्वस्या अप्सरस्त्रियः सन्निधौ तद्दर्शनादिति यावत् । स्रुतं रेतः शुक्रं कुम्भे सिषिचतुः । तयोर्मित्रावरुणयोर्मित्रश्च वरुणश्च तयोः । देवताद्वन्द्वे चेत्याङ् । सकाशादगस्त्यो

वसिष्ठश्चेति द्वौ ऋषी जाताविति तयोः कुम्भसम्भवत्वं ज्ञेयम् । कुम्भे रेतः सिषिचतुः समानमिति श्रुतेः । मित्रो देवत्यां स्वभार्यायाम् ॥ ६ ॥

चट्टी – यत उभावपि कुंभे रेतः सिषेचतुः । सत्रेहजातादिषितानमोभिःकुंभे रेतः सिषेचतुः समानमिति श्रुतेः । द्रुतं स्कन्नम् ॥ ६,७ ॥

पौलोम्यामिन्द्र आधत्त त्रीन् पुत्रानिति नः श्रुतम् ।
जयन्तं ऋषभं तात तृतीयं मीढुषं प्रभुः ॥ ७ ॥

सत्यधर्मा – पौलोम्यां पुलोम्नोऽसुरस्यापत्यं पौलोमी अत एव पौलोम्यपि । तस्यापत्यमित्यण् । गोत्रत्वेन जातित्वात् ङीषिति भानुदीक्षितः । इनण्यनपत्यतोऽनपत्य इत्यनुवर्तनात् । अन्निति प्रकृतिप्रकृतिभावः । तस्यामिन्द्रः शक्रस्त्रीन्पुत्रानाधत्तेति नोऽस्माभिः श्रुतं गुरुतः । तत्राद्यं जयन्तं द्वितीयमृषभं तृतीयं मीढुषमाहुरिति शेषः । अन्यथेतिशब्दसम्बन्धे च जयन्त इतीत्यादिप्रथमत्वस्य क्रमादमुं नारद इत्यबोधीत्यादिवदापत्तेः ॥ ७ ॥

उरुक्रमस्य देवस्य मायावामनरूपिणः ।
कीर्तौ पत्न्यां बृहच्छ्लोकास्तस्यासन् सौभगादयः ॥ ८ ॥

सत्यधर्मा – माया चेच्छा । सौभगादयः। तस्य वामनस्य सकाशात्कीर्तौ तन्नाम्न्यां बृहच्छ्लोका महायशस आसन् ॥ ८ ॥

चट्टी – बृहच्छ्लोको नाम पुत्रोऽभवत् । तस्य बृहच्छ्लोकस्य ॥ ८ ॥

तत्कर्मगुणवीर्याणि कश्यपस्य महात्मनः ।
पश्चाद् वक्ष्यामहेऽदित्यां यथैवावततार ह ॥ ९ ॥

सत्यधर्मा – तस्य वामनस्य । कश्यपस्येति शाटकान्वयेतिवदधुना तदवचनात् । महात्मनः कश्यपाददित्यां यथाऽवततार तत्पश्चादष्टमे वक्ष्यामहे । उरुक्रमस्येत्यादिप्रक्रमणं तु महामङ्गलदानवान्ववायकीर्तनानर्थनिबर्हणार्थं मङ्गलरूपं तत्रापि झडिति वक्तुं कुण्ठितोत्कण्ठकण्ठतः । आदौ यत्र भागवतः श्रीमानित्यादि श्रीमाञ्छुक उवाचेति भावो ज्ञेयः ॥ ९ ॥

चट्टी – तस्योरुक्रमस्य कर्मादीनि । असौ महात्मनः कश्यपस्य पत्न्यामदित्यां यथाऽवततार तं प्रकारं पश्चादष्टमस्कन्धे वंक्ष्यामह इत्यन्वयः ॥ ९,१० ॥

अथ कश्यपदायादान् दैतेयान् कीर्तयामि ते ।
यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च ॥ १० ॥

सत्यधर्मा – अथादित्यपत्यवचनानन्तरं दैतेयान्दित्या अपत्यानि । कृदिकारादिति ङीषन्तात् स्त्रीभ्य इति ढक् । दित्यदित्येति सह स्वान्तस्य ग्रहणम् । लिङ्गविशिष्टपरिभाषा त्वनित्या । अतो ण्यः स्यादिति शङ्काऽनवकाशः । यत्र दैतेयवंशे प्रल्हादो बलिश्च जातौ तान्कीर्तयामीत्यन्वयः ॥ १० ॥

दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥ ११ ॥

सत्यधर्मा – दितेर्दायादौ प्रथमोत्पन्नौ । तत्र हिरण्यकशिपुर्ज्येष्ठः किञ्चिद्धिरण्योत्पत्त्यनन्तरं जातस्ततो हिरण्याक्षस्य पूर्वमूर्वीस्पर्श इति कनिष्ठोऽयमिति यमलयोर्विवेको ज्ञेयः । विस्तृतं चैतत्तृतीयस्कन्धाष्टादशाध्यायगतयमावित्यादिविवृतौ यादवाचार्यवर्यैः ॥ ११ ॥

चट्टी – दितेर्हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वौ दायादौ पुत्रौ । तौ च कीर्तितौ तृतीयस्कन्धे ॥ ११,१२ ॥

हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ।
जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥ १२ ॥

सत्यधर्मा – जम्भस्य तनया दत्ता । तेन हिरण्यकशिपोरितिभार्या । तन्नामाह ॥ कयाधुरिति । नामेति लुप्ततृतीयान्तमव्ययम् ॥ १२ ॥

सह्लादं प्रागनुह्लादं प्रह्लादं ह्लादमेव च ।
तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥ १३ ॥

सत्यधर्मा – तन्नामाह ॥ सल्हादमिति । प्रागित्येतत्प्रल्हादपदेनान्वेतव्यम् । प्राक् प्रह्लादं प्रल्हादादनन्तरं सल्हादमनुल्हादं ह्लदमेतांश्चतुरः सुतानसूत । प्रल्हादावरजो यः सल्हादो नामतो हरेर्भक्त इति श्रीमदुक्तेरिव प्रल्हादः पूर्वजस्तेषां सल्हादस्तदनन्तर इत्यादिपर्वणि चोक्तेः । किञ्चासूच-यद्ग्रन्थकृदपि न सल्हादमिति वदता मयाऽयमेव क्रमो विवक्षितः किन्तु यथामानमेतत्क्रमो ज्ञेय इति सल्हादस्येत्याद्यनन्तरमनुल्हादस्येति वक्तव्येल्हादस्य धमनिरिति व्युत्क्रमेण गृह्णान इति मन्तव्यम् । तत्स्वसा तेषां चतुर्णां प्रल्हादादीनां भगिनी सिंहिका नाम्नी विप्रचितो विप्रचितेः सकाशाद्राहुमग्रहीद्गर्भे तज्जातो राहुरिति भावः ॥ १३ ॥

चट्टी – विप्रचितो दानवाद्भर्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥ १३ ॥

शिरोऽहरद् यस्य हरिश्चक्रेण पिबतोऽमृतम् ।
संह्लादस्य कृतिर्भार्याऽसूत पञ्चजनं ततः ॥ १४ ॥

सत्यधर्मा – पुमपत्यशंसनसरणावेतदीरणमुत्तरत्र विविच्यैतद्वचनबीजावापरूपमिति ज्ञेयम् । पिबतो निलीय । ततः सल्हादात् पञ्चजनं नाम्ना ॥ १४ ॥

चट्टी – ततः सल्हादात्पञ्चजनं पुत्रमसूत ॥ १४ ॥

ह्लादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम् ।
योऽगस्त्यायाप्यतिथये पेचे वातापिमिल्वलः ॥ १५ ॥

सत्यधर्मा – वातापिं, य इल्वलो वातापिं स्वाग्रजमतिथयेऽगस्त्याय पेचे भोजयामास तमिल्वलं चासूत । अत्रान्यत्र च कथिता कथाऽनुसन्धेया ॥ १५ ॥

चट्टी – यो मेषरूपं वातापिम् । याचेत्तमिल्वलं ययाचे । तं वातापिं चासूतेत्यन्वयः ॥ १५ ॥

अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा ।
विरोचनस्तु प्राह्लादिर्बलिस्तस्याभवत् किल ॥ १६ ॥

सत्यधर्मा – बाष्कलस्तथा महिषश्चैतावभूतामित्यन्वयः । प्राल्हादिः प्रल्हादस्यापत्यम् । अत इञितीञ् । तस्य विरोचनस्य ॥ १६ ॥

चट्टी – तस्य विरोचनस्य बलिः सुतोऽभवत् ॥ १६ ॥

बाणज्येष्ठं केतुशतमशनायां ततोऽभवत् ।
तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥ १७ ॥

सत्यधर्मा – बाणज्येष्ठमशनायाम् । विन्ध्यावलिस्तदोपेत्य पत्नीजालकमालिनीत्यष्टमोक्तेस्तस्या एवाशनेति नामान्तरमिति मन्तव्यम् । सुश्लोक्यः स्वत्यन्तं कीर्तनीयोऽनुभावो माहात्म्यं पश्चादष्टमेऽभिधास्यते मयेति शेषः ॥ १७ ॥

चट्टी – ततो बलेः सकाशात्पुत्रशतमभवत् । सुश्लोक्यः पुण्यकीर्त्याभिः । तस्य बलेरनुभावो महात्म्यं पश्चादष्टमस्कन्धेऽभिधास्यते वक्ष्यते ॥ १७ ॥

बाणस्त्वाराध्य गिरिशं लेभे तद्गणमुख्यताम् ।
यत्पार्श्वे भगवानास्ते अद्यापि पुरपालकः ॥ १८ ॥

सत्यधर्मा – तद्गणमुख्यतां पार्वतीपतिपार्षदत्वं भगवान्पुरहरः पुरपालकः सन् यस्य बाणस्य पार्श्वे पार्श्व इव पार्श्वे समीप इति यावत् । पार्श्वः कक्ष्याधरे चक्रोपान्त इति विश्वः । आस्ते करुणा-परवशः ॥ १८ ॥

चट्टी – तस्य गुणेषु मुख्यता प्राधान्यम् । यस्य बाणस्य पार्श्वे ॥ १८ ॥

मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ।
त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् ॥ १९ ॥

सत्यधर्मा – चत्वारिंशन्नव चेत्येकोनपञ्चाशत्सङ्ख्या मरुतो दितेः पुत्रा आसन् । नवाधिकाश्चेति वा । आधिका आ समन्तमाधियैरिन्द्रस्य त आधयस्त एवाधिका मनोव्यथारूपाः । सर्वे नप्रजा न विद्यते प्रजा येषां ते नप्रजाः । नसमासोऽतो न नञ्दुःसुभ्य इत्यस्य प्राप्तिः । इन्द्रेणोदरनिविष्टेन सात्मतां समानश्च त आत्मानः सात्मानस्तेषां भावो देवत्वम् । सोदरसाम्यं वा नीताः कुलिशेन शकलीकृताः । सात्मतां सप्राणतां नीता इति । यद्वक्ष्यति चकर्त सप्तधा गर्भमित्यादि । सात्मतां सहोरुरितिवत्सौमनस्यं वा ॥ १९ ॥

चट्टी – समानरूपतां देवत्वं प्रापिताः ॥ १९-२१ ॥

राजोवाच
कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो ।
इन्द्रेण प्रापिताः साम्यं किं न साधु कृतं हि तैः ॥ २० ॥

सत्यधर्मा – औत्पत्तिकं स्वभावसिद्धमिन्द्रेण सख्यं प्रापिताः । एतत्प्रापकं तैर्मरुद्भिः किं साधु सुकृतं कृतम् ॥ २० ॥

इमे श्रद्दधते विद्वन् ऋषयो हि मया सह ।
परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ २१ ॥

सत्यधर्मा – परिज्ञानाय तदर्थं मया सहेमे उपासीना ऋषयः श्रद्धधते विश्वासं कुर्वते । तं तत्प्रकारमाख्यातुमर्हसि । श्रुतमेतावदेवाहं न तद्विदिति तु नेत्याह ॥ विद्वन्निति । इमे मया सह । अेति

नञर्थेऽव्ययम् । अ श्रद्धधत इति च पदे न विश्वसन्ति । सहजासुरजातीनां स्वभावापायासम्भवत्वतः । अतः संशयनिरासकज्ञानार्थं भगवन्विद्वन्नो व्याख्यातुमर्हसीति वा । श्रद्दधत इति वाऽन्वयः ॥ २१ ॥

सूत उवाच

तद् विष्णुरातस्य स बादरायणिर्वचो निशम्यादृतमर्थवन्मुनिः ।
सभाजयंस्तन्निभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः ॥ २२ ॥

सत्यधर्मा – आदृतं सम्यक् सादरम् । अल्पकमिति पाठे मिताक्षरमित्यर्थः । अर्थवदत्राभिप्रायगर्भमुत्तरत्र पुरुषार्थवत्सत्कथात्वात् । तन्निभृतेन तेनैतादृशप्रश्नेन निभृतेन पूर्णेन चेतसा तृणीकृतमरणोऽयमिति पूर्णान्तःकरणेन । हे सत्रायण सत्रमयनमाश्रयो यस्य तत्सम्बुद्धिः । नारायणशब्दवण्णत्वम् । शौनक । सर्वदर्शनः सर्वज्ञः सर्व इति शर्व इति दर्शनं यस्येति स तथा । सर्वः शर्वः कालञ्जर इति नामनिधानम् ॥ २२ ॥

चट्टी – सत्रमयनमाश्रयो यस्य । हे सत्रायण शौनक । सर्वदर्शनः सर्वज्ञः । स च बादरायणिर्मुनिरादृतं सादरमर्थवद्बह्वर्थयुक्तं विष्णुरातस्य परीक्षितस्तद्वचो निशम्य तं विष्णुरातं सभाजयन्स्तुत्या प्रीणयन्निभृतेन हर्षपूर्णेन चेतसा जगादेत्यन्वयः ॥ २२ ॥

श्रीशुक उवाच

हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ।
मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥ २३ ॥

सत्यधर्मा – हतौ पुत्रौ हिरण्यकशिपुहिरण्याक्षौ यस्याः सा । शक्रपार्ष्णिग्राहेण तत्पाश्चात्यभागधरता । पार्ष्णिः पाश्चात्यभागे स्यात्सेनापृष्टे चेति विश्वः । सहायभूतेनेति यावत् । हरिणा तवोरसाऽसुरसङ्ग्रहणे किममराधिपेनापराद्धं किमर्थमेतद्धन्त्रपत्ययाचनमित्यत आह ॥ पार्ष्णिग्रहेणेति । मुख्यकारणमयमितिभावः ॥ २३ ॥

चट्टी – पार्ष्णिग्राहेण पृष्ठतः सहायेन ॥ २३ ॥

कदा नु भ्रातृहन्तारं इन्द्रियाराममुल्बणम् ।
अक्लिन्नहृदयं पापं घातयित्वा स्वपे सुखम् ॥ २४ ॥

सत्यधर्मा – भ्रातृहन्तारमिन्द्रियाराममुल्बणमक्लिन्नहृदयमनार्द्रहृदयं निष्करुणमिति यावत् । उत्पत्स्यमानसूनुतो घातयित्वा स्वस्या अनधिकारादिति रहस्यम् । सुखं यथा तथा स्वपे स्वपिमि । सती

सति प्रार्थनीयक्रियाबाहुल्ये यत्स्वप इति दैववशादुदाहृतवतीत्येतदवस्थायामेवेन्द्रस्य दुःखस्यापहारप्रयत्न इति ध्वनयामास व्यास इति मन्तव्यम् ।। २४ ।।

चट्टी – भ्रातॄणां दैत्यानां हन्तारम् । उल्बणं क्रूरम् । अक्लिन्नहृदयं कठिणचित्तम् ।। २४ ।।

कृमिविड्भस्मसंज्ञाऽन्ते यस्येशाभिहितस्य वा ।
भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ।। २५ ।।

सत्यधर्मा – यस्येशाभिहितस्येशोऽहमित्यादिशब्दवाच्यस्य देहस्यान्ते मरणोत्तरं यथायथं कृमिरिति विडिति भस्मेति चिरकालदग्धभावे श्वश्वापदाद्यदनेन विष्टा दाहे भसितमिति क्रमात्सम्भवे तत्कृते तादृशशरीरनिमित्तम् । भूतध्रुक् भूतेभ्यो द्रुह्यतीति स तथा । यतो भूतहतेर्निरय ऐहिकदुर्जन्मदुःखं परत्र नरकादिकं चेति वेद किन्न वेद । वेद चेदेतत्कार्यकारणभावं नैवं कुर्यादिति भावः । एवंविदो मुख्यस्वप्रयोजनज्ञानं नास्तीत्याह ।। स्वार्थमिति । तात्कालिकं स्वार्थमात्रं वेद । एवं भाविनं स्वार्थं स्वनाशं वेद किमिति योजना वा । स्वार्थं शाश्वतिकमीश्वरदेयं वेद किमिति वा । अस्वार्थं वेदेति वा । तेन किमित्यत आह । यतो निरय इतीति वाऽन्वयः ।। २५ ।।

चट्टी – ननु तेन स्वदेहरक्षणार्थमन्येषां घातनं करोत्येव किमत्र चित्रम् । तत्राह ।। कृमीति । ईशः प्रभुरित्यभिहितस्यापि यस्य देहस्यान्ते मरणानन्तरम् । द्वित्रिदिनावस्थितस्य कृमय इति श्वादिभिर्भक्षितस्य तु विशिष्टेति । दग्धस्य भस्मेति संज्ञा भविष्यति । तत्कृते तस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति । स किं स्वार्थं वेद न वेदैव । तत्र हेतुः । यतो भूतद्रुहान्निरयो भवति ।। २५ ।।

आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ।
मदशोषणमिन्द्रस्य भूयाद् येन सुतो हि मे ।। २६ ।।

सत्यधर्मा – तस्य तादृशस्यापि शरीरस्यापि विषये इदं ध्रुवमित्याशासानस्य ज्ञातवतो मघवत उद्धतचेतसो दुर्वृत्तचेतसो मदशोषणं दर्पप्रसरणं येन भूयात्तादृशः सुतो मे भूयात्स्यात् । इदं भवतु मा वेति नापि तु सर्वथा तेन मम सन्तोष इत्यपि चिन्तयतीत्याह । मम न विद्यते शोषणं यस्मात्तत्तथा । सुतवितरणं पुष्टिकरमिदमिति भावः । कृमिविडित्यादिना यादृशशरीरविषय आतुरा तुरासाहं निनिन्द स्वयं पुनस्तदर्थं पुत्रकामिनी कामयमाना पश्यसि परदोषानात्मदोषं नेति विषयतायामायातामात्मनो नानुसन्दध इयमेव हि भागवती मायेति ज्ञेयम् ।। २६ ।।

चट्टी – इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्य । अत एवमुन्नमुच्छृंखलं चेतो यस्य तस्येन्द्रियस्य यो मदस्तस्य शोषणम् । येन सुतेन स्यात् । स सुतो मे भूयात् ।। २६ ।।

इति भावेन सा भर्तुराचचारासकृत् प्रियम् ।
शुश्रूषयाऽनुरागेण प्रश्रयेण दमेन च ॥ २७ ॥

सत्यधर्मा – इति भावेन मनसाभिप्रायेणेति वा शुश्रूषया सेवया किं वदिष्यतीति श्रोतुमिच्छया वा । शुश्रूषा श्रोतुमिच्छायां परिचर्याकथनयोरिति विश्वः ॥ २७ ॥

चट्टी – इति भावेन सा दितिर्भर्तुः प्रियमसकृदाचचार ॥ २७,२८ ॥

भक्त्या परमया राजन् मनोज्ञैर्वल्गुभाषितैः ।
मनो जग्राह भावज्ञा सुस्मितापाङ्गवीक्षणैः ॥ २८ ॥

सत्यधर्मा – मनोज्ञैरपाङ्गवीक्षणैरित्यन्वयः । नेत्रप्रान्तनिरीक्षणैः । तान्यपि न सामान्यानीत्याह ॥ अपाङ्गवीक्षणैरिति । मन्मथोद्रेकसाधनैरिति वा साक्षात्तद्वीक्षणसदृक्षैरिति वा मनो जग्राह भावज्ञा । अनेन मनोभावप्रादुर्भावस्य कालविलम्बो नास्तीति द्योत्यते । चित्तज्ञाना सुस्मिता मदधीशो मदधीनो जात इति हाससहिता ॥ २८ ॥

एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ।
बाढमित्याह विवशो नैतच्चित्रं हि योषिति ॥ २९ ॥

सत्यधर्मा – विदग्धया चातुरीमत्या । एतत् विवशेशवशीकरणं योषिति न चित्रम् । हिनाऽङ्गारसदृशी नारीत्यादिप्रसिद्धिं द्योतयति ॥ २९ ॥

चट्टी – जडीभावे हेतुद्वयम् ॥ स्त्रियेति ॥ विदग्धयेति च । प्रौढ्येत्यर्थः । विवशः स्त्रीपरवशः सन् बाढं तव मनोरथं पूरयिष्यामीति यदाह । न तच्चित्रं योषिति ॥ २९ ॥

विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः ।
स्त्रियं चक्रे स्वदेहार्धां यया पुंसां गतिर्हृता ॥ ३० ॥

सत्यधर्मा – इयती शक्तिः कुतो योषितीत्यतस्तदुत्पत्तिरेवमित्याह ॥ विलोक्येति । आदौ जगदादौ प्रजापतिर्वेधा एकान्तभूतानि यस्य कस्यापि यस्मिन्कस्मिंश्चिदपि स्नेहादिर्नैवेति तानि भूतान्येकान्तभूतानि विलोक्य स्वदेहार्धं स्वस्य देहार्धं समांशो यस्याः सा तां स्त्रियं चक्रे । चक्र इत्यात्मनेपदप्रयोगेण तत्फलं पुत्रिकाकामनारूपं लोकदृष्ट्याऽऽत्मन्यपीति सूचयति । चक्रे । अत एव परमप्रयोजनमात्मगामीव मन्यमानस्य भगवतः शास्त्रप्रणयनमिति ज्ञापयितुमात्मनेपदप्रयोग इति सुधोदितेः । कृञ्धातोर्ञित्वाद्वेति मन्तव्यम् । यया योषिता पुंसां गतिर्हृता तत्प्राया भवति तामिति ग्रन्थकृदुक्तिरिति वा तातेत्युत्तरसम्बोधनाच्छुकोक्तिरिति वेति नासङ्गतिः ॥ ३० ॥

चट्टी – तत्र हेतुमाह ॥ विलोक्येति । प्रजापतिर्ब्रह्माऽऽदौ सृष्टिकाले । भूतानि प्राणिन एकान्तभूतानि निःसङ्गानि विलोक्य । मैथुनेन सृष्टिवृध्यर्थं स्वदेहार्धां स्त्रियं चक्रे ससर्जेत्यर्थः । एवं स्त्रिया शुश्रूषितः सन्नाहेत्यन्वयः ॥ ३०,३१ ॥

एवं शुश्रूषितस्तात भगवान् कश्यपः स्त्रिया ।
प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥ ३१ ॥

सत्यधर्मा – अभिनन्द्य ससत्कारमनुमोद्य ॥ ३१ ॥

कश्यप उवाच
वरं वरय वामोरु प्रीतस्तेऽहमनिन्दिते ।
स्त्रीणां भर्तरि सुप्रीते कः काम इह चागमः ॥ ३२ ॥

सत्यधर्मा – वामोरु सुन्दराङ्गे भर्तरि पत्यौ सुप्रीते बहुतुष्टे स्त्रीणां कः कामो विषयोऽगम इव । सर्वं सम्पद्यते काम इति भावः । भर्तरि सुप्रीते कामः काम्यत इति काम इच्छाविषयः । न कोऽपि तत्प्रतीत्युत्तरक्षण एव सर्वः कामः सम्पन्न इति न कामनाविषयोऽवशिष्यत इति भावः । कुत इत्यत आह ॥ चागम इवेति । भर्ता चाय्यत इति चः । यथोक्तमैतरेयभाष्ये । परब्रह्मणो विष्णोर्वरणादेव सम्यक् चायितं स्वरूपमितीति । तथैव छान्दोग्यभाष्ये । ब्रह्मवर्चसपदव्याख्यावसरे ब्रह्मसम्प्राप्त्या वरतांमुक्तिगामपीति । वेदेशतीर्थीये च चायितं सम्पादितमित्यादि । स चासावागमो वृक्षः पूजितः कल्पपादप इति यावत् । आ अगमः समीचीनद्रुमः । असाधारण्यन्यायेन सुरतरुरिति वेति ॥ ३२ ॥

चट्टी – इह चकारात्परत्र च । कः कामः पुरुषार्थः । आगम आप्राप्यः ॥ ३२ ॥

पतिरेव हि नारीणां दैवतं परमं स्मृतम् ।
मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ ३३ ॥

सत्यधर्मा – दैवतं देवतानां चेति विष्णोरेव परमदैवतत्वेन प्रसिद्धेः कथं नारीणां पतिर्दैवतं परममित्युक्तिस्तत्रापि स्मृतमिति वचनं चेत्यत आह ॥ मानस इति । सर्वभूतानां मानसो मनसि स्थितोऽत एव वासुदेवशब्दवाच्यः । न वासुदेवोऽयमन्यो यः कोऽपीत्याह ॥ श्रियः पतिरिति । श्रीपतिरिति समसनेन वचनसम्भवे यद्व्यासेन व्यासः शशंस तेन श्रियः पतिरेव पतिस्तत्सन्निधानत्वेन मदादयस्तदभिधेया इति कश्यपस्याशय इति ध्वनयामासेति ज्ञेयम् । पूर्वं स्मृतम् इत्युदिता स्मृतिरप्येवम्भावेति भावः सूचितोऽनेन ज्ञेयः ॥ ३३ ॥

चट्टी – ननु परदैवते सुप्रीते सर्वकामप्राप्तिरिति सुप्रसिद्धम् । तत्कथमुच्यते भर्तरि सुप्रीत इति । तत्राह ॥ पतिरेवेति । नारीणां परमं दैवतं पतिरेकपत्यावेव सन्निहितं फलदानाय । अतः पत्यौ सुप्रीते तन्निष्ठपरदैवतमपि प्रीयत इति भावः । ननु किं तत्परदैवतं यत्पत्यौ सन्निहितमित्यत आह ॥ मानस इति । सर्वभूतानां मानसो मनसि स्थितः श्रीवासुदेवो लक्ष्मीपतिरेव परमं दैवतमित्यन्वयः ॥ ३३ ॥

स एव देवतालिङ्गैर्नामरूपविकल्पितैः ।
इज्यते भगवान् पुंभिः स्त्रीभिश्च पतिरूपधृक् ॥ ३४ ॥

सत्यधर्मा – तदेव विविच्योचे ॥ स इति । पुम्भिर्देवतालिङ्गैर्वज्रधरत्वादिभिर- साधारणलिङ्गैर्नामभिरिन्द्रादिभिः । रूपैराकारैरिति विकल्पितैः परममुख्यत्ववृत्तित्वविषयैः । विकल्पितैरकल्पितैः सहजसिद्धैरिति वा । इज्यते । स्त्रीभिश्च पतिरूपधृक् भगवानिज्यत इति सम्बन्धः । देवतारूपैरिति वा ॥ ३४ ॥

चट्टी – ननु यदि भगवत्प्रीतिरेव पुरुषार्थसाधनं तर्हि स एव पृथक् सेव्यः । किं पतिसेवयेत्यत आह ॥ स एवेति । स भगवान्पत्यौ रूपविशेषधृगेव स्त्रीभिरिज्यते न पृथगित्यर्थः । अधिष्ठाननियमे दृष्टान्तमाह ॥ दैवतेति । अलौकिकार्थैर्नामभिरप्राकृतैः रूपैश्च विविधं कल्पितैरभिव्यक्तैर्देवतानिष्ठैर्लिङ्गैर्मूर्तिविशेषैरुपलक्षित एव यथा पुंभिरधिकारिविशेषैरिज्यते न पृथक् तद्वदित्यर्थः ॥ ३४ ॥

तस्मात् पतिव्रता नार्यः श्रेयःकामाः सुमध्यमाः ।
यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥ ३५ ॥

सत्यधर्मा – नैवंविधविधानात्त्वमेकैवैवम् । कामिन्योऽनेका इत्युक्त्योपसंहरति ॥ तस्मादिति । हे सुमध्यमे । याः पतिव्रताः श्रेयस्कामा नार्योऽनन्यभावेनैकनिष्ठया पतिं यजन्ते । यस्मात्स पतिः स्वसन्निहितहरिस्तस्मादात्मानमात्मशब्दवाच्यमीश्वरमेव यजन्ते । एवमनुसन्धाय प्रवर्तमाना न बन्धायालं संसार इत्याशयः ॥ ३५ ॥

चट्टी – उपसंहरति ॥ तस्मादिति । पतिं पतिस्थमीश्वरं सर्वाभीष्टप्रदानसमर्थम् । आत्मानं परमात्मानम् । अनन्यभावेन न विद्यते ईश्वरादन्यो विषयो यस्य स चासौ भावो भक्तिश्च तेन ॥ तथा चोक्तं भगवता ॥ यादृशी मयि भक्तिः स्यात्तादृश्यन्यत्र नैव चेत् । अनन्यभक्तेरुद्रेकात्सा ययैव तरेत्सृतिमिति । भावो भक्तिः समुदिष्ट इति च ॥ ३५ ॥

योऽहं त्वयाऽर्चितो भद्रे ईदृग्भावेन भक्तितः ।
किं ते सम्पादये काममसतीनां सुदुर्लभम् ॥ ३६ ॥

सत्यधर्मा – योऽहं भगवदनुग्रहपात्रमितीदृग्भावेन भक्तितोऽर्चितः । हे भद्रे तत्तस्मात्ते कामं मनोगतं विषयं सम्पादये सम्पादयामि पूरयामीति यावत् । तत्स्वरूपं निरूपयति । असतीनामपतिव्रतानां सुदुर्लभमत्यशक्यप्राप्तिमिति ॥ ३६ ॥

चट्टी – ईदृग्भावेन हरिरत्र स्थित इति भावनया । पतिमात्मानमीश्वरमित्युक्तत्वात् ॥ तथा चोक्तं सप्तमस्कन्धे ॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा । हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदत इति । तत्तात्पर्ये च । हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना । शिष्याणां च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु । भृत्यानां स्वामिनि तथा हरिभाव इतीरित इति । असतीनामपतिव्रतानाम् । सती साध्वी पतिव्रतेत्यभिधानात् ॥ ३६ ॥

दितिरुवाच

वरदोऽसि यदि ब्रह्मन् पुत्रमिन्द्रहणं वृणे ।
अमृत्युं मृतपुत्राऽहं येन मे घातितौ सुतौ ॥ ३७ ॥

सत्यधर्मा – यदि वरदोऽसि तर्हीन्द्रहणम् । इन्द्रं हन्तीतीन्द्रहा । अन्येभ्यो दृश्यत इति क्विप् । एकाजुत्तरपद इति णत्वम् । इन्द्रहन्तारमिन्द्रघ्नं पुत्रं वृणे । ब्रह्मन्नित्यनेन ''तस्माद्दीक्षितेन सत्यमेव वदितव्यमि''त्याद्यावेदितानृतदोषज्ञताऽस्तीति न तथा कुर्यादिति सूचयति । मृतपुत्रा कालमृत्योरमर्त्या तपः किन्तनुयादित्यत आह ॥ येन मे घातितौ सुताविति । तस्य वरो न मरणमस्य इति देय इत्यर्था यथाऽन्धमेकवारं याचयेति प्रसन्नदेवबोधितोऽहं पौत्रं सुवर्णपात्रे स्थितं चक्षुर्भ्यां पश्येयमित्ययाचतेत्याभाणकमनुकुर्वन्ती प्रार्थयते ॥ अमृत्युं मरणरहितमिति ॥ ३७ ॥

चट्टी – इन्द्रहणमिन्द्रहन्तारम् । अमृत्युं मृत्युशून्यम् । येनेन्द्रेण विष्णुना सहायेन । घातितौ ॥ ३७,३८ ॥

निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ।
अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥ ३८ ॥

सत्यधर्मा – सुमहानधर्मः समुपस्थितः । अहो इति पर्यतप्यतेत्यन्वयः ॥ ३८ ॥

अहो अद्येन्द्रियारामो योषिन्मय्येशमायया ।
गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥ ३९ ॥

सत्यधर्मा – इन्द्रियारामः सम्यगिन्द्रियसुखमात्रपरो योषिन्मय्या स्त्र्यात्मिकया । ईशमायया भगवदिच्छया नरके पतिष्य इत्यन्वतप्यतेत्यन्वयः । यद्यपि तावपि पुत्रावयमपि पुत्रस्तथाऽपि तावसन्तावयं सन्न तौ मूर्धाभिषिक्तावयं तथेति परस्परं तौ मृतौ मनःपूर्वकं वरार्पयित्रा पित्राऽस्य मारणं चेत्येतद्विशेषेण नरके पतिष्य इति वचनमुचितमिति भावः ।। ३९ ।।

चट्टी – कृपणः क्षुद्रः ।। ३९ ।।

कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः ।
धिङ् मां बताबुधं स्वार्थे यदहं त्वजितेन्द्रियः ।। ४० ।।

सत्यधर्मा – नास्या उपरि परिपात्यो दोषो, योषित्सामान्यस्वभावोऽसावित्याह ।। क इति । स्वभावमनुवर्तन्त्या अनुवर्तमानाया योषितोऽतिक्रमो मर्यादाविपर्यासकः । स्वभावस्तु प्रवर्तत इत्यादेः । अधीतवतोऽपि मम क्षत्रो दृशीत्यात्मानं धिक्करोति ।। धिङ् मामिति । यद्यस्मादहमजितेन्द्रिय इन्द्रियजयरहितः । इन्द्रमुद्दिश्येत्याद्युक्तेः । नेन्द्रियाणि मद्वशानि किन्त्वेतद्वशानीत्यप्याह ।। अहंत्वजितेन्द्रिय इति । अहमो भावोऽहन्त्वम् । अभिमान इति यावत् । तेनैव जितानीन्द्रियाणि यस्य सोऽहन्त्वेनान्यगतास्त्रीकटाक्षेण जितानीन्द्रियाणि यस्येति वा । तस्मात्स्वार्थेऽबुधमज्ञं मां धिक् । मयैव मम निन्द्यता बत खेद इति भावः ।। ४० ।।

चट्टी – स्वभावमनुवर्तमानाया योषितः कोऽत्रातिक्रमोऽपराधः । न कोऽपीत्यर्थः ।। ४० ।।

शरच्चन्द्रोपमं वक्त्रं वचश्च श्रवणामृतम् ।
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ।। ४१ ।।

सत्यधर्मा – प्रसङ्गादङ्गनास्वभावमावेदयति ।। शरच्चन्द्रेति । श्रवणेऽमृतं तत्प्रायम् । क्षुरधाराभं तत्सदृशं हृदयं भावं चेष्टितं च को वेद न कोऽपीत्यर्थः । ताश्चैवं कर्त्र्यो बव्ह्य एकोऽपि न ता अतीयायेतिबहुवचनैकवचनाभ्याम् सूचयामास ।। ४१ ।।

चट्टी – स्वभावमेवाह ।। शरदीति द्वाभ्याम् । हृदयं चित्तम् ।। ४१ ।।

न हि कश्चित् प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ।
पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति हि ।। ४२ ।।

सत्यधर्मा – आशिषेति टाबन्तः । आशिषासु स्वाशीष्षु आत्मा मनो यासां तासाम् । स्वाशिषा निमित्तेनार्थे विवक्षितविषये आत्मनां जीवानां मध्ये भ्रातरं पुत्रं प्रस्तुतं पतिं घ्नन्ति स्वयं घातयन्त्यन्यैः ।

हीति माघमाहात्म्यादिप्रसिद्धिं सूचयति। आत्मनामिति कर्मणि षष्ठी। आत्मनोऽपि स्वामपि घ्नन्ति। पतिपुत्रानञ्जसा किम्वित्यर्थो वा ॥ ४२ ॥

चट्टी – स्वाशिषात्मनां स्वार्थकामनयाऽऽत्मवत्प्रेष्टत्वे प्रतीयमानानामित्यर्थः ॥ ४२ ॥

प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत्।
वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पये ॥ ४३ ॥

सत्यधर्मा – मम वचो यथा भवेन्न मृषा वृषाऽपि न भवेद्धत इति क्षणं ध्यात्वोभयताऽस्या रज्जुसमासज्जनादात्मानं वर्जयितुं विदित्वोपायं कश्चिदुदश्वयति ॥ प्रतिश्रुतमित्यादिश्लोकत्रयेण। प्रतिश्रुतं प्रतिज्ञातम् ॥ ४३ ॥

चट्टी – इदं वक्ष्यमाणमुपायमुपकल्पये करिष्ये ॥ ४३ ॥

इति संचिन्त्य भगवान् मारीचः कुरुनन्दन।
उवाच किञ्चित् कुपित आत्मानं च विगर्हयन् ॥ ४४ ॥

सत्यधर्मा – किञ्चित् कुपितः स्वधिक्कारमात्रोपयोगिकोपयुक्तः मारीचो मरीचिपुत्रः। कार्यद्वयानुरूपालोचनं किञ्चित्कपटमूलकं मारीचस्येति तदारभ्य कपटितं प्रति लोकाभाणकं मारीच इति प्रवृत्तः इति ज्ञेयम्।

चट्टी – अयं भावः। वैष्णववृतं तावदुपदेक्ष्यामि। तेनैवास्या अशुद्धचित्तायाः इन्द्रक्रोधो निवर्तिष्यते। व्रतवैगुण्येनेन्द्रस्य बाधो न भविष्यतीति ॥ ४४ ॥

कश्यप उवाच
पुत्रस्ते भविता भद्रे इन्द्रहा देवबान्धवः।
संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि ॥ ४५ ॥

सत्यधर्मा – इन्द्रहन्तृत्वं देवबान्धवत्वं च विप्रतिषिद्धत्वमुदीरयन्नेतद्भाविगर्भस्थस्तु तादृशो नेत्यभिप्रैतीति मन्तव्यम्। तस्याः समाधानं चेन्द्रहाऽदेवबान्धव इति ज्ञानेनैवेति ज्ञेयम्। अन्यथाऽहमादित्यानां भयावहमिति वक्ष्यमाणभयावहं न स्यात्। अञ्जोऽव्यत्यासेन ॥ ४५ ॥

चट्टी – हे भद्रे। अंजो यथावत्। यदि धारयिष्यसि तर्हीन्द्रहा भविष्यति। वैगुण्ये सति देवबान्धवो भविष्यति। वैष्णवत्त्वाद्व्रतस्य वैगुण्ये सति सर्वथा नैष्फल्यादिति भावः ॥ ४५ ॥

दितिरुवाच

धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे ।
यानि चेह निषिद्धानि न व्रतं घ्नन्ति यान्युत ॥ ४६ ॥

सत्यधर्मा – निषिद्धानि, तत्फलमालपति ॥ व्रतं घ्नन्तीति ॥ ४६ ॥

चट्टी – कार्याण्यावश्यकानि व्रतं यानि न घ्नन्ति । नावश्यकानि न च निषिद्धानि किं त्वभ्यनुज्ञातानि सर्वाण्यपि ब्रूहि ॥ ४६ ॥

कश्यप उवाच

न हिंस्यात् सर्वभूतानि न शपेन्नानृतं वदेत् ।
न छिन्द्यान्नखरोमाणि न स्पृशेद् यदमङ्गलम् ॥ ४७ ॥

सत्यधर्मा – न शपेदाक्रोशं न कुर्यात् । अमङ्गलं तैलादि ॥ ४७ ॥

चट्टी – तत्रैकत्रिंशन्निषेधेनाह ॥ न हिंस्यादिति पञ्चभिः । न शपेन्नाक्रोशेत् । अमङ्गलं कपालास्थ्यादि न स्पृशेत् । अपिशब्दो निषेधसमुच्चये ॥ ४७ ॥

नाप्सु स्नायान्न कुप्येत न सम्भाषेत दुर्जनैः ।
न वसीताधौतवासः स्रजं वा विधृतां क्वचित् ॥ ४८ ॥

सत्यधर्मा – अप्स्वनुद्धृतासु । अधौतवासोऽनिर्णिक्तं वस्त्रं न वसीत न परिदध्यात् । स्रजं मालां विधृतां परैः स्वयं पूर्वं च ॥ ४८ ॥

चट्टी – नाप्सु प्रविश्य स्नायात् । अधौतमनिर्णिक्तं वासो वस्त्रं न वसीत नाच्छादयेत् । पूर्वविधृतां स्रजं पुनर्न धारयेत् ॥ ४८ ॥

नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम् ।
भुञ्जीतोदक्यया दृष्टं पिबेन्नाञ्जलिना त्वपः ॥ ४९ ॥

सत्यधर्मा – उच्छिष्टं पतिव्यतिरिक्तोच्छिष्टं । चण्डिकान्नं सप्तमातृनिवेदितान्नं । सामिषं समांसं । वृषलाहृतं शूद्रेण दृष्टं स्पृष्टं वा । उदक्यया चतुर्थेऽहन्युदकमर्हतीत्युदक्या रजस्वला । ऋतुमत्युदक्याऽपीत्यमरः । अपो जलमञ्जलिना न पिबेत् ॥ ४९ ॥

चट्टी – भोजने पञ्चनिषेधानाह । नोच्छिष्टमिति । चण्डिकान्नं भद्रकाल्यादिशक्तिभ्यो निवेदितं, पिपीलिकादूषितम् । आमिषं मांसम् । जम्बीरादिकं वा । पले जम्बीरमामिषमित्यादेः । तेन सहितमन्नं सामिषम् । वृषलाः शूद्राः कर्मभ्रष्टा वा । वृषो धर्मः समुद्दिष्टस्तस्य यः कुरुते लयम् । वृषलं तं विजानीयात्सर्वकर्मसु गर्हितमिति भारतवचनात् । तैराहृतमन्नम् । उदक्यया रजस्वलया । अंजलिना तु न पिबेदपः ॥ ४९ ॥

नोच्छिष्टाऽस्पृष्टसलिला सन्ध्ययोर्मुक्तमूर्धजा ।
अनर्चिताऽसंयतवाक् नासंवीता बहिश्चरेत् ॥ ५० ॥

सत्यधर्मा – सन्ध्योरुभयोः । नोच्छिष्टास्पृष्टसलिला भोजनानन्तरमन्तरेण करधावनं न बहिरागच्छेदिति तदर्थः । मुक्तमूर्धजा प्रसारितकेशा । अनर्चिताऽनलङ्कृता । संयतवाक् पृष्टमात्रोत्तरदा । असंवीता वीतप्रावर्णा बहिः किञ्चिद्देहबहिः ॥ ५० ॥

चट्टी – गृहाद्बहिर्निर्गमे सप्तनिषेधानाह ॥ नोच्छिष्टेति । अनर्चिता मण्डनहीना । असंवीता अपावृता ॥ ५० ॥

नाधौतपादाऽप्रयता नार्द्रपान्नाप्युदक्शिराः ।
शयीत नापराङ् नान्यैर्न नग्ना न च सन्ध्ययोः ॥ ५१ ॥

सत्यधर्मा – अधौतपादा अप्रक्षालितचरणा । नाप्रयता नार्द्रपादा उदक्शिरा न शयीत । अपराक् पश्चिमदिशि न शिरः कृत्वा शयीत । तत्राप्येकाकिनीत्याह ॥ नान्यैरपत्यादिभिः सहेति । न नग्ना दिगम्बरा । न सन्ध्ययोः शयीत । एकत्रिंशत्सङ्ख्यानि प्रत्याख्येयानि । तत्र भोजने पञ्च बहिर्निर्गमने सप्त शयनेऽष्टौ, सर्वकालिकानि भूताहिंसादीन्येकादशेति ॥ ५१ ॥

चट्टी – शयनेऽष्टनिषेधानाह ॥ नाधौतपादा इति । नापराक् पश्चिमशिराः । अन्यैः सह ॥ ५१ ॥

धौतवासा शुचिर्नित्यं सर्वमङ्गलसंयुता ।
पूजयेत् प्रातराशात् प्राग् गोविप्रान् श्रियमच्युतम् ॥ ५२ ॥

सत्यधर्मा – कार्याण्याह द्वाभ्याम् । धौतवासा सर्वसङ्गलसंयुता हरिद्राकुङ्कुमादिसर्वमङ्गलसंयुता वादित्रादिसंयुता वा । प्रातराशात्प्रातर्भोजनात्प्राक् पूर्वं गोविप्रान् श्रियमच्युतं च पूजयेत् ॥ ५२ ॥

चट्टी – कार्याण्याह ॥ धौतवासा इति द्वाभ्याम् । प्रातराशात्प्रथमभोजनात् ॥ ५२ ॥

स्त्रियो वरवतीश्चार्चेत् स्रग्गन्धबलिमण्डनैः ।
पतिं चार्च्योपतिष्ठेत ध्यायेत् कोष्ठगतं च तम् ॥ ५३ ॥

सत्यधर्मा – वरवतीः सुस्वामिनीः । स्रक्गन्धावलयो मण्डनानि कुङ्कुमजलादीनि तैः पतिं चोपतिष्ठेत । उपान्मन्त्रकरण इत्यात्मनेपदम् । कोष्ठगतं तदन्तर्गतं हृदयनिहितं हरिं ध्यायेत् । अन्तर्बहिरिति स्थानमात्रस्थिते वा ॥ ५३ ॥

चट्टी – वरवती जीवभर्तृका पतिं चार्च्य संपूज्योपतिष्ठेत स्तुतिं कुर्यात् । तं पतिं कोष्ठगतं पुत्ररूपेण कुक्षेरन्तर्गतं ध्यायेत् ॥ तथा च श्रुतिः ॥ आत्मैव पुत्रनामासीति ॥ यद्वा । तं पतिस्थं परमात्मानं कोष्ठगतं हृदयगतं ध्यायेदित्यर्थः ॥ ५३ ॥

संवत्सरं पुंसवनं व्रतमेतदविच्युतम् ।
धारयिष्यसि चेत् तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥

सत्यधर्मा – पुंसवनं पुंप्रवहहेतुभूतम् । अविच्युतमच्छिद्रं संवत्सरं कालं धारयिष्यसि चेत् तुभ्यं तव शक्रहा सुतो भविता ॥ ५४ ॥

चट्टी – पुंसवनं पुत्रोत्पत्तिकरम् । अविच्युतं वैगुण्यरहितम् । तुभ्यं तव ॥ ५४-५७ ॥

श्रीशुक उवाच
बाढमित्यभ्युपेत्याथ दिती राजन् महामनाः ।
कश्यपात् गर्भमाधत्त व्रतं चाञ्जो दधार सा ॥ ५५ ॥

सत्यधर्मा – अभ्युपेत्याङ्गीकृत्य । अञ्जः पत्युक्तप्रकारेण ॥ ५५ ॥

मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ।
शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत् कविः ॥ ५६ ॥

सत्यधर्मा – मातृष्वसुरदितिभगिन्या दितेः शुश्रूषणे कविः कुशल इन्द्रः । आश्रमस्था नेति नाश्रमस्था सा न भवतीत्यनाश्रमस्था काऽपि न गमनस्थेति द्वयं लभ्यत इति ज्ञेयम् । तां दितिं परिचरत्सिषेव इत्यन्वयः । एवमनन्वये शुश्रूषणेन पर्यचरदित्यनयोरसूपपादोऽर्थ इति मनोदयम् । शुश्रूष्यतेऽनेनेति शुश्रूषणं वक्ष्यमाणं सेवासाधनं तेनेति वा ॥ ५६ ॥

नित्यं वनात् सुमनसः फलमूलसमित्कुशान् ।
पत्राङ्कुरमृदापश्च काले काल उपाहरत् ॥ ५७ ॥

सत्यधर्मा – परिचरणप्रकारं निरूपयति ॥ नित्यमिति । सुमनसः पुष्पाणि । स्त्रियः सुमनसः पुष्पमित्यमरः । मृदा आपश्चेति छेदः । समीचीनोदकानां मृदतीति वा छेदः । टाबन्तो वा तृतीयान्तो वा ॥ ५७ ॥

एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ।
प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५८ ॥

सत्यधर्मा - मृगः व्याधोमृगाकृतिः सन्यथा हन्ति तथा जिह्मः कुटिलो गूहितस्वेहित इति यावत् ॥५८॥

चट्टी – हरिरिन्द्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः । जिह्मः कुटिलः । साधुवेषो मृगहा लुब्धको यथा । मृगवंचनाय मृगवेषो भवति । तद्वदित्यर्थः ॥ ५८ ॥

नाध्यगच्छद् व्रतच्छिद्रं तत्परोऽथ महीपते ।
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥ ५९ ॥

सत्यधर्मा – शिवं मङ्गलम् । शिवं भद्र इति विश्वः ॥ ५९ ॥

चट्टी – तत्परो व्रतदोषान्वेषणनिष्ठोऽपि नाध्यगच्छत् ॥ ५९ ॥

एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्शिता ।
अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥

सत्यधर्मा – अस्पृष्टवारी अस्पृष्टोदका । विधिमोहिता दैवेन वैचित्यं प्रापिता सुष्वाप ॥ ६० ॥

चट्टी – अस्पृष्टवारीचसा अधौतांघ्रिश्च ॥ ६० ॥

लब्ध्वा तदन्तरं शक्रो निद्रोपहतचेतसः ।
दितेः प्रविष्ट उदरं योगेशो योगमायया ॥ ६१ ॥

सत्यधर्मा – तदन्तरं तमवकाशम् । योगमायया योगसामर्थ्येन ॥ ६१ ॥

चट्टी – तदन्तरं तमवकाशम् । निद्रया हृतं चेतो यस्याः । योगमायया योगसामर्थ्येन ॥ ६१ ॥

चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ॥ ६२ ॥

सत्यधर्मा – कनकप्रभं सुवर्णवर्णं । कनकेत्यत्र विपर्यये पितृत्वं न गच्छतीतिवद्गर्भनाशो नास्तीति द्योतनार्थं कनकेत्युक्तिः । गर्भं सप्तधा चिच्छेद । एकैकं रुदन्तं पुनः सप्तधा चकर्तैकैकं प्रातिस्विक्येन । तान्मा त्वं रोदी रोदनं कुर्वित्यब्रवीदिति शेषः ॥ ६२ ॥

चट्टी – मा रोदीरित्युपलालयन्निव तान्पुनरेकैकं सप्तधा चकर्त चिच्छेद ॥ ६२ ॥

ते तमूचुः पीड्यमानाः सर्वे प्राञ्जलयो नृप ।
नो जिघांससि किं त्विन्द्र भ्रातरो मरुतस्तव ॥ ६३ ॥

सत्यधर्मा – पीड्यमानाः खण्डनेन तमाखण्डलं नोऽस्माञ्जिघांससि हन्तुमिच्छसि । मरुतस्तन्नामानस्तव भ्रातरः । किन्त्विति सरलः पाठः किलेत्यर्थे । न वयं तव विद्विष इति वा ॥ ६३ ॥

चट्टी – जिघांससि हन्तुमिच्छसि ॥ ६३ ॥

मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ।
अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥

सत्यधर्मा – मह्यं मन्मा भैष्ठ न भीता भवत । कौशिक इन्द्रो मरुतः सप्तगणान्सप्तसप्तकम् । अनन्यभावानेकमनस्कानात्मनः स्वस्य पार्षदान् दासकूटघटितान् । यूयं मम भ्रातरः सौभ्रात्रयुता इत्याहेति सम्बन्धः । सप्तगणा वेमे मरुत इति श्रुतेः ॥ ६४ ॥

चट्टी – मा भैष्ठ मा भयं कुरुध्वम् । कौशिक इन्द्रः । गणाः । सप्तगणा वै मरुत इति श्रुतेः ॥ ६४,६५ ॥

न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ।
बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥

सत्यधर्मा – कुलिशशकलितो गर्भः कथं न ममारोदरान्तर इति परीक्षिच्छङ्कां शुको नेदं चित्रं चित्रचरित्रे भगवति । हे परीक्षित् साक्षी न परीक्षणीयोऽन्यस्त्वामेव त्वं विलोकयेत्याह ॥ न ममारेति । श्रीनिवासानुकम्पया यत्पर्यन्तं तयाऽऽराधितमाधवदयया द्रौणेरश्वत्थाम्नोऽस्त्रेण ब्रह्मास्त्रेण बहुधा क्षुण्ण इति दृष्टान्ते दार्ष्टान्तिके च कुलिशेनेति विशेषः । द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् । जुगोप कुक्षिं गत आत्तचक्र इत्यादेः ॥ ६५ ॥

सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति सात्मताम् ।
संवत्सरं किञ्चिदूनं दित्या यद्धरिरर्चितः ॥ ६६ ॥

सत्यधर्मा – कैमुत्येन मरुताममृत्युमाह ॥ सकृदिति । यद्यस्मात्सकृदेकवारमिष्ट्वा सम्पूज्य सात्मतां सारूप्यम् । अनया तु किञ्चिदूनं संवत्सरमर्चितोऽच्युतः सात्मतां प्राणतां दद्यादिति मुक्तिकालोऽपि बहुलः फलं च लघ्विति न चित्रमिति भावः ॥ ६६ ॥

चट्टी – न ममार दितेर्गर्भमित्येतन्न चित्रमित्याह ॥ सकृदिति । पुरुषो जीवः पुरुषं परमपुरुषं सकृदिष्ट्वाऽपि सात्मतां सारूप्यमपि याति । दित्या च किञ्चिदूनसंवत्सरं हरिरर्चितो यतस्तस्मान्न ममारेति न चित्रमित्यर्थः । यद्वा । मरुतां दितिपुत्रत्वेऽपि देवत्वप्राप्तौ हेतुरनेनोच्यते ॥ ६६ ॥

सजूरिन्द्रेण पञ्चाशद् देवास्ते मरुतोऽभवन् ।
व्यपोह्य मातृदोषं ते हरिणा सोमपा वृताः ॥ ६७ ॥

सत्यधर्मा – एकोनपञ्चाशते शक्र एक इतीन्द्रेण सजूःसह । सजूर्गणेन तृम्पतु । अश्विभ्यामुषसा सजूरित्यादौ तथा व्याख्यातत्वात् । वक्ष्यति च सजूरर्थं ग्रन्थकृदपीन्द्रेण सहितान्देवीति । ननु जुषी प्रीतिसेवनयोरित्यस्मात्सम्पदादिक्विपि समाना प्रीतिः सेवा यस्येति समानशब्दस्य छन्दसीति सभावे सहशब्दस्य वोपसर्जनस्येति वा सभावे ससजुषोरिति रुत्वे र्वोरुपधाया दीर्घ इति दीर्घत्वे च निष्पन्नः सजूःशब्दः कथं सहेत्येतन्मात्रार्थ इति चेन्न । ऊर्यादिच्विडाचश्चेति व्याख्या काशिकायां सजूःशब्दः सहार्थे वर्तत इत्युक्तेरत्र रूढया सहशब्दार्थकमिदमव्ययमिति ज्ञेयम् । पञ्चाशत्सङ्ख्या देवा मरुतो मरुन्नामानः । मेति रोदीरित्यानुपूर्व्यादिह्रस्वे रुतशब्दाकारलोपे मरुदिति ऋग्भाष्यटीकोक्तेः । पृषोदरीयं सर्वमिदमुदरस्थविषयेऽनुमोदनार्हमिति ज्ञेयम् । मातृदोषं व्यपोह्येति मरुन्मरुत्वपक्षान्वयि । हरिणेन्द्रेण मातृदोषं स्वमारणकारणकुमारार्थं माधवाराधनजं स्वमातरं तिरस्कृत्येन्द्रेण सजूः पञ्चाशन्मरुतो देवा अभवन्निति तदर्थः । भुजबाहू प्रवेष्टो दोरित्यमरः । मातृदोषं हरिहयहननसङ्कल्परूपं वा । सोमपास्तत्पानार्हा वृताः ॥ ६७ ॥

चट्टी – इन्द्रेण सजूः सह । हरिणेन्द्रेण दितिसेवितेन विष्णुना वा । मातृदोषं दैत्यत्वं व्यपोह्य परिहृत्य । सोमपाः सोमपानार्हाः कृताः ॥ ६७ ॥

दितिरुत्थाय ददृशे कुमाराननलप्रभान् ।
इन्द्रेण सहितान् देवी पर्यतुष्यदनिन्दिता ॥ ६८ ॥

सत्यधर्मा – अनिन्दिता वस्तुतः साधुत्वात् ॥ ६८ ॥

चट्टी – पर्यतुष्यद्गर्भच्छेदेऽपि पुत्राणां मरणाभावादिति भावः ॥ ६८-७० ॥

अथेन्द्रमाह ताताहमादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतत् सुदुष्करम् ॥ ६९ ॥

सत्यधर्मा – आदित्यानां दित्यदित्येति ण्यः । देवानां सुदुष्करं खलन्तः ॥ ६९ ॥

एकः संकल्पितः पुत्रः सप्तसप्ताभवन् कथम् ।
यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥ ७० ॥

सत्यधर्मा – सप्तसप्त एकोनपञ्चाशत्सङ्ख्याः ॥ ७० ॥

इन्द्र उवाच
अम्ब तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम् ।
लब्धान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७१ ॥

सत्यधर्मा – हे अम्ब । अम्बार्थनद्योरिति ह्रस्वः । व्यवसितं मद्वचननिश्चयमर्थबुद्धिरैहिकक्षेममात्रदृष्टिः । धर्मविन्न पारत्रिकदृष्टिर्न गर्भकर्तनस्य पापप्रापकत्वात् । लब्धान्तर उच्छिष्टास्पृष्टसलिलायास्तव शयनाल्लब्धावकाशः ॥ ७१ ॥

चट्टी – दित्या निष्कपटे उक्ते सति इन्द्रोऽपि निष्कपटमेवाह ॥ अंबेति । लब्धमन्तरमवकाशो येन स तथा । अर्थ एव बुद्धिर्यस्य स तथा ॥ ७१,७२ ॥

कृतो मे सप्तधा गर्भ आसन् सप्त कुमारकाः ।
तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥

सत्यधर्मा – मे मया । तेऽपि न मम्रिरे ॥ ७२ ॥

ततस्तत् परमाश्चर्यं वीक्ष्याध्यवसितं मया ।
महापुरुषपूजायाः सिद्धिः कार्यानुषङ्गिणी ॥ ७३ ॥

सत्यधर्मा – श्रीनिवासानुकम्पयेति प्रागुक्तं विविच्य वक्ति ॥ तत इति । तत्परमाश्चर्यं वीक्ष्य कर्तनं प्राणवर्तनं चेति परमाश्चर्यं वीक्ष्य ततोऽनन्तरं महापुरुषपूजायाः सिद्धिः कार्यं स्वरसतो भगवत्कॢप्तम् । अनुषङ्ग इति स तथेति मया व्यवसितं निश्चितम् ॥ ७३ ॥

चट्टी – अध्यवसायप्रकारमेवाह ।। महापुरुषेति । महापुरुषस्य भगवतः पूजा यस्य सकाशाद्भवित्री सिद्धिः फलं भवत् प्रसाद इति यावत् । कार्यानुषङ्गिणीं कार्याविनाभूतनियमेनाभिलषितकार्यसाधकः । अतो दितिकृतसेवाजन्यभगवत्प्रसादेन मरुतो न मम्रिर इति भावः ।। ७३ ।।

आराधनं भगवत ईहमाना निराशिषः ।
ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ।। ७४ ।।

सत्यधर्मा – कामुकविषये हरिपरिचर्यैतादृशी किमु वक्तव्यमकामुकविषय इति वक्तुं तांस्तौति ।। आराधनमिति । ईहमानास्तदेव माधवाराधनमिच्छन्तो निराशिषोऽफलाभिलाषाः । मोक्षाकाङ्क्षाऽपि नास्तीत्याह । परमुत्तममपि ये नेच्छन्ति ते स्वार्थकुशला अप्रतिहतेहितातिशयितफलसम्पादनपटव इति । स्मृता इत्यनेन समयसम्मतिमिदिदं प्रमेयमित्यत आह । गुणस्पर्शं वैषयिकं सुखमिति यावत् । यन्नरकेऽपि वर्तते तत्को बुधो वृणीत न कोऽपि । यदि वृणीत स कः कुत्सित इत्यावृत्यान्वयः ।। ७४, ७५ ।।

चट्टी – यद्यपि सेवया प्रसन्नो भगवान् सर्वकामान्प्रयच्छति । तथाऽपि निष्कामनया सेव्य इति दितिं कटाक्षीकृत्याह ।। आराधनमिति द्वाभ्याम् । ये निराशिषो निष्कामा आराधनमीहमानाः कुर्वाणः सन्तः । परमपि परमपुरुषार्थं मोक्षमपि नेच्छन्ति । ते स्वार्थसाधनकुशला इत्यर्थः ।। ७४ ।।

आराध्यात्मप्रदं देवमात्मानं जगदीश्वरम् ।
को वृणीत गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ।। ७५ ।।

चट्टी – आत्मानमपि प्रददातीति तथा । आराध्य गुणस्पर्शं विषयभोगं बुधः को वृणीत । यस्मात्तन्नरकेऽपि स्यात् ।। ७५ ।।

तदिदं मम दौर्जन्यं बालिशस्य महीयसि ।
क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भोऽमृतोत्थितः ।। ७६ ।।

सत्यधर्मा – अकुटिलमानसेन निटिललेखोऽन्यथा भवतीत्यकुटिलमानसां मातरं सहस्राक्षः क्षमापयतीत्याह ।। तदिति । महीयस्यतिश्रेष्ठे मातर्बालिशस्य । मूर्खस्येत्यवदन्वदंश्च बालिशस्येति बालोऽस्त्यस्मिन्निति बाली तव गर्भस्तस्य शं सुखं बालिन्यास्तव शं क्षेमप्रसवसुखं च येन तस्येति नैरपराध्यं सूचयामासेति ज्ञेयम् । दौर्जन्यं दुर्जनतां क्षन्तुमर्हसि । अमृतः संस्तव गर्भ उत्थितो बहिरुत्पत्तिमृत उत्थितः । दिष्ट्या दैवतो दिष्ट्यागर्भस्तत्सदृशोऽहमपि मृतोत्थितः । त्वत्सङ्कल्पेन मृतप्रायो हरिकरुणयोत्थित इति बालिशपदसूचितार्थ इति विवक्षयाऽयमर्थ इति बोध्यम् ।। ७६ ।।

चट्टी – महीयसि हे महत्तमे । मृतः सन्नुत्थितः । दिष्ट्या मङ्गलम् ।। ७६-७८ ।।

इति श्रीभागवतटिप्पण्यामष्टादशोऽध्यायः ।। ६-१८ ।।

श्रीशुक उवाच

इन्द्रस्तयाऽभ्यनुज्ञातः शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ।। ७७ ।।

सत्यधर्मा – शुद्धभावेन मनश्शुद्ध्या तुष्ट्या यथार्थभाषणेन मरुद्भिः सह नत्वा ताम् । तयाऽनुज्ञातस्तैः सह त्रिदिवं जगाम ।। ७७ ।।

एवं ते सर्वमाख्यातं यन्मां त्वं प्ररिपृच्छसि ।
मङ्गलं मरुतां जन्म किं भूयः श्रोतुमिच्छसि ।। ७८ ।।

इति श्रीमद्भागवते षष्ठस्कन्धे अष्टादशोऽध्यायः ।।

सत्यधर्मा – मङ्गलं मङ्गलप्रदम् ।। ७८ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां षष्ठेऽष्टादशोऽध्यायः ।। ६-१८ ।।

अथ एकोनविंशोऽध्यायः ।।

राजोवाच

व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितम् ।
तस्य वेदितुमिच्छामो येन विष्णुः प्रसीदति ।। १ ।।

सत्यधर्मा – ।। हरिः ॐ ।। निष्कामनया चीर्णं पुंसवनं पूर्णफलं भवतीति विनेयविनेतृनृपमुनिप्रश्नोत्तरपूर्वकं निरूप्यते । तत्र परीक्षित्पृच्छतीति प्रथमत आह ।। राजेति । यत्पुंसवनं भवतोदीरितं येन विष्णुः प्रसीदति तस्य व्रतमनुष्ठानप्रकारं वेदितुं ज्ञातुमिच्छामो मुनयोऽहं च ।। १ ।।

चट्टी – ।। हरिः ॐ ।। यद्वैष्णवं व्रतं चक्रे दितिः पुंसवनाभिधम् ।
अत्र लोकोपकाराय तत्स्वरूपं निरूप्यते ।।

पुंसवनाख्यं व्रतं तस्य प्रकारमिति शेषः ।। १ ।।

श्रीशुक उवाच

शुक्ले मार्गशिरे पक्षे योषिद् भर्तुरनुज्ञया ।
आरभेत व्रतमिदं सार्वकामिकमादितः ॥ २ ॥

सत्यधर्मा – मार्गशिरे मासि तत्रापि शुक्लपक्षे तत्राप्यादितः प्रथमतिथिमारभ्यारभेत प्रारम्भं कुर्यात् । निष्कामुककृतं नैकफलपर्यवसायीत्याह ॥ सार्वकामिकमिति ॥ २ ॥

चट्टी – मार्गशिरे मासि शुक्लपक्षे आदितः प्रतिपदि । सार्वकामिकं मोक्षादिसर्वपुरुषार्थसाधनम् ॥२॥

निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे ॥ ३ ॥

सत्यधर्मा – आदित इति अत्राप्यन्वेतव्यम् । मरुतां जन्मादितः प्रथममारभ्य निशम्याचार्यमुखतः श्रुत्वा ब्राह्मणाननुमन्त्र्य । तदाज्ञां गृहीत्वा स्नात्वा शुक्लदती । अग्रान्तशुद्ध शुभ्र । निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च । स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृती वरे । वराहेभ्यश्चेति सूत्रव्याख्यावसरे इहानुक्तसमुच्चयार्थश्चकारस्तेन मूषिकादन्निति सिद्ध्यतीत्याहुरिति तत्त्वसुबोधिन्युक्तेश्चकारग्राह्ये मुद्रणाभावाच्छुक्लदतीति सम्भवतीति ज्ञेयम् । शुक्लाः दन्ता यस्याः सा । उगितश्चेति ङीप् । शुक्लेऽम्बरे वसीत अलङ्कृता सती ॥ ३ ॥

चट्टी – अनुमन्त्र्य पृष्ट्वा । शुक्ला दन्ता यस्याः सा शुक्लदती धौतदन्ता । अलङ्कृता सती पूजयेदित्यन्वयः ॥ ३ ॥

पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ।
नमस्ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते ।
महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥

सत्यधर्मा – प्रातराशात्प्राग्भोजनात्प्रागेव श्रिया सह भगवन्तं पूजयेत् । षोडशभिरुपचारैर्मन्त्रत उदाहरिष्यमाणादुपतिष्ठेत । तं मन्त्रमाह ॥ नम इति निरपेक्षाय निर्गतोऽपेक्षाया इति स तथा तस्मै । हे पूर्णकाम । ते नमोऽस्तु । महाविभूतिर्महालक्ष्मीस्तस्याः पत्ये सकलसिद्धये तद्रूपाय । नम इति देहलीदीपनीत्योभयान्वयि । अन्यथैकेन चारितार्थ्यात्स्थानद्वये न पृथक् प्रयोज्यं स्यात् ॥ ४ ॥

चट्टी – नमस्कारमन्त्रानाह ॥ नम इति त्रिभिः । केवलं ते तुभ्यं नमोऽस्तु । तत्र हेतुः ॥ निरपेक्षायेति । निरपेक्षत्वे हेतवः । हे पूर्णकाम महाविभूतिपतये लक्ष्मीपतये । सङ्कल्पमात्रेणैव सिद्धयोऽणिमाद्या यस्मिंस्तस्मै ॥ ४ ॥

यतस्त्वं कृपया भूत्या तेजसा महतौजसा ।
तुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान् विभुः ॥ ५ ॥

सत्यधर्मा – महतेत्येतत्तेजओजसोर्विशेषणम् । तेजः कान्तिरोजोऽवष्टम्भनशक्तिः । यत इत्याद्यैः सर्वैर्गुणैर्युक्तो भगवान्विभुस्ततः स्तुतोऽसि । नाविद्यमानगुणस्तुतिरियमिति भावः ॥ ५ ॥

चट्टी – भो ईश । यतो यस्मात्त्वं कृपादिभिर्जुष्टोऽन्यैश्च सत्यसंकल्पादिभिः सर्वैः गुणैस्ततस्तस्माद्भगवच्छूब्दवाच्योऽसि ॥ ५ ॥

विष्णुपत्नि महामाये महापुरुषलक्षणे ।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥

सत्यधर्मा – सम्बुद्धिर्लोकमातः । श्रिया सहेति प्रागीरितत्वात्तत्सतीमपि तनुयादिति वदति ॥ विष्णुपत्नीति । महापुरुषलक्षणे महापुरुषस्य लक्षणं चिन्हं श्रीवत्सरूपं यस्यास्तत्सम्बुद्धिः । लोकमातर्जगज्जननि मे मयि प्रियेथाः प्रीता स्याः ॥ ६ ॥

चट्टी – महामाये महामाहात्म्ये ! महापुरुषस्य श्रीनारायणस्यैव लक्षणानि निरपेक्षत्वादीनि यस्यास्तस्याः संबोधनम् ॥ ६ ॥

ओं नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह
महाविभूतिभिः बलिमुपाहरामीति । अनेनाहरहर्मन्त्रेण
विष्णोरासनार्ध्यपाद्योपस्पर्शनस्नानवासउपवीत-
भूषणगन्धपुष्पधूपोपहाराद्युपचारांश्च समाहित उपाहरेत् ॥ ७ ॥

सत्यधर्मा – महाविभूतिभिस्तत्परिवारभूतरमादिमहाविभूतिभिर्योग्यतानुसारिमहाविभवैर्वा तव बलिमुपाहरामि । इति मन्त्रेणावाहनं प्रतिमादिषु । पादार्घ्यमिति यावत् पाद्यमर्घ्यमित्यन्वयः । उपस्पर्शनं तयोर्दानम् । तदागा अस्पृशदित्यादिप्रयोगात् । पादस्पर्शमात्रमाचमनं वा । उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपीति विश्वः । वासो वस्त्रम् । उपवीतम् यज्ञोपवीतम् । उपहारः फलपायसादिनिवेदनम् । अनेन वक्ष्यमाणेन ॥ ७ ॥

चट्टी – पूजामन्त्रमाह ॥ ॐ नम इति । महाविभूतिभिः परिवारदेवताभिः सह वर्तमानाय । उपस्पर्शनमाचमनम् ॥ ७ ॥

हविश्शेषं तु जुहुयादनले द्वादशाहुतीः ।
ओं नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ।
श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्वसम्पदः ॥ ८ ॥

सत्यधर्मा – द्वादशाहुतीः । पूर्वं मन्त्रस्योदाहृतत्वेऽपि स्वाहेत्यनुक्तत्वात्स्वाहान्तो होमकर्मणी-त्यादेस्तन्मात्रयोजनेनानेनेत्युक्तिरिति ज्ञेयम् । तत्र जपे न्यासे नमोऽन्तस्त्वित्युक्ते नमोऽस्तु त इत्यभिभाषणमिति ज्ञेयम् । वरदावाशिषां प्रभवौ जनकौ । नित्यं उक्तदिनमध्येऽखण्डम् ॥ ८ ॥

चट्टी –हविःशेषमुपाहरावशिष्टम् । होममन्त्रमाह ॥ ॐ इति । प्रकर्षेण भवंत्याभ्यामिति प्रभवौ ॥८॥

प्रणमेद् दण्डवद् भूमौ भक्तिप्रह्वेण चेतसा ।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥ ९ ॥

सत्यधर्मा – प्रव्हेन प्रवणेन । दशवारं तदनन्तरं यथाशक्ति ॥ ९ ॥

युवां तु विश्वस्य विभू जगतः कारणं परम् ।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥ १० ॥

सत्यधर्मा – युवामित्याद्युक्त्या साम्यं रमाया आयातं तदपवदति ॥ इयं हीति । दुरत्यया त्वदन्येन ॥ १० ॥

चट्टी – स्तोत्रप्रकारमेवाह ॥ युवामिति सार्धैश्चतुर्भिः ॥ युवां लक्ष्मीनारायणौ ॥ ननु प्रकृतिपुरुषयोर्जगत्कारणत्वं श्रूयते तत्र तत्र, क्वचिच्चाव्यक्तादीनां तत्कथमुच्यते युवामिति तत्राह ॥ इयमिति । इयमेव प्रकृतिः प्रकृतिनामिका । त्वमेव पुरुषः पुरुषनामकः । इयमेव सूक्ष्मा दुर्वि-भाव्याऽव्यक्तशब्दप्रकृतिकथनमेतत् । सूक्ष्मत्वादव्यक्तनाम्नीत्यर्थः ॥ तदुक्तम् ॥ कालोऽन्तकः प्रधानं च मृत्युरव्यक्तमित्यपि । उच्यते प्रकृतिः सूक्ष्मा श्रीश्च दुर्गेति नामभिरिति विष्णुशक्तिनियम्यत्वाच्छक्तिनाम्नी च । श्रीभूर्दुर्गेति या भिन्ना प्रकृतिः शक्तिरुच्यते । विष्णुस्वरूपशक्तेः सा शक्यत्वाच्छक्तिरेवेति वचनात् । अज्ञानादिना जगद्बन्धकत्वान्मायानाम्नी च । तदुक्तम् ॥ मायेति प्रकृतिश्चैव मायाजीवश्च कथ्यत इति । मूलकारणभूता तु मायेत्याहुर्मनीषिण इति च । सा दुरत्यया भगवत्प्रसादमन्तरेण केनाप्यत्येतुमशक्या ॥ १० ॥

तस्या अधीश्वरः साक्षात् त्वमेकः पुरुषः परः ।
त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग् भवान् ॥ ११ ॥

तात्पर्यम् – इज्या क्रिया । 'अन्तर्यामी तु यज्ञादेर्विष्णुरिज्यादिनां रमा । तत्तच्छब्दैः स्वतो वाच्यौ न तु सर्वस्वरूपतः । अन्तर्यामी श्रियश्चापि विष्णुरेव न संशयः । नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चने'ति ब्रह्मतर्के ॥ ११ ॥

सत्यधर्मा – त्वं सर्वयज्ञ इज्येयमिति तथा गुणव्यक्तिरियं देवीति श्लोके च क्रियेत्यस्यान्वयाप्रतीत्या यज्ञादिरूपत्वं रमाया नारायणस्येति विरुद्धप्रतीत्या वाऽन्वयप्रदर्शनं स्ववचनेन विधाय तत्रेतरत्र च मानमाह ॥ इज्या क्रियेति । इज्या क्रिया यज्ञादेरखण्डकर्म । खण्डानां मध्ये मध्येऽनुष्ठेयानामिज्यादीनां क्रियाणां तदन्तर्यामिणीति विपरिणतमन्तर्यामीत्यन्वेति । ततस्तस्मादन्तर्यामित्वतः । तत्तच्छब्दैः स्वतः स्वातन्त्र्येण वाच्यौ । न तु सामानाधिकरण्यप्रतीतसर्वस्वरूपतः प्रयोजकात् । तत्रापि विशेषोऽस्तीति भाषते ॥ अन्तर्यामीति । तर्हि तस्यापि कश्चिदस्ति चेत्स किन्नोच्यत इत्यत आह ॥ नेति । क्वापि काले देशे कुतश्चन कस्मादपि हेतोः इति ब्रह्मतर्कोक्तेर्न कुतर्को युक्तः ॥ ततश्च श्लोकार्थः ॥ त्वं सर्वयज्ञस्तदन्तर्यामित्वेन तच्छब्दवाच्यः । इयमिज्या क्रिया । इयं रमा तदन्तर्यामिणीत्यर्थः । मुख्यतो भगवान्फलभुगियं भगवती च त्वदनन्तरमिति ज्ञेयम् । यजमानस्त्ववान्तरतया योग्यतामनतिक्रम्य फलभुक् । तद्विषय उभयविषयेऽन्तर्णीतण्यर्थो हि भोजयतीति भुक्शब्द इति च बोध्यम् ॥ ११ ॥

चट्टी – एवंभूतायास्तस्याः । अधीश्वर इत्यनेन समकक्षतया जगत्कारणत्वं युवामित्यनेन प्रतीतं निराकृतम् ॥ त्वं सर्वयज्ञः सर्वयज्ञान्तर्यामी । इयं श्रीरिज्या क्रियान्तर्यामिणी । इयं क्रिया क्रियान्तर्यामिणी । भवान् फलभुक् कर्मफलभोक्तृषु स्थित्वा तत्फलभोजकः ॥ ११ ॥

गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग् भवान् ।
त्वं हि सर्वशरीरात्मा श्रीः शरीरेन्द्रियाशया ॥ १२ ॥

सत्यधर्मा – जडप्रकृतिं द्वारीकृत्य सत्त्वादिगुणानां व्यक्तिर्यया सा तथा । तत्सङ्गोऽङ्गीकृत आसीदस्या इत्यतो नेत्यप्याह ॥ गुणव्यक्तिरिति । गुणानामुक्तरूपाणां विगताऽक्तिः सम्बन्धो यस्याः सा । तत्रापि न स्वतन्त्रं त्वत्कलमित्याह ॥ व्यञ्जक इति ॥ गुणभुक् तत्तच्छुभभोक्ता । सर्वशरीरात्मा सर्वशरीरेष्वादानादिकर्तृतया स्थितः । श्रीश्च श्रीरपि । शरीरेन्द्रियाशया शरीरेन्द्रियेष्वाशयोऽन्तःकरणमभिमानोऽनभिमानप्रायो यस्याः सा शरीरेन्द्रियाशया तन्नियामकतया तच्छब्दवाच्येति वा सर्वशरीरेन्द्रियेष्वाशेत इत्याशयेति वाऽऽशयः । अधिकरणे शेतेरित्यच् ॥ १२ ॥

चट्टी – गुणानां सत्त्वादीनां व्यक्तिरभिव्यक्तिर्भवान्गुणाभिव्यञ्जकः सन् गुणकार्यसुखादिभोजकः । सर्वेषां शरीरिणामात्माऽन्तर्यामी । श्रीस्तु शरीराद्यन्तर्यामी प्रत्ययो नामरूपयोः प्रकाशः । अत्र तत्तदन्तर्यामित्वादेव तत्तच्छब्दवाच्यत्वम् । न तु सर्वाभेदात् ॥ तदुक्तम् ॥ अन्तर्यामी त्वित्यादि ॥१२॥

नामरूपे भगवती प्रत्ययस्त्वम(मु)पाश्रयः ।
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ।
तथेमा उत्तमश्लोक सन्तु सत्या महाशिषः ॥ १३ ॥

सत्यधर्मा – नामरूपे तदभिमानिनीति ते श्रीरुच्येते । अपाश्रय इतराधाररहितः प्रत्ययस्त-त्त्वज्ञानसाधनत्वेन तत्त्वव्यपदेशः । तथा त्रिलोकस्य विशेषणसमासः । वरदावित्यादि यथा सत्यं तथा । हे उत्तमश्लोक । महाशिष इतरापूरणीयाः सत्याः सन्तु सफला भवन्तु ॥ १३ ॥

चट्टी – न केवलं भवान् यज्ञादीनामेवान्तर्यामी किन्तु सर्वनियामिकायाः श्रियोऽपीत्याह ॥ उपाश्रय इति । उप सर्वाधिकायाः श्रियोऽप्यन्तर्यामित्वेनाश्रय इति भावः ॥ तदुक्तम् ॥ अन्तर्यामी श्रिय इत्यादि ॥ युवां त्रिलोकस्य वरदावित्येतद्यथा सत्यं तथा ममाशिषः कामाः सत्याः सन्तु ॥ १३ ॥

इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ।
तन्निस्सार्योपहरणं दत्वाऽऽचमनमर्चयेत् ॥ १४ ॥

सत्यधर्मा – उपहरणं निवेदितान्नादिकं वा दर्भास्तरणं वा निःसार्योद्वास्याचमनम् ।उत्तरमर्चयेत् । महापुरुषस्य उपसंहारसपर्यां कुर्यात् ॥ १४ ॥

चट्टी – उपहरणं नैवेद्यम् ॥ १४,१५ ॥

ततः स्तुवाना स्तोत्रेण भक्तिप्रह्वेण चेतसा ।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ १५ ॥

सत्यधर्मा –स्तोत्रेण तन्मन्त्रादिना ॥ यज्ञोच्छिष्टं पूजाशेषं पुष्पादिकमवघ्राय पुनर्हरिमर्चयेत् ॥१५॥

पतिं च परया भक्त्या महापुरुषचेतसा ।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥ १६ ॥

सत्यधर्मा – महापुरुषचेतसा महापुरुषो भगवांस्तत्र सन्निहित इति मनसा । लालसा किल सा चेदर्चनेन तदुपसाधनं केन कर्तव्यमित्यतो यथा प्रेमेत्याह ॥ प्रियैरिति । यदि प्रेमशीलः पतिस्तैस्तैः प्रियैर्भार्यापेक्षितैरुपनमेत् । उपयुक्तग्रहणे निश्शब्दं कुर्यात् ॥ १६ ॥

चट्टी – महापुरुषचेतसा भगवानस्मिन्संनिहित इति बुध्या पतिं चोपचरेत्। पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः कर्माणि बिभृयात्। तदनुकूलो भवेदित्यर्थः। कुत इत्यत आह॥ कृतमिति। यतो दंपत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति। तस्मादित्यर्थः। यद्वा। उत्तरवाक्यार्थे हेतुरयम्॥१६,१७॥

बिभृयात् सर्वकर्माणि पत्न्या उच्चावचानि च।
कृतमेकतरेणापि दम्पत्योरुभयोरपि॥ १७॥

सत्यधर्मा – उच्चावचानि नैकप्रकाराणि स्वयं परिकरकर्माणि बिभृयात्पूरयेत्। तत्समये पत्न्याः साहितीकरणे न प्रत्यवायस्तस्या इति भावः। उच्चावचं नैकभेदमित्यमरः। कदाचिल्लालसायां केनचिदुपाधिना किं भर्त्रा कार्यमुत त्याज्यमित्याह॥कृतमिति॥ दम्पत्योरुभयोर्मध्ये एकतरेण भर्त्रा वा कलत्रेण वा कृतं कृतमेव न तस्य फलानुपलंभकतेति भावः॥ १७॥

पत्न्यां कुर्यादनर्हायां पतिरेव समाहितः।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथञ्चन॥ १८॥

सत्यधर्मा – रजोदर्शनादिनाऽनर्हायां पर्यहरणानर्हायां पत्न्यां पतिरेव कुर्यात्। तद्योग्यदिनागमनपर्यन्तं न स्वयं विष्णोर्व्रतं बिभ्रत्सन्। नाभ्यस्ताच्छतुरिति न नुम्। कथञ्चन कुर्यान्न विहन्यात्॥१८॥

चट्टी – ननु व्रतमध्ये रजोदर्शनादिनाऽनर्हायां पत्न्यां कथं तदनुष्ठानमित्यत आह॥ पत्न्यामिति। न विहन्यात् न विच्छिन्द्यात्॥ १८, १९, २०॥

विप्रान् स्त्रियो वरवतीः स्रग्गन्धबलिमण्डनैः।
अर्चेदहरहर्भक्त्या देवं नियममास्थिता॥ १९॥

सत्यधर्मा – विप्रान्वरवतीः स्त्रियः। देवं च नियममास्थिता भक्त्याऽर्चयेदिति सम्बन्धः॥ १९॥

उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः।
अद्यादात्मविशुध्यर्थं सर्वकामाप्तये तथा॥ २०॥

सत्यधर्मा – स्वे धाम्नि स्वगृहे स्वहृदयरूपगेहे वा। उद्वास्यान्तःस्थापयित्वा। अग्रतस्तद्देवपुरत आत्मविशुद्ध्यर्थं तन्निवेदितं स्वयमद्याद्भक्षयेत्। न केवलं कलेवरशुद्धिरपि तु सर्वकामाप्तिरपि भवतीत्याह॥ तथा सर्वकामाप्तय इति॥ २०॥

एतेन पूजाविधिना मासान् द्वादश हायनम् ।
नीत्वा चोपरमेत् साध्वी कार्तिके चरमेऽहनि ॥ २१ ॥

सत्यधर्मा – मासान् द्वादशेत्युक्त्वा व्यासः क्षयाक्षयमासन्यूनातिरेकशङ्कापराकृत्यै व्याचर्करीति ॥ हायनमिति । संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा इत्यमरः । एवञ्च मासास्त्रयोदश-सङ्ख्याश्चेतदात्मनि तथैकादशसङ्ख्याश्चेदपि तदात्मके हायने कृतव्रतपूर्तिरेवेति नियमं ज्ञापयामासेति ज्ञेयम् । एवं हायनं नीत्वा गमयित्वा कार्तिके चरमेऽहन्यमायाम् ॥ २१ ॥

चट्टी – द्वादशमासानित्युक्ते कदाचिन्मध्ये मलमासे सति तेन सह द्वादशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात् । हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि प्रसङ्गःस्यात् । तदुभयं वारयितुमु-भयमुक्तम् । कार्तिके मासि चरमेऽहनि । अन्तिमे दिवसे । उपचरेत् ॥ २१ ॥

श्वो भूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २२ ॥

सत्यधर्मा – तत्रापि श्वः प्रातर्भूते जाते पूर्ववत्प्रथमदिन इव विधितः पयः शृतेन क्षीरपक्वेन । श्रा पाक इति स्मृतेः । चरुणा हव्यान्नेन सर्पिषा घृतेन सह पाकयज्ञविधानेन द्वादशैवाहुतयः । ब्राह्मणान्भोजयेद्भक्त्या त्वन्नाद्यैर्द्वादशात्मवित् । पाकयज्ञविधानेन किं काष्ठेन किं मन्त्रेण किं कालेन कर्तव्यः पाक इति सूत्राद्युक्तविधानेन द्वादशैवाहुतीर्जुहुयात् । तत्र तस्या नाधिकार इति वेदयितुं वदति ॥ पतिरिति ॥ २२ ॥

चट्टी – श्वो भूते सत्युपस्पृश्य स्नात्वा पयसि श्रुतेन पक्वेन पाकयज्ञविधानेन स्थालीपाकविधानेन ॥ २२ ॥

ब्राह्मणान् भोजयेद् भक्त्या त्वन्नाद्यैर्द्वादशात्मवित् ।
तेभ्यो दद्यात्तिलान् राजन् सोदपात्रान्गुडा(निला)न्वितान् ॥ २३ ॥

सत्यधर्मा – आत्मवित्परमात्मैव ब्राह्मणादिसन्निहित इति वेदिता । अन्नाद्यैर्भक्त्या द्वादशब्राह्म-णान्भोजयेत् । आधिक्ये पुण्यस्याधिक्यं ध्वनयितुं द्वादशाहुतयो न त्वधिका इति नियन्तुं च निरवधारणसावधारणनिर्देशः कृतो ग्रन्थकृतेति मन्तव्यम् । तेभ्यो भोजनार्थमामन्त्रितेभ्यो गुडान्वितान् गुडो हीक्षुविकारस्तेनान्वितान् । गुडः स्याद्गोलके इक्षुविकारयोरिति विश्वः । सोदपात्रान् एकहलादौ

पूरयितव्येऽन्यतरस्यामित्युदादेशः । स्वतन्त्र उदशब्दो वाक्येऽभिहितमभिधानं प्राक् । उदकपात्रसहितांस्तिलान्दद्यात् ॥ २३ ॥

चट्टी – आत्मविद्ब्रह्मार्पणं ब्रह्महविरित्याद्युक्तप्रकारेण परमात्मानं जानन् । द्वादशब्राह्मणान् भोजयेदित्यर्थः । यद्वा । द्वादशात्मविदित्येकं पदम् । द्वादशनामात्मानं स्वामिनं केशवादिरूपिणं परमात्मानं वेत्तीति तथेत्यर्थः ॥ सोदपात्रान् उदकपूर्णपात्रैः सहितान् । इलान्वितान्भूमिसहितान् । गौरिला कुंभिनी क्षमेत्यभिधानात् ॥ २३,२४ ॥

आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥ २४ ॥

सत्यधर्मा – प्रीतैर्द्विजैः समीरिता आशिषो भगवत्प्रीतिपात्रं भवेत्यादिरूपाः शिरसाऽसकृदादाय गृहीत्वा शिरसा भक्त्या प्रणम्य तदनुज्ञया स्वयं भुञ्जीत । न चाकण्ठपूर्ति । श्वासग्रासः कर्तव्य इत्यप्युदीरयति ॥ आभुञ्जीतेति । आङीषदर्थे ॥ २४ ॥

आचार्यमग्रतः कृत्वा वाग्यतः सुसमाहितः ।
दद्यात् पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगम् ॥ २५ ॥

सत्यधर्मा – वाग्यता येन स तथा । सुप्रजास्त्वं व्याख्यातम् । चरोः शेषं स्वभुक्तोर्वरितम् ॥२५॥

चट्टी – सुप्रजास्त्वम् । सत्पुत्रहेतुमित्यर्थः । सुष्ठु प्रजाः । यस्मात्तं शेषम् ॥ २५ ॥

एतच्चरित्वा विधिवद् व्रतं विभोरभीप्सितार्थं लभते पुमानिह ।
स्त्रीर्वा तदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥ २६ ॥

सत्यधर्मा – जीवपतिं जीवत्पतिं गृहान् । गृहाः पुंसि च भूम्न्येवेत्यमरः ॥ २६ ॥

चट्टी – जीवपतिमायुष्मन्तं पतिम् ॥ २६ ॥

कन्याऽपि विन्देत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषा गतिम् ।
मृतप्रजा जीवसुतान् धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ॥ २७ ॥

सत्यधर्मा – कन्या व्रतमिदं कुर्याच्चेत्साऽपि समग्रलक्षणं पतिं विन्देत । वीरो भर्ता तद्रहिता हतकिल्बिषा गतपापा जन्मान्तरे समग्रलक्षणं पतिं विन्देत । तदनन्तरं गतिं भगवल्लोकम् । मृतप्रजा मरिष्यत्तनया । जीवसुतान् जीववदपत्यानि । सुदुर्भगा दरिद्रा धनेश्वरी भवतीति शेषः । सुभगा ज्ञानादिमती ॥ २७ ॥

चट्टी – अवीरा विधवा। हतकिल्बिषा सती गतिं विन्देत। धनेश्वरी सत्यपि या दुर्भगा सा सुभगा भवति। विरूपाऽप्यग्र्यं रूपं विन्देदित्यन्वयः ॥ २७ ॥

विन्देद् विरूपा विरुजो विमुच्यते य आमयावीऽन्द्रियदेहकल्पः।
एतत् पठन्नभ्युदये च कर्मण्यनन्ततृप्तिं पितृदेवतानाम् ॥ २८ ॥

सत्यधर्मा – विरूपा कुरूपा। अग्र्यं विन्देद्विन्देत। य आमयावी रोगी। ग्लानग्लासूरामयावीत्यमरः। आमयोऽस्यास्तीत्यामयावी। आमयस्योपसङ्ख्यानं दीर्घश्चेति वार्तिकादस्मायामेधास्रजो विनिरिति विनौ आमयावीति भवति। विरुजो बहुरोगतो विमुच्यते मुक्तो भवति। न केवलं तावदेव बलमपि भवतीत्याह। इन्द्रियदेहकल्प इन्द्रियैः पृथक् पृथग्देहेनाङ्गेन च कल्पः समर्थश्च भवतीति। अभ्युदये कर्मणि विवाहादिशुभकर्मणि। एतन्मरुज्जन्मप्रतिपादकं पद्यजातं पठन् अनन्ततृप्तिमन्यत्रालम्बुद्धिम्। तृप्तिरन्यत्रालम्बुद्धिरिति गीताभाष्योक्तेः। केषां पितृदेवतानां पितरश्च देवताश्च तासाम्। विन्दतेत्यन्वयः ॥ २८ ॥

चट्टी – आमयावी रोगी सविरुजः। विविधाद्विशिष्याद्वा रोगाद्विमुच्यते। किञ्चेन्द्रियैः सहितः कल्पः पटुर्देहो यस्य स भवति। अभ्युदये कर्मणि शुभकर्मणि। एतत्पठन् यो वर्तते स पितॄणां देवतानां च। अनन्ततृप्तिं करोतीति शेषः ॥ २८ ॥

तुष्टाः प्रयच्छन्ति समस्तकामान् होमावसाने हुतभुक् श्रीहरिश्च।
राजन् महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत् ते ॥ २९ ॥

इति श्रीमद्भागवते षष्ठस्कन्धे एकोनविंशोऽध्यायः ॥

समाप्तोऽयं षष्ठः स्कन्धः ॥

सत्यधर्मा – होमावसाने तत्समाप्तौ हुतभुग् हुतवहः श्रीरमा हरिश्च तुष्टाः समस्तकामान्प्रयच्छन्ति। यः पठंस्तस्मा इति शेषः। हे राजन् ते महन्मरुतां जन्म महद्दितेः पुण्यं तत्प्रदं व्रतं चाभिहितं मयेति शेष इत्यशेषमतिमङ्गलम् ॥ २९ ॥

षष्ठतात्पर्यसद्भावनवरत्नखनिं मुनिः।
वितत्यादर्शयत्तद्धोत्रा सगृह्णातु वाञ्छितम् ॥ १ ॥
न विद्वत्ताभिमत्येदं कृतं विवरणं मया।
किन्त्वाचार्यवचःसङ्गात्सौवश्रुतशुशुत्सया ॥ २ ॥

महतामहतां हि हीयेतामहदर्हणात् ।
उन्मत्तकं किमुन्मत्तो धर्ता धर्ता शिवां शिवः ॥ ३ ॥
अव्यानव्याकृतौ शिक्षातर्ककर्कशतापि नो ।
मीमांसा सा न मीमांसा शुद्धश्रद्धा कृताकृतिः ॥ ४ ॥
गुरुवाणीसुमनसां मध्ये मालं वसन्नसन् ।
तत्तुल्यः कदल्या माल्यः स्याद्गीर्मे पुष्कलबाष्कला ॥ ५ ॥
बद्धोऽहं स्यामवद्धेन किञ्चिच्छुद्धेन शुद्धधीः ।
अगण्यपुण्यो यत्पुण्यं गुरुराप्नोतु सद्गुरुः ॥ ६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मविरचितायां षष्ठस्कन्धे
एकोनविंशोऽध्यायः ॥ ६-१९ ॥

समाप्तोऽयं स्कन्धः ॥ ६ ॥

चट्टी – किन्तु हुतभुजादयस्तस्मै समस्तकामान्प्रयच्छन्ति । उपसंहरति ॥ राजन्निति । महत्पुण्यं जन्म महद्व्रतं चाभिहितम् । इत्यशेषमङ्गलम् ॥ २९ ॥

वाक् प्रसूनकृता चट्टीवेङ्कटाद्रिविपश्चिता ।
ध्रियतां हृदये माला सदये प्रभुणाश्रितः ॥

इति भागवतटिप्पण्यामेकोनविंशोध्यायः ॥ ६-१९ ॥

इति श्रीमद्भागवतटिप्पण्यां सज्जनहिताख्यायां श्रीमद्वेङ्कटाचार्याणां
शिष्येण चेट्टीवेङ्कटाद्रिणा विरचितायां
षष्ठःस्कन्धः समाप्तः ॥ ६ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीसत्याभिनवतीर्थविरचिता

दुर्घटभावदीपिका

पञ्चमस्कन्धः

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ तमोद्वारं योषितां संगिसंगमित्यस्य योषितां नानास्त्रीणां संगिभिः संगं तमोद्वारं नित्यनरकद्वारमाहुरित्यर्थः । एतेन गृहस्थाश्रमस्य मोक्षसाधनत्वात् योषितां संगं तमोद्वारमाहुरित्ये-तद्विरुद्धमिति दूषणं परास्तम् । नानास्त्रीभोगसंगस्य तमोद्वारत्वमित्यङ्गीकारात् । अत एव योषितामिति बहुवचनम् । अन्यथा योषितः संगमिति ब्रूयात् ॥ २ ॥

अयमधिकारी यावदात्मतत्त्वं परमात्मतत्त्वं न जिज्ञासते ज्ञातुं नेच्छति तावदबोधजातो भगवज्ज्ञानजातः पराभवः संसारक्लेशो भवति भगवज्ज्ञानेच्छामात्रेण संसारक्लेशो निवर्तते । किमु भगवज्ज्ञानेति भावः । एतेन भगवज्ज्ञानमाहात्म्ये वक्तव्ये भगवज्ज्ञानेच्छाकथनमसंगतमिति दूषणं परास्तम् । कैमुत्यन्यायेन भगवज्ज्ञानमाहात्म्यस्य लाभात् । ननु भगवज्ज्ञानेच्छायां जातायामपि स्वर्गादिफलेच्छया ज्योतिष्टोमादियागानुष्ठाने कृते नानाशरीरबन्धेन संसारक्लेशोऽवर्जनीय एवेत्यत आह ॥

तावदिति । क्रिया इत्यतः परमपेक्षिता इति शेषः । यावदात्मतत्त्वं न जिज्ञासते तावत्क्रिया ज्योतिष्टोमादिक्रिया फलानि स्वर्गादीन्यपेक्षिता अपेक्षितानि । यावदात्मतत्त्वं न जिज्ञासते तावन्मनः कर्मात्मकं कर्मवशम् । काम्यकर्मोत्पादकमिति यावत् । काम्यं कर्म कथमनिष्टमित्यत आह ॥ येनेति । येन काम्यकर्मणा शरीरबन्धो नानाशरीरबन्धो भवतीति ॥ ता० अर्थः ॥ क्रियाफलमित्यतः परमपेक्षितमिति शेषः । यावदात्मतत्त्वं न जिज्ञासते तावदेव तावत्पर्यन्तमेव क्रियाफलापेक्षितम् । यावदात्मतत्त्वं न जिज्ञासते तावन्मनः कर्मात्मकं कर्मवशं काम्यकर्मोत्पादकम् । ज्ञानेच्छानन्तरं तु मनः काम्यकर्मण एवोत्पादकं न भवति । किमु पापानामिति यावदिति । एतेन ज्ञानेच्छानन्तरं संसारक्लेशो न भवतीत्युपपादनार्थं मनो ज्ञानेच्छानन्तरं शरीरबन्धापादकं कर्म नोत्पादयतीति वक्तव्यं विशिष्य काम्यकर्म नोत्पादयतीति कथनमसंगतमिति दूषणं परास्तम् । मनो ज्ञानेच्छानन्तरं काम्यकर्मणा-मुत्पादकं न भवतीत्युक्त्या पापानामुत्पादकं न भवतीत्यर्थस्य कैमुत्यन्यायेन लाभात् ॥ ५ ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ ५-५ ॥

॥ हरिः ॐ ॥ अथ कुटचाचलसञ्चारानन्तरं अयं ऋषभदेहो यः समीरवेगविधुतवेणु-निकर्षोपजातः समीरवेगो वायुवेगस्तेन विधुताः कंपिता ये वेणवस्तेषां निकर्षः सङ्घर्षस्तेनोपजातो दावानलो दावाग्निस्तेनाग्निना सह । तमग्निमनुविश्येति यावत् । तद्वनं कुटचाचलवनमालेलिहानस्तद्वनं ददाहेति ।

एतेन ऋषभदेहस्य चिदानन्दात्मकत्वेन दाहासंभवात् दावानलस्तेन ऋषभदेहेन सहितं वनं ददाहेति कथनमनुपपन्नमिति दूषणं परास्तम् । ऋषभदेहोऽग्निं प्रविश्य वनं ददाहेत्यर्थाङ्गीकारात् ।। ९ ।। इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ।। ५-६ ।।

।। हरिः ॐ ।। सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरीत्यस्य सर्वदेवतालिङ्गानां सर्वदेवतानां ब्रह्मादिदेवानां तल्लिङ्गानां च मन्त्राणां यज्ञमन्त्राणामर्थनियामकतयाऽर्थानां मन्त्रादिव्यतिरिक्तसमस्तयज्ञसाधनरूपार्थानां च नियमकतया यज्ञस्य साक्षात्कर्तरि मुख्यकर्तरीत्यर्थः । एतेन सर्वदेवतादिकर्तृत्वे सर्वदेवतादिनियामकत्वस्य हेतुत्वाभावात् सर्वदेवतादिनियामकत्वेन साक्षात्कर्तरीति कथनमनुपपन्नमिति दूषणं परास्तम् । यज्ञस्येति शेषमङ्गीकृत्य सर्वदेवतादिनियामकत्वेन यज्ञस्य साक्षात्कर्तरीत्यर्थ इत्यङ्गीकारात् ।। ५ ।।

इच्छारूपेणेत्यस्य भक्तेच्छापूरकेण रूपेणेत्यर्थः । एतेनेच्छारूपेणेति व्यर्थमिति दूषणं परास्तम् । इच्छारूपेणेत्यस्य शाकपार्थिव इत्यादिवदिच्छापूरकेण रूपेणेति मध्यमपदलोपसमासमंगीकृत्य भक्तिकामिताशेषपुरुषार्थदातृरूपेणेत्यर्थ इत्यङ्गीकारात् ।। ८ ।। इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ।।

।। हरिः ॐ ।। अनुस्मृतजन्मानुस्मृतिरित्यस्यानुस्मृतिर्येन सोऽनुस्मृतजन्मानुस्मृतिरित्यर्थः । एतेन जन्मानुस्मरणस्यैव वक्तव्यत्वेन जन्मस्मरणकथनमसङ्गतमिति दूषणं परास्तम् ।। २४ ।। इति श्रीभागवतटिप्पण्यां अष्टमोऽध्यायः ।। ५-८ ।।

।। हरिः ॐ ।। आत्मनः प्रतिघातमाशंसमान इत्यस्यात्मनो देहस्य प्रतिघातं लोककर्तृकमानापमानरूपं प्रतिघातमाशंसमानोऽपेक्षमाण इत्यर्थः । एतेनात्मघातरूपानपेक्षणीयत्वात् आत्मनः प्रतिघातमाशंसमान इत्यनुपपन्नमिति दूषणं परास्तम् ।। ३ ।।

सुखदुःखयोर्द्वन्द्वनिमित्तयोरसंभावितदेहाभिमान इत्येतत्सुखदुःखयोरित्यतः परं जनक इत्यस्य शेषमङ्गीकृत्य द्वन्द्वनिमित्तयोः सुखदुःखयोर्जनक इत्यस्य बुद्ध्या विवेकेन देहाभिमान इत्यनेनान्वयं चाङ्गीकृत्यासंभावितः संभावनायामप्यविषयो द्वन्द्वनिमित्तयोः सुखदुःखयोर्जनको देहाभिमानो यस्य सोऽसंभावितदेहाभिमान इति व्याख्येयम् । एतेन सुखदुःखयोर्द्वन्द्वनिमित्तयोरित्यस्यासंभावितदेहाभिमान इत्यनेनान्वय इति दूषणं परास्तम् ।। ९ ।।

न समं न्यूनमधिकं वेदेत्यस्येदं सममिदं विषममिति न वेद विषममित्युक्तं विवृणोति ।। न्यूनमिति । विषमं द्विविधम् । न्यूनमधिकं चेति । तदुद्वयमपि न वेदेत्यर्थः । एतेन न्यूनाधिकातिरिक्तविषमाभावाद्विषमं वेदेत्यनेनैव न्यूनमधिकं न वेदेत्यर्थस्य लाभात् न्यूनमधिकमित्येतद्व्यर्थमिति दूषणं परास्तम् । विषमं न वेदेत्युक्तौ विषमशब्दवाच्ययोरधिकन्यूनयोर्मध्येऽधिकं वा न्यूनं वा न वेदेत्युच्यत

इति संकोचभ्रान्तिः स्यात् । सा मा भूदित्येतदर्थं न्यूनमधिकमित्येतद्विषयमित्यस्य विवरणमित्यङ्गीकारात् । एतेनैवाधिकं न्यूनं न वेदेत्यनेनैव विषमं न वेदेत्यनेन संक्षेपेणोक्त्वा न्यूनमधिकं न वेदेति विस्तरेणोच्यत इत्यङ्गीकारात् । ''संक्षेपविस्तराभ्यां च प्रवदन्ति मनीषिणः । बहुवारस्मृतेस्तस्य फलबाहुल्यकारणादि''ति वचनात् ॥ ११ ॥ ५-९ ॥

॥ हरिः ॐ ॥ तत्कुलपतिना शिबिकावाहकपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध इत्यस्य शिबिकावाहकपुरुषान्वेषणसमये तत्कुलपतिना तेषां शिबिकावाहकानां कुलपतिना शिबिकावाहकश्रेष्ठेन दैवेनोपसादितः प्रापितः स द्विजवरो लब्ध इत्यर्थः । एतेन तत्कुलपतिनेत्यत्र तच्छब्देन किं राज्ञः परामर्शः किं वा शिबिकावाहकानाम् । नाद्यः । राजकुलपतेः शिबिकावाहकान्वेषणकर्तृत्वायोगेन तत्कुलपतिना शिबिकावाहकान्वेषणसमये द्विजवर उपलब्ध इत्युक्तेरयोगात् । न द्वितीयः । शिबिकावाहकानां पूर्वमप्रकृतत्वेन तच्छब्देन परामर्शासंभवात् । इति शङ्कानवकाशः ॥ १ ॥

शूलपाणिः रुद्रोऽपि स्वकृतान्महद्विमानान्महतां स्वोत्तमानां विमानादवमानात् । अदूराच्छीघ्रं धक्ष्यति । मादृक् धक्ष्यतीति किमु वक्तव्यमित्येतद्धि प्रमाणप्रसिद्धमिति । एतेन मादृक् धक्ष्यतीत्येतत् शूलपाणिरपि धक्ष्यतीत्यनेनानन्वितमिति दूषणं परास्तम् । किम्वित्यस्य शेष इत्यङ्गीकारात् ॥ २६ ॥ ५-१० ॥

॥ हरिः ॐ ॥ यदात्मलिङ्गं परमात्मज्ञापककारणम् । उपलक्षणमेतत् । मोक्षकारणं च । संसारतापावपनं संसारतापकारणम् । शोकमोहामयसंगलोभवैरानुबन्धं शोकमोहामयसंगलोभवैः अनु सम्यग्बन्धो येन तत्तथोक्तम् । तन्मनो यावज्जनस्य ममतां न विधत्ते । विशब्दो नञर्थे । ममतां न धत्त इति न । किन्तु ममतां धत्त एव तावत् । जन इह संसारे भ्रमतीति । एतेन यावन्मनो ममतां न विधत्ते तावत्संसारे भ्रमतीत्यनुपपन्नम् । ममताभावस्य मोक्षहेतुत्वेन संसारहेतुत्वाभावादिति दूषणं परास्तम् ॥ १७ ॥ ५-११ ॥

॥ हरिः ॐ ॥ अन्यत् विष्णोरन्यत् कृशं स्थूलं अणु बृहत् अमङ्गलम् । असज्जीवविशिष्टमिति यावत् । शरीरम् । यच्च कृशं स्थूलं अणु बृहत् सज्जीवं सज्जीवविशिष्टं शरीरम् । यच्च कृशं स्थूलं अणु बृहत् अजीवं जीवरहितम् । जडमिति यावत् । तत्सर्वं एवं भूत्या पृथिव्यादिवत्परमाधीनया द्रव्यस्वभावाशयकालकर्मनाम्न्याऽजया द्रव्याद्यभिमानित्वेन द्रव्यादिनाम्न्या चित्प्रकृत्या द्रव्याद्यात्मकत्वेन द्रव्यादिनाम्न्या जडप्रकृत्या कृतम् । अतः प्रकृतिं द्वितीयकारणमवैहीत्यर्थः । भगवानेव प्रकृत्यादिकं सर्वं करोति । प्रकृतिस्तु भगवत्प्रेरिता भगवद्व्यतिरिक्तं सर्वं करोति । अतो मूलकारणत्वं विष्णोरेव । तदधीनं

द्वितीयकारणं प्रकृतिरिति भावः। एतेन प्रकृतेः सर्वकारणत्वात्। भगवतो मूलकारणत्वमनुपपन्नमिति दूषणं परास्तम्। प्रकृतेर्भगवद्व्यतिरिक्तसर्वकारणत्वाङ्गीकारात्। एतेनैव सजीवनिर्जीवव्यतिरिक्त-प्रपञ्चाभावात् जीवमजीवमित्यनेनैव सर्वस्यापि लाभात्। कृशमित्यादिकं व्यर्थमिति दूषणं परास्तम्। सजीवानिर्जीवप्रपञ्चस्य कृशमित्यादिकं विशेषणमित्यङ्गीकारात्॥ १०॥ ५-१२॥

॥ हरिः ॐ॥ अयं संसारी क्वचित्कदाचिदल्पद्रव्यं मिथः परस्परम्। मनुष्यद्वारेति यावत्। विपणन् क्रयेण व्यवहरन् वित्तशाठ्याद्वित्तलोभात् विशेषेण साक्षात्। मनुष्यद्वारं विनेति यावत्। क्रेयं क्रययोग्यं चान्यच्च स्वल्पद्रव्याद्यन्यद्यथेष्टं द्रव्यं च ऋच्छति क्रियार्थं प्राप्नोति। ऋच्छतीत्यतः परं यथेष्टद्रव्यं क्रयेण व्यवहरतीति शेषः। न केवलं व्यवहारार्थं यथेष्टद्रव्यं हस्ते गृह्णाति। यथेष्टद्रव्यं व्यवहरत्युताव्यवहरति चेत्यर्थः। मनुष्यद्वाराऽल्पद्वारेण व्यवहारे कृते बहुद्रव्यलाभो न भवतीति विचार्य द्रव्यलाभेन मनुष्यद्वारं विना स्वयमेव हस्ते द्रव्यं गृहीत्वा बहुद्रव्येण व्यवहारं करोतीति भावः। एतेन बहुद्रव्येण व्यवहारं करोतीति वक्तव्ये विक्रेयमृच्छतीति क्रयद्रव्यप्राप्तिमात्रकथनमनुपपन्नमिति दूषणं परास्तम्॥ ११॥

सर्वा ह्येषा आत्मत आशास्ते न काश्चन परत इत्यस्य। आत्मत इति तसिल् चतुर्थ्यर्थे। आत्मत आत्मार्थं भगवत्पूजार्थमेव। सर्वा आशिषा धनादिसर्वाशिष आशास्ते इच्छति काश्चनाशिषः। परत इत्यपि तसिल् चतुर्थ्यर्थे। परार्थं शत्रुभूतस्त्रीपुत्राद्यर्थं नाशास्ते नेच्छतीत्यर्थः। एतेन धनादिकामनायाः स्वतः सिद्धत्वात् अकर्तव्यत्वाच्च धनादिकामनाया भागवतभरतचरित्रश्रवणफलमिति कथनस्या-योगादिति दूषणं परास्तम्॥ ३०॥ ५-१३॥

॥ हरिः ॐ॥ यस्यामु यस्यामेव स्थितस्य जीवस्य इन्द्रियनामानः षट् कर्मणा व्यापारेण दस्यव इव भवन्तीत्येतत् हवै प्रसिद्धम्। तत्तस्यां संसाराटव्यां गत इति पूर्वेण संबन्धः। इन्द्रियनामानः कर्मणा दस्यव इवेत्युक्तं विवृणोति॥ यथेति। यथा दस्यवः प्रसिद्धाश्चोरा वणिग्भ्यो धनं विलुंपन्ति। तथा कुनाथस्य कुत्सितानां स्त्रीपुत्रादीनां नाथस्य पालकस्य स्त्रीपुत्राद्यासक्तस्येति यावत्। अत एवाजितात्मनोऽजितपरमात्मनः। परमात्मप्रसादरहितस्येति यावत्। पुरुषस्य यद्धनं बहुकृच्छ्राधिगतं यच्च किञ्चित्किञ्चिदपि अल्पमपि साक्षाद्धर्मौपयिकं निवृत्तधर्मोपयुक्तं संपादितधनमध्येऽल्पमपि निवृत्तधर्मानुपयुक्तं न भवति। सर्वं निवृत्तधर्मोपयुक्तमिति यावत्। यच्च धनं परमपुरुषसाधनलक्षणं परमपुरुषश्रीनारायणपूजानिमित्तमत एव सांपरायिकमोक्षसाधनं यच्च धनं धर्म्यं धर्मादनपेतम्। धर्मसंपादितमिति यावत्। तद्धनं इन्द्रियनामानः षट् दस्यवो गृह इति। सप्तमी षष्ठ्यर्थे। गृहे गृहिण्या दर्शनस्पर्शनश्रवणास्वादनघ्राणसंकल्पसमवायेन दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पानां समवायः समूहो यस्मिंस्तेन ग्राम्योपभोगेन लुंपन्ति। मोक्षादिमहापुरुषार्थोपयुक्तमपि धनमिन्द्रियचापल्येन स्त्रीभोगयुक्तं सत्। वृथा भवतीति यावत्। इति ज्ञानिन उदाहरन्ति वदन्ति। एतेन षडिन्द्रियनामानः

कर्मणा दस्यव इवेत्यनेन यथा पुरुषस्य धनमित्येतत् पुनरुक्तमिति दूषणं परास्तम् । यथा पुरुषस्य धनमित्यस्य षडिन्द्रियनामान इत्येतद्विवरणरूपत्वमित्यङ्गीकारात् । एतेनैव किञ्चिद्धनं विलुंपन्तीत्ययुक्तम् । बहुधनलोपाभावप्रसङ्गादिति दूषणं परास्तम् । किञ्चिदित्यतः परमपि शब्दमध्याहृत्य साक्षाद्धर्मौपयिकमित्यनेनान्वय इत्यङ्गीकारात् । एतेनैव धर्ममित्येतद्धर्मौपयिकमित्यनेन पुनरुक्तमिति दूषणं निरस्तम् । धर्मौपयिकमित्यनेन धर्मसाधनत्वमुच्यते । धर्म्यमित्यनेन तु साध्यत्वमुच्यत इत्यङ्गीकारात् ॥ ३ ॥ ५-१४ ॥

॥ हरिः ॐ ॥ भगवत्कलामृत इत्यस्य भगवत्कलाविशिष्टप्रियव्रताख्यनृपामृत इत्यर्थः । एतेन नृपं गयमिति यस्य नृपमिति विशेषणात् । गयं नृपं कः प्रतियातीत्यस्य नृपं गयं प्रति को नृपः प्रतियातीत्यर्थो वक्तव्यः । तथा च नृपाणामेव गयकर्म प्रतिगमनकर्तृत्वनिषेधात् । रामकृष्णादिरूपभगवत्कलाया गयकर्म प्रति गमनकर्तृत्वनिषेधस्य प्रसक्तेरेवाभावात् । भगवत्कलामृत इत्येतदनुपपन्नमिति दूषणं परास्तम् । अत एव तात्पर्यम् ॥ ७ ॥ ५-१५ ॥

॥ हरिः ॐ ॥ अकर्मकेण कर्मणा चाराधयन्तीत्यस्य अकर्मकेण न विद्यते कर्म कर्मलेपो यस्यासावकर्मा नारायणस्तेन तत्प्रास्या कं सुखं येन तदकर्मकं तेन कर्मणा च । चशब्दोऽवधारणे । निवृत्तकर्मणा वाऽऽराधयन्तीत्यर्थः । एतेनाकर्मकेण कर्मणेत्येतद्विरुद्धमिति दूषणं परास्तम् ॥ ३२ ॥ ५-२० ॥

॥ हरिः ॐ ॥ नियुक्तः सवितुः सवित्रा सूर्येण सौत्यकर्मणि सौत्यकर्मार्थम् । सौत्यकर्मकरणार्थमिति यावत् । नियुक्तः सवितुः सूर्यस्य पुरस्तात्पुरोभागे उपविष्टोऽपि पश्चादपि सूर्येण नियुक्तः । सौत्यकर्मण्यास्ते सौत्यं कर्म करोतीत्येतत्किल प्रमाणप्रसिद्धमिति । अनेनारुणस्य विशेषतः सूर्यानुवृत्तिरुक्ता भवति । एतेनारुणः सूर्येण नियुक्तः सौत्ये कर्मण्यास्त इत्येतावन्मात्रे उक्तेऽर्थादरुणः सूर्यस्य पुरस्तादश्वानां पश्चादुपविष्ट इत्यर्थलाभात् । पुरस्तात्पश्चादित्येतद्व्यर्थमिति दूषणं परास्तम् ॥ १६ ॥ ५-२१ ॥

॥ हरिः ॐ ॥ यत्र स्थाने महाभागवतो महाभगवद्भक्त औत्तानपादिरुत्तानपादस्य पुत्रो ध्रुवः समकालयुग्भिः समकालयुजा स्वसमकालं भगवद्योगसंपन्नेनाग्निना समकालयुजा इन्द्रेण समकालयुजा प्रजापतिना समकालयुजा कश्यपेन समकालयुजा धर्मेण च सबहुमानं बहुमानेन सहितं यथा भवति तथा दक्षिणतः स्वस्वदक्षिणभागे क्रियमाणः कल्पजीवानामाजीव्य उपजीव्यः सन् इदानीमपि हरिमुपास्त इति । एतेन समाकालयुग्भिरिति बहुवचनान्तस्याग्निनेत्याद्येकवचनान्तेनानन्वय इति दूषणं परास्तम् । समकालयुग्भिरिति बहुवचनमेकवचनार्थ इत्यङ्गीकृत्याग्निनेत्यादिना प्रत्येकमन्वय इत्यङ्गीकारात् ॥ १८ ॥

यथा कर्मसारथयोऽदृष्टसहकारिणो मेघौघा मेघसमुदायाः श्येनादयः पक्षिणश्च वायुवशा वायोरधीनाः सन्तः । वायुसामर्थ्येनेति यावत् । एवं प्रकृतिपुरुषसंयोगानुगृहीतकर्मनिर्मितगतयः प्रकृतिर्महालक्ष्मीः पुरुषो नारायणस्ताभ्यां संयोगेन । लक्ष्मीनारायणसंन्निधानविशेषेणेति यावत् । अनुगृहीतं निमित्तत्वेन स्वीकृतं यत्कर्मनिर्मिता गतिर्येषां ते प्रकृतिपुरुषसंयोगानुगृहीतकर्मनिर्मितगतयो ज्योतिर्गणा भुवि न पतन्तीति ॥ अयं भावः ॥ आकाशे गच्छतां मेघौघानां श्येनादिपक्षिणां ज्योतिर्गणानां च भुवि पतनाभावे नारायणसंन्निधानं मुख्यकारणम् । तदनन्तरं लक्ष्मीसन्निधानं मुख्यकारणम् । तदनन्तरं वायुः कारणम् । तदनन्तरं प्रकृतिपुरुषसंनिधानविशेषानुगृहीतं कर्म कारणमिति । एतेन प्रकृतिपुरुषशब्दवाच्यलक्ष्मीनारायणयोः सन्निधानस्य भुवि पतनाभावं प्रति प्रकृतिकारणत्वात् । लक्ष्मीनारायणयोः परस्परसंयोगस्य पतनाभावं प्रति प्रकृतिकारणत्वाभिधान-मयुक्तमिति दूषणं परास्तम् । प्रकृतिपुरुषसंयोगशब्देन प्रकृतिपुरुषयोः संनिधानविशेषस्यैव विवक्षितत्वेन प्रकृतिपुरुषयोः परस्परसंयोगस्याविवक्षितत्वात् ॥ २१-२२ ॥

केचन ज्ञानिनां मध्ये केचन व्याख्यातारः शिष्यान्प्रति योगधारणायां योगधारणार्थं भगवत्प्राप्त्योपा-यध्यानार्थं एतज्ज्योतिरनीकं एतज्ज्योतिःसमूहः शिंशुमारस्थानस्य वृश्चिकाकारस्य भगवतो वासुदेवस्या-वयवाश्रिततया तिष्ठतीति अनु सम्यग्वर्णयन्तीति । एतेनैतज्ज्योतिरनीकमित्यादिपदानामनन्वय इति दूषणं परास्तम् । वासुदेवस्येत्यतः परमवयवाश्रिततया तिष्ठतीति शेषमङ्गीकृत्य योगधारणायामिति सप्तमी तादर्थ्य इति चाङ्गीकृत्यैतज्ज्योतिरनीकमित्यादिपदानामन्वय इत्यङ्गीकारात् ॥ २३ ॥ ५-२२ ॥

॥ हरिः ॐ ॥ अयुतमहागजबलात्मन इत्यस्यायुतसंख्याकमहागजसमानबलधृतिसंपन्ना इत्यर्थः । एतेनायुतमहागजबला इत्युक्ते स्वरूपबलस्य भोगजन्यत्वायोगेन शारीरबलस्यैव प्राप्तेः । शरीर-वाच्यात्मशब्दो व्यर्थ इति दूषणं परास्तम् । आत्मनो देहे धृतौ जीवे स्वभावे परमात्मनीत्यभि-धानादात्मशब्देन धृतेर्ग्रहणात् ॥ १८ ॥

ततो वितलादधस्तात्सुतले उरुश्रवा उरोः सर्वोत्कृष्टहरेः श्रवः श्रवणं यस्यासौ तथोक्तः पुण्यैः पुण्यपुरुषैः श्लोक्यते कीर्त्यत इति पुण्यश्लोको विरोचनात्मजो बलिर्महेन्द्रस्यादितेश्च प्रियं चिकीर्षमाणेन भगवता लब्धकायो लब्धोऽभिवृद्धिं लब्धः कायो यस्य स लब्धकायो भूत्वा । त्रिविक्रमो भूत्वेति यावत् । स्थितेन बटुवामनरूपेण पराक्षिप्तलोकत्रयोऽपहृतलोकत्रयोऽपि भगवदनुकंपयैव पुनः सुतललोकं प्रवेशित इन्द्रादिष्वविद्यमानया-सुसंवृद्धया श्रियाऽभिजुष्टस्तं भगवन्तमेव स्वधर्मेणाराधयन् अपगतसाध्वसोऽपगतभयः सन्नास्त इति । एतेन लब्धकायो भूत्वेत्यनुपपन्नम् । ईश्वरवदीश्वरकायस्य नित्यत्वादिति दूषणं परास्तम् । लब्धकाय इत्यस्योत्पन्नदेह इत्यर्थ इत्यङ्गीकारात् । एतेनैव लब्धकायो भूत्वेतदनन्वितमिति दूषणं परास्तम् । स्थितेनेति शेषमङ्गीकृत्य तेनान्वय इत्यङ्गीकारात् । एतेनैव

त्रिविक्रमरूपेण लोकत्रयापहारस्य कृतत्वात् ॥ वटुवामनरूपेण पराक्षिप्तलोकत्रय इत्यनुपपन्नमिति दूषणं परास्तम् । लब्धकायो भूत्वेत्यस्य त्रिविक्रमो भूत्वेत्यर्थपरत्वमित्यङ्गीकारात् ॥ २० ॥

उपगमिष्यतीत्येतत् यो भगवदनुग्रहं संपादयिष्यति स एव महानुभावस्य प्रल्हादस्यानुपथमनुवृत्तिं भविष्यतीत्यत आहेत्यवतार्य प्रल्हादं विना अमृदितकषायः को वाऽस्मद्विधो भगवदनुग्रहमुपगमिष्यति सम्यक् प्राप्स्यति न कोऽपीति व्याख्येयम् । एतेन महानुभावस्य प्रल्हादस्यानुपथमनुवर्तितुममृदितकषायः परिहीनभगवदनुग्रहोऽस्मद्विधो को वाऽलं समर्थः । न कोऽपीत्यनेनैव पूर्णत्वात् उपगमिष्यतीत्येतद्व्यर्थमिति दूषणं परास्तम् । महानुभावस्यानुपथमनुवर्तितुमलमृदितकषायः को वाऽस्मद्विधः परिहीनभगवदनुग्रह इत्येतदुपपादनार्थमुपगमिष्यतीत्युक्तमित्यङ्गीकारात् । एतेनैवोपगमिष्यतीत्येतदनन्वितमिति दूषणं परास्तम् । प्रल्हादं विना भगवदनुग्रहमिति शेषमङ्गीकृत्यामृदितकषायः को वाऽस्मद्विध इत्यस्यावृत्तिं चाङ्गीकृत्यान्वय इत्यङ्गीकारात् ॥ २६ ॥ ५-२३ ॥

हरिः ॐ ॥ यत्तद्भगवतो नारायणस्येति पूर्वगद्ये भगवतोऽणुरूपस्य ज्ञानार्थं स्थूलरूपश्रवणादिकं कार्यमित्युक्तम् । अत्र विव्रीयते । भगवतः स्थूलरूपं श्रुत्वेत्युपलक्षणम् । श्रुत्वा पठित्वा श्रावयित्वैव भगवतः सूक्ष्मरूपं याति जानाति । न तु भगवतः स्थूलरूपस्य श्रवणादिकं विना सूक्ष्मरूपं जानाति । कुत इत्यत आह ॥ स्थूल इति । यतो लोकः स्थूले स्थूलपदार्थविषये निर्जितं जयविशिष्टम् । स्थूलपदार्थज्ञानानन्तरमिति यावत् । आत्मानमन्तःकरणम् । सूक्ष्मधियेति तृतीया तादर्थ्ये । सूक्ष्मधिया सूक्ष्मपदार्थविषयकज्ञानार्थं शनैर्नयेत् नयति प्रवर्तयतीति क्रमो लोकसिद्धः । ततः स्थूलरूपसिद्धत्वैव सूक्ष्मरूपं जानातीति । एतेन सूक्ष्मरूपज्ञानार्थं स्थूलरूपश्रवणादिकं कार्यमित्यस्य यद्भगवतो रूपं नारायणस्येति पूर्वगद्येनोक्तत्वात् श्रुत्वेति गद्यं पुनरुक्तमिति दूषणं परास्तम् । श्रुत्वेत्यस्य यद्भगवतो नारायणस्येत्येतद्विवरणरूपत्वमित्यङ्गीकारात् । एतेनैव स्थूले निर्जितमात्मानमित्येतदसङ्गतमिति दूषणं परास्तम् । स्थूले निर्जितमात्मानमित्यतः पूर्वं यतो लोक इति पदद्वयस्य शेषमङ्गीकृत्य क्रम इत्यनन्तरं लोकसिद्धस्तत इति पदद्वयस्य च शेषमङ्गीकृत्य श्रुत्वा स्थूलमित्यनेनान्वयं चाङ्गीकृत्य स्थूले निर्जितमात्मानमित्येतत् लोकदृष्टान्तेन श्रुत्वा स्थूलसूक्ष्मरूपं भगवतो यातीत्येतदुपपादनार्थं प्रवृत्तमित्यङ्गीकारात् ॥ ४३ ॥ ५-२४ ॥

इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनव चन्द्रिकाऽभिनवताण्डवाभिनवामृतादिबहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीपादानां शिष्येण सत्याभिनवयतिना ''त्वया भागवतटिप्पणं कारयिष्यामीति'' तदीयामोघसंकल्पमात्रमवलम्ब कृतायां श्रीमद्भागवतटिप्पण्यां दुर्घटभावदीपिकायां पञ्चमः स्कन्धः समाप्तः ॥ ५ ॥

श्री पांघरी श्रीनिवासाचार्यविरचितः

विरोधोद्धारः

पञ्चमस्कन्धः

।। हरिः ॐ ।। श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ।।

तत्र भगवत इति ।। तत्र मेरुमूर्धोपरि पूर्वपद्ये मेरोर्मूर्धनीत्युक्त्या तच्छब्देन तस्यैव परामर्शौचित्यात् । उपरीति तु दिवो मूर्धनीत्यभिधास्यमानत्वात् । ननु वामनस्यैकादशादित्यसाम्यं स्यादित्यत उक्तं ।। भगवत इति । षड्गुणैश्वर्यस्येत्यर्थः । ''ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीर्यत'' इत्युक्तेः । अनेन मूलरूपाभेदः सूचितः । तथाऽप्यंशावतारत्वं स्यादित्यतः साक्षादित्युक्तम् । पूर्णस्येत्यर्थः । पूर्णमदः पूर्णमिदमित्युक्तेः ।। यद्वा ।। अवताररूपस्येत्यर्थः ।। तस्यैव प्रत्यक्षदृश्यत्वात् । न हि मूलरूपं प्रत्यक्षग्राह्यम् । नाक्षजेनेत्याद्युक्तेः । नन्वस्त्विदं सर्वम् । तथाऽपि नायं विष्णुः । त्रिपादत्वस्य च विष्णावप्रसिद्धेः । अयं तु भूम्या दानकाले त्रिपादो दृष्ट इत्याशङ्क्य तत्परिहारायाह ।। यज्ञलिङ्गस्येति । भगवतस्त्रिपादत्वं त्वर्थापत्तिसिद्धम् । कार्यं हि कारणानुमेयम् । यथा विनायकोऽथ विश्वस्य ध्यानाद्गजवक्रतामित्यादिनोक्तेर्गजाकारविश्वमध्यमुखाभिध्यातुर्विनायकस्य गजमुखत्वापत्तिः । त्र्यक्षनृसिंहध्यानाद्रुद्रस्य त्रिलोचनत्वप्राप्तिः । एवं ध्यातुर्वन्हेरपि त्रिपादत्वप्राप्तिर्ध्येया । भगवति त्रिपादत्वं नो चेत्कथं स्यात् । अतस्तदन्यथाऽनुपपत्त्या त्रिपादत्वं भगवतः सिद्ध्यति । अत एव यज्ञलिङ्गस्येत्युक्तम् । यज्ञस्याग्नेर्लिङ्गं त्रिपादत्वरूपं चिन्हं यस्मात्तस्येति । अन्यथैतद्विशेषणकथनस्यानुपयोगः । न हि वाराहिभार्गववद्वामनस्य यज्ञाकारत्वम् । त्रिविक्रमरूपध्यानादेवाग्नेस्त्रिपादत्वप्राप्तिर्हि । अतस्त्रिपादकत्वकथनायैव यज्ञलिङ्गस्येत्युक्तम् । यज्ञलिङ्गत्वादयमग्निरेव स्यादित्यतो विष्णोरित्युक्तम् । तथाऽप्यूर्ध्वाण्डकटाहभेदस्तु दुर्घटः । पादस्य भूनिक्षेप्यत्वादित्यत आह ।। विक्रमत इति । विशेषेण त्रिलोकव्यापनरूपविशेषेण क्रमतः पादनिक्षेपं कुर्वत इत्यर्थः । ऊर्ध्वलोकं क्रमतः पादस्यांगुष्टनखनिर्भिन्नत्वमूर्ध्वांडकटाहस्य युज्यत इति भावः । अथाऽपि (प्रासङ्गिकारंभः) वामनेन स्वपदा यदा भूरुन्मानिता तदाभूमिस्थवस्तूनां तद्धारेण कथं न विनाश इति चेत् । भूम्यपेक्षयाऽत्युच्चयोर्दक्षिणोत्तरयोर्लोकालोकाचलयोः पार्ष्णिप्रपदयोः स्थापनेन मध्येऽन्तरिक्षस्य सत्त्वाद्धारासंभवेन न भूगतवस्तुविनाशः । ननु यत्पूर्वमुक्तं तद्रीत्या स्वर्लोकस्यापि तिर्यङ्माने कृते दक्षिणाद्यन्यतमदिक्स्थाण्डकटाहस्यांगुष्ठनखेन भेदसिद्ध्योर्ध्वाण्डकटाहभेदानुपपत्तिरिति चेन्न । अभिप्रायसद्भावात् । तथा हि । यद्यपि केनचित्पुरुषेण कतिचिद्धस्तमितभूमौ मूल्यादिना गृहीतायां सत्यां

तत्सामन्तिकप्रदेशे तत्स्वामित्वाभावेऽपि यावदिच्छमूर्ध्वं स्वामित्वकरणेन प्रतिबन्धः । तथाऽपि काभ्यांचिद्भ्रातृभ्यां द्वितलगृहीतस्योर्ध्वाधरभागे प्रातिस्विकत्वेन स्वीकृतौ चेद्यावदिच्छमूर्ध्वं स्वामित्वस्य प्रतिबन्धोऽपि भवतीति न्यायेन तन्निवृत्तये ऊर्ध्वमानस्याप्यावश्यकत्वात्तिर्यक्पादनिक्षेपमानेन सर्वां पृथिवीं स्वीकृत्य ब्रह्माण्डखर्परपर्यन्तमूर्ध्वप्रदेशमपि द्वितीयेन पादोन्मायादातुकामः ऊर्ध्वाङ्गुलिकपादं विदध इति नोर्ध्वाण्डकटाहभेदानुपपत्तिः । न चोन्मानरूपपदस्य पार्श्वभागावव्याप्ताविति शङ्क्यम् । चतुर्विंशत्यंगुलकुण्डमित्युक्तेः पूर्वपश्चिमदक्षिणोत्तरभागसाम्यस्यैव दर्शनात् । तस्मात्क्षेत्रफलं नवपदं सिद्धम् । अतश्चतुर्दशभुवनेषु मध्ये स्थूलमानेन नवभुवनानि नवपदमानेन स्वीकृत्य दातृप्रतिज्ञापूर्विमनुग्रहतो वांछन् दशमे भुवने सुतलाख्ये तं न्यवेशयत् । अनेन यत्तेनोक्तं "पदं तृतीयं कुरु शीर्ष्णि मे निजमि"ति तदपि प्रार्थितं सफलीकृतं भवति । सुतलस्थबलेः शिरस्येव नवभुवनानां सत्त्वेन सप्तलोकानां पदद्वयेनाक्रान्तत्वेऽपि अतलवितलयोस्तृतीयपदेन स्वीकृतत्वात् । अत एव तस्य पदस्यैतज्ज्ञनादृष्टत्वम् । किञ्चाधिकाधिकपुण्यवद्भिरुत्तरोत्तरलोका आश्रीयन्ते । तथा दुष्कृतिभिरधोलोकाः । तथा चेदृशदानकर्तुः कथमधोलोकप्राप्तिर्युज्यत इत्यतः सर्वतलेष्वपि तत्स्वावासेन सुतलं कृत्वा भगवान्ददौ । तस्मै दत्तभूम्यां न स्थेयमिति बलिनाऽपि सुतलमाश्रितम् । अधोलोकगतिस्तु मम भूम्या अहं दातेत्यभिमानदातृत्वात् । अतो नेदृक् क्षुद्रशङ्कावकाशः । अतो भोगावत्या अपि तलप्राप्तिर्युज्यते । यतो येन पादेनोर्ध्वाण्डकटाहं निर्भिद्य ब्रह्माण्डद्वितीयावरणोदकमानीतं तस्मादेव सुतले बलिद्वारपालवत्स्थितस्य हरेरार्द्रपादात्प्रवाहसंभवात् । अस्त्वेतत्सर्वम् । तथाऽपि भगवतो नियमो येन यत्समर्पितं तत्तस्मै संवर्ध्य देयम् । तर्हि बलये राज्यं किं न दत्तवानिति चेत् । श्रूयताम् । सप्तमे मन्वन्तरे बलिना वामनायारंभसमय एव न भूर्दत्ता । किन्तु किञ्चिद्युगानन्तरमेव । तदैव राज्यदाने शेषमन्वन्तरपर्यन्तमेव तद्दानसिद्ध्या दत्तस्य वृद्धिर्न घटेत इति मत्वाऽष्टममन्वन्तरस्यारंभादेवेन्द्रत्वे दत्ते शेषमन्वन्तरेन्द्रत्वग्रहणापेक्षया वृद्धेरपि संभवात्तदैव न ददाविति । अथाष्टमस्कन्धे बलिशिरसि भगवत्पादनिक्षेपस्यानुक्तत्वेऽपि केवलतत्प्रार्थनयैव केचिद्बलिकृतमात्मदानं वर्णयन्ति । तत्पक्षेऽपि प्रत्यात्मदानं संवर्ध्य भगवता कुतो न दत्तमिति शङ्क्यम् । बल्यात्मनः सकाशाद्धर्यात्मनश्चिदानन्दत्वेनातिवृद्धिसंभवात्तादृशात्मनो द्वारपालत्वेन प्रत्यर्पितत्वादिति । भृगुवत्सक्षेत्रसंज्ञकं यज्ञस्थलं विहाय मेरुत ऊर्ध्वताया उन्मानं किं कृतमित्यपि न शङ्क्यम् । सर्वतो वर्तुलाकारस्य ब्रह्माण्डस्योत्तराधरभागमध्ये भूमेरेव सत्वेन तस्या एव विस्तीर्णत्वात्तदन्ययोरुत्तराधरयोर्ह्रसितत्वाच्च तत एवोर्ध्वतोन्माने च कृते तत्साम्येनान्यप्रदेशानामपूर्तिमप्यङ्गीकृत्येदं शेषमिति बलिना निर्वक्तुमशक्यत्वस्यापेक्षितत्वात् । नन्वण्डमध्यस्थभूप्रदेशस्यैवातिविस्तीर्णत्वात्तत एव तिर्यङ्मानं कृतमित्युक्तम् । तत्र भूदेशस्यैव कियन्मानमिति चेत् । उच्यते ॥ पञ्चाशत्कोटिविस्तार इति । तथाहि । अत्रांकन्यासादेव परिमाणं

बोद्धव्यम् । मेरुमध्यतो मेरोरर्धमष्टसहस्रयोजनानि (८,०००) । ततः क्षाराब्धिपर्यन्तं द्विचत्वारिंशत्सहस्रयोजनानि (४२,०००) । एवं जंबुद्वीपार्धं पञ्चाशत्सहस्रयोजनानि (५०,०००) । ततः क्षाराब्धिर्लक्षयोजनः (१,००,०००) । ततः प्लक्षद्वीपं द्विलक्षयोजनं (२,००,०००) । तत इक्षुरसोदः द्विलक्षयोजनः (२,००,०००) । ततः शाल्मलीद्वीपं चतुर्लक्षयोजनं (४,००,०००) । ततः सुरोदश्चतुर्लक्षयोजनः (४,००,०००) ततः कुशद्वीपं अष्टलक्षयोजनं (८,००,०००) । ततो घृतोदोऽष्टलक्षयोजनः (८,००,०००) । ततः क्रौञ्चद्वीपं षोडशलक्षयोजनं (१६,००,०००) । ततः क्षीरोदः षोडशलक्षयोजनः (१६,००,०००) । ततः शाकद्वीपं द्वात्रिंशल्लक्षयोजनं (३२,००,०००) । ततो दधिमण्डोदो द्वात्रिंशल्लक्षयोजनः (३२,००,०००) । ततः पुष्करद्वीपान्तरर्धं पञ्चनवतिसहस्रोत्तरैकत्रिंशल्लक्षयोजनं (३१,९५,०००) । ततो मानसोत्तरगिरेरन्तरर्धं पञ्चसहस्रयोजनं (५,०००) । बाह्यार्धं पञ्चसहस्रयोजनं (५,०००) । एवं मानसोत्तरगिरिर्दशसहस्रयोजनः (१०,०००) । ततः पुष्करद्वीपबाह्यार्धं पञ्चनवतिसहस्राधिकैकत्रिंशल्लक्षयोजनं (३१,९५,०००) । एवं सर्वं पुष्करद्वीपं चतुःषष्ठिलक्षयोजनं (६४,००,०००) । ततः शुद्धोदश्चतुःषष्ठिलक्षयोजनः (६४,००,०००) । एवं मिलित्वा मेरुमध्याच्छुद्धोदपरतीरपर्यन्तं सार्धत्रिपञ्चाशल्लक्षोत्तरद्विकोटियोजनानि (२,५३,५०,०००) । कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।

पञ्चाशत्सहस्राणि सप्तद्वीपाः ससागराः । इति शैवतन्त्रोक्तेः । ततः प्राणिसञ्चारयोग्या भूमिः सार्धसप्तपञ्चाशल्लक्षाधिकैककोटियोजना (१,५७,५०,०००) । यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिरित्युक्तेः । ततो देवक्रीडनार्था काञ्चनी भूमिश्चतुर्दशलक्षोत्तरद्विकोटियोजना (२,१४,००,०००) । एवं संनिपत्य मेरुमध्यमारभ्य लोकालोकाचलपर्यन्तं सपादषट्कोटियोजानानि (६,२५,००,०००) । न चात्र ''ततो हेममयी भूमिर्दशकोट्यो वरानने । देवानां क्रीडनार्थाय लोकालोकस्ततः परमि''ति वाक्यविरोधः । एतद्वाक्यात्पूर्वत्र कोटिद्वयं त्रिपञ्चाशदित्यादिवाक्यसद्भावात्सार्धत्रिपञ्चाशल्लक्षाधिकद्वादशकोटिरूपमानसिद्धो सत्यां कुण्डार्कादौ किंचिदाधिक्यस्य दोषाभावोक्त्या प्रकृते कोटिसंख्यायां सार्धत्रिलक्षस्य किञ्चित्वेन दोषाभावादाधिक्यस्यागणनीयत्वेनास्य वाक्यस्य लोकालोकाचलमारभ्य लोकालोकपर्यन्तं सार्धद्वादशकोटिकथनपरत्वेन मेरोरेकतः सपादषट्कोटियोजनानामेवोपपत्तेः । ततो लोकालोकाचलविस्तारः सपादषट्कोटियोजनः (६,२५,००,०००) । न च स तु पञ्चाशत्कोटिगणितस्य भूगोलकस्य तुरीयभागोऽयं लोकालोकाचल इत्यनेन विरोधः । अस्य पूर्वोत्तरलोकालोकाचलविस्तृतिगणनाविषयत्वात् । नापि यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनास्त्रिलोकानां वितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायाम इत्यनेन विरोधः । तत्र भूमण्डलात्ध्रुवमण्डलपर्यन्तमेकोनत्रिंशल्लक्षयोजनमुन्नहनमुत्सेधस्तस्यायामोविस्तारः

अग्रविस्तार एव न मूलविस्तार इत्यर्थः। एतदर्थपरत्वात्। तस्माल्लोकालोकस्य मूले उक्त एव विस्तारः। ततस्ततो भूमिः सपादषट्कोटियोजना (६,२५,००,०००)। योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातमित्युक्तेः। ततो योगेश्वरगतिभूमिः सपादषट्कोटियोजना (६,२५,००,०००)। एवं मेरुमध्यसकाशात्तिर्यङ्मानेन ब्रह्माण्डखर्परं पञ्चविंशतिकोटियोजनं (२५०,०००,०००)। एवमेव मेरुमध्योत्तरतोऽपि पञ्चविंशतिकोटियोजनानि (२५,००,००,०००)। अत एव खर्परात्प्रति-खर्परपर्यन्तं पञ्चाशत्कोटियोजनानि (५०,००,००,०००)। एवं पञ्चाशत्कोटियोजनविस्तारः सिद्धः। न चाण्डमध्यस्थसूर्याधस्ताल्लक्षयोजनस्थपृथिवीमध्यभागायोगेन पञ्चाशत्कोटिविस्तीर्णता सिद्धिरिति वाच्यम्। पञ्चाशत्कोटिषु लक्षस्य किञ्चित्त्वेन दोषावहत्वाभावस्योक्तत्वात् न्यूनताया अकिञ्चित्करत्वात्। अतो न शङ्कावकाशः। इत्यलं प्रासंगिकेन॥ सामान्यतो विक्रमत इत्युक्तम्। तथाऽपि केन पादेनेति न स्पष्टीकृतमत आह॥ वामेति। दक्षिणेतरेत्यर्थः। इदं तु वाराहे कल्पे नान्येषु। ''वाराहे वामपादं तु तदन्येषु च दक्षिणम्। पादं कल्पेषु भगवानुज्जहार त्रिविक्रम'' इति भागवतपंचमतात्पर्योक्तेः। अन्यकल्पपक्षे वामशब्दादौ अकारं प्रश्लिष्य दक्षिणरूपार्थो ग्राह्यः॥ ऊर्ध्वाण्डेति। ननु ब्रह्माण्डान्तरालापेक्षया पादमानस्याधिक्ये सिद्धे ऊर्ध्वाण्डकटाहस्फोटः स्यात्। तर्हि तेनैव पार्श्वकटाहस्फोटोऽपि भवेत्। स किं न जात इति चेन्न। पातालादिचतुस्तलानि विसृज्य वितलादेवोर्ध्वमाने पादस्य स्थापित्वादाधिक्यसंभवेनोर्ध्वकटाहस्फोटेऽपि ब्रह्माण्डान्तरालपरिमित-पादस्याङ्गीकृतत्वात्कटाहमारभ्य कटाहपर्यन्तमुन्माने आधिक्यासंभवात्॥ बाह्यजलधारेति। ब्रह्माण्डा-वरणेषु प्रथमपार्थिवावरणाद्बाह्यं यद्द्वितीयजलावरणं तज्जलधारेत्यर्थः।॥ तच्चरणेति। तच्छब्देन विष्णोर्ब्रह्माण्डकटाहभेदकस्य वा परामर्शः॥ अरुणेति। पङ्कजकिञ्जल्कस्य पीतत्वादरुणेति कथमिति चेत्। तच्चरण एव पङ्कजं तस्यावनेजनेन प्रक्षालनेनारुणाः ये किञ्जल्कस्थानीया नखास्तैरुपरञ्जिता तेषां प्रतिबिम्बितत्वेन रक्तीकृतेत्यर्थः। साक्षात्पङ्कजस्य पीतकिञ्जल्कत्वेऽपि पादोत्प्रेक्षितपङ्कजस्य रक्तनखरूपकिञ्जल्कत्वात्ज्ञेयम्॥ अखिलेति। अखिलं यज्जगत् तस्याद्यं पापं मलं मृदादिजन्यं चापहन्ति तादृशमुपस्पृशनं स्नानं यस्याः सा॥ अमलेति। शुद्धा श्वेतोदका वेत्यर्थः। साक्षादिति। प्रतीकानन्तःस्थस्य भगवतः संनिधानस्थानभूतेति। अनुपलक्षितैर्मुख्यार्थैर्वचोभिरभिधीयमाना प्रोच्यमाना या बाह्यजलधारेत्यत्र यो यच्छब्दस्तद्वशादत्र सेति वक्तव्यम्। सा बाह्यजलधारारूपा गङ्गेत्यर्थः॥ यद्वा॥ तच्चरणेत्यत्र तया धारया यच्चरणपङ्कजस्यावनेजनं क्षालनं तस्मिंस्तेन निमित्तेन वा। अरुणा रक्ता ये किञ्जल्कस्थानीया नस्वास्तेषामुपरंजितं प्रतिबिम्बितं यस्यां सेति यत्तच्छब्दयोर्योजना॥ युगसहस्रोपलक्षणेन। युगानि चतुर्युगात्मकानि महायुगानि तेषां सहस्रम्। चतुर्मुखदिनमित्यर्थः। चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यत इत्युक्तेः। तत् उपलक्षणं यस्य तेन। अनेन तावती रात्रिरपि

गृह्यते । तावत्येव निशा तात यन्निमीलति विश्वसृगित्युक्तेः । ईदृशेन ब्रह्माहोरात्रात्मकेनातिमहता कालेन दिवौ द्युलोकस्य मूर्धनि उपरिभागेऽवततार । अवतीर्णाभूत् । (अथ प्रासंगिकान्तरारंभः) । गङ्गाया ब्रह्मप्राग्दिनावतारादुत्तरदिने गङ्गावतरणस्याहोरात्रात्मकावकाशेन कालस्यातिमहत्त्वं ज्ञेयम् । ब्रह्मप्रतिकल्पं सकृद्दशावताराणां प्रवृत्त्या वामनावतारेणैव गङ्गावतरणस्य प्रवर्तनादिति भावः । ननु सकृद्वामनांघ्रिनखभिन्नस्याण्डखर्परस्य पुनर्मीलनाभावात्प्रतिकल्पं वामनावतारेण गङ्गायाः प्रवर्तनीयत्वं न सेत्स्यतीति चेन्न । प्रथमावरणस्य पार्थिवत्वेन खातपूर्वरेणेत्याद्युक्त्याऽवशिष्टत्रेताद्वापर-कलिपञ्चसहस्रवर्षात्मककालेन पूरणसंभवात् । अत एव कलौ पञ्चसहस्रवर्षपर्यन्तमेव गङ्गा-माहात्म्योक्तिः । पार्थिवजलेन प्रवाहदर्शनेऽपि ऊर्ध्वछिद्रपूरणेन हरिपादस्पृष्टबाह्योदकधारायाः खण्डितत्वात् । ननु च दशावताराः किं प्रतिमहायुगं भवन्त्युत प्रतिमन्वन्तरमथ सकृत्कल्पे । नाद्यद्वितीयौ । कल्पजीविनां हनुमदादीनां ब्रह्मकल्पादावनेकत्वोपलब्धिप्रसंगात् । न तृतीयः । वैवस्वतमन्वन्तरीयाष्टाविंशतिमहायुग एव तत्प्रवृत्तावेकोनसहस्रमहायुगेषु तदप्रवृत्तौ च कारणाभावात् । धर्मविवर्धनमूलयुगादे इति वाक्येन कल्किनः कृतयुगकारणत्वेन श्रीमदाचार्यैरभिधानात्सर्वकृत-युगानुपपत्तेश्च । अन्यथाऽकारणकार्योत्पत्तिप्रसङ्गात् । मैवम् । प्रतिकल्पे सकृदेवेत्यङ्गीकारात् । न चाष्टाविंशतिमयुग एव प्रवृत्तौ कारणाभावः । पञ्चधा विभक्तस्य दिनस्य तृतीयांशरूपमध्यान्हे ब्रह्मणो दशावताराणां पूजार्थमपेक्षितत्वात् । नापि मूलयुगाद इति वाक्यस्य सर्वकृतयुगानां चानुपपत्तिः । मूलयुगाद इत्यस्याष्टाविंशतिमहायुगान्त्ययुगैकपरत्वेन सर्वकृतयुगकारणत्वाभवात् । तेषां च मरुदेवापि-नृपादिप्रवर्तनीयत्वात् । तस्माद्ब्रह्मणः प्रतिदिनं मध्यान्ह एव स्नानार्थं गङ्गावतरणस्यौचित्यम् । अतो ब्रह्मप्रतिदिनं गङ्गावतरण एव महायुगसहस्रोपलक्षणः कालोऽपेक्षितः । ऊर्ध्वाण्डकटाहनिर्गतजलस्य ध्रुवलोकागमने युगसहस्रात्मककालोऽतिक्रान्त इत्यर्थाङ्गीकारेऽतिसाहसम् । न हि गुरुजलपतने एतावानवकाशोऽपेक्षितः । प्रत्यक्षबाधात् । तथा हि । अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् । सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिरित्युक्तेः । अण्डमध्यस्थसूर्यसकाशादुपरि चन्द्रमण्डलं लक्षयोजनं (१,००,०००) । ततो नक्षत्रमण्डलं त्रिलक्षयोजनं (३,००,०००) । तत शुक्रः द्विलक्षयोजनः (२,००,०००) । ततो बुधो द्विलक्षयोजनः (२,००,०००) । ततो भौमो द्विलक्षयोजनः (२,००,०००) । ततो गुरुर्द्विलक्षयोजनः (२,००,०००) । ततः शनिर्द्विलक्षयोजनः (२,००,०००) । ततः सप्तर्षय एकादशलक्षयोजनाः (११,००,०००) । ततो ध्रुवस्त्रयो-दशलक्षयोजनः (१३,००,०००) । एवं मिलित्वा सूर्योपरि ध्रुवपदं अष्टत्रिंशल्लक्षयोजनं (३८,००,०००) । तदेव विष्णुपदम् । यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र महाभागवतो ध्रुव इत्याद्युक्तेः । तत ऊध्वाण्डखर्परं द्विषष्टिलक्षाधिकचतुर्विंशतिकोटियोजनं (२४,६२,००,०००) ।

इत्यन्तरिक्षमार्गेणोर्ध्वाण्डखर्पराज्जलस्य ध्रुवलोकागमने किञ्चित्कालाधिकचतुर्मासोत्तरपञ्चदशाधिकद्विशतोत्तरद्विचत्वारिंशत्सहस्रवर्षात्मकः । (४,२२,१५४) कालोऽपेक्षितः । यतो दीर्घवर्णोच्चारणकालेन चतुर्हस्तमिताधःस्थले जलं पतति । दीर्घषड्वर्णोच्चारणे नैकश्वासोऽस्ति । तेन चतुर्विंशतिहस्तम् । एवं षट्श्वासैरेकं पलम् । तेन चतुश्चत्वारिंशदधिकैकशतहस्तम् । तत् षष्ठचैका धटी । तया चत्वारिंशदधिकषट्शतोत्तराष्टसहस्रहस्तं (८,६४०) । तत् षष्ठैकमहोरात्रम् । तेन चतुःशताधिकाष्टादशसहस्रोत्तरपञ्चलक्षहस्तं (५,१८,४००) । तत्त्रिंशतैकमासः । तेन द्विपञ्चाशत्सहस्राधिकपञ्चपञ्चाशल्लक्षोत्तरैककोटिहस्तं (१५,५५२,०००) । अनेन चतुश्चत्वारिंशदधिकनवशतोत्तरैकसहस्रक्रोशा भवन्ति (१,९४४) । तैर्योजनानि षडशीत्यधिकचतुःशतमितानि (४८६) । तस्मान्मासेन षडशीत्युत्तरचतुःशतयोजनं गच्छति । मासद्वादशकेन वर्षम् । तेनाष्टशतोपरिद्वात्रिंशदधिकपञ्चसहस्रयोजनं (५,८३२) पतति । तस्माद्विषष्ठिलक्षाधिकचतुर्विंशतिकोटियोजनमितेन ध्रुवाण्डकटाहयोर्मध्यगतान्तरिक्षेण ध्रुवलोके गङ्गापतने किञ्चित्कालाधिकचतुर्मासोत्तरपञ्चदशाधिकद्विशतोत्तरद्विचत्वारिंशत्सहस्रवर्षात्मकः कालोऽपेक्षितः ।। न युगसहस्रात्मक इति । ननु सूर्योपरिष्टात्पञ्चविंशतिकोटियोजनान्तरसिद्धावप्यधस्तात्तावन्न सिध्यति । सूर्योधो लक्षयोजनान्तरस्थितभूमेरधो लक्षयोजनान्ते शेषस्थित्युक्तेरिति चेन्न । शेषभोगस्य द्विलक्षोनपञ्चकोटिमितोर्ध्वतासद्भावात् । तदधस्ताच्च वायुरूपकूर्मस्य दशकोटियोजनोच्छ्रितत्वात् तस्याप्यधो विष्णुरूपकूर्मस्य तावदुच्छ्रितत्वात् । ततोऽधस्तादधरखर्परस्य स्थितत्वात् । बिभर्त्यण्डं हरिः । कूर्मस्त्वण्डे चाप्युदकं महत् । ''उदके कूर्मरूपस्य वायुः पुच्छं समाश्रितः । वायोः पुच्छं समाश्रित्य शेषस्तु पृथिवीमिमाम् । बिभर्ति तस्यां च जगदिदं सर्वं प्रतिष्ठितमि''ति बृहद्भाष्योदाहृतवैभवस्थवचनात् । एतन्मानस्याप्यन्यत्रोक्तेः । अतः सूर्याधः खर्परयोः पञ्चविंशतिकोट्यन्तरता सिध्यतीत्यलं प्रासङ्गिकान्तरेण ।। यत्तद्विष्णुपदमाहुरिति । यत् दिवोमूर्धस्थानं ध्रुवपदं तत् तदुपरि खर्परपर्यन्तं विष्णुपदम् आकाशम् । वियद्विष्णुपदं वाऽपीत्युक्तेः ।। यद्वा ।। विष्णुपदं विष्णवङ्घ्रिस्थानीयं आहुः । ज्ञानिन इति शेषः ।। अथवा ।। यत् ध्रुवपदं विष्णुपदं विष्णोर्लोकं ज्ञानिन आहुः । तत् । तस्मिन् दिवो मूर्धस्थानेऽवततारेत्यन्वयः ।। उत वा ।। यत् यत्र दिवोमूर्धनि विष्णुपदं तत् विस्तृतम् । तनु विस्तार इति धातोः । ततः क्विप् ज्ञानिन आहुरित्यर्थः ।। १ ।। इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ।। ५-१७ ।।

।। हरिः ॐ ।। तस्येदमिति । क्षितिमण्डलम् । क्षिति निवासगत्योरिति धातोरित्यतोऽधिकरणे क्तिचि । क्षितिशब्दवाच्यानां चतुर्दशभुवनानां मण्डलं गोलकमित्यर्थः । न केवलं पृथिव्या मण्डलम् । तथात्वेऽर्थानुपपत्तेः । तथा हि । पातालादिसप्ततलातिरिक्तभूमेः शेषशीर्षध्रियमाणत्वाङ्गीकारे शेषः किमतलस्थो वा पातालस्थो वा ब्रह्माण्डखर्पराधस्तो वा । नाद्यः । पातालस्थत्वोक्तिविरोधात् । न

द्वितीयः । रसातलाद्यतलान्तषट्तलानां मध्यच्छिद्रत्वप्रसङ्गात् । अन्यथा पृथिवीसंबन्धायोगात् । न हि तदङ्गीकारो युक्तः । क्वाप्यश्रवणात् । न तृतीयः । पातालस्थनागराजकुमारीणां यस्यैव हि नागराजकुमार्य इत्यादिनोक्तस्याधस्थशेषवदनालोकस्यानुपपत्तेः । न हि ब्रह्माण्डखर्परस्य गवाक्षाणि । तासां वा बहिःस्थितिः । येन तदुपपन्नं स्यात् । तस्माच्चतुर्दशभुवनमण्डलमेव शेषशीर्षस्थं युक्तम् । न चैतद्युक्तम् । अमुक्तशेषस्य ब्रह्माण्डबहिःसञ्चरणासंभवेन चतुर्दशभुवनधारणायोगात् । न च पातालस्थ एव बिभर्तीति युक्तम् । यत्र स्वयं स्थितः तस्य शीर्ष्णि धारणानुपपत्त्या त्रयोदशानामेव धारणप्रसङ्गात् । मैवम् । द्वितलात्मकस्य पादतलस्याधस्तले स्थित्वोर्ध्वतलस्य शिरसा धृतत्वाङ्गीकारेण चतुर्दशस्य धारणोपपत्तेः । ततोऽधस्तात्पाताले नागलोकपतय इत्यारभ्य तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तरे आस्ते । या वै कला भगवतस्तामसी समाख्यातानन्त इति सात्वतैरित्युक्तेः । न च नागकन्याव-लोकनानुपपत्तिः । उभयोस्तलयोरेकतलत्वेन तत्रस्थानामुभयत्रापि प्रवेशोपपत्तेः । तथाऽपि सिद्धार्थ इवेति दृष्टान्तो न युज्यते । शेषशीर्ष्णोऽतिमहत्वानुपपत्तिरिति चेत् । सर्षपदृष्टान्तो नाणुत्वविषये किन्तु लघुत्वविषय इत्यङ्गीकारात् । तथा च शेषेणोक्तदलक्षितिमण्डलस्य सर्षपगुरुत्वसदृशत्वेन माननात् । तत्र दृष्टान्तोपपत्तिः । एवं चेदूर्ध्वतलापेक्षया शेषशीर्ष्णोऽल्पत्वे सर्वफणास्वपि क्षितिमण्डलस्य स्थितिप्रसङ्गेनैकस्मिन् शीर्ष्णीत्युक्त्यानुपपत्तेरिति चेन्न । सर्वफणास्वपि मध्यमफणया एवौन्नत्येन तदुपपत्तिसंभवात् । न च सहस्रफणत्वेन समफणत्वादेकस्य मध्यमस्यैवासंभव इति वाच्यम् । द्वयोर्मध्यस्थत्वेऽपि एवशब्देनेतरान्यतमव्यवच्छेदात् । अन्यथैकशब्देनैवेतरव्यावृत्तौ एव शब्दस्य वैयर्थ्यापातात् । तस्माद्युक्तमुक्तमिति गुणग्राहिभिः सन्तोष्टव्यम् ॥ ३३ ॥ इति श्रीभागवतटिप्पण्यां त्रयोविंशोऽध्यायः ॥ ५-२३ ॥

इति श्रीभागवते पांघरी श्रीनिवासाचार्यविरचिते विरोधोद्धारे पञ्चमः स्कन्धः समाप्त ॥ ५ ॥

श्रीसत्याभिनवतीर्थविरचिता

दुर्घटभावदीपिका

षष्ठः स्कन्धः

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ कर्मणा प्रायश्चित्तरूपकर्मणा आत्यन्तिकः कर्मनिर्हारः कर्मोच्छेदकः प्रामाणिकैः । हि शब्दोऽवधारणे । न हि नैवेष्यते । कुत इत्यत आह ॥ अविद्वदधिकारित्वादिति । अविद्वदित्यत्र विद्यमानोऽकारो ब्रह्मवाची । आत्यन्तिककर्मनिर्हारस्य ब्रह्मापरोक्षज्ञान्यधिकारित्वात् । तर्हि प्रायश्चित्तानुष्ठानं व्यर्थं स्यादित्यत आह ॥ प्रायश्चित्तेति । प्रायश्चित्तेन विमर्शनं भगवदपरोक्षज्ञानं भवति । एतदेव विवृणोति ॥ नाश्नत इति । हे राजन्! यथा पथ्यमेवान्नमश्नतो व्याधयो नाभिभवन्ति किन्तु क्षेमाय एव भवन्ति । एवं तथा नियमकृत्प्रायश्चित्तकृच्छनैः क्षेमाय कल्पते । भगवदपरोक्षज्ञानं प्राप्य नैमित्तकात्यन्तिककर्मोच्छेदं च प्राप्य मोक्षाय कल्पत इत्येतद्धि कर्मणा ज्ञानमातनोतीत्यादिप्रमाणप्रसिद्धमिति । एतेनाविद्वदधिकारित्वादित्येतद्व्यर्थमिति दूषणं परास्तम् । प्रायश्चित्तरूपकर्मणाऽऽत्यन्तिककर्मोच्छेदो नास्तीत्यर्थस्य ब्रह्मज्ञानमेवात्यन्तिककर्मोच्छेदेऽधिकारोऽतो ब्रह्मज्ञानेनैवात्यन्तिककर्मोच्छेदो न कर्मणेत्युपपादनार्थमविद्वदधिकारित्वादित्युक्तमित्यङ्गीकारात् । एतेनैव प्रायश्चित्तविमर्शनमित्येतद्व्यर्थमिति दूषणं परास्तम् । प्रायश्चित्तेन भगवदपरोक्षज्ञानेनात्यन्तिककर्मोच्छेदः । अतो प्रायश्चित्तावैयर्थ्यमिति वक्तुं प्रायश्चित्तविमर्शनमित्युक्तमित्यङ्गीकारात् । एतेनैव नाश्नत इत्येतद्व्यर्थमिति दूषणं परास्तम् । दृष्टान्तपूर्वकं प्रायश्चित्तेन भगवदपरोक्षज्ञानम् । तस्यात्यन्तिककर्मोच्छेदोऽवान्तरफलम् । मोक्षस्तु मुख्यफलमिति वक्तुं नाश्नत इत्येतत्प्रवृत्तमित्यङ्गीकारात् ॥ ११-१२ ॥

प्रकृतिजैः प्रकृतिजन्यैर्गुणैः सत्त्वादिभिरवशः परमात्माधीनः सर्वो जनः कर्म कार्यत इति । अवशः सर्व इत्यनेनेश्वरस्य प्रयोजककर्तृत्वं सर्वस्य प्रयोज्यककर्तृत्वमुक्तं भवति । प्रकृतिजैर्गुणैरित्यनेन प्रकृतिजन्यानां गुणानामीश्वराधीनप्रयोजककर्तृत्वमित्यभिप्रेत्य प्रयोजककर्तृककर्तृत्वमुक्तमिति द्रष्टव्यम् । ननु सर्वजननिष्ठप्रयोज्यकर्तृत्वस्य कार्यत इति तिङाऽनभिहितत्वात् । कर्तृकरणोस्तृतीयेति तृतीयायां सत्यां सर्वेणेति भाव्यं सर्व इति कथमिति चेत् । उच्यते । हृक्रोरन्यतरस्यामिति सूत्रेण अण्यन्तयोर्हरतिकरोत्योर्यः कर्ता सः ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवतीति कर्मसंज्ञाविधानेन कर्मसंज्ञया कर्तृसंज्ञाया बाधात् कर्तृकरणयोरिति तृतीयाप्राप्तिर्नास्ति । कर्मत्वस्य च कार्यत इति तिङा उक्तत्वेन कर्मणि द्वितीयेति द्वितीयाप्राप्त्यभावात् । कर्मेति शब्दवत् सर्व इति प्रथमैव युक्तेति ॥ ५३ ॥

विचेतनो ज्ञानशून्योऽजामिलस्तन्निमित्तस्मरव्याजग्रहग्रस्तः स्त्रीदर्शननिमित्तकामव्याजेनागतो यो ग्रहः पिशाचस्तद्ग्रस्त इत्यर्थः । एतेन स्त्रीदर्शननिमित्तस्मराख्यग्रहग्रस्त इत्यर्थः । अत्र शाकपार्थिवादित्वादागतशब्दस्य लोपो द्रष्टव्यः । एतेन स्त्रीदर्शननिमित्तस्मराख्यग्रहग्रस्त इत्यर्थलाभाय तन्निमित्तस्मरग्रहग्रस्त इति वक्तव्यं व्याजपदं व्यर्थमिति दूषणमपास्तम् । अजामिलस्यातिमहती कामपीडा जातेति ज्ञापयितुमयं कामो न भवति किन्तु कामव्याजेन प्रसिद्धपिशाच एवागत्य पीडां कृतवानित्युत्प्रेक्षासिद्ध्यर्थं व्याजपदं प्रत्युक्तमित्यङ्गीकारात् ॥ ६३ ॥

यावता यावान्पित्र्योऽर्थस्तावता पित्र्येणार्थेन तामेव तोषयामासेत्यर्थः । एतेन यावतेत्येतदनन्वितमिति दूषणं परास्तम् । यावतेति तृतीया प्रथमार्थ इत्यङ्गीकृत्य पित्र्येणार्थेनेत्येतदर्थवशात्प्रथमान्तं सत् यावतेत्यनेन संबध्यत इति चाङ्गीकृत्य तावतेत्यस्य शेषं चाङ्गीकृत्यान्वय इत्यङ्गीकारात् ॥ ६४ ॥
इति भागवतटिप्पण्यां प्रथमोऽध्यायः ॥ ६-१ ॥

॥ हरिः ॐ ॥ यत्र येऽदण्डद्या अपापास्तेष्वदण्डेष्वपापेषु यैर्वृथा दण्डो ध्रियते तेषां धर्मशासतामधर्मः स्पृशत इत्येतत् अहो आश्चर्यं कष्टं चेति । एतेन यत्रेत्येतदनन्वितमिति दूषणं परास्तम् । यत्रेति त्रल् प्रत्ययः प्रथमार्थ इत्यङ्गीकृत्यादण्डेष्वपापेष्वित्येतदर्थवशात्प्रथमान्तं सत् यत्रेत्यनेन संबध्यत इति चाङ्गीकृत्य तेषामित्यस्य शेषं चाङ्गीकृत्यान्वय इत्यङ्गीकारात् ॥ २ ॥

श्रेयान् श्रेष्ठो यद्यत्कर्माचरति तत्तत्कर्म इतरो जनः समीहते करोति । ननु प्रमाणवाक्यानुसारेणापि कर्मणः कर्तुं शक्यत्वाल्लोकः श्रेष्ठकृतमेव करोतीत्यनुपपन्नमित्यत आह ॥ स इति ॥ सः श्रेष्ठो यद्वाक्यं प्रमाणमिति कुरुते स्वीकुरुते यद्वाक्यं प्रमाणत्वेन स्वीकृत्योक्तं कर्म करोतीति यावत् । लोकस्तच्छ्रेष्ठस्वीकृतप्रामाणवाक्योक्तं कर्मानुवर्तते । करोतीति यावत् । अतो लोकः श्रेष्ठकृतमेव कर्म करोतीत्युपपन्नमिति । एतेन श्रेष्ठैरप्यधर्मः क्रियत इत्येतदनुपपादनवेलायां श्रेष्ठानां प्रमाणभूतग्रन्थकर्तृत्वमित्यभिधानस्य लोकानां श्रेष्ठकृतप्रमाणग्रन्थानुसारेण कर्मकर्तृत्वमित्यभिधानस्य चायोगात् श्रेष्ठो यत्प्रमाणं कुरुते लोकस्तत्प्रमाणमनुवर्तत इत्यनुपपन्नमिति दूषणं परास्तम् । स यत्प्रमाणं कुरुत इत्यस्य स श्रेष्ठो यत्प्रमाणं यं प्रमाणभूतं ग्रन्थं कुरुते लोकस्तत्तं प्रमाणभूतं ग्रन्थमनुवर्तते । तद्ग्रन्थानुसारेण कर्म करोतीति यावत् । इत्यर्थ इत्यनङ्गीकारात् ॥ ४ ॥

नारायण इत्यसंहितो निर्देशः । विक्रुश्च पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिमित्युत्तरवाक्यानुसारेणाजामिलेन नारायणेति संबुध्यन्तशब्द एव प्रयुक्तः न प्रथमान्तः इत्यङ्गीकर्तव्यात् । नारायण इतीति स्थिते आद्गुण इति गुणे नारायणेतीति वक्तव्यं 'नारायण इति' इति कथनमनुपपन्नमिति दूषणं प्रत्युक्तम् ॥ ८ ॥

यद्वैकुण्ठनाम साङ्केत्यं सङ्केतेनान्यत्र प्राप्तम् । सङ्केतशब्दात् प्राप्तार्थे ष्यञ् प्रत्यये सांकेत्यमिति रूपम् । अन्यत्रेति योग्यतया संबध्यते । यद्वैकुण्ठनाम पारिहास्यं परिहासार्थमन्यत्र प्राप्तं वा । परिहासशब्दात्तदर्थं प्राप्तमित्यर्थे ष्यञ् प्रत्यये पारिहास्यमिति रूपम् । यद्वैकुण्ठनाम स्तोभं स्तोभमिति । प्रथमा तादर्थ्ये । स्तोभार्थं व्यर्थाक्षरप्रयोगार्थं प्रयुक्तं वा गानसमये गानपरिपूरणार्थं व्यर्थाक्षरप्रयोगे कर्तव्ये प्रयुक्तं वेति यावत् । यद्वैकुण्ठनाम हेलनं हेलनमिति । प्रथमा तादर्थ्ये । हेलनार्थं भगवतोऽन्यस्य निन्दार्थं प्रयुक्तं वा । तस्य वैकुण्ठनाम्नो ग्रहणमुच्चारणं भक्तस्य नामस्वामितया विष्णोः स्मरणे जातेऽशेषाघहरम् । उपलक्षणमेतत् । अशेषफलदातृ चेति । ज्ञानिनो विदुरिति । एतेन साङ्केत्यमित्यादेर्वैकुण्ठनामग्रहणरूपत्वाभावेन वैकुण्ठनामग्रहणमित्यनेनान्वयायोगात् साङ्केतिकमित्यादिकमनन्वितमिति दूषणं परास्तम् । वैकुण्ठनामग्रहणमित्यत्र पदद्वयमङ्गीकृत्य यत्तस्येति पदयोः शेषं चाङ्गीकृत्य वैकुण्ठनामेत्यस्य साङ्केत्यमित्यादिनाऽन्वयमङ्गीकृत्य साङ्केत्यमित्यादेरध्याहृतेन तस्येत्यनेनान्वय इत्यङ्गीकारात् । एतेनैव भक्त्या भगवन्नामोच्चारणादेरशेषाघहरत्वात्सङ्केतादिनाऽन्यनिष्ठस्य भगवन्नामोच्चारणेनाशेषपापपरिहारो भवतीति कथनमनुपपन्नमिति दूषणं परास्तम् । भक्तस्य नामस्वामितया विष्णुस्मरणे जात इत्यस्य शेषमङ्गीकृत्य साङ्केत्यं पारिहास्यमिति श्लोकस्य साङ्केतादिनाऽन्यनिष्ठस्य भगवन्नाम्न उच्चारणेन भक्तस्य नामस्वामितया विष्णोः स्मरणं भवति । तेन चाशेषपापनिर्वृत्तिर्भवतीत्यर्थपरत्वमित्यङ्गीकारात् । एतेनैव सङ्केतादिनाऽन्यनिष्ठस्य भगवन्नाम्न उच्चारणेनाशेषपापनिवृत्तिर्भवति मोक्षादि पुरुषार्थावाप्तिश्च भवति । अतोऽशेषाघहरमशेषफलदातृ चेति वक्तव्यम् । अशेषाघहरमित्यस्याशेषफलदातृ चेत्येतदुपलक्षकमित्यङ्गीकारात् ।। ता. अर्थाः ।। हेलनमित्यस्यार्थं वदन्नन्वयं दर्शयति ।। नारायणोऽयमिति । यन्नारायणोऽयमित्यत्रत्यं नारायणेति नाम हेलनविषयत्वेनान्यस्य भगवतोऽन्यस्याद्वैतसंन्यासिनो हेलनं निन्दाविषयो यस्य तदन्यहेलनविषयं तस्य भावोऽन्यहेलनविषयत्वं तेनान्यहेलनविषयत्वेनोक्तम् । अद्वैतसंन्यासिनिन्दार्थमुक्तमिति यावत् । तन्नारायणनामाघहरम् । एतेन नारायणोऽयमित्यत्र निन्दाया अदर्शनात् नारायणोऽयमित्यन्यहेलनविषयत्वेनेत्ययुक्तमिति दूषणं परास्तम् । अद्वैतसंन्यासिनमुद्दिश्य नारायणोऽयमित्युक्ते निन्दाऽप्रतीतेरवर्जनीयत्वात् । एतेनैव नारायणेति नाम्नोऽन्यहेलनं विषयो न त्वन्यहेलनस्य नारायणनाम विषयः । अतोऽन्यहेलनविषयत्त्वेनेत्ययुक्तमिति दूषणं परास्तम् । अन्यहेलनविषयत्वेनेत्यत्रान्यहेलनस्य विषय इति षष्ठीतत्पुरुषमनङ्गीकृत्यान्यहेलनं विषयो यस्येति बहुव्रीहिरित्यङ्गीकारात् । भक्तिपूर्वकमेवोच्चारितं वैकुण्ठनामाशेषाघहरं फलदातृ इत्यत्र प्रमाणमाह ।। सर्वथेति । विष्णोर्नाम तद्भक्तिपूर्वकं विष्णुभक्तिपूर्वकमुदाहृतं सर्वथाऽघहरम् । उपलक्षणमेतत् । फलदातृ मोक्षादिफलदातृ । उपलक्षणमेतत् । अघहरं च नैव भविष्यति । तर्हि सङ्केतादिनाऽन्यनिष्ठस्य भगवन्नाम्न उच्चारणे फलं न

स्यादित्यत आह ।। नामस्वामितयेति । यतः कारणात्सङ्केतादिनाऽन्यनिष्ठस्य भगवन्नाम्न उच्चारणे नामस्वामितया तस्य विष्णोः स्मरणं भक्तस्य जायते । अतः कारणात् । सङ्केतादौ निमित्तसप्तमीयम् । सङ्केतादिना निमित्तेनापि नामकीर्तिरन्यनिष्ठनामकीर्तिर्नामोच्चारणमीरिताशेषपापनिवृत्तिहेतुत्वेनाशेषफल-साधनत्वेन च प्रमाणेनेरिता ईरितम् । अजामिलोऽपि सङ्केतेन पुत्रनिष्ठस्य नारायणनाम्न उच्चारणं कृत्वा भक्त्या स्मरणात् । 'ल्यब्लोपा निमित्ता पञ्चमी । भक्त्या नामस्वामितया विष्णोः स्मरणं प्राप्य मृत्योरमुच्यतेति ।। १४ ।।

तैस्तान्यघानि पूयन्ते तपोदानव्रतादिभिः । नाधर्मबीजं हृदयं तदपीशाङ्घ्रिसेवयेत्यनेन तपोदान-व्रतादिभिस्तत्तदघानामेव निवृत्तिर्भवति । अधर्मबीजान्तःकरणस्य शुद्धिर्न भवति । अधर्मबीजान्तः करणशुद्ध्यर्थं भगवत्सेवैव कर्तव्येत्युक्तं तदनुपपन्नम् । हरिप्रीत्यर्थमनुष्ठितस्य विहिताकाम्यकर्म-मात्रस्यान्तःकरणशुद्धिहेतुत्वादित्याशङ्कापरिहारार्थं तैस्तानीत्युक्तमत्र विव्रीयते । कर्तुरीश्वराधीन-कर्तुर्जीवस्य क्रियया हरिभजनातिरिक्ततपोदानव्रतादिक्रिययाऽऽत्मनोऽन्तःकरणस्यैकान्तशुद्धिरात्यन्ति-कशुद्धिर्न स्यात् । कुत इत्यत आह ।। कर्तृतेति । यतः कारणादकर्तुः स्वातन्त्र्येणाकर्तुर्जीवस्य तपोदानव्रतादिक्रियया कर्तृता स्वतन्त्रकर्तृताबुद्धिर्भवति । तस्मान्नैकान्तशुद्धिरिति पूर्वेणान्वयः । तस्मादन्तःकरणस्यात्यन्तिकशुद्धेरपेक्षितत्वात् । अन्तःकरणस्यात्यन्तिकशुद्ध्यर्थमिति यावत् । अनीहया फलेच्छां विना हरिं भजेतेति ।। १९ ।।

अन्यथा मङ्गलस्य भवितव्यत्वाभावे म्रियमाणस्याशुचेरशुद्धस्य वृषलीपतेर्दासीपतेर्ममेहास्मिन्देहे विद्यमाना जिह्वाग्रहणं भगवज्ज्ञानसाधनं वैकुण्ठनाम वक्तुं नार्हतीति । एतेन वैकुण्ठनाम्न उच्चारणस्य वचनकर्मत्वाभावात् वैकुण्ठनामग्रहणमित्यनुपपन्नमिति चोद्यं निरस्तम् । वैकुण्ठनामग्रहणमित्यत्र पदद्वयमङ्गीकृत्य ग्रहणमित्यस्य ग्रहणं साध्यत्वेनास्यास्तीत्यर्थे अर्श आद्यजन्तत्वमंङ्गीकृत्य भगवज्ज्ञानसाधनमित्यर्थ इत्यङ्गीकारात् । एतेनैवेहेत्येतद्व्यर्थमिति दूषणमपास्तम् । एतद्देहसंबन्धेन जिह्वा दुष्टेति ज्ञापयितुमिहेत्युक्तमित्यङ्गीकारात् ।। ३६ ।। इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ।। ६-२ ।।

।। हरिः ॐ ।। त्रैविध्यमित्यस्य त्रैविध्यमस्यास्तीत्यर्थे अर्श आद्यचमङ्गीकृत्य त्रिविधमित्यर्थो वक्तव्यः । एतेन त्रिविधमिति वक्तव्यम् त्रैविध्यमित्यनुपपन्नमिति दूषणमपास्तम् ।। ४ ।।

यदि लोके दण्डधारिणः शास्तारो बहवः स्युस्तर्हि मृत्युरमृतं चेत्येते शास्तॄणां मध्ये कस्य शास्तुः सकाशात् शास्ता । नैव कस्यापि स्यातामिति । बहूनां शास्तृत्वमङ्गीकारे परस्परप्रतिबन्धान्न कस्यापि शास्तुर्मृत्युपदत्वममृतपदत्वं वा स्यादिति भावः । एतेन मृत्योरमृतस्य च भावाभावरूपत्वात् । मृत्युरमृतत्वं चेत्येकस्य स्यातां न कस्यापि स्यातामित्युभयाभावकथनमनुपपन्नमिति दूषणं परास्तम् ।

कस्येत्यस्य शास्यपरत्वमनङ्गीकृत्य शास्तृत्वपरत्वमित्यङ्गीकारात् । एतेनैव कस्य स्यातामित्यनेनैव पूर्णत्वात् । न वा कस्येत्येतद्व्यर्थमिति दूषणं परास्तम् । वाशब्दस्याप्यर्थत्वमङ्गीकृत्य कस्य स्याता-मित्याक्षेपस्य न कस्यापि स्यातामिति पर्यवसानं दर्शयितुं न वा कस्येत्येतत्प्रवृत्तमित्यङ्गीकारात् ॥ ५ ॥

अन्यः कृष्णाङ्घ्रिपद्ममधुलिहोऽन्यस्तु कामहतः सन् आत्मरजः प्रमार्ष्टुमात्मदोषपरिहारार्थं यतो यत्कर्मेहते ततः कर्मणः सकाशात्पुनारजोदोष एव स्यादिति । एतेन यत इत्येतदनन्वितमिति दूषणं परास्तम् । यत इति तसिल् यदिति यद्द्वितीयार्थ इत्यङ्गीकृत्य यत इत्यस्य कर्मेत्यनेनान्वय इत्यङ्गीकारात् ॥ ३० ॥ इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ६-३ ॥

॥ हरिः ॐ ॥ यदा यदा यस्यामवस्थायां नामरूपरूपस्य नामरूपात्मकपदार्थनिरूपकस्य नामरूपात्मकपदार्थज्ञापकस्य मनस उपरामो नामरूपात्मकपदार्थज्ञापकत्वाभावो भवति । तदा तस्यामवस्थायाम् । स्वप्नसुप्तिलयादिष्विति यावत् । जीवानां दृष्टिस्मृतिसंप्रमोषान्नामरूपात्म-कपदार्थानुभवस्मरणयोरभावात् । जीवानां स्वाप्नसुप्त्यादिप्रबोधादिकं प्रति कर्तृत्वायोगात् । यो भगवान्केवलया जीवेच्छारहितया स्वसंस्थया स्वस्य संस्थया सम्यक् स्थित्या स्वप्नसुप्त्यादि-प्रबोधादिहेतुभूतया स्थितेति यावत् । विशिष्टोऽस्तीतीयते ज्ञायते । तस्मै हंसाय शुद्धाय शुचिसद्मने शुचयः शुद्धा ज्ञानिनस्त एव सद्मानि निवासस्थानानि यस्य तस्मै नारायणाय नम इति । एतेन दृष्टिस्मृतिसंप्रमोषादित्येतत्केवलया स्वसंस्थयेत्येतच्चानन्वितमिति दूषणं परास्तम् । दृष्टस्मृति-संप्रमोषादित्यनन्तरं जीवानां स्वप्नसुप्त्यादि प्रबोधादिकं प्रति कर्तृत्वायोगादित्यस्य शेषमङ्गीकृत्य केवलया स्वसंस्थयेत्यतःपरं विशिष्टोऽस्तीति त्रयाणां पदानां शेषमङ्गीकृत्यान्वय इत्यङ्गीकारात् । स्वसंस्थयेत्यतः परं विशिष्ट इति शेषः । केवलया संस्थया विशिष्टोऽस्तीति ज्ञायत इत्यन्वयः । अनेन मूले केवलया स्वसंस्थयेत्यतः परं विशिष्टोऽस्तीति त्रयाणां पदानां शेषमङ्गीकृत्य विशिष्टोऽस्तीतीयत इत्यन्वयं चाङ्गीकृत्येयत इत्यस्य ज्ञायत इत्यर्थ उक्तो भवति ॥ ता० अर्थः ॥ यदोपराम इति संपूर्णश्लोकयोजनां सूचयति ॥ स्वप्नसुप्त्यादाविति । स्वप्नसुप्त्यादौ इत्यत्र आदिशब्देन प्रलयादिकं गृह्यते । स्वप्नसुप्तिप्रलयादौ ॥ मन उपरमात् । नामरूपात्मकपदार्थज्ञानजनकत्वाभावात् । जीवस्येति जातावेकवचनम् । जीवानामस्वातन्त्र्यदर्शनेऽप्यस्वातन्त्र्यस्य प्रमाणसिद्धत्वेऽपि स्वप्नप्रबोधादिदर्शनात् । स्वप्नशब्दः सुषुप्त्यादेरुपलक्षकः । स्वप्नसुषुप्त्यादिप्रबोधादिदर्शनात् । अन्यो जीवेभ्योऽन्यो नियामकः सुषुप्त्यादि-प्रबोधादिदूषणं नियामक ईश्वरोऽस्तीति ज्ञायते । अनेनास्तीति ज्ञायत इति पदानामावृत्तिरभिप्रेता । एतेन केवलया स्वसंस्थयेत्येतदनन्वितमिति दूषणं परास्तम् । केवलया स्वसंस्थयेत्यतःपरं विशिष्ट इति शेषमङ्गीकृत्यास्तीति ज्ञायत इत्यनेनान्वय इत्यङ्गीकारात् । एतेनैव केवलया स्वसंस्थयेत्यनेन नास्तीति ज्ञायत इत्यस्यानन्वितत्वात् तन्नियामक इत्येतदनन्वितमिति दूषणं परास्तम् । अस्तीति ज्ञायत

इत्यस्यावृत्तिमङ्गीकृत्य तन्नियामक इत्यस्यान्वय इत्यङ्गीकारात् । मूलस्य स्पष्टयोजनया केवलयेत्यस्यार्थं सूचयति ॥ जीवेच्छाभावादिति । अनेन केवलयेत्यस्य जीवेच्छारहितयेत्यर्थ उक्तो भवति । उक्तार्थे प्रमाणमाह ॥ यदेति । यदा यस्मात्कारणात्सुप्तिप्रलयादिषु मनस उपचारो भवति तस्माज्जीवस्य जीवानां सुप्तिप्रलयादिषु तु विशेषेणास्वातन्त्र्यात्प्रवृत्त्यादेरयोगात् । जीवप्रवृत्त्यानुकूल्यादिति । पञ्चमी तादर्थ्ये । जीवप्रवृत्यानुकूल्यार्थमन्यो जीवेभ्योऽन्यस्तदवस्थाप्रबोधादिकारणत्वेन स्वप्नसुप्त्याद्यवस्था-प्रबोधादिकारणत्वेन जीवानां नियामको विभुः समर्थः । असौ केशवो विद्यत इति ज्ञायत इति ॥ २६ ॥

यस्मिन्नित्यनेन यदधिकरणमित्युक्तम् । यत इत्यनेन यदपादानमुक्तम् । येनेत्यनेन च यत्कारणमुक्तम् । यस्येत्यनेन यः संबन्ध उक्तः । यस्माइत्यनेन यत्संप्रदानमुक्तम् । यमित्यनेन यत्कर्मोक्तम् । य इत्यनेन यः कर्तोक्तः । यथेत्यनेन ये प्रकारा उक्ताः । कुरुत इत्यनेन या क्रियोक्ता । यश्च वर्तमानः काल उक्तः । उपलक्षणमेतत् । अकार्षीदित्यादिना भूतकालादि । तत्कः कार्यते वा । वाशब्दश्च शब्दार्थे । कार्यत इत्यनेनान्वयः । प्रयोजककर्ता लब्धः । तद्धेतुस्तेषामधिकरणादि-सप्तविभक्त्यर्थानां प्रकाराणां क्रियाया वर्तमानादिकालस्य प्रयोजककर्तुश्च हेतुः कारणम् । परावरेषां परेषां ब्रह्मादीनामवरेषां तृणादिजीवानां सकाशात्प्राक् पूर्वम् । प्रलयकाल इति यावत् । स्थितं स्वसिद्धं स्वप्रकाशमत एव परमं सर्वोत्तममनन्यत् सदृशान्यरहितमेकं रूपाद्यभेदविशिष्टं यत् यद्ब्रह्मेति । एतेन यस्मिन्नित्यादिकमनन्वितमिति दूषणं परास्तम् । यस्मिन्नित्यादेः परं प्रत्येकमित्यनेन यदुक्तमिति चतुर्णां पदानां शेषमङ्गीकृत्य तद्धेतुरित्यनेनान्वय इत्यङ्गीकारात् । एतेनैव परावरेषामित्येतदनन्वितमिति दूषणं परास्तम् । परावरेषामित्यस्य प्रागित्यनेनान्वय इत्यङ्गीकृत्य प्रागित्यस्याध्याहृतेन स्थितमित्यनेनान्वय इत्यङ्गीकारात् ॥ ता० अर्थः० ॥ सप्तविभक्त्यर्थस्य यस्मिन्नित्यादिसप्तविभक्त्यर्थस्याधिकरणादेः कालस्य कुरुत इत्यादिलडादिप्रत्ययोक्तवर्तमानादिकालस्य । प्रकारस्येति जातावेकवचनम् । यथेति शब्दोक्तं सर्वप्रकाराणाम् । उपलक्षणमेतत् । कुरुत इति शब्दोक्तक्रियायाः कार्यत इति शब्दोक्तप्रयोजककर्तुश्च हेतुः कारणं यत् तद्ब्रह्मैव । उक्तार्थे प्रमाणमाह ॥ विभक्त्यर्थस्येति । विष्णोर्विभक्त्यर्थादिकारणत्वं कुत इत्यत आह । सर्वेति । पूर्वमसतः सर्वस्य सत्ताप्रदः । सर्वोत्पादक इति यावत् । तस्य भावः सर्वसत्ताप्रदत्वं तस्मात् सर्वसत्ताप्रदत्वत इति । एतेन व्याख्येया-भावात्कालस्येत्येतदनुपपन्नमिति दूषणमपास्तम् । कुरुत इत्यस्याकार्षीदित्याद्युपलक्षकत्वमङ्गीकृत्य कुरुतेऽकार्षीदित्यादेः कालस्येत्येतद्व्याख्येयत्वमङ्गीकारात् । एतेनैव सर्वसत्ताप्रदत्वत इति विष्णोः सर्वसत्ताप्रदत्वकथनमसङ्गतमिति दूषणं परास्तम् । विष्णोर्विभक्त्यादीनामुत्पादकत्वं प्रत्येकमुपपादयितुं सर्वसत्ताप्रदत्वत इत्यनेन सर्वोत्पादकत्वमुच्यत इत्यङ्गीकारात् ॥ ३० ॥

यच्छक्तयो नारायणस्य शक्तयो वदतां वेदपुराणब्रह्मसूत्राण्यभ्यसतां वादिनां ब्रह्मास्तीति वादिनां विवादसंवादभुवो 'ब्रह्म निर्गुण'मित्यादिविरुद्धवादानां 'ब्रह्मानन्तगुणपूर्ण'मित्यादिसमीचीनवादस्य चाश्रयाः कारणानि भवन्ति। वेदादिशास्त्राभ्याससमाने भगवच्छक्तीनां विवादसंवादहेतुत्वं कथमित्यत आह ॥ कुर्वन्तीति । भगवच्छक्तयो यतः कारणात्तेषां मायावादिप्रभृतीनां तत्त्ववादिनां चात्ममोहं 'परमात्मा निर्गुण' इत्यादिपरमात्मविषयकमिथ्याज्ञानं 'परमात्माऽनन्तगुणपूर्ण' इत्यादिपरमात्मविषयकसम्यग्ज्ञानं चाभ्यस्तवेदादिशास्त्रैः करणैर्मुहुः पुनः पुनः कुर्वन्त्युत्पादयन्ति । तस्माद्विवादसंवादभुवो भवन्तीति सम्बन्धः । तस्मै तादृशशक्तिविशिष्टायानन्तगुणाय भूम्ने पूर्णाय नम इति । एतेन भगवच्छक्तीनां विवादहेतुत्वोपपादनार्थं भगवच्छक्तीनां यथा मिथ्याज्ञानोत्पादकत्वमुक्तं तथा संवादहेतुत्वोपपादनार्थं समीचीनज्ञानोत्पादकत्वमपि वक्तव्यम्। मिथ्याज्ञानोत्पादकत्वमात्रकथनमसङ्गतमिति दूषणं परास्तम् । मोहमित्यस्य सम्यग्ज्ञानोपलक्षकत्वमङ्गीकृत्य सम्यग्ज्ञानोत्पादकत्वमुच्यत इत्यङ्गीकारात् ॥ ३१ ॥

यद्भिन्नविरुद्धधर्मयोर्भिन्नौ भिन्नवस्तुनिष्ठौ विरुद्धौ धर्मौ ययोस्तौ । तयोर्भिन्नविरुद्धधर्मयोः विरुद्धधर्मप्रतिपत्तिहेतुभूतयोरिति यावत्। एकस्थयोरेकविषययोर्वस्तुनिष्ठयोः सर्वत्र वसतीति वस्त्वीश्वरस्तद्विषययोरस्तीति नास्तीति मतयोर्मदन्य ईश्वरोऽस्ति मदन्य ईश्वरो नास्तीतीश्वराख्यैकवस्तुनिष्ठतया

सत्वासत्वरूपविरुद्धधर्मप्रतिपत्तिहेतुभूतयोः । मतयोरिति यावत् । अनुकूलं कारणं यच्चापेक्षितं स्वस्वनियमनार्थं सर्वापेक्षितं यच्च किञ्चन लोकविलक्षणं यच्च साङ्ख्ययोगयोः साङ्ख्ययोगशास्त्रयोः परं मुख्यप्रतिपाद्यं समं ब्राह्मणादौ सर्वत्रैकप्रकारेण विद्यमानं तद्ब्रह्म ह तद्ब्रह्मेत्येतद्धि प्रमाणप्रसिद्धमिति । एतेन भिन्नेत्येतद्व्यर्थमिति दूषणं परास्तम् । भिन्नेत्यनेन नास्तीति वक्ष्यमाणयोः सत्त्वासत्त्वरूपधर्मयोर्विरुद्धत्वोपपादनार्थं भिन्नवस्तुनिष्ठत्वमुच्यते इत्यङ्गगीकारात् । एतेनैव एकस्थयोरित्यनेनैव मतयोरीश्वरविषयकत्त्वस्योक्तत्त्वात् । वस्तुनिष्ठयोरित्येतद्व्यर्थमिति दूषणं परास्तम् । एकस्थयोरित्यनेनैकविषयकत्त्वमात्रमुक्त्वैकः क इत्याशङ्कापरिहारार्थं वस्तुनिष्ठयोरित्यनेन वस्तुशब्दवाच्येश्वराख्यैकविषयकत्वमुच्यत इत्यङ्गीकारात्। एतेनैव भिन्नविरुद्धधर्मयोरित्यनेनैव मतयोर्विरुद्धधर्मप्रतिपत्तिहेतुत्वस्योक्तत्त्वात् अस्तीति नास्तीत्येतद्व्यर्थमिति दूषणं परास्तम्। भिन्नविरुद्धधर्मयोरित्यनेनैव मतयोर्विरुद्धधर्मप्रतिपत्तिहेतुत्त्वमुक्त्वा तौ विरुद्धधर्मौ कावित्याशङ्कापरिहारार्थमस्तीति नास्तीत्यनेन विरुद्धधर्मयोः सत्वासत्वरूपमुच्यत इत्यङ्गीकारात् । एतेनेवास्तीति नास्तीत्येतदनन्वितमिति दूषणं परास्तम् । अस्तीति नास्तीत्यतः परं मतयोरित्यस्य शेषमङ्गीकृत्य तेनान्वय इत्यङ्गीकारः । अपेक्षितमित्यनेन सर्वजीवानामस्वातन्त्र्येण स्वतः प्रवृत्त्यादेरयोगात् । स्वस्वप्रवृत्त्यादिसिद्ध्यर्थं स्वव्यतिरिक्ततया सर्वजीवेश्वरस्याङ्गीकरणीयत्वात् । 'मदन्य ईश्वरोऽस्तीति मतं दैवं', 'मदन्य ईश्वरो नास्तीति'

मतमासुरमिति सूचयति । तेनापेक्षितमित्येतद्व्यर्थमिति दूषणस्यानवकाशः ।। ता० अर्थः ।। उभयोर्देवासुरमतयोर्हरिः कारणमिति संबन्धः । मदन्यो नास्ति सर्वेश्वर इति मतमासुरम् । मदन्योऽस्तीश्वर इति मतं दैवमित्येतदुपपादयति ।। हरिरेवेति । हि यस्मात्कारणाद्धरिरपेक्षित एव । अस्वातन्त्र्येण प्रवृत्त्यादेरयोगात् । प्रवृत्त्यादिसिद्ध्यर्थं सर्वैः स्वव्यतिरिक्ततयाऽङ्गीकरणीय एव । तस्मान्मदन्यो नास्तीति पूर्वेण संबधः । नास्तीति निषेधस्यास्तीति विधेश्च हरिर्विषय इत्यनेन मूलेऽस्तीति नास्तीत्यतः परं निषेधयोरिति शेषमङ्गीकृत्यापेक्षितमित्यस्य विषयार्थत्वमङ्गीकृत्यास्तीत्यादीनां यदस्तीति नास्तीति विधिनिषेधयोरपेक्षितं विषय इति योजनान्तरं सूचयति । केशवस्तादृग्बुद्धेर्मदन्य ईश्वरो नास्ति मदन्य ईश्वरोऽस्तीति च बुद्धेः कारणमित्यनेनास्तीति नास्तीत्यतः परं बुद्धेरिति शेषमङ्गीकृत्य भिन्नविरुद्धधर्मयोरित्यादीनां यद्भिन्नविरुद्धधर्मयोर्भिन्नविरुद्धविषययोरेकस्थयोरेकविषययोर्वस्तुनिष्ठयोरीश्वरविषययोरस्तीति नास्तीति बुध्योरनुकूलं कारणमिति योजनान्तरं सूचयति । केशवः फलदातेत्युक्तं विवृणोति ।। कारणमिति । स्थानयोरित्यतः परं प्राप्तेरिति शेषः । केशवो मदन्यः ईश्वरोऽस्ति मदन्य ईश्वरो नास्तीति बुद्ध्यादिसंपन्नयोरुच्चनीचयोः स्थानयोः प्राप्तेरिति शेषमङ्गीकृत्यास्तीत्यादीनां यन्मदन्य ईश्वरोऽस्ति मदन्य ईश्वरो नास्तीति बुद्ध्यादिसंपन्नयोः पुरुषयोर्भिन्नविरुद्धधर्मयोर्भिन्नौ विरुद्धावुच्चत्वनीचत्वरूपधर्मौ ययोस्तयोर्भिन्नविरुद्धधर्मयोः स्थानयोः प्राप्तेरनुकूलं कारणमिति योजनान्तरं सूचयतीति ।। ३२ ।। इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ।। ६-४ ।।

।। हरिः ॐ ।। गुणविस्रम्भी विस्रम्भो विश्वासो विशब्दो नञर्थे विस्रंभोऽविश्वासः सोऽस्यातीति विस्रम्भी । गुणशब्देन गुणसर्गो गृह्यते । गुणविस्रंभी गुणसर्गविषयकाविश्वासवान् । गुणसर्गेण गुणसंबन्धोऽधिको भविष्यतीति । जानातीति यावत् । पितुः पित्रा रक्षकत्वात्पितृसदृशेन शास्त्रस्य शास्त्रेण वेदादिशास्त्रेणादेशमुपदिष्टं निवर्तकं गुणसर्गप्राप्तप्रतिबन्धनिवर्तकं श्रीनारायणाराधानादिकं न वेद च । स पुरुषस्तदनुरूपाय तदनरूपं बन्धानुकूलं गुणसर्गम् । कथमुपक्रमेदिति । एतेन गुणसर्गविश्वासस्य गुणसर्गप्रवृत्यनुकूलत्वेन गुणसर्गविरोधित्वाभावात् । गुणविस्रम्भी गुणसर्गं कथमुपक्रमेदिति कथनमुनुपपन्नमिति दूषणं परास्तम् । गुणविस्रंभीत्यस्य गुणसर्गविश्वासवानित्यर्थ इत्यङ्गीकारात् । एतेनैव तदनुरूपायेत्येतदनन्वितमिति दूषणं परास्तम् । तदनुरूपायेति चतुर्थी द्वितीयार्थ इत्यङ्गीकृत्य गुणसर्गमित्यस्य शेषं चाङ्गीकृत्य तदनुरूपायेत्यस्य गुणसर्गमित्यनेनान्वय इत्यङ्गीकारात् । अनेन कथं स्वपितुरादेशमविद्वांसोऽविपश्चितः । अनुरूपमविज्ञाय 'अहो सर्गं करिष्यथे'ति श्लोकस्य स्वपितुः स्वपित्रा स्वरक्षकवेदादिशास्त्रेणादेशमुपदिष्टं गुणसर्गप्राप्तबन्धनिवर्तकभगवदाराधनादिकमविद्वांसोऽविपश्चितो वेदादिशास्त्रोपदिष्टगुणसर्गप्राप्तबन्धनिवर्तकभगवदाराधनादिविषयकबुद्धिशून्या

यूयमनुरूपं बन्धानुकूलं गुणसर्गमविज्ञाय सम्यग्ज्ञात्वा सर्गं गुणसर्गं कथं करिष्यथ। अहो आश्चर्यमिति योजनोक्ता भवति । एतेनादेशमित्यस्य विशेष्यं नोक्तमिति दूषणं परास्तम् । गुणसर्गप्राप्तबन्धनिवर्तकभगवदाराधनादिकमित्यस्य शेषमङ्गीकारात्। एतेनैवाविद्वांस इत्यनेन ज्ञानाभावस्योक्तत्वात् अविपश्चिदित्येतत्पुनरुक्तमिति दूषणं परास्तम्। अविद्वांस इत्यनेन भावाभावमुक्त्वाऽविपश्चित इत्यनेन ज्ञानाभावोपपदनार्थं ज्ञानसाधनबुद्धिशून्यत्वमुच्यत इत्यङ्गीकारात् । एतेनैवानुरूपमित्यस्य विशेष्यं नोक्तमिति दूषणं परास्तम्। अनुरूपमित्यतःपरं गुणसर्गमित्यस्य शेष इत्यङ्गीकारात्। एतेनैव गुणसर्गस्य बन्धानुकूलत्वेनाज्ञानस्य गुणसर्गप्रवृत्यनुकूलत्वेन गुणसर्गप्रवृत्तिविरोधित्वाभावात् । बन्धानुकूलं गुणसर्गमविज्ञाय कथं सर्गं करिष्यथेति कथनमनुपपन्नमिति दूषणं परास्तम् । अविज्ञायेत्यस्याज्ञात्वेत्यर्थमनङ्गीकृत्य विशब्दस्य नञर्थत्वमङ्गीकृत्य ''द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत'' इति न्यायं चाश्रित्याविज्ञायेत्यस्य सम्यग्ज्ञात्वेत्यर्थ इत्यङ्गीकारात्॥ २० ॥

यद्यपि सुशोभनाः प्रजा यस्यासाविति बहुव्रीहिसमासे कृते नित्यमसिच् प्रजामेधयोरित्यनेन सूत्रेण नञ् इसुस् इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवतीति असिच् प्रत्ययस्योक्तत्वात् असिच् प्रत्यये कृते सुप्रजा इति जाते, सुप्रज सु शब्दात् प्रजसो भाव इत्यर्थे तस्य भावस्त्वतलाविति सूत्रेण त्वप्रत्यये कृते सुप्रजस्त्वमिति भवितव्यम्। तथाऽपि छान्दं दीर्घमाश्रित्य सुप्रजास्त्वमित्युक्तमिति द्रष्टव्यम्॥ २३ ॥

ते शबलाश्वाः सध्रीचीनं समीचीनं प्रतीचीनमाभिमुख्येन वर्तमानं वेदादिशास्त्रैः स्पष्टम्। ज्ञातमिति यावत्। परस्य परमेश्वरप्राप्तेरनुपथमनुकूलज्ञानमार्गं गताः सन्तोऽद्यापि न निवर्तन्ते। अत्र दृष्टान्तमाह ॥ पश्चिमा इति। पश्चिमा अपरा यामिनी रात्री गताः प्राप्ताः। वृद्धा इति शेषः। वृधान् ववृधाः पथा न निवर्तन्त इति । निवृत्त्यभावमात्रोऽयं दृष्टान्तः । दृष्टान्ते शीघ्रं निवृत्त्यभावो दार्ष्टान्तिके सर्वथा निवृत्त्यभाव इति शेषः ॥ ३३ ॥

हे नारद यद्यपि त्वमुपशमं विषयोपरतिम् । विषयवैराग्यमिति यावत् । स्नेहपाशनिवर्तनं स्नेहपाशनिवृत्तिहेतुं मन्यसे। विषयवैराग्याद्देहादौ स्नेहपाशस्य निवृत्त्या भगवज्ज्ञानेन मोक्षो भविष्यति। अतो मायाविषयवैराग्योपदेशः कृत इति मन्यस इति यावत्। तथाऽपि त्वया विना केवलिनो केवलिनः सर्वथा विषयभोगरहितस्य पुंस 'इत्थं विषयवैराग्यं त्वया कर्तव्य'मित्युपदेशेन विरागो वैराग्यं न स्यात्। अतस्त्वदीयवैराग्योपदेशो व्यर्थः । ननु विषयभोगं विना विषयभोगो दुःखसाधनमिति मदीयोपदेशेन ज्ञाने जाते विषयवैराग्यं भविष्यति । अतो मदीयोपदेशो व्यर्थो न भवतीत्यत आह ॥ नानुभूयेति । पुमान्विषयान्नानुभूयाननुभूय । विषयभोगं विनेति यावत् । विषयभोगो दुःखसाधनमित्युपदेशेन

विषयतीक्ष्णतां विषयभोगस्य दुःखसाधनतां न जानाति । अतो विषयभोगो दुःखसाधनमित्युपदेशो व्यर्थ इति । एतेन त्वया विनेत्यनेनैव पूर्णत्वात् केवलिनेत्येतद्व्यर्थमिति दूषणं परास्तम् । केवलिनेति द्वितीया षष्ठ्यर्थ इत्यङ्गीकृत्य केवलिनेत्यस्य विषयभोगरहितेत्यर्थं चाङ्गीकृत्य पुंस इत्यनेनान्वय इत्यङ्गीकारात् । एतेनैव केवलिनेत्यनेन विषयभोगरहितेत्यर्थस्य लाभात् । केवलेनेति वक्तव्यम् । केवलिनेत्यनेन विषयभोगरहितवत इति प्रकृतानुपयुक्तस्यार्थलाभात् । केवलिनेति कथनमनुपपन्नमिति दूषणं निरस्तम् । केवलशब्दस्य भावप्रधानाङ्गीकारेण विषयराहित्यार्थकत्वमङ्गीकृत्य "भूमिनिन्दा-प्रशंसानुनित्ययोगेति शासने संसर्गोऽस्ति । विवक्षायां भवन्ति मतुबादय इति" वचनात् । केवलशब्दा-दतिशयेन विषयभोगराहित्यमस्यास्तीत्यर्थे इन् प्रत्ययं चाङ्गीकृत्य केवलिनेत्यस्य सर्वथा विषयभोग-रहितस्येत्यर्थ इत्यङ्गीकारात् । एतेनैव स्नेहपाशनिवृत्त्यर्थं विषयवैराग्यं कर्तव्यमिति नारदाभिप्रायस्य निर्णीतत्वात् यद्युपशमं स्नेहपाशनिवर्तनं मन्यस इति पाक्षिकोक्तिरनुपपन्नेति दूषणं परास्तम् । यदीत्यतः परमपीत्यस्य शेषमङ्गीकृत्य यद्यप्युपशमं स्नेहपाशनिवर्तनं मन्यस इति निश्चितोक्तिरित्यङ्गीकारात् । एतेनैव नानुभूयेत्यत्र नञ्समासेन नलोपो नञ इति नञो लोपे तस्मान्नुडचीति नुडागमेऽनुभूयेति कर्तव्यम्, नानुभूयेति कथनमनुपपन्नमिति दूषणं परास्तम् । नानुभूयेत्यत्र न समास इत्यङ्गीकारात् ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोध्यायः ॥ ६-५ ॥

॥ हरिः ॐ ॥ हे तात! परीक्षिद्राज! । ककुभः ककुन्नामिकाया धर्मपत्न्याः सङ्कटो जातः । यतो भुवो दुर्गाणि भूदुर्गाभिमानिनो देवा जातानि जाताः स कीकटः संकटस्य तनयो जातः । जयाया जामेया जामिनामिकाया धर्मपत्न्याः स्वर्गोऽभवत् । ततः स्वर्गान्नन्दिरभवदिति । एतेन ककुभ इति श्लोकस्य कीकटाख्यपुत्रो जातः । स सङ्कटः ककुब्जनामिकाया जातः । भुवो दुर्गाणि भूदुर्गाभिमानिनो देवा जामेया जामिनाकायाः पुत्रास्ततो भूदुर्गेभ्यः स्वर्गो नन्दिश्चाभवदित्यर्थो वक्तव्यः । स चानुपपन्नः । बहूनामेव बहुपुत्रत्वस्य युक्तत्वेनोभयोर्बहुपुत्रत्वस्यायोगादिति दूषणं परास्तम् । जामेया इत्येतत् प्रथमा बहुवचनमित्यङ्गीकृत्य यस्यैकवचनमिति चाङ्गीकृत्य जाम्या इत्यत्र छान्दसमेकारागमं चाश्रित्य ककुभ इति श्लोकस्यार्थांतरस्योक्तत्वात् ॥ ६ ॥

अर्थसिद्धिस्तु तत्सुत इत्यस्य तुशब्दश्च शब्दार्थे । न केवलं साध्यागणः साध्यायामुत्पन्नाः । साध्यायाः सुता इति यावत् । अर्थसिद्धिस्त्वर्थसिद्धिश्च तत्सुतः साध्यायाः सुतः इत्यर्थः । एतेनैकस्य बहूनां पुत्रत्वायोगात्, अर्थसिद्धिस्तु तत्सुतस्तेषां साध्यानामकगणानां सुत इति कथनमनुपपन्नमिति दूषणं परास्तम् । तत्सुत इति तच्छब्देन साध्यानामकगणानां न परामर्शः किन्तु साध्यायाः परामर्श इत्यङ्गीकारात् ॥ ७ ॥

या भूतस्य भार्या भूता तस्याः स्मृताः स्मृतिप्रसिद्धा एकादशरुद्रा जाताः । भूतस्य भार्या सुरूपा च कोटिशो रुद्रानसूत । एकादशरुद्रपार्षदप्रेतविनायकानां सुरूपाया उत्पत्तिं वक्तुं एकादशरुद्राणां नामान्याह ॥ रैवतमारभ्य महानित्यन्तेन । महानितीत्यतः परमेतानिति शेषः । एतान् रुद्रान् एतेषामेकादशरुद्राणां पार्षदान्घोरान्प्रेतविनायकांश्चान्यांश्च भूतस्य भार्या सुरूपाऽसूतेति । एतेनैका-दशरुद्रा भूतायाः पुत्रा इत्युक्तत्वात् सुरूपा रैवताद्येकादशरुद्रानसूतेति कथनमनुपपन्नमिति दूषणं परास्तम् । रुद्रानिति द्वितीया षष्ठ्यर्थ इत्यङ्गीकृत्यैकादशरुद्रपार्षदप्रेतविनायकानां सुरूपापुत्रत्वमुच्यत इति चाङ्गीकृत्यैकादशरुद्राणां सुरूपापुत्रत्वमुच्यत इत्यङ्गीकारात् ॥ १७,१८ ॥

प्रजापतेराङ्गिरसः स्वधापत्नी पितॄन्पुत्रत्वेन विशिष्टानकरोत् । अथानन्तरं प्रजापतेराङ्गिरसः पत्नी सती पतिव्रताऽथर्वाङ्गिरसं वेदं च पुत्रत्वेन विशिष्टमकरोत् । एतेन पुत्रत्व इत्येतदनन्वितमिति दूषणं परास्तम् । पुत्रत्व इति सप्तमी तृतीयार्थ इत्यङ्गीकृत्य विशिष्टान्विशिष्टमिति शेषं चाङ्गीकृत्या-करोदित्यनेनान्वय इत्यङ्गीकारात् ॥ १९ ॥

अथानन्तरं कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दित इति वचनात् । भगवान्कश्यपो ब्रह्मचोदितश्चतुर्मुखप्रेरितः सन् द्वे वैश्वानरसुते तु सम्यगुपयेमे । ज्ञानिनस्तयोर्मध्ये एकं पुलोमामाहुः, अपरां कालिकां चाहुरिति । एतेन पुलोमां कालिकां चेत्येकवचनान्तयोः शब्दयोर्द्वे वैश्वानरसुते इति द्विवचनान्तशब्दाभ्यामनन्वय इति दूषणं परास्तम् । ज्ञानिनस्तयोर्मध्ये एकामपरामाहुरिति पदानां शेषमङ्गीकृत्य पुलोमां कालिकामित्यनयोराहुरित्यनेनान्वय इत्यङ्गीकारात् ॥ ३३ ॥ इति श्रीभागवत-टिप्पण्यां षष्ठोऽध्यायः ॥ ६-६ ॥

॥ हरिः ॐ ॥ आत्मभूरज इत्यस्यात्मना परमात्मना निमित्तेन महैश्वर्यादिविशिष्टो भवतीत्यात्मभूः । अजः आत् परमात्मनो जायत इत्यतश्चतुर्मुखः । एतेनात्मभूरित्यनेन परमात्मन उत्पन्नस्योक्तत्वात् । अज इत्येतत्पुनरुक्तमिति दूषणं निरस्तम् । भवतीत्यत्र योग्यतयैश्वर्यादिविशिष्ट इति संबध्यत इत्यङ्गीकृत्यात्मभूरित्यस्य परमात्मनैश्वर्यादिविशिष्टो भवतीत्यर्थ इत्युक्तत्वात् ॥ २० ॥

हे ब्रह्मन्! विश्वरूप! पुत्रवता मयि पुत्राणां पितृशुश्रूषणं परो धर्म इत्येतत्सतां संमतम् । ब्रह्मचारिणामपुत्राणां पुत्राणां पितृशुश्रूषणं परो धर्मः किमुत वक्तव्यमित्येतद्धि प्रमाणप्रसिद्धमिति । एतेन सतामित्येतद्व्यर्थमिति दूषणं परास्तम् । इत्येतत्संमतमित्यध्याहृत्य पितृशुश्रूषणं परो धर्म इत्येतत्सतां संमतमिति वक्तुं सतामित्युक्तमित्यङ्गीकारात् । एतेनैवापुत्राणामिति वक्तव्ये ब्रह्मचारिणामिति कथनमनुपपन्नमिति दूषणं परास्तम् । ब्रह्मचारिशब्दस्यापुत्रत्वलक्षणत्वमङ्गीकृत्य ब्रह्मचारिणामित्यर्थ इत्यङ्गीकारात् ॥ २९ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ६-७ ॥

।। हरिः ॐ ।। यया नारायणविद्यया गुप्तः सहस्राक्ष इन्द्रः क्रीडन् क्रीडाशीलो बालः क्रीडामिव युद्धं कृत्वा सहावाहान् रिपुसैनिकान्निर्जित्य त्रैलोक्यां श्रियं बुभुज इति । एतेन क्रीडातो बालस्य जयस्यैवाभावेनानायासेन जयस्य सुतरामभावात् क्रीडन्निव विनिर्जित्येति कथनमनुपपन्नमिति दूषणं परास्तम् । क्रीडन्निवेत्यत्र क्रीडामित्यस्य युद्धं कृत्वेत्यर्थ इत्यङ्गीकारात् ।। १ ।।

देवर्षिवर्यः पुरुषान्तरार्चनादित्यस्य देवर्षिवर्यो महिदासनामा नारायणः । पुरुषान्तरार्चनादित्यत्र पुरुषशब्देन मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन मुख्यपुरुषा देवा ग्राह्याः । पुरुषान्तरार्चनाद्विष्णुपरिवारत्वबुद्धिं विना प्राधान्यबुद्ध्या ब्रह्माद्यन्यदेवताप्रजनात् । उपलक्षणमेतत् । विष्णुसमर्पणरहितकर्मभ्यो विष्णुस्मरणान्मामवत्वित्यर्थः । अतस्तात्पर्यम् ।। १७ ।।

दन्दग्धि दन्दग्धीति मध्यमपुरुषः प्रथमपुरुषार्थे । एतेन चक्रमरिसैन्यमतिशयेन दहतु इत्यर्थलाभार्थं दन्दग्धुं दन्दग्धुमिति वक्तव्यम् दन्दग्धि दन्दग्धीति कथनमनुपपन्नमिति दूषणं परास्तम् ।। २२ ।।

भगवान्नारायण एव वस्तुतः परमार्थतो यद्य(यथाय)थावस्थितं सदसन्मूर्त्तामूर्त्तात्मकं जगत् जगन्नियामक इत्येतद्धि प्रमाणप्रसिद्धम् । अनेन सत्यजगन्नियामकेनात एव सत्येन सत्यनामकेन भगवता निमित्तेन नोऽस्माकं सर्वे उपद्रवा नाशं यान्तु । एतेन यद्यथावस्थितं यच्च सदसदित्येतदनन्वितमिति दूषणं परास्तम् । तज्जगदित्यस्य शेषमङ्गीकृत्य तेनान्वय इत्यङ्गीकारात् । एतेनैव परमेश्वरस्य जगदैक्यस्य सर्वप्रमाणविरुद्धत्वात् सदसदात्मकजगदैक्यकथनमनुपपन्नमिति दूषणं परास्तम् । परमेश्वरस्य सदसज्जगन्नियामकत्वमुच्यत इत्यङ्गीकारात् । एतेनैव वस्तुत इत्येतद्व्यर्थमिति दूषणं परास्तम् । भगवन्निष्ठजगन्नियामकत्वं मायामयं न भवति किन्तु पारमार्थिकमिति वक्तुं वस्तुत इत्युक्तमित्यङ्गीकारात् । एतेनैव यथेत्येतद्व्यर्थमिति दूषणं परास्तम् । भगवन्नियम्यं जगन्मिथ्याभूतं न भवति किन्तु सत्यमेवेति वक्तुं यथाशब्दस्य यथावस्थितार्थत्वमङ्गीकृत्य यथेत्यनेन यथावस्थितत्वमुच्यत इत्यङ्गीकारात् । ननु राज्ञो यत्किञ्चिद्धर्मसहितामात्यादिनियामकत्ववत्परमेश्वरस्य यत्किञ्चिद्धर्मसहित-सर्वनियामकत्वं वक्तुं न शक्यते किन्तु सर्वधर्मसहितसर्वनियामकत्वं वक्तव्यम् । तथात्वे लक्ष्मीनिष्ठ-शोभयितृत्वादि धर्माणामपीश्वराधीनत्वं वक्तव्यम् । तदनुपपन्नम् । शोभाद्यर्थमाभरणात्मकलक्ष्मी-नारायणाभावप्रसङ्गादित्याशङ्क्य परिहरति ।। यथेति । यद्यपीति शेषः । यद्यपि नारायणो यथैकात्म्यानुभावेन यथावस्थितशोभयितृत्वादियावद्धर्मसहितलक्ष्मीनियामकत्वरूपमुख्यस्वामित्वप्रभावे-नाभारणाद्यैः । लक्ष्मीरूपैरिति शेषः । आभरणाद्यात्मकलक्ष्मीरूपो विकल्परहितः शोभादिविशेषरहित इत्येतत्स्वयं मुख्यं न तूपचरितम् । तथाऽपीति शेषः । तथाऽपि स्वमायया स्वेच्छया भूषणायुधलिङ्गाख्या भूषणाद्यात्मकत्वेन भूषणायुधध्वजादिलिङ्गाख्यशक्तीर्महालक्ष्मीर्धत्ते । अतः

शोभयितृत्वादिधर्मसहितलक्ष्मीनियामकत्वं युक्तमिति शेषः । सर्वज्ञो भगवान्हरिः । तेनेत्येकवचनं बहुवचनार्थे । तैर्लक्ष्म्यादिसर्वनियामकैः सर्वैर्लक्ष्म्यादिसर्वनिष्ठैः स्वरूपैरभिन्नरूपैः । सत्यमानेनेति तृतीया ल्यल्बोपनिमित्ता पञ्चम्यर्थे । मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यत इति वचनात् । मानशब्दो ज्ञानवाची । सत्यमानेन सत्यलक्ष्म्यादि जगन्नियामकत्वात् । सत्यनामकस्य स्वस्य ज्ञानानन्दत्वैव सदा सर्वकालेषु सर्वत्र सर्वदेशेषु सर्वगोऽस्मत्सर्वावयवेषु स्थितः सन् पात्विति ।। ता. अर्थः ।। यथा हि भगवानेवेति श्लोकत्रयस्य प्रतीकत्वेन ग्रहणम् । देवश्चतुर्भुजो विष्णुः सदसन्नियामकतया सदसद्रूपमुच्यते । न त्वैक्यात् । अनेन सत्यजगन्नियामकेन सत्येन सत्यनामकेन रूपेण मां पातु । एक एव भेदरहित एव, परः सर्वोत्तमो विष्णुर्व्याप्तो भूषाहेति । ध्वजेषु । ध्वज शब्दो ध्वजादिसर्वभगवच्चिन्होपलक्षकः । भूषणायुधध्वजादि- सर्वचिन्हात्मकलक्ष्मीरूपेषु स्वयमेव परममुख्यत एव तत्तच्छक्तिस्वरूपेण भूषणात्मकलक्ष्मीनिष्ठशोभयितृत्वादिशक्तिप्रदस्वरूपेण व्यवस्थितोऽज उत्पत्तिशून्यो देवः सर्वेश्वरो लक्ष्म्यादिसर्वनियामको हरिः । अनेन सत्येनेत्येकवचनान्तेन सत्यलक्ष्म्यादिजगन्निष्ठतन्नियामकैः सत्येन सत्यनामकरूपैर्मां पात्विति ।। ३१-३२-३३ ।। इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ।। ६-८ ।।

।। हरिः ॐ ।। य ईशः सर्वेषां स्वामी निजमाययैव स्वरूपभूतेच्छयैव नोऽस्मान्ससर्ज । वयं येन प्रेरिता इति शेषः । चशब्द एवार्थे । प्रेरिता एव विश्वमनुसृजाम । विसर्गलोपश्छान्दसः । अनुसृजामोऽनन्तरं भाविसृष्टिं कुर्मः । वयं यस्य पुरोऽग्रे समेताः सेवकतया स्थितास्तस्य तव । अपिशब्द एवार्थे । लिङ्गमेवेतरस्य व्यावृत्तिज्ञापकगरुडवाहनत्वादिकमेव पश्यामः । अत्रापि विसर्गलोपश्छान्दसः । पश्यामः । ननु सर्वेशत्वसर्वस्रष्टत्वसर्वसृष्टिकारयितृत्वसर्वसेव्यत्वसर्वस्वातन्त्र्यादिकं पश्यामः । सर्वेशत्वादिकं न पश्याम इत्यत्र हेतुमाह ।। पृथगिति । यतोऽत इति शेषः । यतो वयं स्वतन्त्रेशा इत्यभिमानविशिष्टा अतः सर्वेश्वरत्वादिकं न पश्याम इति । अनेन भगवल्लिङ्गदर्शनं प्रति पृथगीशमानत्वस्य हेतुत्वाभावात् । यतः पृथगीशमानिनोऽतो लिङ्गं पश्याम इति वचनमुपपन्नमित्याशङ्का परिहृता ।। ता० अर्थः ।। अपिशब्दस्यैवार्थत्वमङ्गीकृत्य पश्यामेत्यत्र विसर्गलोपं चाङ्गीकृत्य लिङ्गमेव पश्याम इत्यन्वयः प्रदर्शितः । देवानां सर्वदा पृथगीश्वरत्वाभिमानोऽस्तीति भ्रमं परिहरति ।। कदाचिदिति । देवानामपि । तुशब्द एवार्थे । कदाचिदेवाभिमानः सोऽपि कादाचित्काभिमानोऽपि सन्निव विद्यमान एव । न दृढो भवतीति यावत् । कदाचिदेवेत्युक्तं विवृणोति ।। प्राय इति । सोऽभिमानो देवानां कालेषु सृष्ट्यादिकालेषु प्रायः सर्वप्रकारेण नास्त्येव । सोऽपि कादाचित्काभिमानोऽपि देवेषु । तुशब्द एवार्थे । तारतम्येनैव वर्तत इति ।। २४ ।।

परममङ्गलपरमकल्याणेत्यस्य परममङ्गलसंपन्न परममङ्गलप्रदेत्यर्थः । तेन पुनरुक्तिदूषण-स्यानवकाशः ॥ ३२ ॥

अथशब्दो यस्मादित्यर्थे । यस्मात्कारणाद्वयम् । भगवानित्येतदर्थवशाद्वितीयान्तं संबध्यते । भगवन्तं विदामो जानीमः । तत्र तस्मात्कारणादिह । प्रवर्तमान इति शेषः । सृष्ट्यादौ प्रवर्तमानो भगवान्नारायणो गुणविसर्गापतितो गुणानां सत्त्वादिगुणानां विविधो सर्गः सृष्टिर्यस्मिन्स गुणविसर्गः संसारस्तत्रापतितः सन् पारतन्त्र्येण देवदत्तवत्स्वकृतकुशलाकुशलफलं स्वसंपादितपुण्यपापफलं सुखदुःखं च किमुपाददात्यनुभवति, आहोस्वित्सृष्ट्यादौ प्रवर्तमानोऽपि नारायण आत्मारामः स्वरूपसुखपूर्ण उपशमशीलो विषयाकांक्षारहितस्वभावः समंजसदर्शनो यथार्थसर्वज्ञानः सन् उदास्ते उत्कृष्टतया । स्वातन्त्र्येणेति यावत् । आस्ते । संशयोऽस्माकमिति शेषः । इति संशयोऽस्माकं नास्ति, किन्तु पारतन्त्र्यादिकमिति शेषः । न विदाम इत्यस्यावृत्तिः । किन्तु पारतन्त्र्यादिकं नास्तीति निश्चिनुम इत्येतद्ध वाव प्रमाणप्रसिद्धम् । ननु विरोधात्सृष्ट्यादौ प्रवर्तमानत्वं पारतन्त्र्याद्यभावश्चेश्वरस्याङ्गीकर्तुं न शक्यत इत्यत आह ॥ न हीति । भगवति । उभयमिति प्रथमा षष्ठ्यर्थे । उभयस्य सृष्ट्यादौ प्रवर्तमानत्वस्य पारतन्त्र्याद्यभावस्य च विरोधो नेत्येतद्ध्यनुमानद्वयं सिद्धम् । अनुमानद्वयं दर्शयति ॥ परिगणितेति । अनेनानन्तगुणपूर्णत्वादचिन्त्यलक्षणैश्वर्यवत्त्वाच्च सृष्ट्यादौ प्रवर्तमानस्यापीश्वरस्य पारतन्त्र्याद्यभावो विरुद्धो न भवतीत्युक्तं भवति । गुणानामानन्त्यमुपपादयति ॥ अनवगाह्येति । अनेन भगवद्गुणानां परिच्छिन्नत्वे भगवन्माहात्म्यं ज्ञातुं शक्येत । भगवन्माहात्म्यस्य ज्ञातुमशक्यत्वात् । भगवद्गुणा अनन्ता इत्युक्तं भवति । ननु सर्वैर्वादिभिर्भगवन्माहात्म्यस्य ज्ञातत्वात्कथं भगवन्माहात्म्यस्य ज्ञातुमशक्यत्वमित्यत आह ॥ अर्वाचीनेति । अर्वाचीनेति वादिनां विशेषणम् । विकल्पो, 'विष्णुः स्वतन्त्रो वा परतन्त्रो' वेत्यादिसंशयः । वितर्कः प्रायो विष्णुः परतन्त्रो भविष्यतीत्याद्यूह्यः । विचारशब्देन विचारसाध्यो निर्णयो गृह्यते । विचारो ' विष्णुः परतन्त्र एवे'त्यादिनिर्णयः । प्रमाणाभासो, विष्णुः परतन्त्र इत्यादिनिर्णयहेतुप्रत्यक्षागमरूपं प्रमाणाभासः । कुतर्को, विष्णुः परतन्त्रो दुःखित्वादित्याद्यनुमानाभासः । शास्त्रं स्वगुर्वादिकृतं दुष्टशास्त्रमित्येतैः कलिलं कलुषीकृतमन्तःकरणं येषां ते कलिलान्तःकरणा अत एव दुरवग्रहा विष्णुः परतन्त्र इत्यादिदुराग्रह-विशिष्टास्ते च ते मायावादिनश्चार्वाचीनास्तामसाश्चेति विकल्पवितर्क- विचारप्रमाणाभासकुतर्ककुशास्त्र-कलिलान्तःकरणदुरवग्रहवादिनश्च तेषां विवादानवसरे च । विशेषणसमुच्चये चशब्दः । अवसरशब्देन अवकाशप्रदत्वं गृह्यते । विवादस्य विष्णुः परतन्त्र इत्यादिविरुद्धवादस्यानवकाशप्रदत्वरहिते विवादेन । नरकाद्यनर्थप्रद इति यावत् । तेन विष्णोर्वादविवादविषयत्वात् विवादानवसर इति

वादविवादविषयत्वकथनमनुपपन्नमिति चोद्यस्यानवकाशः । अनेन यदि गुर्वादिभिर्विष्णुमाहात्म्यं ज्ञातं स्यात्तर्हि तेभ्यो विष्णुर्नरकाद्यनर्थं न दद्यात् । तेन ज्ञायते तेषां विष्णुमाहात्म्यज्ञानं नास्तीत्युक्तं भवति । ननु प्राकृतस्वभावस्य विष्णोः कथमनन्तगुणपूर्णत्वमित्यत आह ॥ उपरतेति । उपरतसमस्तमायामय उपरतसमस्तप्रकृतिस्वभावः । ननु यदीश्वरे सृष्ट्यादौ प्रवर्तमानत्वं पारतन्त्र्याभावादिकं चाचिन्त्यशक्त्या सुघटं स्यात्तर्ह्यचिन्तशक्त्या स्वातन्त्र्यपारतन्त्र्यसुखित्वदुःखित्वादिकमपि सुघटं स्यादित्याशङ्क्य समाधत्ते ॥ केवलेत्यादिना । स्थितस्येति शेषः । केवलस्वात्ममायामसहायाचिन्त्यस्वरूपशक्तिमन्तर्धाय स्थितस्य विष्णोः कोऽर्थो दुर्घटो भवति । न कोऽप्यर्थ इत्येतत् । नु इव । इवशब्द एवार्थे । निश्चितमेव । अतो विष्णोः स्वातन्त्र्यपारतन्त्र्यसुखित्वदुःखित्वादिकमचिन्तशक्त्या सुघटं स्यादिति चेत् । नेति शेषः । अचिन्त्यशक्त्या विष्णोः स्वातन्त्र्यपारतन्त्र्यसुखित्वदुःखित्वादिकं सुघट इत्येतन्नेत्यत्र हेतुमाह ॥ स्वरूपेति । स्वरूपद्वयशब्देन स्वरूपद्वयप्रमाणं गृह्यते । विष्णोः स्वातन्त्र्यपारतन्त्र्य-सुखित्वदुःखित्वादिविरुद्धस्वरूपद्वयस्य सद्भावे प्रमाणाभावात् । अनेन यत्प्रमाणप्रमितं विरुद्धं तदेवाचिन्त्यशक्त्या सुघटमित्युच्यते । विष्णोः स्वातन्त्र्यपारतन्त्र्यसुखित्वदुःखित्वादौ प्रमाणाभावाद-चिन्त्यशक्त्या सुघटमिति वक्तुं न शक्यत इत्युक्तं भवति । ननु विष्णोः स्वातन्त्र्यपारतन्त्र्य-सुखित्वदुःखित्वादौ जनानां प्रत्यक्षं प्रमाणमित्यत आह ॥ समेति । समविषममतीनां यथार्था-यथार्थबुद्धीनां सज्जनदुर्जनानां मतं ज्ञानमनुचरसि । 'विष्णुः स्वतन्त्रः सुखी'त्यादिसज्जनकर्तृक-यथार्थज्ञानस्य 'विष्णुः परतन्त्रो दुःखी'त्यादिदुर्जनकर्तृकायथार्थज्ञानस्य विषयो भवसीति यावत् । अनेन विष्णुः परतन्त्रो दुःखीत्यादिदुर्जनानां प्रत्यक्षप्रमाणमित्युक्तं भवति । अत्र दृष्टान्तमाह ॥ यथेति । मतमित्येतदर्थवशात् षष्ठ्यन्तं संबध्यते । विषय इति शेषः । यथा रज्जुखण्डोऽयं सर्प इत्ययथार्थबुद्धि-संपन्नानां मतस्यायं सर्प इत्ययथार्थज्ञानस्यायं रज्जुखण्ड इति यथार्थवृद्धिसंपन्नानां मतस्यायं रज्जुखण्ड इति यथार्थज्ञानस्य च विषयो भवति तथेति ॥ ता० अर्थः ॥ देवदत्तवदित्यतः परं विष्णुः स्वतन्त्रो वा परतन्त्रो वेत्यादिसंशयस्येति शेषः । अथ तत्र भगवान् किं देवदत्तवदित्यारभ्य न विदाम इत्यन्तेन विष्णुः स्वतन्त्रो वा परतन्त्रो वेत्यादिसंशयस्याक्षेपः क्रियते । विष्णुः स्वतन्त्रो वा परतन्त्रो वेत्यादिसंशयो नास्तीत्युच्यत इति यावत् । संशयो नास्तीत्युच्यत इत्येव वक्तव्ये आक्षेप इति वचनं स्वतन्त्रः परतन्त्रो वा ज्ञोऽज्ञो दुःखी सुखी नु किमित्यादिसंशयः क्व स्यादिति प्रमाणानुसारेण । न हि विरोध उभयमित्यारभ्य उपरतसमस्तमायामय इत्यन्तवाक्यस्याभिप्रायमाह ॥ अचिन्त्यशक्तेरिति । उपरतसमस्तमायामय इत्यनूद्यार्थमाह ॥ केवलमिति । को नु दुर्घट इव भवतीत्यत्र स्वरूपद्वया-भावादित्यनेन हेतुरुच्यत इति भ्रमं परिहरति ॥ स्वरूपद्वयेति । केवलस्वात्ममायामन्तर्धाय को नु दुर्घट इव भवतीति वाक्यं शङ्कावाक्यम् । स्वरूपद्वयाभावादित्यारभ्य यथा रज्जुखण्डः सर्पादिधियानित्यन्तं

वाक्यं समाधानवाक्यम् । समग्रगद्यार्थे प्रमाणमाह ॥ स्वतन्त्र इति । पुरुषोत्तमे विषये स्वतन्त्रो वा परतन्त्रो वा ज्ञो वाऽज्ञो वा किं सुखी किन्नु किं वा दुःखीत्यादिसंशयो ज्ञानिनां देवादीनां क स्यात्कथं स्यात् । तर्हि देवादीनामीश्वरविषये कथं ज्ञानमस्तीत्यत आह ॥ तस्येति । विदो ज्ञानिनो देवादयः । तस्य हरेरनन्तगुणात्वाद्धेतोः पूर्णभक्तित्वतः पूर्णशक्तित्वाद्धेतोश्चास्य हरेर्निश्चयात् । स्वातन्त्र्यादिकमेव जानन्ति न तु पारतन्त्र्यादिकम् । ननु सृष्ट्यादौ प्रवर्तमानस्येश्वरस्य पारतन्त्र्याद्यभावो दुर्घट इत्यत आह ॥ घटकत्वादिति । तच्छक्तेः परमेश्वरशक्तेः सर्वशः सर्वैर्दुर्ज्ञेयत्वादचिन्त्यत्वात् । दुर्घटस्य पारतन्त्र्याद्यभावस्य । सुघटत्वात्परमेश्वरस्य पारतन्त्राद्यभावः । युक्त इति शेषः । कथं तर्हि वादिभिः परमेश्वरस्य पारतन्त्र्यादिकमुच्यते कथं वा ज्ञायत इत्यत आह ॥ तच्छक्तेरिति । तच्छक्तेर्भगवच्छक्तेरविदोऽचिन्त्यत्वज्ञानशून्या वादिनः । यथेति शेषः । यथा जीवं परतन्त्रम् । उपलक्षणमेतत् । दुःखादिविशिष्टं वदन्ति । एवं तथाऽमुं परमेश्वरं पारतन्त्र्यादिविशिष्टं वदन्ति । परमेश्वरो दुर्घटया शक्त्याऽज्ञो ज्ञानशून्य इत्यज्ञानां बुद्ध्याऽवगम्यते । ज्ञायतो दृष्टान्तं वदन्नुक्तं वृणोति ॥ यथेति । यथा रज्जुः सर्पधिया सर्प इत्ययथार्थबुद्ध्या, रज्जुबुद्ध्या रज्जुरिति यथार्थबुद्ध्या च गम्यते तथा महाविष्णुः स्वेच्छयैव । चशब्दौ परस्परसमुच्चयौ । यथार्थबुद्ध्या स्वतन्त्र इत्यादियथार्थबुद्ध्या च मिथ्याबुद्ध्या पारतन्त्र्य इत्याद्ययथार्थबुद्ध्या च गम्यते । अनुसारतो ज्ञानानुसारतः फलदः शुभाशुभफलदश्चेति ॥२३॥

अथशब्दश्चार्थः । संनिखिलेत्यादिविशेषणसमुच्चये । हे भगवन् ! अस्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य समस्तजगदुत्पत्तिस्थितिसंहारान्प्रति निमित्तीभूता दिव्यस्वेच्छानिमित्ता क्रीडा यस्य तस्य । सकलजीवनिकायानां समस्तब्रह्मादिजीवसमुदायानामन्तर्हृदयेषु ब्रह्मप्रत्यगात्मस्वरूपेण गुणपूर्णप्रत्यगात्मस्वरूपेण । बहिरपि तदुपादानोपलंभकतया । उपादानेति भावप्रधानो निर्देशः । तस्य प्रधानस्योपादानकारणत्वप्रापकतया प्रधानरूपेण । ब्रह्मेत्येतद्बुद्ध्या विवेकेन प्रधानरूपेणेत्यस्यापि विशेषणम् । गुणपूर्णप्रकृतिस्थितरूपेण च यथा देशकालदेहावस्थानविशेषम् । देहशब्दो जडाजडस्य सर्वोपलक्षकः । यथावस्थितदेशकालदेहादिजडाजडं यथावस्थितदेहाद्यवस्थानं यथावस्थितदेशादिनिष्ठधर्मं चानुभवतः । सर्वप्रत्ययसाक्षिणः सर्वज्ञानसाक्षात्कारविशिष्टस्याकाशशरीरस्याकाशवद्व्याप्तं चिदानन्दशरीरं यस्य । परमात्मनो मुख्यस्वामिनः साक्षात्परब्रह्मणोऽनुपचरितपरब्रह्मणः । तत इह वा इहलोके वा परलोके वा कियान्कः । अर्थविशेषो विज्ञापनीयः स्यात् । न कोऽपि । अत्र दृष्टान्तमाह ॥ विष्फुलिङ्गादिभिरिति । महाप्रकाशस्येति शेषः । महाप्रकाशस्य हिरण्यं रेतो यस्य तस्याग्नेः । अल्पप्रकाशैरिति शेषः । अल्पप्रकाशैर्विष्फुलिङ्गादिभिर्विष्फुलिङ्गखद्योतादिभिरिव यथा प्रयोजनम् । नास्तीति शेष इति ॥ अयं भावः ॥ अग्निः स्वसामर्थ्येनैव सर्वं प्रकाशयति न तु विष्फुलिङ्गादयस्तत्र सहकारिणस्तथा त्वं स्वत एव सर्वं जानासि । अतोऽस्मद्विज्ञापनं तव

नापेक्षितमिति । एतेन प्रत्यगात्मस्वरूपस्येव प्रधानगतरूपस्यापि ब्रह्मत्वात् ब्रह्मप्रत्यगात्मस्वरूपेणेति प्रत्यगात्मस्वरूपस्यैव ब्रह्मत्वाभिधानमयुक्तमिति दूषणं परास्तम् । प्रधानरूपेणेत्यनेनान्वय इत्यङ्गीकारात् । एतेनैव न तदुपादानोपलंभकतयेत्येतदनन्वितमिति दूषणं परास्तम् । प्रधानरूपेणेत्यनेनान्वय इत्यङ्गीकारात् । एतेनैव यथा देशकालदेहावस्थानविशेषमित्यत्र यथेत्येतद्व्यर्थमिति दूषणं परास्तम् । भगवज्ज्ञानस्यापि देशकालादेर्मिथ्यात्वमिति मायावादिमतनिरासार्थं यथेत्यनेन सत्यत्वमुच्यत इत्यङ्गीकारात् । एतेनैव देशकालदेहादिसर्वपदार्थज्ञानस्य वक्तव्यत्वाद्देश-कालदेहमात्रकथनमनुपपन्नमिति दूषणमपहसितम् । देहशब्देन देशकालव्यतिरिक्तजडाजडस्य सर्वस्योपलक्षणमित्यङ्गीकारात् । एतेनैव भगवच्छरीरस्य चिदानन्दात्मकत्वेनाकाशात्मकत्वाभावादा-काशशरीरस्येतदनुपपन्नमिति चोद्यं परिहृतम् । आकाशशरीरस्येत्यनेन चिदानन्दाद्यात्मकभगवच्छरीर-स्याकाशवद्व्याप्तत्वमुच्यत इत्यङ्गीकारात् ।। ३४ ।। इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ।। ६-९ ।।

।। हरिः ॐ ।। मर्त्यः पारक्यैः परेषां श्वशृगालादीनां भक्षैः क्षणभंगुरैः क्षणमध्ये नश्वरै-रस्वार्थैर्यथेष्टभोगवचनार्थानुकूलैः स्वज्ञातिविग्रहैः स्वज्ञातिकलहसंपादकैः शरीरादिभिर्नोपकुर्यादिति यत्तद्दैन्यं दारिद्र्यसाधनमत एव कष्टं दुःखसाधनमत एवाहो आश्चर्यमिति ।। १० ।।

शृणुध्वमिति बहुवचनमेकवचनस्यादेशः । तिङा च तिङिति वचनात् । तेन हे विप्रचित्त ! इत्यादि-संबुध्येकवचनान्तशब्दानुसारेण प्रत्येकं त्वमित्येकवचनान्तशब्दस्या हर्तव्यत्वात् । त्वमित्येकवचनान्तस्य शब्दस्य शृणुध्वमिति बहुवचनान्तेन शब्देनान्वय इति दूषणस्यानवकाशः । शृणुध्वमिति बहुवचन-स्यैकवचनादेशत्वमङ्गीकृत्य त्वमितिशब्दस्य शृणुध्वमित्यनेन प्रत्येकमन्वय इत्यङ्गीकारात् ।।३२।। इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ।। ६-१० ।।

।। हरिः ॐ ।। कालानुकूलैरित्यस्यानुकूलकालैरित्यर्थः । अत्र विशेषणस्य परनिपातः छान्दसः । तेनानुकूलः कालो येषामिति बहुव्रीहिसमासे सप्तमीविशेषणे बहुव्रीहाविवानुकूलशब्दस्य पूर्वनिपातेऽनु-कूलकालैरिति वक्तव्यं कालानुकूलैरित्येतदनुपपन्नमिति दूषणं परिहृतम् ।। २ ।।

नालं वनमित्यस्य नालं नालस्य नालवतः पद्मस्य वनमित्यर्थः । एतेन पद्मस्य वनमिति वक्तव्ये नालं वनमिति वनस्य नालरूपत्वाभिधानमयुक्तमिति दूषणं परास्तम् । नालशब्दस्य मत्वर्थीयार्श आद्यजन्तत्वमङ्गीकृत्य पद्मवाचकत्वं चाङ्गीकृत्य नालमिति द्वितीयायाः षष्ठ्यर्थत्वं चाङ्गीकृत्य नालं वनमित्यनेन पद्मस्य वनमित्युच्यत इत्यङ्गीकारात् ।। ८ ।।

कृच्छ्रेण मच्छूलविभिन्नदेहमित्यस्य मच्छूलविभिन्नदेहमत एव कृच्छ्रेण परमसंकटेन युक्तमित्यर्थः । तेन कृच्छ्रेणेत्येतदनन्वितमिति दूषणं परास्तम् । कृच्छ्रेणेत्यतः परं युक्तमित्यस्य शेषमङ्गीकृत्य तेनान्वय इत्यङ्गीकारात् ॥ १६ ॥

नाकपृष्ठमित्यस्य स्वर्गं तदुच्चमहदादिकमित्यर्थः । तेन नाकमित्यनेनैव पूर्णत्वात्पृष्ठमित्येतद्व्यर्थमिति शङ्काऽनवकाशः । पृष्ठशब्दस्योच्चार्थत्वमङ्गीकृत्य स्वर्गोच्चमहरादिलोकः पृष्ठशब्देनोच्यत इत्यङ्गीकारात् ॥ २५ ॥ इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ ६-११ ॥

॥ हरिः ॐ ॥ आविद्ध्य शूलमित्यस्य शूलं भ्रामयित्वेत्यर्थः । एतेन शूलस्य ताडनकर्मत्वस्याभावात् शूलमाविद्ध्येति शूलस्य ताडनकर्मत्वाभिधानमनुपपन्नमिति चोद्यं परिहृतम् । ताडनार्थकव्यधधातोर्लक्षणया ताडनकारणचालनार्थत्वमङ्गीकृत्याविद्ध्येत्यस्य भ्रामयित्वेति तात्पर्यार्थ इत्यङ्गीकारात् ॥ २ ॥

ननु भूतानीशतन्त्राणीति सर्वभूतानां यदीश्वराधीनत्वमुक्तं तदनुपपन्नम् । सर्गादिकर्तॄणां चतुर्मुखादिभूतानामीश्वराधीनत्वाभावादित्यत आह ॥ पुरुष इति ॥ यद्यस्मात्कारणात् शक्नुवन्तीत्येतदर्थवशादेकवचनान्तं सत् पुरुष इत्याद्येकवचनान्तेन संबध्यते । पुरुषश्चतुर्मुखः । भगवत इति शेषः । भगवतोऽनुग्रहाद्विनाऽस्य जगतः सर्गादौ न शक्नोति । प्रकृतिर्महालक्ष्मीर्भगवतोऽनुग्रहाद्विनाऽस्य सर्गादौ न शक्नोति । व्यक्तं शेषः भगवतोऽनुग्रहाद्विनाऽस्य सर्गादौ न शक्नोति । आत्मभूतेन्द्रियाशया आत्मा वायुर्भूतानि भूताभिमानिदेवा इन्द्रियाणि इन्द्रियाभिमानिदेवा आशय इन्द्र इत्येते भगवतोऽनुग्रहं विना सर्गादौ न शक्नुवन्ति । तस्मात्सर्वभूतानामीश्वराधीनत्वं युक्तमिति शेषः । ननु चतुर्मुखादिजीवानामीश्वरेणैक्यात्कथं चतुर्मुखादिसर्वनियामकत्वमीश्वरस्येत्यत आह ॥ अविद्वानिति । य एवंभूतं सर्वभूतनियामकमीश्वरं नारायणमनीशमात्मानं जीवं मन्यते । जीवेश्वरयोरैक्यं मन्यत इति यावत् । सोऽविद्वान्मिथ्याज्ञानीति । एतेन जीवेश्वरयोरैक्यज्ञानिनो मिथ्याज्ञानित्वे वक्तव्येऽविद्वानिति ज्ञानाभावकथनमनुपपन्नमिति शङ्का परिहृता । मुख्यामुख्यन्यायेन विद्वच्छब्दस्य यथार्थज्ञान्यर्थत्वमङ्गीकृत्य नञोऽन्यार्थत्वं चाङ्गीकृत्य नञेवयुक्तन्यायं चाश्रित्याविद्वानित्यनेन मिथ्याज्ञानमित्युच्यत इत्यङ्गीकारात् । ननु जीवेश्वरैक्यज्ञानिनां मिथ्याज्ञानित्वं कुत इत्याशङ्क्य येन स्नेहपूर्वकं जीवेश्वरैक्यज्ञानिनः पश्यन्ति तेषां नरकप्राप्तिर्भवति । तेन ज्ञायते जीवेश्वरैक्यज्ञानिनो मि[illegible]ज्ञानिन इति समाधानं द्रष्टव्यमित्यभिप्रेत्याचार्यैर्जीवेश्वरैक्यज्ञानिदर्शनेन नरको भवतीत्यत्र मन्यतेऽनीशमिति प्रतीकं गृहीत्वा प्रमाणमुदाहृतम् । एतेन जीवेश्वरैक्यज्ञानिद्रष्टॄणां नरकप्राप्तिर्भवतीत्यत्र प्रमाणोदाहरणमसङ्गतमिति दूषणानवकाशः । पुरुषादिशब्दानां हिरण्यगर्भाद्यर्थत्वसाधनार्थं हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः। शेषो व्यक्तस्तथैवेन्द्र आशयः समुदाहृत इति प्रमाणशेषोदाहरणं कृतमिति द्रष्टव्यम् ॥ ११ ॥

समः स्यात्सुखदुःखाभ्यामित्यस्य सुखदुःखे प्राप्य निर्विकारः स्यादित्यर्थः । तेन सुखदुःखयोरिति वक्तव्यमिति शङ्कानवकाशः । सुखदुःखाभ्यामिति पञ्चमी ल्यब्लोपनिमित्तेत्यङ्गीकृत्य सुखदुःखाभ्यामित्यस्य सुखदुःखे प्राप्येत्यर्थमङ्गीकृत्य सुखदुःखयोरित्यर्थलाभ इत्यङ्गीकारात् ॥ १४ ॥

भगवति ज्ञानविज्ञानादिषड्गुणसंपन्नेऽत एव निःश्रेयसेश्वरे मोक्षस्वामिनि । मोक्षप्रद इति यावत् । हरौ यस्य भक्तिस्तस्य क्षुद्रैर्ज्ञानादिनाऽल्पैरत एव क्षुद्रफलप्रदैरन्यदेवैः किं प्रयोजनम् । अत्र दृष्टान्तमाह ॥ विक्रीडत इति । अमृतांबोधौ क्षीरसमुद्रे विक्रीडतः पुरुषस्य खातकोदकैः कूपाद्युदकैर्यथा प्रयोजनं नास्तीति । एतेन यस्येति पूर्वार्धेनानन्वित इति दूषणं परिहृतम् । तस्येति शेषमङ्गीकृत्य किं क्षुद्रैरित्यनेनान्वय इत्यङ्गीकारात् । एतेनैव खातकोदकैरित्यनेन क्षुद्रत्वस्य प्राप्तत्वात् क्षुद्रैरित्येतद्व्यर्थमिति दूषणं परास्तम् । क्षुद्रैरित्यस्य खातकोदकैरित्यनेनान्वयस्यानङ्गीकारात् ॥ २२ ॥

वार्त्रहत्ये वृत्रहननसंबन्धियुद्धे ज्योतिषां सूर्यादिज्योतिषामयनेऽयनार्थं दक्षिणायनोत्तरायणसंज्ञकमार्गस्य गमनार्थं यो यावानहर्गणो भवति तावानहर्गणेन । षष्ठ्युत्तरत्रिशतदिनैरिति यावत् । न्यपातयदित्यर्थः । एतेन ज्योतिषामित्येतत्तावदहर्गणेत्येतच्चानन्वितमिति दूषणं परास्तम् । दक्षिणायनोत्तरायणसंज्ञकमार्गस्येत्यस्याहर्गणो भवतीत्यस्य च शेषमङ्गीकृत्यायन इति सप्तमी तादर्थ्ये इति चाङ्गीकृत्यान्वयस्योक्तत्वात् । ननु नर्मदातीरे युद्धस्यारब्धत्वान्नर्मदातीरे वृत्रवधो वक्तव्यः । स चानुपपन्नः । ग्रन्थान्तरे समुद्रतीरे वृत्रवधस्योक्तत्वात् । वज्रेण वृत्रशिरच्छेदः कृत इत्यनुपपन्नम् । ग्रन्थान्तरे फेनेन वृत्रशिरच्छेदः कृत इत्युक्तत्वात् । वज्रो वृत्रकन्धरं षष्ठ्युत्तरत्रिशतदिनैर्न्यपातयदित्यनुपपन्नम् । विलंबकारणाभावादित्याशङ्कापरिहारार्थं तात्पर्ये उक्तम् ॥ तस्यार्थः ॥ सुरेश्वर इन्द्रो नर्मदातीरे वृत्रेण सह युद्धं कृत्वा वृत्रस्य मरणकालोऽनागत इति ज्ञात्वा युद्धं त्यक्त(त्वात्)वान् । अथो युद्धत्यागानन्तरं समयेन समयार्थं मरणकालागमनार्थं वृत्रेण सन्धितः सन्धानं प्राप्तः करग्रहो वृत्रकरग्रहणवान् वृत्रेण सह समुद्रतीरे विचरन् अस्य वृत्रस्य फेनेनापि वधं विचरन् जानन् नर्मणा विनोदेन फेनेन मां जहीति वृत्रेण वाचयित्वा पादस्पर्शविवादं च कृत्वा त्वया मत्पादस्पर्शः कृत इति व्याजेन वृत्रेण कलहं च कृत्वा युद्धदंशितः सन्नद्धः फेने वज्रं समावेश्य वृत्रहननार्थं विष्णुयुक्तं वज्रं व्यसर्जयत् । स वज्रो ध्यायतो विष्णुं ध्यायतस्तस्य वृत्रस्य शिरो वत्सरेणापनुददिति ॥ ३३ ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ ६-१२ ॥

॥ हरिः ॐ ॥ भो मुने! शुक्राचार्य! इन्द्रस्यानिर्वृतेर्दुःखस्य हेतुं कारणं श्रोतुमिच्छामि । नन्वयं प्रश्नोऽनुपपन्नः । वृत्रवधरूपदुःखकारणस्य सिद्धत्वादित्यत आह ॥ येनेति । येन वृत्रवधेन देवाः सुखिन आसन् तेनैव वृत्रवधेन हरेरिन्द्रस्य दुःखं कुतो भवेत् । अतो दुःखकारणप्रश्नो युक्त इति शेषः । एतेन येनासत्सुखिनो देवा हरेर्दुःखं कुतो भवेदिति व्यर्थमिति दूषणं परास्तम् ॥ ३ ॥

यत् योऽग्निदूतोऽग्निः सर्वपूज्योऽप्यग्निर्दूतो यस्य सोऽग्निदूतः स इन्द्र इह पुष्करनालतन्तुष्व-लब्धभोगोऽद्भिः सर्वदेवताभिः । आपो वै सर्वदेवता इति श्रुतेः । अलक्षितोऽदृष्टो ब्रह्मवधाद्ब्रह्मणो वृत्रवधाद्विमोक्षं विमोक्षकारणं ब्रह्म सञ्चिन्तयन् । साहस्रम् । दीर्घश्छांदसः । सहस्रवर्षाणि पुष्करनालतन्तूनावसदिति । एतेन यत इति वक्तव्ये यदित्यनुपपन्नमिति दूषणं पराकृतम् । लिङ्गव्यत्ययेन यदित्युक्तमित्यङ्गीकारात् । एतेनैवाग्निदूत इत्येतद्व्यर्थमिति दूषणमपास्तम् । सर्वपूज्योऽप्यग्निरिन्द्रस्य दूत इतीन्द्रस्य महामाहात्म्यमग्निदूत इत्युक्तमित्यङ्गीकारात् ॥ १५ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ ६-१३ ॥

॥ हरिः ॐ ॥ सिद्धानामित्यस्यापरोक्षज्ञानोत्तरकर्मणा योग्यानन्दातिशयं प्राप्तानामित्यर्थः । तेन सिद्धानामित्येतन्मुक्तानामित्यनेन गतार्थमिति चोद्यस्यानवकाशः । अत एव तात्पर्यम् ॥ ५ ॥

राज्ञो राजाऽऽत्मानं प्रकृतिष्वद्धा निधाय स्थापयित्वा श्रेयः फलमाप्नुयात् । हे नरदेव! प्रकृतयस्तथाऽहितकारणानि शत्रवो वशवर्तिनोऽपि किमिति वक्ष्यमाणेन संबन्ध इति । तेन राजेति वक्तव्यं राज्ञ इत्येतदनुपपन्नमिति दूषणं परिहृतम् । राज्ञ इति षष्ठी प्रथमार्थ इत्यङ्गीकृत्य राज्ञ इत्यस्य राजेत्यर्थ इत्युक्तत्वात् ॥ १८ ॥

सप्रजाभिः सप्रजापत्नीभिः सपत्न्या तिरस्कृतां स्त्रियं धिगिति पूर्वेणान्वयः । अत्र दृष्टान्तमाह ॥ दासी वेति । स्वामिना तिरस्कृतां दासीमिव । ननु दासीमिवेत्यनेनैव पूर्णत्वात्स्वामिना तिरस्कृता-मित्येतद्व्यर्थमित्यत आह ॥ दासीनामिति । स्वामिनः परिचर्यया सेवयाऽभीक्ष्णं सर्वदा लब्धमानानां लब्धबहुमानानां दासीनां कोऽनु सन्तापो न कोऽपि । अतो दौर्भाग्यात्तिरस्कृता दास्येव दृष्टान्त इति वक्तव्यम् । दृष्टान्तान्तरमाह दास्या इति । दास्या दासी यथा दुर्भगा तथा । सप्रजया सपत्न्या तिरस्कृता स्त्री दुर्भगेति । एतेन चित्रकेतुपत्नीनां मध्ये एकस्या एव सप्रजात्वात्सप्रजया सपत्न्येति वक्तव्यं सप्रजाभिः सपत्नीभिरित्यनुपपन्नमिति दूषणं परिहृतम् । सप्रजाभिः सपत्नीभिरिति बहुवचनमेक-वचनार्थ इत्यङ्गीकारात् ॥ ४०,४१ ॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ ६-१४ ॥

॥ हरिः ॐ ॥ अयं सृष्टौ सृष्टेरुत्पत्तेः पुरा पूर्वकाले तव कः स्यान्न कोऽपि । त्वं चास्य कतमः कोऽसि न कोऽपि । अतो वर्तमानकालात्परं परस्मिन्कालेऽयं तव कः स्यात् । त्वं चास्य कतमः । एवमिदानीं वर्तमानकालेऽप्ययं तव कः स्यान्न कोऽपि त्वं चास्य कतमः कोऽसि न कोऽप्यस्तीति । एतेन सृष्टावित्येतदनन्वितमिति दूषणं परास्तम् । सृष्टाविति सप्तमी पञ्चम्यर्थ इत्यङ्गीकृत्य पुरेत्यनेनान्वय इत्यङ्गीकारात् ॥ २ ॥

देह्यर्थ एव शाश्वत इत्यस्य देही जीवोऽर्थ इव परमार्थनारायण इव शाश्वत इत्यर्थः। एतेन किमर्थशब्देन स्वर्गादिसुखं गृह्यते। किं वा मोक्षसुखम्। नाद्यः। स्वर्गादिसुखस्य शाश्वतत्वाभावात्। न द्वितीयः। मोक्षसुखस्य जीवस्वरूपत्वेन शाश्वतस्यासिद्धत्वादिति दूषणमपास्तम्। मुख्यामुख्यन्यायमाश्रित्यार्थशब्देन मुख्यार्थनारायणग्रहणात्॥ ७॥

तस्मादहंममतापरित्यागस्य मोक्षहेतुत्वादन्यत्स्वस्वकीयदेहपुत्रादिविषयमहंममता तयाऽहंममतारूपमिथ्याज्ञानं जहि। अहंममतारूपमिथ्याज्ञानस्य स्वभाविकत्वात्कथं त्याग इत्यत उक्तम्॥ मनोमात्रमिति। मनःकार्यमित्यर्थः। एतेनाहंममतारूपज्ञानस्य भ्रमत्वोपपादनार्थं स्वस्वकीयान्यविषयकत्वे वक्तव्येऽन्यदित्यन्यत्वाभिधानमसंगतमिति चोद्यं परिहृतम्। अन्यदित्यनेन स्वकीयान्यविषयकत्वस्य ग्रहणात्। एतेनैव मनोमात्रमित्येतद्व्यर्थमिति दूषणं निरस्तम्। अहंममतारूपमिथ्याज्ञानस्य मनःकार्यत्वेन स्वाभाविकत्वाभावात्त्याग उपपन्न इति वक्तुं मनोमात्रमित्युक्तमिति स्वीकारात्॥ १२॥

राज्यादयो गन्धर्वनगरप्रख्या गन्धर्वनगरसमानाः स्वप्नमायामनोरथाः स्वप्नमायामयमनोरथार्थसदृशाः। राज्यादीनां गन्धर्वनगरसादृश्यं कथमित्यत आह॥ दृश्यमाना इति। राज्यादयोऽर्थेन प्रयोजनेन विना दृश्यमानाः। राज्यादीनां स्वप्नमनोरथार्थसादृश्यं प्रकारान्तरेणाप्याह॥ न दृश्यत इति। अनित्या इति यावत्। अनित्यत्वे हेतुमाह॥ मनोभवा इति। अनेन राज्यादयोऽनित्या मनोजन्यत्वात्स्वाप्नमनोरथार्थवदित्युक्तं भवति। राज्यादीनां मनोजन्यत्वं कथमित्यत आह॥ कर्मेति। कार्याभ्याम्। द्वेषरागाभ्यामिति शेषः। मनःकार्याभ्यां द्वेषरागाभ्यां कर्म हिंसा पालनादिकं कर्माभिध्यायतः। कुर्वत इति यावत्। पुरुषान्नानाकर्माणि नानाविधपुण्यपापरूपकर्माण्यभवन्। उपलक्षणमेतत्। भवन्ति भविष्यन्ति च। नानाकर्माणीत्येतदर्थवशात्पञ्चम्यन्तं सम्बध्यते। नानाकर्मभ्यो नानाविधपुण्यपापकर्मभ्यो राज्यादयोऽभवन्। अतो राज्यादयो मनोभवा इत्युपपन्नमिति॥ ता० अर्थः॥ द्वेषरागाभ्यामित्यतः परमुत्पन्नैर्हिंसापालनादिभिरिति शेषः। यस्मान्मनसो द्वेषरागाभ्यां मनःकार्यद्वेषरागाभ्यामुत्पन्नैर्हिंसापालनादिभिः पुण्यपापसमुद्भवो भवति। पुण्यपापाभ्यां पुत्रादीत्यादि पदेन राज्यादिकं गृह्यते। पुत्रादि पुत्रराज्यादिभिर्भवति। तस्मात्सर्वं पुत्रादिकं मनोभवमिति॥ २७,२८॥
इति श्रीभागवतटिप्पण्यां पञ्चदशोध्यायः॥ ६-१५॥

॥ हरिः ॐ॥ बन्धुश्च ज्ञातिश्चारिवधादिकर्ता च मध्यस्थः कर्तव्ये उपकारेऽपकारस्य कर्ता च मित्रं क्लेशस्थानं निरूप्य रक्षायाः कर्ता चोदासीनः कर्तव्योपकारापकारयोरकर्ता च विद्विडप्रियकर्ता च बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विष इत्यर्थः। एतेनारिविद्विट्शब्दयोर्मध्यस्थोदासीनशब्दयोश्चार्थभेदो नास्तीति शङ्काऽनवकाशः॥ ५॥

मनस्युपरत इत्येव पाठः । वचस्युपरत इति पाठस्तु प्रक्षिप्तः । अवश्यं चैतदेवं विज्ञेयम् । मध्ये मनसः प्राधान्यात् । बाह्ये मनस्युपरते चिन्मात्रमनसा सह प्राप्य इत्यर्थसंभवेन विरोधाभावाच्च । बाह्यमनस्युपरते चिन्मात्रमनसा सह प्राप्य इत्याचार्यैर्व्याख्यातत्वाच्च ॥ २१ ॥

तद्दर्शनध्वस्तसमस्तकिल्बिषः शेषदर्शननष्टसमस्तपापः, प्रवृद्धभक्त्या प्रणयाऽश्रुलोचनः प्रहृष्टरोमा चित्रकेतुः स्वस्थामलान्तःकरणः सन्ननादिपूरुषं तं शेषान्तर्यामिणं विष्णुं मुहुः पुनः पुनरनेन प्रकारेण मृणालगौरत्वादिमनसाऽभ्ययात् । शेषप्राप्त्यनन्तरमपि मृणालगौरत्वादिप्रकारेण शेषान्तर्यामिविष्णुध्यानं कृतवानिति यावत् । अनन्तरं प्रसन्नो भूत्वाऽऽगत्य किञ्चिद्व्यवधानेन पुरोभागे स्थितं शेषान्तर्यामिणं विष्णुं दृष्ट्वा । तं शेषान्तर्यामिविष्णुं प्रति । तत्समीपमिति यावत् । अभ्ययादभ्यगादिति ॥ ता० अर्थः ॥ तम् । मनसेति शेषः । तं शेषान्तर्यामिणं विष्णुं मुहुः पुनरनेन प्रकारेण मृणालगौरत्वादिप्रकारेण मनसाऽभ्ययात् । न केवलं शेषप्राप्तेः पूर्वं शेषान्तर्यामिणं विष्णुध्यानं कृतवान् । किन्तु शेषप्राप्त्यनन्तरमपि शेषान्तर्यामिविष्णुध्यानं कृतवानिति यावत् । अनन्तरं प्रसन्नो भूत्वाऽऽगत्य किञ्चिद्व्यवधानेन पुरोभागे स्थितं विष्णुम् । दृष्ट्वेति शेषः । अभ्ययादित्यस्यावृत्तिः । अनन्तरं शेषान्तर्यामिविष्णुध्यानानन्तरं भूत्वाऽऽगत्य किञ्चिद्व्यवधानेन पुरोभागे स्थितं शेषान्तर्यामिविष्णुं दृष्ट्वा तत्सकाशं शेषान्तर्यामिविष्णुसमीपम् । अभ्ययादभ्यगात् । दर्शनध्वस्तसमस्तकिल्बिष इति श्लोकार्थे स उत्तमश्लोकपादाब्जविष्टरं प्रेमाश्रुलेशैरुपसेचयन्मुहुरित्यादिवक्ष्यमाणश्लोकार्थे च प्रमाणमाह ॥ शेषान्तर्यामिणमिति । चित्रकेतुः शेषान्तर्यामिणं विष्णुमुपास्य । शेषं प्राप्येति शेषः । शेषान्तर्यामिणं विष्णुमुपास्येत्यस्यावृत्तिः । शेषं प्राप्यशेषान्तर्यामिणं तु विशेषतः । पुनरिति यावत् । उपास्य च । च शब्दोऽनुक्तसमुच्चये । शेषान्तर्यामिणं विष्णुं दृष्ट्वा स्तुत्वा च शेषाविष्टहरेर्वरान् प्राप्य तद्गतिं शेषान्तर्यामिविष्णुगतिमाप प्राप चेति । एतेन मुहुस्तमभ्ययादिति भागवतेन मुहुस्तत्सकाशमभ्ययादिति तात्पर्येण च किं पुनः प्राप्तिरुच्यते, किं वा मनसेति शेषमङ्गीकृत्य पुनरुपासनम्, आद्ये किं शेषस्य पुनः प्राप्तिरुच्यते । किंवा शेषान्तर्यामिविष्णोः । नाद्यः । शेषं प्राप्य शेषसमीप एव स्थितत्वात् । न द्वितीयः । शेषान्तर्यामिविष्णोः पूर्वं प्राप्तेरभावात् । नापि द्वितीयः । तत्सकाशमिति तात्पर्यस्यानुपपन्नत्वप्रसंगादिति दूषणं परास्तम् । पुनः प्राप्तिरुच्यत इत्यनङ्गीकारात् । एतेनैव शेषाविष्टहरेरिति प्रमाणशेषोदाहरणमधिकमिति दूषणं परास्तम् । स उत्तमश्लोकपदाब्जेत्यादि वक्ष्यमाणश्लोकार्थे प्रमाणं वक्तुं प्रमाणशेषोदाहरणमित्युक्तत्वात् ॥ ३१,३२ ॥

लोके जगति विततं व्याप्तमात्मानमन्तःकरणं जानीयात् । अन्तःकरणं सर्वदा लोकविषयकं भवतीति जानीयादिति यावत् । आत्मन्यन्तःकरणे सततं व्याप्तं लोकं च जानीयात् । लोकसंस्कारः सर्वदाऽन्तःकरणे तिष्ठतीति जानीयादिति यावत् ॥ ता० अर्थः ॥ उभयं चान्तःकरणं लोकश्चेत्युभयं च

मया व्याप्तमिति जानीयात् । उभयं च मयि मयैव कृतमिति जानीयात् । लोके विततमात्मानमित्युपपादयति ॥ यथेति । पुरुषो जीवः सुषुप्तः स्वप्नं प्राप्तः सन् आत्मन्यात्मनाऽन्तःकरणेन विश्वं स्वाप्नविश्वं पश्यति । यथैव स्वप्ने स्वप्नादुत्थितः सन्नात्मना विश्वं पश्यति । एकदेशस्थं स्वेनैकदेशे स्थितम् । स्वसमीपं स्थितमिति यावत् । आत्मानं देहमात्मना मन्यते । एवं पुरुषो मायामात्राणि प्रकृतिनिर्मितानि जागरणादीति जीवस्थानानि जीवसंबन्धिजागरणाद्यवस्थाश्चात्मनोऽन्तःकरणात्पश्यति । अतोऽन्तःकरणस्य लोकविषयकज्ञानजनकत्वादन्तःकरणं लोकविषयकमिति युक्तम् । एवं विज्ञाय पूर्वोक्तप्रकारेणान्तःकरणादिकं विज्ञाय तद्द्रष्टारमन्तःकरणादिद्रष्टारं परं नारायणं स्मरेदिति । एतेनैकदेशस्थितमिति विशेषणं व्यर्थमिति चोद्यं निरस्तम् । जीवसमीपस्थितस्यापि देहस्य ज्ञानार्थमन्तःकरणमपेक्षितमिति वक्तुमेकदेशस्थितमित्युक्तमित्यङ्गीकारात् ॥ ५२,५३,५४ ॥ इति श्री भागवतटिप्पण्यां षोडशोऽध्यायः ॥ ६-१६ ॥

॥ हरिः ॐ ॥ साधुभिः पर्युपासितमित्यस्य साधुभिः कृतमित्यर्थः । तेन वैकुण्ठपादमूलस्य साधूपास्यत्वे वक्तव्ये वैकुण्ठपादमूलोपसर्पणस्य साधूपास्यत्वाभिधानमयुक्तमिति चोद्यस्यानवकाशः ॥ १४ ॥

अयं भावः । नरको यथाऽपेक्षणीयो न भवति तथा स्वर्गापवर्गावपेक्षणीयौ न भवतः किन्तु भगवत्पाद एवापेक्षणीय इति दर्शनं संपन्न इति । एतेन स्वर्गापवर्गनरकाणां तुल्यार्थत्वाभावात्स्वर्गापवर्गनरकाणां तुल्यार्थत्वदर्शिनो भ्रान्ताः स्युरिति दूषणमपहस्तितम् ॥ २८ ॥

देहिनो जीवस्य द्वन्द्वानि सुखदुःखद्वन्द्वानीश्वरलीलया नारायणलीलया देहसंयोगाद्भवन्ति । ननु राजादीनां सुखदुःखादिदातृत्वदर्शनाद्द्वन्द्वानीश्वरलीलयैव भवन्तीत्येतदनुपपन्नमित्यत आह ॥ सुखमिति । पुंसो राजादिजीवस्य यत्सुखं सुखदातृत्वं, पुंसो राजादिजीवस्य यद्दुःखं दुःखादिदातृत्वं, पुंसो राजादिजीवस्य या मृतिर्मृतिदातृत्वम्, पुंसः पितृजीवस्य यज्जन्म जन्मदातृत्वम्, पुंसो ऋष्यादि जीवस्य यः शापः शापदातृत्वम् । पुंसो ऋष्यादिजीवस्यानुग्रहोऽनुग्रहकर्तृत्वं च । पुंसो गुर्वादिजीवस्य मायावाद्यादिजीवस्य च यो गुणदोषविकल्पः । सम्यग्ज्ञानादिगुणानां मिथ्याज्ञानादिदोषाणां च विविधतया कल्पनं गुर्वादिनिष्ठसम्यग्ज्ञानादिगुणदातृत्वम् । मायावाद्यादिनिष्ठमित्याज्ञानादिदोषदातृत्वमिति यावत् । चशब्दोऽनुक्तसमुच्चये । यः सर्वजीवनिष्ठतत्तत्कार्यानुकूलव्यापारश्च स सर्वोऽप्यविवेकेन कृतः । अः परमात्मा तेन विवेकेन योग्यताविवेकेन । तत्तद्योग्यताविवेकं दृष्ट्वेति यावत् । कुत एवात्रदृष्टान्तमाह ॥ अर्थभेद इति । आत्मनि जीवे विद्यमानोऽर्थभेदो मोक्षादिपुरुषार्थभेद इव यथाऽविवेककृतः । भगवता तत्तद्योग्यताभेदं दृष्ट्वा कृतः । दृष्टान्तान्तरमाह ॥ भेदेति । स्वप्नकल्पिता

स्वप्नावस्थायां वासनया कृता भिदा नानाभेदभिन्नजगदादिरूपार्थ इव यथाऽविवेककृतः । अविवेककृता भगवता स्वप्नद्रष्टृजीवयोग्यताविवेकं दृष्ट्वा कृत इति ॥ ता० अर्थः ॥ यतो भगवता नारायणेन यत्सुखदुःखादिकं जीवयोग्यतानुसारेण क्लृप्तं तदेव तत्सुखदुःखादिकमेव नियतं भवेत् नियतं यथा भवति तथा भवेत् । नियमेन भवेदिति यावत् । अतोऽन्येषां ऋष्यादीनां वरो वरदातृत्वं शापः शापदातृत्वं गुणदोषप्रकर्तृता सम्यग्ज्ञानादि गुणानां मिथ्याज्ञानादि दोषाणां च प्रकर्षेण कर्तृता । प्रकर्षेण दातृतेति यावत् । भेदकृतिः सर्वजीवनिष्ठनानाभेदभिन्नपदार्थकृप्तिश्च स्वतः स्वतन्त्रनारायणा-त्प्राप्तम् । अत्र दृष्टान्तमाह ॥ वासनेति । स्वप्नेषु स्वप्नावस्थासु मनसि वासनारूपिणो विद्यमानस्य संस्काररूपेण । विद्यमानस्येति यावत् । गजादेः पुनर्दर्शनं स्वतो नारायणात्प्राप्ता प्राप्तम् । स्वाप्नार्थाः स्वप्नावस्थाः स्वाप्नज्ञानमित्येतत्सर्वं भगवत्प्राप्तमिति यावत् । सर्वं भगवदधीनं चेत्किमस्माभिः कर्तव्यमित्यत आह ॥ भगवद्वशतेति । यस्मात्सर्वेषां पदार्थानां भगवद्वशता तस्माद्भगवद्वशत्वं ज्ञेयमेव भवद्भिरिति ॥ २९,३० ॥

अहमित्येतदर्थवशाद्बहुवचनान्तं संबध्यते । पृथगीशमानिनो वयं यस्यांशांशकास्तत्स्वरूपं तस्य नारायणस्य स्वरूपमोहितं चेष्टां च न विदाम । वयं न विदामेत्युक्तं विवृणोति ॥ नाहमिति । विदामेत्यर्थवशाद्वेदेत्यादिरूपविशिष्टं संबध्यते । अहं न वेद । विरिञ्चो न वेद । कुमारनारदौ न विदतुः । ब्रह्मपुत्रा न विदुः । मुनयो न विदुः । सुरेशाश्च न विदुरिति । एतेन नाहमित्यादीनां विदामेत्यनेनान्वय इति दूषणं परास्तम् ॥ ३२ ॥ इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ ६-१७ ॥

॥ हरिः ॐ ॥ कयाधुर्नाम दानवी हिरण्यकशिपोर्भार्या जातेत्यत आह ॥ जंभस्येति । कयाधुर्जंभस्य तनया जंभस्य जंभेन हिरण्यकशिपो हिरण्यकशिपवे कयाधुर्दत्ता । सा कयाधुश्चतुरःसुतान्सुषुव इति । एतेन दत्तेत्येतदनन्वितमिति दूषणं परास्तम् । जंभस्येत्येतदर्थवशात्तृतीयान्तं हिरण्यकशिपोरित्येतदर्थ-वशाच्चतुर्थ्यन्तमिति चाभ्युपेत्य जंभेन हिरण्यकशिपवे कयाधुर्दत्तेत्यन्वयस्योक्तत्वात् ॥ १२ ॥ इति श्री भागवतटिप्पण्यामष्टादशोऽध्यायः ॥ ६-१८ ॥

॥ हरिः ॐ ॥ येन विष्णुः प्रसीदति तस्य तद्व्रतं वेदितुमिच्छामीत्यर्थः । एतेन तद्वेदितु-मिच्छामीति वक्तव्ये तस्येत्येतदनुपपन्नमिति दूषणं निरस्तम् । तस्येति षष्ठी द्वितीयादेश इत्यभ्युप-गमात् ॥ १ ॥

यदि सर्वसंपद इच्छेत् तर्हि भक्त्या नित्यं वरदावाशिषां प्रभवावुभौ संपूजयेत् । ज्ञानिन उभयोर्मध्ये एकं विष्णुमाहुरपरां श्रियं चाहुरिति । अनेन ज्ञानिब्रह्मरुद्रादिसंमतत्वात्सर्वोत्तमत्त्वेन लक्ष्मीनारायणोरेव पूज्यत्वं न तूमाशङ्करदीनामपीति शैवादीनां मतं दूषितं भवति । अनेनैव श्रियं विष्णुं

चेत्येकवचनान्तशब्दयोर्वरदावित्यादिद्विवचनान्तशब्दानां चानन्वय इति दूषणमपास्तम् । ज्ञानिना-मित्यादिशेषपूरणेनान्वयस्योक्तत्वात् ॥ ८ ॥ इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ ६-१९ ॥

॥ इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाऽभिनवताण्डवाभिनवगदाऽभि-नवामृतादिबहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीपादानां शिष्येण सत्याभिनवयतिना "त्वया भागवतटिप्पणं कारयिष्यामीति" तदीयामोघसंकल्पमात्रमवलंब्य कृतायां श्रीमद्भागवत-टिप्पण्यां दुर्घटभावदीपिकायां षष्ठःस्कन्धः समाप्तः ॥ ६ ॥ ग्रन्थसङ्ख्या ॥ १००० ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्री पाघरी श्रीनिवासाचार्यविरचितः

विरोधोद्धारः

षष्ठः स्कन्धः

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ अथ द्वापरे सत्सु सदयबुद्धिभिर्ब्रह्मादिभिरर्थितो भगवान् व्यासात्मना भूमाववतीर्य तदज्ञाननिवर्तक महाभारतादिनानाग्रन्थान्कृत्वा कृत्यशेषपूरकश्रीनारदप्रार्थनया श्रीमद्भागवतं कुर्वन् सतां त्रिविधताप-भयनिवृत्त्यै सर्ववेदमातृगायत्र्यर्थरूपविष्णुगायत्रीप्रतिपादितरूपत्रयमन्त्राक्षरदैवतविष्णुरूपाणां सर्वतो रक्षणप्रार्थनात्मकनारायणवर्मात्मकं स्तोत्रं पठणादीच्छूनां विश्वासजननायेहोपक्षिप्तेतिहासोपोद्धात-संगत्योपनिबबन्ध । यो हवा अविदितार्षछन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयीत वा स्थाणुं वर्च्छति गर्ते वापद्यते प्रवामीयते इति श्रुतेर्ऋष्यादिज्ञानं विनाऽनर्थप्राप्तेः । ऋष्यादिकं वक्तुं तावद्राजप्रश्नमुपन्यस्तवान् ॥ राजोऽवाचेति । यया नारायणवर्ममूलगायत्र्याख्यविद्यया गुप्तो रक्षितः सहस्राक्ष इन्द्रः सवाहान् वाहनसहितान् । निर्वाहकसेनापतियुक्तान्वा । रिपुसैनिकान् शत्रुभूतदैत्यसेनास्थवीरान् क्रीडन्निव लीलयैवेत्यर्थः । विनिर्जित्य पुनर्युयुत्साऽभावरूपविशेषेण जित्वा । त्रिलोक्याः त्रयाणां पातालभूस्वर्गाख्यानाम् । भूर्भुवः स्वराख्यानां वा । लोकानां समाहारस्त्रिलोकी तस्याः श्रियं संपदम् । आधिपत्यमिति यावत् । बुभुजे भुक्तवान् । यत्तदोर्नित्यसंबन्धाल्लिङ्ग-विपरिणतेनोत्तरस्थेन तन्ममाख्याहीत्यत्रत्येन तदित्यनेनान्वयः । तां गायत्र्याख्यविद्यामाख्याहीत्यर्थः । ननु विद्यावर्मणोरेकार्थकयोः सतोः कथमर्थपार्थक्यमुच्यत इति चेन्न । तथात्वे आदौ सवाहान् रिपुसैनिकान् क्रीडन्निव विनिर्जित्येत्यस्य सत्वात् । यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे इत्युत्तरत्रोक्त्या च पुनरुक्तिप्रसङ्गात् । ये य इत्यनेनैवार्थपूर्तौ येनेत्यस्याधिक्यापाताच्च । न च प्रश्नद्वयोपगमेऽग्रे उत्तराभावादनुपपत्तिः । प्राप्तमृत्युभयस्य परीक्षितस्य तन्निवारणोपायभूतस्य सांगस्यास्य ज्ञाने सति भगवत्संकल्पस्य स्तोत्रसामर्थ्यस्य वा वैफल्यं स्यादंगवैकल्यात्फलाभावे च सामर्थ्योच्छेदासिद्धिरिति जानता रुद्ररूपेण शुकेन साक्षादनुक्तत्वेऽपि प्रकारान्तरेण सूचितत्वात् । न चानेकयच्छब्दानामेकतच्छब्देनैव यस्तेस्त न इत्यादौ निर्वाहदर्शनान्नाधिक्यमिति वाच्यम् । यच्छब्दलिङ्गव्यत्ययसद्भावेनार्थद्वयस्यौचित्यात् । अन्यथा नारायणवर्मणि नारायणमन्त्रन्यासस्य युक्तत्वेऽपि वासुदेवादिमन्त्रन्यासायोगात् । ननु भवत्पक्षेऽपि वासुदेवमन्त्रन्यासोपपत्तिः कथमिति चेत् ।

उच्यते । ब्रह्मगायत्र्याः प्रथमचरणे जगत्स्रष्टृर्थकसवितृशब्दवाच्यः प्रतिपादितः । विष्णुगायत्र्याद्यपादेऽपि नरसमूहो नारं जीवजातं तदयनमाश्रय इति निर्वचनात् । आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतपः परमात्म एक इत्याद्युक्तेश्च जगत्सर्जनयोग्यगुणविशिष्टनारायणशब्दवाच्यस्यैवोक्तेः । तथा द्वितीयपादे चोक्तस्य प्रकाशकार्थकदेवशब्दस्य प्रकाश्याकांक्षायां विष्णुगायत्री द्वितीयपादे वासशीलत्वेन वास्तु शब्दोदितजीवग्रहणेन पूर्तिसहितदेवशब्दोक्तेश्च । तद्वत्तृतीयपादे चोक्तस्येन्द्रियप्रेरकत्वस्यान्तस्थत्वान्यथाऽनुपपत्तेरस्यास्तृतीयपादे विश प्रवेशन इति धातोरिन्द्रियप्रवेशार्थकविष्णुशब्दप्रयोगाच्च विष्णुगायत्र्याः ब्रह्मगायत्रीव्याख्यानरूपत्वं सिद्ध्यति । अतस्तत्रोक्तभगवन्नाममन्त्राक्षरन्यासोपपत्तिः सेत्स्यति । ननु मन्त्रावयवैरेव न्यासस्य कर्तव्यता प्रायेण दृष्टा । तत्कथमेषां नारायणवर्मावियवत्वमिति चेत् । उच्यते । आदावुक्ताष्टाक्षरमन्त्रवर्णदेवताप्रतिपादकानां हरिर्विदध्यादित्यादीनां धर्मावनायोरुकृतावतार इत्यन्तानामष्टश्लोकानां उपनिबन्धनात् । ततः परं द्वादशाक्षरवासुदेवमन्त्रवर्णदेवतानां मां केशव इत्यादिना दामोदरोऽव्यादनुसंध्यं प्रभात इत्यन्तेन प्रतिपादनात् । तन्त्रसारेऽपितासामेवोक्तेः । ततश्च सप्ताक्षरविष्णुमन्त्रवर्णाभिमानिनां चक्रगदाशंखखड्गचर्मगरुडविष्वक्सेनानां नामरूपयानायुधपार्षदभूषणसत्यानां वा तत्तद्गतत्वात्तत्तन्नामकानां भगवद्रूपाणां वा विष्णुः श्रीमानित्यादिना यावदन्देन निरूपणाच्चावयवत्वसिद्धिः संपद्यत एव । किञ्च गायत्र्यार्थकत्वमस्यानेनापि संभवति । तद्यथा । गायत्र्याद्यार्धर्चस्य शास्त्रतः षोडशाक्षरत्वेऽपि गणनया पञ्चदशाक्षरत्वलाभात्तावत्संख्यश्लोकानामेव वृत्तसाम्यात् । अपरार्धर्चस्याष्टाक्षरत्वात्तावत्संख्ययाऽन्यवृत्तसाम्येन भवितव्येऽपि अन्तिमवर्णस्य व्यञ्जनान्तत्वादन्तिमश्लोकस्यापि पृथग्वृत्तदर्शनाद्गायत्रीमूलकत्वमवसीयते । अपि च सर्वभागवतस्य वाच्यवक्तृसाम्यात्समानफलत्वेऽपि अस्यैव महाभयरक्षणशक्त्यन्यथाऽनुपपत्त्या गायतां त्राणकर्तृत्वरूपप्रवृत्तिनिमित्तवद्गायत्रीमूलकत्वानुसन्धानेन श्रावकाणां पूर्वश्लोके शत्रुजयश्रीभोगरूपफलद्वयोक्त्या तदनुसंधानाभावे तूत्तरश्लोके शत्रुजयरूपैकफलस्यैवोक्त्या चोक्तार्थस्य सिद्धिरवगम्यते । अतः साधकेन प्रतिश्लोकमादौ गायत्रीमन्त्राक्षरबीजमुपन्यस्यैव पठने कृते सर्वकार्यसिद्धिर्जायते इति तात्पर्यमवगन्तव्यम् ।। १ ।। इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ।।६-८।।

इति श्री पांघरीश्रीनिवासाचार्यविरचते विरोधोद्धारे षष्ठः स्कन्धः समाप्तः ।। ६ ।।

।। श्री कृष्णार्पणमस्तु ।।

महर्षि वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थ विरचित श्रीमद्भागवत तात्पर्यनिर्णयेन
श्री यदुपत्याचार्यविरचित पञ्चमस्कन्धतात्पर्यप्रकाशिकया
श्री सत्यधर्मतीर्थ विरचित षष्ठस्कन्ध भागवतटिप्पण्या
श्री चेट्टी वेङ्कटाद्रिविरचित षष्ठस्कन्ध भागवत टिप्पण्या च सहितम्

चतुर्थं सम्पुटम्

(पञ्चम-षष्ठस्कन्धौ)

Edited by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

Formerly Prof. of Sanskrit, Bangalore University
Hon. Director, Dvaita Vedanta Studies and Research Foundation
Upakulapati Poornaprajna Vidyapeetha, Bangalore

Year 2000

Published by

Dvaita Vedanta Studies and Research Foundation

No.33/163, 10th B Main Road, Jayanagar I Block
Bangalore-560 011.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha Prakāśikā of Yadupatyāchārya, Sri Satya dharmatīrtha's Tippanī, Chetty Venkatādri's Sajjanahitā edited by Prof. K.T. Pandurangi published by Dvaita Vedanta Studies and Research Foundation, No.33/163, 10th B Main Road, Jayanagar I Block, Bangalore-11.

No. of Pages : xxxviii + 648

No. of Copies : 1000

Price : Rs.300/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation
No.33/163, 10th B Main Road, Jayanagar I Block
Bangalore-560 011.
Phone : 6566658, 6648215

Typeset and Printed at : Raghavendra Enterprices. B'lore.

PREFACE

The Dvaita Vedanta Studies and Research Foundation has undertaken a project under which it is bringing out the Bhāgavata with eight commentaries duly edited. This is the fourth volume in this series. It contains V and VI Skandhas. The V Skandha has the commentary of Sri Yādavārya. The commentary of Śrī Satyadharma commences from the VI Skandha. The commentary of Śrī Chatty is only on the VI Skandha. These commentaries are included in this volume. The Tātparya nirṇaya of Śrī Madhvāchārya is on the entire Bhāgavata and it is given in all the volumes. Durghatabhāvadīpikā and Virodhoddhāra are given separately at the end of this volume. These comment on only select verses.

The fifth skandha mainly deals with the episodes of King Priyavrata, Riṣabha and Bharata. Priyavṛta competed with the Sun and sought to provide 'sunlight' even during the night. Riṣabha was an incarnation of the Supreme God him self. Though Bhārata functioned as 'jadabharata' for sometime he subsequently became so famous that the country was named after him.

The VI Skandha describes the episodes of Ajāmila, Prachetasa and Vratrāsura. Each of the episodes in these two skandhas has a moral lesson to impart and a philosophical point to make. These have guided the lives of Indians for centuries. The significance of these is explained in the summary of Śrīmad Bhāgavata.

A detailed summary both in English and in Kannada has been provided by Prof. Pandurangi. He has narrated the main events of these episodes and explained their ethical and philosophical significance.

The manuscripts of Śrī Satyadharma's commentary and Śrī Chatty's commentary were procured from the Libraray of Uttaradimatha. We offer our praṇāmas to Sri Sri Satyatma Thirtha Swamiji for providing these manuscripts.

We thank Prof. Pandurangi for editing this volume and the Research Staff of the Foundation for assisting him in this work. We thank Raghavendra Enterprises for neat printing and good get up.

N. Narasimha Rau
Chairman

Skandha-V

The story of Priyavrata

The fifth skandha begins with the story of Priyavrata the son of Svāyambhuvamanu. He received the instructions from Nārada about the nature of Supreme God and the means to attain him. Consequently he lost interest in the rulership and did not want to take up the task of ruling over his kingdom. He did not want to get entangled in worldly affairs. His father advised him not to give up his responsibility of looking after his subjects. He was still reluctant. At this stage Chaturmukha Brahmā himself appeared before him and said that discharging king's responsibility or undertaking activity itself is not a hindrance to the spiritual progress. It is the attachment to worldly things that is an obstruction for the spiritual progress.

भयं प्रमत्तस्य वनेष्वपि स्यात्
यतो वसन्ते सह षट् सपत्नाः ।
जितेन्द्रियस्यात्मरतेः बुधस्य
गृहाश्रमः किं नु करोत्यवद्यम् ॥

He who is overtaken by kāma, krodha etc six enemies will have the fear of attachment even if he lives in the forest. On the other hand he who has control over his senses is not affected even if he lives a householder's life. Priyavrata accepted Brahmā's advice and took the responsibility of the kingdom. He married Barhiṣmati and begot ten sons and a daughter i.e. urjasvati. He got Uttama etc three more sons through his second wife.

Priyavrata found that Sun is providing light to half of the world during the day and darkness envelops during the night when the Sun moves to the other half of the world. He was not happy with this. He took a chariot similar to that of Sun and provided the light to the whole world. The movement of the chariot created seven seas and seven Islands. He made his seven sons the kings of these seven Islands. Three of his sons had already renounced the world.

भगवानादित्यः वसुधातलमर्धेनैव प्रतपति अर्धेनाच्छादयति । तदनभिनन्दन् सः जवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वः तरणिमनुपर्यक्रामत् द्वितीयः इव पतङ्गः ।

या वा इह तद्रथचरण नेमिकृतपरिखाः ताः सप्तसिन्धवः आसन् । यत एव कृताः सप्त भुवो द्वीपाः । तेषु आत्मजान् एकैकस्मिन् एकमेव अधिपतिं विदधे । (१-३०, ३१)

Priyavrata gave his daughter Urjasvati to Śukrāchārya. She got a daughter Devayāni who married Yayāti.

Priyavrata's son Āgñidhra became the king of Jambūdvīpa. He married Pūrvachitti. He begot nine sons viz Nābhi, Kimpuruṣa, Harivarṣa, Ilāvṛta, Ramyaka, Hiraṇmaya, Kuru, Bhadraśva and Ketumāla. He divided Jambūdvīpa into nine units and made these sons the kings of these units. Pūrvachitti who was an Apsarā returned to Svarga. Āgnidhra performed many sacrifices and attained Pitṛloka.

The story of Riṣabha

After Āgñidhra his eldest son Nābhi became the king. He married Merudevi. He did not get progeny for a long time. He undertook Agniṣṭoma sacrifice to propitiate the Supreme God Viṣṇu. The God appeared before him. Nābhi appealed to the God to bless him to get a son equal to God himself. The Supreme God said he himself will be born as his son. Accordingly he became his son and was named as Riṣabha.

भगवान् नाभेः प्रियचिकीर्षया मरुदेव्यामवततार । (२-२१)

Riṣabha had the marks of chakra etc on his foot thereby indicating that he was an incarnation of God. Nābhi coronated him on the throne and entrusted the responsibility of kingdom to him. Instructing him to look after the welfare of the people Nābhi went to Badarikāśrama accompanied by his wife and ultimately attained the feet of God.

Riṣabha married Jayanti and got hundred sons. Among these Bharata was best. Riṣabha ruled over the kingdom benevolently. He encouraged his subjects to follow the path of Dharma. He performed hundreds of sacrifices. He undertook a journey all over the earth and arrived at Brahmāvarta.

He addressed the sages assembled at Brahmāvarta. He said that one should serve the great persons. Those who have a balanced mind, are free from anger and hatred, helpful to all and are of good conduct are great persons. One should not be too much involved in family, property etc worldly things. Realising that a

man suffers in many ways if he gets attached to these things, he should devote to the God and sing his glory. Men are superior to plants and animals. They should have higher aims in life.

i) महत्सेवां द्वारमाहुः विमुक्तेः तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ताः विमन्यवः सुहृदः साधवो ये ।
गृहेषु जायात्म जरातिरासु न प्रीति युक्ताः यावदर्थाश्चलोके (५-२,३)

ii) भूतेषु वीरुभ्यः उदुत्तमा ये सरीसृपाः तेषु सबोधनिष्ठाः ।
ततो मनुष्याः प्रवराः (५-२०)

iii) हरौ गुरौ मयि भक्त्यानुऽवृत्त्या वितृष्णया द्वन्द्वतितिक्षयाच ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्याच ।
मत्कर्मभिः मत्कथया च नित्यं मत्पादसंगात् गुणकीर्तनात् मे ॥ (५-१०)

After his visit to Brahmāvarta Riṣabha handed over the kingdom to his eldest son Bharata, renounced all worldly things and wandered over the earth assuming the avadhūta way of life. He functioned like a dull person without talking with anyone. He started *ajagar vrata* and laid down on the ground like a serpent. By his yogic power he obtained the capacity to move over the sky, become invisible, enter into others' bodies, listen to the distant voice etc eight powers. However, as he was not interested in utilising these powers for any personal purpose he did not make use of them. He eliminated the attachment even to his body and wandered naked. When he was moving in thick forest he was burnt down by the forest fire.

The story of Bharata

Bharata the son of Riṣabha married Pañchāgni. He begot Sumati etc five sons. He ruled over the kingdom benevolently and guided his subjects to follow the path of Dharma. While performing sacrifices he used to envisage the other deities as *aṅga devatā* and Viṣṇu as *pradhāna devatā*. He had the good fortune of seeing the Supreme God Viṣṇu during his sacrifices. He ruled over the kingdom for ten thousand years. Then, he handed over kingdom to his children and went to Pulahāśrama known as Sāligrama Kṣetra on the bank of the river Chakrā.

He used to meditate upon the Sun every morning and used to have the vision of Nārayaṇa in Sūryamandala. Because of the greatness of Bharata his kingdom come to be known as Bhārata Varṣa.

Bharata's affection for a deer and his rebirth as a deer

One day when Bharata was engaged in the meditation sitting on the bank of the river, a deer came running. Hearing the roaring of a lion the deer jumped to the other bank of the river. As it was pregnant, it delivered a child and died. Bharata took pity on the deer. He took it over and brought it up. He used to give it milk, take it to the land where tender grass is available. He served it in many other ways and got very much attached to it. One day the deer escaped his attention and went away. He searched for it. He was not able to trace it. He became indifferent to his meditation etc. activities and went on worrying about it. Even when he was on his death bed his mind was fixed on the deer and consequently he was born as a deer.

तत्र राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम । तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिगतः गर्भः स्रोतसि निपपात । तंतु एणकणुकं कृपणं राजर्षिः भरतः अनुकम्पया आदाय आश्रमपदमानयत् ।

आसन स्नानाशनशयनाटनस्थानादिषु सहमृगजहुना स्नेहानुबद्धहृदयः आसीत् ।

अन्यदा तु हरिणकुणकविरहविह्वलहृदयसन्तापः तमनुशोचन् कश्मलं महदभिरम्भितः । दुरतिक्रमः कालः आपद्यत । तदानीमपि मृग एव अभि निवेशितमनाः विसृज्य लोकमिमं मृगशरीरमवाप ।

Though Bharata was born as a deer he remembered his past life and regretted for the too much attachment for the deer. As a result he left his mother deer and other deer and went to Sāligrāma Kṣetra where he had spent his earlier life. He lived a completely detached life taking minimum food to sustain his life. When his end came he dipped into the river and left his mortal body.

The deer Bharata was born as a Brāhmaṇa and functioned as Jadabharata

Near about Sāligrāma Kṣetra there was a Brahmaṇa of Añgīrasa gotra. He had nine sons through his first wife. All of them were wise and learned. He had two children a girl and a boy through his second wife. This boy was Bharata reborn. He was very dull and never mixed with other boys. The father was very unhappy.

However, he performed his upanayana hoping that the boy would improve with the recitation of Gāyatri hymn. But there was no improvement. The Brāhmaṇa was very much pained by it and died. His second wife also died with her husband handing over this dull boy to the first wife. His brothers ignored him and insulted him. They called him as Jadabharata. This boy wandered here and there without any direction.

Once, a local chieftain wanted to offer a human being to Bhadrakāli in order to get a son. He ordered his servants to find out a suitable person. They caught hold of this boy and took him to Bhadrakāli temple. They made all arrangements to kill him. When he was about to be killed Bhadrakāli came out of the stone idol and took the sword from the hand of the person who was ready to kill this boy and killed the chieftain and his followers. She did not want a devotee of Viṣṇu to be ill treated. Bhadrakāli entered back the idol and the boy moved on here and there again as a dull person.

As he was moving another interesting event took place. King Rahugaṇa the ruler of Sauvira was going to meet sage Kapila, seated in his palanquin. He was short of one person to carry the vehicle. His servants caught hold of Jadabharata and made him to carry the vehicle. As he was not used to carry such vehicles his movements were not in tune with the others. The king was angry and abused saying that he is useless in spite of a strong body. But Jadabharata explained he is distinct from his body and not affected by the pleasure and pain of the body. King Rahugaṇa realised that he was not an ordinary man and requested him to teach him. Rahugaṇa said he is not afraid of Vajrāyudha of Indra or Yama's pāśa. He was only afraid of the wrath of Brāhmaṇa.

नाहं विशङ्के सुरराजवज्रात् न त्र्यक्षशूलात् न यमस्य दण्डात् ।
शङ्के भृशं ब्रह्मकुलावमानात् । (१०-१८)

Jadabharata told him that the ātman by itself is pure. However, it is affected by the attachment to the body etc. The embodied self gets involved in ritualistic activities and does not seek pure knowledge. One has to resist this temptation and completely devote to the Supreme God. Jadabharata informed his true nature to Rahugaṇa. I was completely detached from the worldly life. However, I took pity on a deer and was fully attached to it. As a result I was born as a deer. When I was born as deer then also I remembered my past life. Now I am born as a

Brāhmaṇa's son and completely detached from the worldly life, you also get freed from the attachment and obtain the grace of the Supreme God.

The description of Bhūmandala, Dvīpa, Samudra etc.

After describing Bharata's life, and giving the details of Bharata's descendents from Sumati to Gaya, the seven Dvīpas, Samudra etc are described in detail. These are as under :

The names of nine Varṣas i.e. the divisions of Jambūdvīpa

1. Ilāvrata, 2. Ajanabha, 3. Kimpuruṣa, 4. Harivarṣa, 5. Bhadrasva, 6. Ramyaka, 7. Hiranmaya, 8. Kuruvarṣa, 9. Ketumāla.

These constitute Jambūdvīpa.

The nine mountains

1. Meru - It is at the centre of Ilāvrata

2. Nīla, 3. Sveta, 4. Sriṅgavanta, 5. Niṣadha, 6. Hemakūta, 7. Himālaya, 8. Malyavanta, 9. Gandhamādana. The eight are in other eight varṣas.

The four mountains around Meru

1. Mandāra, 2. Merumandāra, 3. Supārsva, 4. Kumuda

The four groves of the trees in the four valleys adjoining the above mountains :

1. Chūta, 2. Jambu, 3. Kadamba, 4. Nyagrodha

The four Gardens

1. Nandana, 2. Chaitraratha, 3. Vaibhrājaka, 4. Visvato bhadra

The two rivers :

1. Aruṇoda - in the east of Mandāra
2. Jambūnadi in the south of Mandāra

The two great trees

1. Mahā Kadamba on Supārsva mountain
2. Vaṭavṛkṣa with hundred branches on Kumuda mountain

The cities on and around Meru

1. Sātakumbhi on the top of Meru

2. Amarāvati, 2. Tejovati, 3. Samyamini, 4. Krishnanganā, 5. Sraddhavati, 6. Gandhavati, 7. Mahodaya, 8. Yośavati around the eight quarters of Meru.

The origin and the course of Viṣṇupadī i.e. Gangā River

When God in his Vāmana incarnation asked Bali to give three steps of area to him and assuming the Trivikrama form lifted his foot to occupy *antarikṣa* it touched the edge of Brahmānda and created a small break. Through this break the water outside Brahmānda entered into Brahmānda. As it arose by the touch of the foot of Viṣṇu it is called Viṣṇupadi. The flow of the water came down on the Brahmagiri peak of Meru mountain and moved in the four directions. These four branches of the great river are called i) Sītā (ii) Alakananā (iii) Chakṣu and (iv) Bhadrā. Among these Alakanandā came down to Hemakūta, entered Bharata varṣa and joined the sea.

The forms of the God present in the nine divisions of Jambūdvīpa.

1. Ilāvrata - Samkarṣana, 2. Bhadrasva - Hayagrīva, 3. Harivarṣa - Narasimha, 4. Ketumāla - Pradyumna, 5. Ramyaka - Matsya, 6. Hiranmaya - Kūrma, 7. Uttara Kuru - Varāha, 8. Kimpuruṣa - Rama, 9. Bhārata - Nārāyaṇa.

The mountains and rivers in Bharatavarṣa

Mountains - Malaya, Maināka, Trikūta, Riṣabha, Vindhya etc.

Rivers - Gangā, Sindhu, Brahmaputra, Kaveri, Godavari, Tāmraparṇi, Krishnā, Tungabhadrā, Malāpahari etc.

The upadvīpas i.e. subsidiary dvīpas to Jambūdvipa

It is interesting to note that these subsidiary dvīpas are of the nature of special forest areas containing the particular kind of trees. The kind of tree in each area is suggested by the very name of the dvīpa. These are : 1. Plakṣadvīpa, 2. Śalmali dvīpa, 3. Kuśadvīpa, 4. Krauncha dvīpa, 5. Śākadvīpa, 6. Puṣkara dvīpa.

The Sun, the moon, the stars, the planets and Rāśis.

After describing Jambhūdvīpa the details of the movement of son, and moon, the position of stars, rāśis and the calculation of the year, seasons and months are given in detail.

The Netherlands

Below the earth there are seven Netherlands. These are 1. Atala, 2. Vitala, 3. Sutala, 4. Rasātala 5. Talātala, 6. Mahātala, 7. Pātāla.

In Atala Maya has built beautiful buildings. In Sutala Balichakravarti resides. In Mahātala Takṣaka, Kāliya, Suṣeṇa etc serpents live. Ananta holds all these and bhūmandala on an atomic portion of one of his thousand hoods.

The Hells

The Tamisra, Andha tamisra, Raurava Maharaurava etc twenty eight hells are listed. The different kinds of punishments inflicted on the sinners in these Hells are described. 1. Snatching away the wealth and property of others, particularly the gold. 2. Ilicit relations with women 3. Neglecting the varṇāśrama duties 4. Amassing huge wealth and misusing it. 5. Killing animals, birds etc living beings and torturing them are stated as major sins.

The whole account of Jambūdvīpa, its vast wealth of mountains, rivers, trees, animals, birds etc. is quite educative. The ecology of entire Brahmānda is graphically described. An awareness of the richness of the entire world is created. One has to live upto the great height of the world of which he is an essential part.

VI Skandha

The story of Ajāmila

In the last few chapters of V Skandha the various punishments to the sinners were described. This raises the question whether there are any *prāyaschittas* i.e. retributions to overcome the effects of the sins. This question is answered in two ways. There are some *prāyaschittas* to overcome some of the sins and the adverse effects of the deeds. However, these cannot totally eliminate all the sins. It is surrendering at the feet of God that totally eliminates all the sins. This is illustrated by the story of Ajāmila.

In the city of Kānyakubja there was a Brāhmaṇa by name Ajāmila. He had studied veda and śāstra and conducting himself in the right way. Unfortunately one day he observed a man and woman in the forest freely co-habiting like animals. The woman was quite attractive. He approached her to serve him also.

She readily agreed. He brought her home and spent all his time in sensuous pleasure with her. He indulged in all kinds of criminal activities like gambling, looting, killing animals and birds and torturing good people. He got ten sons and named the last son as Nārāyaṇa. He loved this boy intensely. He became old and the day of his death came. Yamadūtas arrived to take out his life. He was frightened by their cruel form and shouted as Nāyāyaṇa to call his son. Suddenly Viṣṇudūtas arrived and prevented Yamadūtas from taking his life. Yamadūtas were surprised. They argued with Viṣṇudūtas that since this man has committed all kinds of sins he deserves to be punished, why do you prevent us from doing our duty. Viṣṇudūtas said as he remembered the Supreme God Nārāyaṇa on his death bed all sins are washed off. You better consult your master in this matter. Yamadūtas prostrated at the feet of Viṣṇudūtas and returned to Yamaloka.

Ajāmila was listening to their conversation even on his death bed. He realised his blunder and the compassion of the God. He went to the bank of river Gangā, meditated upon the God. The Viṣṇudūtas appeared again and took him in Vimāna. He attained the feet of God.

On return to Yamaloka, the Yamadūtas asked Yama 'who is the real lord of this world? Whether there is only one lord or there are many. When we went to carry out your orders some persons prevented us. This means that there is some one who is greater than you.

If many lords rule this world there will be disorder. On hearing this Yama meditated and found out the events of that day. He told his servants that there is a Supreme God. We all function under his control. A person who is devoted to him and utters his name with devotion will be freed from all sins. This is what has happened in the case of Ajāmila.

i) कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो ।

यदि स्युः बहवो लोके शास्तारो दण्डधारिणः ।

कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव च ॥

ii) परो मदन्यो जगतः तस्थुषश्च ओतं प्रोतं यत्र विश्वम् ।

iii) एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः भक्तियोगो भगवति तन्नामस्मरणादिभिः ।
(III-4,5,12,22)

The progeny of Prachetasa

It is already stated that king Prāchīnabarhi had ten sons called Prachetasa and they remained under the sea for a long time. When they came out they found the entire earth crowded with forest and trees. They created fire and wind through their mouth and started burning them. The Chandra appealed to them not to destroy these as these are meant to support the animals, birds etc living beings on the earth. You are advised by God to continue the creation. You have to carry out his wishes. You now marry Mariṣāa who is brought up by trees and create people.

They agreed, married Mariṣa and begot the son Prāchetasa. He created by his mind deities, asuras, men and other creatures. However, these did not survive. Then, he went to Aghamarṣaṇa tīrtha in Vindhya mountain and meditated upon the Supreme God with Hansaguhya hymn. God appeared before him riding on Garuda and asked him to marry Asikni the daughter of Panchajana. He married her and got ten thousand sons called Haryaśva. He asked them to continue the progeny. They went to Nārāyaṇa lake at the confluence of Sindhu river and sea, and undertook penance to get progeny. However, Nārada came and dissuaded them saying that this will put you in bondage permanently. On his advice they left *karmamārga* adopted *jñānamārga* and attained the feet of the God.

On hearing this Prāchetasa again got a thousand sons called Śabalāsva and asked them to create progeny. They also went to Nārāyaṇa lake. Nārada dissuaded them also. On learning this Prāchetasa became very unhappy and cursed Nārada to be wandering all the time. At this stage Chaturmukha brahmā arrived and asked him to get daughters. he begot sixty daughters. He gave thirteen of them to Kāśyapa, twenty seven to Chandra, two each to Rudra, Aṅgīrasa and Kṛśasva and four to Tārkṣya. It is through these that deities, demons, men, trees, plants and all other creatures were created.

Viśvarūpa teaches Nārāyaṇa kavacha to Indra

Once, Indra was seated in his royal hall with all pomp. Ādityas, Rudras, Vasus, Sages, Siddhas, Gandharvas etc all were present. Indra was proud of his position. At this time Brihaspati arrived. Indra did not welcome him. Did not even look at him. he was completely ignored. Brihaspati left the hall. Later Indra felt that it was wrong on his part to have ignored his Guru. He went to Brihaspati's place to beg his pardon. However, Brihaspati became invisible and did not oblige

Indra. Taking advantage of this situation the demons attacked Indra. In the absence of proper advice by Brihaspati. Indra felt helpless. he approached Brahmā. Brahmā advised him to take Viśvarūpa the son of Tvaṣṭā as his adviser in the place of Brihaspati, Viśvarūpa agreed. In order to strengthen Indra he taught Nārāyaṇa kavacha to him.

He taught the eight syllable hymn 'Om namo Nārāyaṇāya' six syllable hymn 'Om Viṣṇave namah' and twelve syllable hymn 'Om namo Bhagavate Vāsudevāya.' The Nārāyaṇa kavacha describes the great deeds of God in his twenty four incarnations. Though Viśvarūpa tought Nārāyaṇa kavacha to Indra, he used to offer sacrificial offerings to the demons also stealthily along with the deities. He belonged to the deities line through his father and demons line through his mother. Therefore, he had double loyalty. Indra came to know of it and cut his three heads. Viśvarūpa had three heads viz. Somapita, Surāpīta, and annāda. When Indra cut these became Kapinjala, Kalavanka and Tittiri birds. By cutting these Indra suffered from Brahmahatyā sin. He suffered from it for one full year. Then, he distributed the adverse result of it among the earth, trees, water and women.

The birth of Vṛtrāsura

Tvaṣṭā the father of Viśvarūpa was angry by this act of Indra. He performed a sacrifice so as to get a person who could kill Indra. From the Dakṣiṇāgni at the sacrifice, a cruel person was born. With his triśūla he started killing all. His body was growing every day. Therefore, he was called Vṛtrāsura.

Preparation of Vajrāyudha

Harassed by Vṛtrāsura Indra and other deities approached the Supreme God. He advised them to go to Dadhīchi, ask for his bones and get a weapon made out of it. Indra proceeded to fight against Vṛtrāsura with this weapon. There was a terrible fight between Indra and Vṛtra on the bank of Narmadā. Indra cut the two arms of Vṛtrāsura. Vṛtrāsura swallowed him. However, Indra came out with the help of Nārāyaṇa kavacha. He cut Vṛtrāsura into pieces. A light came out of Vṛtrāsura's body and Vṛtrāsura attained Vaikuntha.

Indra hides himself under the stalk of lotus

When Indra killed Vṛtrāsura he was afflicted by Brahmahatyā. To escape from this he ran all over the world. Nobody came to his help. He went to Mānasa

Sarovara and hid himself under the stalk of a lotus. In the absence of Indra, king Nahuṣa was put in Indra's position. Indra remained in Mānasa Sarovara for thousand years. Lakṣmi present in the lotus warded off his brahmahatyā sin. The sages helped him to perform Aśvamedha sacrifice. Indra returned to svarga. Nahuṣa who was put in the position of Indra during Indra's absence became arrogant by the pomp of Indra's position and desired that Śachi should serve him as his wife. Śachi was worried. However, she found out a way out. She suggested to Nahuṣa that she would accept him if he comes seated in a palanquin carried by the great seven sages. He asked the sages to carry him. As he was moving sage Agastya cursed him to become a snake. He became a snake and fell down.

The story of Chitraketu

King Parikṣit was surprised by the way Vṛtrāsura's life ended. He was not able to understand how a cruel person like Vṛtrāsura could come out of his body in the form of light and attain the feet of God. How he could get devotion to God suddenly. He asked Śuka to explain the secret of this event. Śuka explained it by telling the story of Chitraketu.

There was a king Chitraketu in Śurasena country. He had all wealth and glory. He had many wives. However, he had no children. Once, sage Angirasa arrived at his palace. Chitraketu appealed to him to tell the way to get a son. Angirasa knew that he would not be happy by getting a son. However, he advised him to perform Putrakāmeṣṭi yāga. Chitraketu performed the same and got a son through his chief queen Kṛtadyuti. He loved his son intensely. He fondled him. He became more attached to the Chief-Queen. This created jealousy among other queens. They poisoned the boy. He died. This made Chitraketu and his queen very unhappy. They started crying. At this stage Angirasa came again. he revived the life of the boy and made the very Jīva of the boy to speak. The Jīva said 'I have wandered into many births and deaths and lived with many as my parents, brothers and relatives. Strictly speaking they are nobody to me and I am nobody to them. Just as sand particles in a river move, join each other, and are separated, the Jīva also meets different people in different births. There is no real relation of them. Therefore, I am nobody to you and you are nobody to me.

यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः ।
संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥

This made the king to realise that he should not grieve for the death of the boy. He relinquished his wealth and kingdom and appealed to Nārada who was also

present to teach him about the God. Nārada taught him a hymn that enabled him to get the grace of the God Vāsudeva with his Vyūha form. He meditated on the God with this hymn and got the power to move over the sky and any place.

Chitraketu is cursed by Pārvati to be born as demon

With the power to move over the sky, Chitraketu was moving everywhere freely. Once, he saw Śiva and Pārvati surrounded by the sages and Śiva embracing Pārvati. Chitraketu laughed at them. Pārvati became angry and cursed him to be born as demon. Consequently he was born as Vṛtrāsura. However, as he was a devotee of Vāsudeva he attained him when he died as Vṛtrāsura.

The birth of Maruts

After narrating Chitraketu's episode Śuka gives the details of the progeny of Aditi and Diti. He briefly narrates the progeny of the twelve sons of Aditi and proceeds to narrate the progeny of Diti. The two powerful sons of Diti viz Hiraṇya Kaśipu and Hiraṇyākṣa are well known. When these two were killed by Narasimha and Varāha respectively, Diti was upset. She thought Indra was behind this killing. She approached Kaśyapa and requested him to give her a son who could kill Indra. He advised her to perform Punsavana strictly following the rules of austerity. Indra wanted to foil her efforts. He went to her pretending to serve her during her Vrata. He was waiting for an opportunity when she would break the rule of austerity even slightly. One evening, she was very tired and dozed. At this moment Indra entered into her womb with his Vajrāyudha assuming very subtle form. He hit the womb and cut into seven pieces. He hit each piece and cut it again into seven pieces. These started crying. Indra consoled them as '*mā ruda* and *mā ruda*'. Therefore, these were called Maruts. Indra considered them as his brothers and admitted them into the group of Maruts.

The Punsavana Vrata which enabled the children of Diti to survive in spite of being cut by Vajrāyudha is to be performed by women to protect their womb. It has to be started on a good day during the bright half of the month of Mārgaśira and closed in the month of Kārtika. It should be observed for one full year.

Commentators of Bhāgavata tātparyānirṇaya and Srimad Bhagavata Yadupatyācharya

In the introduction to the I Volume of Srimad Bhagavata published by us a brief note on all commentators of Srimad Bhagavata is added. Among these the

commentary of Sri Yadupatyācharya is on first five Skandhas and on a portion of Seventh Skandha. Therefore, a detailed note on Sri Yādupatyacharya is given here. Sri Yādupatyacharya was younger brother of Sri Vedeśatirtha and studied under him. He flourished between 1550-1630 A.D. He was an elder contemporary of Sri Vidyadhiśatirtha. He has nine works to his credit. Among these his commentary on Nyāyasudhā, Srimad Bhagavata and Tātparyanirṇaya are most important.

Apart from his contribution to Dvaita studies through his works, he produced distinguished disciples who also made rich contribution. Among these Srinivasatirtha is most important. He has thirty six works to his credit. He has commented on major works like Nyāyāmṛtam, Nyāyasudhā and Ṛgbhāṣya and also on Daśaprakaraṇas and some upaniṣads. His style is very simple and lucid. He makes very subtle doctrinal points very clear. He was a contemporary of Sri Raghavendratirtha. His commentaries are widely used because of their simplicity and clarity.

Sri Satyadharmatirtha

Sri Satyadharmatirtha has commented on VI to XII skandhas of Bhagavata. He has ten works to his credit. Among these his commentaries on Bhagavata, Rāmāyaṇa and a portion of Mahābhārata are important. He explains the grammatical structure of the words in Bhāgavata in a very subtle way and obtains deep philosophical import. He was a poet of a high order and many subhashitas composed by him are quoted by scholars. Diwan Purṇayya of Mysore and Balaji Peswa of Pune were his contemporaries and were his devotees. His purvaśrama family name was Navaratna. His descendents still continue with this name. He flourished between 1740 to 1818.

Sri Chetty Venkatadri

He has commented upon VI Skandha of Srimad Bhagavatam. Details of his family background and his other works are not known. Full details of these commentaters are given by Dr. B.N.K. Sharma in his monumental work viz History of Dvaita Vedanta and its literature.

Mahāmahopādhyāya
Prof. K.T. Pandurangi
Hon. Director, Dvaita Vedanta Studies
and Research Foundation

ಶ್ರೀಮದ್ ಭಾಗವತ

ಐದನೆಯ ಸ್ಕಂಧದ ಕಥಾಸಾರ

ಪ್ರಿಯವ್ರತರಾಜನ ವೃತ್ತಾಂತ

ಐದನೆಯ ಸ್ಕಂಧವು ಸ್ವಾಯಂಭುವ ಮನುವಿನ ಮಗನಾದ ಪ್ರಿಯವ್ರತ ರಾಜನ ವೃತ್ತಾಂತದಿಂದ ಆರಂಭವಾಗುತ್ತದೆ. ಪ್ರಿಯವ್ರತನು ನಾರದ ಮಹರ್ಷಿಗಳಿಂದ ಪರಮಾತ್ಮನ ವಿಷಯವನ್ನೂ ಮೋಕ್ಷಸಾಧನೆಯ ಉಪಾಯವನ್ನೂ ತಿಳಿದುಕೊಂಡು ರಾಜ್ಯಭಾರದಲ್ಲಿ ಆಸಕ್ತಿಯಿಲ್ಲದವನಾದನು. ಅವನ ತಂದೆಯಾದ ಸ್ವಾಯಂಭುವ ಮನುವು ನೀನು ರಾಜ್ಯಭಾರದ ಜವಾಬುದಾರಿಯನ್ನು ಬಿಡಬೇಡ. ಪ್ರಜೆಗಳನ್ನು ರಕ್ಷಿಸುವುದು ರಾಜನ ಕರ್ತವ್ಯ ಎಂದು ತಿಳಿಸಿ ಹೇಳಿದರೂ ಅವನು ರಾಜ್ಯಭಾರವನ್ನು ವಹಿಸಲು ಒಪ್ಪಲಿಲ್ಲ. ಆಗ ಸ್ವತಃ ಬ್ರಹ್ಮದೇವರೇ ಪ್ರತ್ಯಕ್ಷರಾಗಿ ''ರಾಜ್ಯಭಾರವನ್ನು ವಹಿಸುವುದು ರಾಜನ ಕರ್ತವ್ಯವು. ಇದು ಆತ್ಮೋದ್ಧಾರಕ್ಕೆ ಪ್ರತಿಬಂಧಕವಾಗುವುದಿಲ್ಲ. ಸಾಂಸಾರಿಕ ವಿಷಯಗಳಲ್ಲಿ ಅತಿಯಾಗಿ ಆಸಕ್ತರಾಗುವುದು ಆತ್ಮೋದ್ಧಾರಕ್ಕೆ ಪ್ರತಿಬಂಧಕವಾಗುವುದು. ಭಗವದರ್ಪಣ ಬುದ್ಧಿಯಿಂದ ವಿಹಿತಕರ್ಮವನ್ನು ಮಾಡುವುದು ಪ್ರತಿಬಂಧಕವಲ್ಲ. ಕಾಮಕ್ರೋಧಾದಿ ಅರಿಷಡ್ವರ್ಗಗಳನ್ನು ಬಿಡದವರು ಅರಣ್ಯದಲ್ಲಿದ್ದರೂ ಭಯವು ತಪ್ಪಿದ್ದಲ್ಲ. ಆದರೆ ಇಂದ್ರಿಯ ನಿಗ್ರಹವುಳ್ಳವರಾಗಿ ಪರಮಾತ್ಮ ನಿಷ್ಠರಾಗಿದ್ದವರಿಗೆ ಗೃಹಸ್ಥಾಶ್ರಮ ಕರ್ತವ್ಯ ನಿರ್ವಹಣೆಯು ಯಾವ ತೊಂದರೆಯನ್ನೂ ಕೊಡುವುದಿಲ್ಲ'' ಎಂದು ಉಪದೇಶಿಸಿದರು.

ಭಯಂ ಪ್ರಮತ್ತಸ್ಯ ವನೇಷ್ವಪಿ ಸ್ಯಾತ್
ಯತೋ ವಸಂತೇ ಸಹ ಷಟ್ ಸಪತ್ನಾಃ ।
ಜಿತೇಂದ್ರಿಯಸ್ಯಾತ್ಮರತೇಃ ಬುಧಸ್ಯ
ಗೃಹಾಶ್ರಮಃ ಕಿಂ ನು ಕರೋತ್ಯವದ್ಯಮ್ ॥

ಈ ರೀತಿಯಾದ ಬ್ರಹ್ಮನ ಉಪದೇಶವನ್ನು ಸ್ವೀಕರಿಸಿ ಪ್ರಿಯವ್ರತನು ರಾಜ್ಯಭಾರವನ್ನು ಕೈಕೊಂಡನು.

ಅವನು ಬರ್ಹಿಷ್ಮತೀ ಎಂಬವಳನ್ನು ಮದುವೆಯಾದನು. ಅವಳಲ್ಲಿ ಹತ್ತುಜನಗಂಡು ಮಕ್ಕಳನ್ನೂ ಊರ್ಜಸ್ವತೀ ಎಂಬ ಮಗಳನ್ನೂ ಪಡೆದನು. ತನ್ನ ಇನ್ನೊಬ್ಬ ಹೆಂಡತಿಯ ಉದರದಿಂದ ಉತ್ತಮ ಮೊದಲಾದ ಮೂರು ಜನ ಗಂಡು ಮಕ್ಕಳನ್ನು ಪಡೆದನು.

ಸೂರ್ಯನು ಅಂತರಿಕ್ಷದಲ್ಲಿ ಸಂಚರಿಸುತ್ತಾ ಪೃಥ್ವಿಯ ಅರ್ಧಭಾಗಕ್ಕೆ ಹಗಲಲ್ಲಿ ಬೆಳಕು ಬೀರಿ ರಾತ್ರಿಯಲ್ಲಿ ಕತ್ತಲೆಯಲ್ಲಿ ಮುಳುಗುವಂತೆ ಮಾಡುವುದನ್ನು ಇನ್ನರ್ಧಕ್ಕೂ ಇದೇ ರೀತಿಯಾಗಿ ಮಾಡುವುದನ್ನೂ ಕಂಡ ಪ್ರಿಯವ್ರತರಾಜನು, ಇದು ಸರಿಯಲ್ಲವೆಂದು ಭಾವಿಸಿ ಭಗವಂತನ ಉಪಾಸನೆಯನ್ನು ಮಾಡಿ ಅದ್ಭುತ ಸಾಮರ್ಥ್ಯವನ್ನು ಪಡೆದು ಸೂರ್ಯ ರಥಕ್ಕೆ ಸಮಾನವಾದ ರಥವನ್ನು ಪಡೆದು ಸೂರ್ಯನು ಪೃಥ್ವಿಯ ಒಂದು ಭಾಗದಲ್ಲಿದ್ದಾಗ ತಾನು ಇನ್ನೊಂದು ಭಾಗದಲ್ಲಿದ್ದು ಭೂ ಪ್ರದೇಶವನ್ನು ರಥದ ಕಾಂತಿಯಿಂದ ಬೆಳಗುತಿದ್ದನು. ಇವನು ಪೃಥ್ವಿಯ ಸುತ್ತಲೂ ಸಂಚರಿಸುತ್ತಿದ್ದಾಗ ಇವನ ರಥದ ಗಾಲಿಯ ಓಟದಿಂದ ಸಪ್ತ ಸಮುದ್ರಗಳಾದವು. ಈ ಸಮುದ್ರಗಳಿಂದ ಬೇರ್ಪಟ್ಟ ಭೂಭಾಗಗಳೇ ಸಪ್ತ ದ್ವೀಪಗಳಾದವು. ಇವುಗಳನ್ನು ತನ್ನ ಏಳು ಮಂದಿ ಮಕ್ಕಳಿಗೆ ಹಂಚಿಕೊಟ್ಟನು. ತನ್ನ ಮಗಳಾದ ಊರ್ಜಸ್ವತಿಯನ್ನು ಶುಕ್ರಾಚಾರ್ಯರಿಗೆ ಕೊಟ್ಟು ಮದುವೆ ಮಾಡಿದನು. ಇವಳ ಉದರದಲ್ಲಿ ದೇವಯಾನಿ ಎಂಬ ಕನ್ಯೆಯು ಜನಿಸಿ ಯಯಾತಿ ರಾಜನನ್ನು

ಮದುವೆಯಾದಳು. ಪ್ರಿಯವ್ರತನು ಬಹುಕಾಲ ರಾಜ್ಯವನ್ನಾಳಿ ಮುಂದೆ ವಿರಕ್ತನಾಗಿ ಜಂಬೂದ್ವೀಪದ ರಾಜ್ಯಭಾರವನ್ನು ತನ್ನ ಮಗನಾದ ಆಗ್ನೀಧ್ರನಿಗೆ ಒಪ್ಪಿಸಿ ಗಂಧಮಾದನ ಪರ್ವತವನ್ನಾಶ್ರಯಿಸಿ ತಪಸ್ಸನ್ನಾಚರಿಸುತ್ತ ಯೋಗ ಬಲದಿಂದ ಉತ್ತಮ ಪುರುಷಾರ್ಥವನ್ನು ಪಡೆದನು.

ಇವನ ಮಗನಾದ ಆಗ್ನೀಧ್ರನು ಪೂರ್ವಚಿತ್ತಿ ಎಂಬುವಳನ್ನು ಮದುವೆಯಾದನು. ನಾಭಿ, ಕೆಂಪು ಕಿಂಪುರುಷ ಹರಿವರ್ಷ ಇತ್ಯಾದಿ ಒಂಬತ್ತು ಜನ ಮಕ್ಕಳನ್ನು ಪಡೆದನು. ಜಂಬೂದ್ವೀಪವನ್ನು ಒಂಬತ್ತು ವಿಭಾಗ ಮಾಡಿ ಇವರನ್ನು ಈ ವಿಭಾಗಗಳಿಗೆ ರಾಜರನ್ನಾಗಿ ಮಾಡಿದನು. ಆಗ್ನೀಧ್ರನು ಅನೇಕ ಯಾಗಗಳನ್ನು ಮಾಡಿ ಪಿತೃಲೋಕವನ್ನು ಪಡೆದನು. ಇವನ ನಂತರ ಇವನ ಮಗನಾದ ನಾಭಿಯು ರಾಜನಾದನು. ಇವನಿಗೆ ಮಕ್ಕಳಾಗದ್ದರಿಂದ ಕಠಿಣವಾದ ತಪಸ್ಸನ್ನು ಮಾಡಿ ನಿನಗೆ ಸಮನಾದ ಮಗನನ್ನು ನನಗೆ ಕೊಡು ಎಂದು ಪರಮಾತ್ಮನನ್ನು ಪ್ರಾರ್ಥಿಸಿದನು. ಪರಮಾತ್ಮನು ಸ್ವತಃ ತಾನೇ ಋಷಭ ಎಂಬ ಹೆಸರಿನಿಂದ ಇವನ ಮಗನಾಗಿ ಅವತರಿಸಿದನು.

ಋಷಭದೇವನ ವೃತ್ತಾಂತ

ಋಷಭನ ಪಾದಗಳಲ್ಲಿ ಚಕ್ರಾಂಕನಗಳಿದ್ದವು. ಇವು ಅವನು ಪರಮಾತ್ಮನ ಅವತಾರ ಎಂಬುದನ್ನು ಸೂಚಿಸುತ್ತಿದ್ದವು. ಇವನು ಜಯಂತಿ ಎಂಬುವಳನ್ನು ಮದುವೆಯಾಗಿ ನೂರು ಜನ ಮಕ್ಕಳನ್ನು ಪಡೆದನು. ಇವರಲ್ಲಿ ಭರತ ಎಂಬುವನು ಶ್ರೇಷ್ಠನಾಗಿದ್ದನು.

ಋಷಭನು ತನ್ನ ಪ್ರಜೆಗಳು ಧರ್ಮಮಾರ್ಗದಲ್ಲಿ ನಡೆಯುವಂತೆ ಮಾಡಿದನು. ನೂರು ಯಾಗಗಳನ್ನು ಮಾಡಿದನು. ಸಮಸ್ತ ಪೃಥ್ವಿಯ ಮೇಲೆ ಸಂಚಾರ ಮಾಡಿ ಬ್ರಹ್ಮಾವರ್ತಕ್ಕೆ ಬಂದನು. ಅಲ್ಲಿರುವ ಋಷಿಗಳನ್ನು ಕುರಿತು ಉಪದೇಶ ಮಾಡಿದನು. ಮಾನವನು ತನ್ನ ಜನ್ಮವನ್ನು ಸಾರ್ಥಕ ಮಾಡಿಕೊಳ್ಳಲು ದೊಡ್ಡವರ ಸೇವೆಯನ್ನು ಮಾಡಬೇಕು. ಪ್ರಶಾಂತಮನಸ್ಸಿನವರೂ ಕಾಮಕ್ರೋಧರಹಿತರೂ ಸಚ್ಚರಿತ್ರರೂ ಎಲ್ಲರಲ್ಲಿಯೂ ಸಧ್ಭಾವವುಳ್ಳವರೂ ಕೇವಲ ತಮ್ಮ ಹೆಂಡರುಮಕ್ಕಳಲ್ಲಿ ಮಾತ್ರ ಆಸಕ್ತರಾಗದಿರುವವರೂ ನಿಜವಾದ ದೊಡ್ಡವರು. ಮರಬಳ್ಳಿಗಳಿಗಿಂತ ಇತರ ಜೀವಿಗಳು ಶ್ರೇಷ್ಠರು, ಇತರ ಜೀವಿಗಳಿಗಿಂತ ಮನುಷ್ಯರು ಶ್ರೇಷ್ಠರು. ಗುರುಹಿರಿಯರಲ್ಲಿ ಭಕ್ತಿ, ಲೋಭವಿಲ್ಲದಿರುವುದು, ಸುಖದುಃಖಗಳನ್ನು ತಡೆದುಕೊಳ್ಳುವದು, ಸಕಲಪ್ರಾಣಿಗಳಲ್ಲಿ ದಯೆಯನ್ನು ತೋರುವದು, ಭಗವದರ್ಪಣ ಬುದ್ಧಿಯಿಂದ ಕರ್ಮಗಳನ್ನು ಮಾಡುವದು, ಭಗವಂತನನ್ನು ವರ್ಣಿಸುವದು ಅವನ ಪಾದಗಳಿಗೆ ಶರಣಾಗತರಾಗುವದು ಇವೆಲ್ಲ ಸಾಧುಗಳ ಲಕ್ಷಣಗಳು ಎಂದು ಉಪದೇಶಿಸಿದನು. ಬ್ರಹ್ಮಾವರ್ತದಿಂದ ಮರಳಿಬಂದಮೇಲೆ ರಾಜ್ಯಭಾರವನ್ನು ತನ್ನ ಮಗನಾದ ಭರತನಿಗೆ ಒಪ್ಪಿಸಿ ಅವಧೂತ ವೃತ್ತಿಯನ್ನು ಅವಲಂಬಿಸಿ ಭೂಮಿಯ ಮೇಲೆಲ್ಲ ಸಂಚರಿಸತೊಡಗಿದನು. ಅಜಗರ ವೃತ್ತವನ್ನು ಕೈಕೊಂಡು ಸರ್ಪದಂತೆ ನೆಲದ ಮೇಲೆ ಉರುಳಿಬಿಡುತ್ತಿದ್ದನು. ಪರಮ ವೈರಾಗ್ಯವುಳ್ಳವನಾಗಿ ಮೈಮೇಲೆ ಬಟ್ಟೆಯನ್ನು ಹಾಕಿಕೊಳ್ಳುವುದನ್ನೂ ಬಿಟ್ಟುಬಿಟ್ಟನು. ದಟ್ಟವಾದ ಅರಣ್ಯದಲ್ಲಿ ಸಂಚರಿಸುತ್ತಿರುವಾಗ ಕಾಡುಕಿಚ್ಚಿಗೆ ಆಹುತಿಯಾದನು.

ಭರತನ ವೃತ್ತಾಂತ

ಋಷಭನ ಮಗನಾದ ಭರತನು ಪಂಚಾಗ್ನಿ ಎಂಬವಳನ್ನು ಮದುವೆಯಾಗಿ ಸುಮತಿ ಮೊದಲಾದ ಐದು ಜನ ಮಕ್ಕಳನ್ನು ಪಡೆದನು. ಪ್ರಜಾಪಾಲನ ದಕ್ಷನಾಗಿ ರಾಜ್ಯಭಾರವನ್ನು ಮಾಡಿ ಪ್ರಜೆಗಳು ಧರ್ಮಮಾರ್ಗದಲ್ಲಿ ನಡೆಯುವಂತೆ ಮಾಡಿದನು. ಯಾಗಗಳನ್ನು ಮಾಡುವಾಗ ವಿಷ್ಣುವನ್ನು ಮುಖ್ಯದೇವತೆಯನ್ನಾಗಿಯೂ ಇನ್ನಿತರ

ದೇವತೆಗಳನ್ನು ಅಂಗದೇವತೆಗಳನ್ನಾಗಿಯೂ ಆರಾಧಿಸಿ ವಿಷ್ಣುವಿನ ಪ್ರತ್ಯಕ್ಷ ದರ್ಶನವನ್ನು ಪಡೆಯುತ್ತಿದ್ದನು. ಹತ್ತುಸಾವಿರ ವರ್ಷ ರಾಜ್ಯಭಾರ ಮಾಡಿ, ರಾಜ್ಯವನ್ನು ಮಕ್ಕಳಿಗೆ ಒಪ್ಪಿಸಿ ಚಕ್ರಾನದಿಯ ತೀರದಲ್ಲಿದ್ದ ಶಾಲಿಗ್ರಾಮ ಕ್ಷೇತ್ರಕ್ಕೆ ಹೋದನು. ಅಲ್ಲಿ ಪ್ರತಿದಿನವೂ ಪ್ರಾತಃಕಾಲದಲ್ಲಿ ಸೂರ್ಯನಮಸ್ಕಾರವನ್ನು ಮಾಡುವಾಗ ಸೂರ್ಯಮಂಡಲದಲ್ಲಿ ಶ್ರೀನಾರಾಯಣನ ದರ್ಶನ ಮಾಡುತ್ತಿದ್ದನು. ಇವನ ಶ್ರೇಷ್ಠ ವ್ಯಕ್ತಿತ್ವದಿಂದಾಗಿಯೇ ಇವನ ರಾಜ್ಯವು ಭರತವರ್ಷವೆಂದು ಪ್ರಸಿದ್ಧವಾಯಿತು.

ಭರತನಿಗೆ ಜಿಂಕೆಯ ಜನ್ಮ

ಒಂದು ದಿನ ಭರತನು ನದಿಯ ದಂಡೆಯ ಮೇಲೆ ಧ್ಯಾನ ಮಾಡುತ್ತ ಕುಳಿತಾಗ ನದಿಯ ಆಚೆಯ ದಂಡೆಯಿಂದ ಒಂದು ಜಿಂಕೆಯು ಈ ದಂಡೆಗೆ ಹಾರಿತು. ಸಮೀಪದಲ್ಲಿದ್ದ ಸಿಂಹದ ಧ್ವನಿಯನ್ನು ಕೇಳಿ ಗಾಬರಿಯಾಗಿ ಈ ಜಿಂಕೆಯು ಹಾರಿತ್ತು. ಗರ್ಭಿಣಿಯಾದ ಈ ಜಿಂಕೆಯ ಉದರದಿಂದ ಒಂದು ಜಿಂಕೆಯ ಮರಿಯು ಜನಿಸಿತು. ತಾಯಿ ಜಿಂಕೆಯು ಪ್ರಾಣತ್ಯಾಗ ಮಾಡಿತು. ಇದನ್ನು ನೋಡಿ ಭರತನಿಗೆ ಕನಿಕರವುಂಟಾಗಿ ಆ ಜಿಂಕೆಯ ಮರಿಯನ್ನು ಎತ್ತಿಕೊಂಡು ಸಾಕಿದನು. ಅದಕ್ಕೆ ಎಳೆಯ ಹುಲ್ಲನ್ನು ತಿನ್ನಿಸುವುದು, ಹಾಲು ಕುಡಿಸುವುದು, ಮೈ ತೊಳೆಯುವದು ಇತ್ಯಾದಿ ನಾನಾ ರೀತಿಯಿಂದ ಅದರ ಸೇವೆಯನ್ನು ಮಾಡಿದನು. ಹೀಗಿರುವಾಗ ಒಂದು ದಿನ ಆ ಜಿಂಕೆಯು ಅವನ ಕಣ್ಣು ತಪ್ಪಿ ಸಿ ಎಲ್ಲಿಗೋ ಓಡಿ ಹೋಯಿತು. ಅವನು ಎಷ್ಟು ಹುಡುಕಿದರೂ ದೊರೆಯಲಿಲ್ಲ. ಅದರ ಮೇಲಿನ ವಾತ್ಸಲ್ಯದಿಂದ ಅದರ ಚಿಂತೆಯೇ ಅವನಿಗೆ ಹೆಚ್ಚಾಗಿ ಅವನ ಧ್ಯಾನಾದಿಗಳು ಶಿಥಿಲವಾದವು. ಅವನು ಮೃತ್ಯುಶಯ್ಯೆಯಲ್ಲಿ ಇದ್ದಾಗಲೂ ಆ ಜಿಂಕೆಯ ಚಿಂತೆಯನ್ನೇ ಮಾಡುತ್ತಿದುದರಿಂದ ಮುಂದಿನ ಜನ್ಮದಲ್ಲಿ ಅವನು ಜಿಂಕೆಯಾಗಿಯೇ ಜನಿಸಿದನು. ಅವನು ಜಿಂಕೆಯಾಗಿ ಹುಟ್ಟಿದಾಗಲೂ ಅವನಿಗೆ ಹಿಂದಿನ ಜನ್ಮದ ಸ್ಮರಣೆಯಿದ್ದಿತು. ತಾನು ಜಿಂಕೆಯಲ್ಲಿ ಅತಿಯಾಗಿ ಆಸಕ್ತನಾದದ್ದಕ್ಕೆ ವ್ಯಥೆಯಾಯಿತು. ಆದ್ದರಿಂದ ಜಿಂಕೆಯ ಜನ್ಮದಲ್ಲಿದ್ದರೂ ಅವನು ತಾನು ಹಿಂದೆ ಇದ್ದ ಶಾಲಿಗ್ರಾಮ ಕ್ಷೇತ್ರಕ್ಕೆ ಹೋಗಿ ವೈರಾಗ್ಯವನ್ನು ತಾಳಿ ಕೇವಲ ಶರೀರ ರಕ್ಷಣೆಗೆ ಬೇಕಾಗುವಷ್ಟು ಮಾತ್ರ ಆಹಾರವನ್ನು ತೆಗೆದುಕೊಂಡು ಮರಣದ ಸಮಯ ಬಂದಾಗ ನದಿಯಲ್ಲಿ ಹಾರಿ ಪ್ರಾಣಬಿಟ್ಟನು.

ಭರತನು ಜಡಭರತನಾಗಿ ಜನಿಸಿದನು

ಶಾಲಿಗ್ರಾಮ ಕ್ಷೇತ್ರದ ಹತ್ತಿರ ಆಂಗಿರಸ ಗೋತ್ರದ ಓರ್ವ ಬ್ರಾಹ್ಮಣನಿದ್ದನು. ಅವನಿಗೆ ಮೊದಲನೆಯ ಹೆಂಡತಿಯಿಂದ ಒಂಬತ್ತು ಜನ ಮಕ್ಕಳಾಗಿದ್ದರು. ಎರಡನೆಯ ಹೆಂಡತಿಯಿಂದ ಒಬ್ಬಳು ಮಗಳು ಮತ್ತು ಒಬ್ಬ ಮಗನು ಆಗಿದ್ದರು. ಜಿಂಕೆಯಾದ ಭರತನೇ ಈ ಎರಡನೆಯ ಮಗನಾಗಿ ಜನಿಸಿದ್ದನು. ಮೊದಲನೆ ಒಂಬತ್ತು ಮಕ್ಕಳು ಬುದ್ಧಿವಂತರೂ ವಿದ್ಯಾವಂತರೂ ಆಗಿದ್ದರು. ಆದರೆ ಈ ಕೊನೆಯ ಮಗನು ಅತಿ ದಡ್ಡನ ಹಾಗೆ ವರ್ತಿಸುತ್ತಿದ್ದನು. ಇದರಿಂದ ತಂದೆಗೆ ತುಂಬ ವ್ಯಥೆಯಾಯಿತು. ಆದರೂ ಇವನಿಗೆ ಉಪನಯನ ಮಾಡಿ ಗಾಯತ್ರೀ ಮಂತ್ರೋಪದೇಶವನ್ನು ಮಾಡಿದರೆ ಸರಿಯಾಬಹುದು ಎಂದು ಯೋಚಿಸಿದನು. ಮುಂದೆಯೂ ಇವನು ಜಡನಾದ್ದರಿಂದ ತಂದೆಯು ಅತಿದುಃಖಿತನಾಗಿ ಮೃತನಾದನು. ಇವನ ತಾಯಿಯು ಮೃತಳಾದಳು. ಇವನ ಅಣ್ಣಂದಿರು ಇವನನ್ನು ಹೀಯಾಳಿಸಿ ಜಡಭರತ ಎಂದು ಕರೆಯುತ್ತಿದ್ದರು.

ಈ ಜಡಭರತನು ಅತ್ತಿಂದ ಇತ್ತ ಒಬ್ಬನೇ ಓಡಾಡತೊಡಗಿದನು. ಸಮೀಪದ ಒಂದು ಗ್ರಾಮದ ಮುಖ್ಯಸ್ಥನಿಗೆ ಮಕ್ಕಳನ್ನು ಪಡೆಯುವದಕ್ಕಾಗಿ ಭದ್ರಕಾಳೀ ದೇವಿಗೆ ಒಂದು ಮನುಷ್ಯ ಬಲಿಯನ್ನು ಕೊಡಬೇಕಾಗಿತ್ತು. ಅವನು ತನ್ನ ಸೇವಕರಿಗೆ ಬಲಿ ಕೊಡಲು ಯೋಗ್ಯರಾದ ಓರ್ವ ಮನುಷ್ಯನನ್ನು ತರಲು

ಹೇಳಿದನು. ಆ ಸೇವಕರು ಈ ಜಡಭರತನನ್ನು ತೆಗೆದುಕೊಂಡು ಹೋದರು. ಇವನನ್ನು ಭದ್ರಕಾಳಿಯ ಎದುರಿಗೆ ನಿಲ್ಲಿಸಿ ಕೊಲ್ಲಲು ಖಡ್ಗವನ್ನು ಎತ್ತಿದಾಗ ಭದ್ರಕಾಳಿಯು ಮೂರ್ತಿಯಿಂದ ಹೊರಗೆ ಬಂದು ಕೊಲ್ಲಲು ಖಡ್ಗವನ್ನು ಎತ್ತಿದ ಆ ಸೇವಕನನ್ನೂ ಗ್ರಾಮದ ಆ ಮುಖ್ಯಸ್ಥನನ್ನೂ ಕೊಂದುಬಿಟ್ಟು ಮತ್ತೆ ತನ್ನ ಮೂರ್ತಿಯಲ್ಲಿ ಸೇರಿಹೋದಳು. ಜಡಭರತನು ಮತ್ತೆ ಅಲ್ಲಲ್ಲಿ ಸುತ್ತಾಡತೊಡಗಿದನು.

ಹೀಗಿರುವಾಗ ಇನ್ನೊಂದು ವಿಚಿತ್ರ ಘಟನೆಯು ನಡೆಯಿತು. ಸೌವೀರ ದೇಶದ ರಾಜನಾದ ರಾಹುಗಣ ಎಂಬ ರಾಜನು ಪಲ್ಲಕ್ಕಿಯಲ್ಲಿ ಕುಳಿತು ಕಪಿಲ ಮಹರ್ಷಿಯ ದರ್ಶನಕ್ಕೆ ಹೊರಟಿದ್ದನು. ಆ ಪಲ್ಲಕ್ಕಿಯನ್ನು ಎತ್ತಿ ಒಯ್ಯಲು ಅವನಿಗೆ ಒಬ್ಬ ಮನುಷ್ಯನ ಕೊರತೆಯಾಗಿತ್ತು. ಅವನ ಸೇವಕರು ಜಡಭರತನನ್ನು ಕರೆತಂದು ಪಲ್ಲಕ್ಕಿಯನ್ನು ಹೊರುವಂತೆ ಮಾಡಿದರು. ಅವನಿಗೆ ಪಲ್ಲಕ್ಕಿಯನ್ನು ಹೊರುವ ಅಭ್ಯಾಸವಿಲ್ಲದ್ದರಿಂದ ಅವನು ತಪ್ಪು ಹೆಜ್ಜೆ ಹಾಕತೊಡಗಿದನು. ಇದರಿಂದ ಕುಪಿತನಾದ ರಾಜನು ನಿನಗೆ ಗಟ್ಟಿಮುಟ್ಟಾದ ಶರೀರವಿದ್ದರೂ ಸರಿಯಾಗಿ ಹೆಜ್ಜೆಯನ್ನು ಹಾಕಲು ಬರುವುದಿಲ್ಲ. ನೀನು ಶುದ್ಧ ಅಪ್ರಯೋಜಕ ಎಂದು ಹೀಯಾಳಿಸಿದನು. ಇದಕ್ಕೆ ಜಡಭರತನು ನಾನು ಈ ಶರೀರಕ್ಕಿಂತ ಭಿನ್ನನು. ಈ ಶರೀರಕ್ಕೆ ಆಗುವ ಸುಖದುಃಖಗಳು ನನಗೆ ತಟ್ಟುವುದಿಲ್ಲ ಎಂದು ಹೇಳಿದನು. ಇದನ್ನು ಕೇಳಿ ರಾಜನು ಇವನು ಸಾಮಾನ್ಯ ಮನುಷ್ಯನಲ್ಲ, ಜ್ಞಾನಿಯು ಎಂದು ತಿಳಿದು ತನಗೆ ಉಪದೇಶ ಮಾಡಬೇಕೆಂದು ಪ್ರಾರ್ಥಿಸಿದನು. ನನಗೆ ಇಂದ್ರನ ವಜ್ರಾಯುಧದ ಅಥವಾ ಯಮನ ಪಾಶದ ಹೆದರಿಕೆಯಿಲ್ಲ. ಆದರೆ ಬ್ರಾಹ್ಮಣರ ಕೋಪದ ಹೆದರಿಕೆಯಿದೆ ಎಂದು ಹೇಳಿದನು.

ಜಡಭರತನು ರಾಹೂಗಣ ರಾಜನಿಗೆ ಉಪದೇಶಿಸತೊಡಗಿದನು. ಆತ್ಮನು ಪರಿಶುದ್ಧನಾದವನು. ಆದರೆ ಶರೀರವನ್ನು ಧರಿಸಿದಾಗ ಜ್ಞಾನವನ್ನು ಪಡೆಯಲು ಪ್ರಯತ್ನಿಸದೆ ಸಾಂಸಾರಿಕ ಕರ್ಮಗಳಲ್ಲಿ ತೊಡಗುವನು. ಸಂಸಾರದ ಆಸೆಯನ್ನು ಬಿಟ್ಟು ಪರಮಾತ್ಮನಿಗೇ ಶರಣಾಗತನಾಗಬೇಕು. ಹೀಗೆ ಉಪದೇಶಿಸಿ ಜಡಭರತನು ತನ್ನ ಪೂರ್ವಜನ್ಮಗಳ ವೃತ್ತಾಂತವನ್ನು ರಾಜನಿಗೆ ತಿಳಿಸುವನು. ನನ್ನ ಮೊದಲನೆ ಜನ್ಮದಲ್ಲಿ ನಾನು ಬಹಳ ವೈರಾಗ್ಯಶಾಲಿಯಾಗಿದ್ದೆನು. ಆದರೆ ಕೊನೆಗೆ ಒಂದು ಜಿಂಕೆಯ ಮೇಲೆ ಮೋಹವುಳ್ಳವನಾಗಿ ಸಾಯುವಾಗಲೂ ಅದನ್ನು ಕುರಿತೇ ಚಿಂತಿಸಿದ್ದರಿಂದ ಜಿಂಕೆಯಾಗಿಯೇ ಜನಿಸಿದೆನು. ಆಗ ನನಗೆ ಪೂರ್ವಜನ್ಮದ ಸ್ಮರಣೆಯಿದ್ದಿದ್ದರಿಂದ ಜಿಂಕೆಯಲ್ಲಿ ಮೋಹವನ್ನು ತಾಳಿದ್ದಕ್ಕೆ ವ್ಯಥೆ ಪಟ್ಟು ಜಿಂಕೆಯ ಜನ್ಮದಲ್ಲಿಯೇ ವೈರಾಗ್ಯವನ್ನು ತಾಳಿದೆನು. ಈಗ ಮತ್ತೆ ಬ್ರಾಹ್ಮಣನ ಮಗನಾಗಿ ಹುಟ್ಟಿ ವೈರಾಗ್ಯವುಳ್ಳವನಾಗಿರುವೆನು. ನೀನು ಕೂಡ ಸಂಸಾರದಲ್ಲಿ ವೈರಾಗ್ಯವನ್ನು ತಾಳಿ ಪರಮಾತ್ಮನಲ್ಲಿ ಭಕ್ತಿಯನ್ನು ಮಾಡಿ ಆತ್ಮೋದ್ಧಾರವನ್ನು ಮಾಡಿಕೊ ಎಂದು ಹೇಳಿದನು.

ಭೂಮಂಡಲ, ದ್ವೀಪ, ಸಮುದ್ರಗಳ ವರ್ಣನೆ

i) ಜಂಬೂದ್ವೀಪದ ಒಂಬತ್ತು ವಿಭಾಗಗಳು -

೧. ಇಲಾವೃತ	೨. ಅಜನಾಭ	೩. ಕಿಂಪುರುಷ
೪. ಹರಿವರ್ಷ	೫. ಭದ್ರಾಶ್ವ	೬. ರಮ್ಯಕ
೭. ಹಿರಣ್ಮಯ	೮. ಕುರುವರ್ಷ	೯. ಕೇತುಮೂಲ

ii) ಒಂಬತ್ತು ಪರ್ವತಗಳು

೧. ಮೇರು	೨. ನೀಲ	೩. ಶ್ವೇತ
೪. ಶೃಂಗವಂತ	೫. ನಿಷಧ	೬. ಹೇಮಕೂಟ
೭. ಹಿಮಾಲಯ	೮. ಮಲಯವಂತ	೯. ಗಂಧಮಾದನ.

iii) ಮೇರುವಿನ ಸುತ್ತಲೂ ಇದ್ದ ನಾಲ್ಕು ಪರ್ವತಗಳು -

೧. ಮಂದಾರ ೨. ಮೇರು ಮಂದಾರ

೩. ಸುಪಾರ್ಶ್ವ ೪. ಕುಮುದ

iv) ನಾಲ್ಕು ವೃಕ್ಷರಾಶಿಗಳು

೧. ಚ್ಯೂತ ೨. ಜಂಬೂ

೩. ಕದಂಬ ೪. ನ್ಯಗ್ರೋಧ

v) ನಾಲ್ಕು ಉಪವನಗಳು

೧. ನಂದನ ೨. ಚೈತ್ರರಥ

೩. ವೈಭ್ರಾಜಕ ೪. ವಿಶ್ವತೋಭದ್ರ

vi) ಎರಡು ಮಹಾನದಿಗಳು

೧. ಅರುಣೋದಯ - ಮಂದಾರದ ಪೂರ್ವಕ್ಕೆ

೨. ಜಂಬೂ ನದೀ- ಮಂದಾರದ ದಕ್ಷಿಣಕ್ಕೆ

vii) ಎರಡು ಮಹಾವೃಕ್ಷಗಳು

೧. ಮಹಾ ಕದಂಬ - ಸುಪಾಶ್ವ ಪರ್ವತದ ಮೇಲೆ

೨. ನೂರುಶಾಖೆಗಳಿರುವ ವಟವೃಕ್ಷ ಕುಮುದ ಪರ್ವತದ ಮೇಲೆ

viii) ಮೇರು ಪರ್ವತದ ಮೇಲೆ ಮತ್ತು ಸುತ್ತಲೂ ಇರುವ ಮಹಾನಗರಗಳು.

೧. ಶಾತಕುಂಭೀ - ಮೇರು ಪರ್ವತದ ಮೇಲೆ. ಅಮರಾವತೀ

೨. ತೇಜೋವತೀ ೩. ಸಂಯಮಿನೀ ೪. ಕೃಷ್ಣಾಂಗನಾ

೫. ಶ್ರದ್ಧಾವತೀ ೬. ಗಂಧವತೀ ೭. ಮಹೋದಯಾ

೮. ಯಶೋವತೀ - ಮೇರು ಪರ್ವತದ ಎಂಟು ದಿಕ್ಕುಗಳಲ್ಲಿ.

ವಿಷ್ಣುಪದಿಯಾಗಿ ಗಂಗಾನದಿಯ ಉಗಮ

ಭಗವಂತನು ವಾಮನಾವತಾರದಲ್ಲಿ ಬಲಿ ಚಕ್ರವರ್ತಿಯನ್ನು ಮೂರು ಪಾದ ಸ್ಥಳವನ್ನು ದಾನ ಕೊಡಲು ಬೇಡಿದನು. ಅವನು ಒಪ್ಪಲು ಮೂರನೆಯ ಪಾದಕ್ಕೆ ಸ್ಥಳದಲ್ಲಿದ್ದಾಗ ಅದನ್ನು ಅಂತರಿಕ್ಷಕ್ಕೆ ಚಾಚಿದನು. ಅದು ಬ್ರಹ್ಮಾಂಡದ ತುದಿಯನ್ನು ಮುಟ್ಟಿ ಅದರಲ್ಲಿ ಸ್ವಲ್ಪ ಬಿರುಕನ್ನು ಉಂಟು ಮಾಡಿತು. ಬಿರುಕಿನಿಂದ ಬ್ರಹ್ಮಾಂಡದ ಹೊರಗಿರುವ ನೀರು ಒಳಗೆ ಬಂದಿತು. ಇದು ವಿಷ್ಣುವಿನ ಪಾದ ಸ್ಪರ್ಶದಿಂದ ಬಂದದ್ದರಿಂದ ಇದಕ್ಕೆ ವಿಷ್ಣುಪದಿ ಎಂಬ ಹೆಸರಾಯಿತು. ಮುಂದೆ ಈ ನೀರು ಮೇರುಪರ್ವತದ ಬ್ರಹ್ಮಗಿರಿ ಎಂಬ ಶಿಖರದ ಮೇಲೆ ಬಿದ್ದು ನಾಲ್ಕು ದಿಕ್ಕುಗಳಲ್ಲಿಯೂ ಹರಿದು (೧) ಸೀತಾ (೨) ಅಲಕನಂದಾ (೩) ಚಕ್ಷು (೪) ಭದ್ರಾ, ಎಂಬ ನಾಲ್ಕು ಮಹಾನದಿಗಳಾಗಿ ಹರಿಯಿತು. ಅಲಕನಂದಾ ನದಿಯು ಹಿಮಾಲಯಕ್ಕೆ ಬಂದು ಭರತ ವರ್ಷದಲ್ಲಿ ಹರಿದು ಸಮುದ್ರವನ್ನು ಸೇರಿತು.

ix) ಜಂಬೂ ದ್ವೀಪದ ಒಂಬತ್ತು ವಿಭಾಗಗಳಲ್ಲಿ ಇರುವ ಪರಮಾತ್ಮನ ರೂಪಗಳು

೧. ಇಳಾವೃತ- ಸಂಕರ್ಷಣ	೨. ಭದ್ರಾಶ್ವ - ಹಯಗ್ರೀವ	೩. ಹರಿವರ್ಷ - ನರಸಿಂಹ
೪. ಕೇತುಮೂಲ - ಪ್ರದ್ಯುಮ್ನ	೫. ರಮ್ಯಕ-ಮತ್ಸ್ಯ	೬. ಹಿರಣ್ಮಯ - ಕೂರ್ಮ
೭. ಉತ್ತರ ಕುರು - ವರಾಹ	೮. ಕಿಂಪುರುಷ-ರಾಮ	೯. ಭಾರತ - ನಾರಾಯಣ

x) ಭರತವರ್ಷದ ಪರ್ವತಗಳು, ನದಿಗಳು

೧. ಮಲಯ	೨. ಮೈನಾಕ
೩. ತ್ರಿಕೂಟ	೪. ಋಷಭ
೫. ವಿಂಧ್ಯ ಇತ್ಯಾದಿ ಪರ್ವತಗಳು	

೧. ಗಂಗಾ	೨. ಸಿಂಧು	೩. ಬ್ರಹ್ಮಪುತ್ರ
೪. ಕಾವೇರಿ	೫. ಗೋದಾವರೀ	೬. ತಾಮ್ರಪರ್ಣೀ
೭. ಕೃಷ್ಣಾ	೮. ತುಂಗಭದ್ರಾ, ಮಲಾಪ ಹಾರೀ ಇತ್ಯಾದಿ ನದಿಗಳು.	

xi) ಉಪ ದ್ವೀಪಗಳು

೧. ಪ್ಲಕ್ಷದ್ವೀಪ	೨. ಶಾಲ್ಮಲೀ ದ್ವೀಪ	೩. ಕುಶದ್ವೀಪ
೪. ಕ್ರೌಂಚ ದ್ವೀಪ	೫. ಶಾಖದ್ವೀಪ	೬. ಪುಷ್ಕರ ದ್ವೀಪ

ಈ ದ್ವೀಪಗಳಲ್ಲಿ ಇರುವ ವೃಕ್ಷಗಳ ರಾಶಿಯ ಹೆಸರುಗಳಿಂದ ಈ ದ್ವೀಪಗಳಿಗೆ ಹೆಸರುಗಳನ್ನು ಇಡಲಾಗಿದೆ. ಜಂಬೂದ್ವೀಪದ ವರ್ಣನೆಯ ನಂತರ ಸೂರ್ಯ, ಚಂದ್ರ, ನಕ್ಷತ್ರಗಳು ರಾಶಿಗಳು ವರ್ಷ ಋತು, ಮಾಸ ಇವುಗಳ ವಿವರವಾದ ವರ್ಣನೆಯಿದೆ.

xii) ಪಾತಾಳ ಲೋಕಗಳು

೧. ಅತಲ	೨. ವಿತಲ	೩. ಸುತಲ
೪. ರಸಾತಲ	೫. ತಲಾತಲ	೬. ಮಹಾತಲ
೭. ಪಾತಾಲ		

ಅತಲ ಲೋಕದಲ್ಲಿ ಮಯಾಸುರನು ಸುಂದರವಾದ ಅರಮನೆಯನ್ನು ಕಟ್ಟಿರುವನು. ಸುತಲದಲ್ಲಿ ಬಲಿಚಕ್ರವರ್ತಿಯು ಇರುವನು. ಮಹಾತಲದಲ್ಲಿ ತಕ್ಷಕ ಕಾಲಿಯೂ ಸುಷೇಣ ಇತ್ಯಾದಿ ಸರ್ಪಗಳು ಇರುವವು. ಈ ಎಲ್ಲ ಲೋಕಗಳನ್ನು ಭೂಮಂಡಲವನ್ನೂ ಅನಂತನು ತನ್ನ ಸಾವಿರ ಹೆಡೆಗಳಲ್ಲಿಯ ಒಂದು ಹೆಡೆಯಮೇಲೆ ಒಂದು ಅಣುಪ್ರಮಾಣದ ಪ್ರದೇಶದಲ್ಲಿ ಧರಿಸಿರುವನು.

xiii) ನರಕಗಳು

೧) ತಾಮಿಸ್ರ (೨) ಅಂಧ ತಾಮಿಸ್ರ, (೩) ರೌರವ (೪) ಮಹಾರ್‌ರವ ಇತ್ಯಾದಿ ೨೮ ನರಕಗಳನ್ನು ಹೆಸರಿಸಿದ್ದಾರೆ. ಈ ನರಕಗಳಲ್ಲಿ ನಾನಾ ಪಾಪಗಳಿಗೆ ಕೊಡುವ ದಂಡನೆಯ ವಿವರಗಳಿವೆ. (೧) ಬೇರೆಯವರ ಆಸ್ತಿ, ಸಂಪತ್ತು, ಬಂಗಾರ ಇತ್ಯಾದಿಗಳನ್ನು ಅಪಹರಿಸುವುದು (೨) ಪರಸ್ತ್ರೀ ಸಂಪರ್ಕ (೩) ವರ್ಣಾಶ್ರಮ ಧರ್ಮಗಳ ಪರಿತ್ಯಾಗ (೪) ಅತ್ಯಧಿಕ ಸಂಪತ್ತನ್ನು ಸಂಗ್ರಹಿಸಿ ಅದನ್ನು ದುರುಪಯೋಗ ಪಡೆಸುವುದು. (೫) ಪಶು ಪಕ್ಷಿಗಳನ್ನೂ ಇನ್ನಿತರ ಜೀವಿಗಳನ್ನೂ ಕೊಲ್ಲುವದು. ಹಿಂಸಿಸುವುದು ಇವೆಲ್ಲ ಪ್ರಧಾನ ಪಾಪಗಳು.

ಮೇಲೆ ನಿರೂಪಿಸಿದ ಸಮಸ್ತ ಜಂಬೂದ್ವೀಪ, ಇದರಲ್ಲಿಯ ಎತ್ತರವಾದ ಪರ್ವತಗಳು ನದಿಗಳು ವೃಕ್ಷರಾಶಿ ಪಶುಪಕ್ಷಿಗಳು ಇವುಗಳ ಈ ವರ್ಣನೆಯಿಂದ ಭಗವಂತನ ಸೃಷ್ಟಿಯ ಮಹಿಮೆಯು ಕಣ್ಣುಮುಂದೆ ಕಟ್ಟುವದು. ಇಂಥ ವಿಶಾಲ ಸೃಷ್ಟಿಯ ಅಂಗವಾದ ಮಾನವನು ಇದಕ್ಕೆ ತಕ್ಕಂತೆ ನಡೆದುಕೊಳ್ಳಬೇಕು. ಭಗವನ್ನಿಷ್ಠೆಯನ್ನು ಬೆಳೆಸಿಕೊಳ್ಳಬೇಕು ಎಂಬ ಎಚ್ಚರ ಬರುವುದು.

ಆರನೆಯ ಸ್ಕಂಧ ಕಥಾಸಾರ

ಅಜಾಮಿಳ ವೃತ್ತಾಂತ

ಐದನೆಯ ಸ್ಕಂಧದ ಕೊನೆಯ ಕೆಲವು ಸರ್ಗಗಳಲ್ಲಿ ಅನೇಕ ಪಾತಕಗಳನ್ನು ನಿರ್ದೇಶಿಸಿ ಅವುಗಳಿಗೆ ವಿಧಿಸಲಾಗುವ ದಂಡಗಳನ್ನು ಹೇಳಲಾಗಿದೆ. ಇದನ್ನು ಓದಿದಾಗ ಈ ಪಾತಕಗಳಿಗೆ ಪರಿಹಾರವಿಲ್ಲವೇ ಎಂಬ ಪ್ರಶ್ನೆಯು ಮನಸ್ಸಿನಲ್ಲಿ ಉಂಟಾಗುವದು. ಈ ಪಾತಕಗಳ ಪರಿಹಾರಕ್ಕೆ ಪ್ರಾಯಶ್ಚಿತ್ತಗಳನ್ನೂ ಧರ್ಮಶಾಸ್ತ್ರಗಳಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ. ಈ ಪ್ರಾಯಶ್ಚಿತ್ತಗಳಿಂತ ಹೆಚ್ಚಿನ ಉಪಾಯವೊಂದಿದೆ. ಭಗವಂತನ ಪಾದಗಳಿಗೆ ಶರಣಾಗತನಾಗುವುದೇ ಆ ದೊಡ್ಡ ಉಪಾಯ. ಇದನ್ನು ತಿಳಿಸಿ ಹೇಳಲು ಅಜಾಮಿಳನ ಕಥೆಯನ್ನು ಆರನೆಯ ಸ್ಕಂಧದಲ್ಲಿ ಹೇಳಿದ್ದಾರೆ.

ಕಾನ್ಯಕುಬ್ಜನಗರದಲ್ಲಿ ಅಜಾಮಿಳ ಓರ್ವ ಬ್ರಾಹ್ಮಣನು ಇದ್ದನು. ಅವನು ವೇದಶಾಸ್ತ್ರಗಳನ್ನು ಚೆನ್ನಾಗಿ ಓದಿ ಸದಾಚಾರ ಸಂಪನ್ನನಾಗಿ ಜೀವಿಸುತ್ತಿದ್ದನು. ಆದರೆ ಒಂದು ದಿನ ದುರ್ದೈವದಿಂದ ಅವನು ಅರಣ್ಯದಲ್ಲಿ ಓರ್ವ ಸುಂದರಳಾದ ಸ್ತ್ರೀಯು ಓರ್ವ ಪುರುಷನೊಡನೆ ಯಥೇಚ್ಛವಾಗಿ ಸಂಭೋಗದಲ್ಲಿ ತೊಡಗಿದ್ದನ್ನು ನೋಡಿದನು. ಅವನಿಗೂ ಅವಳೊಡನೆ ಸಂಭೋಗ ಮಾಡಬೇಕೆಂಬ ಆಸೆಯುಂಟಾಯಿತು. ಅವಳನ್ನು ಕೇಳಲು ಅವಳು ಸುಲಭವಾಗಿ ಒಪ್ಪಿಕೊಂಡಳು. ಅವಳನ್ನು ತನ್ನ ಮನೆಗೆ ಕರೆದುಕೊಂಡು ಬಂದು ಅವಳೊಡನೆ ಯಥೇಚ್ಛವಾಗಿ ಸಂಭೋಗವನ್ನು ಮಾಡುವುದರಲ್ಲಿಯೇ ಕಾಲ ಕಳೆದನು. ಅಲ್ಲದೆ ಮದ್ಯಪಾನ, ಜೂಜಾಟ ಪಶುಪಕ್ಷಿಗಳನ್ನು ಕೊಲ್ಲುವುದು ಹಿಂಸಿಸುವುದು ಇತ್ಯಾದಿ ಕ್ರೂರ ಕರ್ಮಗಳಲ್ಲಿಯೇ ಕಾಲವನ್ನು ಕಳೆದನು. ಅವನಿಗೆ ಹತ್ತುಜನ ಮಕ್ಕಳಾದರು. ಕೊನೆಯ ಮಗನಿಗೆ ನಾರಾಯಣ ಎಂದು ಹೆಸರಿಟ್ಟನು. ಈ ಕೊನೆಯ ಮಗನ ಮೇಲೆ ಅವನಿಗೆ ತುಂಬ ಪ್ರೀತಿಯೆದ್ದಿತು. ಕಾಲಾಂತರದಲ್ಲಿ ಅವನಿಗೆ ಮೃತ್ಯುಕಾಲವೂ ಒದಗಿತು. ಅವನನ್ನು ಒಯ್ಯಲು ಯಮದೂತರು ಬಂದರು. ಅವರನ್ನು ನೋಡಿ ಗಾಬರಿಯಾಗಿ ನಾರಾಯಣ ಎಂದು ಕೊನೆಯ ಮಗನನ್ನು ಕೂಗಿದನು. ಆಗ ವಿಷ್ಣು ದೂತರು ಬಂದರು ಮತ್ತು ಯಮದೂತರು ಅವನ ಪ್ರಾಣವನ್ನು ಒಯ್ಯುವುದನ್ನು ತಡೆದರು. ಆಗ ಯಮದೂತರು ಇವನು ಅನೇಕ ಪಾಪಗಳನ್ನು ಮಾಡಿದ್ದರಿಂದ ಇವನನ್ನು ಯಮಲೋಕಕ್ಕೆ ಒಯ್ಯಲು ಬಂದಿರುವೆವು. ನಮ್ಮನ್ನು ಏಕೆ ತಡೆಯುವಿರಿ ಎಂದು ವಿಷ್ಣುದೂತರನ್ನು ಕೇಳಿದರು. ಅದಕ್ಕೆ ವಿಷ್ಣುದೂತರು ಇವನು ನಾರಾಯಣ ನಾಮ ಸ್ಮರಣೆ ಮಾಡಿದ್ದರಿಂದ ಎಲ್ಲ ಪಾಪಗಳಿಂದಲೂ ಮುಕ್ತನಾಗಿದ್ದಾನೆ. ಈ ವಿಷಯ ಇನ್ನೂ ಹೆಚ್ಚು ತಿಳಿದುಕೊಳ್ಳಬೇಕೆಂದರೆ ನಿಮ್ಮ ಒಡೆಯ ಯಮನನ್ನೇ ಕೇಳಿರಿ ಎಂದರು.

ಮೃತ್ಯುಶಯ್ಯೆಯಲ್ಲಿದ್ದ ಅಜಾಮಿಳನು ಇವರ ಮಾತುಗಳನ್ನು ಕೇಳುತ್ತಿದ್ದನು. ತಾನು ಮಾಡಿದ ಪಾಪಗಳಿಗಾಗಿ ಪಶ್ಚಾತ್ತಾಪ ಪಟ್ಟನು. ದೇವರ ದಯಾಮಯತೆಯನ್ನು ಮನಸ್ಸಿನಲ್ಲಿಯೇ ಕೊಂಡಾಡಿದನು. ಮೃತ್ಯುವಿನಿಂದ

ಪಾರಾದ ಅವನು ಗಂಗಾತೀರಕ್ಕೆ ಹೋಗಿ ಪರಮಾತ್ಮನ ಧ್ಯಾನದಲ್ಲಿ ತೊಡಗಿದನು. ವಿಷ್ಣುದೂತರು ಮತ್ತೆ ಬಂದು ಅವನನ್ನು ವಿಮಾನದಿಂದ ಭಗವಂತನ ಸನ್ನಿಧಿಗೆ ಕರೆದೊಯ್ದರು.

ಯಮದೂತರು ಯಮಲೋಕಕ್ಕೆ ಮರಳಿಬಂದು ಯಮಧರ್ಮನೇ ಈ ಲೋಕವನ್ನು ಆಳಲು ಒಬ್ಬನೇ ದೇವನಿರುವನೋ ಅನೇಕರಿರುವರೋ? ಈ ಲೋಕವನ್ನು ನಿಜವಾಗಿ ಆಳುವವರು ಯಾರು? ನಿನ್ನ ಆಜ್ಞೆಯನ್ನು ಕಾರ್ಯಗತಗೊಳಿಸಲು ಹೋದಾಗ ಕೆಲವರು ನಮ್ಮನ್ನು ತಡೆದರು. ಇದರಿಂದ ನಿನಗಿಂತ ದೊಡ್ಡವರು ಯಾರೋ ಇರುವರು ಎಂದೆನಿಸುವುದು. ಅನೇಕ ದೇವರುಗಳು ಈ ಜಗತ್ತಿನ ಒಡೆಯರಾಗಿದ್ದರೆ ಅವ್ಯವಸ್ಥೆಯಾಗುವುದು.

ಈ ಮಾತನ್ನು ಕೇಳಿ ಯಮಧರ್ಮನು ತುಸು ಹೊತ್ತು ಧ್ಯಾನ ಮಗ್ನನಾಗಿ ನಡೆದ ವಿಷಯವನ್ನು ತಿಳಿದುಕೊಂಡನು. ನನಗಿಂತ ಶ್ರೇಷ್ಠನಾದ ಸರ್ವೋತ್ತಮನಾದ ನಾರಾಯಣನಿರುವನು. ಅವನ ಅಧೀನರಾಗಿಯೇ ನಾವೆಲ್ಲ ಕಾರ್ಯ ಮಾಡುವೆವು. ನಾರಾಯಣನಿಗೆ ಶರಣಾಗತನಾಗಿ ಅವನ ನಾಮವನ್ನು ಉಚ್ಚರಿಸುವವನು ಎಲ್ಲ ಪಾಪಗಳಿಂದಲೂ ಮುಕ್ತನಾಗುವನು ಎಂದು ಹೇಳಿದನು.

ಪ್ರಾಚೇತಸನ ಸಂತಾನ ಪರಂಪರೆ

ಪ್ರಾಚೀನ ಬರ್ಹಿಯ ಮಕ್ಕಳಾದ ಪ್ರಚೇತಸರು ಅನೇಕ ವರ್ಷಗಳ ಕಾಲ ಸಮುದ್ರದಲ್ಲಿ ಇದ್ದರು. ಅವರು ಹೊರಗೆ ಬಂದ ಮೇಲೆ ಸಮಸ್ತ ಭೂ ಪ್ರದೇಶವು ಅರಣ್ಯ ಮತ್ತು ವೃಕ್ಷಗಳಿಂದ ತುಂಬಿ ಹೋದದ್ದನ್ನು ಕಂಡು ತಮ್ಮ ಬಾಯಿಂದ ಬೆಂಕಿ ಮತ್ತು ಗಾಳಿಯನ್ನು ಸೃಷ್ಟಿಸಿ ಅರಣ್ಯವನ್ನೂ ವೃಕ್ಷಗಳನ್ನೂ ಸುಡಲು ಆರಂಭಿಸಿದರು. ಆಗ ಚಂದ್ರನು ಈ ವೃಕ್ಷಗಳೂ ಅರಣ್ಯಗಳೂ ಪಶು ಪಕ್ಷಿ ಮತ್ತು ಇತರ ಜೀವಿಗಳ ರಕ್ಷಣೆಗಾಗಿ ಇರುವವು ಆದ್ದರಿಂದ ಇವುಗಳನ್ನು ಸುಡಬೇಡಿರಿ. ಭಗವಂತನು ಸಂತಾನವನ್ನು ಮುಂದುವರೆಸಲು ನಿಮಗೆ ಆಜ್ಞೆ ಮಾಡಿದ್ದಾನೆ. ವೃಕ್ಷಗಳಿಂದ ಸಾಕಿ ಬೆಳೆಸಲ್ಪಟ್ಟ ಮಾರಿಷಾ ಎಂಬ ಕನ್ಯೆಯನ್ನು ಮದುವೆಯಾಗಿ ಸಂತಾನವನ್ನು ಮುಂದುವರೆಸಿರಿ ಎಂದು ಹೇಳಿದನು. ಅವರು ಮಾರಿಷೆಯನ್ನು ಮದುವೆಯಾಗಿ ಓರ್ವ ಮಗನನ್ನು ಪಡೆದರು. ಅವನು ತನ್ನ ಮನಸ್ಸಿನಿಂದ ದೇವತೆಗಳು ಅಸುರರು ಮನುಷ್ಯರು ಮತ್ತು ಇತರ ಜೀವಿಗಳನ್ನು ಸೃಷ್ಟಿಸಿದನು. ಇವರು ಯಾರೂ ಉಳಿಯಲಿಲ್ಲ. ಆಗ ಅವನು ವಿಂಧ್ಯ ಪರ್ವತದ ಮೇಲಿರುವ ಅಘಮರ್ಷಣ ತೀರ್ಥಕ್ಕೆ ಹೋಗಿ ಹಂಸಗುಹ್ಯಮಂತ್ರದಿಂದ ಭಗವಂತನ ಧ್ಯಾನವನ್ನು ಮಾಡಿದನು. ಭಗವಂತನು ಗರುಡವಾಹನನಾಗಿ ಬಂದು ಪಂಚಜನ್ಯನ ಮಗಳಾದ ಅಶಿಕ್ನೀ ಎಂಬ ಕನ್ಯೆಯನ್ನು ಮದುವೆಯಾಗಲು ಹೇಳಿದನು. ಅವನು ಅವಳನ್ನು ಮದುವೆಯಾಗಿ ಹತ್ತು ಸಾವಿರ ಮಕ್ಕಳನ್ನು ಪಡೆದನು. ಅವರು ಸಿಂಧು ನದಿಯು ಸಮುದ್ರವನ್ನು ಸೇರುವ ಸ್ಥಳದಲ್ಲಿದ್ದ ನಾರಾಯಣ ಸರೋವರಕ್ಕೆ ಹೋಗಿ ಸಂತಾನವನ್ನು ಪಡೆಯಲು ತಪಸ್ಸು ಮಾಡಲು ತೊಡಗಿದರು. ಆಗ ನಾರದರು ಅಲ್ಲಿಗೆ ಬಂದು ನೀವು ಕರ್ಮ ಮಾರ್ಗದಲ್ಲಿಯೇ ಇದ್ದರೆ ಬಂಧನಕ್ಕೆ ಒಳಗಾಗುವಿರಿ. ಆದ್ದರಿಂದ ಜ್ಞಾನಮಾರ್ಗವನ್ನು ಅವಲಂಬಿಸಿರಿ ಎಂದು ಹೇಳಿದನು. ಅವರು ಸಂತಾನ ಪಡೆಯುವ ಯೋಚನೆಯನ್ನು ಬಿಟ್ಟು ಬಿಟ್ಟರು. ಇದನ್ನು ತಿಳಿದು ಪ್ರಾಚೇತಸನು ಮತ್ತೆ ಶಬಲಾಶ್ವರೆಂಬ ಸಾವಿರ ಮಕ್ಕಳನ್ನು ಪಡೆದು ಅವರಿಗೆ ಸಂತಾನವನ್ನು ಮುಂದುವರೆಸಲು ಹೇಳಿದನು. ಇವರೂ ನಾರಾಯಣ ತೀರ್ಥಕ್ಕೆ ಹೋದರು. ಇವರನ್ನೂ ನಾರದನು ಜ್ಞಾನಮಾರ್ಗದ ಕಡೆಗೆ ತಿರುಗಿಸಿದನು. ಇದರಿಂದ ಕುಪಿತನಾದ ಪ್ರಾಚೇತಸನು ನಾರದನಿಗೆ 'ನೀನು ಒಂದೇ ಸ್ಥಳದಲ್ಲಿ ನಿಲ್ಲದೆ ತ್ರಿಲೋಕ ಸಂಚಾರ ಮಾಡುತ್ತಿರು' ಎಂದು ಶಾಪವನ್ನು ಕೊಟ್ಟನು. ಆಗ ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನು ಅಲ್ಲಿಗೆ ಬಂದು ಪ್ರಾಚೇತಸನಿಗೆ ಹೆಣ್ಣು ಮಕ್ಕಳನ್ನು ಪಡೆಯಲು ಸೂಚಿಸಿದನು. ಇದರಂತೆ ಅವನು

ಅರವತ್ತು ಜನ ಹೆಣ್ಣುಮಕ್ಕಳನ್ನು ಪಡೆದನು. ಇವರಲ್ಲಿ ಹದಿಮೂರು ಕನ್ಯೆಯರನ್ನು ಕಶ್ಯಪನಿಗೂ ಇಪ್ಪತ್ತೇಳು ಕನ್ಯೆಯರನ್ನು ಚಂದ್ರನಿಗೂ ರುದ್ರ ಆಂಗಿರಸ ಮತ್ತು ಕೃಶಾಶ್ವರಿಗೆ ಇಬ್ಬಿಬ್ಬರನ್ನೂ ತಾರ್ಕ್ಷ್ಯನಿಗೆ ನಾಲ್ಕು ಕನ್ಯೆಯರನ್ನೂ ಕೊಟ್ಟು ಮದುವೆ ಮಾಡಿದನು. ಇವರಿಂದಲೇ ದೇವತೆಗಳು ಅಸುರರು ಮನುಷ್ಯರು ಮರಗಳು ಬಳ್ಳಿಗಳು ಮತ್ತು ಇನ್ನಿತರ ಎಲ್ಲ ಜೀವಿಗಳೂ ಜನಿಸಿದರು.

ವಿಶ್ವರೂಪನು ಇಂದ್ರನಿಗೆ ನಾರಾಯಣ ಕವಚವನ್ನು ಉಪದೇಶಿಸುವನು.

ಒಮ್ಮೆ ಇಂದ್ರನು ತನ್ನ ಸಭಾ ಮಂಟಪದಲ್ಲಿ ವೈಭವದಿಂದ ಕುಳಿತಿದ್ದನು. ಆದಿತ್ಯ ರುದ್ರ ವಸು ಋಷಿಗಳು ಸಿದ್ಧರು ಗಂಧರ್ವರು ಆ ಸಭೆಯಲ್ಲಿ ಕುಳಿತಿದ್ದರು. ಈ ಸಮಯದಲ್ಲಿ ಬೃಹಸ್ಪತಿಗಳು ಅಲ್ಲಿಗೆ ಬಂದರು. ಇಂದ್ರನು ಅವರ ಕಡೆಗೆ ಕಣ್ಣೆತ್ತಿಯೂ ನೋಡದೆ ತಿರಸ್ಕಾರ ಮಾಡಿದನು. ಬೃಹಸ್ಪತಿಗಳು ಸಭೆಯಲ್ಲಿ ಪ್ರವೇಶಿಸದೆ ತಿರುಗಿಹೋದರು.

ಇಂದ್ರನಿಗೆ ತನ್ನ ವರ್ತನೆ ಸರಿಯಲ್ಲವೆಂದು ತೋರಿತು. ಅವನು ಬೃಹಸ್ಪತಿಗಳ ಕ್ಷಮೆ ಕೇಳಲು ಅವರಿದ್ದಲ್ಲಿಗೆ ಹೋದನು. ಅವರು ಅದೃಶ್ಯರಾದರು. ಈ ಸನ್ನಿವೇಶದ ಲಾಭವನ್ನು ಪಡೆದು ದೈತ್ಯರು ಇಂದ್ರನ ಮೇಲೆ ಆಕ್ರಮಣ ಮಾಡಿದರು. ಇಂದ್ರನು ಬ್ರಹ್ಮನ ಮೊರೆ ಹೊಕ್ಕನು. ತ್ವಷ್ಟೃವಿನ ಮಗನಾದ ವಿಶ್ವರೂಪನನ್ನು ಬೃಹಸ್ಪತಿಯ ಸ್ಥಾನದಲ್ಲಿ ತೆಗೆದುಕೊಳ್ಳಬೇಕೆಂದು ಬ್ರಹ್ಮನು ಇಂದ್ರನಿಗೆ ಹೇಳಿದನು. ಈ ವಿಶ್ವರೂಪನು ಇಂದ್ರನಿಗೆ ನಾರಾಯಣ ಕವಚದ ಉಪದೇಶವನ್ನು ಮಾಡಿದನು. 'ಓಂ ನಮೋ ನಾರಾಯಣಾಯ' ಎಂಬ ಅಷ್ಟಾಕ್ಷರ ಮಂತ್ರವನ್ನೂ 'ಓಂ ವಿಷ್ಣುವೇನಮಃ' ಎಂಬ ಆರು ಅಕ್ಷರಗಳ ಮಂತ್ರವನ್ನೂ 'ಓಂ ನಮೋ ಭಗವತೇ ವಾಸುದೇವಾಯ' ಎಂಬ ಹನ್ನೆರಡು ಅಕ್ಷರಗಳ ಮಂತ್ರವನ್ನೂ ಉಪದೇಶಿಸಿದನು. ನಾರಾಯಣ ಕವಚವು ಭಗವಂತನ ಇಪ್ಪತ್ತುನಾಲ್ಕು ಅವತಾರಗಳ ಮಹಿಮೆಯನ್ನು ವರ್ಣಿಸುತ್ತದೆ.

ವಿಶ್ವರೂಪನು ಇಂದ್ರನಿಗೆ ನಾರಾಯಣ ಕವಚವನ್ನು ಹೇಳಿಕೊಟ್ಟಿದ್ದರೂ ಯಜ್ಞಗಳಲ್ಲಿಯ ಹವಿಸ್ಸನ್ನು ಗುಪ್ತವಾಗಿ ದೈತ್ಯರಿಗೇ ಅರ್ಪಿಸುತ್ತಿದ್ದನು. ವಿಶ್ವರೂಪನು ತಂದೆಯ ದ್ವಾರಾ ದೇವತೆಗಳ ಗುಂಪಿಗೂ ತಾಯಿಯ ದ್ವಾರಾ ದೈತ್ಯರ ಗುಂಪಿಗೂ ಸೇರಿದ್ದನು. ಆದ್ದರಿಂದ ಅವನ ವಿಧೇಯತೆಯು ದ್ವಿಮುಖವಾಗಿದ್ದಿತು. ಇಂದ್ರನಿಗೆ ಈ ವಿಷಯವು ತಿಳಿದಾಗ ವಿಶ್ವರೂಪನ ಮೂರು ತಲೆಗಳನ್ನು ಕತ್ತರಿಸಿದನು. ವಿಶ್ವರೂಪನಿಗೆ ಸೋಮಪೀತ ಸುರಾಪೀತ ಮತ್ತು ಅನ್ನಾದ ಎಂಬ ಮೂರು ತಲೆಗಳಿದ್ದವು. ಇಂದ್ರನು ಈ ತಲೆಗಳನ್ನು ಕತ್ತರಿಸಿದಾಗ ಇವು ಕಪಿಂಜಲ ಕಲವಂಕ ಮತ್ತು ತಿತ್ತಿರಿ ಪಕ್ಷಿಗಳಾದವು.

ವೃತ್ರಾಸುರನ ಜನ್ಮ

ಇಂದ್ರನು ವಿಶ್ವರೂಪನ ತಲೆಗಳನ್ನು ಕತ್ತರಿಸಿದ್ದರಿಂದ ಅವನ ತಂದೆ ತ್ವಷ್ಟಾರನಿಗೆ ಕೋಪವುಂಟಾಯಿತು. ಇಂದ್ರನನ್ನು ಕೊಲ್ಲುವಂಥ ಒಬ್ಬ ವ್ಯಕ್ತಿಯನ್ನು ಸೃಷ್ಟಿಸಲು ಅವನು ಯಾಗವನ್ನು ಕೈ ಕೊಂಡನು. ಈ ಯಾಗದ ದಕ್ಷಿಣಾಗ್ನಿಯಿಂದ ತ್ರಿಶೂಲವನ್ನು ಹಿಡಿದ ಓರ್ವ ವ್ಯಕ್ತಿಯು ಜನಿಸಿದನು. ಇವನು ಎಲ್ಲರನ್ನೂ ಕೊಲ್ಲಲು ಆರಂಭಿಸಿದನು. ಅವನ ಶರೀರವು ಪ್ರತಿ ದಿನವೂ ಬೆಳೆಯುತ್ತಿತ್ತು. ಆದ್ದರಿಂದ ಅವನನ್ನು ವೃತ್ರಾಸುರ ಎಂದು ಕರೆದರು.

ವಜ್ರಾಯುಧದಿಂದ ವೃತ್ತಾಸುರನ ಸಂಹಾರ

ವೃತ್ರಾಸುರನಿಂದ ಪೀಡಿತರಾದ ಇಂದ್ರನು ಮತ್ತು ದೇವತೆಗಳು ಭಗವಂತನಿಗೆ ಶರಣಾಗತರಾದರು. ನೀವು ಧಧೀಚಿ ಮಹರ್ಷಿಗಳ ಕಡೆಗೆ ಹೋಗಿ ಅವರ ಆಸ್ಥಿಗಳನ್ನು ಬೇಡಿ ಅದರಿಂದ ವಜ್ರಾಯುಧವನ್ನು ತಯಾರಿಸಿ ವೃತ್ತಾಸುರನ ಸಂಹಾರ ಮಾಡಿರಿ ಎಂದು ಭಗವಂತನು ಹೇಳಿದನು. ಅದನ್ನು ತಯಾರಿಸಿ ಇಂದ್ರನು ನರ್ಮದಾ ತೀರದಲ್ಲಿ ಅವನೊಡನೆ ಯುದ್ಧ ಮಾಡಿ ಅವನ ತೋಳುಗಳನ್ನು ಕಡಿದನು. ಆದರೆ ವೃತ್ರಾಸುರನು ಅವನನ್ನು ನುಂಗಿಬಿಟ್ಟನು. ಇಂದ್ರನು ನಾರಾಯಣ ಕವಚದ ಸಹಾಯದಿಂದ ಹೊರಗೆ ಬಂದು ಬಿಟ್ಟನು. ವೃತ್ರಾಸುರನನ್ನು ಚೂರು ಚೂರಾಗಿ ಮಾಡಿದನು. ವೃತ್ತಾಸುರನ ಶರೀರದಿಂದ ಒಂದು ಬೆಳಕು ಮೂಡಿ ಬಂದಿತು. ಅವನು ವೈಕುಂಠವನ್ನು ಪಡೆದನು.

ವೃತ್ತಾಸುರನ ಸಂಹಾರದಿಂದ ಇಂದ್ರನಿಗೆ ಬ್ರಹ್ಮಹತ್ಯಾದೋಷವುಂಟಾಯಿತು. ಇದನ್ನು ತಪ್ಪಿಸಿಕೊಳ್ಳಲು ಅವನು ಮಾನಸ ಸರೋವರದಲ್ಲಿಯ ಒಂದು ಕಮಲದ ದಂಟಿನಲ್ಲಿ ಅಡಗಿಕುಳಿತನು.

ನಹುಷನಿಗೆ ಇಂದ್ರಪದವಿ ಮತ್ತು ಅವನ ಪತನ

ಇಂದ್ರನು ಇಲ್ಲದಾಗ ನಹುಷನಿಗೆ ಇಂದ್ರನ ಅಧಿಕಾರವು ದೊರೆಯಿತು. ಇಂದ್ರ ಪದವಿಯ ವೈಭವದಿಂದ ಅವನು ದುರಹಂಕಾರಿಯಾಗಿ ಇಂದ್ರನ ಪತ್ನಿ ಶಚೀದೇವಿಯು ತನ್ನ ಪತ್ನಿಯಂತೆ ವರ್ತಿಸಬೇಕು ಎಂದು ಆಗ್ರಹಪಟ್ಟನು. ಇದನ್ನು ತಪ್ಪಿಸಿಕೊಳ್ಳಲು ಶಚೀದೇವಿಯು ಒಂದು ಉಪಾಯವನ್ನು ಮಾಡಿದಳು. ನಹುಷನು ಸಪ್ತರ್ಷಿಗಳಿಂದ ಹೊತ್ತು ತಂದ ಪಲ್ಲಕ್ಕಿಯಲ್ಲಿ ಬಂದರೆ ಅವನನ್ನು ಸ್ವೀಕರಿಸುವುದಾಗಿ ಹೇಳಿಕಳಿಸಿದಳು. ಮೂರ್ಖನಾದ ಅವನು ಸಪ್ತರ್ಷಿಗಳ ಪಲ್ಲಕ್ಕಿಯನ್ನು ಏರಲು ಅಗಸ್ತ್ಯನು ನೀನು ಸರ್ಪನಾಗು ಎಂದು ಶಾಪ ಕೊಟ್ಟರು. ಅವನು ಸರ್ಪನಾಗಿ ಭೂಲೋಕದ ಮೇಲೆ ಬಿದ್ದನು.

ಇಂದ್ರನು ಸ್ವರ್ಗಕ್ಕೆ ಮರಳಿ ಬರುವನು.

ಇಂದ್ರನು ಮಾನಸ ಸರೋವರದ ಕಮಲದ ದಂಟಿನಲ್ಲಿ ಒಂದು ಸಾವಿರ ವರ್ಷ ಇದ್ದನು. ಆ ಕಮಲದ ದಂಟಿನಲ್ಲಿದ್ದ ಲಕ್ಷ್ಮಿಯು ಅವನ ಬ್ರಹ್ಮಹತ್ಯಾ ದೋಷವನ್ನು ಪರಿಹರಿಸಿದಳು. ಋಷಿಗಳು ಅಶ್ವಮೇಧ ಯಾಗ ಮಾಡಲು ನೆರವಾದರು. ಅವನು ಸ್ವರ್ಗಕ್ಕೆ ಮರಳಿದನು.

ಚಿತ್ರ ಕೇತುವಿನ ವೃತ್ತಾಂತ

ವೃತ್ತಾಸುರನಂಥ ದುಷ್ಟ ವ್ಯಕ್ತಿಯ ಶರೀರದಿಂದ ಅವನ ಮರಣಕಾಲದಲ್ಲಿ ಬೆಳಕು ಬಂದು ಅವನು ವೈಕುಂಠಕ್ಕೆ ತೆರಳಿದ್ದರ ರಹಸ್ಯ ಪರೀಕ್ಷಿತ್ ರಾಜನಿಗೆ ಅರ್ಥವಾಗಲಿಲ್ಲ. ಆದ್ದರಿಂದ ಇದರ ಮರ್ಮವನ್ನು ತಿಳಿಸಬೇಕು ಎಂದು ಶುಕರನ್ನು ಕೇಳಿದನು. ಇದನ್ನು ತಿಳಿಸಲು ಶುಕರು ಚಿತ್ರಕೇತುವಿನ ವೃತ್ತಾಂತವನ್ನು ಹೇಳುವರು. ಶೂರಸೇನ ದೇಶದಲ್ಲಿ ಚಿತ್ರಕೇತು ಎಂಬ ರಾಜನಿದ್ದನು. ಅವನಿಗೆ ವಿಪುಲ ಐಶ್ವರ್ಯವೂ ವೈಭವವೂ ಇದ್ದವು. ಅನೇಕ ಪತ್ನಿಯರಿದ್ದರು. ಆದರೆ ಮಕ್ಕಳಿರಲಿಲ್ಲ. ಒಮ್ಮೆ ಅಂಗಿರಸರು ಅವನ ಅರಮನೆಗೆ ಬಂದರು. ತನಗೆ ಮಕ್ಕಳಾಗುವ ಉಪಾಯವನ್ನು ತಿಳಿಸಬೇಕೆಂದು ಅವನು ಅವರನ್ನು ಪ್ರಾರ್ಥಿಸಿಕೊಂಡನು. ಮಗನಿಂದ ಇವನಿಗೆ ಹಿತವಾಗುವುದಿಲ್ಲ ಎಂದು ಅವರಿಗೆ ತಿಳಿದಿದ್ದರೂ ಪುತ್ರಕಾಮೇಷ್ಟಿಯಾಗವನ್ನು ಮಾಡಿ ಮಗನನ್ನು ಪಡೆ ಎಂದು ಹೇಳಿದರು. ಅದನ್ನು ಮಾಡಿ ಅವನು ತನ್ನ ಹಿರಿಯ ಹೆಂಡತಿಯ ಉದರದಿಂದ ಮಗನನ್ನು ಪಡೆದನು. ಆ ಮಗನನ್ನೂ ಅವನ ತಾಯಿಯಾದ ಹಿರಿಯ ಹೆಂಡತಿಯನ್ನೂ ಬಹಳವಾಗಿ ಪ್ರೀತಿಸ ತೊಡಗಿದನು. ಇನ್ನಿತರ ಹೆಂಡಂದಿರನ್ನು ಉದಾಸೀನ ಮಾಡಿದನು. ಇದರಿಂದ ಅವರಿಗೆ ಅಸೂಯೆ ಉಂಟಾಯಿತು. ವಿಷಯವನ್ನು ಹಾಕಿ ಆ ಮಗುವನ್ನು ಕೊಂದುಬಿಟ್ಟರು. ಇದರಿಂದ ಚಿತ್ರಕೇತುವೂ ಅವನ ಹಿರಿಯ ಹೆಂಡತಿಯೂ ಬಹಳ ದುಃಖಿತರಾದರು. ಆಗ ಅಂಗಿರಸರು ಬಂದರು. ಆ ಮಗುವನ್ನು

ಜೀವಂತಗೊಳಿಸಿ ಆ ಜೀವವೇ ಚಿತ್ರಕೇತುವಿಗೆ ಉಪದೇಶಮಾಡುವಂತೆ ಮಾಡಿದರು. ಆ ಜೀವವು ಹೇಳಿತು ''ನಾನು ಅನೇಕ ಜನ್ಮಗಳನ್ನು ಪಡೆದಿದ್ದೇನೆ. ಅನೇಕ ತಂದೆ ತಾಯಿಗಳು ಅಣ್ಣ ತಮ್ಮಂದಿರು ಮತ್ತು ಇತರ ಬಂಧುಗಳನ್ನು ಕಂಡಿದ್ದೇನೆ. ಆದರೆ ನನಗೂ ಅವರಿಗೂ ನಿಜವಾಗಿಯೂ ಯಾವ ಸಂಬಂಧವೂ ಇಲ್ಲ. ನದಿಯ ಪ್ರವಾಹದಲ್ಲಿಯ ಮರಳಿನ ಕಣಗಳು ಪ್ರವಾಹದೊಡನೆ ಕೆಲಕಾಲ ಸಂಪರ್ಕವನ್ನು ಪಡೆಯುತ್ತ ಮತ್ತೆ ಬಿಟ್ಟು ಬಿಡುತ್ತವೆ ಇದರಂತೆ ನಮ್ಮ ಸಂಬಂಧವು ತಾತ್ಕಾಲಿಕವಾಗಿರುವುದು. ಆದ್ದರಿಂದ ನಿನಗೂ ನನಗೂ ಏನು ಸಂಬಂಧವಿಲ್ಲ'' ಈ ಮಾತನ್ನು ಕೇಳಿ ತಾನು ಈ ಮಗುವಿಗಾಗಿ ದುಃಖಿಸುವುದು ಸರಿಯಲ್ಲ ಎಂದು ತಿಳಿಯಿತು. ಅಲ್ಲಿಯೇ ಇದ್ದ ನಾರದರನ್ನು ತನಗೆ ಪರಮಾತ್ಮ ಜ್ಞಾನದ ಉಪಾಯವನ್ನು ತಿಳಿಸಬೇಕು ಎಂದು ಪ್ರಾರ್ಥಿಸಿದನು. ನಾರದರು ಅವನಿಗೆ ವಾಸುದೇವನು ತನ್ನ ವ್ಯೂಹರೂಪದೊಂದಿಗೆ ಪ್ರತ್ಯಕ್ಷವಾಗುವಂಥ ಮಂತ್ರವನ್ನು ಉಪದೇಶಿಸಿದರು. ಈ ಮಂತ್ರದ ಸಾಮರ್ಥ್ಯದಿಂದ ಅವನು ಆಕಾಶದಲ್ಲಿ ಮತ್ತು ತನಗೆ ಇಷ್ಟವಾದ ಪ್ರದೇಶದಲ್ಲಿ ಹಾರಾಡುವ ಸಾಮರ್ಥ್ಯವನ್ನು ಪಡೆದನು.

ಚಿತ್ರಕೇತುವಿಗೆ ಪಾರ್ವತಿಯ ಶಾಪ, ವೃತ್ರಾಸುರನಾಗಿ ಅವನ ಜನನ

ಆಕಾಶದಲ್ಲಿ ಹಾರಾಡುವ ತನ್ನ ಸಾಮರ್ಥ್ಯದಿಂದ ಚಿತ್ರಕೇತುವು ಆಕಾಶದಲ್ಲಿ ಹಾರಾಡುತ್ತಿದ್ದಾಗ ಅವನು ಶಿವ-ಪಾರ್ವತಿಯರನ್ನೂ ಅವರ ಸುತ್ತಲೂ ಋಷಿಗಳಿರುವುದನ್ನೂ ಹೀಗೆ ಋಷಿಗಳು ಇದ್ದಾಗಲೇ ಶಿವನು ಪಾರ್ವತಿಯನ್ನು ಆಲಿಂಗಿಸುತ್ತಿರುವುದನ್ನೂ ಕಂಡು ನಕ್ಕನು. ಇದರಿಂದ ಕುಪಿತಳಾದ ಪಾರ್ವತಿಯು ನೀನು ಅಸುರನಾಗಿ ಜನಿಸು ಎಂದು ಶಾಪಕೊಟ್ಟಳು. ಇದರ ಪರಿಣಾಮವಾಗಿ ಅವನು ವೃತ್ರಾಸುರನಾಗಿ ಜನಿಸಿದನು. ಆದರೆ ಮೂಲತಃ ವಾಸುದೇವನ ಭಕ್ತನಾದ್ದರಿಂದ ಮೃತನಾದ ಮೇಲೆ ವೈಕುಂಠಕ್ಕೆ ಹೋದನು.

ಮರುತ್‌ಗಳ ಜನನ

ಚಿತ್ರಕೇತುವಿನ ವೃತ್ತಾಂತವನ್ನು ನಿರೂಪಿಸಿದ ಮೇಲೆ ಶುಕರು ಅದಿತಿ ಮತ್ತು ದಿತಿಯರ ಸಂತಾನ ಪರಂಪರೆಯನ್ನು ವಿವರಿಸುವರು. ಮೊದಲು ಅದಿತಿಯ ಹನ್ನೆರಡು ಮಕ್ಕಳ ವಿವರಗಳನ್ನು ಸಂಕ್ಷಿಪ್ತವಾಗಿ ತಿಳಿಸಿ ದಿತಿಯ ಸಂತಾನವನ್ನು ವಿವರಿಸುವರು. ಇವಳ ಸಂತಾನಗಳಲ್ಲಿ ಹಿರಣ್ಯಕಶಿಪು ಮತ್ತು ಹಿರಣ್ಯಾಕ್ಷರು ಪ್ರಸಿದ್ಧರು. ಇವರನ್ನು ನರಸಿಂಹ ಮತ್ತು ವರಾಹ ರೂಪಗಳಿಂದ ಭಗವಂತನು ಸಂಹಾರ ಮಾಡಲು ಇದನ್ನು ಇಂದ್ರನೇ ಮಾಡಿಸಿರುವನು ಎಂದು ಭಾವಿಸಿ ಅದಿತಿಯು ಇಂದ್ರನನ್ನು ಕೊಲ್ಲುವಂಥ ಮಗನನ್ನು ಪಡೆಯಲು ನನಗೆ ಸಹಾಯ ಮಾಡಬೇಕು ಎಂದು ಕಶ್ಯಪರನ್ನು ಪ್ರಾರ್ಥಿಸಿದಳು. ಅವರು ನೀನು ಪುಂಸವನ ವ್ರತವನ್ನು ಮಾಡು ಎಂದು ಅವಳಿಗೆ ಹೇಳಿದರು. ಅವಳು ಆವ್ರತವನ್ನು ಆರಂಭಿಸಿದಳು. ಅದನ್ನು ಕೆಡಿಸಬೇಕು ಎಂಬ ಉದ್ದೇಶದಿಂದ ಇಂದ್ರನು ನಿನ್ನ ವ್ರತದ ಕಾಲದಲ್ಲಿ ನಾನು ನಿನ್ನ ಪರಿಚರ್ಯೆ ಮಾಡುವೆನು ಎಂದು ಹೇಳಿ ಅವಳೊಡನೆ ಇರತೊಡಗಿದನು. ಒಮ್ಮೆ ಸಾಯಂಕಾಲ ಅವಳು ಬಹಳ ಆಯಾಸವಾದ್ದರಿಂದ ತೂಕಡಿಸುತ್ತಿದ್ದಾಗ ಅತಿಸೂಕ್ಷ್ಮರೂಪದಿಂದ ತನ್ನ ವಜ್ರಾಯುಧದೊಂದಿಗೆ ಅವಳ ಉದರದಲ್ಲಿ ಪ್ರವೇಶಿಸಿ ಅವಳ ಗರ್ಭವನ್ನು ಏಳು ತುಂಡುಗಳನ್ನಾಗಿ ಕತ್ತರಿಸಿದನು. ಈ ತುಂಡುಗಳು ಅಳುತ್ತಿದ್ದಾಗ 'ಮಾರುದ ಮಾರುದ' ಎಂದು ಇಂದ್ರನು ಸಮಾಧಾನ ಪಡಿಸುತ್ತಿದ್ದನು. ಆದ್ದರಿಂದ ಅವುಗಳಿಗೆ ಮರುತ್ ಎಂಬ ಹೆಸರುಂಟಾಯಿತು. ಇಂದ್ರನು ಇವುಗಳನ್ನು ತನ್ನ ತಮ್ಮಂದಿರು ಎಂದು ಭಾವಿಸಿ ಇವುಗಳಿಗೆ ಮರುತ್‌ಗಣದಲ್ಲಿ ಅವಕಾಶ ಮಾಡಿಕೊಟ್ಟನು.

ಪುಂಸವನ ವ್ರತವನ್ನು ಮಾಡಿದ್ದರಿಂದ ದಿತಿಯ ಉದರದಲ್ಲಿದ್ದ ಮಕ್ಕಳು ವಜ್ರಾಯುಧದ ಪೆಟ್ಟು ಬಿದ್ದರೂ ಬದುಕಿದ್ದರಿಂದ ಉದರದಲ್ಲಿದ್ದ ಮಕ್ಕಳನ್ನು ರಕ್ಷಿಸಲು ಸ್ತ್ರೀಯರೆಲ್ಲ ಈ ವ್ರತವನ್ನು ಮಾಡುವದು ಬಹಳ ಉಪಯುಕ್ತವಾಗುವುದು.

ಮಹಾಮಹೋಪಾಧ್ಯಾಯ
ಪ್ರೊ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿ
ದ್ವೈತವೇದಾಂತ ಪ್ರತಿಷ್ಠಾನದ ನಿರ್ದೇಶಕರು

विषयानुक्रमणिका - पञ्चमस्कन्धः

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमोऽध्यायः

अष्टमोऽध्यायः

नवमोऽध्यायः

दशमोऽध्यायः

एकादशोऽध्यायः

द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः

षोडशोऽध्यायः

सप्तदशोऽध्यायः

अष्टादशोऽध्यायः-एकोनविंशोऽध्यायः

विंशोऽध्यायः

एकविंशोऽध्यायः

द्वाविंशोऽध्यायः

त्रयोविंशोऽध्यायः

चतुर्विंशोऽध्यायः

षष्ठः स्कन्धः

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमोऽध्यायः

अष्टमोऽध्यायः

नवमोऽध्यायः

दशमोऽध्यायः

एकादशोऽध्यायः

द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः

षोडशोऽध्यायः

सप्तदशोऽध्यायः

अष्टादशोऽध्यायः

एकोनविंशोऽध्यायः

श्रीमद् भागवतश्लोकानुक्रमणिका - पञ्चमस्कन्धः

षष्ठसन्धः

आ

प